P. 352. l. 21. (106, 1.) चौरादिकः Ca marg. तौदादिकः Ca pr. m. A. Af. B 1. M 1. R. See Dhp. 33, 56.—l. 26. (106, 2.) उष्टः कामयेते Ca sec. m. Af. उष्टः कामयेतं A. इति । उथ्यरेव कामयते B 1. स्व कामयेते Ca pr. m. उष्टः कामयतो M 1.—P. 354. l. 7. (106, 5.) शिंबाता शिंबातौ ॥ शिंवा शिंवानौ A. शिंबा शिंबानौ Af. शिवाता शिवातौ Ca. शिंवाता शिंबातौ B 1.—शिंवेन etc. ॥ शिंवेन दुःखानां तनूकरणेन हेतुना आतं व्याप्तमिति शिवृ निशाने अस्मान शिंचमिति वाऊलकात नुप्रत्यो मुक्त नि° A. शिंबेन दुःखानां तनूकरणेन हेतुना आतं व्याप्तव्यमिति शिवृ निशाने अस्मात् शिंबमिति वाऊलकात्नुप्रत्ययो मुक्त नि° Af. शंवेन दुं दुःखानां तनूंकरणेन हेतुना आनं प्राप्तव्यमिति -तिशानं अस्मा शंबमिति वाऊलकात्नुप्रत्ययो मुक्त नि° Ca. शिंवेन दुःखानां तनूकरणेन हेतुना आतं व्याप्तमिति शिंबादेशः सुखकरौ भवथः etc. B 1. The derivation of शिंब may be referred to U*n*. IV. 95 and 96. Devarâ*g*a mentions निंबबिंबशिंबहिंबडिंबस्तंबसंबाद्य इति शिनोतेर्बप्रत्ययो मुम् निपात्यते।, and he adds अततेर्धत्र्। दुःखानि तनूकुर्वन्प्राप्यते. See Nir. SS. vol. i. p. 314. I had to change हेतुनातं into हेतुनातितं, taking आतित as a causal participle.—l. 8. आज्ञादेशः A. C 2. आजादेशः Ca. B 4 sec. m. Af. CB; deest in B 1. Sâya*n*a frequently uses this आजादेशः, although the ordinary explanation of Pân. VII. 1, 39, gives no authority for it.—l. 14. Devarâ*g*a quotes, as coming from Mâdhava, a sentence which is not in our commentary, although it expresses the meaning of Sâya*n*a. After explaining शिंबाता, शतरा, and शातपंता as सुखनामानि, he says सुखवाचिनः सर्वे सुखकारयि (i. e. सुखकरेऽपि) स्थुरिति माधवः । कालचयेऽप्यग्निनोः सुखस्य विवक्षितत्वेन विशेषभेदादपुनरुक्तिः ।. He then quotes Bha*tt*abhâskara: भट्टभास्कर-

मिश्रस्तु शिंबाता सुखनामैतत् । सुखी । शंतरा । शंततरी सुखतरी । शंतपंता । शंतमी । उभयत्रापि वर्णविकारादेः (रादि) पृषोदरादित्वात् ।.—l. 15. सुखकरत्वस्य विवक्षितत्वेन ॥ सुखस्य विवक्षितत्वेन Ca. M 1. सुखकरत्वस्य विवक्षितत्वेन C 2. सुखकरत्वमस्यद्विवक्षितत्वेन B 4 sec. m. B 1. सुखकरत्वमस्य विवक्षितत्वे A. अश्विनोः सुखकरत्वस्य विवक्षितं त्वे । CB. सुखकरत्वस्यविवक्षितात्वे Af.—l. 22. पुरीषं पुष्णातेः (पुष्णतेः B 1. उष्णातेः Ca) पोषयतेर्वा A. Af. B 1. Ca. पुरीषं पृणातेः पोषयतेर्वा M 1. पुरीषं पृणातेः पूरयतेर्वा Nir. II. 22; Rv. Bh. III. 22, 4.—l. 28. (106, 6.) जभ जृभि A. जभां जृभि B 1. जभ जृभी Af. Ca. जृभी R.—श्रीणादिकोरिः Af. Ca. °कारिः A. °को रः B 1. °कोऽरिः M 1.—l. 31. तथा तुर्फरीतू तर्फितारौ Af. तथा उर्फरीऊ तर्फितारौ A. तुर्फरीभूत - - ताशौ Ca. तथा तुफरीतु फरीतारौ B 1. तथा तुर्फरी तुर्फरीतारौ M 1. R.—l. 32. इप्रत्ययः A. B 1. Ca. ईः R.—तृफ तृंफ A. Af. तृफत तृफ Ca. तृफ B 1. Cf. Dhp. 28, 27; 11, 10–17; 28, 24.—तुर्फरीतारावित्यस्य B 1. तुफरीतरावित्यस्य A. Af. मफतवादितस्य Ca. तुर्फरीतू इत्यस्य ?—l. 33. उत्वं च । अत्र निरुक्तं । A. Af. उक्तं चेत्यत्र निरुक्तं Ca. उक्तं च तत्र निरुक्तं B 1. उक्तं चात्र निरुक्ते M 1. R.—l. 34. °वित्यर्थस्तु° B 1 and Nir. °वित्यस्य तु° A. Af. Ca. R.—l. 36. तुर्फरी ॥ तुफरी Ca. तूर्फरी A. Af. M 1. तुफरीतू B 1.—°दिकोरिः A. Af. Ca. °दिरिः B 1. °दिकोऽरिः M 1. If °कोरिः here and in l. 28 were meant for °कोऽरिः at least one of the MSS. would have अरिः, as in l. 33 all the MSS. read श्रीणादिको अरीतुप्र°. See also verse 2 (फर्वर्).—उत्वं च A. Af. Ca. उक्तं च B 1. M 1. R.—P. 355. l. 2. अस्मादीकनि ॥ अस्मादिति A. Af. B 1. अस्मादिनि Ca.—फर्वतेः B 1. Af. A. पूर्वन् Ca. पर्वतेः M 1. R. In A फ and प्व are much alike. See verses 2 and 7, and cf. Dhp. 15, 67–68.—l. 3. उदन्यजेव उदन्यजे इव A. Af. उदन्यजेव दन्यजेव - Ca. उदन्यजेव B 1. M 1.—l. 4. उदन्नादेशः ॥ उदन्याः A. Af. B 1. Ca. R.—जाते रत्ने इव ॥ जाते रत्नेव B 1. जाते रत्ते इव A. Af. जाते रत्ने इव Ca. जाताविव M 1. R.—P. 356. l. 11. (106, 9.) The reading of U*n*. IV. 207 is supported by all the MSS. The reading in Aufrecht's edition, ह्रस्वसुट् च, must be wrong. There is no such word as'aptas, while apnas is a common Vedic word, and ought to be explained in the Sûtras. The Sûtra is rightly given in Böhtlingk's edition, yet in BR. we find aptas, and the same word is repeated by others. The Calcutta edition of the U*n*âdi-sûtras repeats ह्रस्वसुट् च, but Târânâtha rightly omits the word in his great Dictionary. See also Rv. Bh. I. 2, 9; 95, 4; 110, 1; X. 132, 7.—l. 20. (106, 10.) °त्वादण् Ca. °त्वाण्ः A. M 1. °त्वा B 1.—P. 357. l. 1. (106, 11.) गोष्वंतर्गोरूधस्यवः ॥ गोष्टतः गोरूपस्यवः A. गोष्टतः गोरूपं स्यवः C 2. गोष्वंतः गोरूपस्यंतः CB. गोष्टंतरथं धनं वोचतः स्यवः Ca. गोष्वंतः गोरूपस्यांतः B 4 sec. m. षोष्वंतः गोरूपस्यांतः B 1. गोष्वंतः गोरूधस्यांतःः R. See above, pp. cxxxix seq.—l. 5. दिङ्मात्रं means within a short compass, alpamâtre; cf. Târânâtha, Śabdastomamahânidhi, s. v.

P. 357. l. 9. (107.) दक्षिणां Ca. दक्षिणा A. Af. B 1. See Anukr. M. p. 42.—P. 358. ll. 3 to 5. (107, 3.) पालिनी A. Ca. पालनी Af. B 1. R. If पालनी could be taken as a nomen abstractum in the sense of पालन, तत्साध्या would yield a better meaning, and it would be possible to retain the reading of the MSS., एते न भवंति, एते would refer to the three things, पालनी, देवयागः, and दक्षिणा. We should then also have to read दक्षिणा च with A. Af. B 1, instead of दक्षिणा न

which is the reading of Ca.—l. 5. एतेभ्यो न भवति ॥ एते न भवंति A. Af. C 2. Ca. B 4. B 1. CB. एतेभ्यो न भवंति R.

P. 360. l. 31. (108.) °र्निगूढ्हा गा ॥ °र्निगूढा गा B 1. °र्निर्दूढा गा A. °निगछते Ca. °र्निरूढ्हा गा Anukr. M.—l. 32. सा Ca. Anukr. M. स A. B 1. M 1.—P. 361. l. 28. (108, 3.) कीदृक् MSS.—l. 31. The commentary is very imperfect in all the MSS. बहूनां is fem., like एकस्याः. वृत्त्यवृत्तिभ्यां refers to गवां गोपतिः. Cf. Rv. Bh. X. 47, 1.—P. 364. l. 3. (108, 10.) Before सा the MSS. add अन्यान्, possibly meant for पणीन्. Ca reads अघान् मान प्रत्याह.—l. 6. छद् अपवारणे ॥ छदः अपवारणे A. छंद् आपवा° B 1. छंद् आवरणे Ca.

P. 364. l. 30. (109, 1.) This refers to Prât. 139.—P. 365. l. 31. (109, 4.) सुछतवती A. Ca. B 4. C 2. Af. पतिवत्नी B 1. CB. M 1. R.—P. 366. l. 5. (109, 5.) एवं स्वपतिः मामलभतेति Af. एवं स्वं पतिः मालमलभतेति A. एवं स्वं पतिः मामलभतेति C 2. B 4. एवं स्वपतिं वृहस्पतिनामलभतेति Ca. एवं स्वपतिं मामलेति B 1. CB. बृहस्पतिर्मामलभतेति M 1.—l. 11. दानादनयोः Ca. दानादानयोः A. Af. B 1. M 1. See Rv. Bh. I. 108, 6.—जुहोतेर्द्वे चेति A. Af. Ca; deest in B 1. Cf. Rv. Bh. III. 31, 3; IV. 4, 2; Pân. and Kâs. III. 2, 178, 3; Un. II. 60.

P. 367. l. 20. (110, 2.) स्वादूकुरु ॥ स्वादुकुरु A. Af. B 1. Ca. M 1. R. See verse 10, and Rv. Bh. I. 119, 2; IX. 67, 31; 68, 2; 105, 1.—l. 28. (110, 3.) दानादनयोः Ca. दानादानयोः A. M 1. दानयोः Af. B 1. See above, 109, 5.—l. 32. एतान् MSS. instead of एनान्.—P. 369. l. 26. (110, 9.) The MSS. have आद्युदात्तः instead of अंतोदात्तः. The mistake is probably due to the आद्युदात्तः immediately preceding. See Rv. Bh. I. 52, 14.—P. 370. l. 7. (110, 10.) स्वादं A. B 1. Ca. स्वाद् Af. स्वादु M 1. Cf. verse 2.

P. 370. l. 17. (111.) The poet is called the first time अष्टादंष्ट्र in A. C 2. CB. B 4. Af, अष्ट्रादंष्ट्र in B 1, दिष्ट्र in Ca. The second time, अष्टादंष्ट्र in A. C 2. CB. B 4. Ca. B 1. Af; yet the right form is अष्ट्रादंष्ट्र. BR. give the wrong form, अष्टादंष्ट्र, so also Anukr. M.—l. 24. (111, 1.) बुद्ध्यनु° ॥ बुधानु° A. Af. B 1. बुद्धानु° Ca. M 1.—P. 371. l. 3. (111, 2.) अभिगमे A. Af. B 1. अभिगमने Ca. R. Dhp. 24, 31.—l. 14. (111, 3.) The end of the commentary is left out in all the MSS., but the omission is not marked. After भौवादिकः a little space is left in B 1, the other MSS. do not indicate the lacuna.—P. 372. l. 15. (111, 7.) तदानीं ॥ इदानीं A. Af. B 1. तदनु Ca.—इणः from Ca.—l. 23. (111, 8.) वक्तव्यमिति अवपवादे अच् Af. °व्यमित्यपवादेऽच् M 1. R. वस्तव्यमित्यवपवादेच B 1. वक्तव्यमिति अववादे अर A. वक्तव्य इति अवपराद् मन Ca. See Pân. III. 3, 56–57; Rv. Bh. I. 113, 1.

P. 377. l. 10. (113, 3.) भवति A. C 2. Ca. B 1. CB. B 4. Af.—P. 379. l. 3. (113, 10.) मंसैं नि° S 2 sec. m. S 1. S 4. मंसैंर्नि° S 3. S 2 pr. m.—l. 5. मंसैं । नि° P 1. P 3. P 4. मंसैः । नि° P 8.

P. 379. l. 25. (114, 1.) धिष धारणे चानशि Ca. धिषु धारणे चानश् A. B 1. धिषु धारणे चानशः Af. See Rv. Bh. III. 8, 6; VIII. 96, 6; X. 63, 1.—P. 380. l. 31. (114, 4.) Ca reads यद्वा समुंदजं सर्वतो गतो गमनं तछीलं प्रपंचजातमाविष्टवान् रुद्रा तदेवानु प्राविशदिति

श्रुतेः । वायुपदे वाह्यादिरूपेण विवेश्य सः इदं विश्वं. This looks more like part of the original commentary than a marginal note, though it is left out in all the other MSS. यद्वा समंदनं वायुरूपेण विवेश्य A. C 2. B 4. यद्वा समुद्रनं वायुरूपेण विवेश्य CB. B 1. यद्वा सुमंदनं वायुरूपेण विवेश्य Af. What is intended in Ca is evidently a distinction between the Paramâtma and the mere Vâyu, frequently discussed by the Vedânta philosophers: cf. Ved. Sûtra II. 3, 1 seq. For that purpose समुद्रं was explained as समुद्रवं सर्वतो गमनं । तच्छीलं प्रपंचजातमाविष्टवान् । . वाह्यादि might seem better than वायुरूपेण or वाय्वादिरूपेण, because the Paramâtma is never bâhya, the bâhya world beginning with âkâsa, which itself is still vibhu: âkâsâdisarvaprapañka etc. See Ved. Sûtra II. 3, 7: एतेन मातरिश्वा व्याख्यातः । एतेनाकाशोत्पत्तिप्रतिपादनेन वायोरुत्पत्तिरपि प्रतिपादिता भवतीत्यर्थः । आकाशाद्वायुरिति श्रुतेः । . But in that case we should expect वाह्य, and not वाह्यादि.—P. 381. l. 14. (114, 6.) The number of Grahas given by Sâyana is 33, not 36, unless we take the trayo dvidevatyagrahâh as six. Other Grahas may be seen in VS. VII and VIII.—P. 382. l. 6. (114, 8.) Here again Ca has its own independent reading, तदाधारत्वेन विषयाणां तद्दापदेशः आकाशादागतानि पृथिव्यग्नेजोवाय्वाकाशरूपाणि etc.

P. 383. l. 11. (115, 1.) समासांतस्यानङः स्त्रियामिष्टत्वाद्° ॥ समासांतस्य । ङः न यामिष्टत्वाद्° A. Af. समासांतस्य ङः न यामिष्टत्वाद्° C 2. समासांत ॰नि ङ स्त्रियामिष्टत्वाद्° Ca. समासांतस्याङः स्त्रियामिष्टत्वाद्° B 4 sec. m. समासांतस्याङ् न यामिष्टत्वाद्° CB. B 1.—l. 13. तर्हि स्तनपानाय न गच्छतीति ॥ तर्हि स्तनयानाय न गच्छतीति Af. नहि स्तनयाताय न गच्छतीति A. तर्हि तनपानाय न गच्छतीति B 1. तर्हि स्तनपानायेति Ca.—तथा न भवति । Ca. तथा नु भवते । A. तथा नु भवतेति Af. B 1.—l. 14. तथापि न याति ॥ तथापि नायाति A. Af. तथापि नायापि B 1. तथापि तु याति Ca.—l. 23. (115, 2.) हेतौ A. C 2. Ca. B 4. B 1. CB. Af. Cf. Pân. III. 2, 126.—l. 27. मूर्छा MSS.—P. 384. l. 19. (115, 4.) प्र शिषंतः प्रकर्षेण सिषंतः सि° ॥ प्रकर्षेण सिषंतः सि° A. B 1. Ca. प्र शिषंतः प्रकर्षेण शिषंतः शि° R.—l. 26. (115, 5.) शब्दार्थादग्निमुषी° ॥ शब्दार्थादग्नपृथ्वी° A. Af. °ग्नपृथिवी° B 1. शब्दाव्यदेशिष्ट इ° Ca. See Rv. Bh. I. 9, 1; Un. I. 151.—क्लन्प्र° ॥ चत्प्र° Ca. वन्प्र° A. Af. M 1. चन्प्र° B 1.—P. 385. l. 11. (115, 7.) It is clear that Sâyana read वसु ष्टवे, as he could not otherwise have quoted Pân. VIII. 3, 106. The Pada MSS. read वसुः स्तवे, but the Samhitâ MSS. वसु ष्टवे, which, however, may represent both वसुः स्तवे and वसु स्तवे । Though I have always given the Visarga, even where the MSS. omit it before स्त etc., yet in this passage I felt obliged to make an exception. Cf. Pân. VIII. 3, 36, 1.—l. 18. सुधितार्थात्तृप्त्यर्था इति Ca. °र्थो तृप्त्यर्था इति A. Af. °र्थो तृप्त्यर्थ इति B 1. The quotation is not in Kâs. VII. 4, 45.—l. 19 seq. The words from द्योतमाना to जनान् are given by Ca only.

P. 386. l. 10. (116.) Shadgurusishya gives Sthaura, the son of Sthûra; Colebrooke's MS. of the Anukramanî gives Sthauva; Sâyana, Sthaula in A. C 2. CB. B 1. B 4; but Sthaura in Ca.—P. 388. l. 4. (116, 6.) छंदसि A. B 1. Ca, as in X. 131, 2. Cf. Rv. Bh. I. 13, 2; 18, 1; 31, 8.—l. 16. (116, 7.) संनिपातपरिभाषाया अनित्यत्वाद्वेर्लुक् A. °परिभाषया अनित्यत्वाल्लुक् B 1. संनिपातः परिभाषायादनित्यत्वादर्द्धधातुकत्वं Ca.

See Paribhâshendusekhara 85.—l. 17. ऊयि वेत्यादुदात्तत्वं ॥ दु यि वेत्यादुदात्तत्वं A. दुपि वेत्यादुदात्तत्वं C 2. सुवेत्यादुदात्तत्वं Ca. दुः यिवेत्यादुदात्तत्वं B 4. दुः पि वे श्रु त्वादुदात्तत्वं CB. दुः यिवेत्यादुदात्तत्वं B 1.

P. 389. l. 10. (117.) °शंसावे ॥ °शंसा द्वे Ca. °शंसा चावे A. B 1. See Anukr. M. p. 43.—P. 390. l. 15. (117, 4.) व्यतिरेकेण निंदामाह ॥ व्यतिरेकेन निंदामाह Ca. व्यतिरेकान्वयाभ्यामाह A. C 2. CB. B 4. पति° B 1. Cf. verses 1 and 3.—l. 27. (117, 5.) न तिष्ठंती° Ca. न पश्यंती° B 1. नितिष्ठंती° A. M 1.—l. 30. °संगतिकरणेत्या° B 1. संगतिकरणेत्वा° Ca. °संगतकरणेत्या° A. M 1. Sâyaṇa evidently reads with the Kâs., °संगतिकरणमिश्रीकरणपथिष्विति, not with the Mahâbhâshya, °संगतकरणयोः. The reading of the Kâs. is also mentioned in the Mahâbh. (apara âha, etc.). In X. 119, 4, Ca. B 1 read °संगतिकरणे°, A again °संगतकरणे°.

P. 393. l. 31. (119.) लवरूपं ॥ बलरूपं A. लव - रूपं Ca. लय ॥ रूपं B 1. लव° M 1. R.—l. 32. लवरूपा° A. लवरूपा° Ca. लव° M 1. R; left out in B 1.—l. 33. लव B 1. Ca. Anukr. M. लव A. M 1. R.—P. 394. l. 29. (119, 6.) छदि etc. ॥ छदि अपवारणे चुरादीनामित्यण्यंतदण्यंतत्वात् भावे लुडि B 1. अदी अपावरणे चुरादीनामित्यण्यंतत्वादच णावभावे लुडि A. छदि आवरणे । चुरादीनामिति ण्यंतत्वादचाजनातेर्लुडि Ca. Cf. Rv. Bh. III. 9, 7; 12, 3; X. 108, 10; Dhp. 32, 41; 34, 27; 35, 80.—P. 395. l. 25. (119, 11.) अकार्षं ॥ अकार्षं MSS.—P. 396. l. 1. (119, 12.) नामौ ॥ लामौ B 1. लमौ A. नतो Ca. नमौ M 1. R.

P. 398. l. 3. (120, 3.) प्रजात्या इति ॥ प्राजापत्या इति A. Af. Ca. M 1. R. प्रजात्याया इति B 1.—P. 399. l. 1. (120, 6.) स्तुवः क्सेय्यश्छंदसि and क्सेय्यप्रत्ययः ॥ स्तुवः स्क्येय्याछंदसि and स्क्येय्यप्र° A. स्तुवः स्क्येय्यछंदसि and स्क्यय्यप्र° Af. स्तव क्सेय्यः छंदसि and क्सेप्रत्ययः Ca. स्तुवस्क्येय्यः छंदसि श्रीणादिको सेय्यप्रत्ययः B 1. स्तुवः स्क्येय्य° etc. M 1. R. The Un. has क्येय्य, if indeed the reading there, as explained by the commentary, is correct.

P. 402. l. 5. (121, 4.) प्राच्यारंभा आग्नेय्याद्याः कोणदिश ईशानांता वा ॥ प्रारंभाः अग्नेय्याद्याः कोणदिशः ईशितव्याः A. C 2. Af; Ca leaves out all except दीशतव्याः. प्रारंभा आग्नेयाद्याः कोणदिशः ईशितव्याः B 4. प्रारंभा आग्नेयाद्याः कोणादेशे ईशतव्याः B 1. प्राच्यारंभा आग्नेय्याद्याः कोणदिशः ईशान्यन्ताः R. See Preface to the Sixth Volume of the First Edition, above, pp. cxxxviii seq., and Prof. Peterson's remarks in 'The Academy,' June 23, 1888, p. 434, and Hymns from the Rig-veda (Bombay, 1888), p. 247.—l. 11. (121, 5.) उन्नूर्णं विशेषागहनरूपं वा ॥ र्णविशेषा गहनरूपा वा B 1. R. Peterson. °रूपा तता A. Af. र्णा विशेषागहनरूपा Ca.—l. 33 to p. 403. l. 1. (121, 7.) The words यद्यस्मात् to यद्वा are given in Ca only, which reads धारयंत्यः आपो ह अपो ह आप एक व विश्वमायन् सर्वं जगदापूरयन् यत् यस्मात्तत् तस्माद्धेतोः देवानां देवादीनां सर्वेषां प्राणिनां असु प्राणभूतः एकः प्रजापतिः समवर्तत समजायत । यद्वा । यत् यं गर्भं दधानाः आपो. I have adopted it in the text, because it seems required by what comes before. A. Af. B 1 have धारयंत्यः आपो ह आप एव विश्वमायन् सर्वं जगद्व्याप्नुवन् यत् यं गर्भं दधाना आपो.

P. 405. l. 31. (122, 5.) नोऽस्माभिः MSS.

P. 407. l. 22. (123, 2.) There is a lacuna between आकाशे or आकाशस्य and इमं वेनं in all the MSS. In A. C 2. B 4 the lacuna is mentioned in the text, पंक्तिरिका त्यक्तास्ति; in B 1 there are dots to indicate it; in CB and Ca the commentary goes

on without any indications of an omission. So also in R, where we read आवाशीस्त इमं वेमं etc.—P. 409. l. 5 seq. (123, 7.) गवि गन् धृग्नो व इति and गम्भा॰ ॥ गवि गं धृग्नो व इति (गंधिग्यो गाव इति pr. m.) and गम्भा॰ Ca. गविगंधृग्नोव इति and गंभा॰ R. गवि धं धृग्नो व इति and गंभा॰ A. गवि धृग्नो व इति and गंभा॰ B 1. See Rv. Bh. I. 22, 14; III. 38, 6.

P. 411. l. 28. (124, 7.) दंशसंजघ्वंजां A. B 1; lacuna in Ca.—l. 31. वेमं कुर्वाणाः A. B 1. Ca. वेमं कृण्वानाः R.

P. 415. l. 16. (126.) शिलूषपुत्रस्य कुल्मलबर्हिषस्य Ca. शिलूषपुत्रस्य कुल्मुलवर्हिषस्य A. शिलूषपुत्रकुल्मलर्हिष B 1.—l. 18. शैलूषः कुल्मलबर्हिषो Ca. शैलूषः कुल्मुलवर्हिषो A. शल्मुषं कुल्मलबर्हिवो B 1. See Anukr. M. pp. 43, 162.—P. 416. l. 17. (126, 4.) अनुकूले वेवे CB. B 1. B 4 pr. m. °लवे° B 4 sec. m. अनुकूलवेये A. C 2. अनुकूलावद्य Ca.

P. 418. l. 17. (127, 4.) छांदसः शपो लुक्. See, however, the explanation in the next verse.

P. 422. l. 4. (128, 8.) शब्द्यमानः A. शंस्यमानः Ca. M 1. पृक्तमानः B 1. See टुषु शब्दे, Dhp. 24, 27.

P. 422. l. 21. (129.) सृष्टिस्थितिप्रलयादीनां ॥ सृष्टिस्थित्यादिप्रलयादीनां A. C 2. Ca. B 4. सृष्टिस्थित्यादिः प्रलयादीनां B 1. CB. सृष्टिस्थित्यादि may have been originally an explanation of प्रलयादीनां.—l. 29. (129, 1.) तदसत् शू॰ A. B 1. तन्नासक्॰ Ca sec. m. तन्नसक्॰ Ca pr. m. तन्नासत्। शू॰ M 1. R.—P. 423. l. 1. अथ व्यावहारिकसतां A. अथ व्यवहारकसतां B 1. अथ व्यावहारिकसत्वस्य तदापि व्यवहारिकसतां Ca. अथ व्यावहारिकसत्त्वस्य। तदापि व्यावहारिकसत्ता M 1. R.—l. 4. अस्तातेर्॰ B 1. तादेर्॰ Ca. तासेर्॰ A. M 1. R.—l. 7. चाक्षेपमुखेन ॥ वाक्षेपमुखेन Ca. चापेक्षामुखेन A. C 2. चोपेक्षामुखेन B 4. B 1. CB. Both आक्षेपमुखेन, by way of objection or irony, and उपेक्षामुखेन, by way of disdain or dissent, would be applicable. आक्षेप॰ is confirmed by Sâyaṇa's commentary on TBr. II. 8, 9, 3.—l. 38. (129, 2.) शुद्ध ॥ शुभ्र A. B 1. अभ्र Ca.—P. 424. l. 8. प्रकृतिप्रत्ययाभ्यां. I can only explain this as referring to the prakṛiti of svadhâ which was given before, and to the pratyaya, the instrumental, as implying both union with and dependence on the real sat.—l. 31. (129, 3.) तद्रूपता तदात्मनां ॥ तद्रूपतां तदात्मतां A. B 4. Ca. B 1. तद्रूपतां तदात्मा तां C 2. तद्रूपतां तदात्मनां CB. I do not see how this sentence comes in here.—P. 425. l. 18. (129, 4.) बङ्गः स्यां A. बङ्ग स्यां Ca sec. m. बङ्गभ्यां Ca pr. m. B 1.—l. 19. इति श्रुत्यात्मनेत्यमवगमितेऽर्थे ॥ इति श्रुत्यात्मना इत्यमवगमितेथो (written °त थो) Ca. इति श्रुतिरात्मना इत्यमवगमि। तथो A. इति ॥ श्रुतिरात्मनेत्यमवगमनेर्थे B 1. इति। श्रुतिरात्मना इत्यमवगमितेर्थे R.—P. 426. l. 34. (129, 7.) प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधात् CB. प्रकृति श्चा दृष्टांतानुपरोधात् A. C 2. प्रकृतश्चादृष्टांतानुरोधात् Ca, with तिश्चप्र in marg. प्रकृतिश्च प्रज्ञादृष्टांतानुपरोधात् B 1. P 4. See on the whole subject the commentary to this Sûtra.

P. 427. ll. 27 to 30. (130, 1.) The passage from शतसंख्या to पालकाः is preserved in CB only, which MS., on the contrary, has its own lacuna afterwards. For after विस्तारवान् it adds यदुक्तः सर्गालोको यज्ञः यं सर्व जगत् सर्वजनेन व्याप्तः, while the other MSS. give all from पालकाः to व्याप्तः. I have added पितरः conjecturally, as the word explained by पालकाः. Though the passage in CB is far from correct, I have

given it as indicating at least how the words of the text were taken by Sâya*na*.—l. 30. स्ववयनेन ॥ सर्वजनेन A. C 2. Ca. CB. B 1. सवजने B4, with न in marg. स्वसर्जनेन? —P. 428. l. 11. (130, 2.) B 1. CB. B4 pr. m. add after °नुवादी, गावे अस्मिन्निति शोधं क्षतव्याख्यानं वा.—P. 429. l. 3. (130, 4.) टापं चापि A. C 2. आपं चैव Ca. B 1. B4. दापं चापि CB. Cf. Pâ*n*. IV. 1, 4, and Ga*n*a a*g*âdi.—l. 20. (130, 5.) आख्यद्धयादिभी A. C 2. CB. B 1. B 4. ओषध्यादिभी Ca.

P. 432. l. 23. (132.) On न्यंकुसारिणी etc., see Preface to the Sixth Volume of the First Edition, above, p. cxl seq.—P. 434. l. 15. (132, 5.) From अस्मिन्नृषौ to इति गतेः प्रकृतिस्वरत्वं all is left out in A. C 2. B4. B 1. CB.—l. 17. मित्रो वरुणो वा ॥ मित्रावरुणो वा A. C 2. मित्रावरुणौ वा Ca. मित्रावरुणो B 1. CB. मित्रावरुणौ (marg. वा) B4.—P. 435. l. 9. (132, 7.) Again from वनर्षदं to उभयत्र all is left out in A. C 2. B 4. B 1. CB.

P. 435. l. 20. (133.) °त्यतोऽनु° Ait. Âr. °त्यनु° A. M 1. R. °ति अनु° Ca. °त्यनुतो° B 1.—l. 29. (133, 1.) प्रगृह्यसंज्ञं A. °संज्ञा B 1. Ca. R.—P. 437. l. 12. (133, 5.) अधा° B 1. अथा° A. Ca. M 1.

P. 439. l. 24. (134, 5.) वियता A. Ca. C 2. B 1. B 4. CB. The explanation is unusual, but not sufficiently so to require conjectural emendation.

P. 440. l. 15. (135.) त्विति A. B 1. Ca. हि Anukr.—P. 441. l. 19 seq. (135, 3.) From पुण्यापुण्यात्मकं to शरीरात्मकं Ca only gives the text, viz. पुण्यं पुण्यकामात्मकं कामं क्रियते तेन व भोगप्रदानाय इदं शरीरमारभ्यत इति परंपरस्य मनसा शरीरस्य निष्पादकं तं शरीरात्मकं. R has पुण्यपापात्मकं for पुण्यापुण्या°.—P. 442. l. 7. (135, 5.) निर्वर्तयति ॥ निवर्त्त° A. Ca; deest in B 1.—l. 8. निर्वर्तयितुः ॥ निवर्त्त° A. B 1. Ca.—निर्वर्त्यस्यान्यस्य ॥ निवर्त्यस्यान्यस्य A. विवर्त्तस्यास्य B 1. निवर्त्तकस्यान्यस्य Ca.

P. 444. l. 28. (136, 7.) In explaining the षष्ठी, the reference to Pâ*n*. II. 3, 62, is taken for granted. See above, p. cxvii.—l. 30. आलोडयति ॥ आलोकयति MSS.

P. 445. l. 4. (137, 1.) The first half of the commentary is imperfect in all the MSS. A. Ca begin उतापि च हे देवाः आगः etc., B 1 उतापि च हे देवाः अवहितं उतापि च हे देवाः आगः etc.

P. 448. l. 14. (138, 5.) अप्रकृतसेनः ॥ प्रकृतसेनः A. C 2. अकृतसेनः Ca; deest in B4. B 1. CB.

P. 450. l. 31 seq. (139, 6.) From जानाति to जानाति lacuna in all MSS. except Ca.

P. 451. l. 5. (140.) The quotation from the Âra*n*yaka is here, as elsewhere, omitted. B 1. 4 give गतो विनियोगः ॥—l. 32. (140, 3.) इत्यस्य ॥ One might conjecture इत्यच.—P. 452. l. 6. (140, 4.) जायमानैरात्मीयैस्तेजोभिः A. C 2. Ca. यजमानैरात्मीयैः स्तोतृभिः B 1. 4. CB.

P. 454. l. 12. (142.) द्रोणः A. Anukr. द्रोणिः Ca; in B 1 the quotation from the Anukr. is left out.—सारिरुक्तसं° A. Ca. सारिरुक्तः सं° M 1. सारिरुक्तः सं° R. See Anukr. M. p. 44.—चतस्रश्च चि° A. Anukr. चतस्रस्रि° Ca. M 1. R.—इति। गतो विनियोगः from Ca.—P. 455. l. 29. (142, 5.) Lacuna in all the MSS.—P. 456. l. 7. (142, 6.) वाजा वेगा Ca. वाजाः खगाः A. C 2. CB. खाडाः B4. B 1. In the old writing वेगाः (ावगाः) and खगाः are nearly the same.—l. 11. अद्धा कर्तव्यः ॥ अद्धा कर्तव्यः A. अद्धा कर्तव्यः

C 2. अद्वा वर्तव्यः Ca. कर्तव्यः B 1. 4. बद्वा कर्तव्यः CB. Cf. Pân.VII. 3, 78, where the change is made dependent on *sit*.

P. 459. l. 3. (144.) The poet's name is given as ऊर्ध्वकृशान by C 2. A (once), Ca, as ऊर्ध्वकृशन in CB. B 1. 4. Colebrooke's MS. of the Anukramanî has long â, and so has Shadgurusishya (once). But as the text of the Rig-veda has the short a, the name must be spelt with short a.—l. 23. (144, 3.) आसु from Ca.—P. 460. l. 19. (144, 6.) यद्वा etc. ॥ यद्वा अस्रक्तद्यदाभिमुख्येन सुतः प्रेरितः ने दुं रित्यन्वयः A. यद्वा अस्रक्तं अस्रक्त यदाभिमुख्येन सुवः प्रेरितः तेंद्रुरित्यन्वय C 2. यद्वा अस्रक्त् अस्रक्तः त्वदाभिमुख्येन सुतः प्रेरितः तेनेंद्रेणेत्यन्वयः Ca; deest in B 1.

P. 460. ll. 24 to 28. (145.) From यदि वारण्यसि to आलिंगनमिति there is a lacuna in B 1. CB; B 4 adds on the margin the words from यदि वारण्यसि to निष्क्रीणामीति.—l. 26. शय्याकाले A. C 2. शयनकाले Ca. M 1. R.—l. 27. अभिमंचणं ॥ °मंचणे A. C 2. Ca.

P. 462. l. 27. (146, 2.) उपावति etc. ॥ उपावति वृषारवेत्येवंशब्दस्य प्रत्युत्तररूपेण चीचीशब्दकरणे उपेत्य पालयति वा A. उपावति वृषारवे स्वशब्दस्य प्रत्युत्तररूपेण चीचीशब्दकरिणे उपगच्छति उपेति पालयति वा B 1. उपावति वा Ca, omitting everything else. उपावति वृषारवाय स्वशब्दस्य प्रत्युत्तररूपेण चीचीशब्दकरिण उ° M 1. R agrees with M 1, but has °शब्दकरणे. The emendation °शब्दकारिण seems to be required on account of प्रत्युत्तररूपेण. It may be वृषारवाय or वृषारवे or °वं, the reading of A seems to be meant for वृषारवोक्तस्य शब्दस्य.—l. 28. आघाटिभिरिव। आघाटयो घाटलिकाः ॥ आघाटिभिरिव आघाटया घाटलिकाः A. आघोटिरिव आघाटया घटालिकाः B 1. अघाटिभिर्भरतक आघाट आघाटलिकः Ca.—P. 463. l. 3. (146, 3.) सर्जतीव स्रजतीव Ca.—l. 4. अरण्ये चतं B 4 in marg. अर्ण्यो। चतं A. C 2. अपेचितं Ca; deest in B 1. CB. अरण्ये चत्तं M 1. R. अपेचितं would be the easier reading; see also TBr. II. 5, 5, 7 (p. 624. ll. 13, 14).—l. 10. (146, 4.) The commentary is deficient in all the MSS. except Ca; but there, too, it is incorrect. A reads वर्तमानः त्वामाह्वयति तथा सायंकाले, B 1 वर्तमानः त्वमाह्वयति तथा सायंकाले. Ca gives निष्टां गामन्विद्वन् त्वदीयं नमो च्यते after आह्वयति; this I cannot restore. The commentary on TBr. II. 5, 5, 7 is far better.

P. 465. l. 29. (148, 2.) विशः प्रजाः ॥ विशः प्रभाः Ca. विशः जातः A. M 1. R. विशजातः B 1.—P. 466. l. 6. (148, 3.) After स्वाम, the MSS. insert समुद्रा A. C 2. Ca. B 4. ससमुद्र B 1. स तु भः त्समुद्र CB.

P. 466. l. 31. (149.) अर्चत आर्षे ॥ अर्चतस्यार्षे A. C 2. अर्चतस्यार्षे Ca. आर्षे B 4. B 1. CB.—l. 32. अर्चन्हैं° Anukr. अर्चंतो हैं° A. C 2. B 4. B 1. CB. अर्चतो हैं° Ca. अर्चिनो हैं° twice, Shadgurusishya, Ind. Off. MS. Taylor 1823. See verse 5.—P. 467. l. 11. (149, 1.) After शिचकः, साची A. C 2. B 4 in marg.; lacuna in Ca. B 1. CB. सारथिः?—l. 32. (149, 3.) अतो हेतोः A. C 2. Ca. अतो हेतुभूतौ B 1. CB. हेतुभूतः B 4 sec. m. अतो हेतुभूतः M 1. R.—P. 468. l. 15. (149, 5.) वाजे अन्ने A. याजे अच Ca; lacuna in B 1.

P. 469. l. 18. (150, 4.) पुरस्तात् धृतो A. B 1. °स्तादिता (meant for °स्तादितो) Ca.—l. 20. विशेषणसापेचस्यापि धनशब्दस्य छांदसः समासः ॥ विशेषणस्यापि समासः A. विशेषेचस्यापि समासः C 2. विशेषेण साचेपस्यापि नशब्दस्य छांदसः CB. B 1 adds समासः. विशेषेण साचेपस्यापि समासः B 4. विशे विशेषेण सापेचस्यापि धनशब्दस्य छांदसः Ca.

P. 473. l. 18. (154, 1.) एके in the text, not एकः, which is the reading of P 2 only.—l. 24. यदाथर्वणांगिरसो ॥ यद्[थ marg.]र्वणांगिरसो A. यदथर्वाणांगिरसोः B 1. यदथ-र्वणांगिरसो Ca, where a whole leaf (from 153, 2 to 154, 3) is supplied by a modern hand. For the Sruti passages compare Âsv. Grihy. III. 3 and Sat. Br. XI, 5, 6.

P. 474. l. 22. (155.) द्वितीयातृतीये Ca. द्वितीया तृतीया A; lacuna in B 1. The same var. lect. in Anukr. M. p. 45.—P. 476. l. 1. (155, 5.) पर्यनेषत पर्यनयन् ॥ पर्यनेषत पर्यनयत B 1. Ca. M 1. R. प्रर्यनेषत् पर्यनयत् A.

P. 476. l. 20 seq. (156, 3.) अङ्गि S 1. 2. 3. 4. P 3. P 4. P 8. अग्नि P 1 (where the last Adhyâya is written by a later hand, and unaccentuated). See RV. IX. 5, 10.—l. 23. अङ्गि ॥ अङ्गि Ca. अङ्गिः A. अन्धि B 1.

P. 478. l. 3. (158.) The second Viniyoga, preserved in A and Ca, but in frag-ments only, had to be supplied from Rv. Bh. I. 27, 13.

P. 481. l. 21. (160, 4.) न is left out by Sâyana.—l. 24. (160, 5.) इंद्रो वा शुन इति ॥ इंद्रो देवाशुन इति A. C 2. CB. M 1. R. इंद्रो देवाशुना इति Ca; lacuna in B 1. B 4. See Âsv. II. 20, 3.

P. 482. l. 10. (161.) Instead of आतुरस्य the MSS. have आधितस्य A. Ca. C 2. CB. In B 1. B 4 the Viniyoga is left out.—l. 29. (161, 2.) प्रबलं करोमि सृ शीभिबलनयोः A. प्रबलं करोमि सृ शीतिबलनयोः Ca. बलं करोमि सर्शतिर्बलकर्मा B 1.

P. 485. ll. 11 and 16. (163, 1.) उद्धारयामि ॥ उद्धरयामि A. B 1. M 1. R. उद्धरयामि Ca in l. 11. उद्धारयामि Ca in l. 16.—l. 13. कुवुकाच्चुवुकात् ॥ कुवुकात् चुंचुकात् A. कुवुकात् कुवुकात् C 2. कुवुकात् चुकुकाद° Ca. कुवुकात् B 1. B 4. CB.—l. 32. (163, 3.) मतस्नौ as masculine, clearly the kidneys, the form of which in man corresponds to the mango fruit. Is मतस्ने different?

P. 488. l. 6. (165.) प्रायश्चित्तं ॥ प्रायश्चित्त Ca. प्रायश्चित्तमिदं M 1. R; lacuna in A and B 1. See Anukr. M. pp. 45, 223.—l. 29. (165, 3.) यद्वा deest in A. Ca; lacuna in B 1 from करोति to करोति.—अग्नित्यग्निमिति, probably with प्रदेशे understood.

P. 489. l. 19. (166.) प्रयाणसमये etc. ॥ प्रयाणसमये निर्गमनार्घं ज एतत्सूचितं घ। ऋषभं मा समानानामित्यभिक्रम[मे A pr. m.]न्निति A. C 2. प्रयाणसमये निर्गच्छन् मार्गे जपेत सूचितं घ। ऋषभं मा समानानामित्यभिक्रामन्निति Ca. The other MSS. have no Viniyoga. One might conjecture something like प्रयाणसमये गृहमभिगच्छन्नेतज्जपेत्. R has प्रयाणसमये निर्गमना-र्थमेतज्जपेत्.

P. 490. l. 30. (167.) वेति etc. A. Ca. In B 1 all after षोडशं सूक्तं is left out. See Anukr. M. p. 45; Aufrecht, Rig-veda, vol. ii. p. 505, note 2.

P. 492. l. 12. (168, 1.) पृथिव्या भूमेः A. पृथिव्याः भूमेः B 1. Ca. The Pada MSS. read पृथिव्या. Cf. Rv. X. 70, 5.—l. 20. (168, 2.) Sâyana seems to have read स्वयुक् Ca. स्वयुक् A. C 2. सुयुक् B 1. CB. B 4.—l. 30. (168, 3.) ईश इति B 1. ईशं इति Ca. ईशत इति A. M 1. R.

P. 493. l. 20. (169, 1.) प्राणथिची: A. Ca. प्रीणथिची: B 1. Cf. Rv. Bh. X. 30, 14; I. 80, 4.

P. 495. l. 19. (170, 4.) घर्मकाले B 4. CB. धर्मकाले A. C 2. कर्मकोके Ca; deest in B 1.

P. 495. l. 31. (171, 2.) After तदभिप्रायेणेदमुक्तं, A. Ca and C 2 add a quotation, which I cannot find. ब्रूयते हि तस्येंद्रो वभ्रिरूपेण धनुर्ज्यामन्वि रुद्रस्य खेव धनु रात्रिं शिर उत्पिपेष। स प्रवाग्भ्या भवदिति A. ज्यामह्नि रुद्र स्य ते धं वे नुरात्रिं शिर उत्पिपेष etc. C 2. ब्रूयते हि तस्येंद्रो वभ्रिरूपेण धनुर्ज्यामिच्छति तथा रुद्रस्य खेव ध ह्नरो त्रिः शिर उत्पिपेष स प्रवर्ग्या भवदिति Ca. The story is told in different Brâhmanas, but not in this form. We have it in the Sat. Br., at the beginning of the fourteenth book; in the Taittirîya-âranyaka, at the beginning of the fourth Prapâthaka, with the explanatory portion in the fifth Prapâthaka; also in the Tândya-brâhmana VII. 5, 6; and Aitareya-brâhmana I. 18. I have restored the text conjecturally, but I feel doubtful about Rudra.

P. 498. l. 28. (174, 2.) The commentary to this verse is wanting in all our MSS. R gives the following commentary (on what authority?): हे राजन् सपत्नान् शत्रून् अभिवृत्य अभितो गमयित्वा नोऽस्माकं या अरातयः अदानशीलाः प्रजाः संति ता अपि अभि तिष्ठ अभिभव पृतन्यंतं पृतनाः सेना आत्मानमिच्छंतं युयुत्सुं च अभि तिष्ठ पृतनाशब्दात्क्यचि कव्यध्वरपृतनस्येत्यंत-लोपः यश्च नोऽस्माभ्यमिरस्यति ईर्ष्यति ईरस् ईर्ष्यायां कंड्वादिः तमप्यधितिष्ठ यद्वा प्रज्ञतो ब्रह्मणस्पतिरेवाचापि संबोध्यः॥—P. 499. ll. 13 and 15. (174, 5.) एषां S 1. 2. 3. 4. P 3. P 4. P 8 (P 1 gives here no accents). एषां Aufrecht, Index Verborum of M 1.—ll. 16 to 18. अभूवं A (thrice), Ca (twice), अभुवं B 1 (thrice), Ca (once). See verse 4, and X. 159, 4.

P. 500. l. 10. (175, 4.) सुवतु॥ प्रसवतु Ca. प्रभुवतु A. प्रसुवत् B 1.

P. 500. l. 13. (176.) द्वितीया गायत्र्याबार्भवी Anukr. द्वितीय त्र्याबार्भवी A. द्वितीया गायत्र्यार्भवी भवति Ca. द्वितीयं गायत्र्यार्भवी M 1; deest in B 1.

P. 501. l. 30. (177, 1.) हृदा हृत्खेन। तात्स्थ्यात्ताच्छब्द्यं॥ ऋकथे तता तस्य त्तो वयं A. हृदृत्शे त तातस्य त्तो व द्य C 2. हृदा हृत्खेन ताख्या चा छब्दां। Ca. हृदा हृत्खेना तात्स्था। ता छ व्दं B 1. हृत्खे तता रा तस्यात्तच्छब्द्यं CB. हृदा हृत्खे तेनात्मना B 4 sec. m. See above, p. cxli.—P. 502. l. 3. वृत्तिज्ञानानां A. B 1. B 4. वृत्विज्ञानानां C 2. दृत्तिज्ञानानां CB; deest in Ca.—l. 18. (177, 2.) See Manu I. 21.

P. 502. l. 35. (178.) तार्क्ष्यपुत्रस्य A. Ca. C 2. B 4. B 1. CB. Cf. Shadgurusishya in Anukr. M. p. 165.—P. 503. l. 8. (178, 1.) On तार्क्ष्यं to गर्गादिः etc. see Preface to the Sixth Volume of the First Edition, above, p. cxl.—l. 18. ड्रप्रत्ययः॥ द्रट्प्रत्ययः A. रट्प्रत्ययः C 2. B 4. B 1. CB. ड्डप्रत्ययः Ca. Sv. IV. 1, 5, 1, vol. i. p. 675, यजतेर्वा ञ्ण्प्रत्ययः.

P. 504. l. 12. (179.) A reads शिविः, Ca शिबिः, in B 1 the whole introduction is left out. Anukr. M. reads शिबिः. Sâyana read रौहिदश्वः, Shadgurusishya रौशदश्वः. See Anukr. M. pp. 165, 223.—दधिघर्मे॥ दधिघर्म्मे Ca marg. दधिघर्म्ये Ca pr. m. A. M 1.—l. 17. (179, 1.) आसनादू° B 1. आसनदू° Ca. आ समंतादू° A. M 1. R.—l. 32. (179, 2.) अभिन्यासादितैः A. अभित्या° B 1. अभिष्टुत्यासादितैः Ca.—P. 505. l. 8. (179, 3.) मध्यंदिने Ca. माध्यंदिने A. M 1. R.

P. 505. l. 11. (180.) ऐंद्र इति A. Ca; introduction left out in B 1. ऐंद्रिः Anukr. M.—l. 24. (180, 1.) रैभ्यश्च A. Ca; deest in B 1. See Kâs. VI. 1, 176, 1; Rv. Bh. I. 79, 5; 92, 14; 95, 11; 116, 18.

P. 508. l. 4. (183.) ऋचः ॥ अंत्या ऋचः A. CB. अत्या ऋचुः C 2. इत्याचर् Ca. अनृचः B 1. अत्यचः B 4 sec. m.

P. 509. l. 3. (184.) °दैवतं A. °दे° B 1. Ca. M 1.—l. 11. (184, 1.) स्रावपातापप्रसवा ॥ स्रावपातापप्रसवा A. C 2. स्रावपाताप्रसवा Ca. स्रावपातप्रसवा B 4 sec. m. सावपातप्रसवा B 1. स्राचणतापप्रसवा CB. गर्भपातापप्रसवा M 1. R.

P. 513. l. 14. (189, 3.) स्तूयते सूर्यः सर्वत इत्यर्थः ॥ स्तूयते सूर्यं सवत इत्यर्थः A. C 2. सेवत इत्यर्थः Ca. स्तूयते सूर्यं स्रवत इत्यर्थः B 1. B 4. सूर्यं सवन इत्यर्थः CB.

P. 513. l. 18. (190.) °त्वात्तादृग्रूप ॥ °त्वात् ऋग्भूप A. C 2. °त्वादृग्रूप Ca. °त्वात् ऋग्रूप B 1. B 4. CB.—l. 27. (190, 1.) °रूपापादान° ॥ °रूपादान° A. B 1 pr. m. °रूपाधार° B 1 sec. m. In B 1 the whole verse stands in the margin. Ca has मायाधिष्ठातगूनात् ऋतं etc. R reads °रूपादुपादानभूतात्.—P. 514. ll. 4 seqq. (190, 2 and 3.) From मिषतो in verse 2 to the end of the hymn, lacuna in A. Ca.

P. 514. l. 17. (191, 1.) अर्यस्वाम्याख्यायां A. B 1 pr. m. Ca. अर्यः स्वाम्याख्यां B 1 marg. Cf. Rv. Bh. I. 33, 3; 71, 3; 121, 15; III. 43, 2.—l. 19. After किंच there is खिन्नः A. C 2. स्वि न B 4. स्विन्नः CB. स्वि नः B 1. It may have been meant for स स्वं, or तत्र स्थितोऽपि, as Ca reads किंच स्थितोपीडायाः पृ° etc.

ऋग्वेदसंहिता

सायणाचार्यविरचितमाधवीयवेदार्थप्रकाशसहिता

शार्मण्यदेशोत्पन्नेनेंगलण्डदेशनिवासिना मोक्षमूलरभट्टेन संशोधिता

गोतीर्थाभिधाननगरे

विद्यामंदिरसंस्थानमुद्रायंत्रालये मुद्रिता

संवत् १९४९ वर्षे

॥ दशमं मंडलं ॥

॥ दशमं मंडलं ॥

दशमे मंडले द्वादशानुवाकाः । तत्र प्रथमानुवाके षोडश सूक्तानि । तत्राग्ने बृहन्निति सप्तर्चं प्रथमं सूक्तं । आप्त्यस्य वितस्थार्षं । अनादेशपरिभाषया त्रिष्टुप् । मंडलादिपरिभाषयाग्निर्देवता । तथा चानुक्रम्यते । अग्ने सप्त वित इति ॥ प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ त्रैष्टुभे छंदसीदमादीन्यष्ट सूक्तान्यष्टमस्यांत्यास्तिस्रो वर्जयित्वा । सूच्यते हि । अग्ने नयाग्ने बृहन्नित्यष्टानामुत्तमादुत्तमास्तिस्र उद्वरेदिति त्रैष्टुभं । आ० ४. १३. । इति । प्रातरनुवाकन्यायेन तस्यैव समाम्नायस्य सहस्रावममोदेतोः शंसेत् । आ० ६. ५. । इति च ॥ होमार्थं प्रणीत आहवनीये प्राग्घोमादुपशांते ज्योतिष्मन्नुणकाग्निदेवताका काचिदिष्टिः । तत्रायं याज्या । सूचितं च । इष्टिरग्निर्ज्योतिष्मान्वरुण उदग्ने शुचयस्तवाग्ने बृहन्नुषसामूर्ध्वो अस्थात् । आ० ३. १२. । इति ॥ उपाकरणोत्सर्जनयोर्मंडलादिहोमेऽयेषा । सूत्रमुदाहृतं ॥

अग्ने बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान्तमसो ज्योतिषागात् ।
अग्निर्भानुना रुशता स्वंग आ जातो विश्वा सद्मान्यप्राः ॥१॥
अग्ने । बृहन् । उषसां । ऊर्ध्वः । अस्थात् । निःऽजगन्वान् । तमसः । ज्योतिषा । आ । अगात् ।
अग्निः । भानुना । रुशता । सुऽअंगः । आ । जातः । विश्वा । सद्मानि । अप्राः ॥१॥

बृहन्महानग्नेषोऽग्निरुषसामग्र उषसामुपर्युषःकाल ऊर्ध्वः प्रज्वलितः सज्ज्वालारूपेणास्थात् । तिष्ठति । ततस्तमसः । रात्रिनामैतत् । रात्रेर्निर्जगन्वान्निर्गतः ॥ गमेः क्वसाविडभावे रूपं ॥ निर्गतो निष्क्रांतवान् सोऽग्निर्ज्योतिषा स्वीयेन तेजसा लक्षितः सन्नागात् । गार्हपत्यादाहृियमाण आहवनीयं प्रत्यागच्छति । अनंतरं स्वंगः शोभनज्वालावयवो जातः कर्मार्थं समुत्पन्न एषोऽग्नी रुशता ॥ रोचतेर्ज्वलतिकर्मण इदं रूपं ॥ आरोचमानेन । यद्वा । रुशतिर्हिंसार्थः । तमसां हिंसकेन । भानुना तेजसा विश्वा सद्मानि सर्वाल्लोकान् यद्वा सदनानि यज्ञगृहाण्याप्राः । आपूरयति ॥ प्रा पूरणे । तिङां तिङो भवंतीति तिपः सिबादेशः ॥ अत्र वाजसनेयकं । अग्ने बृहन्नुषसामूर्ध्वो अस्थादित्यग्ने द्वीष बृहन्नुषसामूर्ध्वस्तिष्ठति । निर्जगन्वान्तमसो ज्योतिषागादिति निर्जगन्वान्रात्रेस्तमसो ज्योतिषेति । अग्निर्भानुना रुशता स्वंग इत्यग्निर्वा एष भानुना रुशता स्वंग आ जातो विश्वा सद्मान्यप्रा इतीमे वै लोका विश्वा सद्मानि तानेष जात आपूरयति । शत० ६. ७. ३. १०. । इति ॥

स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु ।
चित्रः शिशुः परि तमांस्यक्तून्प्र मातृभ्यो अधि कनिक्रदद्गाः ॥२॥
सः । जातः । गर्भः । असि । रोदस्योः । अग्ने । चारुः । विऽभृतः । ओषधीषु ।
चित्रः । शिशुः । परि । तमांसि । अक्तून् । प्र । मातृऽभ्यः । अधि । कनिक्रदत् । गाः ॥२॥

हे अग्ने जात उत्पन्नस्त्वं कल्याणरूप ओषधीष्वोषधिविकारेष्वरणीषु विभृतो विशेषेण मथित आहव-

नीयात्मना विविधं ह्रियमाण ओषधीषु वर्तमानः स त्वं रोदस्योर्द्यावापृथिव्योर्गर्भोऽसि । गर्भो भवसि । अग्निरूप आदित्यरूपश्चेति । किंच चित्रश्चित्रवर्णः काली कराली च मनोजवेत्यादिसप्तजिह्वाभिर्नानारूपः यद्वा चित्रश्चायनीयः शिशुरोषधीनां शिशुरग्निस्तमांस्यत्ति चाचित्कृष्णाञ्शशूंश्च परि भवसि । स्वतेजसाभिभवसि । स त्वं मातृभ्यो मातृभूताभ्य ओषधीभ्यः । अधिः पंचम्यर्थद्योतकः । ताभ्यः कनिक्रदत्पुनःपुनः शब्दं कुर्वन्न गाः । प्रगच्छसि । प्रजायसे ॥

विष्णुरित्था परममस्य विद्वाञ्जातो बृहन्भि पाति तृतीयं ।
आसा यदस्य पयो अक्रत स्वं सचेतसो अभ्यर्चत्यर्च ॥३॥
विष्णुः । इत्था । परमं । अस्य । विद्वान् । जातः । बृहन् । अभि । पाति । तृतीयं ।
आसा । यत् । अस्य । पयः । अक्रत । स्वं । सऽचेतसः । अभि । अर्चति । अर्च ॥३॥

विद्वाञ्जानानो जातः प्रादुर्भूतो बृहन्महान् विष्णुरित्थमनेन प्रकारेण विष्णुर्व्यापनशीलो ज्ञानादिगुणयुक्तोऽग्निरस्य मे तृतीयं त्रयाणां पूरकं चितं मामभि पाति । अभिरक्षतु । एकतो द्वितस्त्रित इति त्रयो बभूवुः । नि० ४. ६. । इति यास्केनोक्तं । किंचास्याग्नेः स्वमात्मीयं पय उदकमासास्येन यद्यदाक्रत कुर्वेति यजमाना याचंते तदानीमत्रास्मिँल्लोके स्थिताः स्तोतारः सचेतसः समानमनस्का भूत्वैनमभ्यर्चंति । अभिष्टुवंति ॥

अतं उ त्वा पितुभृतो जनिचीरन्नावृधं प्रति चरंत्यन्नैः ।
ता ईं प्रत्येषि पुनरन्यरूपा असि त्वं विक्षु मानुषीषु होता ॥४॥
अतः । ऊं इति । त्वा । पितुऽभृतः । जनिचीः । अन्नऽवृधं । प्रति । चरंति । अन्नैः ।
ताः । ईं । प्रति । एषि । पुनः । अन्यऽरूपाः । असि । त्वं । विक्षु । मानुषीषु । होता ॥४॥

हे अग्ने अतः । ऊ इत्यवधारणे । अस्मादेव कारणात् पितुभृतः पितुनान्नेन सर्वस्य जगतो धारयित्र्यः पोषयित्र्यो वा जनिचीर्जनयित्र्य ओषधयोऽन्नावृधमन्नस्य वर्धकं त्वा त्वामन्नैर्हेतुभिः प्रति चरंति । परिचरंति । अभिगच्छंति । ततस्त्वमीभिरेनास्ता ओषधीः प्रत्येषि । प्रतिगच्छसि । पुनरप्यन्यरूपा जीर्णा ओषधीर्दावभूतस्त्वं गच्छसि । किंच मानुषीषु मनुष्यजातिषु विक्षु प्रजासु । यद्वा । वित्त्वमिहोचादिक्रियास्वभिनिविशंतीषु मानुषीषु मनुष्यजातिषु । होता देवानामाह्वाता होमनिष्पादको वासि । भवसि । मनुष्येषु स्थित इत्यर्थे ब्राह्मणं देवो ह्येष मर्त्येष्विति ॥

आतिथ्यायां स्विष्टकृतोऽनुवाक्या होतारमित्येषा । सूचितं च । होतारं चित्ररथमध्वरस्य प्रप्रायमग्निर्भरतस्य शृण्व इति संयाज्ये । आ० ४. ५. । इति ॥

होतारं चित्ररथमध्वरस्य यज्ञस्ययज्ञस्य केतुं रुशंतं ।
प्रत्यर्धिं देवस्यदेवस्य महा श्रिया त्वग्निमतिथिं जनानां ॥५॥
होतारं । चित्ऽरथं । अध्वरस्य । यज्ञस्यऽयज्ञस्य । केतुं । रुशंतं ।
प्रतिऽअर्धिं । देवस्यऽदेवस्य । महा । श्रिया । तु । अग्निं । अतिथिं । जनानां ॥५॥

अध्वरस्य यज्ञस्य होतारमेतन्नामानमृत्विजं यद्वा होतारं देवानामाह्वातारं चित्ररथं नानारूपरथमध्वरस्य रक्षोभिरहिंसितस्य यज्ञस्य सर्वस्य यज्ञस्य केतुं प्रज्ञापकं पताकास्थानीयं वा रुशंतं श्वेतवर्णं महा स्वमहत्त्वेन देवस्य देवस्य सर्वेषां देवानामर्धिमिंद्रं प्रति भवंतं । यत्सर्वेषामर्धिमिंद्रं प्रतीति ब्राह्मणं । तादृशं जनानां यजमानानामतिथिमतिथिवत्पूज्यमग्निं तु क्षिप्रं श्रिया श्रियोऽर्थं वयं सुमः ॥

स तु वस्त्राण्यध पेशनानि वसानो अग्निर्नाभा पृथिव्याः ।
अरुषो जातः पद इळायाः पुरोहितो राजन्यक्षीह देवान् ॥ ६॥
सः । तु । वस्त्राणि । अध । पेशनानि । वसानः । अग्निः । नाभा । पृथिव्याः ।
अरुषः । जातः । पदे । इळायाः । पुरःऽहितः । राजन् । यक्षि । इह । देवान् ॥ ६॥

हे राजन्दीप्यमानाग्ने वस्त्राण्याच्छादकानि तेजांसि अधापि च पेशनानि तेषां तेजसां काष्ण्र्यशौक्ल्यादीनि रूपाणि । यद्वा । अधानंतरं पेशनानि । पेश इति हिरण्यनाम । हिरण्यवद्विरण्यसदृशानि भास्वराणि तेजांसि । वसान आच्छादयन् पृथिव्या नाभा नाभौ नाभिस्थानीय इळायास्पद उत्तरवेद्यां । एतद्वा इळायास्पदं यदुत्तरवेदीनाभिः । ऐ० ब्रा० १. २८. । इत्यात्मानात् । तस्यां जातः समुत्पन्नोऽरुष आरोचमानो योऽग्निरेवंविधोऽसि स त्वं पुरोहितः पुरतो निहितः पूर्वस्यां दिशाहवनीयायतने स्थापितः सन्निहास्मिन्यज्ञे देवानिंद्रादीन्यजि । यज । पूजय ॥

आ हि द्यावापृथिवी अग्न उभे सदा पुत्रो न मातरा ततंथ ।
प्र याह्यच्छोशतो यविष्ठाथा वह सहस्येह देवान् ॥ ७॥
आ । हि । द्यावापृथिवी इति । अग्ने । उभे इति । सदा । पुत्रः । न । मातरा । ततंथ ।
प्र । याहि । अच्छ । उशतः । यविष्ठ । अथ । आ । वह । सहस्य । इह । देवान् ॥ ७॥

हे अग्ने त्वमुभे द्यावापृथिवी द्यावापृथिव्यौ सदा सर्वदा ततंथ । आततेनिथ । स्वतेजोभिर्विस्तारयसि खलु ॥ बभूथा ततंथेति थलि निपातितः ॥ तत्र दृष्टांतः । पुत्रो न यथा पुत्रो मातरा मातापितरौ क्षीणौ धनैस्तनोति तद्वत् । किंच हे यविष्ठ युवतम स त्वमुशतः कामयमानानच्छाभिलक्ष्य प्र याहि । प्रकर्षेणागच्छ । अथानंतरं हे सहस्य सहसो बलस्य पुत्र हे अग्ने त्वमिहास्मदीये यज्ञे देवानिंद्रादीना वह । प्रापय ॥ ॥ २९॥

पिप्रीहीति सप्तर्चं द्वितीयं सूक्तं । ऋष्याद्याः पूर्ववत् । पिप्रीहीत्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तः सूक्तविनियोगः ॥ दर्शपूर्णमासयोरादौ स्विष्टकृतोऽनुवाक्या । सूचितं च । अथ स्विष्टकृतः पिप्रीहि देवाँ उशतो यविष्ठेत्यनुवाक्या । आ० १. ६. । इति ॥

पिप्रीहि देवाँ उशतो यविष्ठ विद्वाँ ऋतूँरृतुपते यजेह ।
ये दैव्या ऋत्विजस्तेभिरग्ने त्वं होतॄणामस्यायजिष्ठः ॥ १॥
पिप्रीहि । देवान् । उशतः । यविष्ठ । विद्वान् । ऋतून् । ऋतुऽपते । यज । इह ।
ये । दैव्याः । ऋत्विजः । तेभिः । अग्ने । त्वं । होतॄणां । असि । आऽयजिष्ठः ॥ १॥

हे यविष्ठ युवतमाग्ने उशतः स्तुतीः श्रोतुं कामयमानान्देवान्पिप्रीहि । हविर्भिः प्रीणय । हे ऋतुपत ऋतूनां देवयागकालानां स्वामिन्नग्ने ऋतून्यागकालान्विद्वाञ्जानागस्त्वमिहास्मिन्यज्ञे तान्यज । पूजय । किंच हे अग्ने दैव्या देवेषु भवाः अग्निर्होताश्विनावध्वर्यू त्वष्टाग्नीध्रश्च उपवक्ता । तै० आ० ३. ३. । इत्यचोक्ता य ऋत्विजः संति तेभिस्तैः सह देवान्यज । यद्वा । दैव्या देवेषु भवा ऋत्विज आश्वलायनेनोक्ताश्चंद्रमा ब्रह्मादित्योऽध्वर्युः पर्जन्य उद्गातेति । आ० गृ० १. २३. ८–९. । तैः सह यज । यस्मात्त्वं होतॄणां मध्य आयजिष्ठ आभिमुख्येन देवानां यष्टृतमोऽसि भवसि ॥

वेषि होत्रमुत पोत्रं जनानां मंधातासि द्रविणोदा ऋतावा ।
स्वाहा वयं कृणवामा हवींषि देवो देवान्यजत्वग्निरर्हन् ॥ २॥

वेषि । होत्रं । उत । पोत्रं । जनानां । मंधाता । असि । द्रविणःऽदाः । ऋतऽवा । स्वाहा । वयं । कृणवाम । हवींषि । देवः । देवान् । यजतु । अग्निः । अर्हन् ॥२॥

हे अग्ने जनानां यजमानार्थं होत्रं होतुः कर्म तेन क्रियमाणं स्तोत्रं वेषि । कामयसे । उतापि च पोत्रं पोतुः कर्म तेन क्रियमाणां स्तुतिं कामयसे । किंच मंधाता मेधावृतवा सत्यवांस्त्वं द्रविणोदा असि । धनस्य प्रदाता भवसि । अथ परोक्षकृतः । वयं देवेभ्यो हवींषि स्वाहा कृणवाम । स्वाहा करवाम । प्रयच्छाम । ततो देवो दीप्यमानोऽर्हन् प्रशंस्यो यजमानयोग्यो वाग्निर्देवान्यजतु । तैर्हविर्भिः पूजयतु ॥

दर्शपूर्णमासातिपत्त्यादौ निमित्ते पाथिकृतीष्टिः कर्तव्या । तत्रा देवानामित्येषा याज्या । सूचितं च । वेत्था हि वेधो अध्वन आ देवानामपि पंथामगन्म । आ० ३. १०. । इति ॥ प्रायणीयायामप्येषैव याज्योदयनीयायां सैवानुवाक्या । सूचितं च । अग्ने नय सुपथा राये अस्माना देवानामपि पंथामगन्म । आ० ४. ३. । इति । विपरीतास्तु याज्यानुवाक्या इति ॥

आ देवानामपि पंथामगन्म यच्छक्नवाम तदनु प्रवोळ्हुं ।
अग्निर्विद्वान्त्स यजात्सेदु होता सो अध्वरान्त्स ऋतून्कल्पयाति ॥३॥
आ । देवानां । अपि । पंथां । अगन्म । यत् । शक्नवाम । तत् । अनु । प्रऽवोळ्हुं ।
अग्निः । विद्वान् । सः । यजात् । सः । इत् । ऊं इति । होता । सः । अध्वरान् । सः ।
ऋतून् । कल्पयाति ॥३॥

देवानां देवलोकादिगमनसाधनं देवानां स्वभूतं पंथां पंथानं तमपि वैदिकमार्गं वयमागन्म । आगतवंतो भवेम । येन देवान्प्राप्नुमः । तथा वयं यत्कर्मानुष्ठातुं शक्नवाम शक्नुमः समर्था भवामः तत्कर्मानुक्रमेण प्रवोळ्हुं प्रकर्षेण वोढुं समाप्तिं प्रापयितुं समर्था भवेम । अनंतरं विद्वांस्तं पंथानं जानानः सोऽग्निर्यजात् । देवान्यजतु । सेदु स एव खलु होता मनुष्याणां होमनिष्पादकः । ततः स एवाग्निरध्वरान्यज्ञान् किंचर्तून् कालान्कल्पयाति । कल्पयतु । करोतु ॥

व्रतातिपत्तौ व्रातपतीष्टिः कर्तव्या । तत्र यद्वो वयमित्येषा याज्या । सूचितं च । त्वमग्ने व्रतपा असि यद्वो वयं प्रमिनाम व्रतानि । आ० ३. १३. । इति ॥

यद्वो वयं प्रमिनाम व्रतानि विदुषां देवा अविदुष्टरासः ।
अग्निष्टद्विश्वमा पृणाति विद्वान्येभिर्देवाँ ऋतुभिः कल्पयाति ॥४॥
यत् । वः । वयं । प्रऽमिनाम । व्रतानि । विदुषां । देवाः । अविदुःऽतरासः ।
अग्निः । तत् । विश्वं । आ । पृणाति । विद्वान् । येभिः । देवान् । ऋतुऽभिः । कल्पयाति ॥४॥

हे देवाः अविदुष्टरासोऽविद्वत्तरा अत्यंतमजानंतो वयं युष्माकं यत् यत्किंचिद्व्रतानि कर्माणि विदुषां भवतां जानतामेव प्रमिनाम प्रहिंसितवंतः । भवत्सु जानत्सु नित्यनैमित्तिककर्माणि विलोपितवंत इत्यर्थः । विद्वानेतत्सर्वं जानानोऽग्निः स्विष्टकृत्तद्विश्वं सर्वं कर्मजातमा पृणाति । आपूरयतु । फलसहितं करोत्वित्यर्थः । केनापूरयतु तत्राह । येभिर्ऋतुभिर्यागयोग्यैः कालैर्देवान्कल्पयाति कल्पयति कर्मागभावाय समर्थयति तैरापूरयतु ॥

यत्पाकत्रा मनसा दीनदक्षा न यज्ञस्य मन्वते मर्त्यासः ।
अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्ठो देवाँ ऋतुशो यजाति ॥५॥

यत्। पाकऽचा। मनसा। दीनऽदक्षाः। न। यज्ञस्य। मन्वते। मर्त्यासः।
अग्निः। तत्। होता। क्रतुऽवित्। विऽजानन्। यजिष्ठः। देवान्। ऋतुऽशः। यजाति ॥५॥

दीनदक्षा दीनबला दीनोत्साहा वा मर्त्यासो मर्त्या मनुष्या ऋत्विजः पाकचा पाकेन ॥ बहुलग्रहणाद्-ङ्यादपि तृतीयार्थे चाप्रत्ययः ॥ पाकेन पक्वत्वेन विशिष्टज्ञानरहितेनाल्पेन वा मनसा युक्ताः संतो यज्ञसंबंधि यत्कर्म न मन्वते न जानंति तत्कर्म विजानन् होता देवानामाहाता होमनिष्पादको वा क्रतुवित् कर्मविद्-यजिष्ठो देवानामतिशयेन यष्टा सोऽग्निः स्विष्टकृदृतुश ऋतावृतौ स्वे स्वे यागयोग्ये काले देवान्यजाति। यजतु। हविर्भिः पूजयतु ॥

विश्वेषां ह्यध्वराणामनीकं चित्रं केतुं जनिता त्वा जजान।
स आ यजस्व नृवतीरनु क्षाः स्याहा इषः ष्टुमतीर्विश्वजन्याः ॥६॥
विश्वेषां। हि। अध्वराणां। अनीकं। चित्रं। केतुं। जनिता। त्वा। जजान।
सः। आ। यजस्व। नृऽवतीः। अनु। क्षाः। स्याहाः। इषः। स्तुऽमतीः। विश्वऽजन्याः ॥६॥

हे अग्ने विश्वेषां सर्वेषामध्वराणां यज्ञानामनीकं मुखं प्रधानं चित्रं चायनीयं नानारूपं केतुं प्रज्ञापकं त्वा त्वां जनिता जनयिता प्रजापतिर्यजमानो वा जजान। जनयामास। उत्पादितः स त्वं नृवतीर्दीप्तादि-युक्ताः क्षाः। पृथिवीनामैतत्। क्षयंत्यत्रेति क्षा भूमिः। अन्वा यजस्व। अनुप्रयच्छ। यद्वा। नृवतीर्नृभिः संस्कृतानि क्षा अनु पृथिवीं वेदिलक्षणामनुगतानि वेद्यामासादितानि स्याहाः सूयहणीयानि स्तुमतीः स्तुतिमंत्रलक्षणशब्दवंति विश्वजन्याः सर्वजनहितानि वृष्ण्यहेतुत्वात् तानीषोऽन्नानि हविर्लक्षणानि यजस्व। देवेभ्यः प्रयच्छ ॥

यं त्वा द्यावापृथिवी यं त्वापस्त्वष्टा यं त्वा सुजनिमा जजान।
पथामनु प्रविद्वान्पितृयाणं द्युमदग्ने समिधानो वि भाहि ॥७॥
यं। त्वा। द्यावापृथिवी इति। यं। त्वा। आपः। त्वष्टा। यं। त्वा। सुऽजनिमा। जजान।
पथां। अनु। प्रऽविद्वान्। पितृऽयानं। द्युऽमत्। अग्ने। सं ऽइद्धानः। वि। भाहि ॥७॥

हे अग्ने यं त्वा त्वां द्यावापृथिवी जनितवत्यौ आदित्यात्मनाग्न्यात्मना वा। तथा यं त्वामापो मेघोदर-गता विद्युदात्मना स्थिता जनितवत्यः। यद्वा। आप इत्यंतरिक्षनाम। द्यावापृथिवी अंतरिक्षं चेमे त्रयो लोका यं त्वामजीजनन्। किंच सुजनिमा शोभनजननस्त्वष्टा प्रजापतिर्यं त्वां जजान जनयामास हे अग्ने पितृयाणं पितरो येन मार्गेण गच्छंति तं पंथां हविर्वहनमार्गमनु प्रविद्वान् प्रजानंस्त्वं समिधानः समिध्यमानः सन् द्युमद्दीप्तियुक्तं यथा भवति तथा वि भाहि। विशेषेण दीप्यस्व ॥ ॥३०॥

इनो राजन्निति सप्तर्चं तृतीयं सूक्तं। ऋष्यादयाः पूर्ववत्। इन इत्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

इनो राजन्नरतिः समिद्धो रौद्रो दक्षाय सुषुमाँ अदर्शि।
चिकित्रि भाति भासा बृहतासिक्नीमेति रुशतीमपाजन् ॥१॥
इनः। राजन्। अरतिः। सं ऽइद्धः। रौद्रः। दक्षाय। सुसुऽमान्। अदर्शि।
चिकित्। वि। भाति। भासा। बृहता। असिक्नीं। एति। रुशतीं। अप ऽअजन् ॥१॥

हे राजन्दीप्यमानाग्ने त्वमिन ईश्वरः सर्वस्य भवसि । अथ परोषः । अरतिर्हविरादाय देवान्प्रति गंता समिद्धः संदीप्तो रौद्रः शत्रूणां भयंकरः सुषुमान् । औषध्यात्मना स्थितोऽभुः सुष्ठु सूयत इति सुषुः सोमः । तेन तद्वान् शोभनप्रसवो वा सोऽग्निर्देवाय यजमानानां धनादिवृद्ध्यर्थमदर्शि । सर्वैर्दृश्यते । किंच चिकित् सर्वं जानानोऽग्निर्वि भाति । विशेषेण दीप्यते । तथा बृहता महता भासा तेजसा ज्वालालक्षणेनासिक्नीं रात्रिमेति । सायंहोमसिद्ध्यर्थमेव गच्छति । किं कुर्वन् । रुशतीं श्वेतवर्णां दीप्तिमपाजन्नपगमयन्रात्रिं गच्छति । सामर्थ्याद्रात्रिं परित्यजन्नुषसं प्रातर्होमसिद्ध्यर्थं गच्छतीत्यर्थो लक्ष्यते ॥

कृष्णां यदेनीमभि वर्पसा भूज्जनयन्योषां बृहतः पितुर्जां ।
ऊर्ध्वं भानुं सूर्यस्य स्तभायन् दिवो वसुभिररतिर्वि भाति ॥२॥
कृष्णां । यत् । एनीं । अभि । वर्पसा । भूत् । जनयन् । योषां । बृहतः । पितुः । जां ।
ऊर्ध्वं । भानुं । सूर्यस्य । स्तभायन् । दिवः । वसुऽभिः । अरतिः । वि । भाति ॥२॥

सोऽग्निर्यदा कृष्णां कृष्णवर्णामेनीं गच्छंतीं रात्रिं वर्पसात्मीयेन ज्वालालक्षणेन रूपेणाभि भूत् अभिभवति । किं कुर्वन् । बृहतो महतः पितुः सर्वस्य जगतः पालयितुः पितृभूताद्वादित्याज्जां जायमानां योषामुषसं जनयन्नभिव्यंजयन् । तदानीमरतिर्गमनशीलोऽग्निर्दिवो द्युलोकस्य वसुभिर्वासयितृभिराच्छादकैः संधुक्षणसमर्थैरात्मीयैस्तेजोभिः सूर्यस्य भानुं दीप्तिमूर्ध्वमुपरिष्टात् स्तभायन् स्तंभयन् वि भाति । विशेषेण दीप्यते ॥

भद्रो भद्रया सचमान आगात्स्वसारं जारो अभ्येति पश्चात् ।
सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्रुशद्भिर्वर्णैरभि राममस्थात् ॥३॥
भद्रः । भद्रया । सचमानः । आ । अगात् । स्वसारं । जारः । अभि । एति । पश्चात् ।
सुऽप्रकेतैः । द्युऽभिः । अग्निः । विऽतिष्ठन् । रुशत्ऽभिः । वर्णैः । अभि । रामं । अस्थात् ॥३॥

भद्रो भजनीयः कल्याणो भद्रया भजनीयया दीप्त्योषसा वा सचमानः सेव्यमानः संगच्छमानो वाग्निरागात् । आजगाम । गार्हपत्यादाहवनीयमागच्छति । ततः पश्चाज्जारो जरयिता शत्रूणां सोऽग्निः स्वसारं स्वयंसारिणीं भगिनीं वागतामुषसमभ्येति । अभिगच्छति । तथा सुप्रकेतैः सुप्रज्ञानैर्द्युभिर्दीप्तिस्तेजोभिः सह वितिष्ठन् सर्वतो वर्तमानः सोऽग्नी रुशद्भिः श्वेतैर्वर्णैर्वारकैरात्मीयैस्तेजोभी रामं कृष्णं शार्वरं तमोऽभ्यस्थात् । सायंहोमकालेऽभिभूय तिष्ठति ॥

अस्य यामासो बृहतो न वग्नूनिंधाना अग्नेः सख्युः शिवस्य ।
ईड्यस्य वृष्णो बृहतः स्वासो भामासो यामन्नृक्ववश्चिकित्रे ॥४॥
अस्य । यामासः । बृहतः । न । वग्नून् । इंधानाः । अग्नेः । सख्युः । शिवस्य ।
ईड्यस्य । वृष्णः । बृहतः । सुऽआसः । भामासः । यामन् । ऋक्ववः । चिकित्रे ॥४॥

बृहतो महतोऽस्याग्नेः संबंधिन इंधाना दीप्यमाना यामासः । यांति गच्छंतीति यामा रश्मयः । न वग्नून् स्तुतिकारिणो जनान्न बाधंते । किंतु सख्युः सख्यस्तोतृत्वयष्टृत्वत्वलक्षणेन सख्येन सखिभूतस्य शिवस्य कल्याणस्य भक्तानां सुखकरस्येड्यस्य स्तोतव्यस्य वृष्णः कामानां वर्षितुर्बृहतो महतः स्वासः शोभनास्यास्याग्नेः स्वभूता ऋक्वस्तमांस्यंजंतोऽपगमयंत आकृतिभिः संगता वा भामासः ॥ भाम क्रोधे ॥ तीक्ष्णा अप्रसह्या रश्मयो यामन् । याति देवान्प्रति तर्पणाय यांति देवा एतं प्रत्यंगभावायेति यामा यज्ञः । तस्मिंश्चिकित्रे । सर्वतो जज्ञिरे । प्रथिता अभूवन् ॥

स्वना न यस्य भामासः पवंते रोचमानस्य बृहतः सुदिवः ।
ज्येष्ठेभिर्यस्तेजिष्ठैः क्रीळुमद्भिर्वर्षिष्ठेभिर्भानुभिर्नक्षति द्यां ॥५॥
स्वनाः । न । यस्य । भामासः । पवंते । रोचमानस्य । बृहतः । सुऽदिवः ।
ज्येष्ठेभिः । यः । तेजिष्ठैः । क्रीळुमत्ऽभिः । वर्षिष्ठेभिः । भानुऽभिः । नक्षति । द्यां ॥५॥

रोचमानस्य दीप्यमानस्य बृहतो महतः सुदिवः शोभनदीप्तेर्वा यस्याग्नेः स्वभूता भामासः ॥ भा दीप्तौ ॥ दीप्ता रश्मयः स्वना न स्वनंतो मरुत इव पवंते सर्वतः शब्दं कुर्वंतो गच्छंति । किंच योऽग्निर्ज्येष्ठेभिरत्यंतं प्रशस्तैस्तेजिष्ठैस्तेजस्वितमैः क्रीळुमद्भिः क्रीडनवद्भिर्वर्षिष्ठेभिर्वृद्धतमैर्भानुभिरात्मीयैस्तेजोभिर्द्यां द्युलोकं नक्षति व्याप्नोतीति । स त्वं देवानावहेत्युत्तरेण संबंधः ॥

अस्य शुष्मासो ददृशानपवेर्जेहमानस्य स्वनयन्नियुद्भिः ।
प्रत्नेभिर्यो रुशद्भिर्देवतमो वि रेभद्भिररतिर्भाति विभ्वा ॥६॥
अस्य । शुष्मासः । ददृशानऽपवेः । जेहमानस्य । स्वनयन् । नियुत्ऽभिः ।
प्रत्नेभिः । यः । रुशत्ऽभिः । देवऽतमः । वि । रेभत्ऽभिः । अरतिः । भाति । विऽभ्वा ॥६॥

ददृशानपवेर्दर्शनीयज्वालाग्नेः । यद्वा । पविर्वज्र आयुधं । दृश्यमानायुधस्य । जेहमानस्य । जेहतिर्गतिकर्मा । हविरादाय देवान्प्रति गच्छतोऽस्याग्नेः स्वभूताः शुष्मासः शोषका नियुद्भिः । नियुतो वायोरिति वायोरश्वा नियुतः । तद्युक्तैर्वायुभिः संयुक्ता रश्मयः स्वनयन् । शब्दायंते । किंच देवतमो देवानां मुख्योऽरतिर्गंता विभ्वा विभवनशीलो महान् योऽग्निः प्रत्नेभिः पुराणैः रुशद्भिः श्वेतवर्णैः रेभद्भिः शब्दायमानैस्तेजोभिर्वि भाति विविधं दीप्यते ॥

स आ वक्षि महि न आ च सत्सि दिवस्पृथिव्योररतिर्युवत्योः ।
अग्निः सुतुकः सुतुकेभिरश्वै रभस्वद्भी रभस्वाँ एह गम्याः ॥७॥
सः । आ । वक्षि । महि । नः । आ । च । सत्सि । दिवःपृथिव्योः । अरतिः । युवत्योः ।
अग्निः । सुऽतुकः । सुऽतुकेभिः । अश्वैः । रभस्वत्ऽभिः । रभस्वान् । आ । इह । गम्याः ॥७॥

हे अग्ने स तादृशस्त्वं नोऽस्मदीये यज्ञे महि महान् देवाना वक्षि । आवह । प्रापय । किंच युवत्योः परस्परं मिश्रितयोस्तरुण्योर्वा दिवस्पृथिव्योर्द्यावापृथिव्योर्मध्येऽरतिरग्निः सूर्यात्मना गंता त्वमा सत्सि । अस्माकं यज्ञमासीद । तथा सुतुकः । तुकिर्गत्यर्थः । सुगमः स्तोतृभिर्यष्टृभिश्च सुखेन प्राप्तव्यो रभस्वान्वेगवानग्निरंगनादिगुणयुक्तस्त्वं सुतुकेभिः सुगमै रभस्वद्भिर्वेगवद्भिरश्वै रोहिदाख्यैः सहेहास्मदीये यज्ञ आ गम्याः । आगच्छ ॥ ॥३१॥

प्र त इति सप्तर्चं चतुर्थं सूक्तं । ऋष्यादयाः पूर्ववत् । प्र त इत्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

प्र ते यक्षि प्र त इयर्मि मन्म भुवो यथा वंद्यो नो हवेषु ।
धन्वन्निव प्रपा असि त्वमग्न इयक्षवे पूरवे प्रत्न राजन् ॥१॥
प्र । ते । यक्षि । प्र । ते । इयर्मि । मन्म । भुवः । यथा । वंद्यः । नः । हवेषु ।
धन्वन्ऽइव । प्रऽपा । असि । त्वं । अग्ने । इयक्षवे । पूरवे । प्रत्न । राजन् ॥१॥

हे अग्ने ते तुभ्यं हविः प्र यच्छि । प्रयच्छामि । यजिर्दानार्थः । तथा मम मननीयां स्तुतिं ते त्वदर्थं प्रेयामि । प्रेरयामि । प्रोच्चारयामि । वंद्यः सर्वैर्वंदनीयस्त्वं नोऽस्मदीयेषु हवेषु देवाह्वानेषु यथा त्वं संनिहितो भुवः भवसि तथा हविः प्रयच्छामि स्तौमि च । हे प्रत्न पुराण राजन् सर्वस्य जगतः स्वामिन् हे अग्ने स त्वमियक्षवे यष्टुमिच्छते पूरवे । पूरुरिति मनुष्यनाम । मनुष्याय यजमानाय हविर्भिर्देवान्पूरयित्रे जनाय धन्वन्निव प्रपासि । यथा धन्वन् धन्वनि मरौ निरुदकप्रदेशे प्रपा । प्रपिबंत्यत्रेति प्रपा । सा यथोदकप्रदानेन जनेभ्यः सुखदा भवति एवं त्वं धनदानेन तस्मै सुखदाता भवसि ॥

यं त्वा जनासो अभि संचरंति गावो उष्णमिव व्रजं यविष्ठ ।
दूतो देवानामसि मर्त्यानामंतर्महाँश्चरसि रोचनेन ॥२॥
यं । त्वा । जनासः । अभि । संऽचरंति । गावः । उष्णंऽइव । व्रजं । यविष्ठ ।
दूतः । देवानां । असि । मर्त्यानां । अंतः । महान् । चरसि । रोचनेन ॥२॥

हे यविष्ठ युवतमाग्ने यं त्वा त्वां जनासो जना यजमानाः फलप्राप्त्यर्थमभि संचरंति अभितः परिचरंति सेवंते । तत्र दृष्टांतः । गाव उष्णमिव यथा गावः शीतार्ता उष्णं शीतजनितदुःखापनोदनार्थमुष्णं व्रजं गोष्ठमभि गच्छंति तद्वत् । स त्वं देवानामिंद्रादीनां मर्त्यानां मनुष्याणां च दूतोऽसि हविष्प्रापणद्वारा । ततो महांस्त्वमंतर्द्यावापृथिव्योर्मध्ये हवींष्यादाय रोचनेनांतरिक्षेण लोकेन चरसि । गच्छसि । तं त्वां स्तुम इति शेषः ॥

शिश्नुं न त्वा जेन्यं वर्धयंती माता बिभर्ति सचनस्यमाना ।
धनोरधि प्रवता यासि हर्यञ्जिगीषसे पशुरिवावसृष्टः ॥३॥
शिश्नुं । न । त्वा । जेन्यं । वर्धयंती । माता । बिभर्ति । सचनस्यमाना ।
धनोः । अधि । प्रऽवता । यासि । हर्यन् । जिगीषसे । पशुःऽइव । अवऽसृष्टः ॥३॥

हे अग्ने जेन्यं जयशीलं त्वा त्वां शिश्नुं न पुत्रमिव वर्धयंती पोषयंती माता पृथिवी सचनस्यमाना संपर्कमिच्छंती सती बिभर्ति । धारयति । स त्वं हर्यन् कामयमानस्तस्मिँल्लोके धनोरधि । अधिः सप्तम्यर्थद्योतकः । अंतरिक्षात्प्रवता प्रवणेन मार्गेण यासि । यज्ञं प्रत्यागच्छसि । किंच त्वमवसृष्टो यष्टृभिर्हविरादाय जिगीषसे । देवान्प्रति गंतुमिच्छसि । कथमिव । पशुरिव यथा विमुक्तः पशुर्गोष्ठं प्रत्यागच्छति तद्वत् ॥

मूरा अमूर न वयं चिकित्वो महित्वमग्ने त्वमंग वित्से ।
शयें वव्रिश्चरति जिह्वयादन्नेरिह्यते युवतिं विश्पतिः सन् ॥४॥
मूराः । अमूर । न । वयं । चिकित्वः । महिऽत्वं । अग्ने । त्वं । अंग । वित्से ।
शयें । वव्रिः । चरति । जिह्वया । अदन् । रेरिह्यते । युवतिं । विश्पतिः । सन् ॥४॥

हे अमूरामूढ अत एव चिकित्वश्चेतनवन् हे अग्ने मूरा मूढा वयं तव माहात्म्यं न जानीमः । किंतु हे अग्ने त्वमंग । अंगेति निपात एवार्थे । त्वमेव तव महित्वं माहात्म्यं वित्से । जानासि । त्वत्तः को ऽन्यो वेदितुमर्हति । किंच वव्रिर्जीर्ण ओषधीसंगः शये । शेते । तिष्ठति । यद्वा । वव्रिरिति रूपनाम सामर्थ्याद्यांतर्णोतमत्वर्थं द्रष्टव्यं । आहवनीयाख्येन रूपेण रूपवान्शये । चरति । अथ जिह्वया ज्वालाख्ययादन्हवींषि भक्षयंश्चरति ॥ वाक्यभेदादनिघातः ॥ किंच विश्पतिर्विशां स्वामी सन्नग्निर्युवतिमात्मनो मिश्रयित्रीमाहुतिं दीर्घप्रसृतया ज्वालया जिह्वया रेरिह्यते । अत्यर्थं लेढि । आस्वादयति ॥ लिह आस्वादने । यङि रूपं ॥ यद्वा । सोऽग्निर्युवतिं तरुणीं जीर्णौषधिकां पृथिवीमास्वादयति ॥

कूचिज्जायते सनयासु नव्यो वने तस्यौ पलितो धूमकेतुः ।
अस्नातापो वृषभो न प्र वेति सचेतसो यं प्रणयंत मर्ताः ॥५॥
कूऽचित् । जायते । सनयासु । नव्यः । वने । तस्यौ । पलितः । धूमऽकेतुः ।
अस्नाता । आपः । वृषभः । न । प्र । वेति । सऽचेतसः । यं । प्रऽनयंत । मर्ताः ॥५॥

नव्यो नवतरः स्तुत्यो वाग्निः कूचित् क्वचित्प्रदेशे जायते । कुच । सनयासु पुराणीषु जीर्णास्वोषधीष्वरण्योः । तथा पलितः पालयिता श्वेतवर्णो धूमकेतुर्धूमप्रज्ञानोऽग्निर्वने सर्वस्मिन्नरण्ये तस्यौ । तिष्ठति । यद्वा । वन उदके मेघगते विद्युदात्मना तिष्ठति च । अस्नाता स्नानमकुर्वन्ननपेक्षितस्नानः सर्वदाभुक्तः सोऽग्निरापः ॥ सुब्व्यत्ययः ॥ अप उदकानि शांत्यर्थं प्र वेति । प्रगच्छति । तत्र दृष्टांतः । वृषभो न यथा वृषभस्तृष्णोपशमनार्थमरण्यमध्यस्थान्युदकानि प्रगच्छति तद्वत् । मर्ता मनुष्या ऋत्विजः सचेतसः समानमनस्काः समानप्रज्ञानाः संतो यमग्निं प्रणयंत हविर्भिः प्रीणयंति ॥

तनूत्यजेव तस्करा वनर्गू रशनाभिर्दशभिरभ्यधीतां ।
इयं ते अग्ने नव्यसी मनीषा युक्ष्वा रथं न शुचयद्भिरंगैः ॥६॥
तनूत्यजाऽइव । तस्करा । वनर्गू इति । रशनाभिः । दशऽभिः । अभि । अधीतां ।
इयं । ते । अग्ने । नव्यसी । मनीषा । युक्ष्व । रथं । न । शुचयत्ऽभिः । अंगैः ॥६॥

हे अग्ने वनर्गू वनगामिनौ तनूत्यजा चौर्यं मर्तुं क्षतनिश्चयौ धृष्टौ तस्करा तस्करौ यथा पथिकं मोषणार्थं रज्ज्वा बद्ध्वाक्षथ च क्वचित्प्रदेशे स्थापयतः तद्वत् । तथा यास्कः । तनूत्यक् तनूत्यक्ता वनर्गू वनगामिनावग्निमंथनौ वाह्र तस्कराभ्यामुपमिमीते । नि० ३. १४. । इत्यादि । अधीतां ॥ दधातेर्लुङि सिचो लुकि च्छंदस्युभयथेति तस आर्धधातुकत्वेन ङित्त्वाद्गुमाख्येतीकारः ॥ ततो हे अग्ने ते त्वदर्थं नव्यसी नवतरेयं मनीषा स्तुतिर्मया क्रियते । एतच्छ्रुत्वा शुचयद्भिः सर्वं प्रकाशयद्भिरात्मीयैरंगैस्तेजोभिरात्मानं मदीयं यज्ञं प्रति युक्ष्व । योजय । कथमिव । रथं न यथा रथमश्वैः संयोजयंति तद्वत् ॥

उखासंभरणीयेष्टावग्नेर्ब्रह्मखतो याज्या ब्रह्म च त इत्येषा । सूचितं च । ब्रह्म च ते जातवेदो नमश्च पुरूण्यग्ने पुरुधा त्वाया । आ० ४. १. । इति ॥

ब्रह्म च ते जातवेदो नमश्चेयं च गीः सदमिद्वर्धनी भूत् ।
रक्षा णो अग्ने तनयानि तोका रक्षोत नस्तन्वोऽ३ अप्रयुच्छन् ॥७॥
ब्रह्म । च । ते । जातऽवेदः । नमः । च । इयं । च । गीः । सदं । इत् । वर्धनी । भूत् ।
रक्ष । नः । अग्ने । तनयानि । तोका । रक्ष । उत । नः । तन्वः । अप्रऽयुच्छन् ॥७॥

हे जातवेदो जातप्रज्ञाग्ने ते त्वदर्थं ब्रह्मास्माभिर्दीयमानं हवीरूपमन्नं वर्धनी वर्धनं भूत् । भवतु । तथा नमो नमस्कारश्च किंचेयमिदानींक्रियमाणेषा स्तुतिः सदमित् सदैव वर्धनी वर्धयित्री भूत् । भवतु । तस्मात्रे अग्ने नोऽस्माकं तनयानि पुत्रांस्तोका पौत्रांश्च रक्ष । पालय । उतापि चाप्रयुच्छन्नप्रमाद्यंस्त्वं नोऽस्माकं तन्वोऽंगानि रक्ष ॥ ॥३२॥

एकः समुद्र इति सप्तर्चं पंचमं सूक्तं । ऋष्यादयः पूर्ववत् । विनियोगश्च । एक इत्यनुक्रांतं ॥

एकः समुद्रो धरुणो रयीणामस्मद्ऋदो भूरिजन्मा वि चष्टे ।
सिषक्त्यूर्ध्वो निण्योरुपस्थ उत्स्य मध्ये निहितं पदं वेः ॥१॥

एकः । समुद्रः । धरुणः । रयीणां । अस्मत् । हृदः । भूरिऽजन्मा । वि । चष्टे ।
सिसक्ति । ऊर्धः । निऽण्योः । उपऽस्थे । उत्सस्य । मध्ये । निऽहितं । पदं । वेरिति वेः ॥१॥

समुद्रः यस्मात्तनान्युदकानि वा समुद्रवंतीति तादृशो रयीणां धनानां धरुणो धारयितैकोऽसहायो भूरिजन्मा बहुविधजननो नानायज्ञेष्वाहवनीयादिभावेन बहुजननः सोऽग्निरस्मत् ॥ सुपां सुलुगिति षष्ठ्या लुक् ॥ अस्माकं हृदो हृदयान्यभिलषितानि वि चष्टे । विपश्यति । जानाति । उक्तं च । मनो वै देवा मनुष्यस्य जानंतीति । किंच निण्योः । अंतर्हितनामैतत् । अंतर्हितयोर्द्यौतिस्तमोभ्यामाच्छादितयोः प्रातःसायंकालयोरुपस्थ उपस्थाने समीपे वर्तमानमूधो रात्रिं सिषक्ति । सेवते । उपजीवति । यद्वा । निण्योरंतर्हितस्यांतरिक्षस्य समीपे वर्तमानमूधो मेघं सेवते । अथ प्रत्यक्षः । हे अग्ने उत्सस्योदकधारकस्य लोकस्य मध्ये पदमपां स्थानं निहितं । तन्माध्यमिकां वाचं वेः । गच्छ । यद्वा । उत्सस्य मेघस्य मध्ये निहितं पदं विद्युदाख्यं तत् स्वात्मतया गच्छ ॥ वेः । वी गत्यादिषु । लङि सिपि रूपं । वाक्यभेदादनिघातः ॥

समानं नीळं वृषणो वसानाः सं जग्मिरे महिषा अर्वतीभिः ।
ऋतस्य पदं कवयो नि पांति गुहा नामानि दधिरे परांसि ॥२॥
समानं । नीळं । वृषणः । वसानाः । सं । जग्मिरे । महिषाः । अर्वतीभिः ।
ऋतस्य । पदं । कवयः । नि । पांति । गुहा । नामानि । दधिरे । परांसि ॥२॥

वृषण आङ्गतीनां सेक्तारः समानमेकं नीळं स्थानमग्निं वसाना मंवत आच्छादयंतो महिषा महांतो यजमाना अर्वतीभिर्वडवाभिः सं जग्मिरे । समगच्छंत । अश्ववंतोऽभूवन् । यद्वा । अग्निमेवात्मीययज्ञं प्रत्यागंतुं रोहिदाख्याभिर्वडवाभिः संयोजितवंतः । तथा कवयो मेधाविन ऋतस्योदकस्य पदमावासस्थानमग्निं नि पांति । नितरां रक्षंति । हविर्भिः स्तुतिभिश्चाराधयंतीत्यर्थः । ततो गुहा गुहायामंतरिक्षे स्थितानि दिव्यानि नामान्युदकानि दधिरे । धारयंति । यद्वा । गुहा गूढे संवृते हृदये परांसि प्रधानान्यग्निर्जातवेदा वैश्वानर इत्यादीनि नामानि दधिरे । कुर्वंति । स्तुवंतीत्यर्थः ॥

ऋतायिनी मायिनी सं दधाते मित्वा शिशुं जज्ञतुर्वर्धयंती ।
विश्वस्य नाभिं चरतो ध्रुवस्य कवेश्चित्तंतुं मनसा वियंतः ॥३॥
ऋतयिनी इत्यृतऽयिनी । मायिनी इति । सं । दधाते इति । मित्वा । शिशुं । जज्ञतुः ।
वर्धयंती इति ।
विश्वस्य । नाभिं । चरतः । ध्रुवस्य । कवेः । चित् । तंतुं । मनसा । विऽयंतः ॥३॥

ऋतायिनी ऋतवत्यौ सत्यवत्यौ अत एव मायिनी प्रज्ञावत्यौ कर्मयुक्ते वा द्यावापृथिव्यौ यज्ञसाधनभूते अरणी वेममग्निं सं दधाते । सम्यग्धारयतः । अग्निं सूर्यात्मना केवलाग्न्यात्मना वा सं दधाते । मित्वा कालपरिमाणं कृत्वा यद्वा संपरिच्छिद्य शिशुं शंसनीयं बालमग्निं जज्ञतुः । जनयतः । वर्धयंती वर्धयंत्यौ द्यावापृथिव्यौ । लोके यथा परिच्छेदाय पुत्रं पितरौ जनयतस्तद्वत् । ततो विश्वस्य सर्वस्य चरतो जंगमस्य ध्रुवस्य स्थावरस्य च जगतो नाभिं नाभिभूतं मध्यं प्रधानभूतं वा कवेर्मेधाविनोऽग्नेस्तंतुं तन्तितारं वैश्वानराख्यमंशमेव मनसा वियंतो विविधं गच्छंतो मनुष्याः सुखेन युज्यंत इति शेषः । तं वयं यजाम इति ॥

ऋतस्य हि वर्तनयः सुजातमिषो वाजाय प्रदिवः सचंते ।
अधीवासं रोदसी वावसाने घृतैरन्नैर्वावृधाते मधूनां ॥४॥

ऋतस्य । हि । वर्तनयः । सुऽजातं । इषः । वाजाय । प्रऽदिवः । सचंते ।
अधीवासं । रोदसी इति । वसाने इति । घृतैः । अक्तैः । ववृधाते इति । मधूनां ॥४॥

ऋतस्य यज्ञस्य वर्तनयः प्रवर्तका इषोऽभिलषितानीच्छंतः प्रदिवः पुरातना ऋत्विग्यजमानाः सुजातमाधानकाले सुष्ठूत्पन्नमग्निं वाजाय बलार्थमन्नार्थं वा सचंते हि । सेवंते खलु । अपि च वावसाने सर्वस्य जगत आच्छादयित्र्यौ रोदसी द्यावापृथिव्यावधीवासमोषधिनद्याद्यात्मना निवसंतं । यद्वा । अधिरुपर्यर्थे । त्रयाणां लोकानामुपर्यग्निविद्युदादित्यात्मना निवसंतं । अग्निं मधूनामुदकानां जन्यत्वेन संबंधिभिर्घृतैरन्नैः पुरोडाशादिभिश्च ववृधाते । वर्धयां चक्रतुः । वर्धयतः । तस्माद्वयमपि तमग्निमभिष्टुम इत्यभिप्रायः ॥

सप्त स्वसॄरृषीर्वावशानो विद्वान्मध्व उज्जभारा दृशे कं ।
अंतर्येमे अंतरिक्षे पुराजा इच्छन्वव्रिमविदत्पूषणस्य ॥५॥
सप्त । स्वसॄः । ऋषीः । वावशानः । विद्वान् । मध्वः । उत् । जभार । दृशे । कं ।
अंतः । येमे । अंतरिक्षे । पुराऽजाः । इच्छन् । वव्रिं । अविदत् । पूषणस्य ॥५॥

वावशानः कामयमानो वाश्यमानः स्तोतृभिः स्तूयमानो वा विद्वान् सर्वं जानानः सोऽग्निरृषीरारोचमानाः सप्त सप्तसंख्याकाः स्वसॄः स्वयंसारिणीः काली कराली चेत्यादिकाः सप्त जिह्वा मध्वो मदकराद्यन्नादुज्जभार । उज्जहार । ऊर्ध्वं हृतवान् । यज्ञे स्वतेजसा प्रादुर्भूत इत्यर्थः । किमर्थं कं सुखेन दृशे सर्वेषामेव पदार्थानां दर्शनार्थं । किंच पुराजाः पुराजातः सोऽग्निर्द्यावापृथिव्योरंतर्मध्येऽंतरिक्षे स्थितस्ता जिह्वा येमे । नियमितवान् । सर्वत्र तेजोयुक्तो वर्तत इत्यर्थः । अपि चेच्छन्यजमानान्कामयमानोऽग्निः पूषणस्य । पूषेति पृथिवीनाम । पार्थिवस्य लोकस्य वव्रिं रूपं पृश्निवर्णमविदत् । प्रायच्छत् । यद्वा । मूर्धा भुवो भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन् । ऋ० १०. ८८. ६. । इति मंत्रांतरे दर्शनादादित्यात्मनाग्निः स्तूयते । कामयमानः सूर्यात्माग्निः सप्तसंख्याकान् स्वसॄ रश्मीन् मध्वः समुद्रोदकादुद्ध्रुतवान् । प्रापः । अंतरिक्षे विद्युदात्मना स्थित्वा वृष्टिलक्षणं रूपं पृथिव्याः प्रयच्छति ॥



सप्त मर्यादाः कवयस्ततक्षुस्तासामेकामिदभ्यंहुरो गात् ।
आयोर्ह स्कंभ उपमस्य नीळे पथां विसर्गे धरुणेषु तस्थौ ॥६॥
सप्त । मर्यादाः । कवयः । ततक्षुः । तासां । एकां । इत् । अभि । अंहुरः । गात् ।
आयोः । ह । स्कंभः । उपऽमस्य । नीळे । पथां । विऽसर्गे । धरुणेषु । तस्थौ ॥६॥

कवयो मेधाविन ऋषयः सप्त मर्यादाः । कामजेभ्यः क्रोधजेभ्यश्चोद्भूताः पानमद्याः स्त्रियो मृगया दंडः पारुष्यमन्यदूषणमिति सप्त मर्यादाः । यद्वा । स्तेयं गुरुतल्पारोहणं ब्रह्महत्यां सुरापानं दुष्कृतकर्मणः पुनःपुनःसेवां पातकेऽनृतोक्तं । नि० ६. २७. । इति निरुक्ते निर्दिष्टाः सप्त मर्यादाः । अवस्थितास्ततक्षुः । तक्षतिः करोतिकर्मा । सुष्ठु लंघनीयाश्चक्रुः । त्यक्तवंत इत्यर्थः । तासां मर्यादानामेकामिदेकामेवांहुरः पापवान् पुरुषोऽभि गात् । अभिगच्छति । यस्त्वेवं करोति स पापवान्भवतीत्यर्थः । किंचायोस्तस्य मनुष्यस्य स्कंभः स्कंभयिता निरोधको ऽग्निरूपमस्य समीपभूतस्यायोर्नीळे स्थाने पथामादित्यरूपस्य स्वस्य रश्मीनां विसर्गे विसर्जनस्थानेऽंतरिक्षमध्ये वर्तमानेषु धरुणेषूदकेषु तस्थौ । विद्युदात्मना तिष्ठति । अनेन लोकत्रयवर्तित्वमिति ॥

असच्च सच्च परमे व्योमन्दक्षस्य जन्मन्नदितेरुपस्थे ।
अग्निर्ह नः प्रथमजा ऋतस्य पूर्व आयुनि वृषभश्च धेनुः ॥७॥

असत्। च। सत्। च। परमे। विऽओमन्। दक्षस्य। जन्मन्। अदितेः। उपऽस्थे।
अग्निः। ह। नः। प्रथमऽजाः। ऋतस्य। पूर्वे। आयुनि। वृषभः। च। धेनुः ॥ ७॥

असदव्याकृतं सच्च व्याकृतं। असदेवेदमग्र आसीत् तत्सदासीत् तत्समभवत्। छां० उ० ३. १९. १.। इति श्रुतेः। सदसदात्मकं जगत्सर्वं परम उत्तमे ज्ञानसहिते व्योमन्व्योमनि कारणात्मनि जातमभूत्सदा। अदितेः पृथिव्या उपस्थ उपस्थाने समीपे दक्षस्य प्रजापतेः। यद्वा। दक्षस्य। स चेधात्मानं व्यभजतादित्यं तृतीयं वायुं तृतीयमिति श्रुतेः। शत० १०. ६. ५. ३.। तृतीयस्य द्युलोकस्याधिष्ठातृत्वादादित्यस्य। जन्मञ्जन्मनि। तत एवं सति मनुष्यस्य सृष्टिक्रमात्पूर्वमग्निर्हाग्निरेवर्तस्य कर्मफलस्य भोक्तॄणां नोऽस्माकं प्रथमजाः प्रथमजातः समुत्पन्नः। तेजो रसो निरवर्ततााग्निः। शत० १०. ६. ५. २. बृ० उ० १. १. २. २.। इति श्रवणात्। पश्चात्तत्प्रकरणे ततो मनुष्या अजायंतेति प्रथमत एव मनुष्यसृष्टेरभिहितत्वात् अनंतरं पूर्वे। उत्तरसृष्टिमपेक्ष्य पूर्वत्वं। आयुनि काले ऽयमग्निरेव वृषभश्चासीत्। धेनुश्चाभवत्। स्त्रीपुंसवत् स्त्रीपुंसात्मकोऽभवदित्यर्थः ॥ ॥३३॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्ये सप्तमाष्टके पंचमोऽध्यायः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
सप्तमस्याष्टकस्येत्थं व्याकार्षीत्पंचमं सुधीः। सायणाङ्कसुतः षष्ठमध्यायं व्याचिकीर्षति ॥

दशमे मंडले प्रथमेऽनुवाके षोडश सूक्तानि। तत्रायं स यस्येति सप्तर्चं षष्ठं सूक्तं। आप्त्यस्य चितस्यार्षं वैष्टुभमाग्नेयं। अयमित्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

अयं स यस्य शर्मन्नवोभिरग्नेरधते जरिताभिष्टौ।
ज्येष्ठेभिर्यो भानुभिर्ऋषूणां पर्येति परिवीतो विभावा ॥ १॥
अयं। सः। यस्य। शर्मन्। अवःऽभिः। अग्नेः। एधते। जरिता। अभिष्टौ।
ज्येष्ठेभिः। यः। भानुऽभिः। ऋषूणां। परिऽएति। परिऽवीतः। विभाऽवा ॥ १॥

जरिता स्तोताभिष्टौ यागे कृते यस्याग्नेरवोभिः पालनैः शर्मञ्छर्मणि स्वगृह एधते वर्धते सोऽयमग्नियागार्थमस्माभिराहृत इति शेषः। विभावा दीप्तिमान् योऽग्निर्ऋषूणां सूर्यरश्मीनां ज्येष्ठेभिः प्रशस्तैर्भानुभिस्तेजोभिः परिवीतः परिवृतः पर्येति सर्वतो गच्छति। यत्र यत्र गंतव्यं तत्र तत्राप्रतिहतगतिर्गच्छतीत्यर्थः ॥

यो भानुभिर्विभावा विभात्यग्निर्देवेभिर्ऋतावाजस्रः।
आ यो विवाय सख्या सखिभ्योऽपरिह्वृतो अत्यो न सप्तिः ॥ २॥
यः। भानुऽभिः। विभाऽवा। विऽभाति। अग्निः। देवेभिः। ऋतऽवा। अजस्रः।
आ। यः। विवाय। सख्या। सखिऽभ्यः। अपरिऽह्वृतः। अत्यः। न। सप्तिः ॥ २॥

ऋतवा सत्यवानुदकवान्यश्चवान्वाजस्रोऽनुपक्षीणोऽहिंसितो वा। केनचिदनभिभूत इत्यर्थः। विभावा दीप्तिमान्योऽग्निर्देवेभिर्देवैर्द्योतमानैर्भानुभिस्तेजोभिर्विभाति विविधं दीप्यते किंच योऽग्निः सख्या सख्यानि

सखिभिः कर्तव्यानि कर्माणि हविरादीनि । कर्तुमिति शेषः । सखिभ्यः सखिभूतानां यजमानानामर्थायापरिक्लृतोऽपरिहिंसितः । अपरिश्रांत इत्यर्थः । आ विवाय आभिमुख्येन गच्छति । तत्र दृष्टांतः । सप्तिः । सदासर्पण इत्यर्थः । अत्यो न यथा सततगमनसमर्थोऽश्वोऽपरिश्रांतो गच्छति तद्वत् । सोऽयमग्निरस्माभिर्यागार्थमाहूत इति पूर्ववदोज्यं ॥

ईशे यो विश्वस्या देववीतेरीशे विश्वायुरुषसो व्युष्टौ ।
आ यस्मिन्मना हवींष्यग्मावरिष्टरथः स्कभ्नाति शूषैः ॥३॥
ईशे । यः । विश्वस्याः । देवऽवीतेः । ईशे । विश्वऽआयुः । उषसः । विऽउष्टौ ।
आ । यस्मिन् । मना । हवींषि । अग्मौ । अरिष्टऽरथः । स्कभ्नाति । शूषैः ॥३॥

योऽग्निर्विश्वस्या देववीतेः सर्वस्य यज्ञस्येशे ईष्टे । अपि च विश्वायुः सर्वचाप्रतिहतगमन उषसो व्युष्टौ विवासन उदयकाले होमार्थं यजमानानामीशे ईष्टे । शूषैः शत्रुबलैररिष्टरथोऽहिंसितयज्ञरथः सर्व एव यजमानो यस्मिन्नग्नौ मना मननीयानि हवींष्या स्कभ्नाति आदरेण प्रतिबध्नाति प्रक्षिपति । सोऽयमग्निरस्माभिर्यागार्थमाहूत इत्यर्थः ॥

शूषेभिर्वृधो जुषाणो अर्कैर्देवाँ अच्छा रघुपत्वा जिगाति ।
मंद्रो होता स जुह्वा३ यजिष्ठः संमिश्लो अग्निरा जिघर्ति देवान् ॥४॥
शूषेभिः । वृधः । जुषाणः । अर्कैः । देवान् । अच्छ । रघुऽपत्वा । जिगाति ।
मंद्रः । होता । सः । जुह्वा । यजिष्ठः । संऽमिश्लः । अग्निः । आ । जिघर्ति । देवान् ॥४॥

वृधो वर्धितोऽग्निः शूषेभिर्हविर्लक्षणैर्बलैः । बलनिमित्तैर्हविर्भिरित्यर्थः । अर्कैः स्तोत्रैश्च जुषाणः सेव्यमानः सन् देवानिंद्रादीनच्छागंतुं रघुपत्वा लघुपतनः शीघ्रगामी जिगाति । गच्छति । गत्वा च मंद्रः स्तुत्यो होता देवानामाह्वाता होमनिष्पादको वा यजिष्ठो यष्टृतमः संमिश्लः स्वगुणैर्देवैर्वा संप्रयुक्तः सोऽग्निर्देवान्प्रति हविरा जिघर्ति । आहारयति । देवेभ्यो हविर्ददातीत्यर्थः ॥

तमुस्रामिंद्रं न रेजमानमग्निं गीर्भिर्नमोभिरा कृणुध्वं ।
आ यं विप्रासो मतिभिर्गृणंति जातवेदसं जुह्वं सहानां ॥५॥
तं । उस्रां । इंद्रं । न । रेजमानं । अग्निं । गीःऽभिः । नमःऽभिः । आ । कृणुध्वं ।
आ । यं । विप्रासः । मतिऽभिः । गृणंति । जातऽवेदसं । जुह्वं । सहानां ॥५॥

हे ऋत्विजः यूयमुस्रां भोगानामुत्स्राविणं दातारं रेजमानं ज्वालात्मना कंपमानं तमग्निमिंद्रं मेंद्रमिव गीर्भिः स्तुतिभिर्नमोभिर्हविर्भिश्चा कृणुध्वं । अस्मदभिमुखं कुरुत । विप्रासो मेधाविनः स्तोतारः सहानां शत्रुबलाद्यभिभवितृणां देवानां जुह्वमाह्वातारं जातवेदसं जातधनं जातप्रज्ञं वा यमग्निमा गृणंति आदरेण स्तुवंति । तमा कृणुध्वमिति पूर्वेण संबंधः ॥

सं यस्मिन्विश्वा वसूनि जग्मुर्वाजे नाश्वाः सप्तीवंत एवैः ।
अस्मे ऊतीरिंद्रवाततमा अर्वाचीना अग्न आ कृणुष्व ॥६॥
सं । यस्मिन् । विश्वा । वसूनि । जग्मुः । वाजे । न । अश्वाः । सप्तिऽवंतः । एवैः ।
अस्मे इति । ऊतीः । इंद्रवाततऽतमाः । अर्वाचीनाः । अग्ने । आ । कृणुष्व ॥६॥

हे अग्ने यस्मिंस्त्वयि विश्वानि वसूनि धनानि सं जग्मुः स्वत्वेन संगतानि भवंति । तत्र दृष्टांतः । एवैर्गमनैः सप्तीवंतः सर्पणवंतः शीघ्रगमनसमर्था अश्वा वाजे न यथा संग्रामे संगतास्तद्वत् । हे अग्ने स त्वमिंद्रवाततमा इंद्रेणाभिगता ऊती रक्षा असे अस्मास्ववीचीना अभिमुखीरा शृणुष्व । आदरेण कुरु ॥

अधा ह्यग्ने महा निषद्या सद्यो जज्ञानो हव्यो बभूथ ।
तं ते देवासो अनु केतमायन्नधावर्धंत प्रथमास ऊमाः ॥७॥
अध । हि । अग्ने । महा । निऽसद्य । सद्यः । जज्ञानः । हव्यः । बभूथ ।
तं । ते । देवासः । अनु । केतं । आयन् । अध । अवर्धत । प्रथमासः । ऊमाः ॥७॥

अधानंतरं हि यस्माद्धे अग्ने त्वं महा महत्त्वेन जज्ञानो जायमानो ज्वलन्निषद्योपविश्य सद्यस्तस्मिन्प्रजननकाल एव हव्यो हवनार्हं आकृतिप्रक्षेपणार्हो बभूथ भवसि तस्मात्कारणाद्देवासो हविषां दातार ऋत्विग्यजमानास्ते तव स्वभूतं तं तादृशं केतं प्रज्ञानलक्षणमन्वायन् । अनुगच्छंति । दीप्ते त्वयि हवींषि जुह्वतीत्यर्थः । अधानंतरमृत्विगादयः प्रथमासः क्रियाभिजनविद्यागुणैरुत्कृष्टा ऊमास्त्वया रक्षिताः संतोऽवर्धंत । वर्धंते ॥ ॥१॥

स्वस्ति न इति सप्तर्चं सप्तमं सूक्तं । ऋष्याद्याः पूर्ववत् । स्वस्तीत्यनुक्रांतं ॥ उक्तः सूक्तविनियोगः ॥ स्वस्त्ययन्यां प्रधानस्य स्वस्ति न इत्येषानुवाक्या । सूचितं च । अग्निः स्वस्तिमान् स्वस्ति नो दिवो अग्ने पृथिव्याः । आ० २. १०. । इति ॥

स्वस्ति नो दिवो अग्ने पृथिव्या विश्वायुर्धेहि यजथाय देव ।
सचेमहि तव दस्म प्रकेतैरुरुष्या णो उरुभिर्देव शंसैः ॥१॥
स्वस्ति । नः । दिवः । अग्ने । पृथिव्याः । विश्वऽआयुः । धेहि । यजथाय । देव ।
सचेमहि । तव । दस्म । प्रऽकेतैः । उरुष्य । नः । उरुऽभिः । देव । शंसैः ॥१॥

हे देव दानादिगुणविशिष्टाग्ने त्वं दिवः पृथिव्या द्यावापृथिव्योः सकाशान्नोऽस्मभ्यं विश्वायुः सर्वान्नं स्वस्ति पुत्रादि यजथाय देवयागार्थं धेहि । प्रयच्छ । सर्वोपद्रवरहिताः सर्वान्नपुत्रयुक्ताश्च संतो वयं यथा यज्वानो भवेम तथास्मान्कुर्विति वाक्यशेषः । अपि च वयं सचेमहि । हे दस्म दर्शनीय देवाग्ने उरुभिर्बहुभिः शंसैः शंसनीयैस्तव संबंधिभिः प्रकेतैः पालनोपायप्रज्ञानैर्नोऽस्मानुरुष्य । रक्ष ॥

इमा अग्ने मतयस्तुभ्यं जाता गोभिरश्वैरभि गृणंति राधः ।
यदा ते मर्तो अनु भोगमानड्वसो दधानो मतिभिः सुजात ॥२॥
इमाः । अग्ने । मतयः । तुभ्यं । जाताः । गोभिः । अश्वैः । अभि । गृणंति । राधः ।
यदा । ते । मर्तः । अनु । भोगं । आनट् । वसो इति । दधानः । मतिऽभिः । सुऽजात ॥२॥

हे अग्ने इमा ईदृशो मतयः स्तुतयस्तुभ्यं त्वदर्थं जाता अस्मदादिस्तोतृमुखेभ्य उत्पन्नाः । उच्चारिता इत्यर्थः । गोभिरश्वैश्च सहितं राधस्त्वया दीयमानं हिरण्यादिकं धनमभि गृणंति । अभिष्टुवंति । अस्मत्स्तुत्यनुरूपान्नमस्मभ्यं त्वया दत्तमिति प्रशंसंति । यदा मर्तोऽस्मदादिको मनुष्यस्ते त्वया दीयमानं भोगं भोगार्हं धनमानट् प्राप्नोति लभते तदा हे वसो प्रशस्यवसुमन् । यद्वा । स्वेन तेजसा सर्वस्माच्छादयितः । हे सुजात शोभनकर्मार्थमुत्पन्नाग्ने त्वं दधानोऽस्मभ्यं धनं प्रयच्छन् मतिभिरस्मदीयाभिः स्तुयस इति शेषः ॥

अग्निं मन्ये पितरमग्निमापिमग्निं भ्रातरं सदमित्सखायं ।
अग्नेरनीकं बृहतः सपर्यं दिवि शुक्रं यजतं सूर्यस्य ॥३॥
अग्निं । मन्ये । पितरं । अग्निं । आपिं । अग्निं । भ्रातरं । सदं । इत् । सखायं ।
अग्नेः । अनीकं । बृहतः । सपर्यं । दिवि । शुक्रं । यजतं । सूर्यस्य ॥३॥

अहं स्तोता पितरमग्निमेव मन्ये । जाने । आपिं बंधुमग्निमेव मन्ये । भ्रातरमग्निमेव मन्ये । सदमित् सदैवाविसंवादिनं सखायमग्निमेव जानामि । बृहतो महतोऽग्नेरनीकमाहवनीयाख्यं मुखं सपर्यं । परिचरामि । तत्र लुप्तोपममेतत् । दिवि द्युलोके स्थितं यजतं यष्टव्यं पूजनीयं सूर्यस्य संबंधि शुक्रं दीप्तिमन्मंडलं यथा कश्चिदभिप्रेतार्थसिद्धय आराधयति तद्वत् ॥

सिध्रा अग्ने धियो अस्मे सनुचीर्यं चायसे दम आ नित्यहोता ।
ऋतावा स रोहिदश्वः पुरुक्षुर्द्युभिरस्मा अहभिर्वाममस्तु ॥४॥
सिध्राः । अग्ने । धियः । अस्मे इति । सनुचीः । यं । चायसे । दमे । आ । नित्यऽहोता ।
ऋतऽवा । सः । रोहित्ऽअश्वः । पुरुऽक्षुः । द्युऽभिः । अस्मै । अहऽभिः । वामं । अस्तु ॥४॥

हे अग्ने सनुचीः संभक्त्रयोऽस्मे अस्माकं संबंधिन्यो धियः स्तुतयः सिध्राः सिद्धा निष्पन्नाः । त्वदर्थमस्माभिः कृता इत्यर्थः । दम आ अस्मद्यज्ञगृहे मर्यादतयावस्थितस्त्वं नित्यहोता सततं होमनिष्पादको देवानामाह्वाता वा सन् यं चायसे कर्मवैगुण्याद्रुचसि सोऽहं त्वत्प्रसादात्त्वत्सायुज्यं गतः सन्नृतवा यज्ञवान् सत्यवान् वा स्यामिति शेषः । रोहिदश्वो रोहित्संज्ञकाश्वः पुरुक्षुर्बहुन्नश्च स्यां । किंचास्मा ईदृग्भूताय तुभ्यं द्युभिर्दीप्तिष्वहभिरहःसु दिवसेषु वामं वननीयं हविरस्तु ॥

द्युभिर्हितं मिचमिव प्रयोगं पुरुमृत्विजमध्वरस्य जारं ।
बाहुभ्यामग्निमायवोऽजनंत विक्षु होतारं न्यसादयंत ॥५॥
द्युऽभिः । हितं । मिचंऽइव । प्रऽयोगं । पुरुं । ऋत्विजं । अध्वरस्य । जारं ।
बाहुऽभ्यां । अग्निं । आयवः । अजनंत । विक्षु । होतारं । नि । असादयंत ॥५॥

द्युभिर्हितं दीप्तैराहितं मिचमिव स्निग्धमिव प्रयोगं प्रयोक्तव्यं पुरुं पुराणमृत्विजं होतृसंज्ञकं । अग्निर्वै देवानां होतासीदिति श्रुतेः । अध्वरस्य जारं समापयितारं एवंभूतमग्निमायवो यजमाना मनुष्या बाहुभ्यामजनंत । जनितवंतः । किंच विक्षु मनुष्येषु । तदाकारेषु देवेष्वित्यर्थः । होतारमाह्वातारं न्यसादयंत । नियमेन सादितवंतः । देवानां यागार्थं निरूपितवंत इत्यर्थः ॥

स्वयं यजस्व दिवि देव देवान्किं ते पाकः कृणवदप्रचेताः ।
यथायजऋतुभिर्देव देवानेवा यजस्व तन्वं सुजात ॥६॥
स्वयं । यजस्व । दिवि । देव । देवान् । किं । ते । पाकः । कृणवत् । अप्रऽचेताः ।
यथा । अयजः । ऋतुऽभिः । देव । देवान् । एव । यजस्व । तन्वं । सुऽजात ॥६॥

हे देव द्योतमानाग्ने त्वं दिवि द्युलोके स्थितान्देवानिंद्रादीन् स्वयमात्मनैव यजस्व । पाकः पक्तव्यप्रज्ञोऽप्रचेता अप्रकृष्टज्ञानो मनुष्यस्ते तव किं कृणवत् । किं करोति । त्वयाधिष्ठितः किंचिदपि न जानातीत्यर्थः ।

किंच हे देव स्वमृतुभिः कालविशेषैर्देवान्यथायजः इष्टवानसि एवैवं हे सुजात शोभनजन्मन्नग्ने मे तन्वमात्मानमपि यजस्व ॥

भवा नो अग्नेऽवितोत गोपा भवा वयस्कृदुत नो वयोधाः ।
रास्वा च नः सुमहो हव्यदातिं चास्वोत नस्तन्वोऽ३ अप्रयुच्छन् ॥७॥
भव । नः । अग्ने । अविता । उत । गोपाः । भव । वयःऽकृत् । उत । नः । वयःऽधाः ।
रास्व । च । नः । सुऽमहः । हव्यऽदातिं । चास्व । उत । नः । तन्वः । अप्रऽयुच्छन् ॥७॥

हे अग्ने त्वं नोऽस्माकमविता दृष्टभयेभ्यो रक्षको भव । भूयाः । उतापि च गोपा अदृष्टभयेभ्यो गोप्ता रक्षको भव । उतापि च वयस्कृदन्नस्य कर्ता भव । वयोधा अन्नस्य दाता भव । हे सुमहः सुष्ठु पूजनीयाग्ने त्वं स्वभूतां हव्यदातिं हविषो दातिं नोऽस्मभ्यं रास्व च । प्रयच्छ । उतापि च नोऽस्माकं स्वभूतास्तन्वः शरीराण्यप्रयुच्छन्नप्रमाद्यंस्त्वास्व । पालय ॥ ॥२॥

प्र केतुनेति नवर्चमष्टमं सूक्तं त्रैष्टुभं । त्वष्टृपुत्रस्त्रिशिरा नामर्षिः । आदितः षडाग्नेय्यस्तत्तस्त्रिस्र ऐंद्र्यः । तथा चानुक्रांतं । प्र केतुना नव त्रिशिरास्त्वाष्ट्रस्त्रिचोऽत्य ऐंद्र इति ॥ आदितः षण्णां प्रातरनुवाकाश्विनशस्त्रयोराग्नेयक्रतावुक्तो विनियोगः ॥

प्र केतुना बृहता यात्यग्निरा रोदसी वृषभो रोरवीति ।
दिवश्चिदंताँ उपमाँ उदानळपामुपस्थे महिषो ववर्ध ॥१॥
प्र । केतुना । बृहता । याति । अग्निः । आ । रोदसी इति । वृषभः । रोरवीति ।
दिवः । चित् । अंतान् । उपऽमान् । उत् । आनट् । अपां । उपऽस्थे । महिषः । ववर्ध ॥१॥

अग्निर्बृहता महता केतुना प्रज्ञानेन युक्तः सन्नेदानीं रोदसी द्यावापृथिव्यौ प्र याति । प्रकर्षेण गच्छति । किंच देवानामाह्वानकाले वृषभ इव रोरवीति । अत्यर्थं शब्दं करोति । दिवश्चिद्द्युलोकस्यापि अंतानवसानानुपमान् समीपांश्च प्रदेशान् ज्वलनात्मनादित्यात्मना वा स्थित उदानट् । ऊर्ध्वं व्याप्नोति । अपां वृष्टिलक्षणानामुदकानामुपस्थ उपस्थानेऽंतरिक्षे वैद्युतात्मना महिषो महान्ववर्ध । वर्धते ॥

मुमोद् गर्भो वृषभः ककुद्मानसेमा वत्सः शिमीवाँ अरावीत् ।
स देवतात्युद्यतानि कृण्वन्त्स्वेषु क्षयेषु प्रथमो जिगाति ॥२॥
मुमोद । गर्भः । वृषभः । ककुत्ऽमान् । असेमा । वत्सः । शिमीऽवान् । अरावीत् ।
सः । देवऽतांति । उत्ऽयंतानि । कृण्वन् । स्वेषु । क्षयेषु । प्रथमः । जिगाति ॥२॥

गर्भो द्यावापृथिव्योरंतर्गतो वृषभः कामानां वर्षिताग्निः ककुद्मानुन्नततेजस्को मुमोद । मोदते । किंचासेमा । प्रशस्तनामैतत् । प्रशस्तो वत्सो नक्तोषसोर्वत्सभूतः सायंप्रातराकृत्युपजीवनात् शिमीवान्हविर्वहनदेवाह्वानादिकर्मवानग्निररावीत् । देवाह्वानादिशब्दं करोति । सोऽग्निर्देवतांति यज्ञ उद्यतान्युद्यमान्युत्साहकर्माणि कृण्वन् कुर्वन् स्वेषु क्षयेष्वात्मीयेष्वाहवनीयादिस्थानेषु स्थितः प्रथमो देवानां स्थानेषु मुख्यो जिगाति । गच्छति ॥

आ यो मूर्धानं पित्रोररब्ध न्यध्वरे दधिरे सूरो अर्णः ।
अस्य पत्मन्नरुषीरश्वबुध्ना ऋतस्य योनौ तन्वो जुषंत ॥३॥

आ । यः । मूर्धानं । पित्रोः । अरभ्य । नि । अध्वरे । दधिरे । सूरः । अर्णः ।
अस्य । पत्मन् । अरुषीः । अश्वऽबुध्नाः । ऋतस्य । योनौ । तन्वः । जुषन्त ॥३॥

योऽग्निः पित्रोर्मातापितृभूतयोर्द्यावापृथिव्योर्मूर्धानमारभ्य स्वतेजोभिरारभते । यद्वा । मातापितृभूतयोरणयोर्मूर्धानं शिरोवत्प्रधानभूतं मंथनप्रदेशं । आङीषदर्थे । आरभ्य ईषद्विनस्ति । निर्मथनकालेऽपि दाहेन दग्धुं समर्थः । सूरः सुवीर्यस्याग्नेरर्णो गमनशीलं तेजोऽध्वरे यज्ञे नि दधिरे । यष्टारो नियमेन धारयंति । अस्याग्नेः पत्मन्पतनेऽरुषीरारोचमाना ऋतस्य यज्ञस्य योनौ स्थानेऽश्वबुध्ना व्याप्तमूला अग्नबंधना वा । हविराहारान्विता इत्यर्थः । तन्वस्तदीयास्तनूर्जुषंत । कवयः सेवंते ॥

उषउषो हि वसो अग्रमेषि त्वं यमयोरभवो विभावा ।
ऋतायं सप्न दधिषे पदानि जनयन्मित्रं तन्वे३ स्वायै ॥४॥
उषःऽउषः । हि । वसो इति । अग्रं । एषि । त्वं । यमयोः । अभवः । विभाऽवा ।
ऋताय । सप्न । दधिषे । पदानि । जनयन् । मित्रं । तन्वे । स्वायै ॥४॥

हे वसो स्वेन तेजसा सर्वस्याच्छादयितर्वसुमन्वा प्रशस्य वाग्ने त्वमुष उषः सर्वस्या एवोषसोऽग्रं पूर्वमेषि । प्राप्नोषि । अपि च यमयोर्युग्मयोः परस्परमवियुक्तयोरहोरात्रयोर्विभावा दीप्तिमानभवः । भवसि । तन्वे स्वाया आत्मीयाच्छरीरान्मित्रमादित्यं जनयन्नुत्पादयन् सप्न पदानि सप्तसंख्याकानि धिष्ण्यादिस्थानान्यृताय यज्ञार्थं दधिषे । धारयसि ॥

भुवश्चक्षुर्महः ऋतस्य गोपा भुवो वरुणो यदृताय वेषि ।
भुवो अपां नपाज्जातवेदो भुवो दूतो यस्य हव्यं जुजोषः ॥५॥
भुवः । चक्षुः । महः । ऋतस्य । गोपाः । भुवः । वरुणः । यत् । ऋताय । वेषि ।
भुवः । अपां । नपात् । जातऽवेदः । भुवः । दूतः । यस्य । हव्यं । जुजोषः ॥५॥

महो महत ऋतस्य यज्ञस्य हे अग्ने त्वं चक्षुरिव प्रकाशको भुवः । भवसि । गोपा यज्ञस्य रक्षकस्त्वमेव भवसि । यद्यदर्थाय सोमरसलक्षणस्योदकस्यादानार्थं वरुण आदित्यो वेषि गच्छसि तदा त्वमेव भुवः । भवसि । हे जातवेदो जातप्रज्ञाग्ने अपां वृष्टिलक्षणानामुदकानां नपात् पौत्रस्त्वमेव भुवः । भवसि । अब्भ्यो हि मेघो जायते मेघादग्निर्विद्युद्रूपो जायत इत्यपां पौत्रत्वमुच्यते । यस्य यजमानस्य हव्यं हविर्जुषोषः सेवसे तस्य दूतो भुवः । भवसि ॥ ॥३॥

दर्शपूर्णमासयोरग्नेरस्य याज्या भुवो यज्ञस्येत्येषा । सूचितं च । तासां याज्यानुवाक्या अग्निर्मूर्धा भुवो यज्ञस्य । आ० १. ६. । इति ॥ आग्नेयी काचित्काम्येष्टिः । तस्यामेषैव याज्या । सूचितं च । आग्नेय्या उत्तरे नित्ये मूर्धन्वतः । आ० २. १०. । इति ॥

भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहं ॥६॥
भुवः । यज्ञस्य । रजसः । च । नेता । यत्र । नियुत्ऽभिः । सचसे । शिवाभिः ।
दिवि । मूर्धानं । दधिषे । स्वःऽसां । जिह्वां । अग्ने । चकृषे । हव्यऽवाहं ॥६॥

हे अग्ने त्वं यत्र यस्मिन्नंतरिक्षे शिवाभिः कल्याणीभिर्नियुद्भिर्नियुत्संज्ञकाभिरश्वजातिभिः संबद्धं वायुं

सचसे संगच्छसे तस्मिन्नंतरिक्षे यज्ञस्य रजसश्चोदकस्य च नेता प्रापयिता भुवः। भवसि। अग्निर्वा इतो वृष्टिं समीरयतीति श्रुतेः। किंच दिवि द्युलोके मूर्धानं शिरोवत्प्रधानभूतं त्वष्टा सर्वस्य संभर्तारमादित्यं दधिषे। हविर्वहनद्वारेण धारयसि। हे अग्ने त्वं जिह्वां ज्वालां हव्यवाहं हविषो वोढ्रीं चक्रषे। करोषि॥

अस्य चितः क्रतुना वव्रे अंतरिच्छन्धीतिं पितुरेवैः परस्य।
सचस्यमानः पित्रोरुपस्थे जामि ब्रुवाण आयुधानि वेति॥७॥
अस्य। चितः। क्रतुना। वव्रे। अंतः। इच्छन्। धीतिं। पितुः। एवैः। परस्य।
सचस्यमानः। पित्रोः। उपऽस्थे। जामि। ब्रुवाणः। आयुधानि। वेति॥७॥

अस्मिंसूच इममर्थं ब्रवीति। हे चित सर्वेषामायुधानि वेत्ता त्वं त्वष्टृपुत्रस्य त्रिशिरसो वधार्थं मम साहाय्यं कुर्वितींद्रेणैवं पृष्टस्त्वितः स्ववीर्यवृद्ध्यर्थं यज्ञभागं वव्रे। स चेंद्रस्तस्मै पाणिप्रक्षालनार्थं च जलं यज्ञभागं च दत्तवान्। अनेन यज्ञभागेन वृद्धवीर्यस्त्वित एतत्संज्ञक ऋषिरेवैरात्मनो रक्षणैर्युक्तोऽंतर्यज्ञस्य मध्ये धीतिं भागमिच्छन् परस्योत्कृष्टस्य पितुः सर्वस्य जगतः पालयितुरस्येंद्रस्य क्रतुना त्रिशिरसो मम वधार्थं साहाय्यभूतेन कर्मणा निमित्तेन वव्रे। सखायं वृतवान्। किंच पित्रोर्मातापितृभूतयोर्द्यावापृथिव्योरुपस्थे समीपस्थे यज्ञे सचस्यमान ऋत्विग्भिः सेव्यमानस्त्वितो जामि योग्यमिंद्रस्यानुरूपं स्तोत्रं ब्रुवाण इंद्रस्य बलवृद्ध्यर्थमुच्चारयन्नायुधानि स्वभूतानि वेति। त्वष्टृपुत्रस्य मम वधार्थमागच्छति॥

स पित्र्याण्यायुधानि विद्वानिंद्रेषित आप्त्यो अभ्ययुध्यत्।
त्रिशीर्षाणं सप्तरश्मिं जघन्वान् त्वाष्ट्रस्य चिन्निः ससृजे चितो गाः॥८॥
सः। पित्र्याणि। आयुधानि। विद्वान्। इंद्रऽइषितः। आप्त्यः। अभि। अयुध्यत्।
त्रिऽशीर्षाणं। सप्तऽरश्मिं। जघन्वान्। त्वाष्ट्रस्य। चित्। निः। ससृजे। चितः। गाः॥८॥

आप्त्य आप्त्यस्य पुत्रोऽपां पुत्रो वा॥ तकारोपजनश्छांदसः॥ स चितः पित्र्याणि स्वपितृसंबंधीन्यायुधानि विद्वाञ्जानन्निंद्रेषितस्त्रिशिरसा मया सह युद्धार्थमिंद्रेण प्रेषितः सन्नभ्ययुध्यत्। आभिमुख्येन युद्धवान्। तदनंतरं सप्तरश्मिं शत्रुनियमनार्थं सप्तप्रग्रहहस्तं। यद्वा। सप्तरश्मिरादित्यः। तत्सदृशं। त्रिशीर्षाणं त्रिशिरस्कं मां जघन्वान्। हतवान्। मूर्च्छितं कृतवानित्यर्थः। किंच चितस्त्वाष्ट्रस्य चित्त्वष्टृपुत्रस्य ममापि गाः पशूनिः सस्रजे। विसृष्टवान्। अपहृतवानित्यर्थः॥

भूरीदिंद्र उदिनक्षंतमोजोऽवाभिनत्सत्पतिर्मन्यमानं।
त्वाष्ट्रस्य चिद्विश्वरूपस्य गोनामाचक्राणस्त्रीणि शीर्षा परा वर्क्॥९॥
भूरि। इत्। इंद्रः। उत्ऽइनक्षंतं। ओजः। अव। अभिनत्। सत्ऽपतिः। मन्यमानं।
त्वाष्ट्रस्य। चित्। विश्वऽरूपस्य। गोनां। आऽचक्राणः। त्रीणि। शीर्षा। परा।
वर्गिति वर्क्॥९॥

सत्पतिः सतां पालक इंद्रो भूरीद्बहुरेव पूर्वतुल्यमतिरिक्तं वीर्यो बलमुदिनक्षंतं व्याप्नुवंतं मन्यमानं शूरमित्यात्मानं चिंतयंतं। यद्वा। मन्यतिर्दीप्तिकर्मा क्रोधकर्मा वा। दीप्यमानं क्रुध्यंतं वा। त्वष्टृपुत्रं मामवाभिनत्। वज्रेण विदारितवान्। विदार्य त्वाष्ट्रस्य चित्त्वष्टृपुत्रस्यापि गोनां गवां। स्वामिन इति शेषः। विश्वरूपस्य मम त्रीणि शीर्षा शीर्षाण्याचक्राण आ समंताच्छब्दं कुर्वन् परा वर्क्। पराङ्मुखस्य वृक्णवान्। छिन्नवानित्यर्थः। ईदृशं भावि वसु विश्वरूपः स्वप्नांतेऽनेन तृचेन दृष्टवान्॥ ॥४॥

आपो हीति नवर्चं नवमं सूक्तं । अंबरीषस्य राज्ञः पुत्रः सिंधुद्वीप ऋषिस्त्वष्टृपुत्रस्त्रिशिरा वा । इदमाप इत्यादिके द्वे अनुष्टुभौ । ईशाना इति वर्धमाना । आपः पृणीतेति प्रतिष्ठा । शिष्टा गायत्र्यः । आपो देवता । तथा चानुक्रांतं । आपो हि सिंधुद्वीपो वांबरीष आपं गायत्रं द्व्यनुष्टुबंतं पंचमी वर्धमाना सप्तमी प्रतिष्ठेति ॥ गतः सूक्तविनियोगः ॥ आग्निमारुत आपो हि ष्ठेत्याद्यास्तिस्रः । सूचितं च । आपो हि ष्ठेति तिस्रो वियतमप उपस्पृशन् । आ० ५. २०. । इति ॥

आपो॒ हि ष्ठा म॑यो॒भुव॒स्ता न॑ ऊ॒र्जे द॑धातन । म॒हे रणा॑य॒ चक्ष॑से ॥१॥

आपः॑ । हि । स्थ । म॒यः॒ऽभुवः॑ । ताः । नः॒ । ऊ॒र्जे । द॒धा॒त॒न॒ । म॒हे । रणा॑य । चक्ष॑से ॥१॥

हि यस्मात्कारणादापो या यूयं मयोभुवः सुखस्य भावयित्र्यः स्थ भवथ तास्तादृश्यो यूयं नोऽस्मानूर्जेऽन्नाय दधातन । धत्त । अन्नप्राप्तियोग्यानस्मान् कुरुत । अन्नमस्मभ्यं दत्तेत्यर्थः । महे महते रणाय रमणीयाय चक्षसे दर्शनाय सम्यग्ज्ञानाय च धत्त । अस्मान् सम्यग्ज्ञानं प्रति योग्यान्कुरुतेत्यर्थः ॥

यो वः॑ शि॒वत॑मो॒ रस॒स्तस्य॑ भाजयतेह नः । उ॒श॒तीरि॑व मा॒तरः॑ ॥२॥

यः । वः॒ । शि॒वऽत॑मः । रसः॑ । तस्य॑ । भा॒ज॒य॒त॒ । इ॒ह । नः॒ । उ॒श॒तीः॑ऽइ॑व । मा॒तरः॑ ॥२॥

हे आपः वो युष्माकं स्वभूतो यो रसः शिवतमः सुखतम इहास्मिँल्लोके तस्य तं रसं नोऽस्मान् भाजयत । सेवयत । उपयोजयतेत्यर्थः । तत्र दृष्टांतः । उशतीरिवोशत्य इव पुत्रसमृद्धिं कामयमाना मातरः स्तन्यं रसं यथा भाजयंति प्रापयंति तद्वत् ॥

तस्मा॒ अरं॑ गमाम वो॒ यस्य॒ क्षया॑य॒ जिन्व॑थ । आपो॒ ज॒नय॑था च नः ॥३॥

तस्मै॑ । अर॑म् । ग॒मा॒म॒ । वः॒ । यस्य॑ । क्षया॑य । जिन्व॑थ । आपः॑ । ज॒नय॑थ । च॒ । नः॒ ॥३॥

हे आपः यूयं यस्य पापस्य क्षयाय विनाशायास्माञ्जिन्वथ प्रीणयथ तस्मै तादृशाय पापक्षयायारं क्षिप्रं वो युष्मान् गमाम । गमयाम । वयं शिरसि प्रक्षिपामेत्यर्थः । यद्वा । यस्मात्तस्य क्षयाय निवासार्थं यूयमोषधीर्जिन्वथ तर्पयथ तस्मै तदन्नमुद्दिश्य वयमरमलं पर्याप्तं यथा भवति तथा वो युष्मान्गमाम । गच्छाम । किंच हे आपः नोऽस्माञ्जनयथ च । पुत्रपौत्रादिजनने प्रयोजयतेत्यर्थः ॥

शं नो॑ दे॒वीर॒भिष्ट॑य॒ आपो॑ भवंतु पी॒तये॑ । शं योर॒भि स्र॑वंतु नः ॥४॥

शम् । नः॒ । दे॒वीः॒ । अ॒भिष्ट॑ये । आपः॑ । भ॒वं॒तु॒ । पी॒तये॑ । शम् । योः॒ । अ॒भि । स्र॒वं॒तु॒ । नः॒ ॥४॥

नोऽस्माकं पापापनोदद्वारेण शं सुखं भवंतु देवीर्दैव्य आपः । अभिष्टयेऽस्मदभिमुखाय भवंतु । यज्ञांगभावाय च भवंत्वित्यर्थः । पीतये पानाय च भवंतु । तथा शमुत्पन्नानां रोगाणां शमनं योर्यावनमनुत्पन्नानां पृथक्करणं च कुर्वंतु । अपि च नोऽस्माकमभ्युपरि स्रवंतु । मुञ्चर्थं सिंचंतु ॥

ईशा॑ना वा॒र्या॑णां क्षयं॑तीश्चर्षणी॒नां । अपो॒ या॑चामि भेष॒जं ॥५॥

ईशा॑नाः । वा॒र्या॑णाम् । क्षयं॑तीः । च॒र्ष॒णी॒नाम् । अपः॑ । या॒चा॒मि॒ । भे॒ष॒जम् ॥५॥

वार्याणां वारिप्रभवानां व्रीहियवादीनां यद्वा वरणीयानां धनानामीशाना ईश्वरास्चर्षणीनां मनुष्याणां क्षयंतीर्निवासयित्रीरप उदकानि भेषजं । सुखनामैतत् । पापापनोदनं सुखं याचामि । अहं प्रार्थये ॥

अ॒प्सु मे॒ सोमो॑ अब्रवीद॒न्तर्विश्वा॑नि भेष॒जा । अ॒ग्निं च॑ विश्वशं॒भुव॑म् ॥६॥

अ॒प्ऽसु । मे॒ । सोमः॑ । अ॒ब्र॒वी॒त् । अ॒न्तः॒ । विश्वा॑नि । भे॒ष॒जा । अ॒ग्निम् । च॒ । वि॒श्व॒ऽश॒म्भुव॑म् ॥६॥

आपः पृणीत भेषजं वरूथं तन्वे३ मम । ज्योक् च सूर्यं दृशे ॥७॥
आपः । पृणीत । भेषजं । वरूथं । तन्वे । मम । ज्योक् । च । सूर्यं । दृशे ॥७॥

इदमापः प्र वहत यत्किं च दुरितं मयि । यद्वाहमभिदुद्रोह यद्वा शेप उतानृतं ॥८॥
इदं । आपः । प्र । वहत । यत् । किं । च । दुःऽइतं । मयि । यत् । वा । अहं । अभिऽदुद्रोह । यत् । वा । शेपे । उत । अनृतं ॥८॥

आपो अद्यान्वचारिषं रसेन समगस्महि ।
पयस्वानग्न आ गहि तं मा सं सृज वर्चसा ॥९॥
आपः । अद्य । अनु । अचारिषं । रसेन । सं । अगस्महि ।
पयस्वान् । अग्ने । आ । गहि । तं । मा । सं । सृज । वर्चसा ॥९॥

अप्सु मे सोमो अब्रवीदित्यादिकाश्चतस्र ऋचः प्रथमाष्टके द्वितीयाध्याये विनियोगपुरःसरं व्याख्याताः । ऋ० १. २३. २०–२३. ॥ ॥५॥

ओ चिदिति चतुर्दशर्चं दशमं सूक्तं । अत्रानुक्रम्यते । ओ चित्षळूना वैवस्वतयोर्यमयम्योः संवादः षष्ठ्यु-ग्भिर्यमी मिथुनार्थं यमं प्रोवाच स तां नवमीयुग्भिरनिच्छन् प्रत्याचष्ट इति । ततः षष्ठ्यां प्रथमातृतीयाद्य-युषु विवस्वतः पुत्री यम्यृषिर्यमो देवता । यस्य वाक्यं स ऋषिर्या तेनोच्यते सा देवतेति न्यायात् । तथा नवम्यां द्वितीयाचतुर्थीप्रभृतिषु युषु वैवस्वतो यम ऋषिर्यमी देवता । अनादेशपरिभाषया त्रिष्टुप् ॥ गतो विनियोगः ॥

ओ चित्सखायं सख्या ववृत्यां तिरः पुरू चिदर्णवं जगन्वान् ।
पितुर्नपातमा दधीत वेधा अधि क्षमि प्रतरं दीध्यानः ॥१॥
ओ इति । चित् । सखायं । सख्या । ववृत्यां । तिरः । पुरु । चित् । अर्णवं । जगन्वान् ।
पितुः । नपातं । आ । दधीत । वेधाः । अधि । क्षमि । प्रऽतरं । दीध्यानः ॥१॥

अत्रास्मिन्सूक्ते वैवस्वतयोर्यमयम्योः संवाद उच्यते । अस्यामृचि यमं प्रति यमी प्रोवाच । तिरोऽन्तर्हित-मप्रकाशमानं । निर्जनप्रदेशमित्यर्थः । पुरु चिद्बहुषि विस्तीर्णं चार्णवं समुद्रैकदेशमवांतरद्वीपं जगन्वान् गतवती यमी । चिदिति पूजार्थे । पूजितमिष्टं । श्रेष्ठमित्यर्थः । सखायं गर्भवासादारभ्य सखीभूतं यमं सख्या सख्याय स्त्रीपुरुषसंपर्कजनितमित्यर्थः । ओ ववृत्यां । आवर्तयामि । आभिमुख्येन स्थित्वा लज्जां परित्यज्य त्वत्संभोगं करोमीत्यर्थः । धर्मस्य त्वरिता गतिरिति न्यायेन कामस्य त्वरितत्वात् । अपि च पितुरावयोर्भ-विष्यतः पुत्रस्य पितृभूतस्य तवार्थायाधि क्षम्यधि पृथिव्यां । पृथिवीस्थानीये ममोदरे इत्यर्थः । प्रतरं प्रकृष्टं । सर्वगुणोपेतमित्यर्थः । नपातं गर्भलक्षणमपत्यं वेधा विधाता प्रजापतिर्दीध्यान आवयोरुरुपत्यस्य पुत्रस्य जननार्थमावां ध्यायन्ना दधीत । प्रजापतिर्धाता गर्भं दधातु ते । ऋ० १०. १८४. १. । इत्युक्तत्वात् ॥

न ते सखा सख्यं वष्ट्येतत्सलक्ष्मा यद्विषुरूपा भवाति ।
महस्पुत्रासो असुरस्य वीरा दिवो धर्तार उर्विया परि ख्यन् ॥२॥

न। ते। सखा। सख्यं। वष्टि। एतत्। सऽलक्ष्मा। यत्। विषुऽरूपा। भवाति।
महः। पुत्रासः। असुरस्य। वीराः। दिवः। धर्तारः। उर्विया। परि। ख्यन् ॥२॥

यम आत्मानं परोक्षीकृत्य यमीं प्रत्युवाच। हे यमि ते तव सखा गर्भवासलक्षणेन सखीभूतो यम एतदीदृशं त्वयोक्तं स्त्रीपुरुषलक्षणं सख्यं न वष्टि। न कामयते। यत्यस्मात्कारणात्यमी सलक्ष्मा समानयोनिलक्षणा विषुरूपा भगिनीत्वाद्विषमरूपा भवाति भवति। तस्मान्न वष्टीत्यर्थः। इदानीं तिरः पुरू चिदर्णवं जगन्वानित्यस्य प्रतिवचनमुच्यते। महो महतोऽसुरस्य प्राणवतः प्रज्ञावतो वा प्रजापतेः पुत्रासः पुत्रभूता वीराः। वीरो वीरयत्यमित्रान्वेतेर्वा स्यात्प्रतिकर्मणो वीरयतेर्वा। नि० १. ७.। इति निरुक्तं। शत्रूणां विविधमीरयितारो धर्तारो धारयितारो दिवो द्युलोकस्य। प्रदर्शनमेतत्। द्युप्रभृतीनां लोकानामित्यर्थः। ---॥

उशंति घा ते अमृतास एतदेकस्य चित्त्यजसं मर्त्यस्य।
नि ते मनो मनसि धाय्यस्मे जन्युः पतिस्तन्वमा विविश्याः ॥३॥
उशंति। घ। ते। अमृतासः। एतत्। एकस्य। चित्। त्यजसं। मर्त्यस्य।
नि। ते। मनः। मनसि। धायि। अस्मे इति। जन्युः। पतिः। तन्वं। आ। विविश्याः ॥३॥

पुनरपि यमी यमं प्रत्युवाच। घेति निपातोऽप्यर्थे। हे यम ते प्रसिद्धा अमृतासः प्रजापत्यादयोऽपि देवा एतदीदृशं शास्त्रेणागम्यत्वेनोक्तं त्यजसं। त्यज्यते परस्मै प्रदीयत इति त्यजसं दुहितृभगिन्यादिस्त्रीजातं। उशंति। कामयंते। एकस्य चित् सर्वस्य जगतो मुख्यस्यापि प्रजापत्यादेः स्वदुहितृभगिन्यादीनां संबंधोऽस्तीति शेषः। अतः कारणात्ते तव मनश्चित्तमस्मे अस्माकं। ममेत्यर्थः। मनसि चित्ते नि धायि। निधीयतां। अहं त्वां कामये त्वं मामपि कामयस्वेत्यर्थः। अपि च। जन्युरिति लुप्तोपममेतत्। जन्युरिव यथा जनयिता प्रजापतिः पतिर्भर्ता भूत्वा स्वदुहितुः शरीरं संभोगेनाविष्टवान् तथा त्वमपि मम पतिर्भूत्वा तन्वं मदीयं शरीरमा विविश्याः। संभोगेनाविश। योनौ प्रजननप्रवेशोपगूहनचुंबनादिना मां संभुंक्ष्वेत्यर्थः ॥

न यत्पुरा चकृमा कद्ध नूनमृता वदंतो अनृतं रपेम।
गंधर्वो अप्स्वप्या च योषा सा नो नाभिः परमं जामि तन्नौ ॥४॥
न। यत्। पुरा। चकृम। कत्। ह। नूनं। ऋता। वदंतः। अनृतं। रपेम।
गंधर्वः। अप्ऽसु। अप्या। च। योषा। सा। नः। नाभिः। परमं। जामि। तत्। नौ ॥४॥

यमो यमीं पुनर्ब्रूते। पुरा पूर्वं प्रजापतेर्यदगम्यागमनमपरिमितसामर्थ्योपेतत्वात्कृतं तथा वयं न चक्रम। नाकुर्म। वयमृतानि सत्यानि वदंतो ब्रुवंतोऽनृतमसत्यं कद्ध कदा खलु नूनं निश्चितं रपेम। वदेम। न कदाचिदपीत्यर्थः। अगम्यागमनं न कुर्म इति यावत्। अपि चाप्सु। अंतरिक्षनामैतत्। अंतरिक्षे स्थितो गंधर्वो गवां रश्मीनामुदकानां वा धारयितादित्योऽप्यांतरिक्षस्था सा प्रसिद्धा योषादित्यस्य भार्या सरण्यूश्च नो नावावयोर्नाभिरुत्पत्तिस्थानं। मातापितरावित्यर्थः। तत्तस्मात्कारणान्नावावयोर्जामि बांधवमुत्कृष्टं। एवं सत्यावयोरगम्यागमनरूपत्वात्कर्तुमयुक्तं तस्मादेतन्न करोमीत्यभिप्रायः ॥

गर्भे नु नौ जनिता दंपती कर्देवस्त्वष्टा सविता विश्वरूपः।
नकिरस्य प्र मिनंति व्रतानि वेद नावस्य पृथिवी उत द्यौः ॥५॥
गर्भे। नु। नौ। जनिता। दंपती इति दंऽपती। कः। देवः। त्वष्टा। सविता। विश्वऽरूपः।
नकिः। अस्य। प्र। मिनंति। व्रतानि। वेद। नौ। अस्य। पृथिवी। उत। द्यौः ॥५॥

त्वष्टा रूपाणां कर्ता सविता सर्वेषां शुभाशुभस्य प्रेरको विश्वरूपः सर्वात्मको देवो दानादिगुणयुक्तो जनिता जनयिता प्रजापतिर्गर्भे नु गर्भावस्थायामेव नावावां दंपती जायापती कः । कृतवान् एकोदरे सहवासित्वात् । अस्य प्रजापतेर्व्रतानि कर्माणि नकिः प्र मिनंति । न केचित्प्रहिंसंति । न लोपयंतीत्यर्थः । अतः कारणान्नर्भावस्थायामेवावयोः प्रजापतिकृते दंपतित्वे सति संभोगं कुर्वित्यर्थः । अपि च नावावयोरस्येदं मातृरुदरे सहवासजनितं दंपतित्वं पृथिवी भूमिर्वेद । जानाति । उतापि च द्यौर्द्युलोकोऽपि जानाति ॥ ॥६॥

को अस्य वेद प्रथमस्याहः क ईं ददर्श क इह प्र वोचत् ।
बृहन्मित्रस्य वरुणस्य धाम कदु ब्रव आहनो वीच्या नॄन् ॥६॥
कः । अस्य । वेद । प्रथमस्य । अहः । कः । ईं । ददर्श । कः । इह । प्र । वोचत् ।
बृहत् । मित्रस्य । वरुणस्य । धाम । कत् । ऊं इति । ब्रवः । आहनः । वीच्या । नॄन् ॥६॥

प्रथमस्याहः संबंधस्येदमन्योन्यसंगमनं को वेद । जानाति । प्रथमेऽहनि यत्क्रियते तदनुमानमाश्रित्य न कश्चिदपि ज्ञातुं शक्नोतीत्यर्थः । इहास्मिन्प्रदेशे प्रत्यक्षतः क ईमिदं संगमनं ददर्श । पश्यति । कः प्र वोचत् । प्रख्यापयति । न कोऽपीत्यर्थः । मित्रस्य वरुणस्य मित्रावरुणयोर्बृहन्महद्धाम स्थानमहोरात्रं यद्स्ति तच्च नॄन्मनुष्यान् वीच्या नरकेण हे आहन आहंतर्मर्यादया हिंसितः । स्वकृतशुभाशुभकर्मापेक्षया मनुष्यादिप्राणिनां नरकपातेन स्वर्गप्रापणेन नियहानुग्रहयोः कर्तरित्यर्थः । एवंभूत हे यम त्वं कदु ब्रवः । किं वा ब्रवीषि ॥

यमस्य मा यम्यं१ काम आगन्त्समाने योनौ सहशेय्याय ।
जायेव पत्ये तन्वं रिरिच्यां वि चिद्वृहेव रथ्येव चक्रा ॥७॥
यमस्य । मा । यम्यं । कामः । आ । अगन् । समाने । योनौ । सह ऽशेय्याय ।
जाया ऽइव । पत्ये । तन्वं । रिरिच्यां । वि । चित् । वृहेव । रथ्या ऽइव । चक्रा ॥७॥

यमस्य तव कामोऽभिलाषो यम्यं यमीं मा मां प्रत्यागन् । आगच्छतु । ममोपरि तव यमस्य संभोगेच्छा जायतामित्यर्थः । किमर्थं । समाने योनावेकस्मिन् स्थाने शय्याख्ये सहशेय्याय सहशयनार्थं । तदनंतरं पूर्णमनोरथा सती जायेव पत्ये यथा भार्या पत्युरर्थाय परया प्रीत्या विश्वस्ता सती रतिकामा स्वशरीरं प्रकाशयति एवं तन्वमात्मीयं शरीरं रिरिच्यां । विविच्यां । त्वदर्थं प्रकाशयेयमित्यर्थः । किंच । चिदिति पूरणः । वि वृहेव ॥ वृह उद्यमने ॥ धर्मार्थकामान्विविधमुद्यच्छावः । तत्र दृष्टांतः । रथ्येव चक्रा रथस्यावयवभूते चक्रे यथा रथमुद्यच्छतस्तद्वत् ॥

न तिष्ठंति नि मिषंत्येते देवानां स्पश इह ये चरंति ।
अन्येन मदाहनो याहि तूयं तेन वि वृह रथ्येव चक्रा ॥८॥
न । तिष्ठंति । न । नि । मिषंति । एते । देवानां । स्पशः । इह । ये । चरंति ।
अन्येन । मत् । आहनः । याहि । तूयं । तेन । वि । वृह । रथ्या ऽइव । चक्रा ॥८॥

यस्मा प्रख्यातो यमः पुनराह । इहास्मिँल्लोके देवानां संबंधिनो ये स्पशोऽहोरात्रादयश्चारास्चरंति सर्वेषां शुभाशुभलक्षणकर्मप्रत्यवेक्षणार्थं परिभ्रमंति एते चाराः क्षणमात्रमपि चरणव्यापाररहिता न तिष्ठंति । न नि मिषंति । मेषणं न कुर्वंति । शुभमशुभं वा यः करोति तं निरीक्षंते चेत्यर्थः । हे आहनो ममापहंत्र्यसह्यभाषणेन दुःखयित्रि त्वं मत्तोऽन्येन त्वत्सदृशेन सह तूयं क्षिप्रं याहि । संगच्छ । गत्वा च तेन वि वृह । धर्मार्थकामानुद्यच्छ । तत्र दृष्टांतः । रथ्येव चक्रा यथा रथावयवभूते चक्रे रथमुद्यच्छतस्तद्वत् ॥

रात्रीभिरस्मा अहभिर्दशस्येत्सूर्यस्य चक्षुर्मुहुरुन्मिमीयात् ।
दिवा पृथिव्या मिथुना सबंधू यमीर्यमस्य विभृयादजामि ॥९॥
रात्रीभिः । अस्मै । अहऽभिः । दशस्येत् । सूर्यस्य । चक्षुः । मुहुः । उत् । मिमीयात् ।
दिवा । पृथिव्या । मिथुना । सबंधू इति सऽबंधू । यमीः । यमस्य । विभृयात् । अजामि ॥९॥

रात्रिभिरहभिरहोरात्रयोरस्मै यमाय कल्पितं भागं सर्वो यजमानो दशस्येत् । प्रयच्छतु । सूर्यस्य संबंधि चक्षुस्तेजो मुहुर्मुहुरस्मै यमायोन्मिमीयात् । उदेतु । दिवा पृथिव्या द्यावापृथिवीभ्यां सह मिथुना मिथुनौ सबंधू समानबंधू अहोरात्रे अस्मै यमाय । एतज्ज्ञात्वेयं यमीर्यमस्याजाम्यभ्रातरं बिभृयात् । धारयतु । यत्नेन परिगृह्णात्वित्यर्थः ॥

आ घा ता गच्छानुत्तरा युगानि यत्र जामयः कृणवन्नजामि ।
उप बर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत् ॥१०॥
आ । घ । ता । गच्छान् । उत्ऽतरा । युगानि । यत्र । जामयः । कृणवन् । अजामि ।
उप । बर्बृहि । वृषभाय । बाहुं । अन्यं । इच्छस्व । सुऽभगे । पतिं । मत् ॥१०॥

यत्र येषु कालेषु जामयो भगिन्योऽजाम्यभ्रातरं पतिं कृणवन् करिष्यंति ता तान्युत्तराणि युगानि कालविशेषा आ गच्छान् । आ गमिष्यंति । घेति पूरणः । यस्मादेवं तस्मात्ते सुभगे त्वमिदानीं मत्तोऽन्यं पतिं भर्तारमिच्छस्व । कामयस्व । तदनंतरं वृषभाय तव योनौ रेतः सेक्त्रे पुरुषायात्मीयं बाहुमुप बर्बृहि । शयनकाले उपबर्हणं कुरु ॥ ॥७॥

किं भ्रातासद्यदनाथं भवाति किमु स्वसा यन्निर्ऋतिर्निगच्छात् ।
काममूता बह्वेतद्रपामि तन्वा मे तन्वं१ सं पिपृग्धि ॥११॥
किं । भ्राता । असत् । यत् । अनाथं । भवाति । किं । ऊं इति । स्वसा । यत् ।
निःऽऋतिः । निऽगच्छात् ।
कामंऽऊता । बहु । एतत् । रपामि । तन्वा । मे । तन्वं । सं । पिपृग्धि ॥११॥

यमी यमेन प्रत्याख्याता पुनराह । यद्यस्मिन्भ्रातरि सति स्वस्रादिकमनाथं नाथरहितं भवति स भ्राता किमसत् । किं भवति । न भवतीत्यर्थः । किंच यस्यां भगिन्यां सत्यां भ्रातरं निर्ऋतिर्दुःखं निगच्छात् नियमेन गच्छति प्राप्नोति सा स्वसा किमु । किं वा भवति । भ्रातृभगिन्योश्च परस्परं प्रीतिर्येन केनचिदुपायेनावश्यं कार्येत्यभिप्रायः । साहं काममूता कामेन मूर्छिता सती बहु नानाप्रकारमेतदीदृग्रूपमुक्तं वक्ष्यमाणं च रपामि । प्रलपामि । एतज्ज्ञात्वा मे मम तन्वा शरीरेण तन्वं शरीरं सं पिपृग्धि । संपर्चय । संभोगेन संश्लेषय । मां सम्यगभुंक्ष्वेत्यर्थः ॥

न वा उ ते तन्वा तन्वं१ सं पपृच्यां पापमाहुर्यः स्वसारं निगच्छात् ।
अन्येन मत्प्रमुदः कल्पयस्व न ते भ्राता सुभगे वष्ट्येतत् ॥१२॥
न । वै । ऊं इति । ते । तन्वा । तन्वं । सं । पपृच्यां । पापं । आहुः । यः । स्वसारं । निऽगच्छात् ।
अन्येन । मत् । प्रऽमुदः । कल्पयस्व । न । ते । भ्राता । सुऽभगे । वष्टि । एतत् ॥१२॥

यमो यमीं प्रत्युक्तवान् । हे यमि ते तव तन्वा शरीरेण तन्वमात्मीयं शरीरं न वै सं पपृच्यां । नैव संपर्चयामि । नैवाहं त्वां संभोक्तुमिच्छामीत्यर्थः । यो भ्राता स्वसारं भगिनीं निगच्छात् नियमेनोपगच्छति । संभुंक्त इत्यर्थः । तं पापं पापकारिणमाहुः । शिष्टा वदंति । एतज्ज्ञात्वा हे सुभगे सुष्ठु भजनीये हे यमि त्वं मन्मत्तोऽन्येन त्वदोग्येन पुरुषेण सह प्रमुदः संभोगलक्षणान्प्रहर्षान्कल्पयस्व । समर्थय । ते तव भ्राता यम एतदीदृशं त्वया सह मैथुनं कर्तुं न वष्टि । न कामयते । नेच्छति ॥

बतो बतासि यम नैव ते मनो हृदयं चाविदाम ।
अन्या किल त्वां कक्ष्येव युक्तं परि ष्वजाते लिबुजेव वृक्षं ॥१३॥
बतः । बत । असि । यम । न । एव । ते । मनः । हृदयं । च । अविदाम ।
अन्या । किल । त्वां । कक्ष्या ऽइव । युक्तं । परि । स्वजाते । लिबुजा ऽइव । वृक्षं ॥१३॥

यमी प्रत्युवाच । हे यम त्वं बतो दुर्बलोऽसि । बतेति निपातः खेदानुकंपयोः । अनुकंप्यश्चासि । ते त्वदीयं मनो मनोगतं संकल्पं हृदयं च बुद्धिगतमध्यवसायं च नैवाविदाम । वयं न जानीम एव । मत्तोऽन्या काचित्स्त्री त्वां परि ष्वजाते किल । तत्र दृष्टांतद्वयमुच्यते । कक्ष्येव युक्तं यथा कक्ष्या रज्जुर्युक्तमात्मना संबद्धमश्वं परिष्वजते तद्वत् । लिबुजेव वृक्षं यथा लिबुजा व्रततिर्गाढं वृक्षं परिष्वजते तद्वच्च । अन्यस्यां स्त्रियामासक्तस्त्वं मां परिष्वंक्तुं नेच्छसीत्यर्थः ॥

अन्यमू षु त्वं यम्यन्य उ त्वां परि ष्वजाते लिबुजेव वृक्षं ।
तस्य वा त्वं मन इच्छा स वा तवाधा कृणुष्व संविदं सुभद्रां ॥१४॥
अन्यं । ऊं इति । सु । त्वं । यमि । अन्यः । ऊं इति । त्वां । परि । स्वजाते । लिबुजाऽइव । वृक्षं ।
तस्य । वा । त्वं । मनः । इच्छ । सः । वा । तव । अध । कृणुष्व । संऽविदं । सुऽभद्रां ॥१४॥

यमः पुनरप्याह । हे यमि त्वमन्यमु अन्यं पुरुषमेव सु सुष्ठु परिष्वज । अन्य उ अन्योऽपि पुरुषस्त्वां परि ष्वजाते । तत्र दृष्टांतः । लिबुजेव वृक्षं यथा वल्ली गाढं वृक्षं परिष्वजते तद्वत् । तथा सति । वाशब्दः समुच्चये । त्वं तस्य च पुरुषस्य मन इच्छ । कामय । तस्य त्वं वशवर्तिनी भवेत्यर्थः । स च पुरुषस्तव मन इच्छतु । अधाथ परस्परवशवर्तित्वानंतरं त्वं तेन सह सुभद्रां सुकल्याणीं संविदं परस्परसंभोगसुखसंवित्तिं कृणुष्व । कुरुष्व ॥ ॥८॥

वृषेति नवर्चमेकादशं सूक्तमांगिर्हविर्धानस्यार्षमाग्नेयं । सप्तम्याद्यास्तिस्रस्त्रिष्टुभः शिष्टा जगत्यः । तथा चानुक्रांतं । वृषा नवांगिर्हविर्धान आग्नेयं तु चिच्चिष्टुवंतमिति ॥ गतः सूक्तविनियोगः ॥

वृषा वृष्णे दुदुहे दोहसा दिवः पयांसि यह्वो अदितेरदाभ्यः ।
विश्वं स वेद वरुणो यथा धिया स यज्ञियो यजतु यज्ञियाँ ऋतून् ॥१॥
वृषा । वृष्णे । दुदुहे । दोहसा । दिवः । पयांसि । यह्वः । अदितेः । अदाभ्यः ।
विश्वं । सः । वेद । वरुणः । यथा । धिया । सः । यज्ञियः । यजतु । यज्ञियान् । ऋतून् ॥१॥

वृषाऽतिद्वारेण वृष्टेर्वर्षिता यह्वो महानदाभ्यः केनाप्यहिंस्योऽग्निरदितेरखंडनीयागक्रियस्य वृष्णो यज्ञद्वारेण स्तुतीनां हविषां वा वर्षितुर्यजमानस्यार्थाय दोहसा दोहनेन महता प्रचारेण दिवः सकाशात्पयांसि वृष्टिलक्षणान्युदकानि दुदुहे । दोग्धि । प्रचारयति । किंच यथा वरुण आदित्यो धियात्मानुरूपया प्रज्ञया विश्वं सर्वं वेद जानाति तथा सोऽयमग्निर्जानातीत्यर्थः । यज्ञियो यज्ञार्हो यज्ञियान् यज्ञार्हानृतून्यजतु । पूजयतु ॥

रपन्गंधर्वीरप्या च योषणा नदस्य नादे परि पातु मे मनः ।
इष्टस्य मध्ये अदितिर्नि धातु नो भ्राता नो ज्येष्ठः प्रथमो वि वोचति ॥२॥
रपत्। गंधर्वीः। अप्याः। च। योषणा। नदस्य। नादे। परि। पातु। मे। मनः।
इष्टस्य। मध्ये। अदितिः। नि। धातु। नः। भ्राता। नः। ज्येष्ठः। प्रथमः। वि। वोचति॥२॥

रपद्रूपितवत्यग्निगुणानुक्तवती गंधर्वीर्गंधर्वस्य स्त्र्यप्याप्तिः संस्कृता योषणाऽऽकृतिलक्षणा स्त्री च । अग्निं तर्पितवतीति शेषः । नदस्य । स्तोतुर्नामैतत् । स्तोतुर्मे मम स्वभूतं मनो नादे स्तुतिलक्षणे शब्दे परि पातु । अग्निः सम्यग्यजतु । अहं समाहितमना भूत्वा सम्यक् स्तुतिं करोमीत्यर्थः । किंचादितिरखंडनीयोऽग्निर्नोऽस्मानिष्टस्य यागस्य मध्ये नि धातु । निदधातु । नितरां स्थापयतु । प्रथमः सर्वेषां यजमानानां मुख्यो नोऽस्माकं ज्येष्ठो भ्राता वि वोचति । विशेषेण ब्रवीति । स्तौतीत्यर्थः । नाहमेव केवलो यजनशीलः किंतु सर्व एवास्मत्कुलीनो देवयागप्रिय इत्यर्थः ॥

सो चिन्नु भद्रा क्षुमती यशस्वत्युषा उवास मनवे स्वर्वती ।
यदीमुशंतमुशतामनु क्रतुमग्निं होतारं विदथाय जीजनन् ॥३॥
सो इति। चित्। नु। भद्रा। क्षुऽमती। यशस्वती। उषाः। उवास। मनवे। स्वःऽवती।
यत्। ईं। उशंतं। उशतां। अनु। क्रतुं। अग्निं। होतारं। विदथाय। जीजनन् ॥३॥

भद्रा भजनीया क्षुमती शब्दवती यशस्त्वन्नवती कीर्तिमती वा सो चित् सैव प्रसिद्धोषा मनवे मनुष्याय यजमानाय स्वर्वत्यादित्यवती सती नु क्षिप्रमुवास । उषितवती । उदितवतीत्यर्थः । कदोदितवतीति उच्यते । यद्यदोशंतं स्तुतिं हविश्च कामयमानमुशतां यष्टुं कामयमानानां संबंधिनं होतारं देवानामाह्वातारं होमनिष्पादकं वेमेनमग्निमनु क्रतुं स्तुतिकर्मणः पश्चाद्विदथाय यजनीयाय यज्ञार्थं जीजनन् । अत्यिग्यजमाना जनयंतीत्यर्थः । तदोदितवतीति संबंधः ॥

अध त्यं दृप्सं विभ्वं विचक्षणं विराभरदिषितः श्येनो अध्वरे ।
यदी विशो वृणते दस्ममार्या अग्निं होतारमध धीरजायत ॥४॥
अध। त्यं। दृप्सं। विऽभ्वं। विऽचक्षणं। विः। आ। अभरत्। इषितः। श्येनः। अध्वरे।
यदि। विशः। वृणते। दस्मं। आर्याः। अग्निं। होतारं। अध। धीः। अजायत ॥४॥

अथाथानंतरं श्येनः श्येनाख्यो विः पक्ष्यध्वरे याग इषितोऽग्निप्रेषितो विभ्वं महांतं विचक्षणं सर्वस्य विशेषेण द्रष्टारं त्यं तं प्रसिद्धं दृप्सं गात्यत्वं गतिवद्धत्वं सोममाभरत् । आहृतवान् । अपि च यदि यदार्या अभिगमनीयं तं व्रजंतो विशो यजमाना मनुष्या दस्मं दर्शनीयं शत्रूणामुपक्षपयितारं वा होतारमग्निं वृणते प्रार्थयंते अध तदा धीर्यागादिक्रियाजायत । यज्ञैभिः प्रतायत इत्यर्थः ॥

सदासि रण्वो यवसेव पुष्यते होत्राभिरग्ने मनुषः स्वध्वरः ।
विप्रस्य वा यच्छशमान उक्थ्यं१ वाजं सस्वाँ उपयासि भूरिभिः ॥५॥
सदा। असि। रण्वः। यवसाऽइव। पुष्यते। होत्राभिः। अग्ने। मनुषः। सुऽअध्वरः।
विप्रस्य। वा। यत्। शशमानः। उक्थ्यं। वाजं। ससऽवान्। उपऽयासि। भूरिऽभिः॥५॥

हे अग्ने त्वं सदा सततं रक्षोऽसि । रमणीयो भवसि । तत्र दृष्टांतः । यवसेव पुष्यते यथा यवसानि तृणानि च पुष्टिं कुर्वते हस्त्यश्वगोमहिषादिचतुष्पदाय सर्वदा रमणीयानि भवंति तद्वत् । अपि च हे अग्ने मनुषो मनुष्यस्य स्वभूतैर्होत्राभिः । होत्रेति यज्ञनामैतत् । यक्षीः स्वध्वरः शोभनयज्ञो भवेति शेषः । विप्रस्य वा स्तोतुर्वा यवसस्य यजमानस्य वा स्वभूतमुक्थ्यं स्तोत्रं शृण्वानः प्रशंसन् वाजं हविर्लक्षणमन्नं ससवान् संभजमानश्च भूरिभिर्बहुभिर्देवैः सहोपयासि उपगच्छसि ॥ ॥९॥

उदीरय पितरा जार आ भगमियक्षति हर्यतो हृत्त इष्यति ।
विवक्ति वह्निः स्वपस्यते मखस्तविष्यते असुरो वेपते मती ॥६॥
उत् । ईरय । पितरा । जारः । आ । भगं । इयक्षति । हर्यतः । हृत्तः । इष्यति ।
विवक्ति । वह्निः । सुऽअपस्यते । मखः । तविष्यते । असुरः । वेपते । मती ॥६॥

हे अग्ने त्वदीयं ज्योतिः पितरा पितरौ सर्वप्राणिनां मातापितृभूते द्यावापृथिव्यौ प्रत्युन्नमय । तत्र दृष्टांतः । आकार उपमार्थे । रात्रेर्मध्यादिदीप्तीनां च जरयितृत्वाज्जार आदित्यः । स यथा द्यावापृथिव्यौ प्रति भगं भजनीयं ज्योतिरुन्नमयति तद्वत् । हर्यतो यागं कामयमानान्प्रतीयर्षति । यजमानो यष्टुमिच्छति । हृत्तो हृदयेन चेष्यति । इषिरयं गत्यर्थः शुक्रोऽप्युपसर्गपूर्वो द्रष्टव्यः । अधीष्यति देवान्यष्टुमधिगच्छति । विवक्ति । विवक्षति । शस्त्रलक्षणाः स्तुतीर्वक्तुमिच्छति । वह्निर्वोढा स्तुतीनां देवान्प्रति प्रापयिता होता च स्वपस्यते । शोभनमात्मीयं कर्म कर्तुमिच्छति । मखः । यज्ञनामैतत् । अत्र तत्प्रयोक्ताध्वर्युरुच्यते । स च तविष्यते । तविषिर्वृद्ध्यर्थः । स चाचांतगीतिसनर्थश्च द्रष्टव्यः । तुतुविषति । स्तोत्रलक्षणाः स्तुतीर्वर्धयितुमिच्छतीत्यर्थः । असुरः प्राणवान् प्रज्ञावान्वा । ब्रह्मेति शेषः । मती मत्या बुद्ध्या वेपते । कर्मवैगुण्याद्विभ्यत्कंपते । हे अग्ने यतो यजमानः सर्वर्त्विजश्च स्वस्वकर्म कर्तुं त्वामागच्छंति अतस्त्वं शीघ्रमुन्नमयेत्यर्थः ॥

यस्ते अग्ने सुमतिं मर्तो अक्षत्सहसः सूनो अति स प्र शृण्वे ।
इषं दधानो वहमानो अश्विरा स द्युमाँ अमवान्भूषति द्यून् ॥७॥
यः । ते । अग्ने । सुऽमतिं । मर्तः । अक्षत् । सहसः । सूनो इति । अति । सः । प्र । शृण्वे ।
इषं । दधानः । वहमानः । अश्विः । आ । सः । द्युऽमान् । अमऽवान् । भूषति । द्यून् ॥७॥

हे सहसः सूनो बलस्य पुत्राग्ने त्वदीयां सुमतिं शोभनामनुग्राहिकां बुद्धिं यो मर्तो मनुष्यो यजमानोऽक्षत् अश्नुते । अनुग्रहशीलं त्वां स्तुतिभिर्हविर्भिश्च परिचरतीत्यर्थः । स यजमानोऽति प्र शृण्वे । सर्वाँल्लोकानतीत्य प्रकर्षेण श्रूयते । प्रख्यातो भवतीत्यर्थः । कीदृशः । इषमन्नं दधानोऽर्थिभ्यः प्रयच्छन् अश्विर्वहमानः । किंच स एव द्युमान्दीप्तिमान् शरीरपतनानंतरं द्युस्थानवान्वामवान्बलवान्वा द्यून् । द्युरित्यहर्नाम ॥ कालाध्वनोरत्यंतसंयोग इत्येषा द्वितीया ॥ आदित्यकर्तृकाण्यहानि । आचंद्रार्कमित्यर्थः । भूषति । भवति ॥

महाव्रते संस्थिते मरुत्वतीये यदग्न एषेत्यनया चतुर्गृहीतमाज्यं जुहुयात् । तथैव पंचमारण्यके सूचितं । यदग्न एषा समितिर्भवाति । ऐ० आ० ५. १. १. । इति ॥

यदग्न एषा समितिर्भवाति देवी देवेषु यजता यजत्र ।
रत्ना च यद्विभजासि स्वधावो भागं नो अत्र वसुमंतं वीतात् ॥८॥
यत् । अग्ने । एषा । संऽइतिः । भवाति । देवी । देवेषु । यजता । यजत्र ।
रत्ना । च । यत् । विऽभजासि । स्वधाऽवः । भागं । नः । अत्र । वसुऽमंतं । वीतात् ॥८॥

हे यज्ञेषु यष्टव्याग्ने यद्यदेवा समितिरक्षात्कर्तृका स्तुतिसंहतिर्यजतेषु यष्टव्येषु देवेषु मध्ये देवी द्योतमाना भवाति। यष्टव्या देवा अस्माभिः स्तूयंत इत्यर्थः। हे स्वधावो हविर्लक्षणान्नवन्नग्ने त्वं यद्यदा रत्ना च रत्नानि रमणीयानि धनानि स्तोतृभ्यो यष्टृभ्यश्च विभजासि विभजसि अत्र तदानीं तथा नो ऽस्मान्प्रति वसुमंतं धनवंतं नानाधनावयवभूतं भागमंशं वीतात् ॥ वी गत्यादिषु। तुह्योस्तातङ्ङाशिष्यन्यतरस्यां। पा० ७.१.३५.। इति हेः स्थाने तातङ्। अंतर्णीतस्वर्थस्याच द्रष्टव्यः ॥ वयय। आगमय। अस्मभ्यं प्रयच्छेत्यर्थः ॥

श्रुधी नो अग्ने सदने सधस्थे युक्ष्वा रथमृतस्य द्रवित्नुं।
आ नो वह रोदसी देवपुत्रे माकिर्देवानामप भूरिह स्याः ॥९॥
श्रुधि। नः। अग्ने। सदने। सधऽस्थे। युक्ष्व। रथं। अमृतस्य। द्रवित्नुं।
आ। नः। वह। रोदसी इति। देवपुत्रे इति देवऽपुत्रे। माकिः। देवानां। अप।
भूः। इह। स्याः ॥९॥

हे अग्ने सधस्थे सहस्थाने सर्वदेवतासाधारणे सदने यज्ञगृहे स्थितः सन्नोऽस्मदीयं वचनं श्रुधि। शृणु। किं तद्वचनं उच्यते। अमृतस्य देवपानस्य मधुनो द्रवित्नुं द्रावकं रथमात्मीयं युक्ष्व। आह्वानार्थं देवान्प्रति गमनायाश्वैः संयुक्ष्व। संयुक्तेन रथेन गत्वा नोऽस्माकं यज्ञं प्रति देवपुत्रे देवस्य प्रजापतेर्दुहितरौ यद्वा देवाः पुत्रा ययोस्ते रोदसी द्यावापृथिव्यावा वह। प्रापय। देवानां मध्ये कश्चिद्देवोऽप भूरपभवितास्मत्त्यक्त्वादपगंता माकिः स्यात्। त्वं चेहास्मिन्यज्ञे स्याः। संनिहितो भव ॥ ॥१०॥

द्यावेति नवर्चं द्वादशं सूक्तमांगेर्हविर्धानस्यार्षं चैष्टुभमाग्नेयं। द्यावेत्यनुक्रांतं ॥ गतो विनियोगः ॥

द्यावा ह क्षामा प्रथमे ऋतेनाभिश्रावे भवतः सत्यवाचा।
देवो यन्मर्तान्यजथाय कृण्वन् सीदद्धोता प्रत्यङ् स्वमसुं यन् ॥१॥
द्यावा। ह। क्षामा। प्रथमे इति। ऋतेन। अभिऽश्रावे। भवतः। सत्यऽवाचा।
देवः। यत्। मर्तान्। यजथाय। कृण्वन्। सीदत्। होता। प्रत्यङ्। स्वं। असुं। यन् ॥१॥

सत्यवाचा सत्यवाचौ सत्यवादिन्यौ प्रथमे प्रधानभूते द्यावा क्षामा द्युक्षामे द्यावापृथिव्यावृतेन सत्यभूतेन देवयजनेन सहाभिश्रावे। आभिमुख्येन श्रूयत इत्यभिश्राव आह्वानं। तस्मिन्नस्मद्यज्ञनिमित्तेऽग्नेः संबंधिन्याह्वाने भवतः ॥ लोडर्थे लट् ॥ भवतां। यद्यदा देवो द्योतमानोऽग्निर्यजथाय यज्ञाय मर्तान्मनुष्यान् कृण्वन्प्रेरयन् प्रत्यङ्ङाह्वानार्थं देवानां प्रत्यंचिता स्वमसुमात्मीयं ज्वालालक्षणं प्राणं यन् प्राप्नुवन् होता देवानामाह्वाता सीदत् वेद्यां निषीदति। तदास्मद्यजनकाले द्यावापृथिवी प्रमुखोऽग्निराह्वयत्वित्यर्थः ॥

देवो देवान्परिभूर्ऋतेन वहा नो हव्यं प्रथमश्चिकित्वान्।
धूमकेतुः समिधा भाऋजीको मंद्रो होता नित्यो वाचा यजीयान् ॥२॥
देवः। देवान्। परिऽभूः। ऋतेन। वह। नः। हव्यं। प्रथमः। चिकित्वान्।
धूमऽकेतुः। संऽइधा। भाःऽऋजीकः। मंद्रः। होता। नित्यः। वाचा। यजीयान् ॥२॥

देवो द्योतमानोऽग्निस्त्वं देवानिंद्रादीन्परिभूराङ्ङानहविर्नयनद्वारेण परिभूः परिगृह्णन्नृतेन यज्ञेन सह नोऽस्माकं हव्यं हविर्वह। प्रापय। कीदृशस्त्वं। प्रथमो देवानां मुख्यः चिकित्वान् सर्वं जानन् धूमकेतुर्धूमस्य

कर्ता वा धूमध्वजो वा धूमप्रज्ञानो वा समिधा समिंधनेन दीपनेन भास्वतीक ऋजुदीप्तिः । ऊर्ध्वज्वलन इत्यर्थः । मंद्रः स्तुत्यः होताद्भाता नित्यो ध्रुवो वाचा यजीयानतिशयेन यष्टा च ॥

स्वावृग्देवस्यामृतं यदी गोरतो जातासो धारयंत उर्वी ।
विश्वे देवा अनु तत्ते यजुर्गुर्दुहे यदेनी दिव्यं घृतं वाः ॥३॥
स्वावृक् । देवस्य । अमृतं । यदि । गोः । अतः । जातासः । धारयंते । उर्वी इति ।
विश्वे । देवाः । अनु । तत् । ते । यजुः । गुः । दुहे । यत् । एनी । दिव्यं । घृतं । वारिति वाः ॥३॥

देवस्यापेः स्वावृक् स्वार्जनममृतमुदकं स्वतेजसः सकाशाद्यदि यदोत्पद्यते तदातोऽस्माद्गोरुदकाज्जातास उत्पन्ना ओषधय उर्वी द्यावापृथिव्यौ धारयंति । विश्वे देवाः सर्वे स्तोतारस्ते तव संबंधि तद्यजुरुदकस्य तद्दानमनु गुः । अनुगायंति । एनी श्वेता दीप्तिर्दिव्यं दिवि भवं घृतं चरत्यदा वृष्टिलक्षणं यदुदकं दुहे दोग्धि ॥

अर्चामि वां वर्धायापो घृतस्नू द्यावाभूमी शृणुतं रोदसी मे ।
अहा यद्द्यावोऽसुनीतिमयन्मध्वा नो अत्र पितरा शिशीतां ॥४॥
अर्चामि । वां । वर्धाय । अपः । घृतस्नू इति घृतऽस्नू । द्यावाभूमी इति । शृणुतं ।
रोदसी इति । मे ।
अहा । यत् । द्यावः । असुऽनीतिं । अयन् । मध्वा । नः । अत्र । पितरा । शिशीतां ॥४॥

हे अग्ने त्वमपो मदीयं यज्ञरूपं कर्म वर्धाय । प्रोत्सर्पिते सति हे घृतस्नू वृष्ट्युदकस्य प्रसवित्र्यौ हे द्यावाभूमी द्यावापृथिव्यौ वां युवामर्चामि ॥ ऋच स्तुतौ ॥ स्तौमि । हे रोदसी द्यावापृथिव्यौ युवां मे मदीयं स्तोत्रं शृणुतं । यद्यस्मिन्नहा । अहःशब्दसामर्थ्यादहोरात्रसाध्यं कर्मोच्यते ॥ सुपां सुलुगिति सप्तम्येकवचनस्याऽऽदेशः ॥ अहन्यहोरात्रसाध्यकर्मणि द्यावः स्तोतारोऽसुनीतिं । असुः प्रज्ञा । तया नीयत इत्यसुनीतिः स्तुतिः । तामयन् गच्छंति अत्रास्मिन्कर्मणि पितरा सर्वस्य मातापितृभूते द्यावापृथिव्यौ नोऽस्मान्वृष्ट्युदकेन शिशीतां । स्नानपानादिना संस्कुरुतां ॥

किं स्विन्नो राजा जगृहे कदस्यातिं व्रतं चकृमा को वि वेद ।
मिचश्चिद्धि ष्मा जुहुराणो देवाञ्छ्लोको न यातामपि वाजो अस्ति ॥५॥
किं । स्वित् । नः । राजा । जगृहे । कत् । अस्य । अतिं । व्रतं । चकृम । कः । वि । वेद ।
मिचः । चित् । हि । स्म । जुहुराणः । देवान् । श्लोकः । न । यातां । अपि । वाजः । अस्ति ॥५॥

किंस्विच्छब्दो वितर्कार्थे । किंवा राजा दीप्यमानोऽग्निर्नोऽस्माकं स्वभूतानि हवींषि स्तुतीश्च जगृहे परिगृह्णीयात् किंवास्माभिरिति व्रतमतिपूजितं परिचरणाख्यं कर्म चक्रम वयं क्रियास्म । कर्मवैगुण्याद्गीतस्य पूर्वार्ध एतद्वचनमुक्तं । उत्तरार्ध इदानीं तन्निराक्रियते । हि स्तोतीमौ पूरणौ । चिदित्युपमार्थे । जुह्वराणः स्निग्धमाह्वयमानो मिचः स्निग्धो यथागच्छेत् तथा । इति संप्रत्यर्थे । श्लोकोऽस्मदीया स्तुतिलक्षणा वाग्देवानिंद्रादीन्यातां । गच्छतु । अपि वाजो हविराख्यं चान्नं यदस्ति तदपि देवान्प्रति गच्छतु । देवाः स्तुतिं हविश्च प्रतिगृह्णंत्वित्यर्थः ॥ ॥११॥

दुर्मंत्वचामृतस्य नाम सलक्ष्मा यद्विषुरूपा भवाति ।
यमस्य यो मनवते सुमंत्वग्ने तमृष्व पाह्यप्रयुच्छन् ॥६॥

दुःऽमंतु । अर्च । अमृतस्य । नाम । सऽलक्ष्मा । यत् । विषुऽरूपा । भवाति ।
यमस्य । यः । मनवते । सुऽमंतु । अग्ने । तं । ऋष्व । पाहि । अप्रऽयुच्छन् ॥ ६ ॥

यस्मिन्देवा विदथे मादयंते विवस्वतः सदने धारयंते ।
सूर्ये ज्योतिरदधुर्मास्य१क्तून्परि द्योतनिं चरतो अजस्रा ॥ ७ ॥
यस्मिन् । देवाः । विदथे । मादयंते । विवस्वतः । सदने । धारयंते ।
सूर्ये । ज्योतिः । अदधुः । मासि । अक्तून् । परि । द्योतनिं । चरतः । अजस्रा ॥ ७ ॥

यस्मिन्नग्नौ यज्ञस्य प्रधानांगे सति देवा इंद्रादयो विदथे यज्ञे मादयंते हविषात्मानं तर्पयंति तृप्यंति वा । अपि च विवस्वतो मनुष्यस्य यजमानस्य स्वभूते सदने वेद्याख्ये स्थाने धारयंते । आत्मानं स्थापयंति च । किंच सूर्ये ज्योतिरहराख्यं तेजोऽदधुः । स्थापितवंतः । मासि चंद्रमस्यक्तून्रात्रीः स्थापितवंतः । तदनंतरमजस्रानुपक्षीणौ सूर्याचंद्रमसौ द्योतनिं दीप्तिं परि चरतः । परिगच्छतः । सर्वत्र प्राप्नुतः ॥

यस्मिन्देवा मन्मनि संचरंत्यपीच्ये३ न वयमस्य विद्म ।
मित्रो नो अत्रादितिरनागान्त्सविता देवो वरुणाय वोचत् ॥ ८ ॥
यस्मिन् । देवाः । मन्मनि । संऽचरंति । अपीच्ये । न । वयं । अस्य । विद्म ।
मित्रः । नः । अत्र । अदितिः । अनागान् । सविता । देवः । वरुणाय । वोचत् ॥ ८ ॥

देवा इंद्रादयो यस्मिन्नग्नौ मन्मनि ज्ञानभूते ज्ञानवत्सर्वप्रकाशके सति संचरंति स्वाधिकारे संप्रवर्तंते अपीच्येऽंतर्हिते स्थितमग्नेः स्वरूपं वयं न विद्म । तत्त्वतो न जानीमः । अत्रास्मिन्यज्ञेऽंगभावाय वर्तमानो मित्रो वरुणाय सर्वेषां पापानां निवारयित्रेऽस्मभ्यं नोऽस्मानना गानपापान्वोचत् । ब्रवीतु । तथादितिर्देवमाता सविता सर्वस्य प्रेरको देवश्च ब्रवीतु ॥

श्रुधी नो अग्ने सदने सधस्थे युक्ष्वा रथमृतस्य द्रवित्नुं ।
आ नो वह रोदसी देवपुत्रे माकिर्देवानामप भूरिह स्याः ॥ ९ ॥
श्रुधि । नः । अग्ने । सदने । सधऽस्थे । युक्ष्व । रथं । अमृतस्य । द्रवित्नुं ।
आ । नः । वह । रोदसी इति । देवपुत्रे इति देवऽपुत्रे । माकिः । देवानां । अप ।
भूः । इह । स्याः ॥ ९ ॥

श्रुधी न इत्येषा नवमी पूर्वसूक्ते व्याख्याता ॥ ॥ १२ ॥

युजे वामिति पंचर्चं चतुर्दशं सूक्तं । अदितेः पुत्रस्य विवस्वत आर्षं । हविर्धानाख्ये द्वे शकटे तद्देवत्यमिदं । अत्रा जगती शिष्टास्त्रिष्टुभः । तथा चानुक्रांतं । युजे पंच विवस्वानादित्यो हाविर्धानं जगत्यंतमिति ॥ गतः सूक्तविनियोगः ॥ हविर्धानप्रवर्तने युजे वामित्येका । सूचितं च । अंतरा वर्तमपादयोर्युजे वां ब्रह्म पूर्व्यं नमोभिः । आ० ४. ९. । इति ॥

युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक एतु पथ्येव सूरेः ।
शृण्वंतु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ॥ १ ॥

युजे। वां। ब्रह्म। पूर्व्यं। नमःऽभिः। वि। श्लोकः। एतु। पथ्याऽइव। सूरेः।
शृण्वंतु। विश्वे। अमृतस्य। पुत्राः। आ। ये। धामानि। दिव्यानि। तस्थुः ॥१॥

हे हविर्धानशकटे वां युवामहं पूर्व्यं पूर्वस्मिन्काले भवं। अनादिकालप्रवृत्तमित्यर्थः। एवंभूतं ब्रह्म मंत्रं। उच्चार्येति शेषः। नमोभिः सोमादिहविर्लक्षणैरन्नैर्युजे। युनज्मि। युवयोरुपरि सोमादिकमारोप्य पत्नीशालातो हविर्धानं प्रति युवां नयामीत्यर्थः। एवंभूतयोर्युवयोः श्लोकः शब्दो यातु। विश्वान्देवान्प्रति विविधं गच्छतां। तत्र दृष्टांतः। पथ्येव सूरेः यथा स्रोतुः स्वभूता पथ्या परिणामसुखावहाकृतिर्विश्वान्देवान्प्रति विविधं गच्छति तद्वत्। अमृतस्यामरणधर्मणः प्रजापतेः पुत्रा विश्वे देवा एवंभूतं शब्दं शृण्वंतु ये देवा दिव्यानि दिवि भवानि धामानि स्थानान्या तस्थुः अधिष्ठितवंतः। ते शृण्वंत्वित्यर्थः ॥

अत्रैव हविर्धानप्रवर्तने यमे इवेत्यिषा। सूचितं च। यमे इव यतमाने यदैतमधि द्वयोरद्धा उक्थ्यं वच इत्यर्धर्चं आरभेत्। आ० ४. ९। इति ॥

यमे इव यतमाने यदैतं प्र वां भरन्मानुषा देवयंतः।
आ सीदतं स्वमु लोकं विदाने स्वास्थे भवतमिंदवे नः ॥२॥
यमे इवेति यमेऽइव। यतमाने इति। यत्। ऐतं। प्र। वां। भरन्। मानुषाः। देवऽयंतः।
आ। सीदतं। स्वं। ऊं इति। लोकं। विदाने इति। स्वास्थ्ये इति सुऽआस्थ्ये। भवतं।
इंदवे। नः ॥२॥

यमे इव यथा सहोत्पन्ने अपत्ये संचरतः तथा यतमाने गमनहविर्धारणादिस्वाधिकारकर्मणि प्रवर्तमाने हविर्धानशकटे युवां यद्यदैतं हविर्धानस्थानं प्रतिगच्छतः तदा देवयंतो देवकामा मानुषा यजमाना वां युवां प्र भरन्। प्रभरंति। किंच युवां स्वमु लोकमात्मीयमेव हविर्धानाख्यं स्थानं विदाने जानती आ सीदतं। ततो नोऽस्माकमिंदवे सोमार्थं स्वास्थ्ये शोभननिवासस्थाने भवतं ॥

पंच पदानि रुपो अन्वरोहं चतुष्पदीमन्वेमि व्रतेन।
अक्षरेण प्रति मिम एतामृतस्य नाभावधि सं पुनामि ॥३॥
पंच। पदानि। रुपः। अनु। अरोहं। चतुःऽपदीं। अनु। एमि। व्रतेन।
अक्षरेण। प्रति। मिमे। एतां। ऋतस्य। नाभौ। अधि। सं। पुनामि ॥३॥

रुपो यष्टृणां स्वर्गमारोपयितुर्यज्ञस्यांगत्वेन संबंधीनि पंचसंख्याकानि धानासोमपशुपुरोडाशाज्याख्यानि पदानि वृष्टिहेतुत्वेन देवान्प्रति गंतृणि हवींष्यन्वरोहं। अनुरोहामि। शकटयोः स्थापनवहनानंतरं करणं करोमीत्यर्थः। किंच चतुष्पदीं चतुर्भिः पादैर्युक्तां त्रिष्टुबादिच्छंदसं क्रियां व्रतेन प्रयोगकर्मणान्वेमि। अनुगच्छामि। यथाकालं प्रयुनज्मीत्यर्थः। अक्षरेण प्रणवाख्येनैतामुपस्थितां प्रतिगरक्रियां प्रति मिमे। निर्ममे। अपि चतस्र यज्ञस्य। अधीति सप्तम्यर्थानुवादी। नाभौ नाभिभूते वेद्याख्ये स्थाने सं पुनामि। संशोधयामि। दशापवित्रेण सोमं संस्करोमीत्यर्थः ॥

देवेभ्यः कमवृणीत मृत्युं प्रजायै कममृतं नावृणीत।
बृहस्पतिं यज्ञमकृण्वत ऋषिं प्रियां यमस्तन्वं१ प्रारिरेचीत् ॥४॥
देवेभ्यः। कं। अवृणीत। मृत्युं। प्रऽजायै। कं। अमृतं। न। अवृणीत।
बृहस्पतिं। यज्ञं। अकृण्वत। ऋषिं। प्रियां। यमः। तन्वं। प्र। अरिरेचीत् ॥४॥

देवेभ्यो देवानां मृत्युं मारयितारं कं स्वपुरुषमवृणीत । प्रार्थयते । प्रयुंक्ते । किंच प्रजायै देवव्यतिरिक्तायां मनुष्यादिकायाः प्रजाया अमृतममारकमविनाशकं कं वा स्वपुरुषं नावृणीत । न प्रयुंक्ते । हविर्धारणक्रियायां प्रवृत्तायां सत्यां पूर्वोक्तानां सर्वेषां स्थितिरवश्यंभाविन्यान्न कंचिदपि विनाशकं स्वपुरुषं यमो निरूपयतीत्यर्थः । अपि च बृहस्पतिं बृहतां देवानां हविर्धारणे पालकं बृहतां मंत्राणां स्वामिनं वर्षे सर्वस्य दृष्टादृष्टफलस्य द्रष्टारं यज्ञमलक्षयत । ऋत्विग्यजमानाः कुर्वंति । अपि च यमः प्रियां तन्वमस्मदीयमिष्टं शरीरं प्रारिरेचीत् । धातूनामनेकार्थत्वाद्रिचिरत्र परिहारार्थे वर्तते । प्ररेचयति । मृत्योः सकाशात्परिहरति । कर्मवैगुण्यजनित-दोषभावादस्माकं जीवितं नापहरतीत्यर्थः ॥

सप्त क्षरंति शिशवे मरुत्वते पित्रे पुत्रासो अपवीवतन्नृतं ।
उभे इदस्योभयस्य राजत उभे यतेते उभयस्य पुष्यतः ॥५॥
सप्त । क्षरंति । शिशवे । मरुत्वते । पित्रे । पुत्रासः । अपि । अवीवतन् । ऋतं ।
उभे इति । इत् । अस्य । उभयस्य । राजतः । उभे इति । यतेते इति । उभयस्य । पुष्यतः ॥५॥

मरुत्वते । मरुतः स्तोतारः । स्तुतिद्वारेण तद्वते पित्रे ऋत्विजां पितृभूताय शिशवे शंसनीयाय हविर्धान-शकटयोः सुखासीनभूताय सोमाय सप्त छंदांसि चरंति । स्तुतिरूपेण गच्छंति । अपि च पुत्रासोऽपि सोमस्य पुत्रभूता ऋत्विजोऽप्यृतं सत्यभूतं स्तोत्रमवीवतन् । संगमयंति । सद्गुणग्राहिणीं स्तुतिं कुर्वंतीत्यर्थः । उभे इदु एव हविर्धानशकटे अस्योभयस्य देवजातस्य मनुष्यजातस्य च राजतः । ईशाते । उभे एव शकटे यतेते । कर्मानुष्ठाने प्रयत्नं कुरुतः । उभयस्य देवजातस्य मनुष्यजातस्य च पुष्यतः । हविर्धारणद्वारेण पुष्टिं कुरुत इत्यर्थः ॥ ॥१३॥

परेयिवांसमिति षोडशर्चं चतुर्दशं सूक्तं विवस्वतः पुत्रस्य यमस्यार्षं । अंगिरसो नः पितरो नवग्वा इति षष्ठ्या अंगिरःपितृवर्षभृगुलक्षणा लिंगोक्ता देवताः । प्रेहीत्यादिसप्तो लिंगोक्तदेवताकाः पितृदेवताका वा । अति द्रव सारमेयादित्यादिकसृचः सरमापुत्रौ यौ श्वानौ परलोकमार्गमभितः स्थितौ तद्देवताकाः । शिष्टा यमदेवत्याः । यमाय सोममिति चतुर्दशाद्या अनुष्टुभः । यमाय मधुमत्तममित्येषा बृहती । आदितो द्वादश त्रिष्टुभः । तथा चानुक्रांतं । परेयिवांसं षोळश यमो यामं षष्ठी लिंगोक्तदेवता पराश्च तिस्रः पित्र्या वा तृचः स्थ्याः परा अनुष्टुभो बृहत्युपांत्येति ॥ गतः सूक्तविनियोगः ॥ महापितृयज्ञे यमयागाख्या याज्या । सूचितं च । इमं यम प्रस्तरमा हि सीदेति द्वे परेयिवांसं प्रवतो महीरनु । आ० २. १९. । इति ॥

परेयिवांसं प्रवतो महीरनु बहुभ्यः पंथामनुपस्पशानं ।
वैवस्वतं संगमनं जनानां यमं राजानं हविषा दुवस्य ॥१॥
परेयिऽवांसं । प्रऽवतः । महीः । अनु । बहुऽभ्यः । पंथां । अनुऽपस्पशानं ।
वैवस्वतं । संऽगमनं । जनानां । यमं । राजानं । हविषा । दुवस्य ॥१॥

हे मदीयांतरात्मन् यजमान वा त्वं राजानं पितृणां स्वामिनं यमं हविषा पुरोडाशादिना दुवस्य । परिचर । कीदृशं । प्रवतः प्रकृष्टकर्मवतो भूलोकवर्तिभोगसाधनं पुण्यमनुष्ठितवतः पुरुषान्महीस्तत्तल्लोकोचित-भूप्रदेशविशेषाननु परेयिवांसं क्रमेण मरणादूर्ध्वं प्रापितवंतं तथा बहुभ्यः स्वर्गार्थिभ्यः पुण्यकृद्भ्यः पुण्यकृतार्थे पंथां स्वर्गोचितं मार्गमनुपस्पशानमबाधमानं । पापिन एव पुरुषान् स्वर्गमार्गबाधिन नरकं प्रापयति न तु पुण्यकृत इत्यर्थः । वैवस्वतं विवस्वतः सूर्यस्य पुत्रं जनानां पापिनां संगमनं गंतव्यस्थानरूपं ॥

यमो नो गातुं प्रथमो विवेद नैषा गव्यूतिरपभर्तवा उ ।
यत्रा नः पूर्वे पितरः परेयुरेना जज्ञानाः पथ्या३ अनु स्वाः ॥२॥

यमः । नः । गातुं । प्रथमः । विवेद । न । एषा । गव्यूतिः । अपऽभर्तवे । ऊं इति । यत्र । नः । पूर्वे । पितरः । पराऽईयुः । एना । जज्ञानाः । पथ्याः । अनु । स्वाः ॥२॥

प्रथमः सर्वेषां मुख्यो यमो नोऽस्माकं प्रजानां गातुं शुभाशुभनिमित्तं विवेद । जानाति । एषा गव्यूतिर्गापभर्तवा उ । अतिशयज्ञानयोगाद्यमस्य न केनचिदपहर्तुमपनेतुं शक्यत इत्यर्थः । यत्र यस्मिन्मार्गे नोऽस्माकं पूर्वे पितरः परेयुः एनाभिन मार्गेण गच्छंतो जज्ञाना जाताः सर्वे स्वाः स्वभूताः पथ्याः स्वकर्ममार्गभूता गतीरनु गच्छंति ॥

आग्निमारुते मातली कव्यैरित्येषा धाय्या । सूचितं च । इमं यम प्रस्तरमा हि सीद मातली कव्यैर्यमो अंगिरोभिरुदीरतामवर उत्परासः । आ० ५. २०. । इति ॥

मातली कव्यैर्यमो अंगिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः ।
यांश्च देवा वावृधुर्ये च देवान्त्स्वाहान्ये स्वधयान्ये मदंति ॥३॥
मातली । कव्यैः । यमः । अंगिरःऽभिः । बृहस्पतिः । ऋक्वऽभिः । ववृधानः ।
यान् । च । देवाः । ववृधुः । ये । च । देवान् । स्वाहा । अन्ये । स्वधया । अन्ये । मदंति ॥३॥

मातली । मातलिरिंद्रस्य सारथिः । तद्वानिंद्रो मातली । स कव्यैः कव्यभाग्भिः पितृभिः सह ववृधानो वर्धमानो भवति । यमस्त्वांगिरोभिः पितृविशेषैः सह वर्धमानो भवति । ---। तत्र देवा इंद्रादयो यांश्च कव्यभागादीन्पितॄन्ववृधुः वर्धयंति ये च कव्यभागादयः पितरो देवानिंद्रादीन्वर्धयंति तेषां मध्येऽन्य इंद्रादयः स्वाहा मदंति । स्वाहाकारेण हृष्यंति । अन्ये पितरः स्वधया स्वधाकारेण हृष्यंति ॥

महापितृयज्ञे यमस्येमं यमेत्यादिके द्वे अनुवाक्ये । इमं यम प्रस्तरमा हि सीदेति द्वे । आ० २. १९. । इति हि सूचितं ॥ सैषाग्निमारुतेऽपि धाय्या । सूचं पूर्वमेवोदाहृतं ॥

इमं यम प्रस्तरमा हि सीदांगिरोभिः पितृभिः संविदानः ।
आ त्वा मंत्राः कविशस्ता वहंत्वेना राजन्हविषा मादयस्व ॥४॥
इमं । यम । प्रऽस्तरं । आ । हि । सीद । अंगिरःऽभिः । पितृऽभिः । संऽविदानः ।
आ । त्वा । मंत्राः । कविऽशस्ताः । वहंतु । एना । राजन् । हविषा । मादयस्व ॥४॥

हे यम अंगिरोभिरेतन्नामकैः पितृभिः संविदान ऐकमत्यं गतस्त्वमिमं प्रस्तरं विस्तीर्णं यज्ञविशेषमा सीद । आगत्योपविश । हि यस्मादेवं तस्मात्कविशस्ता विद्वद्भिर्ऋत्विग्भिः प्रयुक्ता मंत्रास्त्वा त्वामा वहंतु । हे राजन् एनेतेन हविषा तुष्टो मादयस्व । यजमानं हर्षय ॥

अंगिरोभिरा गहि यज्ञियेभिर्यम वैरूपैरिह मादयस्व ।
विवस्वंतं हुवे यः पिता ते ऽस्मिन्यज्ञे बर्हिष्या निषद्य ॥५॥
अंगिरःऽभिः । आ । गहि । यज्ञियेभिः । यम । वैरूपैः । इह । मादयस्व ।
विवस्वंतं । हुवे । यः । पिता । ते । अस्मिन् । यज्ञे । बर्हिषि । आ । निऽसद्य ॥५॥

हे यम वैरूपैर्विविधरूपयुक्तैर्वैरूपसामप्रियैर्वा यज्ञियेभिर्यज्ञयोग्यैरंगिरोभिः सहा गहि । आगच्छ । आगत्य चेहास्मिन्यज्ञे मादयस्व । यजमानं हर्षय । यो विवस्वांस्ते तव पितास्ति अस्मिन्यज्ञे तं विवस्वंतं हुवे । आह्वयामि । स चास्तीर्णे बर्हिष्या निषद्योपविश्य यजमानं हर्षयतु ॥ ॥१४॥

अंगिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥ ६॥
अंगिरसः । नः । पितरः । नवऽग्वाः । अथर्वाणः । भृगवः । सोम्यासः ।
तेषां । वयं । सुऽमतौ । यज्ञियानां । अपि । भद्रे । सौमनसे । स्याम ॥ ६॥

अंगिरसोऽंगिरोनामका अथर्वाणोऽथर्वनामका भृगवो भृगुनामकाश्च नोऽस्माकं पितरो नवग्वा अभिनवगमनयुक्ताः । यद्वा । नूतनवत्प्रीतिजनका इत्यर्थः । ते च सोम्यासः सोममर्हंतीति सोम्याः । यज्ञियानां यज्ञार्हाणां तेषां सुमतावनुग्रहयुक्तायां बुद्धौ वयं स्याम । सर्वदा तिष्ठेम । अपि च सौमनसे भद्रे सौमनसस्य कारणे कल्याणे फले स्याम । सर्वदा तिष्ठेम ॥

सत्रमध्ये दीक्षितस्य मरणे प्रेहीत्याद्याः पंचर्चस्तृतीयावर्जिता होत्रा शंसनीयाः । सूचितं च । प्रेहि प्रेहि पथिभिः पूर्वेभिरिति पंचानां तृतीयामुज्झेरेत् । आ० ६. १०. । इति ॥

प्रेहि प्रेहि पथिभिः पूर्वेभिर्यत्रा नः पूर्वे पितरः परेयुः ।
उभा राजाना स्वधया मदंता यमं पश्यासि वरुणं च देवं ॥ ७॥
प्र । इहि । प्र । इहि । पथिऽभिः । पूर्वेभिः । यत्र । नः । पूर्वे । पितरः । पराऽईयुः ।
उभा । राजाना । स्वधया । मदंता । यमं । पश्यासि । वरुणं । च । देवं ॥ ७॥

यत्र यस्मिन्स्थाने नोऽस्माकं पूर्वे पुरातनाः पितरः पितामहादयः परेयुः पूर्वेभिः पूर्वस्मिन्काले भवैः । अनादिकालप्रवृत्तैरित्यर्थः । पथिभिर्मार्गैर्हे मत्पितः तत्स्थानं प्रेहि । प्रगच्छ । शीघ्रं गच्छ । गत्वा च स्वधयामृतान्नेन मदंतौ तृप्यंतौ राजाना राजानावुभौ यमं देवं द्योतमानं वरुणं च पश्यासि । पश्य ॥

सं गच्छस्व पितृभिः सं यमेनेष्टापूर्तेन परमे व्योमन् ।
हित्वायावद्यं पुनरस्तमेहि सं गच्छस्व तन्वा सुवर्चाः ॥ ८॥
सं । गच्छस्व । पितृऽभिः । सं । यमेन । इष्टापूर्तेन । परमे । विऽओमन् ।
हित्वाय । अवद्यं । पुनः । अस्तं । आ । इहि । सं । गच्छस्व । तन्वा । सुऽवर्चाः ॥ ८॥

हे मदीय पितः ततस्त्वं परम उत्कृष्टे व्योमन्व्योमनि स्वर्गाख्ये स्थाने स्वभूतैः पितृभिः सह सं गच्छस्व । इष्टापूर्तेन श्रौतस्मार्तदानफलेन सं गच्छस्व । तत इष्टापूर्तेन सहागम्यावद्यं पापं हित्वा परित्यज्यास्तं म्रियमाणाख्यं गृहमेहि । आगच्छ । ततः सुवर्चाः । तृतीयार्थे प्रथमा । सुवर्चसा शोभनदीप्तियुक्तेन तन्वा स्वशरीरेण सं गच्छस्व ॥

पैतृमेधिके कर्मणि श्मशानायतनं प्रोक्षत्यपेत वीतेति । सूचितं च । गर्तोदकेन शमीशाखया चिः प्रसव्यमायतनं परिव्रजन् प्रोक्षत्यपेत वीत वि च सर्पतातः । आ० गृ० ४. २. १०. । इति ॥

अपेत वीत वि च सर्पतातोऽस्मा एतं पितरो लोकमक्रन् ।
अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्यवसानमस्मै ॥ ९॥
अप । इत । वि । इत । वि । च । सर्पत । अतः । अस्मै । एतं । पितरः । लोकं । अक्रन् ।
अहःऽभिः । अत्ऽभिः । अक्तुऽभिः । विऽअक्तं । यमः । ददाति । अवऽसानं । अस्मै ॥ ९॥

श्मशाने पूर्वं स्थिता हे पिशाचादयः अतोऽस्मादृतयजमानदहनस्थानादपेत । अपगच्छत । यीत । विशेषेण गच्छत । वि सर्पत च । इदं स्थानं परित्यज्य नानाभावेन दूरतरं देशं गच्छतेत्यर्थः । पितरोऽमी मृतयजमानस्यार्थायेतं लोकमिदं दहनस्थानमकृन् । यमस्याज्ञयान्वकुर्वन् । यमोऽप्यहोभिर्दिवसैरङ्गिरभुवणोदकैरकृभी रात्रिभिर्व्यक्तं संगतं । सुष्ठिनिमित्तैः कालोदकादिभिः शोधितमित्यर्थः । अवसानं दहनस्थानमस्मै मृतयजमानस्यार्थाय ददाति । दत्तवान् ॥

अनुसरण्या वृक्षौ पार्श्वयोराम्रफलाक्तौ । तावुद्धृत्य प्रेतस्य हस्तयोर्निदधात्यति द्रव सारमेयाविति द्वाभ्यां । सूचितं च । वृक्षावुद्धृत्य पाण्योरादधादति द्रव सारमेयौ श्वानौ । आ० गृ० ४. ३. २०. । इति ॥

अति द्रव सारमेयौ श्वानौ चतुरक्षौ शबलौ साधुना पथा ।
अथा पितॄन्त्सुविदत्राँ उपेहि यमेन ये सधमादं मदन्ति ॥१०॥
अति । द्रव । सारमेयौ । श्वानौ । चतुःऽअक्षौ । शबलौ । साधुना । पथा ।
अथ । पितॄन् । सुऽविदत्रान् । उप । इहि । यमेन । ये । सधऽमादं । मदन्ति ॥१०॥

हे अमे साधुना पथा समीचीनेन मार्गेण श्वानावुभावति द्रव । अतिक्रम्य गच्छ । यमसंबंधिनौ यौ श्वानौ प्रेतस्य बाधकौ तौ परित्यज्य समीचीनेन मार्गेण प्रेतं नयेत्यर्थः । कीदृशौ श्वानौ । सारमेयौ । सरमा नाम काचित्प्रसिद्धा देवशुनी । तस्याः पुत्रौ चतुरक्षौ उपरिभागे पुनरप्यधिदृशं ययोस्तादृशौ । अथ शोभनमार्गेण गमनानंतरं ये पितरो यमेन सधमादं सहर्षं मदंति प्राप्नुवंति तान्सुविदत्रान् सुष्ठभिज्ञान्पितॄनुपेहि । उपगच्छ ॥ ॥१५॥

यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसौ ।
ताभ्यामेनं परि देहि राजन्स्वस्ति चास्मा अनमीवं च धेहि ॥११॥
यौ । ते । श्वानौ । यम । रक्षितारौ । चतुःऽअक्षौ । पथिरक्षी इति पथिऽरक्षी ।
नृऽचक्षसौ ।
ताभ्यां । एनं । परि । देहि । राजन् । स्वस्ति । च । अस्मै । अनमीवं । च । धेहि ॥११॥

हे राजन् हे यम ते त्वदीयौ यौ श्वानौ विद्येते ताभ्यां हे राजन् यम एनं प्रेतं परि देहि । रक्षार्थं प्रयच्छ । कीदृशौ श्वानौ । रक्षितारौ यमगृहस्य रक्षकौ चतुरक्षावपिचतुष्टययुक्तौ पथिरक्षी मार्गस्य रक्षकौ नृचक्षसौ मनुष्यैः ख्याप्यमानौ । श्रुतिस्मृतिपुराणाभिज्ञाः पुरुषास्तौ प्रख्यापयंति । ताभ्यां स्वभ्यां दत्त्वा चैनं प्रेताय स्वस्ति च क्षेममप्यनमीवं च रोगाभावमपि धेहि । संपादय ॥

उरूणसावसुतृपा उदुंबलौ यमस्य दूतौ चरतो जनाँ अनु ।
तावस्मभ्यं दृशये सूर्याय पुनर्दातामसुमद्येह भद्रं ॥१२॥
उरूऽणसौ । असुऽतृपौ । उदुंबलौ । यमस्य । दूतौ । चरतः । जनान् । अनु ।
तौ । अस्मभ्यं । दृशये । सूर्याय । पुनः । दातां । असुं । अद्य । इह । भद्रं ॥१२॥

यमस्य संबंधिनौ दूतौ श्वानौ जनाँ अनु प्राणिनो लक्षीकृत्य सर्वत्र चरतः । कीदृशौ । उरुणसौ दीर्घनासिकायुक्तौ असुतृपौ परकीयान्प्राणान् स्वीकृत्य तैस्तृप्यंतौ उदुंबलावुरुबलौ विस्तीर्णबलौ । तावुभौ दूतौ सूर्याय दृशये सूर्यस्य दर्शनार्थमद्य दिन इह कर्मणि भद्रमसुं समीचीनं प्राणं पुनरस्मभ्यं दातां । अदत्तां ॥

यमाय सोमं सुनुत यमाय जुहुता हविः। यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः ॥१३॥
यमाय। सोमं। सुनुत। यमाय। जुहुत। हविः। यमं। ह। यज्ञः। गच्छति। अग्निऽदूतः।
अरंऽकृतः ॥१३॥

हे ऋत्विजः यमाय यमदेवतार्थं सोमं सुनुत। खतात्मकं सोममभिषुणुत। तथा यमार्थं हविर्जुहुत। अग्निर्दूतो यस्मिन्यज्ञे सोऽयमग्निदूतः। अग्निर्देवानां दूत आसीत्। तै० सं० २. ५. ८. ५.। इति। अरंकृतो वज्रभिर्द्यौरलंकारैरुपेतः। तादृशो यज्ञो यमं ह यममेव गच्छति ॥

यमाय घृतवद्धविर्जुहोत प्र च तिष्ठत। स नो देवेष्वा यमद्दीर्घमायुः प्र जीवसे ॥१४॥
यमाय। घृतऽवत्। हविः। जुहोत। प्र। च। तिष्ठत। सः। नः। देवेषु। आ। यमत्।
दीर्घं। आयुः। प्र। जीवसे ॥१४॥

हे ऋत्विजः यूयं यमाय घृतवदाज्येन संयुक्तं हविः पुरोडाशादिकं जुहोत। जुहुत। प्र च तिष्ठत। यमं यूयमुपतिष्ठध्वं च। देवेषु मध्ये स यमो देवः प्र जीवसे प्रकृष्टजीवनार्थं नोऽस्माकं दीर्घमायुरा यमत्। प्रयच्छतु ॥

यमाय मधुमत्तमं राज्ञे हव्यं जुहोतन।
इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः ॥१५॥
यमाय। मधुमत्ऽतमं। राज्ञे। हव्यं। जुहोतन।
इदं। नमः। ऋषिऽभ्यः। पूर्वऽजेभ्यः। पूर्वेभ्यः। पथिकृत्ऽभ्यः ॥१५॥

हे ऋत्विजः यमाय राज्ञे मधुमत्तममतिशयेन मधुरं हव्यं पुरोडाशादिकं हविर्जुहोतन। जुहुत। पूर्वजेभ्यः सृष्ट्यादावुत्पन्नेभ्यः अत एव पूर्वेभ्योऽस्मत्तः पूर्वभाविभ्यः पथिकृद्भ्यः शोभनमार्गकारिभ्य ऋषिभ्य इदं प्रत्यक्षं यथा भवति तथा नमोऽस्तु ॥

चिकद्रुकेभिः पतति षळुर्वीरेकमिद्बृहत्।
चिष्टुब्गायची छंदांसि सर्वा ता यम आहिता ॥१६॥
चिऽकद्रुकेभिः। पतति। षट्। उर्वीः। एकं। इत्। बृहत्।
चिऽस्तुप्। गायची। छंदांसि। सर्वा। ता। यमे। आऽहिता ॥१६॥

चिकद्रुकेभिः। द्वितीयार्थे तृतीयेषा। चिकद्रुकान्। ज्योतिर्गौरायुरिति त्रयो यागविशेषास्तिकद्रुका उच्यंते। तान्प्रत्यंगभावाय संरक्षणार्थं च पतति। यमस्तान् प्राप्नोति। षट्संख्याका उर्वीर्भूमीः कृताकृतप्रत्यवेक्षणाय प्राप्नोति। ताश्चोर्व्यः शाखांतरमंत्रे समाम्नाताः। षण्मोर्वीरिंहसस्यांतु द्यौश्च पृथिवी चापश्चौषधयश्चोर्क्ष सुनृता चेति। एकमिदेकमेव बृहन्महज्जगत्समस्तं प्रतिपालनीयः प्राप्नोति। किंच यानि त्रिष्टुब्गायत्र्यादीनि छंदांसि संति सर्वाणि तानि छंदांसि यम आहितानि। ऋत्विग्भिः स्तुतिव्याजेनावस्थितानि ॥ ॥१६॥

उदीरतामिति चतुर्दशर्चं पंचदशं सूक्तं। अत्रानुक्रम्यते। उदीरतां षळूना शृंखः पित्र्यं जगत्येकादशी। यामायनाः परे पंचेति वचनात्यमपुत्रः शृंखाख्य ऋषिः। अग्निष्वात्ता इत्येषा जगती शिष्टास्त्रिष्टुभः। पितरो देवता ॥ गतः सूक्तविनियोगः ॥ अष्टकायामुदीरतामवर इत्याद्या अष्टावृचो होमार्थाः। सूचितं च। उदीरतामवर उत्परास इत्यष्टाभिर्जुहोति। आ० गृ० २. ४. ६.। इति ॥ महापितृयज्ञे पितरः सोमवंत इत्यस्यानुवाक्यो-

दीरतामित्येषा । सूचितं च । पितरोऽग्निष्वात्ता यम उदीरतामवर उत्परासः । आ० २. १९. । इति ॥ आपि-माहतेऽग्नेषा धाय्या । सूचितं च । मातली कव्यैर्यमो अंगिरोभिरुदीरतामवर उत्परासः । आ० ५. २०. । इति ॥

उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः ।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवंतु पितरो हवेषु ॥१॥
उत् । ईरतां । अवरे । उत् । परासः । उत् । मध्यमाः । पितरः । सोम्यासः ।
असुं । ये । ईयुः । अवृकाः । ऋतऽज्ञाः । ते । नः । अवंतु । पितरः । हवेषु ॥१॥

त्रिविधाः पितर उत्तमा मध्यमा अधमाश्चेति । यथाविधं श्रौतं कर्मानुष्ठाय पितृत्वं प्राप्ता उत्तमाः । स्मार्तकर्ममात्रपरा मध्यमाः । अत्रापि कैश्चित्संस्कारैर्विकला अधमाः । एतदेवाभिप्रेत्य ये अग्निदग्धा ये अनग्निदग्धा इत्यादिमंत्र आम्नातः । तेष्ववरे निकृष्टा उदीरतां । उत्तमं हविः प्राप्नुवंतु । परास उत्तमाः पितर उदीरतां । मध्यमाः पितरश्चोदीरतां । ते सर्वेऽप्यस्मद्विषये सोम्यासः सोम्या अनुग्रहपराः संतु । ये पितरोऽवृका वृकवदरण्यश्ववदस्मासु हिंसामकुर्वंत ऋतज्ञा अस्मदनुष्ठितं यज्ञं जानंतोऽसुमस्मत्प्राणमीयुः रक्षितुं प्राप्ताः ते पितरो हवेष्वस्मदीयेष्वाहूतेषु नोऽस्मानवंतु । रक्षंतु ॥

महापितृयज्ञे पितरो बर्हिषद इत्यस्येदं पितृभ्य इति द्वितीयानुवाक्या । सूचं तु पूर्वमेवोदाहृतं । आ० २. १९. ॥ इदं पितृभ्य इत्येषा धाय्या । सूचितं च । अहं पितॄन्त्सुविदत्राँ अवित्सीदं पितृभ्यो नमो अस्त्वद्य स्वादुष्किलायमिति चतसः । आ० ५. २०. । इति ॥

इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु विक्षु ॥२॥
इदं । पितृऽभ्यः । नमः । अस्तु । अद्य । ये । पूर्वासः । ये । उपरासः । ईयुः ।
ये । पार्थिवे । रजसि । आ । निऽसत्ताः । ये । वा । नूनं । सुऽवृजनासु । विक्षु ॥२॥

पूर्वासो यजमानोत्पत्तेः पूर्वमुत्पन्ना ज्येष्ठभ्रातृपितामहादयो य ईयुः पितृलोकं प्राप्ताः । ये चान्य उपरासो यजमानजन्मन उपर्युत्पन्नाः कनिष्ठभ्रातृस्वपुत्रादय ईयुः पितृलोकं प्राप्ताः । येऽप्यन्ये पार्थिवे पृथिवीसंबंधिनि रजसि रजोगुणकार्येऽस्मिन्कर्मण्या निषत्ता हविः स्वीकर्तुमागत्योपविष्टाः । ये वा केचिदन्ये बंधुवर्गरूपाः पितरो विक्षु बंधुरूपासु प्रजास्वा निषत्ताः श्राद्धादिस्वीकारायागत्योपविष्टाः । कीदृशीषु विक्षु । सुवृजनासु । वृज्यते परित्यज्यते दारिद्र्यमनेनेति वृजनं धनं । शोभनं वृजनं यासां ताः सुवृजनाः । तादृशीषु । धनसमृद्धा श्राद्धादिकर्मपरास्वित्यर्थः । सर्वेभ्य उक्तेभ्यः पितृभ्योऽद्यास्मिन्कर्मणीदं नमोऽस्तु । अयमाकृतिप्रदानपूर्वको नमस्कारो भवतु ॥

अहं पितॄन्त्सुविदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजंत पित्वस्त इहागमिष्ठाः ॥३॥
आ । अहं । पितॄन् । सुऽविदत्रान् । अवित्सि । नपातं । च । विऽक्रमणं । च । विष्णोः ।
बर्हिऽसदः । ये । स्वधया । सुतस्य । भजंत । पित्वः । ते । इह । आऽगमिष्ठाः ॥३॥

अहं यजमानः सुविदत्रान् मदीयां भक्तिं सुष्ठु जानतः पितॄनावित्सि । आभिमुख्येन लब्धवानस्मि । विष्णोर्व्यापिनो यज्ञस्य नपातं च विनाशाभावं च विक्रमणं च विशेषेण प्रवृत्तिं च लब्धवानस्मि । ये पितरो

बर्हिषदो बर्हिषि सीदंति त इहास्मिन्कर्मण्यागमिष्ठाः । अतिशयेनागताः । आदरपूर्वं समागत्य स्वधया पुरोडाशाद्यन्नेन सह सुतस्याभिषुतस्य सोमलक्षणस्य पित्वः पितोरन्नस्य भागं भजंत । सेवंते । उपयुंजते ॥

बर्हिषदः पितर ऊत्य१र्वागिमा वो हव्या चकृमा जुषध्वं ।
त आ गतावसा शंतमेनाथा नः शं योररपो दधात ॥४॥
बर्हिऽसदः । पितरः । ऊती । अर्वाक् । इमा । वः । हव्या । चकृम । जुषध्वं ।
ते । आ । गत । अवसा । शंऽतमेन । अथ । नः । शं । योः । अरपः । दधात ॥४॥

हे बर्हिषदः । यज्ञे सीदंतीति बर्हिषदः । अचापि ये वै यज्वानस्ते पितरो बर्हिषद इत्यत्र श्रुतत्वाद्यागं कृत्वा प्रेत्य पितृलोकं प्राप्ता बर्हिषदः । तादृशा हे पितरः अर्वागर्वाचीनानामस्माकमूती रक्षा भवद्भिः कर्तव्येति शेषः । वो युष्मदर्थमिमा हव्यैतानि हवींषि चकृम । अतस्तानि जुषध्वं । ते हविर्जुष्टवंतो यूयं शंतमेन सुखतमेनावसा रक्षणेन निमित्तभूतेना गत । आभिमुख्येनास्मान्प्राप्नुत । अथानंतरं नोऽस्मभ्यं शं सुखं योर्दुःखवियोगमरपः पापरहितं च दधात । दत्त ॥

महापितृयज्ञे पितरः सोमवंत इत्यस्य याज्योपहूताः पितर इत्येषा । सूचितं च । उपहूताः पितरः सोम्यासस्त्वं सोम प्र चिकितो मनोषा । आ० २. १९. । इति ॥

उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
त आ गमंतु त इह श्रुवंत्वधि ब्रुवंतु तेऽवंत्वस्मान् ॥५॥
उपऽहूताः । पितरः । सोम्यासः । बर्हिष्येषु । निऽधिषु । प्रियेषु ।
ते । आ । गमंतु । ते । इह । श्रुवंतु । अधि । ब्रुवंतु । ते । अवंतु । अस्मान् ॥५॥

सोम्यासः सोम्या अस्मदनुग्रहपराः सोमसंपादिनो वा पितरो बर्हिष्येषु यागार्हेषु प्रियेषु तृप्तिकरेषु निधिषु निधिसदृशेषु हविःषु निमित्तभूतेषु सत्सूपहृता अस्माभिराहृतास्ते पितर आ गमंतु । आगच्छंतु । आगत्य चेहास्मिन्कर्मण्यस्माभिः प्रयुक्ताः स्तुतीः शृंवंतु । शृण्वंतु । श्रुत्वा चाधि ब्रुवंतु । साधुरयं यजमान इत्यादरेण कथयंतु । ते तादृशाः पितरोऽस्मानवंतु । रक्षंतु ॥ ॥१७॥

आच्या जानु दक्षिणतो निषद्येमं यज्ञमभि गृणीत विश्वे ।
मा हिंसिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता करांम ॥६॥
आऽअच्य । जानुं । दक्षिणतः । निऽसद्य । इमं । यज्ञं । अभि । गृणीत । विश्वे ।
मा । हिंसिष्ट । पितरः । केन । चित् । नः । यत् । वः । आगः । पुरुषता । करांम ॥६॥

पितृणामयं स्वाभाविको धर्मः अथैनं पितरः प्राचीनावीतिनः सव्यं जान्वाच्य । शत० २. ४. २. २. । इति वचनात् । हे पितरः विश्वे सर्वे यूयं जान्वाच्य भूमौ निपात्य दक्षिणतो दक्षिणपार्श्वे निषद्योपविश्येममस्मदीयं यज्ञमभि गृणीत । अभिष्टुत । विशिष्टतृप्तियोगात्परया प्रीत्या सगुणोऽयं यज्ञ इति प्रशंसतेत्यर्थः । अपि च वो युष्माकं यत्किंचित्कर्मवैगुण्यजनितमागोऽपराधं पुरुषता मनुष्यत्वेन हेतुना करांम वयं कृतवंतः हे पितरः तेन केन चिदल्पेनापराधेन नोऽस्मान्मा हिंसिष्ट ॥

आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय ।
पुत्रेभ्यः पितरस्तस्य वस्वः प्र यच्छत त इहोर्जं दधात ॥७॥

आसीनासः । अरुणीनाम् । उपऽस्थे । रयिं । धत्त । दाशुषे । मर्त्याय ।
पुत्रेभ्यः । पितरः । तस्य । वस्वः । प्र । यच्छत । त । इह । ऊर्जं । दधात ॥ ७ ॥

अरुणीनामारोचमानानां ज्वालानां वा देवतानां वोपस्थे समीपस्थाने वेद्याख्ये आसीनास उपविष्टाः पितरः यूयं दाशुषे हविर्दत्तवते मर्त्याय मनुष्याय यजमानाय रयिं धनं धत्त । दत्त । हे पितरः यूयं तस्य यजमानस्य पुत्रेभ्यो वस्वो वसु धनं प्र यच्छत । ते तादृशा यूयमिहास्मिन्नस्मदीये कर्मण्यूर्जं धनं दधात । निधत्त ॥

ये नः पूर्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वसिष्ठाः ।
तेभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु ॥ ८ ॥
ये । नः । पूर्वे । पितरः । सोम्यासः । अनुऽऊहिरे । सोमऽपीथं । वसिष्ठाः ।
तेभिः । यमः । सम्ऽरराणः । हवींषि । उशन् । उशत्ऽभिः । प्रतिऽकामं । अत्तु ॥ ८ ॥

सोम्यासः सोमसंपादिनो वसिष्ठा वसुतमाः क्षताच्छादना धनवत्तमा वा नोऽस्माकं ये पूर्वे पितरः सोमपीथं सोमपानमनूहिरे आनुपूर्व्येण देवेभ्यश्च पितृभ्यश्च प्रापुवंतः । दत्तवंत इत्यर्थः । उशन् पितृभिः सह संभोगं कामयमानो यमः पितृपतिरुशद्भिर्यमेन सह संभोगं कामयमानैस्तैरस्मदीयैः पितृभिः सह रराणो रममाणो हवींष्यस्माभिर्दत्तानि प्रतिकामं कामं कामं प्रत्यत्तु । यानि यानि हवींषि कामयते तानि तानि भक्षयत्वित्यर्थः ॥

महापितृयज्ञेऽग्नेः कव्यवाहनस्य ये तातृषुरित्येषा प्रथमानुवाक्या । सूचितं च । ये तातृषुर्देवत्रा जेहमाना-स्त्वदग्ने काव्या त्वन्मनीषाः । आ० २. १९. । इति ॥

ये तातृषुर्देवत्रा जेहमाना होत्राविदः स्तोमतष्टासो अर्कैः ।
आग्ने याहि सुविदत्रेभिरर्वाङ् सत्यैः कव्यैः पितृभिर्घर्मसद्भिः ॥ ९ ॥
ये । ततृषुः । देवऽत्रा । जेहमानाः । होत्राऽविदः । स्तोमऽतष्टासः । अर्कैः ।
आ । अग्ने । याहि । सुऽविदत्रेभिः । अर्वाङ् । सत्यैः । कव्यैः । पितृऽभिः । घर्मसत्ऽभिः ॥ ९ ॥

देवत्रा देवाञ्जेहमानाः क्रमेण गच्छंतः । क्रमेण देवत्वं प्राप्ता इत्यर्थः । होत्राविदो यज्ञान्सम्यक्कर्तुं वेदितारोऽर्कैरर्चनीयैः स्तोत्रैः स्तोमतष्टासः स्तोमानां च सम्यक्कर्तारो ये पितरस्तातृषुः तृष्यंति हे अग्ने त्वं तैः पितृभिरर्वाङस्मदभिमुख आ याहि । आगच्छ । कीदृशैः । सुविदत्रेभिः सुविदत्रैः सत्यैरविसंवादिभिः कव्यैः । कव्यं नाम पितृदेवत्यं हविः । तत्संबंधिभिः । यद्वा । कव्यैः कविभिर्मेधाविभिः ॥ स्वार्थिको यत् ॥ घर्मसद्भिर्यज्ञसादिभिः ॥

ये सत्यासो हविरदो हविष्पा इंद्रेण देवैः सरथं दधानाः ।
आग्ने याहि सहस्रं देववंदैः परैः पूर्वैः पितृभिर्घर्मसद्भिः ॥ १० ॥
ये । सत्यासः । हविःऽअदः । हविःऽपाः । इंद्रेण । देवैः । सऽरथं । दधानाः ।
आ । अग्ने । याहि । सहस्रं । देवऽवंदैः । परैः । पूर्वैः । पितृऽभिः । घर्मसत्ऽभिः ॥ १० ॥

सत्यासः सत्या ये पितरो हविरदो भक्षणयोग्यस्य हविषोऽत्तारो भक्षयितारो हविष्पाः पानयोग्यस्य हविषः पातार इंद्रेण देवैः सरथं समानमेकं तुल्यं वा रथं दधानाः ॥ लडर्थे शानच् ॥ गमनाय सदा

धारयंति हे अग्ने तैः पितृभिः सहा याहि । आगच्छ । कीदृशः । सहस्रं । तृतीयार्थे प्रथमा । सहस्रेण । बहुभिरित्यर्थः । देववदेर्देवसंबंधिभिः स्तोत्रैर्युक्तः । परैः परकालीनैः पूर्वैः पूर्वकालीनैर्घर्मसन्निर्यज्ञसादिभिर्महावीरसादिभिरादित्यसादिभिर्वा ॥ ॥१८॥

महापितृयज्ञे पितरोऽग्निष्वात्ता इत्यस्याग्निष्वात्ताः पितर इत्येषा प्रथमानुवाक्या । सूचितं च । अग्निष्वात्ताः पितर एह गच्छत ये चेह पितरो ये च नेह । आ० २. १९. । इति ॥

अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः ।
अत्ता हवींषि प्रयतानि बर्हिष्यथा रयिं सर्ववीरं दधातन ॥११॥
अग्निऽस्वात्ताः । पितरः । आ । इह । गच्छत । सदःऽसदः । सदत । सुऽप्रनीतयः ।
अत्त । हवींषि । प्रऽयतानि । बर्हिषि । अथ । रयिं । सर्वऽवीरं । दधातन ॥११॥

अग्निष्वात्ता अग्निना स्वादिता एतन्नामकाः पितरः यूयमिहास्मिन्पितृकर्मण्या गच्छत । आगत्य च हे सुप्रणीतयोऽभिपूजितप्रणयनाः यूयं सदः सदस्तत्तत्स्थानं सदत । सीदत । तत्र तत्र स्थाने यथेष्टमुपविशतेत्यर्थः । उपविश्य च बर्हिष्यासादितानि प्रयतानि सुचि हवींष्यत्त । भक्षयत । अथानंतरं सर्ववीरं सर्वैर्वीरैः पुत्रपौत्रैरुपेतं रयिं धनं दधातन । अस्मभ्यं दत्त ॥

महापितृयज्ञे वषट्कारक्रियायां त्वमग्न ईळित इत्येषा स्विष्टकृतो याज्या । सूचितं च । योऽग्निः कव्यवाहनस्त्वमग्न ईळितो जातवेद इति संयाज्ये । आ० २. १९. । इति ॥

त्वमग्न ईळितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वी ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि ॥१२॥
त्वं । अग्ने । ईळितः । जातऽवेदः । अवाट् । हव्यानि । सुरभीणि । कृत्वी ।
प्र । अदाः । पितृऽभ्यः । स्वधया । ते । अक्षन् । अद्धि । त्वं । देव । प्रऽयता । हवींषि ॥१२॥

हे जातवेदः । जातं सर्वं जगद्वेत्तीति जातवेदाः । तथाविध हे अग्ने ईळितोऽस्माभिः स्तुतस्त्वं हव्यान्यस्मदीयानि हवींषि सुरभीणि सुगंधीनि कृत्वी कृत्वावाट् । वहनं कृतवानसि । कृत्वा च पितृभ्यः प्रादाः । ते च पितरः स्वधया स्वधाकारेण दत्तं हविरक्षन् । अदंतु । हे देव त्वमपि प्रयता प्रयत्नसंपादितानि हवींष्यद्धि । भक्षय ॥

महापितृयज्ञे ये चेहेति द्वितीयानुवाक्या । सूत्रमुक्तं ॥

ये चेह पितरो ये च नेह यांश्च विद्म याँ उ च न प्रविद्म ।
त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञं सुकृतं जुषस्व ॥१३॥
ये । च । इह । पितरः । ये । च । न । इह । यान् । च । विद्म । यान् । ऊं इति । च । न । प्रऽविद्म ।
त्वं । वेत्थ । यति । ते । जातऽवेदः । स्वधाभिः । यज्ञं । सुऽकृतं । जुषस्व ॥१३॥

ये च पितर इहास्मत्समीपे वर्तंते ये चेह न संति । यांश्च पितॄन्विद्म संनिकृष्टत्वाज्जानीमः याँ उ च नापि च न प्रविद्म विप्रकृष्टत्वादहं न विजानीमः । यति ते यावंतस्ते भवंति तान्सर्वान्यथोक्तान् हे जातवेद उत्पन्नसर्ववस्तुविषयज्ञानागमे त्वं वेत्थ । जानासि । स्वधाभिर्हविर्लक्षणैरन्नैः सुकृतं साधु कृतं यज्ञं जुषस्व । प्रीत्या गृहाण ॥

पूर्वोक्त एव यागे ये अग्निदग्धा इत्येषा याज्या । सूचितं च । ये अग्निदग्धा ये अनग्निदग्धा इमं यम प्रस्तरमा हि सीदेति द्वे । आ० २. १९. । इति ॥

ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया मादयंते ।
तेभिः स्वराळसुनीतिमेतां यथावशं तन्वं कल्पयस्व ॥१४॥
ये । अग्निऽदग्धाः । ये । अनग्निऽदग्धाः । मध्ये । दिवः । स्वधया । मादयंते ।
तेभिः । स्वऽराट् । असुऽनीतिं । एतां । यथाऽवशं । तन्वं । कल्पयस्व ॥१४॥

ये पितरोऽग्निदग्धा अग्निना भस्मीकृताः । श्मशानं प्राप्ता इत्यर्थः । ये च पितरोऽनग्निदग्धाः श्मशानकर्म न प्राप्ता मध्ये दिवो द्युलोकस्य मध्ये स्वधया हविर्लक्षणेनान्नेन मादयंते तृप्यंति हे अग्ने स्वराट् स्वकर्मोपभोगेन दीप्यमानस्तेभिस्तैः पितृभिः सहितः सन्नसुनीतिं प्राणानां विषयेषु नेतारमस्मत्पिचंतरात्मानमेतां तन्वमेतद्देवताशरीरं यथावशं यथाकामं कल्पयस्व । समर्थयस्व । यासयेत्यर्थः ॥ ॥१९॥

मैनमिति चतुर्दशर्चं षोडशं सूक्तं । यमपुत्रस्य दमनस्यार्षं । आदितो दश त्रिष्टुभः ततश्चतस्रोऽनुष्टुभः । अग्निर्देवता । तथा चानुक्रांतं । मैनं दमन आग्नेयं चतुरनुष्टुबंतमिति ॥ दीक्षितमरण आद्याः षड्चः शंसनीयाः । सूचितं च । मैनमग्ने वि दहो माभि शोच इति षट् पूषा त्वेतश्यावयतु प्र विद्वान् । आ० ६. १०. । इति ॥ दह्यमानस्य प्रेतस्योपस्थानेऽप्येताः शंसनीयाः ॥

मैनमग्ने वि दहो माभि शोचो मास्य त्वचं चिक्षिपो मा शरीरं ।
यदा शृतं कृणवो जातवेदोऽथेमेनं प्र हिणुतात्पितृभ्यः ॥१॥
मा । एनं । अग्ने । वि । दहः । मा । अभि । शोचः । मा । अस्य । त्वचं । चिक्षिपः ।
मा । शरीरं ।
यदा । शृतं । कृणवः । जातऽवेदः । अथ । ईं । एनं । प्र । हिणुतात् । पितृऽभ्यः ॥१॥

हे अग्ने एनं प्रेतं मा वि दहः । विशेषेण दग्धं भस्मीभूतं मा कुरु । माभि शोचः । अभितः शोकेन संतापेन युक्तं मा कुरु । अस्य त्वचं मा चिक्षिपः । इतस्ततो विक्षिप्तां मा कुरु । शरीरमपि विक्षिप्तं मा कुरु । हे जातवेदोऽग्ने यदा त्वं शृतं पक्वं सुदग्धं कृणवः करिष्यसि अथ तदानीमेनं प्रेतं पितृभ्यः प्र हिणुतात् । पितृसमीपे प्रेरय ॥

शृतं यदा करसि जातवेदोऽथेमेनं परि दत्तात्पितृभ्यः ।
यदा गच्छात्यसुनीतिमेतामथा देवानां वशनीर्भवाति ॥२॥
शृतं । यदा । करसि । जातऽवेदः । अथ । ईं । एनं । परि । दत्तात् । पितृऽभ्यः ।
यदा । गच्छाति । असुऽनीतिं । एतां । अथ । देवानां । वशऽनीः । भवाति ॥२॥

हे जातवेदः यदा प्रेतशरीरं शृतं पक्वं करसि करिष्यसि अथ तदानीमेवैनं प्रेतं पितृभ्यः परि दत्तात् । प्रयच्छ । यदायं प्रेत एतामग्निना कृतामसुनीतिं प्राणस्य नयनं प्राणप्रेरणं गच्छाति प्राप्नोति अथ तदानीमेव देवानां वशनीर्देवानां वशं प्रापितो भवति ॥

सूर्यं चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च धर्मणा ।
अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रति तिष्ठा शरीरैः ॥३॥

सूर्यं॑। चक्षुः॑। ग॒च्छ॒तु॒। वात॑म्। आ॒त्मा। द्याम्। च॒। ग॒च्छ॒। पृ॒थि॒वीम्। च॒। धर्म॑णा।
अ॒पः। वा॒। ग॒च्छ॒। यदि॑। तत्र॑। ते॒। हि॒तम्। ओष॑धीषु। प्रति॑। ति॒ष्ठ॒। शरी॑रैः ॥३॥

हे प्रेत ते त्वदीयं चक्षुरिंद्रियं सूर्यं गच्छतु। प्राप्नोतु। आत्मा प्राणो वातं वाह्यं वायुं गच्छतु। अपि च त्वमपि धर्मणा सुकृतेन तत्फलं भोक्तुं द्यां च। अत्र चशब्दो विकल्पार्थे। द्युलोकं वा पृथिवीं च पृथिवीं वा गच्छ। प्राप्नुहि। अपो वांतरिक्षलोकं गच्छ। प्राप्नुहि। तत्रांतरिक्षे हितं स्थापितं ते तव कर्मफलमोषधीषु शरीरैः शरीरावयवैः प्रति तिष्ठ ॥

अजो भा॒गस्तप॑सा॒ तं त॑पस्व॒ तं ते॑ शो॒चिस्त॑पतु॒ तं ते॑ अ॒र्चिः।
यास्ते॑ शि॒वास्त॒न्वो॑ जातवेदस्ताभि॑र्वहैनं सु॒कृता॑मु लो॒कं ॥४॥
अ॒जः। भा॒गः। तप॑सा। तं। त॒प॒स्व॒। तं। ते॒। शो॒चिः। त॒प॒तु॒। तं। ते॒। अ॒र्चिः।
याः। ते॒। शि॒वाः। त॒न्वः॑। जा॒त॒ऽवे॒दः॒। ताभिः॑। व॒ह॒। ए॒न॑म्। सु॒ऽकृता॑म्। उ॒ इति॑।
लो॒कं ॥४॥

अजो जननरहितः शरीरेंद्रियादिभागव्यतिरिक्तोऽंतरपुरुषलक्षणो यो भागोऽस्ति हे अग्ने ते त्वदीयेन तपसा तापनेन तं तादृशं भागं तपस्व। तप्तं कुरु। तथा ते तव शोचिः शोकहेतुर्ज्वालाविशेषस्तं भागं तपतु। संस्करोतु। अपि च ते तवार्चिर्भासको ज्वालाविशेषस्तं भागं तपतु। संस्करोतु। तपःशोचिरर्चिःशब्दानां संतापतारतम्येन भेदः। हे जातवेदः ते तव यास्तन्वो मूर्तयः शिवाः सुखहेतवो न तु तापप्रदाः ताभिरेनं तनूभिः प्रेतं सुकृतां शोभनकर्मकारिणां लोकं स्थानं वह। प्रापय। उशब्दः पूरणः ॥

अव॑ सृज॒ पुन॑रग्ने पि॒तृभ्यो॒ यस्त॒ आहु॑तश्च॒रति॑ स्व॒धाभिः।
आयु॑र्वसा॒न उप॑ वेतु॒ शेषः॒ सं ग॑च्छतां त॒न्वा॑ जातवेदः ॥५॥
अव॑। सृ॒ज॒। पुन॑रिति॑। अ॒ग्ने॒। पि॒तृऽभ्यः॑। यः। ते॒। आऽहु॑तः। च॒रति॑। स्व॒धाभिः॑।
आयुः॑। व॒सा॒नः। उप॑। वे॒तु॒। शेषः॑। सं। ग॒च्छ॒ता॒म्। त॒न्वा॑। जा॒त॒ऽवे॒दः॒ ॥५॥

हे अग्ने यः प्रेतः पुमानाहुतश्चितौ मंत्रेण समर्पितः सन् स्वधाभिः स्वधाकारसमर्पितैश्चरुकादिभिः सह चरति तं प्रेतं पितृभ्यः पितृप्राप्त्यर्थं पुनरव सृज। भूयः प्रेरय। अयं प्रेत आयुर्जीवनं वसान आच्छादयन्। आयुषा युक्त इत्यर्थः। शेषः शिष्यमाणमस्थिलक्षणं यजनीयं शरीरमुप वेतु। उपगच्छतु। हे जातवेदः तव प्रसादात्तन्वा शरीरेण सं गच्छतां। संगतो भवतु ॥ ॥२०॥

यत्ते॑ कृ॒ष्णः श॑कु॒न आ॑तु॒तोद॑ पिपी॒लः स॒र्प उ॒त वा॒ श्वाप॑दः।
अ॒ग्निष्टद्विश्वा॒दगदं॑ कृणोतु॒ सोम॑श्च॒ यो ब्रा॑ह्म॒णाँ आ॑वि॒वेश॑ ॥६॥
यत्। ते॒। कृ॒ष्णः। श॒कु॒नः। आ॒ऽतु॒तोद॑। पि॒पी॒लः। स॒र्पः। उ॒त। वा॒। श्वाप॑दः।
अ॒ग्निः। तत्। विश्व॑ऽअत्। अ॒गद॑म्। कृ॒णो॒तु॒। सोमः॑। च॒। यः। ब्रा॒ह्म॒णान्। आ॒ऽवि॒वेश॑ ॥६॥

हे मृतशरीर ते तव संबंधि यदंगं कृष्णः शकुनः काकाख्य आतुतोद। आडीषदर्थे। ईषत्तुन्नवान्। तथा पिपीलः पिपीलिका वा सर्पो वोत वापि वा श्वापदश्च शृगालादिः। एतेषामन्यतमो यदि तुन्नवानित्यर्थः। विश्वात् सर्वस्मात्तामिस्रात्तादृशमंगमगदं क्षणोतु। दीषरहितं करोतु। संस्करोतित्यर्थः। तथा सोमश्च देवतारूप ओषधिरूपो वा संस्करोतु। यः सोमो ब्राह्मणानुत्विगादीनाविवेश प्रविष्टवान् ॥

अनुस्तरण्या वपया प्रेतस्य मुखमग्नेर्वर्मेत्यनया प्रोर्णुयात्। सूचितं च। अनुस्तरण्या वपामुत्खिद्य शिरोमुखं प्रच्छादयेदग्नेर्वर्म परि गोभिर्व्ययस्वेति। आ० गृ० ४. ३. १९.। इति ॥

अग्नेर्वर्म परि गोभिर्व्ययस्व सं प्रोर्णुष्व पीवसा मेदसा च।
नेत्त्वा धृष्णुर्हरसा जर्हृषाणो दधृग्विधक्ष्यन्परियेखयाते ॥ ७॥
अग्नेः। वर्म। परि। गोभिः। व्ययस्व। सं। प्र। ऊर्णुष्व। पीवसा। मेदसा। च।
न। इत्। त्वा। धृष्णुः। हरसा। जर्हृषाणः। दधृक्। विऽधक्ष्यन्। परिऽएखयाते ॥ ७॥

हे प्रेत अग्नेः स्वभूतं वर्म ज्वालालक्षणं कवचं गोभिरनुस्तरणीगोचर्मणा परि व्ययस्व। परितः संवृणु। किंच पीवसा स्थूलेन मेदसा मांसेन सम्यक् प्रोर्णुष्व। आच्छादय। एवं कृते सति हरसा तेजसा धृष्णुर्धर्षणशीलो जर्हृषाणोऽत्यर्थं हृष्यन् दधृग्धृष्टः प्रगल्भः ॥ ऋत्विगित्यादिना दधृक्शब्दो निपातितः ॥ विधक्ष्यन् विविधं भस्मीकरिष्यन् एवंभूतोऽग्निस्त्वा त्वां नेत्परियेखयाते। नैव सर्वतो विस्तारयति ॥ अखेर्गत्यर्थात्सेर्व्यडागमः ॥

इममग्ने चमसमित्यनया प्रणीताप्रणयनमनुमंत्रयते। सूचितं च। इममग्ने चमसं मा वि जिह्वर इति प्रणीताप्रणयनमनुमंत्रयते। आ० गृ० ४. ३. २४.। इति ॥

इममग्ने चमसं मा वि जिह्वरः प्रियो देवानामुत सोम्यानाम्।
एष यश्चमसो देवपानस्तस्मिन्देवा अमृता मादयंते ॥ ८॥
इमं। अग्ने। चमसं। मा। वि। जिह्वरः। प्रियः। देवानां। उत। सोम्यानां।
एषः। यः। चमसः। देवऽपानः। तस्मिन्। देवाः। अमृताः। मादयंते ॥ ८॥

हे अग्ने इमं चमसं प्रणीताप्रणयनं मा वि जिह्वरः। मा विचालीः। यश्चमसो देवानामिंद्रादीनां प्रिय उतापि च सोम्यानां सोमार्हाणां पितॄणां प्रियः। किंच य एष चमसो देवपानः। देवाः पिबंत्यस्मिन्निति। देवपानस्थानीयो भवति तस्मिंश्चमसेऽमृता मरणवर्जिता देवाः पितरश्च मादयंते। हव्येन हृष्टा भवंति ॥

क्रव्यादमग्निं प्र हिणोमि दूरं यमराज्ञो गच्छतु रिप्रवाहः।
इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥ ९॥
क्रव्यऽअदं। अग्निं। प्र। हिणोमि। दूरं। यमऽराज्ञः। गच्छतु। रिप्रऽवाहः।
इह। एव। अयं। इतरः। जातऽवेदाः। देवेभ्यः। हव्यं। वहतु। प्रऽजानन् ॥ ९॥

आहिताग्निमरण एतदादिके द्वे ऋचावौपासनोद्वासने विनियुक्ते। तत्र प्रथमायाः पूर्वार्धेन दक्षिणस्यां दिशि चतुष्पथादावौपासनाग्निं निरस्यति। उत्तरेण शांतिकर्मार्थमादत्ते। आ० गृ० ४. ६.॥ क्रव्यादं। क्रव्यमामिषं। तस्यात्तारं तीव्रमग्निं दूरं विप्रकृष्टदेशे प्र हिणोमि। प्रगमयामि ॥ हि गतौ स्वादिः ॥ रिप्रवाहः। रिप्रं पापं। तस्य वोढा सोऽग्निर्यमराज्ञो यमो राजा येषां तान्यमराजकानन्यप्रदेशान्गच्छतु। प्राप्नोतु। अथ शांतिकर्मार्थमुपासन इतरः क्रव्यादादन्यो जातवेदा जातानां वेदिता जातधनो वा प्रजानन् सर्वैर्विज्ञायमानोऽग्निरिहैव देशे देवेभ्यो देवार्थं हव्यं हवनयोग्यं हविर्वहतु। प्रापयतु ॥

यो अग्निः क्रव्यात्प्रविवेश वो गृहमिमं पश्यन्नितरं जातवेदसं।
तं हरामि पितृयज्ञाय देवं स घर्ममिन्वात्परमे सधस्थे ॥ १०॥

यः। अग्निः। क्रव्यऽअत्। प्रऽविवेश। वः। गृहं। इमं। पश्यन्। इतरं। जातऽवेदसं।
तं। हरामि। पितृऽयज्ञाय। देवं। सः। घर्मं। इन्वात्। परमे। सधऽस्थे ॥१०॥

यः क्रव्यादोऽग्निर्देवो युष्माकं गृहिणां गृहं प्रविवेश प्रविष्टवान् तं क्रव्यादं देवं हरामि। गृहाद्बहिर्निष्क्रामयामीत्यर्थः। किमर्थं। पितृयज्ञाय तदर्थं। किं कुर्वन्। इममितरं तस्मादन्यं हव्यवाहं जातवेदसं पश्यन् पर्यालोचयन्। तथा सति क्रव्यादात्परोऽग्निः परम उत्कृष्टे सधस्थे सहस्थाने घर्मं यज्ञमिन्वात्। प्रीणातु। पितृभिर्घर्मपैः सहेति शेषः ॥ ॥२१॥

महापितृयज्ञे वषट्कारक्रियायां यो अग्निः कव्यवाहन इत्येषा स्विष्टकृतो याज्या। सूचितं च। यो अग्निः कव्यवाहनस्त्वमग्न ईळितो जातवेद इति संयाज्ये। आ० २. १९.। इति ॥

यो अग्निः क्रव्यवाहनः पितॄन्यक्षदृतावृधः।
प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्य आ ॥११॥
यः। अग्निः। क्रव्यऽवाहनः। पितॄन्। यक्षत्। ऋतऽवृधः।
प्र। इत्। ऊं इति। हव्यानि। वोचति। देवेभ्यः। च। पितृऽभ्यः। आ ॥११॥

कव्यवाहनः कव्यस्य हविषो वोढा योऽग्निः पितॄनृतावृध ऋतस्य यज्ञस्योदकस्य वा वर्धयितॄन् सत्येन वृद्ध्या वा देवान्। एतत्पितृविशेषणं वासु। तान्यक्षत् यजति ॥ यजेर्लेटि सिबडागमः ॥ सोऽग्निर्हव्यानि हवींषि प्र वोचतु। पितृयज्ञे प्रब्रवीतु। युष्मदर्थं मयानीतानीति। इदु पूरणौ। केभ्यः। देवेभ्यश्च पितृभ्यश्च। आकारः समुच्चये ॥

महापितृयज्ञ उशंतस्त्वेत्येषा सामिधेनी। सूच्यते हि। उशंतस्त्वा नि धीमहीत्येतां चिरन्तनानां ताः सामिधेन्यः। आ० २. १९.। इति ॥

उशंतस्त्वा नि धीमह्युशंतः समिधीमहि।
उशन्नुशत आ वह पितॄन्हविषे अत्तवे ॥१२॥
उशंतः। त्वा। नि। धीमहि। उशंतः। सं। इधीमहि।
उशन्। उशतः। आ। वह। पितॄन्। हविषे। अत्तवे ॥१२॥

हे अग्ने उशंतः कामयमाना वयं त्वा त्वां नि धीमहि। कर्मार्थं स्थापितवंतः। उशंतो वयं समिधीमहि। संदीपयामः। त्वमप्युशन् कामयमानो हविरादिकमुशत आगंतुकामान्पितॄनस्मिन्यज्ञ आ वह। हविषेऽस्माभिः प्रत्तं हविरत्तवेऽत्तुं ॥ अदेस्तुमर्थे तवेन्प्रत्ययः। क्रियायहणं कर्तव्यमिति कर्मणः संप्रदानसंज्ञा ॥

यं त्वमग्ने समदहस्तमु निर्वापया पुनः। कियांव्वं रोहतु पाकदूर्वा व्यल्कशा ॥१३॥
यं। त्वं। अग्ने। सं। अदहः। तं। ऊं इति। निः। वापय। पुनरिति। कियांवुं। अत्वं।
रोहतु। पाकऽदूर्वा। विऽअल्कशा ॥१३॥

हे अग्ने त्वं पितृदहनकाले यं देशं समदहः पुरा सम्यगदग्धवानसि ॥ तिङि चोदात्तवतीति समो निघातः ॥ तमु तमेव पुनर्निर्वापय। अत्वमिन्द्रेण कियांवु कियत्प्रमाणमुदकं यस्मिन् तत्पुष्करिण्यादिकं रोहतु। उत्पद्यतां। किंच व्यल्कशा विविधशाखा पाकदूर्वा परिपक्वदूर्वा चोत्पद्यतां ॥

अस्थिसंचयने क्षीरोदकेन शमीशाखया त्रिः प्रसव्यं श्मशानायतनं प्रोक्षति शीतिके शीतिकावतीत्यनया।

सूचितं च । क्षीरोदकेन शमीशाखया त्रिः प्रसव्यं परिव्रजन्प्रोक्षति शीतिके शीतिकावतीति । आ० गृ० ४. ५. ३. । इति ॥

शीतिके शीतिकावति ह्लादिके ह्लादिकावति ।
मंडूक्या३ सु सं गम इमं स्व१ग्निं हर्षय ॥१४॥
शीतिके । शीतिकाऽवति । ह्लादिके । ह्लादिकाऽवति ।
मंडूक्या । सु । सं । गमः । इमं । सु । अग्निं । हर्षय ॥१४॥

हे शीतिके शैत्ययुक्ते हे शीतिकावति । शीतिकाः शैत्ययुक्ता ओषधयः । ताभिस्तद्वति हे ह्लादिके आह्लादयित्रि हे ह्लादिकावत्याह्लादकफलयुक्तैर्वृक्षैस्तद्वति हे पृथिवि मंडूक्या मंडूकस्त्रिया वृष्टिप्रियया सु सुष्ठु सं गमः । संगच्छस्व ॥ गमेर्लुङि व्यत्ययेन परस्मैपदं ॥ तत इममग्निं सु सुष्ठु हर्षय ॥ ॥२२॥ ॥१॥

द्वितीयेऽनुवाके चयोदश सूक्तानि । तच्च त्वष्टा दुहित्रे इत्येतत्सप्तर्दशर्चं प्रथमं सूक्तं । यमपुत्रो देवश्रवा नामर्षिः । आदितो द्वादश त्रिष्टुभः । चयोदशीचतुर्दश्यावनुष्टुभौ । यद्वा । चयोदशी पुरस्ताद्बृहती । आदितो द्वयोः सरण्यूर्देवता । पुषा त्वेत इत्याद्यास्तसृणां पूषदेवत्याः । सरस्वतीं देवयंत इत्याद्यास्तिसृणां सरस्वतीदेवताकाः । आपो अस्मानित्याद्याः पंचर्चोऽब्देवताकाः । तच्च द्रप्सश्चस्कंदेत्याद्यास्तिसृणां सोमदेवत्या वा । अथ चानुक्रांतं । त्वष्टा देवश्रवा द्वे सरण्यूदेवते पौष्ण्यश्चतसृणां सारस्वत्यस्तिसृणां पंचाप्यो द्रप्सस्तिसृणां सौम्यो वांत्ये अनुष्टुभावुपांत्या पुरस्ताद्बृहती वेति ॥ गतः सूक्तविनियोगः ॥ अथेतिहासमाचक्षते । त्वष्टृनामकस्य देवस्य सरण्यूस्त्वष्टृशिराश्चेति स्त्रीपुंसात्मकमपत्यद्वयमभूत् । ततस्त्वष्टा सरण्यूनामिकां पुत्रीं विवस्वते प्रायच्छत् । ततस्तस्यां विवस्वतः सकाशाद्यमयम्यौ विजज्ञाते । ततः कदाचिदात्मसदृक्षा देवजनितायाः स्त्रियः समीपे तदपत्यद्वयं निधाय स्वयमाश्वं रूपं कृत्वोत्तराकुरून्प्रतिजगाम । अथ विवस्वानेतां स्त्रियं सरण्यूमिति मत्वा तामरंसीत् । तस्यां मनुर्नाम राजर्षिरजायत । ततो विवस्वानेषा सरण्यूर्न भवतीति विज्ञाय स्वयमप्यश्वो भूत्वा तामश्वरूपिणीं प्रायासीत् । ततः संक्रीडमानयोस्तयोः स्वभूतं रेतः पृथिव्यां पपात । अथ सा गर्भकामनया तत्पतितं रेत आजघ्रौ । ततस्तस्याः सकाशान्नासत्यौ दस्रश्चेत्यु भावश्विनावजायेतामिति ॥

त्वष्टा दुहित्रे वहतुं कृणोतीतीदं विश्वं भुवनं समेति ।
यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश ॥१॥
त्वष्टा । दुहित्रे । वहतुं । कृणोति । इति । इदं । विश्वं । भुवनं । सं । एति ।
यमस्य । माता । परि३उह्यमाना । महः । जाया । विवस्वतः । ननाश ॥१॥

त्वष्टैतन्नामको देवो दुहित्रे । षष्ठ्यर्थे चतुर्थी । दुहितुः सरण्यूनामिकाया वहतुं वहनं विवाहं ॥ एधिवह्योश्चतुः । उ० १. ७९. । इति वहेश्चतुप्रत्ययः ॥ तं कृणोति । करोति । इत्येतेन हेतुनेदं विश्वं सर्वं भुवनं भूतजातं समेति । तं विवाहं समागमत् । पर्युह्यमाना विवस्वतोद्वोढव्या यमस्य यम्याश्च माता महो महतो विवस्वतो जाया भार्या सरण्यूर्ननाश । उत्तराकुरून्प्रति नष्टा । अगच्छदित्यर्थः ॥

अपागूहन्नमृतां मर्त्येभ्यः कृत्वी सवर्णामददुर्विवस्वते ।
उताश्विनावभरद्यत्तदासीदजहादु द्वा मिथुना सरण्यूः ॥२॥
अप । अगूहन् । अमृतां । मर्त्येभ्यः । कृत्वी । सऽवर्णां । अददुः । विवस्वते ।
उत । अश्विनौ । अभरत् । यत् । तत् । आसीत् । अजहात् । ऊं इति । द्वा । मिथुना ।
सरण्यूः ॥२॥

अमृतां मरणधर्मरहितामेतां सरण्यूं मर्त्येभ्यो मनुष्येभ्यस्तदुत्पत्त्यर्थमपागूहन्। अपगूहितवंतः। संवृतवंतः। देवा उपनीतवंत इत्यर्थः। किंच सवर्णां सरण्यूसदृशीमन्यां स्त्रियं कृत्वा कृत्वा तस्मै विवस्वते देवा अददुः। प्रायच्छन्। उतापि च साश्वरूपिणी सरण्यूस्तदाश्विनावभरत्। स्वोदरे गर्भभूतौ धारितवती। यदा तज्जायापतिभ्यामश्वरूपात्मना संभोगकाले रेतः पतितमासीत् तदाश्विनौ जनयामासेत्यर्थः। तथा सरण्यूः सरण्यवेतन्नामिका द्वा मिथुना द्वौ मिथुनौ यमयम्यावजहात्। त्यक्तवती। जनितवतीत्यर्थः। यद्वा। सरण्यू-रेतन्नामिका मध्यमस्थाना देवता मध्यममग्निं माध्यमिकां वाचं चोत्पादितवती॥

दीक्षितमरणे पूषा त्वेत इत्याद्याश्वतस्रः शंसनीयाः। सूचितं च। पूषा त्वेतश्यावयतु प्र विद्वानिति चतस्रः। आ० ६.१०.। इति॥

पूषा त्वेतश्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः।
स त्वेतेभ्यः परि ददत्पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः ॥३॥
पूषा। त्वा। इतः। च्यवयतु। प्र। विद्वान्। अनष्टऽपशुः। भुवनस्य। गोपाः।
सः। त्वा। एतेभ्यः। परि। ददत्। पितृऽभ्यः। अग्निः। देवेभ्यः। सुऽविदत्रियेभ्यः ॥३॥

पूषा पोषयितेतन्नामको देवस्त्वा त्वामितोऽस्माद्देशाल्लोकात्प्र च्यावयतु। प्रकर्षेणोत्तमलोकं गमयतु। कीदृशः। विद्वानस्मन्नक्तां विजानानः अनष्टपशुरविनश्वरपशुयुक्तः। यस्मिन्सर्वे पशवस्तिष्ठंति न तु नश्यंतीत्यर्थः। भुवनस्य भूतजातस्य गोपा गोपायिता। किंच प्रक्रमस्य स पूषेतेभ्यः पितृभ्यस्त्वा त्वां परि ददत्। परिप्रयच्छतु। तथाग्निश्च सुविदत्रियेभ्यः। सुविदत्रं ज्ञानं धनं वा। तदर्हाः सुविदत्रियाः॥ छांदसो घप्रत्ययः॥ शोभनज्ञानेभ्यः सुधनेभ्यो वा देवेभ्यस्त्वां प्रयच्छतु। तेषां लोके स्थापयत्वित्यर्थः॥

आयुर्विश्वायुः परि पासति त्वा पूषा त्वा पातु प्रपथे पुरस्तात्।
यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधातु ॥४॥
आयुः। विश्वऽआयुः। परि। पासति। त्वा। पूषा। त्वा। पातु। प्रऽपथे। पुरस्तात्।
यत्र। आसते। सुऽकृतः। यत्र। ते। ययुः। तत्र। त्वा। देवः। सविता। दधातु ॥४॥

विश्वायुः सर्वान्नः सर्वत्र गमनशीलो वायुः॥ वकारलोपश्छांदसः॥ वायुः। यद्वा॥ छंदसीण इत्युएप्रत्यये वृद्धौ च कृतायां रूपं॥ गंता वायुः। त्वा त्वां परि पासति। परिपातु। पूषानुज्ञया परितो रक्षतु॥ पा रक्षणे। लेटि सिप्यडागमः॥ प्रपथे प्रकृष्टे मार्गे स्वर्गे पुरस्तात्सर्वेषां प्रथममेव वर्तमानः पूषा स्वयमेव त्वा त्वां प्रमितं यजमानं पातु। रक्षतु। सुकृतः पुण्यकर्माणो यत्र यस्मिन्देशे आसते तिष्ठंति यत्र वा ते सुकृतो ययुः प्राप्ताः तत्र तस्मिन्स्थाने देवो दीप्यमानः सविता सर्वस्य स्वस्वकर्मणि प्रेरक एतन्नामको देवस्त्वा त्वां दधातु। निदधातु॥

एकादशिनस्य पौष्णस्य पशोर्हविषः पूषेमा इत्यनुवाक्या। पूषेमा आशा अनु वेद सर्वाः सो अस्माँ अभयतमेन नेषत्। आ० ३.७.। इति हि सूचितं॥

पूषेमा आशा अनु वेद सर्वाः सो अस्माँ अभयतमेन नेषत्।
स्वस्तिदा आघृणिः सर्ववीरोऽप्रयुच्छन्पुर एतु प्रजानन् ॥५॥
पूषा। इमाः। आशाः। अनु। वेद। सर्वाः। सः। अस्मान्। अभयऽतमेन। नेषत्।
स्वस्तिऽदाः। आघृणिः। सर्वऽवीरः। अप्रऽयुच्छन्। पुरः। एतु। प्रऽजानन् ॥५॥

पूषा देव इमा सर्वा आशाः प्राच्याद्या दिशोऽनु वेद । आनुपूर्व्येण जानाति । इमाः सुखेन गंतव्या असुखेनेति वैवमनुक्रमेण जानातीत्यर्थः । एवं सत्यस्मान् । प्रमिते यजमानो ब्रवीति पुष्यसुखेन याजकसुखेन वा । अस्मानभयतमेनात्यंतं भयरहितेन मार्गेण नेषत् । नयतु । कथं । स्वस्तिदाः कल्याणस्य दाताघृणिरागतदीप्तियुक्तः सर्ववीरः सर्वैर्वीरैः कर्मणि समर्थैर्हस्त्यश्वादिभिरुपेतोऽप्रयुच्छन्नप्रमाद्यन् प्रजानन्नस्माकं फलाफले विजानानः सन् पुर एतु । अस्माकं पुरस्तान्नच्छतु । यथास्माकं भयं न भवति तथा गच्छत्वित्यर्थः ॥ ॥ २३ ॥

एकादशिनस्य पौष्णस्य पशोः पुरोडाशस्य प्रपथे पथामिति याज्या । सूचितं च । प्रपथे पथामजनिष्ट पूषा पथस्पथः परिपतिं वचस्या । आ० ३. ७. । इति ॥

प्रऽपथे पथामंजनिष्ट पूषा प्रऽपथे दिवः प्रऽपथे पृथिव्याः ।
उभे अभि प्रियतमे सधस्थे आ च परा च चरति प्रजानन् ॥ ६ ॥
प्रऽपथे । पथां । अजनिष्ट । पूषा । प्रऽपथे । दिवः । प्रऽपथे । पृथिव्याः ।
उभे इति । अभि । प्रियतमे इति प्रियऽतमे । सधस्थे इति सधऽस्थे । आ । च ।
परा । च । चरति । प्रऽजानन् ॥ ६ ॥

पथामंतरिक्षगमनहेतुभूतानां मार्गाणां मध्ये प्रपथे यः प्रकृष्टः पंथास्तत्र पूषाजनिष्ट । प्रादुरभूत् । पुण्यकर्मणां सुगतिप्रापणार्थमवस्थित इति भावः । तथा दिवो द्युलोकस्य च मार्गाणां मध्ये प्रपथे प्रकृष्टे मार्गे जातः । तथा पृथिव्याः प्रपथे प्रकृष्टे मार्गे मनुष्याणां तत्तत्कर्मणि प्रवर्तनार्थं प्रादुर्भूत इत्यर्थः । सोऽयं पूषा प्रियतमे सर्वेषिष्टतमे सधस्थे सर्वेषां सहावस्थानभूते उभे द्यावापृथिव्यावभिलक्ष्य चरति । आभिमुख्येन चरति । सुकृतिनां सुकृतफलप्रदर्शनायानुकूलं चरतीत्यर्थः । तथा परा चरति । दुष्कर्मणां प्रतिकूलं गच्छति । किं कुर्वन् । प्रजानन् अनेनेदं कर्म कृतमस्य कर्मण इदं फलमित्यविशेषेण जानानः ॥

बृद्धस्य दशरात्रस्य तृतीये छंदोमे प्रउगशस्त्रे सारस्ततृचस्य सरस्वतीं देवयंत इत्येषाद्या । सूच्यते हि । प्र ब्रह्माणो अंगिरसो नक्षंत सरस्वतीं देवयंतो हवंते । आ० ८. ११. । इति ॥

सरस्वतीं देवयंतो हवंते सरस्वतीमध्वरे तायमाने ।
सरस्वतीं सुकृतो अह्वयंत सरस्वती दाशुषे वार्यं दात् ॥ ७ ॥
सरस्वतीं । देवऽयंतः । हवंते । सरस्वतीं । अध्वरे । तायमाने ।
सरस्वतीं । सुऽकृतः । अह्वयंत । सरस्वती । दाशुषे । वार्यं । दात् ॥ ७ ॥

देवयंतो देवान्यष्टुं स्तोतुं च कामयमाना यजमानाः सरस्वतीमेतन्नामिकां मध्यमस्थानदेवतां हवंते । कर्मावयवत्वायाह्वयंति । तथा तायमाने स्तुतिभिर्हविर्भिश्च विस्तीर्यमाणेऽध्वरे यज्ञे सरस्वतीं यजंतीति शेषः । सुकृतः पुण्यकर्माणः सरस्वतीमह्वयंत । फलप्रदानाय ह्वयंते । यत एवमतः कारणात्सरस्वती देवी दाशुषे हवींषि दत्तवते यजमानाय वार्यं वरणीयं कर्मफलं दात् । प्रयच्छतु ॥

सरस्वति या सरथं ययाथ स्वधाभिर्देवि पितृभिर्मदंती ।
आसद्यास्मिन्बर्हिषि मादयस्वानमीवा इष आ धेह्यस्मे ॥ ८ ॥
सरस्वति । या । सऽरथं । ययाथ । स्वधाभिः । देवि । पितृऽभिः । मदंती ।
आऽसद्य । अस्मिन् । बर्हिषि । मादयस्व । अनमीवाः । इषः । आ । धेहि ।
अस्मे इति ॥ ८ ॥

हे सरस्वति हे देवि या त्वं सरथं पितृभिः सह समानेन रथेन युक्तं यथा भवति तथा ययाथ। अस्मदीयं यज्ञं प्राप्नोसि। किं कुर्वती। पितृभिः सह स्वधाभिर्हविर्लक्षणैरन्नैर्मदंती मादयंती यज्ञं गच्छसीति संबंधः। सा त्वं बर्हिष्यस्मिन्नेवेदिसरणे यज्ञ आसन्नोपविष्टा मादयस्व। हविर्भिस्तृप्ता भव। आत्मानं तर्पय वा। ततस्तृप्ता सती स्वमनमीवाः। अमीवा रोगः। तद्वर्जितान्यारोग्यजननानीषोऽन्नान्यस्मे अस्मभ्यमा धेहि। पर्याप्तं प्रयच्छ॥

सरस्वतीं यां पितरो हवंते दक्षिणा यज्ञमभिनक्षमाणाः।
सहस्रार्घमिळो अत्र भागं रायस्पोषं यजमानेषु धेहि ॥९॥
सरस्वतीं। यां। पितरः। हवंते। दक्षिणा। यज्ञं। अभिऽनक्षमाणाः।
सहस्रऽअर्घं। इळः। अत्र। भागं। रायः। पोषं। यजमानेषु। धेहि ॥९॥

यां त्वां सरस्वतीं पितरो हवंते आह्वयंति। कीदृशाः। दक्षिणा ॥ दक्षिणादाञ्चित्वाच्प्रत्ययः। पा० ५.३.३६॥ दक्षिणत आगत्य यज्ञमभिनक्षमाणा अभितो गच्छंतो व्याप्नुवंतः। अत्राक्षिन्यस्मै सहस्रार्घं बहुभिः पूजनीयमुपयोज्यमिळोऽन्नस्य भागं रायो धनस्य पोषं पुष्टिं च यजमानेषु त्वं धेहि। स्थापय॥

अवभृथस्नान आपो अस्मानित्येषा। सूचितं च। तत आचम्याप्लवंत आपो अस्मान्मातरः शुंधयंतु। आ० ६.१३.। इति॥ दृग्मेऽहनि वपामार्जनेऽयेषा। सूचितं च। इदमापः प्र वहतेत्येतस्याः स्थान आपो अस्मान्मातरः शुंधयंतु। आ० ८.१२.। इति॥

आपो अस्मान्मातरः शुंधयंतु घृतेन नो घृतप्वः पुनंतु।
विश्वं हि रिप्रं प्रवहंति देवीरुदिदाभ्यः शुचिरा पूत एमि ॥१०॥
आपः। अस्मान्। मातरः। शुंधयंतु। घृतेन। नः। घृतऽप्वः। पुनंतु।
विश्वं। हि। रिप्रं। प्रऽवहंति। देवीः। उत्। इत्। आभ्यः। शुचिः। आ। पूतः। एमि॥१०॥

मातरो जगतो मातृस्थानीया आपोऽस्मान्शुंधयंतु। प्रोक्षणेन शोधयंतु। तथा घृतप्वः। घृतमुदकं। तेनान्यान्पुनंतीति। तास्तथोक्ता आपः। यद्वा। घृतप्वः। घृतं गव्यं। तेन पुनंति। तथा ब्राह्मणं। घृतेन नो घृतप्वः पुनंतीति तद्वै सुपूतं यद्घृतेन पूयत इति। ता आपो घृतेन प्रत्यक्षेणोदकेन नोऽस्मान्पुनंतु। हि यस्माद्देवीर्देव्यो देवनशीला आपो विश्वं सर्वं रिप्रं पापं प्रवहंति पुरुषसकाशात्प्रगमयंति। अपनयंतीति यावत्। अनंतरमाभ्योऽज्य आ पूत आभिमुख्येन शुद्धः सन् स्रोताहमुदेमि। उन्नच्छामि। ऊर्ध्वं स्वर्गं गच्छामीत्यर्थः॥ ॥२४॥

सुत्येऽहनि द्रप्सश्चस्कंदेत्यादिके द्वे विप्रुड्होमार्थे। सूचितं च। द्रप्सश्चस्कंदेति द्वाभ्यां विप्रुड्होमौ कृत्वा। आ० ५.२.। इति॥ स्कन्नहविरभिमर्शनेऽपि द्रप्स इत्येषा। आकृतिर्बर्हिष्यधिषवणे यदि स्कंदेत् तदानीमाग्नीध्रोऽनया जुहुयात्। स्कन्नमभिमृशेदिति प्रकृत्य सूचितं। द्रप्सश्चस्कंदेत्याकृतिश्चेद्बर्हिष्यधिषवणाग्नीध्र एनां जुहुयात्। आ० ३.१३.। इति॥

द्रप्सश्चस्कंद् प्रथमाँ अनु द्यूनिमं च योनिमनु यश्च पूर्वः।
समानं योनिमनु संचरंतं द्रप्सं जुहोम्यनु सप्त होत्राः ॥११॥
द्रप्सः। चस्कंद्। प्रथमान्। अनु। द्यून्। इमं। च। योनिं। अनु। यः। च। पूर्वः।
समानं। योनिं। अनु। संऽचरंतं। द्रप्सं। जुहोमि। अनु। सप्त। होत्राः ॥११॥

द्रप्सोऽभिषूयमाणस्य सोमस्य रसः प्रथमान् पूर्वभाविनः पार्थिवाँल्लोकान् द्यून् दीप्यमानान्द्युलोकांश्चानु

लक्षीकृत्य चस्कंद । स्कन्नवान् । गतवान् । तदेवाह । इमं परिदृश्यमानं योनिं स्थानभूतं लोकं च यस्मात्पूर्वोऽस्ति तमनुगतवान् । समानं साधारणं योनिं द्यावापृथिवीलक्षणं स्थानमनु संचरंतं सम्यग्गच्छंतं द्रप्सं सोमरसं विप्रुड्भिषणं सप्त होत्राः सप्तसंख्याका विप्रुड्होमस्य कर्तारो होतृप्रभृतयो वयमन्वानुपूर्व्येण जुहोमि । जुहुमः । यद्वा । होत्राः सप्तहोतृभिः क्रियमाणा यागक्रिया होत्राः । ता अनु पश्चाद्ध्वर्युरहं जुहोमि । यद्वा । द्रुतगामित्वाद्द्रप्स आदित्य उच्यते । स आदित्यः पृथिवीं च दिवं च गच्छति समानं योनिमंतरिक्षं लक्षीकृत्य । सम्यक्चरंतं तं द्रप्समादित्यमुद्दिश्य सप्त होत्राः सप्तसंख्याका दिशः । यस्यां दिशि सूर्यो वर्तते तद्व्यतिरिक्ताः सप्तसंख्याका दिशः । अनु पश्चाज्जुहोमि । यत्र यत्र वर्तते तां तां दिशं द्रव्यत्वेन प्रयच्छामि । प्रतिष्ठापयामीत्यर्थः । अत्र वाजसनेयकं । असौ वा आदित्यो द्रप्सः स दिवं च पृथिवीं च स्कंदतीमं च योनिमनु यश्च पूर्व इतीमं च लोकममुं चेत्येतत् समानं योनिमनु संचरंतमिति समानं ह्येष एतं योनिमनु संचरति द्रप्सं जुहोम्यनु सप्त होत्रा इत्यसौ वा आदित्यो द्रप्सो दिशः सप्त होत्रा अमुं तदादित्यं दिशु प्रतिष्ठापयति । शत० ७. ४. १. २०. । इति ॥

यस्ते द्रप्सः स्कंदति यस्ते अंशुर्बाहुच्युतो धिषणाया उपस्थात् ।
अध्वर्योर्वा परि वा यः पवित्रात्तं ते जुहोमि मनसा वषट्कृतं ॥१२॥
यः । ते । द्रप्सः । स्कंदति । यः । ते । अंशुः । बाहुऽच्युतः । धिषणायाः । उपऽस्थात् ।
अध्वर्योः । वा । परि । वा । यः । पवित्रात् । तं । ते । जुहोमि । मनसा । वषट्ऽकृतं ॥१२॥

हे सोम ते त्वदीयो यो द्रप्सो रसः स्कंदति अधिषवणचर्मणोऽन्यत्र गच्छति । यश्च ते त्वदीयोऽंशू रसादितरः सन् स्कंदति । बाहुच्युतोऽध्वर्योर्बाहुभ्यां प्रच्युतः सन् स्कंदति । यद्वा । बाहुवत्साधनभूता द्यावाणः । तैः प्रच्युतोऽभिषुतः सन् धिषणायाः । धिषणेत्यधिषवणफलकनाम । प्रत्येकविवक्षयैकवचनं । अधिषवणफलकयोरुपस्थात्समीपस्थात्प्रदेशादन्यत्र गच्छति । तथाध्वर्योर्वाभिषुण्वतोऽध्वर्योर्हस्तात्स्कंदति । वापि वा पवित्राद्द्रोणपवित्रात्परिस्कंदति । तं सर्वं द्रप्सं ते त्वदीयं रसं मनसांतःकरणेन स्तोत्रेण वा सह वषट्कृतं वषट्कारेण स्वाहाकारेण हुतं जुहोमि । अग्नौ प्रक्षिपामि ॥

यस्ते द्रप्सः स्कन्नो यस्ते अंशुरवश्च यः परः सुचा ।
अयं देवो बृहस्पतिः सं तं सिंचतु राधसे ॥१३॥
यः । ते । द्रप्सः । स्कन्नः । यः । ते । अंशुः । अवः । च । यः । परः । सुचा ।
अयं । देवः । बृहस्पतिः । सं । तं । सिंचतु । राधसे ॥१३॥

हे सोम ते त्वदीयो यो द्रप्सो रसोऽन्यत्र स्कन्नो गतो यश्च त्वदीयस्तव कारणभूतोऽंशुर्लताखंडो रसादितरो भवति सुचा पात्रविशेषेण गृहीतः सोमोऽवोऽवस्तात्स्कंदते परः परस्ताद्व्यतिरिक्तो भवति तमिमं सोममयं बृहस्पतिरेतन्नामको देवः सं सिंचतु । सम्यक् प्रचारयतु । किमर्थं । राधसेऽस्माकं धनार्थं । स्कन्ने हि सोमे प्रजापश्वादिकमपस्कन्नं भवति खलु ॥

पयस्वतीरोषधयः पयस्वन्मामकं वचः ।
अपां पयस्वदित्पयस्तेन मा सह शुंधत ॥१४॥
पयस्वतीः । ओषधयः । पयस्वत् । मामकं । वचः ।
अपां । पयस्वत् । इत् । पयः । तेन । मा । सह । शुंधत ॥१४॥

इयं प्रत्यक्षकृता । हे आपः ओषधयः पयस्वतीः पयस्वत्यो वृष्टिलक्षणेनोदकेन सारवत्यो भवंति । मामकं मदीयं वचो वचनं वृष्टिप्रार्थनवचनं पयस्वत्सारवद्भवति । किं बहुना । यत्किंह किंचिदपामुदकानां पयः क्षीरवत्सारभूतं यदस्ति तत्सर्वं पयस्वत्सारवदेव । तेनोदकसारेण सह मा मां सृजत । यूयं शोधयत । आपो अद्यान्वचारिषं रसेन समगस्महि । ऋ० १. २३. २३. । इति निगमांतरं ॥ ॥२५॥

परं मृत्यो इति चतुर्दशर्चं द्वितीयं सूक्तं । यमपुत्रस्य संकुसुकस्यार्षं । एकादशी प्रस्तारपंक्तिः । आद्यौ जागतौ ततो द्वौ गायत्रौ । प्रस्तारपंक्तिः पुरतः । पिं० ३. ४०. । इति । चतुर्दशी जगती चतुर्दश्यनुष्टुप् । शिष्टास्त्रिष्टुभः । तत्रादौ चतस्रो मृत्युदेवत्याः । पंचमी धातृदेवताका । षष्ठी त्वष्टृदेवत्या । सप्तम्याद्याः शिष्टाः पितृमेधाभिधायिन्यः । अतस्तद्देवताकाः । अंत्या त्वनिरुक्तत्वात्प्राजापत्या वा । तथा चानुक्रांतं । परं मृत्यो संकुसुकश्चतस्रो मृत्युदेवताः परा धात्री परा त्वाष्ट्री पराः पितृमेधा एकादशी प्रस्तारपंक्तिर्जगत्यनुपांत्यांत्यानुष्टुप् प्राजापत्या वा सानिरुक्तेति ॥

परं मृत्यो अनु परेहि पंथां यस्ते स्व इतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् ॥१॥
परं । मृत्यो इति । अनु । परा । इहि । पंथां । यः । ते । स्वः । इतरः । देवऽयानात् ।
चक्षुष्मते । शृण्वते । ते । ब्रवीमि । मा । नः । प्रऽजां । रिरिषः । मा । उत । वीरान् ॥१॥

हे मृत्यो सर्वेषां मारकैतन्नामक देव परमन्यं पंथां पंथानमन्वानुपूर्व्येण परेहि । पराङ्मुखो गच्छ । यजमानादिति शेषः । कोऽसौ पंथाः । ते तव स्वः स्वभूतः देवयानात् । देवा अनेन मार्गेण गच्छंतीति देवयानो देवमार्गः । तस्मादितरो यः पंथास्तं प्रगच्छ । न केवलमतः परागच्छ अपि तु चक्षुष्मते दर्शनवते शृण्वते सर्वं । अप्रतिहतसर्वेंद्रियविज्ञानायेत्यर्थः । ते तुभ्यं ब्रवीमि । कथयामि । नोऽस्माकं प्रजां दुहितृदौहित्रात्मिकां मा रिरिषः । मा हिंसीः । उतापि च वीरान्पुत्रपौत्रादीन्मा हिंसीः । तत्परागमनेन रक्षेत्यर्थः ॥

मृत्योः पदं योपयंतो यदैत द्राघीय आयुः प्रतरं दधानाः ।
आप्यायमानाः प्रजया धनेन शुद्धाः पूता भवत यज्ञियासः ॥२॥
मृत्योः । पदं । योपयंतः । यत् । ऐत । द्राघीयः । आयुः । प्रऽतरं । दधानाः ।
आऽप्यायमानाः । प्रऽजया । धनेन । शुद्धाः । पूताः । भवत । यज्ञियासः ॥२॥

हे मृतस्य ज्ञातयः मृत्योः परागच्छतस्य पदं । पद्यतेऽस्मिन्निति पदं पितृयाणः । तं योपयंतो विमोहयंतः परिवर्जयंतो यतस्मादैत देवयानीयपथा गतवंतः तस्माद्द्राघीयो दीर्घतरमायुर्जीवनं प्रतरं प्रकृष्टतरमत्यर्थं दधाना धारयंतो भवथ । किंच हे यज्ञियासो यज्ञार्हा यज्ञसंपादिनो यजमानाः प्रजया पुत्रपौत्रादिकया धनेन गवाश्वादिकेन चाप्यायमाना वर्धमानाः संतः शुद्धा जन्मांतरसंचितदुरितक्षयाच्छुद्धा भवत । पूता वर्तमानजन्मोपचितदुरितक्षयाच्च पूता भवत ॥

पैतृमेधिके कर्मण्यमात्या इमे जीवा वि मृतैरिति सव्यावृतो व्रजंति । सूचितं च । इमे जीवा वि मृतैरिति सव्यावृतो व्रजंति । आ० गृ० ४. ४. ९. । इति ॥

इमे जीवा वि मृतैराववृत्रन्नभूद्भद्रा देवहूतिर्नो अद्य ।
प्राञ्चो अगाम नृतये हसाय द्राघीय आयुः प्रतरं दधानाः ॥३॥
इमे । जीवाः । वि । मृतैः । आ । अववृत्रन् । अभूत् । भद्रा । देवऽहूतिः । नः । अद्य ।
प्राञ्चः । अगाम । नृतये । हसाय । द्राघीयः । आयुः । प्रऽतरं । दधानाः ॥३॥

इमे जीवा जीवंतः पुत्रैषा मृतैः पित्रादिभिः । तेभ्य इत्यर्थः । व्यावृचन् । व्यावृत्ता भवंतु । एते न म्रियंतामिति भावः । किंचाद्याग्निर्हविषे नोऽस्माकमग्नौचे विष्टे देवहूतिः देवानामाह्वानं यत्र स देवहूतिः पितृमेधाख्यो यज्ञो भद्रा कल्याणोऽभूत् । भवतु । तत उत्तरं वयं प्राचः प्राङ्मुखांचना अगाम । गच्छेम । प्रत्यंच इति भावः । नृतये नर्तनाय कर्मणि गात्रविक्षेपाय । स्वकर्मानुष्ठानायेति भावः । हसाय हसनाय पुत्रादिभिः सह क्रीडनाय । कीदृशा वयं । द्राघीय आयुः प्रतरं दधानाः ॥

इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतं ।
शतं जीवंतु शरदः पुरूचीरंतर्मृत्युं दधतां पर्वतेन ॥४॥
इमं । जीवेभ्यः । परिऽधिं । दधामि । मा । एषां । नु । गात् । अपरः । अर्थं । एतं ।
शतं । जीवंतु । शरदः । पुरूचीः । अंतः । मृत्युं । दधतां । पर्वतेन ॥४॥

अनया जीवरक्षार्थं पाषाणं परिधिरूपेण स्थापयंति । जीवेभ्यो जीवद्भ्यः पुत्रपौत्रादिभ्यस्तेषां रक्षणार्थमेवं परिधिं मृत्योः परिधानभूतं पाषाणं दधामि । निदधामि । तत एषां जीवतां मध्येऽपरोऽन्य एतमिममर्थं ॥ ऋतेरिदं रूपं ॥ गंतव्यं मरणाख्यं मार्गं नु क्षिप्रं मा गात् । मा गच्छतु । एतदर्थं परिधिं स्थापयामीति संबंधः । किंच पुरूचीर्बहुंचना बहुगमनाः शतं शरद् एतत्संख्याकान्वर्षाञ्जीवंतु । स्वस्वप्राणान्धारयंतु । तथा पर्वतेन शिलोच्चयेन मृत्युं सर्वेषां मारकमेतन्नामकमंतर्दधतां । अंतर्हितं कुर्वंतु । यथा नागच्छति तथा कुर्वतामित्यर्थः ॥

यथाहान्यनुपूर्वं भवंति यथ ऋतवं ऋतुभिर्यंति साधु ।
यथा न पूर्वमपरो जहात्येवा धातरायूंषि कल्पयैषां ॥५॥
यथा । अहानि । अनुऽपूर्वं । भवंति । यथा । ऋतवः । ऋतुऽभिः । यंति । साधु ।
यथा । न । पूर्वं । अपरः । जहाति । एव । धातः । आयूंषि । कल्पय । एषां ॥५॥

यथा येन प्रकारेणाहान्यहोरात्रात्मकानि दिनान्यनुपूर्वं पूर्वपूर्वमनुक्रमेण भवंति परिवर्तंते । यथा चर्तवो वसंतादय ऋतुभिः सह साधु शोभनमविपर्यासेन यंति गच्छंति । यथा च पूर्वं पूर्वकालीनं पितरमपरोऽर्वाक्कालीनः पुत्रो न जहाति न परित्यजति पूर्वमरणेन । एवैवं तेनैवोक्तप्रकारेण हे धातः सर्वेषां धारयितरेतन्नामक देव एषामस्मत्कुलीनानां जीवानामायूंषि जीवनानि कल्पय । समर्थय । कुर्वित्यर्थः ॥ ॥२६॥

आ रोहतायुर्जरसं वृणाना अनुपूर्वं यतमाना यति ष्ठ ।
इह त्वष्टा सुजनिमा सजोषा दीर्घमायुः करति जीवसे वः ॥६॥
आ । रोहत । आयुः । जरसं । वृणानाः । अनुऽपूर्वं । यतमानाः । यति । स्थ ।
इह । त्वष्टा । सुऽजनिमा । सऽजोषाः । दीर्घं । आयुः । करति । जीवसे । वः ॥६॥

हे मृतस्य स्वजनाः पुत्रपौत्रादयः जरसं जरां वृणानाः संभजमाना यूयमायुर्जीवनमा रोहत । अधितिष्ठत । अनुपूर्वमानुपूर्व्येण । अव्ययीभावः । पूर्वो ज्येष्ठः । ज्येष्ठानुपूर्व्या यतमानाः प्रयत्नं कुर्वंतो यूयं यति स्थ यत्संख्याका भवथ ॥ यच्छब्दाच्छांदसो डतिः ॥ सुजनिमा शोभनजननस्त्वष्टेतन्नामको देवः सजोषा भवद्भिः संगतः सन्निहास्मिन्कर्मणि प्रवृत्तानां वो युष्माकं जीवसे जीवनाय दीर्घं प्रभूतमायुः करति । करोतु ॥

इमा नारीरविधवाः सुपत्नीरांजनेन सर्पिषा सं विशंतु ।
अनश्रवोऽनमीवाः सुरत्ना आ रोहंतु जनयो योनिमग्रे ॥७॥

इमाः । नारीः । अविधवाः । सुऽपत्नीः । आऽअंजनेन । सर्पिषा । सं । विशंतु ।
अनश्रवः । अनमीवाः । सुऽरत्नाः । आ । रोहंतु । जनयः । योनिं । अग्ने ॥७॥

अविधवाः । धवः पतिः । अविगतपतिकाः । जीवद्भर्तृका इत्यर्थः । सुपत्नीः शोभनपतिका इमा नारीर्नार्य आंजनेन सर्वतोऽञ्जनसाधनेन सर्पिषा घृतेनाक्तनेत्राः सत्यः सं विशंतु । स्वगृहान्प्रविशंतु । तथानश्रवोऽश्रुवर्जिता अरुदत्योऽनमीवाः । अमीवा रोगः । तद्वर्जिताः । मानसदुःखवर्जिता इत्यर्थः । सुरत्नाः शोभनधनसहिता जनयः । जनयंत्यपत्यमिति जनयो भार्याः । ता अग्ने सर्वेषां प्रथमत एव योनिं गृहमा रोहंतु । आगच्छंतु ॥

देवरादिकः प्रेतपत्नीमुदीर्ष्व नारीत्यनया भर्तृसकाशादुत्थापयेत् । सूचितं च । तामुत्थापयेद्देवरः पतिस्थानीयोऽन्तेवासी जरद्दासो वोदीर्ष्व नार्यभि जीवलोकं । आ० गृ० ४. २. १८. । इति ॥

उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुप शेष एहि ।
हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ ॥८॥
उत् । ईर्ष्व । नारि । अभि । जीवऽलोकं । गतऽअसुं । एतं । उप । शेषे । आ । इहि ।
हस्तऽग्राभस्य । दिधिषोः । तव । इदं । पत्युः । जनिऽत्वं । अभि । सं । बभूथ ॥८॥

हे नारि मृतस्य पत्युः जीवलोकं जीवानां पुत्रपौत्रादीनां लोकं स्थानं गृहमभिलक्ष्योदीर्ष्व । अस्मात्स्थानादुत्तिष्ठ ॥ ईर गतौ आदादिकः ॥ गतासुमपक्रांतप्राणमेतं पतिमुप शेषे । तस्य समीपे स्वपिषि । तस्मात्त्वमेहि । आगच्छ । यस्मात्त्वं हस्तग्राभस्य पाणिग्राहं कुर्वतो दिधिषोर्गर्भस्य निधातुस्तवास्य पत्युः संबंधादागतमिदं जनित्वं जायात्वमभिलक्ष्य सं बभूथ संभूतासि अनुमरणनिश्चयमकार्षीः तस्मादागच्छ ॥

शचियस्य धनुर्हस्तादित्यनया धनुः प्रहरेत् । सूचितं च । धनुर्हस्तादाददानो मृतस्येति धनुः । आ० गृ० ४. २ २०. । इति ॥

धनुर्हस्तादाददानो मृतस्यास्मे क्षत्राय वर्चसे बलाय ।
अत्रैव त्वमिह वयं सुवीरा विश्वाः स्पृधो अभिमातीर्जयेम ॥९॥
धनुः । हस्तात् । आऽददानः । मृतस्य । अस्मे इति । क्षत्राय । वर्चसे । बलाय ।
अत्र । एव । त्वं । इह । वयं । सुऽवीराः । विश्वाः । स्पृधः । अभिऽमातीः । जयेम ॥९॥

मृतस्य शचियस्य हस्तादनुराददानः । किमर्थं । अस्मे अस्माकं क्षत्राय प्रजापालनसमर्थाय बलाय वर्चसे तेजसे बलाय सेनालक्षणाय च धनुराददानोऽहं ब्रवीमीति शेषः । किमिति । त्वमत्रैवास्मिन्स्थान एव भव वयं चेहास्मिँल्लोके सुवीराः सुपुत्रयुक्ता भवंतो विश्वाः सर्वानभिमातीरभिमन्यमानान्स्पृधः संघर्षयित्रीन्बाधकान्शत्रूञ्जयेम । सहेमहि ॥

दीक्षितमरणे उप सर्प मातरमित्याद्यास्तस्रः शंसनीयाः । सूचितं च । उप सर्प मातरं भूमिमेतामिति चतस्रः सोम एकेभ्यः । आ० ६. १०. । इति ॥ उप सर्पेत्यनया संचितान्यस्थीनि गर्ते निदध्युः । आ० गृ० ४. ५. ५. ॥

उप सर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवां ।
ऊर्णम्रदा युवतिर्दक्षिणावत एषा त्वा पातु निर्ऋतेरुपस्थात् ॥१०॥
उप । सर्प । मातरं । भूमिं । एतां । उरुऽव्यचसं । पृथिवीं । सुऽशेवां ।
ऊर्णऽम्रदाः । युवतिः । दक्षिणाऽवते । एषा । त्वा । पातु । निःऽऋतेः । उपऽस्थात् ॥१०॥

मातरं मातृभूतां भूमिमस्माभिर्भूमी निधीयमानस्त्वमुप सर्प । उपगच्छ । अनुप्रविशेत्यर्थः । कीदृशीं । उरव्यचसं बहुव्याप्तिकां पृथिवीं विस्तीर्णां सुशेवां सुसुखां । सर्वेषां सुखदात्रीमित्यर्थः । तामुपगच्छ । युवतिर्यौवनान्विता स्त्रीरूपेयं भूमिर्दक्षिणावत ऋत्विग्भ्यो देयत्वेन धनवती यजमानायोर्णम्रदाः । ऊर्णेवोर्णायुक इव मृद्वी भवति । सुकुमारा भवति । न बाधयितव्येत्यर्थः । सैषा पृथिवी निर्ऋतेर्मृत्युदेवताया उपस्थात्समीपस्थानात्त्वा त्वामस्थिरूपं यजमानं पातु । रक्षतु ॥ ॥२७॥

उच्छ्रंचस्वेत्येतया पांसूनवकिरेत् । सूच्यते हि । उत्तरया पांसूनवकिरेत् । आ० गृ० ४. ५. ६. । इति ॥

उच्छ्रं॑चस्व पृथिवि॒ मा नि बा॑धथाः सूपाय॒नास्मै॑ भव सूपवं॒चना॑ ।
मा॒ता पु॒त्रं यथा॑ सि॒चाभ्ये॑नं भूम ऊर्णुहि ॥११॥
उत् । श्र्ं॒चस्व । पृथिवि । मा । नि । बा॒धथाः । सु॒ऽउ॒पा॒य॒ना । अ॒स्मै॒ । भव । सु॒ऽउ॒प॒वं॒च॒ना ।
मा॒ता । पु॒त्रं । यथा॑ । सि॒चा । अ॒भि । ए॒न॒ं । भू॒मे॒ । ऊ॒र्णु॒हि॒ ॥११॥

हे पृथिवि उच्छ्रंचस्व । ऊर्ध्वंगतोच्छ्रासमेनं कुरु । अधस्तात्मा कृथा इत्यर्थः । किंच मा नि बाधथाः । मा संपीडय । तथास्मै यजमानार्थं सूपायना शोभनोपगमना सूपचारिका भवेत्यर्थः । सूपवंचना । उपवंचनं प्रलंभनं । शोभनप्रलंभा सुप्रतिष्ठा भव । अपि च माता पुत्रमात्मीयं बालकं सिचा वस्त्रांतेन यथाच्छादयति तद्वद्वे भूमि एनमस्थिरूपं यजमानं त्वमभ्यूर्णुहि । आभिमुख्येनाच्छादय ॥

उ॒च्छ्रं॑चमाना पृथि॒वी सु ति॑ष्ठतु स॒हस्रं॑ मि॒त उप॒ हि श्रय॑ंतां ।
ते गृ॒हासो॑ घृ॒तश्चु॒तो॑ भवंतु वि॒श्वाहा॑स्मै॒ शर॒णाः सं॑त्वच ॥१२॥
उ॒त्ऽश्र्ं॒चमाना । पृथि॒वी । सु । ति॒ष्ठ॒तु॒ । स॒हस्रं॑ । मि॒तः । उप॑ । हि । श्रय॑ंतां ।
ते । गृ॒हासः॑ । घृ॒तऽश्चु॑तः । भ॒वं॒तु॒ । वि॒श्वाहा॑ । अ॒स्मै॒ । शर॒णाः । सं॒तु॒ । अ॒च॒ ॥१२॥

पांसुभिः प्रच्छादयेतां पठंति । उच्छ्रंचमानास्त्रिकुंभमवष्टभ्योर्ध्वं गच्छंती पृथिवी सु तिष्ठतु । प्रतिष्ठिता भवतु । किंच सहस्रं सहस्रसंख्याका मितः प्रक्षिप्ताः ॥ मिनोतेरौणादिके कर्मणि क्विपि तुगागमः । ततो जस् ॥ यद्वा । सहस्रं । तृतीयार्थे प्रथमा ॥ मित इति निष्ठांतं रूपं । व्यत्ययेन बहुवचनस्यैकवचनं । स्वरो वृषादित्वाद्द्रष्टव्यः ॥ सहस्रेण संमिता बहुसंख्याकाः । पार्थिवाः पांसव उप श्रयंतां । एनमुपसेवंतां । तं संपरिवार्य तिष्ठंत्वित्यर्थः । हिरवधारणे । तथा ते पांसवोऽस्मै गृहासो गृहा भवंतो घृतश्चुतो घृतस्योदकस्य सर्पिषो वा स्रावयितारो भवंतु । अचास्मिँल्लोके विश्वाहा सर्वेष्वहःसु सर्वदास्मा अस्य शरणाः संतु । आश्रयभूता भवंतु ॥

उत्ते स्तभ्नामीति कपालेनास्यान्यपिदध्यात् । सूचितं च । उत्ते स्तभ्नामीति कपालेनापिधाय । आ० गृ० ४. ५. ८. । इति ॥

उत्ते॑ स्तभ्नामि पृथि॒वीं त्वत्परी॒मं लो॒गं नि॒दध॒न्मो अ॒हं रि॑षं ।
ए॒तां स्थू॒णां पि॒तरो॑ धारयंतु ते॒ऽत्रा य॒मः सा॒दना॑ ते मिनोतु ॥१३॥
उत् । ते॒ । स्त॒भ्नामि॒ । पृथि॒वीं । त्वत् । परि॑ । इ॒मं । लो॒गं । नि॒ऽद॒धत् । मो इति॑ ।
अ॒हं । रि॒षं॒ ।
ए॒तां । स्थू॒णां । पि॒तरः॑ । धा॒र॒यं॒तु॒ । ते॒ । अ॒त्र । य॒मः । सा॒दना॑ । ते॒ । मि॒नो॒तु॒ ॥१३॥

हे अस्थिकुंभ त्वत्परि । परिशब्दयोगे पंचमी । तवोपरि ते त्वदीयेन कपालेन पृथिवीमुत्स्रभामि । प्रतिबध्नामि । यथा पृथिवी तवोपरि मा गच्छति तथापिदधामीत्यर्थः । इमं लोगं कपालरूपं लोष्टं निदधदुपरि स्थापयन्नहं मो रिषं । मा हिंसिषं । किंचैतां मया निहितां स्रुग्णां ते त्वदीयां पृथिव्या धारयित्रीं कपालरूपां पितरो धारयंतु । निश्चलां कुर्वंतु । ततस्ते त्वदीयेऽस्मिन्स्थाने यमः पितृपतिः सदनानि स्थानानि मिनोतु । परिच्छिनत्तु । करोत्वित्यर्थः ॥

प्रतीचीने मामहनीष्वाः पर्णमिवा दधुः ।
प्रतीचीं जग्रभा वाचमश्वं रशनया यथा ॥१४॥
प्रतीचीने । मां । अहनि । इष्वाः । पर्णऽइव । आ । दधुः ।
प्रतीचीं । जग्रभ । वाचं । अश्वं । रशनया । यथा ॥१४॥ ॥२८॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्ये सप्तमाष्टके षष्ठोऽध्यायः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् । निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
अष्टके सप्तमे षष्ठं व्याख्याय श्रुतिकोविदः । सायणार्यस्ततोऽध्यायं सप्तमं व्याचिकीर्षति ॥

अथ द्वादशानुवाकात्मकस्य दशममंडलस्य द्वितीयेऽनुवाके चयोदश सूक्तानि । तत्र नि वर्तध्वमित्यष्टर्चं तृतीयं सूक्तं । अस्य यमपुत्रो मथिताख्य ऋषिर्वरुणपुत्रो भृगुर्वाथवा भार्गवच्यवनः । षष्ठी गायत्री शिष्टा अनुष्टुभः । इदमग्नीषोमदेवताकं गोदेवताकं वा । अग्नीषोमा पुनर्वसू इत्यर्धर्चोऽग्नीषोमदेवताकः । तथा चानुक्रांतं । नि वर्तध्वमष्टौ मथितो भृगुर्वा वारुणिर्भार्गवच्यवनो वापं गत्यं वानुष्टुभमग्नीषोमीयो द्वितीयोऽर्धर्चः षष्ठी गायत्रीति ॥ गतो विनियोगः ॥

नि वर्तध्वं मानु गातास्मान्त्सिषक्त रेवतीः ।
अग्नीषोमा पुनर्वसू अस्मे धारयतं रयिं ॥१॥
नि । वर्तध्वं । मा । अनु । गात । अस्मान् । सिसक्त । रेवतीः ।
अग्नीषोमा । पुनर्वसू इति पुनःऽवसू । अस्मे इति । धारयतं । रयिं ॥१॥

हे गावो हे आपो वा यूयं नि वर्तध्वं । अस्मान्प्रत्यागच्छत । मानु गात । अस्मद्व्यतिरिक्तं यजमानं मा गच्छत । आगत्य च हे रेवती रेवत्यो धनवत्यो यूयमस्मान्सिषक्त । सेचयत । अवगाहत । गोदोहनस्नानपानादिद्वारेण सेवध्वमित्यर्थः । हे पुनर्वसू पुनःपुनर्वसारी स्तोतॄणां यष्टॄणामाच्छादयितारावेतन्नामकौ देवौ युवामस्मे अस्मासु रयिं श्रीस्वादिलक्षणं धनं धारयतं स्थापयतं ॥

पुनरेना नि वर्तय पुनरेना न्या कुरु । इंद्रः एणा नि यच्छत्वग्निरेना उपाजतु ॥२॥
पुनः । एनाः । नि । वर्तय । पुनः । एनाः । नि । आ । कुरु । इंद्रः । एनाः । नि ।
यच्छतु । अग्निः । एनाः । उप ऽआजतु ॥२॥

अत्र मंत्रद्रष्टा स्वात्मानं प्रतिब्रूते । हे मदीयात्मन् त्वमेना एता अन्यतोऽभिगंतीर्गा अपो वा पुनर्नि वर्तय । पुनःपुनर्मदभिमुखीकुरु । तदनंतरमेना एताः पुनर्भूयो भूयो न्या कुरु । नियता आत्मायत्ताः कुरु । किंचेंद्रोऽपि तव सहायभूतः सन्नेना एता नि यच्छतु । स्वदायत्ताः करोतु । अपिचैना एता गा अपो वोपाजतु । उपगमयतु । उपक्षिपतु वा । उपयोग्याः करोत्वित्यर्थः ॥

पुनरेता नि वर्तंतामस्मिन्पुष्यंतु गोपतौ । इहैवाग्ने नि धारयेह तिष्ठतु या रयिः ॥३॥
पुनः । एताः । नि । वर्तंतां । अस्मिन् । पुष्यंतु । गोऽपतौ । इह । एव । अग्ने । नि । धारय । इह । तिष्ठतु । या । रयिः ॥३॥

एना एता ईदृशो गाव आपो वा पुनर्नि वर्तंतां । भूयो भूयो मां प्रत्यागच्छंतु । आगत्य च गोपतौ साक्षादिमतीनां धेनूनां वृष्टिलक्षणानामपां पालकेऽस्मिन्नीदृशे मयि पुष्यंतु । आत्मायत्तत्वेन स्थित्वा पुष्टा भवंतु । पुष्टाः सतीस्ता हे अग्ने त्वमिहैवास्मिन्नेव मयि नि धारय । नियमेन स्थापय । या रयिर्यदपि ब्रीह्यादिकं धनमस्ति तदपि धनं गोसहितमिहास्मिन्नेव गोपतौ मयि तिष्ठतु । निवसतु ॥

यन्नियानं न्ययनं संज्ञानं यत्परायणं । आवर्तनं निवर्तनं यो गोपा अपि तं हुवे ॥४॥
यत् । निऽयानं । निऽअयनं । संऽज्ञानं । यत् । पराऽअयनं । आऽवर्तनं । निऽवर्तनं । यः । गोपाः । अपि । तं । हुवे ॥४॥

नियानं ॥ अधिकरणे ल्युट् ॥ नियमेन यांत्यागच्छंति गावोऽत्रेति नियानं गोष्ठाख्यं स्थानं । यत् अस्तीति शेषः । यच्छब्दयोगात्तच्छब्दोऽध्याहर्तव्यः । हुव इति क्रियापदं सर्वत्रानुषज्यते । तत्स्थानं हुवे । आह्वयामि । आह्वानमभिमुखीकरणं तेन चात्र तत्पूर्विका प्रार्थना लक्ष्यते । गोसहितं गोष्ठं प्रार्थय इत्यर्थः । न्ययनं ॥ भावे ल्युट् ॥ नियमेन गृहं प्रति प्राप्तिलक्षणं गमनं यदस्ति तदपि प्रार्थये । निवर्तनं वने चरित्वा गृहं प्रति यदागमनमस्ति तदपि प्रार्थये । योऽपि गोपा गवां पालकोऽस्ति तमपि हुवे । प्रार्थये । सर्वगुणोपेता गाः प्रार्थय इत्यर्थः ॥

य उदानड्व्ययनं य उदानट्परायणं । आवर्तनं निवर्तनमपि गोपा नि वर्तंतां ॥५॥
यः । उत्ऽआनट् । विऽअयनं । यः । उत्ऽआनट् । पराऽअयनं । आऽवर्तनं । निऽवर्तनं । अपि । गोपाः । नि । वर्तंतां ॥५॥

यो गोपा गोपालो व्ययनं नष्टानां गवामन्वेषणार्थं विविधं गमनमुदानट् व्याप्नोति अनुभवति । यः परायणं परागमनमुदानट् व्याप्नोति । वनं प्रति गवां चरणाय गमनमित्यर्थः । यश्चावर्तनं वनचारिणीभिर्गोभिः सह प्रवर्तनमनुभवति । योऽपि गोपा निवर्तनं गोभिः सह वनाद्गृहं प्रति निर्गमनमनुभवति । सोऽपि गोपालो नि वर्तंतां । गोभिः सह वनाद्गृहं प्रति क्षेमेणागच्छतु ॥

आ निवर्त नि वर्तय पुनर्न इंद्र गा देहि । जीवाभिर्भुनजामहै ॥६॥
आ । निऽवर्त । नि । वर्तय । पुनः । नः । इंद्र । गाः । देहि । जीवाभिः । भुनजामहै ॥६॥

हे इंद्र त्वमा निवर्त । आभिवर्तस्व । अस्मदभिमुखो भव । ततोऽन्यतो गच्छंतीर्गा नि वर्तय । अस्मदभिमुखीः कुरु । एवं कृत्वा च हे इंद्र त्वं पुनः पश्चान्नोऽस्मभ्यं गा देहि । प्रयच्छ । यथा दत्ताभिर्जीवाभिरिरं जीवंतीभिः सर्वस्य जीवयित्रीभिर्वा गोभिर्भुनजामहै । वयं भुंजीमहि । यद्वा । भुजिरत्रांतर्भावितण्यर्थः । देवपितृन्संभोजयेमहि ॥

परि॑ वो विश्व॒तो दध ऊ॒र्जा घृ॒तेन॒ पय॑सा ।
ये दे॒वाः के च॑ य॒ज्ञिया॒स्ते र॒य्या सं सृ॑जंतु नः ॥७॥
परि॑ । वः॒ । वि॒श्व॒तः॑ । दधे॑ । ऊ॒र्जा । घृ॒तेन॑ । पय॑सा ।
ये । दे॒वाः॑ । के । च॒ । य॒ज्ञि॒याः॑ । ते । र॒य्या । सं । सृ॒जं॒तु॒ । नः॒ ॥७॥

हे देवाः विश्वतः सर्वतः क्षितान्वो युष्मानूर्जा गोसंबंधिना दधिलक्षणेनान्नेन घृतेनाज्येन पयसा क्षीरेण च परि दधे । संधारयामि । युष्मभ्यं हविर्द्रव्येण प्रयच्छामि । न केवलमात्मानं पुष्णामीत्यर्थः । एतज्ज्ञात्वा ये के च देवा यज्ञिया यज्ञार्हाः संति ते देवा गोऽन्नाद्या गोलक्षणेन धनेन सं सृजंतु । संयोजयंतु ॥

आ नि॑वर्तन वर्तय॒ नि नि॑वर्तन वर्तय ।
भूम्या॒श्चत॑स्रः प्र॒दिश॒स्ताभ्य॑ एना॒ नि व॑र्तय ॥८॥
आ । नि॒ऽव॒र्त॒न॒ । व॒र्त॒य॒ । नि । नि॒ऽव॒र्त॒न॒ । व॒र्त॒य॒ ।
भूम्याः॑ । चत॑स्रः । प्र॒ऽदिशः॑ । ताभ्यः॑ । एना॒ः । नि । व॒र्त॒य॒ ॥८॥

मंचद्रष्टर्षिः स्वात्मानं गाश्च संबोध्याह । हे मदीयात्मन् त्वं गा आ वर्तय । आकारोऽप्यनेनापि संबध्यते । मदभिमुखीः कुरु । स्तुत्या यागेन च ताः प्रसाद्योपनमयेत्यर्थः । हे गावः यूयमपि प्रसाद्यमाना आ निवर्तध्वं । आभिमुख्येनागच्छत । पुनरप्याह । हे मदीयात्मन् त्वं नि वर्तय । गोसंचरणस्थानादपगच्छंतीर्गा इतोऽभिगंचीः कुरु । यूयमपि हे गावः निवर्त्यमानाः सत्यो निवर्तध्वं । इदानीं स्वात्मा गावश्चर्षिं प्रति ब्रुवते । हे ऋषे अहं कुतो गा निवर्तयामीति कुतो वयं निवर्तयामह इत्यात्मना गोभिश्च पृष्टः सन्नाह । भूम्याः पृथिव्याश्चतस्रः प्रदिश्यतुःसंख्यायुक्ताः प्रकृष्टा या दिशः संति ताभ्यो दिग्भ्य एना गा नि वर्तय । हे आत्मन् मदभिमुखीः कुरु । हे गावः यूयमपि ताभ्यो दिग्भ्यो निवर्तध्वमिति सामर्थ्यालभ्यं । यद्वा । अब्दैवतपक्षेऽपि सूक्तार्थो यथा घटते तथा योजना कर्तव्या ॥ ॥१॥

भद्रमिति दशर्चं चतुर्थं सूक्तं । आद्यैकपदा दशाक्षरा विराट् । अग्निमीळे भुजामित्येषानुष्टुप् नवमी विराट् दशमी त्रिष्टुप् मध्ये षड्गायत्र्यः । इदमादीनां सप्तसूक्तानामिंद्रपुत्रः प्रजापतिपुत्रो वा विमद ऋषिर्वसुक्रपुत्रो वसुक्रदाख्यो वा । इदमुत्तरं चाग्नेयं । तथा चानुक्रांतं । सप्तोत्तराण्विंद्रो विमदः प्राजापत्यो वा वासुक्रो वसुक्रद्वा भद्रं दशाग्नेयं तु गायत्रमाद्यैकपदा पाद एव वा शांत्यर्थः परानुष्टुबंत्ये विराट्त्रिष्टुभाविति ॥ ततो विनियोगः ॥

भद्रं नो॑ अग्ने॒ वात॑य॒ मनः॑ ॥१॥
भद्रं नो॑ अग्ने॒ वात॑य॒ मनः॑ ॥१॥

हे अग्ने त्वं नोऽस्माकं मनो भद्रं शुभयुक्तमपि वातय । अपिरत्र धात्वर्थानुवादी । आगमय । त्वत्संबंधिस्रोचकरणे प्रेरयेत्यर्थः ॥

अग्निमी॑ळे॒ भुजां॑ यविष्ठं शा॒सा मि॒त्रं दुर्धी॑तिं ।
यस्य॑ धर्म॒न्त्स्व॑१॒॑रेनीः॑ सप॒र्यंति॑ मा॒तुरू॒धः ॥२॥
अग्निं॑ । ई॒ळे॒ । भुजां॑ । य॒वि॒ष्ठं॒ । शा॒सा । मि॒त्रं । दुः॒ऽधी॑तिं ।
यस्य॑ । ध॒र्म॒न् । स्वः॑ । एनीः॑ । स॒प॒र्यंति॑ । मा॒तुः । ऊ॒धः ॥२॥

भुजां हविर्भुजां देवानां मध्ये यविष्ठमहन्यहन्यपिहोत्रादिकर्मार्थं आयमानत्वादतिशयेन युवानं शासानु-

शासनेन मित्रं। यस्मादिदं कर्तव्यमिदं न कर्तव्यमिति सर्वमनुशास्ति तस्मात्सर्वस्य मित्रभूतमित्यर्थः। दुर्धरीतुं दुर्धरणीयं संग्रामे शत्रुभिर्दुर्निवारणीयं एवंभूतमग्निमीळे। स्तौमि। अपि च यस्याग्नेर्धर्मन्धर्मण्यग्निहोत्रादिके कर्मणि स्वर्बुलोकमादित्यं सर्वे देवजातं वैनीरेन्यः प्रतिगंत्र्य आकृतयः स्तुतयश्च सपर्यंति परिचरंति सेवंते। यद्वा। स्वः सपर्यंतीत्यनयोः सामानाधिकरण्यं। अत्र स्वरित्ययं सर्वशब्दो निपातः। स्वः सर्वे देवा एनीरात्मनः प्रतिगंत्रीराकृतीः स्तुतीश्च सपर्यंति सेवंते। उपजीवंतीत्यर्थः। तत्र दृष्टांतः। स्तुप्नोपममेतत्। मातुर्गोरूधः क्षीरोपसंहारस्थानं प्रति यथा वत्सा उपजीवंति तद्वत्। तमग्निमीळे इति पूर्वेण संबंधः॥

यमासा कृपनीळं भासाकेतुं वर्धयंति। भ्राजंते अ्रेणिदन् ॥३॥
यं। आसा। कृपऽनीळं। भासाऽकेतुं। वर्धयंति। भ्राजंते। अ्रेणिऽदन् ॥३॥

स्तोतारो यष्टारश्चासा स्तुतिहविर्लक्षणेनोपासनेन यमग्निं वर्धयंति। कीदृशं। कृपनीळं कर्मस्थानं। कर्माधारमित्यर्थः। भासाकेतुं ज्वालालक्षणज्ञापकं दीप्तेः कर्तारं वा। यच्छब्दश्रुतेस्तच्छब्दोऽध्याहार्यः। सोऽग्निः अ्रेणिदन् स्तोतृभ्यो यष्टृभ्योऽभीष्टफलसमूहप्रदः शत्रुभ्यो ज्वालापंक्तिप्रदो वा एवंभूतः सन् भ्राजते। भासते॥

अ्र्यो विशां गातुरेति प्र यदानड्दिवो अंतान्। कविरभ्रं दीद्यानः ॥४॥
अ्र्यः। विशां। गातुः। एति। प्र। यत्। आनट्। दिवः। अंतान्। कविः। अभ्रं। दीद्यानः ॥४॥

विशां यजमानमनुष्याणामर्यो गंतव्यो गातुर्गमनशीलोऽग्निर्दीद्यानो दीप्यमानो यदैति ऊर्ध्वं गच्छति तदा दिवो द्युलोकस्यांतान्पर्यंताञ्कविर्मेधावी सोऽग्निः प्राणट्। प्रकर्षेण व्याप्नोति। अभ्रं मेघोपलक्षितमंतरिक्षं च व्याप्नोति॥

जुषद्धव्या मानुषस्योर्ध्वस्तस्थावृभ्वा यज्ञे। मिन्वन्त्सप्त पुर एति ॥५॥
जुषत्। हव्या। मानुषस्य। ऊर्ध्वः। तस्थौ। ऋभ्वा। यज्ञे। मिन्वन्। सप्त। पुरः। एति ॥५॥

मानुषस्य यजमानस्य यज्ञे यजनीये यागे हव्या हव्यानि हवींषि जुषत्सेवमानोऽग्निर्ऋभ्वोरुभूतो बहुज्वालोपेत ऊर्ध्वस्तस्थौ। उत्तिष्ठति। ऊर्ध्वं ज्वलतीत्यर्थः। अपि चायमग्निः प्राग्वंशादारभ्य सप्त सदनं सौमिकीं वेदिं मिन्वन् परिच्छिंदन् पुरः पुरस्तादुत्तरवेदिशालामुखीयात्प्रणीयमानः सन्नेति। गच्छति॥

स हि क्षेमो हविर्यज्ञः श्रुष्टीदस्य गातुरेति। अग्निं देवा वाशीमंतं ॥६॥
सः। हि। क्षेमः। हविः। यज्ञः। श्रुष्टी। इत्। अस्य। गातुः। एति। अग्निं। देवाः। वाशीऽमंतं ॥६॥

य उक्तगुणविशिष्टोऽग्निः। हीत्येतदवधारणे। स एवाग्निः क्षेमः कुशलहेतुः। सर्वस्य परिपालनहेतुरित्यर्थः। हविः पुरोडाशादिकं च स एव हविषस्तन्निमित्तत्वात्। यज्ञो यागोऽपि स एव तस्यापि तद्धेतुत्वात्। किंच श्रुष्टीत् क्षिप्रमेवास्याग्नेर्गातुर्गमनशीलोऽधिष्ठाचात्रीति। देवानामाह्वानार्थं गच्छति। गत्वा च प्रत्यागच्छंतं वाशीमंतं स्तुतिलक्षणया वाचोपेतमग्निं प्रति देवा अपि गच्छंतीति शेषः॥ ॥२॥

यज्ञासाहं दुव इषेऽग्निं पूर्वस्य शेवस्य। अद्रेः सूनुमायुमाहुः ॥७॥
यज्ञऽसाहं। दुवः। इषे। अग्निं। पूर्वस्य। शेवस्य। अद्रेः। सूनुं। आयुं। आहुः ॥७॥

अनेकवाक्यतायै यत्तच्छब्दावध्याहार्यौ । अपरार्धर्चः पूर्वं व्याख्येयः । आयुं देवानामाङ्गानार्थं दूत्येन गंतारं यमग्निमद्रेः सूनुमश्मनः पुत्रमाङ्गः स्वमङ्गस्त्वमश्मनस्परि । ऋ० २.१.१.। इत्येवमादयो मंत्रा वदंति । यज्ञसहं यागस्य वोढारं । धारयितारमित्यर्थः । तमग्निमभिलक्ष्य दुवः परिचरणमिषे । इच्छामि । किमर्थं । पूर्वस्य । अत्र पूर्वशब्द उत्कृष्टवाची । उत्कृष्टस्य श्रेयस्य स्वर्गापवर्गलक्षणसुखस्य प्राप्त्यर्थमिति शेषः ॥

नरो॒ ये के चास्मदा विश्वेत्ते वा॒म आ स्यु॑ः । अ॒ग्निं हु॒विषा॒ वर्धं॑तः ॥८॥
नरः॑ । ये । के । च॒ । अ॒स्मत् । आ । विश्वा॑ । इ॒त् । ते । वा॒मे । आ । स्युरिति॑ स्युः । अ॒ग्निं । हु॒विषा॑ । वर्धं॑तः ॥८॥

नरो नेतारो ये के च ये केचित्पुत्रपौत्रादयोऽस्मदस्माकं संति । आकारः पूरकः । ते पुत्रपौत्रादयो वामे वननीये संभजनीये विश्वेद्विश्वस्मिन्नेव पश्वादिधन आ स्युः । आ समंतान्नवेयुः । उपविशेयुरित्याशास्महे । किं कुर्वंतः । अग्निमंगनादिगुणविशिष्टं देवं हविषा पुरोडाशादिकेन वर्धंतो वर्धयंतः ॥

कृ॒ष्णः श्वे॒तोऽरु॒षो यामो॑ अस्य ब्रध्न ऋ॒ज्र उ॒त शो॒णो॒ यश॑स्वान् ।
हिर॑ण्यरूपं जनि॒ता ज॑जान ॥९॥
कृ॒ष्णः । श्वे॒तः । अरु॑षः । यामः॑ । अ॒स्य॒ । ब्र॒ध्नः । ऋ॒ज्रः । उ॒त । शो॒णः॑ । यश॑स्वान् ।
हिर॑ण्यऽरूपं । ज॒नि॒ता । ज॒जा॒न॒ ॥९॥

अत्र यच्छब्दमध्याहृत्य योज्यं । यामः । याति गच्छत्यस्मिन्निति यामो रथः प्रजापतिना निर्मितः । कीदृशः । कृष्णोऽसितवर्णः श्वेतः सितवर्णोऽरुष आरोचमानो ब्रध्नो महान्नृज्र ऋजुगाम्युतापि च शोणो रक्तवर्णो यशस्वान्कीर्तिमान् । यद्वा । यश इति धननाम । हविर्लक्षणेन धनेन युक्तः । हिरण्यरूपं सुवर्णसदृशं तं रथमस्याग्नेरर्थाय जनिता सर्वस्य जगतो जनयिता प्रजापतिर्जजान । जनयामास । अस्मै दत्तवानित्यर्थः । कथमेकस्यैव रथस्य कृष्णादिनानारूपत्वं संभवतीति चेत् अग्नेः सामर्थ्यातिशयेन संभवतीत्यर्थः । यद्वा । हिरण्यरूपमिति रथवाचिना शब्देन सह सामानाधिकरण्यात्कृष्णादिशब्दा द्वितीयांतत्वेन योज्याः । अत्र सर्वगुणोक्तरथवत्त्वायाग्निः स्तूयत इत्यर्थः ॥

ए॒वा ते॑ अग्ने विम॒दो म॑नी॒षामू॒र्जो न॑पादमृ॒तेभिः॑ स॒जोषाः॑ ।
गिर॒ आ व॑क्षत्सुम॒तीरि॑या॒न इ॒षमू॒र्जं सु॒क्षि॒तिं विश्व॑माभाः ॥१०॥
ए॒व । ते॒ । अ॒ग्ने॒ । वि॒ऽम॒दः । म॒नी॒षां । ऊर्जः॑ । न॒पा॒त् । अ॒मृ॒तेभिः॑ । स॒ऽजोषाः॑ ।
गिरः॑ । आ । व॒क्ष॒त् । सु॒ऽम॒तीः । इ॒या॒नः । इ॒षं । ऊर्ज॑ं । सु॒ऽक्षि॒तिं । विश्व॑ं । आ ।
अ॒भा॒रि॒त्य॒भाः ॥१०॥

एवमुक्तप्रकारेण हे ऊर्जो नपादोषधिवनस्पतिपितृभूतस्यान्नस्य पौत्र हे अग्ने अमृतेभिरमृतैर्हविर्लक्षणैरन्नैः सजोषाः संगतो विमदो नामर्षिर्मनीषां प्रज्ञष्टां बुद्धिं कामयमानः संस्ते तुभ्यं गिरः स्तुतिलक्षणा वाच आ वक्षत् । आभिमुख्येनोक्तवान् ॥ वक्षेश्छंदसि लेटि रूपं ॥ ततस्त्वमेतच्छ्रुत्वा सुमतीरियानः शोभनलक्षणा बुद्धीः संगमयन्निषमन्नमूर्जं क्षीरादिकं रसं च सुक्षितिं शोभननिवासं । यद्वा । क्षितयो मनुष्याः । शोभनपुत्रपौत्रादिकं । यत्किंचिद्देयमस्ति तद्विश्वं धनं चाभाः । तस्मै विमदायाहर । देहि ॥ ॥३॥

आग्निं नेत्यष्टर्चं पंचमं सूक्तमास्तारपंक्तिच्छंदस्कं । आद्यौ गायत्रौ पादौ ततो द्वौ आगतौ सास्तारपंक्तिः । ऋषिदेवते पूर्ववत् । तथा चानुक्रांतं । आग्निं नाष्टावास्तारपांक्तमिति ॥ पुष्यस्य चतुर्थेऽहन्याग्निं न स्ववृक्तिभि-

रित्याज्यं । आ० ७. ११. । इति ॥ महाव्रत आग्निमारुते यावतीष्वृक्ष्वळांदं साम सुवीरन् तदानीमादित-स्तावत्य ऋचोऽनुरूपार्थाः । सूचितं च । यदीळांदं भूयसीषु चेत् सुवीरन्नाग्निं न स्ववृक्तिभिरिति तावतीर-नुरूपः । ऐ० आ० ५. ३. २. । इति ॥

आग्निं न स्ववृक्तिभिर्होतारं त्वा वृणीमहे ।
यज्ञाय स्तीर्णबर्हिषे वि वो मदे शीरं पावकशोचिषं विवक्षसे ॥१॥
आ । अग्निं । न । स्ववृक्तिऽभिः । होतारं । त्वा । वृणीमहे ।
यज्ञाय । स्तीर्णऽबर्हिषे । वि । वः । मदे । शीरं । पावकऽशोचिषं । विवक्षसे ॥१॥

हे अग्ने वस्तव स्वभूते विमद् एतदाख्य ऋषौ मयीयं स्तुतिः प्रवृत्ताऽस्ति । नेति संप्रत्यर्थे । अतो वयमिदानीं स्ववृक्तिभिः स्वयंकृताभिर्दोषवर्जिताभिः स्तुतिभिर्होतारं देवानामाह्वातारं होमनिष्पादकं वाग्निं त्वा त्वामा वृणीमहे । आभिमुख्येन संभजामहे । किमर्थं । स्तीर्णबर्हिषे यज्ञाय ॥ तादर्थ्ये चतुर्थी ॥ यज्ञार्थं । कीदृशं । शीरमोषध्यादिषु सर्वत्रानुशायिनं पावकशोचिषं शोधकदीप्तिं । विवक्षसे । महन्नामैतत् । हे अग्ने त्वमपि महान्भवसि । यद्वा । विमदे यज्ञस्य संबंधिनः सोमस्य पानजन्यविविधमदार्थं त्वामावृणीमह इति योज्यं ॥

त्वामु ते स्वाभुवः शुंभंत्यश्वराधसः ।
वेति त्वामुपसेचनी वि वो मद ऋजीतिरग्न आहुतिर्विवक्षसे ॥२॥
त्वां । ऊं इति । ते । सुऽआभुवः । शुंभंति । अश्वऽराधसः ।
वेति । त्वां । उपऽसेचनी । वि । वः । मदे । ऋजीतिः । अग्ने । आऽहुतिः । विवक्षसे ॥२॥

स्वाभुवः स्वप्रकाशेन दीप्यमाना अश्वराधसो व्याप्तधनास्ते यजमाना हे अग्ने त्वामु त्वामेव शुंभंति । शोभयंति । यज्ञे हविर्भिर्दीपयंतीत्यर्थः । किंचोपसेचनी तवोपरिचरणशीलर्जीतिर्ऋजुगामिनी ह्रूयमानाऽऽ-हुतिर्हे अग्ने त्वां वेति । गच्छति । किमर्थं । वस्तव मदे मदनिमित्ते । तृप्त्यर्थमित्यर्थः । किंच त्वमपि विवक्षसे । महान्भवसि ॥

त्वे धर्माण आसते जुहूभिः सिंचतीरिव ।
कृष्णा रूपाण्यर्जुना वि वो मदे विश्वा अधि श्रियो धिषे विवक्षसे ॥३॥
त्वे इति । धर्माणः । आसते । जुहूभिः । सिंचतीःऽइव ।
कृष्णा । रूपाणि । अर्जुना । वि । वः । मदे । विश्वाः । अधि । श्रियः । धिषे । विवक्षसे ॥३॥

धर्माणो यज्ञस्य धारयितार ऋत्विजो जुहूभिः संपूर्णाऽऽहुतिभिर्होमपात्रैस्त्वे त्वामेवासते । सेवंते । तत्र दृष्टांतः । सिंचतीरिव वृष्टिलक्षणाः पृथिवीं सिंचंत्य आप अग्निं यथा स्वपितृत्वेन सेवंते तद्वत् । अग्नेराप इति श्रुतेस्तस्यापां पितृत्वं । यद्वा । जुहूभिः सिंचतीरिव सिच्यमाना आऽहुतय इव धर्माणस्त्वया धार्यमाणा रश्मयस्त्वे त्वय्यासते । निवसंति । हे अग्ने त्वं कृष्णा कृष्णवर्णान्यर्जुनार्जुनानि श्वेतवर्णानि ज्वालांतर्गतरूपाणि च विश्वाः सर्वाः श्रियः शोभा अधि धिषे । अधिकं यथा भवति तथा धारयसि । किमर्थं । वो युष्माकं सर्वेषां देवानां विमदे विविधसोमपानजन्यमदार्थं । यत एवमतो विवक्षसे । त्वं महान्भवसि ॥

यमग्ने मन्यसे रयिं सहसावन्नमर्त्यं ।
तमा नो वाजसातये वि वो मदे यज्ञेषु चित्रमा भर विवक्षसे ॥४॥

यं। अग्ने। मन्यसे। रयिं। सहसाऽवन्। अमर्त्य।
तं। आ। नः। वाजंऽसातये। वि। वः। मदे। यज्ञेषु। चित्रं। आ। भर। विवक्षसे॥४॥

हे अमर्त्यामरणधर्मन् सहसावन्बलवन् एवंभूत हे अग्ने त्वं यं रयिं मन्यसे सर्वेषु धनेषु यज्ञनं वरिष्ठमिति जानासि चित्रं चायनीयं तं रयिं नोऽस्माकं वाजसातयेऽन्नलाभाया भर। आहर। प्रयच्छ। किमर्थं। वो युष्माकं सर्वेषां देवानां यज्ञेषु विमदे विविधसोमादिहविर्जन्यमदनिमित्ते। यागेषु नानाप्रकारैर्हविर्भिर्युष्माकं तर्पणायेत्यर्थः। त्वमपि विवक्षसे। महान्भवसि॥

अग्निर्जातो अथर्वणा विदद्विश्वानि काव्या।
भुवद्दूतो विवस्वतो वि वो मदे प्रियो यमस्य काम्यो विवक्षसे॥५॥
अग्निः। जातः। अथर्वणा। विदत्। विश्वानि। काव्या।
भुवत्। दूतः। विवस्वतः। वि। वः। मदे। प्रियः। यमस्य। काम्यः। विवक्षसे॥५॥

अथर्वणीतन्नाम्नर्षिणा जातो जनितोऽग्निः। कथं अवगम्यते। त्वामग्ने पुष्करादध्यथर्वा निरमंथत। ऋ० ६. १६.१३.। इति मंत्रांतरात्। विश्वानि समस्तानि काव्या काव्यानि स्तोतृकर्माणि विदत्। वेत्ति। विवस्वतो यजमानस्य दूतो देवानामाह्वानार्थं भुवत्। भवति। किंच यमस्य संयंतुर्यजमानस्य प्रिय इष्टः सन् काम्यः कमनीयः प्रार्थनीयो भवतीत्यर्थः। शिष्टं स्पष्टं॥ ॥४॥

त्वां यज्ञेष्वीळतेऽग्ने प्रयत्यध्वरे।
त्वं वसूनि काम्या वि वो मदे विश्वा दधासि दाशुषे विवक्षसे॥६॥
त्वां। यज्ञेषु। ईळते। अग्ने। प्रऽयति। अध्वरे।
त्वं। वसूनि। काम्या। वि। वः। मदे। विश्वा। दधासि। दाशुषे। विवक्षसे॥६॥

हे अग्ने त्वां प्रयति प्रकर्षेण गच्छति प्रवर्तमानेऽध्वरे यागे यज्ञेषु यजनीयेषु हविःष्वासन्नेषु सत्स्वीळते। ऋत्विग्यजमानाः स्तुवंति। अपि च हे अग्ने त्वं विश्वा विश्वानि काम्या काम्यानि कमनीयानि वसूनि धनानि दाशुषे हविर्दत्तवते यजमानाय विमदे सोमादिहविर्जन्यतृप्तौ सत्यां दधासि। प्रयच्छसि। अतः कारणाद्विवक्षसे। त्वं महान्भवसि॥

त्वां यज्ञेष्वृत्विजं चारुमग्ने नि षेदिरे।
घृतप्रतीकं मनुषो वि वो मदे स्रुक्रं चेतिष्ठमक्षभिर्विवक्षसे॥७॥
त्वां। यज्ञेषु। ऋत्विजं। चारुं। अग्ने। नि। सेदिरे।
घृतऽप्रतीकं। मनुषः। वि। वः। मदे। स्रुक्रं। चेतिष्ठं। अक्षऽभिः। विवक्षसे॥७॥

हे अग्ने त्वां मनुष्या यजमाना यज्ञेषु यागेषु नि षेदिरे। नियमेन स्थापयंति। कीदृशं। ऋत्विजं होतृनामकं चारुं रमणीयं घृतप्रतीकमाज्याहुतिपूर्णमुखं स्रुक्रं ज्वलंतमत्यभिर्व्याप्तैस्तेजोभिश्चेतिष्ठमतिशयेन ज्ञातारं। किमर्थं। वि वो मदे तव सोमादिहविर्जन्यविविधतृप्त्यर्थं। यस्मादेवं तस्माद्विवक्षसे। महान्भवसि॥

अग्ने स्रुक्रेण शोचिषोरु प्रथयसे बृहत्।
अभिक्रंदन्वृषायसे वि वो मदे गर्भं दधासि जामिषु विवक्षसे॥८॥

अग्ने । शुक्रेण । शोचिषा । उरु । प्रथयसे । बृहत् ।
अभिऽक्रंदन् । वृषऽयसे । वि । वः । मदे । गर्भे । दधासि । जामिषु । विवक्षसे ॥ ८॥

हे अग्ने बृहन्महांस्त्वं शुक्रेण दीप्तेन शोचिषा तेजसोरु प्रथयसे । विस्तीर्णो यथा भवति तथा प्रख्यातो भवसि । किंचाभिक्रंदन्नाभिमुख्येन युद्धार्थं शत्रूनाह्वयन् वृषायसे । वृष इवाचरसि । युद्धकाले दर्पितवृष इव रोरवन्नवसीत्यर्थः । त्वं माध्यमिकः सन्नाग्निषु भगिनीभूतास्वोषधीषु गर्भे बीजलक्षणं दधासि । वृष्टिद्वारेण धारयसि । एकस्मात्प्रजापतेः सकाशादुद्भूतत्वादन्योषध्योऽग्नित्वमुपचर्यते । कस्मिन्सति । वि वो मदे तव विविधसोमादिहविर्जन्यमदे संजाते सति । यस्मादेवं कृतवानसि तस्मात्त्वं विवक्षसे । महान्भवसि ॥ विवक्षस इति महन्नाम वक्तेर्वा वहतेर्वा सनंतस्य रूपमिति ॥ ॥५॥

कुहेति पंचदशर्चं षष्ठं सूक्तमैंद्रं । पंचदशी त्रिष्टुप् पंचमीसप्तमीनवम्यस्त्रिस्रोऽनुष्टुभः शिष्टाः पुरस्ताद्बृहत्यः । आद्यद्वादशकत्र्यष्टकवती पुरस्ताद्बृहती । पूर्ववदृषिः । तथा चानुक्रांतं । कुह पंचोना पुरस्ताद्बार्हतं त्रिष्टुबंतं त्वं त्या चिदा नस्त्वं नोऽनुष्टुभ इति ॥ चतुर्थेऽहनि निष्केवल्य एतत्सूक्तं । सूचितं च । कुह श्रुत इंद्रो युध्यस्य त इति निष्केवल्यं । आ० ७. ११. । इति ॥

कुहं श्रुत इंद्रः कस्मिन्नद्य जने मित्रो न श्रूयते ।
ऋषीणां वा यः क्षये गुहा वा चर्कृषे गिरा ॥१॥
कुहं । श्रुतः । इंद्रः । कस्मिन् । अद्य । जने । मित्रः । न । श्रूयते ।
ऋषीणां । वा । यः । क्षये । गुहा । वा । चर्कृषे । गिरा ॥१॥

अद्यास्मिन्दिन इंद्रः कुह कुत्र स्थाने श्रुतो विश्रुतः प्रख्यातः । कस्मिञ्जने यजमाने इज्यत्वेन स्तुत्यत्वेनावस्थितः श्रूयते । प्रख्यायते । तत्र दृष्टांतः । मित्रो न सूर्य इव सखेव वा तद्वत् । य इंद्र ऋषीणां भृग्वादीनां क्षये निवास आश्रमे गुहा वा गुहायामरण्ये वा गिरा स्तुतिलक्षणया वाचा चर्कृषे अत्यर्थमाकृष्यते । अत्यर्थं स्तूयत इत्यर्थः । स इंद्रः कुह श्रुत इति पूर्वेण संबंधः ॥

इह श्रुत इंद्रो अस्मे अद्य स्तवे वज्र्यृचीषमः ।
मित्रो न यो जनेष्वा यशश्चक्रे असाम्या ॥२॥
इह । श्रुतः । इंद्रः । अस्मे इति । अद्य । स्तवे । वज्री । ऋचीषमः ।
मित्रः । न । यः । जनेषु । आ । यशः । चक्रे । असामि । आ ॥२॥

इहास्मिन्यज्ञे इंद्रः श्रुतः प्रख्यातः । अद्यास्मिन्दिवस अस्मे अस्माभिः स्तवे । स्तूयते । कीदृशः । वज्री वज्रवान् ऋचीषमः । यद्यावं इंद्र ते शतं शतं भूमीरुत स्युः न त्वा वज्रिन् । ऋ० ८. ७०. ५. । इत्यादिकया स्तुत्या समानगुण इत्यर्थः । य इंद्रो मित्रो न सूर्य इव स्निग्ध इव वा जनेषु स्तोतृजनेषु यशोऽन्नं कीर्तिं वा चक्रे करोति । कीदृशं । असाम्यसाधारणं । स इंद्रोऽस्माभिः स्तूयत इति पूर्वेण संबंधः ॥

महो यस्पतिः शवसो असाम्या महो नृम्णस्य तूतुजिः ।
भर्ता वज्रस्य धृष्णोः पिता पुत्रमिव प्रियं ॥३॥
महः । यः । पतिः । शवसः । असामि । आ । महः । नृम्णस्य । तूतुजिः ।
भर्ता । वज्रस्य । धृष्णोः । पिता । पुत्रंऽइव । प्रियं ॥३॥

य इंद्रो महो महतः शवसो बलस्य पतिरीश्वरोऽसाम्या । आद्यर्यादायां । आ समाप्तिः । अनंतगुण

इत्यर्थः। महो महतो गृण्यस्य धनस्य च तुतुजिः स्तोतृभ्यः प्रेरकः। किंच धृष्णोः शत्रूणां धर्षकस्य वज्रस्य स्वकीयस्यायुधस्य भर्ता य इंद्रो धारयिता। स इंद्रोऽस्मान्पालयिति शेषः। तत्र दृष्टांतः। पिता पुत्रमिव प्रियं यथा पितेप्सितं सुतं पाति तद्वत्॥

युजानो अश्वा वातस्य धुनी देवो देवस्य वज्रिवः।
स्यंता पथा विरुक्मता सृजानः स्तोषध्वनः ॥४॥
युजानः। अश्वा। वातस्य। धुनी इति। देवः। देवस्य। वज्रिऽवः।
स्यंता। पथा। विरुक्मता। सृजानः। स्तोषि। अध्वनः ॥४॥

हे वज्रिवो वज्रवन्निंद्र ॥ एको मत्वर्थीयोऽनुवादकः ॥ देवो द्योतमानस्त्वं देवस्य द्योतमानस्य वातस्य वायोर्धुनी प्रेरकौ। वायोरपि शीघ्रगामिनावित्यर्थः। अश्वाश्वौ त्वदीयौ हरिनामकौ युजानः स्वरथे संयोजयन्। कीदृशौ। विरुक्मता विरोचनवता पथा मार्गेण स्यंता स्यंतौ गच्छंतौ। अध्वनो युद्धे गमनमार्गान्सृजान उत्पादयन् स्तोषि। सततं स्तूयसे॥

त्वं त्या चिद्वातस्याश्वागा ऋजा तमना वहध्यै।
ययोर्देवो न मर्त्यो यंता नकिर्विदाय्यः ॥५॥
त्वं। त्या। चित्। वातस्य। अश्वा। आ। अगाः। ऋजा। तमना। वहध्यै।
ययोः। देवः। न। मर्त्यः। यंता। नकिः। विदाय्यः ॥५॥

यच्छब्दसंबंधादुत्तरोऽर्धर्चः पूर्वं व्याख्यायते। ययोस्त्वदीययोर्यंता नियंता निवारयिता देवो न देवानां मध्ये कश्चिदपि देवो नास्ति मर्त्यो मनुष्याणां मध्ये कश्चिदपि नास्ति नकिर्न कश्चिदपि विदाय्यो वेत्ता। जवस्य बलस्येति वा शेषः। हे इंद्र त्वं वातस्य वायोर्बलेन जवेन च युक्तावृजुगामिनौ त्या चित्तावश्वा त्वदीयावश्वौ तमनात्मनैव। सारथिनिरपेक्षेणेत्यर्थः। वहध्यै वहनार्थं। अभिप्रेतदेशप्रापणायेत्यर्थः। आगाः। आभिमुख्येन गच्छसि॥ ॥६॥

अध ग्मंतोशना पृच्छते वां कदर्था न आ गृहं।
आ जग्मथुः पराकाद्दिवश्च ग्मश्च मर्त्यं ॥६॥
अध। ग्मंता। उशना। पृच्छते। वां। कत्ऽअर्था। नः। आ। गृहं।
आ। जग्मथुः। पराकात्। दिवः। च। ग्मः। च। मर्त्यं ॥६॥

अथाथ यज्ञसमाप्त्यनंतरमुशना भार्गव ऋषिर्हे इंद्राग्नी ग्मंता स्वस्थानं प्रति गच्छंतौ वां युवां पृच्छते। पृच्छति स्म। यद्वा। उशनेति विभक्तिव्यत्ययः। उशनसमिंद्रस्य सखिभूतं भार्गवमिंद्रं च युवां सर्वो यजमानः पृच्छति। किं पृष्टवानिति उच्यते। युवां कदर्था कदर्थौ किंप्रयोजनवंतौ संतौ नोऽस्मदीयं। आकारः प्रतीत्यर्थे। गृहं प्रति पराकात्। दूरनामैतत्। दूरादा जग्मथुः। आगतवंतौ स्थः। तदेवोक्तं। दिवश्च द्युलोकाच्च ग्मश्च भूलोकाच्च मर्त्यं मनुष्यं मां प्रत्यागतवंतौ। युवयोः कृतार्थत्वादत्रागमनमस्मदनुग्रहार्थमेव न स्वार्थमिति ब्रुवन्ननुव्रजतीत्यर्थः॥

आ नं इंद्र पृक्षसेऽस्माकं ब्रह्मोद्यतं। तत्त्वा याचामहेऽवः शृण्वां यद्धन्मानुषं ॥७॥
आ। नः। इंद्र। पृक्षसे। अस्माकं। ब्रह्म। उत्ऽयतं। तत्। त्वा। याचामहे। अवः।
शृण्वां। यत्। हन्। अमानुषं ॥७॥

हे इंद्र त्वं । न इति तृतीयार्थे षष्ठी । नोऽस्माभिरध्वर्यतमुत्पिन्नं । दत्तमित्यर्थः । अस्माकमस्मदीयं ब्रह्म हविर्लक्षणमन्नं । आभूर्यादायां । आ तृप्तेरित्यर्थः । पृचसे । आत्मना संपर्चय ॥ पृची संपर्क इति धातो रूपं ॥ आभक्षयेत्यर्थः । किंच वयमपि त्वैवंभूतं त्वां तत् । यदुत्कृष्टमस्मीति शेषः । तत्तादृशमन्नमवस्तद्रक्षणं च याचामहे । प्रार्थयामहे । तथा यच्छ्रुष्णं बलं चामानुषं मनुष्यादन्यं राक्षसादिकं हन् हंति तदुत्कृष्टं बलं च याचामहे । यंद्वा । हे इंद्र त्वं शुष्णमेतन्नामानममानुषं मनुष्यव्यतिरिक्तमसुरं हन् । हतवानसि । हत्वा च यद्येन रक्षणेन त्रैलोक्यं पालितवानसि तदवः पालनमस्माकमपि भवेदिति त्वां याचामह इति वाक्यार्थः ॥

अकर्मा दस्युरभि नो अमंतुरन्यव्रतो अमानुषः ।
त्वं तस्यामित्रहन्वधर्दासस्य दंभय ॥८॥
अकर्मा । दस्युः । अभि । नः । अमंतुः । अन्यऽव्रतः । अमानुषः ।
त्वं । तस्य । अमित्रऽहन् । वधः । दासस्य । दंभय ॥८॥

अकर्माविद्यमानयागादिकर्मा दस्युरूपक्षपयिताभ्यामिमुखेन स्वरूपतो नोऽस्मानमंतुरज्ञाता । यद्वा । अचावित्युपसर्गस्य वकारलोपो द्रष्टव्यः । अवमंतुरवमंताभिभविता । अन्यव्रतः श्रुतिस्मृतिव्यतिरिक्तकर्मामानुषो मनुष्यसंव्यवहाराद्बाह्यः । असुरप्रकृतिरित्यर्थः । य एवंभूतोऽस्ति हे अमित्रहञ्छत्रूणां हंतरिंद्र त्वं दासस्योपक्षपयितव्यस्य वधहंता सन् दंभय । तं शत्रुं हिंधि ॥

त्वं न इंद्र शूर शूरैरुत त्वोतासो बर्हणा ।
पुरुचा ते वि पूर्तयो नवंत क्षोणयो यथा ॥९॥
त्वं । नः । इंद्र । शूर । शूरैः । उत । त्वाऽऊतासः । बर्हणा ।
पुरुऽचा । ते । वि । पूर्तयः । नवंत । क्षोणयः । यथा ॥९॥

हे शूर विक्रांतेंद्र त्वं शूरैर्भटैर्मरुद्भिः सहितः सन्नोऽस्मान् पाहीति शेषः । उतापि च त्वोतासस्त्वया रक्षिता वयं बर्हणा परिबर्हणायां शत्रूणां हिंसायां समर्था भवेम । किंच ते त्वदीयाः पूर्तयः कामानां पूरणानीप्सितार्थप्रदानानि पुरुचा बहून्स्तोतॄन्वि नवंत । विविधं व्याप्नुवंति । क्षोणयः । मनुष्यनामैतत् । मनुष्याः स्वकीयं स्वामिनं सेवार्थं यथा व्याप्नुवंति तद्वत् ॥

त्वं तान्वृचहत्ये चोदयो नॄन्कार्पाणे शूर वज्रिवः ।
गुहा यदी कवीनां विशां नक्षंचशवसां ॥१०॥
त्वं । तान् । वृचऽहत्ये । चोदयः । नॄन् । कार्पाणे । शूर । वज्रिऽवः ।
गुहा । यदि । कवीनां । विशां । नक्षंचऽशवसां ॥१०॥

हे वज्रिवो वज्रधर शूरेंद्र त्वं कार्पाणे । असिः छृपाणः । तेन साधं युद्धं कार्पाणं । तस्मिन्वृचहत्ये शत्रुहननार्थं नॄन्नरांस्तान्प्रसिद्धान्मरुद्गणांश्चोदयः । चोदयसि । प्रेरयसि । यदि यदा त्वं कवीनां मेधाविनां नक्षंचशवसां देवान्प्रतिगच्छत्स्तोतृबलानां विशां स्तोतृजनानां संबंधीनि गुहा गूढानि गुणैः संवृतानि स्तोत्राणि शृणोषीति शेषः । तदा प्रेरयसीति पूर्वेणान्वयः ॥ ॥७॥

मक्षू ता त इंद्र दानाम्स आक्षाणे शूर वज्रिवः ।
यद्ध शुष्णस्य दंभयो जातं विश्वं सयावभिः ॥११॥

मꣳसु । ता । ते । इंद्र । दानऽअंप्रसः । आक्षाणे । शूर । वज्रिऽवः ।
यत् । ह । शुष्णस्य । दंभयः । जातं । विश्वं । सयावऽभिः ॥११॥

हे शूर विक्रांत वज्रिवो वज्रोपेतेंद्र दानाप्रसो दानकर्मणः । स्तोतृभ्यः सततमभीष्टफलप्रदस्येत्यर्थः । ते तव स्वभूतानि मसु क्षिप्राण्यविलंबितानि । क्षिप्रकारणयुक्तानीत्यर्थः । आक्षाणि योजृभिर्व्याप्यमाने त्वय्यवस्थितानि ता तानि कर्माणि स्तोतारः स्तुवंतीति शेषः । सयावभिः सहयातृभिर्मरुद्भिः सहितस्त्वं शुष्णस्यासुरस्य विश्वं जातं सर्वमपत्यजातं दंभयः । अदंभयः । हिंसितवानसि । यद्वा । एवमादीनि यानि खलु कर्माणि संति तानि स्तुवंतीति पूर्वेण संबंधः ॥

माकुर्ध्वगिंद्र शूर वस्वीरस्मे भूवन्नभिष्टयः ।
वयंवयं त आसां सुम्ने स्याम वज्रिवः ॥१२॥
मा । अकुर्ध्वक् । इंद्र । शूर । वस्वीः । अस्मे इति । भूवन् । अभिष्टयः ।
वयंऽवयं । ते । आसां । सुम्ने । स्याम । वज्रिऽवः ॥१२॥

हे शूर विक्रांतेंद्र अस्मे अस्माकं स्वभूता वस्वीर्महत्योऽभिष्टय आभिमुख्येष्टय इज्याः । यद्वा । आभिमुख्येच्छा अभीप्सितप्रार्थनाः । कुध्यक् कुत्सिताः । विफला इत्यर्थः । मा भूवन् । किंतर्हि हे वज्रिवो वज्रिन्निंद्र ते तव प्रसादाद्वयंवयमृत्विग्यजमानाः । द्विर्वचनमतित्वराप्रदर्शनार्थं । आसामिज्यानामिच्छानां वा संबंधिनि सुम्ने सुखेऽवस्थिताः स्याम । भवेम । वयमभिष्टिजन्येन दृष्टादृष्टसुखेन युक्ताः शीघ्रं भवेमेत्याशास्महे इत्यर्थः ॥

अस्मे ता ते इंद्र संतु सत्याहिंसंतीरुपस्पृशः ।
विद्याम यासां भुजो धेनूनां न वज्रिवः ॥१३॥
अस्मे इति । ता । ते । इंद्र । संतु । सत्या । अहिंसंतीः । उपऽस्पृशः ।
विद्याम । यासां । भुजः । धेनूनां । न । वज्रिऽवः ॥१३॥

हे इंद्र अस्मे अस्माकं स्वभूताः ॥ ता सत्येत्युभयत्र प्रथमाबहुवचनस्य च्छांदस आकारः सति निर्देशस्याविशेषणत्वात् ॥ ता तास्तादृश्य उपस्पृशः । त्वामुपगम्य स्पृशंतीत्युपस्पृशः स्तुतयः । ते तव प्रसादात्सत्या सत्याः संतु । यथार्था भवंतु । तव सद्गुणग्राहिण्य इत्यर्थः । अपि चाहिंसंतीस्त्वामहिंसत्यश्च भवंतु । सत्स्तुतित्वादनुद्वेजयंत्यश्च भवंत्वित्यर्थः । हे वज्रिव इंद्र यासां स्तुतीनां संबंधिनो भुजो दृष्टादृष्टाभ्योगान्विद्याम वयं लभेमहि । तत्र दृष्टांतः । धेनूनां न गवां क्षीरादिभोगान्यथा गोस्वामी लभते तद्वत् । ताः सत्या भवंत्विति पूर्वेणान्वयः ॥

अहस्ता यदपदी वर्धत क्षाः शचीभिर्वेद्यानां ।
शुष्णं परि प्रदक्षिणिद्विश्वायवे नि शिश्नथः ॥१४॥
अहस्ता । यत् । अपदी । वर्धत । क्षाः । शचीभिः । वेद्यानां ।
शुष्णं । परि । प्रऽदक्षिणित् । विश्वऽआयवे । नि । शिश्नथः ॥१४॥

हे इंद्र यद्यदा क्षा भूमिरहस्ता पाणिरहितापदी चरणवर्जिता च । अमनुष्यकर्मकेत्यर्थः । वेद्यानां स्तोतव्योग्यानां त्वत्प्रभृतीनां देवानां संबंधिभिः शचीभिः कर्मभिर्वर्धत अवर्धत । धनधान्यादिभिः समृद्धेत्यर्थः । तदा त्वं परि प्रदक्षिणिदेवंभूतां पृथिवीं परिवेष्य प्रदक्षिणं यथा भवति तथा स्थितं शुष्णमसुरं विश्वायवे । तादर्थ्ये चतुर्थी । सर्वत्राप्रतिहतगामिन एतदाख्यस्यौर्वशेयरात्तोऽर्थाय नि शिश्नथः । नितरां ताडितवानसि ।

यद्वा । यदा शुष्णस्याच्छादनार्थं हस्तपादवर्जिता काचित्पृथिवी वेदितव्यानामसुराणां मायारूपैः कर्मभिः शुष्णमसुरं परिवेष्य प्रदक्षिणं यथा भवति तथावस्थितावर्धत तदानीं तां मायोत्पादितां पृथिवीं विश्वायवे सर्वव्यापकस्य मरुद्गणस्य प्रवेशनार्थं नि शिश्रथः ॥

पिबापिबेदिंद्र शूर सोमं मा रिषण्यो वसवान वसुः सन् ।
उत चायस्व गृणतो मघोनो महश्च रायो रेवतस्कृधी नः ॥१५॥
पिबऽपिब । इत् । इंद्र । शूर । सोमं । मा । रिषण्यः । वसवान । वसुः । सन् ।
उत । चायस्व । गृणतः । मघोनः । महः । च । रायः । रेवतः । कृधि । नः ॥१५॥

पिबपिबेति वीप्सातित्वराप्रदर्शनार्थं । हे शूर वीरेंद्र त्वमभिषुतं सोमं शीघ्रं पिब । यागकालातिपातो यावन्न भवति तावच्छीघ्रं सोमं पिबेत्यर्थः । इदिति पूरणः । हे वसवान वसूनां धनानामानेतः त्वं वसुः प्रशस्तः सन्मा रिषण्यः । यागकालातिक्रमजातेन दोषेणास्मान्मा हिंसीः । प्रशस्तस्य तव कर्मवैगुण्यकरणेन हिंसितुमयुक्तमित्यर्थः । उतापि च हे इंद्र त्वं गृणतस्त्वां स्तुवतः स्तोतॄन्मघोनो हविर्लक्षणधनवतो यजमानांश्च चायस्व । प्रमादजनितकर्मवैगुण्यदोषात्पालयस्व । किंच । महश्च राय इत्युभयत्र तृतीयार्थे षष्ठी । महो महता रायो धनेन च नोऽस्मान्रेवतः कृधि । धनवतः कुरु ॥ ॥८॥

यजामह इति सप्तर्चं सप्तमं सूक्तं । प्रथमासप्तम्यौ चिष्टुभौ । पंचम्यभिसारिणी । द्विर्दशकद्विर्दादशकवतीत्यभिसारिणीत्युच्यते । शिष्टाश्चतस्रो जगत्यः । पूर्ववदृषिदेवते । तथा चानुक्रांतं । यजामहे सप्ताद्यांत्ये चिष्टुभौ पंचम्यभिसारिणीति ॥ चतुर्थेऽहनि माध्यंदिनसवने तृतीयापंचम्योरावर्तनेन त्रींस्त्रीन् होत्रका एकैकं तृचमावपेरन् । सूचितं च । यजामह इंद्रं वज्रदक्षिणमिति द्वितीयानियमेव । आ०७.११. । इति ॥

यजामह इंद्रं वज्रदक्षिणं हरीणां रथ्यं विव्रतानां ।
प्र श्मश्रु दोधुवदूर्ध्वथा भूद्वि सेनाभिर्दयमानो वि राधसा ॥१॥
यजामहे । इंद्रं । वज्रऽदक्षिणं । हरीणां । रथ्यं । विऽव्रतानां ।
प्र । श्मश्रु । दोधुवत् । ऊर्ध्वऽथा । भूत् । वि । सेनाभिः । दयमानः । वि । राधसा ॥१॥

वयमिंद्रं यजामहे । सोमलक्षणैर्हविर्भिः पूजयामः । कीदृशं । वज्रदक्षिणं शत्रुवधाय सततं वज्रो दक्षिणे हस्ते यस्य तं विव्रतानां रथवहनादिविविधकर्मणां हरीणामितत्संज्ञकानामश्वानां रथ्यमानेतारं । स इंद्रः सोमपानानंतरं श्मश्रु स्वकीयानि श्मश्रूणि दोधुवत् पुनःपुनर्धुन्वानः सन्नूर्ध्वथोर्ध्वं प्र भूत् । प्रादुरभूत् । किंच सेनाभिर्मरुदादिस्वकीयैः सैन्यैर्वि दयमानो विविधं शत्रून्हिंसन्राधसा । द्वितीयार्थे तृतीया । राधो धनं । वीत्युपसर्गश्रुतेर्योग्यक्रियाध्याहारः । विविधं स्तोतृभ्यो ददाति ॥

हरी न्वस्य या वने विदे वस्विंद्रो मघैर्मघवा वृत्रहा भुवत् ।
ऋभुर्वाजं ऋभुक्षाः पत्यते शवोऽव क्ष्णौमि दासस्य नाम चित् ॥२॥
हरी इति । नु । अस्य । या । वने । विदे । वसु । इंद्रः । मघैः । मघऽवा । वृत्रऽहा । भुवत् ।
ऋभुः । वाजः । ऋभुक्षाः । पत्यते । शवः । अव । क्ष्णौमि । दासस्य । नाम । चित् ॥२॥

अस्येंद्रस्य संबंधिनौ या यौ हरी अश्वौ वने । वन्यंते संभज्यंतेऽस्मिन्देवा इति वनं यज्ञोऽन्नं वा । तस्मिन्वस्तुजीवलक्षणं धनं यवसलक्षणं वा नु क्षिप्रं विदे विंदेते लभेते । यद्वा । यौ हरी अस्येंद्रस्य वने संभजनार्थं वसु वसुनो लाभाय क्षिप्रं भवत इति शेषः । ताभ्यां हरिभ्यां मघैर्धनैर्मघवान्धनवानिंद्रो वृत्रहा

वृत्राख्यस्यासुरस्य मेघस्य वा हंता भुवत् । भवति । अपि चर्षुदीप्तो वाजो बलवानुभुषा महानिंद्रः शवः शवसो बलस्य धनस्य वा पत्यते । ईष्टे । यद्वा । शत्रूणां बलं प्रति पत्यते । प्रतिपद्यते । गच्छति । अहमपि तस्य प्रसादाद्दासस्योपचयितव्यस्य शत्रोर्नाम चित् । नम्यतेऽनेनेति नाम शिरः । तदप्यव रुणौमि । अवहन्मि । किमुतान्यदंगं । अथवा । नामधेयमपि नाशयामि किमुत शत्रुं ॥

यदा वज्रं हिरण्ययमिदथा रथं हरी यमस्य वहतो वि सूरिभिः ।
आ तिष्ठति मघवा सनश्रुत इंद्रो वाजस्य दीर्घश्रवस्पतिः ॥३॥
यदा । वज्रं । हिरण्ययं । इत् । अथ । रथं । हरी इति । यं । अस्य । वहतः । वि । सूरिऽभिः ।
आ । तिष्ठति । मघऽवा । सनऽश्रुतः । इंद्रः । वाजस्य । दीर्घऽश्रवसः । पतिः ॥३॥

यदेंद्रो हिरण्यं हितरमणीयं वज्रं स्वकीयमायुधं शत्रुहननाय गृह्णातीति शेषः । इदिति पूरणः । अथ तदानीमस्येंद्रस्य हरी अश्वौ यं रथं वहतः गंतृप्रदेशं विशेषेण प्रापयतः मघवा धनवानिंद्रः सूरिभिः स्तोतृभिः कुत्सादिभिः सह तं रथमा तिष्ठति । आरोहति । कीदृशः । सनश्रुतश्चिरप्रख्यातः । जगति स्वभावत एव विख्यात इत्यर्थः । दीर्घश्रवसो बद्धकीर्तेर्वाजस्यान्नस्य पतिः स्वामी । एवंभूत इंद्रस्तं रथमारोहतीत्यर्थः ॥

सो चिन्नु वृष्टिर्यूथ्या३ स्वा सचाँ इंद्रः श्मश्रूणि हरिताभि प्रुष्णुते ।
अव वेति सुक्षयं सुते मधूदिदूनोति वातो यथा वनं ॥४॥
सो इति । चित् । नु । वृष्टिः । यूथ्या । स्वा । सचा । इंद्रः । श्मश्रूणि । हरिता । अभि । प्रुष्णुते ।
अव । वेति । सुऽक्षयं । सुते । मधु । उत् । इत् । धूनोति । वातः । यथा । वनं ॥४॥

तच्छब्दश्रुतेर्यच्छब्दोऽध्याहर्तव्यः । या महती वृष्टिरस्ति सो सा वृष्टिर्नु क्षिप्रं । चिदित्युपमार्थे । यथा सर्वं सिंचति तथेंद्रः स्वा स्वानि यूथ्या यूथानि मरुदादिगणलक्षणानि सचा सह स्वानि श्मश्रूणि च हरिता हरिद्वर्णेन सोमेनाभि प्रुष्णुते ॥ प्रुष स्नुष स्नेहनसेचनपूरणेष्विति धातुः ॥ आभिमुख्येन स्निग्धा क्षिप्रं सिंचति । सोमं पाययति पिबति चेत्यर्थः । अपि च सुषयं शोभनं यज्ञगृहमव वेति । अभिगच्छति । गत्वा च सुते सोमे ऽभिषुते सति मधु मधुररसोपेतं सोमं पीत्वा । मत्तः सन्निति शेषः । उदिदूनोति । स्वशरीरमुत्कंपयति । तत्र दृष्टांतः । वातो वायुर्यथा वनं वृक्षसमूहमुत्कंपयति तद्वत् ॥

यो वाचा विवाचो मृध्रवाचः पुरू सहस्राशिवा जघान ।
तत्तदिदस्य पौंस्यं गृणीमसि पितेव यस्तविषीं ववृधे शवः ॥५॥
यः । वाचा । विऽवाचः । मृध्रऽवाचः । पुरु । सहस्रा । अशिवा । जघान ।
तत्ऽतत् । इत् । अस्य । पौंस्यं । गृणीमसि । पिताऽइव । यः । तविषीं । ववृधे । शवः ॥५॥

य इंद्रो वाचा वाक्साधनेनैव विवाचो विविधवाचः स्वशत्रून् मृध्रवाचो हिंसितवाचः । हत्वेति शेषः । पुरू पुरूणि बहून्यशिवाशिवान्यसुखकराणि । दुःखकराणीत्यर्थः । सहस्रा शत्रूणां सहस्राणि जघान हंति । अपि च यश्चेंद्रः पितेव यथा पिता पुत्रस्य तविषीं बलमन्नप्रदानैर्ववृधे वर्धयति तथा वृष्टिद्वारेण सर्वस्य जगतः शवो बलं ववृधे वर्धयति अस्येंद्रस्य तत्तदित्तत्तदेव पौंस्यं बलं गृणीमसि । वयं स्तुमः । इंद्रो येन येन बलेन शत्रून्हंति तस्य तत्तद्बलं वयं स्तुम इत्यर्थः ॥

सोमं त इंद्र विमदा अजीजनन्नपूंषं पुरुतमं सुदानवे ।
विश्वा यस्य भोजनमिनस्य यदा पशुं न गोपाः करामहे ॥६॥

सोमं । ते । इंद्र । विऽमदाः । अजीजनन् । अपूर्व्यं । पुरुऽतमं । सुऽदानवे ।
विश्म । हि । अस्य । भोजनं । इनस्य । यत् । आ । पशुं । न । गोपाः । करामहे ॥ ६ ॥

हे इंद्र ते तुभ्यं सुदानवे शोभनदानस्यार्थाय विमदा विमदनामानो वयं सोमं सोमविशेषमजीजनन् । जनितवंतः । कृतवंत इत्यर्थः ॥ अत्र पूर्वोत्तरयोरेकवाक्ययोः पुरुषव्यत्ययः ॥ कीदृशं । अपूर्व्यमपूर्वमनैः पूर्वमनृतं । उत्कृष्टमित्यर्थः । पुरुतमं बहुतमं । नानाप्रकारोपेतमित्यर्थः । हि यस्मात्कारणाद्धे इंद्र इनस्येश्वरस्येदृशस्य तव यद्भोजनं धनमस्तीति विश्म वयं जानीमः तस्मात्कारणात्त्वदीयं तद्धनमा करामहे । वयमस्मदभिमुखं कुर्महे । तत्र दृष्टांतः । पशुं न गोपा यथा गोपालो धेनुमाकृष्य स्वस्याभिमुखीं करोति तद्वत् ॥

मा किर्नं एना सख्या वि यौषुस्तवं चेंद्र विमदस्य च ऋषेः ।
विश्मा हि ते प्रमतिं देव जामिवदस्मे तें संतु सख्या शिवानि ॥ ७ ॥
माकिः । नः । एना । सख्या । वि । यौषुः । तवं । च । इंद्र । विऽमदस्य । च । ऋषेः ।
विश्म । हि । ते । प्रऽमतिं । देव । जामिऽवत् । अस्मे इति । ते । संतु । सख्या । शिवानि ॥ ७ ॥

हे इंद्र तव च विमदस्यर्षेर्मम च नः ॥ अस्मदो द्वयोश्च । पा० १. २. ५९. । इति द्वयोर्बहुवचनं ॥ आवयोरेतानि सख्या सख्यानि सुत्यसोतृत्वेज्ययष्टृत्वलक्षणानि सखिकर्माणि माकिर्वि यौषुः । क्वचिदपि न विच्छेदयेयुः । अपि च हि यस्मात्कारणाद्धे देव द्योतमानेंद्र ते तव प्रमतिमनुग्राहिकां बुद्धिं विश्म वयं जानीमः । तत्र दृष्टांतः । जामिवद्यथा भ्राता स्वभगिन्यां स्नेहयुक्तां मतिं जानाति तद्वत् । तस्मात्कारणादस्मे अस्माकं ते तव च सख्या सख्यानि शिवानि संतु । मंगलानि भवंतु । अनपायानीत्यर्थः ॥ ॥ ९ ॥

इंद्र सोममिति षड्चमष्टमं सूक्तं । चतुर्थ्याद्यास्तिस्रोऽनुष्टुभोऽग्निदेवत्याः । आदितस्तिस्र ऐंद्र्य आस्तारपंक्तिच्छंदस्काः । आदितो द्वे गायत्री ततो द्वे जागती सास्तारपंक्तिः । ऋषिः पूर्ववत् । तथा चानुक्रांतं । इंद्र सोमं षळास्तारपांक्तं स्वाग्नेय्योऽत्यास्तिस्रोऽनुष्टुभ इति ॥ गतो विनियोगः ॥

इंद्र सोममिमं पिब मधुमंतं चमू सुतं ।
अस्मे रयिं नि धारय वि वो मदे सहस्रिणं पुरुवसो विवक्षसे ॥ १ ॥
इंद्र । सोमं । इमं । पिब । मधुऽमंतं । चमू इति । सुतं ।
अस्मे इति । रयिं । नि । धारय । वि । वः । मदे । सहस्रिणं । पुरुवसो इति पुरुऽवसो ।
विवक्षसे ॥ १ ॥

हे इंद्र त्वमिममीदृशं सोमं पिब । कीदृशं । मधुमंतं मधुररसोपेतं चमू चम्वोरधिषवणफलकयोः सुतमभिषुतं । तदनंतरं पुरुवसो बहुधन हे इंद्र वस्तव विमदे विशेषेण सोमजन्यमदे सत्यस्मे अस्मासु रयिं धनं नि धारय । नितरां स्थापय । कीदृशं । सहस्रिणं सहस्रसंख्यायुक्तं । प्रभूतमित्यर्थः । त्वया दत्तेन धनेन यस्मादयं पुनरपि त्वदर्थं यागं कुर्मः तस्मादस्मासु धनं निधेहीत्यर्थः । अतः कारणाद्विवक्षसे । महन्नामैतत् । त्वं महान्भवसि ॥

त्वां यज्ञेभिरुक्थैरुप हव्येभिरीमहे ।
शचीपते शचीनां वि वो मदे श्रेष्ठं नो धेहि वार्यं विवक्षसे ॥ २ ॥
त्वां । यज्ञेभिः । उक्थैः । उप । हव्येभिः । ईमहे ।
शचीऽपते । शचीनां । वि । वः । मदे । श्रेष्ठं । नः । धेहि । वार्यं । विवक्षसे ॥ २ ॥

हे इंद्र वयं यज्ञैर्मित्रैः सोमयागादिभिरध्वरैः शस्त्रलक्षणैः स्तोत्रैर्हविर्भिर्हविर्भिः पुरोडाशादिभिश्च । उपेत्युपसर्गश्रुतिर्योग्यपदाध्याहारः । त्वामुपेयिमहे । अभिलषितं धनं याचामहे । अतो हे शचीपते कर्मणां पालयितः । त्वं केषांचित्कर्मणां पालको न भवसीति न किंतु शचीनां सर्वेषां कर्मणां पालको भवसीत्यर्थः । एवं याचितस्त्वं नोऽस्मभ्यं वार्यं वरणीयं श्रेष्ठं प्रशस्ततमं पश्वादिधनं धेहि । देहि । शिष्टं स्पष्टं ॥

यस्पतिर्वार्याणामसि रध्रस्य चोदिता ।
इंद्र स्तोतॄणामविता वि वो मदे द्विषो नः पाह्यंहसो विवक्षसे ॥३॥
यः । पतिः । वार्याणां । असि । रध्रस्य । चोदिता ।
इंद्र । स्तोतॄणां । अविता । वि । वः । मदे । द्विषः । नः । पाहि । अंहसः । विवक्षसे ॥३॥

हे इंद्र यस्त्वं वार्याणां वरणीयानां धनानां पतिरसि स्वामी भवसि । रध्रस्य राधकस्य स्तोतुश्च चोदिता धनदानेन कर्मसु नियोक्ता च भवसि । किंच हे इंद्र यस्त्वं स्तोतॄणामविता रक्षकोऽसि । स त्वं वि वो मदे तव विविधे सोमजन्यमदे सति द्विषो द्वेष्टुः सकाशान्नोऽस्मान्पाहि । रक्ष । अंहसः पापाच्च रक्ष । कस्मादेवमुच्यसे । यस्मात्त्वं विवक्षसे महान्भवसि ॥

युवं शक्रा मायाविना समीची निरमंथतं ।
विमदेन यदीळिता नासत्या निरमंथतं ॥४॥
युवं । शक्रा । मायाऽविना । समीची इति संऽईची । निः । अमंथतं ।
विऽमदेन । यत् । ईळिता । नासत्या । निःऽअमंथतं ॥४॥

हे शक्रा शक्रौ शत्रुवधादिकर्मसु समर्थौ हे अश्विनौ मायाविना मायाविनौ प्रज्ञावंतौ शत्रुवंचनकुशलौ वा युवं युवां समीची परस्परं संगतौ निरमंथतं । अग्निं निरमथ्नीतं । अश्विनावध्वर्यू । ऐ० ब्रा० १.१८. । इति ब्राह्मणोक्तत्वादग्निमंथनमप्यश्विनोरुपपन्नमिति । कदाश्विनौ निर्मथितवंतौ उच्यते । यदा यदा नासत्या नासत्यौ युवां विमदेन मयेळितौ स्तुतौ निरमंथतं निरमथ्नीतं तदानीं युवां परस्परं संगतौ निर्मथितवंतौ स्थ इत्यर्थः ॥

विश्वे देवा अकृपंत समीच्योर्निष्पतंत्योः ।
नासत्यावब्रुवन्देवाः पुनरा वहतादिति ॥५॥
विश्वे । देवाः । अकृपंत । संऽईच्योः । निःऽपतंत्योः ।
नासत्यौ । अब्रुवन् । देवाः । पुनः । आ । वहतात् । इति ॥५॥

हे अश्विनौ युवाभ्यामग्निमंथनकाले प्रेर्यमाणयोः समीच्योः परस्परेण संयुक्तयोररण्योर्निष्पतंत्योर्विस्फुलिंगान्निर्गमयंत्योः सत्योर्विश्वे सर्व इंद्रादयो देवा अकृपंत । युवामब्रुवन् । किंच देवा नासत्यावश्विनौ युवामब्रुवन् । अवोचन् । किमिति । पुनरा वहतादिति । पुनःपुनरीदृशानि जगत्स्थितिहेतुभूतानि कर्माणि युवामाभिमुख्येन स्थित्वावहतं । यद्वा । युवाभ्यामुत्पाद्यमानः पुनश्चायमग्निरस्मदीयानि हवींष्यावहत्विति देवा नासत्यावब्रुवन् ॥

मधुमन्मे परायणं मधुमत्पुनरायनं । ता नो देवा देवतया युवं मधुमतस्कृतं ॥६॥
मधुऽमत् । मे । पराऽअयनं । मधुऽमत् । पुनः । आऽअयनं । ता । नः । देवा । देवतया । युवं । मधुऽमतः । कृतं ॥६॥

हे अश्विनौ मे मदीयं परायणं गृहात्परागमनं मधुमत् । अत्र रसविशेषवाचिना मधुशब्देन तन्नता प्रीतिर्लक्ष्यते । युवयोः प्रसादात्प्रीतियुक्तं भवत्विति शेषः । पुनरायनं गृहं प्रत्यागमनं मधुमत् प्रीतियुक्तं भवतु । अपि च हे देवा देवौ द्योतमानौ तौ युवं युवां नोऽस्माभ्यमधुमतः प्रीतियुक्तान्कृतं । कुरुतं । केनेति उच्यते । देवतया देवत्वेन । अणिमादिदेवतैश्वर्ययोगेनेत्यर्थः ॥ ॥ १० ॥

भद्रमित्येकादशर्चं नवमं सूक्तं । तुह्यादिपरिभाषयेदमप्यास्तारपांक्तं । सोमदेवताकं । ऋषिस्तान्यस्यादिति परिभाषया प्राजापत्य ऐंद्रो वा विमदो वा वासुक्रो वसुक्रद्वर्षिः । तथा चानुक्रांतं । भद्रमेकादश सौम्यमिति ॥ गतो विनियोगः ॥

भद्रं नो अपि वातय मनो दक्षमुत क्रतुं ।
अधा ते सख्ये अंधसो वि वो मदे रणन्गावो न यवसे विवक्षसे ॥ १ ॥
भद्रं । नः । अपि । वातय । मनः । दक्षं । उत । क्रतुं ।
अध । ते । सख्ये । अंधसः । वि । वः । मदे । रणन् । गावः । न । यवसे । विवक्षसे ॥ १ ॥

हे सोम त्वं नोऽस्मदीयं मनो भद्रं कल्याणं वातय । गमय । अस्माकं मनः शुभसंकल्पं कुर्वित्यर्थः । तथा दक्षमुत दक्षमपि ॥ दक्ष वृद्धौ ॥ वृद्धं सर्वव्यापिनमंतरात्मानमपि भद्रं शुभकारित्वलक्षणं प्रापय । अस्माकमंतरात्मानं शुभकारिणं कुर्वित्यर्थः । उतापि च क्रतुं प्रज्ञानं भद्रं शुभाध्यवसायलक्षणं प्रापय । शुभाध्यवसायिनं कुर्वित्यर्थः । अधाथ स्तोतारस्ते तव सख्ये स्तुत्यस्तोतृत्वेज्ययष्टृत्वलक्षणे सखिकर्मणि रणन् । रमंतां । तत्र दृष्टांतः । गावो न यवसे यथा धेनवो घासे रमंते प्रीतिं कुर्वंति तद्वत् । कस्मिन्सति । अंधसः सोमाख्यस्यान्नस्य संबंधिनि वस्तव विमदे विविधसोमजन्यमदनिमित्ते सति । कस्मादेवं । यस्माद्विवक्षसे महान्भवसि ॥

हृदिस्पृशस्त आसते विश्वेषु सोम धामसु ।
अधा कामा इमे मम वि वो मदे वि तिष्ठंते वसूयवो विवक्षसे ॥ २ ॥
हृदिऽस्पृशः । ते । आसते । विश्वेषु । सोम । धामऽसु ।
अध । कामाः । इमे । मम । वि । वः । मदे । वि । तिष्ठंते । वसुऽयवः । विवक्षसे ॥ २ ॥

हे सोम ते तव हृदिस्पृशः स्तुतिभिर्हृदयं स्पृशंत ऋत्विजो विश्वेषु धामसु सर्वेषु स्थानेष्वासते । त्वां स्तुवंतस्तिष्ठंति । अधाथेदृग्भूताः कामा अभिलाषा वि वो मदे तव सोमपानजन्यविविधमदनिमित्ते सति । सोमयागार्थमित्यर्थः । वसूयवो वसुकामा धनमिच्छंतो मम । हृदयादिति शेषः । वि तिष्ठंते । उत्तिष्ठंति । कस्मादेवं । यस्माद्विवक्षसे महान्भवसि ॥

उत व्रतानि सोम ते प्राहं मिनामि पाक्या ।
अधा पितेव सूनवे वि वो मदे मृळा नो अभि चिद्वधाद्विवक्षसे ॥ ३ ॥
उत । व्रतानि । सोम । ते । प्र । अहं । मिनामि । पाक्या ।
अध । पिताऽइव । सूनवे । वि । वः । मदे । मृळ । नः । अभि । चित् । वधात् । विवक्षसे ॥ ३ ॥

उतापि च हे सोम अहं ते तुभ्यं व्रतानि यागादिकर्माणि पाक्या परिपक्वया सर्वार्थदर्शिन्या प्रज्ञया । यद्वा । पाक्येति व्रतविशेषणमेतत् । पाक्यानि परिपक्वानि । परिनिष्ठितानीत्यर्थः । प्र मिनामि । प्रहिणस्मि । प्रकर्षेण करोमीत्यर्थः । अधाथ यागानंतरं वि वो मदे तव विविधे मदे सति नोऽस्मान्मृळ । सुखय । अभि चिद्वधादाभिमुख्येन स्थित्वा शत्र्वादिवधान्नस्मान्पालयेति शेषः । तत्र दृष्टांतः । पितेव सूनवे यथा पिता

पुत्रार्थं सुखयति सर्वस्मात्पुत्रमेव पालयति तद्वत्। यस्मात्सुख्यमानः पाल्यमानश्चाहं युष्मदर्थं पुनःपुनः सोमयागं करोमि तस्मान्मां सुखय पालय चेत्यर्थः। कस्मादेवमुच्यसे। यस्मात्त्वं विवक्षसे महान्भवसि। महांतश्च महान्तःसुखयंति पालयंति चेति यावत्॥

समु प्र यंति धीतयः सर्गासोऽवताँ इव।
क्रतुं नः सोम जीवसे वि वो मदे धारया चमसाँ इव विवक्षसे ॥४॥
सं। ऊं इति। प्र। यंति। धीतयः। सर्गासः। अवतान्ऽइव।
क्रतुं। नः। सोम। जीवसे। वि। वः। मदे। धारय। चमसान्ऽइव। विवक्षसे ॥४॥

हे सोम धीतयो देवतागुणान्द्धति गृह्णंतीति धीतयः सुतयोऽङ्गुलयः समु संभूयैव प्र यंति। प्रकृष्टया गत्या त्वां गच्छंति। तत्र दृष्टांतः। सर्गासोऽवतानिव। विस्रज्यंत उदकपानार्थमिति सर्गा गोसंघाः यंत्रस्था घटसंघा वा। ते यथोदकपानार्थमादानार्थं वावतान्। कूपनामैतत्। कूपान्प्रति गच्छंति तद्वत्। त्वमप्येतज्ज्ञात्वा क्रतुं यागादिकं कर्म प्रज्ञां वा नोऽस्माकं जीवसे चिरंजीवनाय धारय। महतादरेण स्थापय। तत्र दृष्टांतः। चमसानिव यथा यज्ञेषु विमदे विविधसोमजन्यमदे कर्तव्यत्वेन निमित्तभूते सत्यध्वर्युर्हविर्धानि महता यत्नेन चमसान्सोमपात्राणि स्थापयति तद्वत्। कस्मादेवमुच्यसे। यस्मात्त्वं विवक्षसे महान्भवसि। यद्वा। धीतयः। अंगुलिनामैतत्। धयंति पिबंत्याभिरिति धीतयोऽंगुलयः। हे सोम त्वां समु प्र यंति। सहैव प्रकर्षेण त्वां प्राप्नुवंति। किमिव। अवतानिव। जलोद्धरणार्थं विस्रज्यंत इति सर्गा रज्जवः। यथा कूपान्प्रति गच्छंति तद्वत्। ततस्त्वं नोऽस्माकं जीवसे चिरंजीवनाय क्रतुं कर्म धारय। यथा संपूर्णं भवति तथा पूरय। किमिव। यथा चमसान्स्वयं पूरयसि तद्वत्॥

तव त्ये सोम शक्तिभिर्निकामासो व्यृण्विरे।
गृत्सस्य धीरास्तवसो वि वो मदे व्रजं गोमंतमश्विनं विवक्षसे ॥५॥
तव। त्ये। सोम। शक्तिऽभिः। निऽकामासः। वि। ऋण्विरे।
गृत्सस्य। धीराः। तवसः। वि। वः। मदे। व्रजं। गोऽमंतं। अश्विनं। विवक्षसे ॥५॥

निकामासो दृष्टादृष्टफले नियतकामास्ते ते प्रसिद्धा धीरा मेधाविन ऋत्विजः शक्तिभिर्यागादिकर्मभिः सह हे सोम गृत्सस्य मेधाविनस्तवसो महतस्तव व्यृण्विरे। विविधाः स्तुतीर्गमयंति। प्रापयंति। कुर्वंतीत्यर्थः। अतः कारणाद्धि वो मदे तव सोमपानजन्यविविधमदनिमित्तभूते सत्यश्वमं गोमंतं गोसहितमश्विनमश्वसहितं व्रजं गोष्ठं। सामर्थ्यान्मंदुरा लभ्यते। मंदुरां च देहीति शेषः। कस्मादेवमुच्यसे। यस्माद्विवक्षसे महान्भवसि॥ ॥११॥

पप्रुं नः सोम रक्षसि पुरुचा विष्ठितं जगत्।
समाकृणोषि जीवसे वि वो मदे विश्वा संपश्यन्भुवना विवक्षसे ॥६॥
पप्रुं। नः। सोम। रक्षसि। पुरुऽचा। विऽस्थितं। जगत्।
सं ऽआकृणोषि। जीवसे। वि। वः। मदे। विश्वा। सं ऽपश्यन्। भुवना। विवक्षसे ॥६॥

हे सोम त्वं नोऽस्मदीयं पप्रुं देवयागार्थमुपाक्तं रक्षसि। पालयसि। न केवलं पप्रुं किंतु पुरुचा बहुधा विष्ठितं सुरनरतिर्यग्योन्यादिभावेनावस्थितं जगच्च रक्षसि। किंच स त्वं समाकृणोषि। जगतो वृत्तिं सम्यगाकरोषीत्यर्थः। किमर्थं। जीवसे जीवनार्थं। किं कुर्वन्। विश्वा भुवना विश्वानि भुवनानि भूतजातानि संपश्यन्। किमर्थमेतदादिकं सर्वं करोषि उच्यते। वि वो मदे युष्माकं सर्वेषां देवानां विविधहविर्जन्यतृप्त्यर्थं। उक्तं हि।

इतःप्रदानमुत देवा उप जीवंति अमुतःप्रदानं मनुष्या उप जीवंति । तै० सं० ३. २. ९. ७. । इति । अत एव त्वं विवक्षसे । महाम्भवसि । महतामेतत्सर्वमुचितमित्यर्थः ॥

त्वं नः सोम विश्वतो गोपा अदाभ्यो भव ।
सेधा राजन्नप स्रिधो वि वो मदे मा नो दुःशंस ईशता विवक्षसे ॥७॥

त्वं । नः । सोम । विश्वतः । गोपाः । अदाभ्यः । भव ।
सेध । राजन् । अप । स्रिधः । वि । वः । मदे । मा । नः । दुःऽशंसः । ईशत । विवक्षसे ॥७॥

हे सोम अदाभ्यः केनाप्यहिंस्यस्त्वं विश्वतः सर्वतो नोऽस्माकं गोपा रक्षिता भव । अपि च हे राजन्राजमान सोम त्वं स्रिधोऽस्माकमुपक्षपयितॄनप सेध । अस्मत्तोऽपगमय । अपजहि वा । नोऽस्माकं दुःशंसो विद्यमानानामविद्यमानानां कर्मणां शंसिता प्रख्यापयिता मेशत । ईशिता मा भूत् । तव प्रसादादस्माकमपवक्ता कश्चिदपि मा भूदित्यर्थः । किमर्थमेतत्सर्वं प्रार्थ्यते । वि वो मदे तव विविधसोमादिहविर्वन्यतृप्त्यर्थं । अतो विवक्षसे । त्वं महाम्भवसि ॥

त्वं नः सोम सुक्रतुर्वयोधेयाय जागृहि ।
क्षेचवित्तरो मनुषो वि वो मदे द्रुहो नः पाह्यंहसो विवक्षसे ॥८॥

त्वं । नः । सोम । सुऽक्रतुः । वयःऽधेयाय । जागृहि ।
क्षेचवित्ऽतरः । मनुषः । वि । वः । मदे । द्रुहः । नः । पाहि । अंहसः । विवक्षसे ॥८॥

हे सोम सुक्रतुः शोभनप्रज्ञः क्षेचवित्तरः क्षेचस्यातिशयेन लंभकस्त्वं नोऽस्माकं वयोधेयायान्नदानाय जागृहि । किंच द्रुहो द्रोग्धुर्मनुषो मनुष्याच्चोः सकाशान्नोऽस्मान्पाहि । रक्ष । अंहसः पापाच्च नोऽस्मान्पाहि । किमर्थं । वि वो मदे । तव सोमादिहविर्जन्यतृप्त्यर्थमित्यर्थः । विवक्षसे । त्वं महाम्भवसि ॥

त्वं नो वृत्रहंतमेंद्रस्येंदो शिवः सखा ।
यत्सीं हवंते समिथे वि वो मदे युध्यमानास्तोकसातौ विवक्षसे ॥९॥

त्वं । नः । वृत्रहन्ऽतम । इंद्रस्य । इंदो इति । शिवः । सखा ।
यत् । सीं । हवंते । सं ऽइथे । वि । वः । मदे । युध्यमानाः । तोकऽसातौ । विवक्षसे ॥९॥

हे वृत्रहंतम शत्रूणामतिशयेन हंतर्हे इंदो हे सोम यस्त्वमिंद्रस्य शिवः सुखकरः सखा मित्रभूतोऽसि स त्वं नोऽस्मान्पाहीति शेषः । कदेति उच्यते । तोकसातौ । तोक इत्यपत्यनाम ॥ सातिः । षणु दान इत्यस्माद्धातोः रूपं ॥ दीयतेऽस्मिन्नपत्यमिति तोकसातिः संग्रामविशेषणं । तस्मिन् । अतिमहतीत्यर्थः । समिथे संग्रामे युध्यमाना युद्धं कुर्वाणाः शत्रुजनाः सीं सर्वतो यदा हवंते युद्धार्थमस्मानाह्वयंति । तदास्माकं रक्षिता भवेत्यर्थः । कस्मिन्निमित्ते । वि वो मदे तव विविधहविर्वन्यहर्षनिमित्ते । विवक्षसे । त्वं महान्भवसि । महतां हि पालनं युक्तमेवेति ॥

अयं घ स तुरो मद इंद्रस्य वर्धत प्रियः ।
अयं कक्षीवतो महो वि वो मदे मतिं विप्रस्य वर्धयद्विवक्षसे ॥१०॥

अयं । घ । सः । तुरः । मदः । इंद्रस्य । वर्धत । प्रियः ।
अयं । कक्षीवतः । महः । वि । वः । मदे । मतिं । विप्रस्य । वर्धयत् । विवक्षसे ॥१०॥

अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने । इममपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ॥ १० ॥

अयं । वेनः । चोदयत् । पृश्निऽगर्भाः । ज्योतिः । जरायु । रजसः । विऽमाने । इमम् । अपाम् । संऽगमे । सूर्यस्य । शिशुम् । न । विप्राः । मतिऽभिः । रिहन्ति ॥ १० ॥

अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने । इममपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ॥ १० ॥

अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने । इममपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ॥ १० ॥

अयं वेनः । अयं वेनः । चोदयत् । पृश्निऽगर्भाः । ज्योतिः । जरायु । रजसः । विऽमाने । इमम् । अपाम् । संऽगमे । सूर्यस्य । शिशुम् । न । विप्राः । मतिऽभिः ।

य उक्तगुणः स पूषा सुष्टुतीनां शोभनस्तोत्राणां । स्वरूपमिति शेषः । वेद । जानाति । अपि चेंदुर्न सोम इव तथायं पूषा वृषा कामानां वर्षिता भवति । प्सुरो रूपवान् स अभ्यक्तानभिलक्ष्य प्रुषायति । सिंचति । तथा नोऽस्माकं व्रजं गोष्ठं चा प्रुषायति । आभिमुख्येन सिंचति । अस्मभ्यं हिरण्यपश्वादिकं ददातीत्यर्थः ॥

मंसीमहि त्वा वयमस्माकँ देव पूषन् । मतीनां च साधनं विप्राणां चाधवं ॥४॥
मंसीमहि । त्वा । वयं । अस्माकँ । देव । पूषन् । मतीनां । च । साधनं । विप्राणां । च । आऽधवं ॥४॥

हे देव द्योतमान पूषन् वयं स्तोतारस्त्वा त्वां मंसीमहि । स्तुमः । कीदृशं । अस्माकमस्मदीयानां मतीनां चाभिलषितानां च साधनं साधयितारं विप्राणां च मेधाविनामप्याधवं परिचर्यादेरेव कंपयितारं ॥

प्रत्यर्धिर्यज्ञानामश्वहयो रथानां । ऋषिः स यो मनुर्हितो विप्रस्य यावयत्सखः ॥५॥
प्रतिऽऋधिः । यज्ञानां । अश्वऽहयः । रथानां । ऋषिः । सः । यः । मनुःऽहितः । विप्रस्य । यवयत्ऽसखः ॥५॥

ऋषिः सर्वस्य द्रष्टा स पूषा यज्ञानां प्रत्यर्धिरर्धभाग्यथानामश्वहयः । हयतिर्गतिकर्मा । रथानां संबंधिभिरश्वैर्गमनशीलो भवति । अश्वयुक्तेन रथेन सदा गंतेत्यर्थः । मनुर्हितो मनुष्यहितो यो विप्रस्य मेधाविनः स्तोतुर्यावयत्सखः शत्रूणां पृथक्कर्ता सखा भवति स इति पूर्वेण संबंधः ॥ ॥१३॥

आधीषमाणाया पतिः शुचायाश्च शुचस्य च ।
वासोवायोऽवीनामा वासाँसि मर्मृजत् ॥६॥
आऽधीषमाणायाः । पतिः । शुचायाः । च । शुचस्य । च ।
वासःऽवायः । अवीनां । आ । वासाँसि । मर्मृजत् ॥६॥

आधीषमाणाया आत्मार्थं धीयमानायाः शुचायाश्च दीप्ताया अजायाश्च पतिः स्वामी । न केवलं स्त्रीमात्रस्य किंतु शुचस्य दीप्तस्य पुंपशोश्च पतिरित्यर्थः । एवंभूतः पूषा देवोऽवीनामुरणानां संबंधिभी रोमभिर्वासोवायो दशापविचादीनि वस्त्राणि प्रेरयन् वासांसि रजकशोध्यानि तानि वस्त्राण्या मर्मृजत् । आ समंतात्प्रकाशोष्णाभ्यां शोधयन्भवति ॥

इनो वाजानां पतिरिनः पुष्टीनां सखा ।
प्र श्मश्रु हर्यतो दूधोदि वृथा यो अदाभ्यः ॥७॥
इनः । वाजानां । पतिः । इनः । पुष्टीनां । सखा ।
प्र । श्मश्रु । हर्यतः । दूधोत् । वि । वृथा । यः । अदाभ्यः ॥७॥

इन ईश्वरः पूषा वाजानां हविरादीनां सर्वेषामन्नानां पतिः स्वामीनः प्रभुः पुष्टीनां सर्वेषां प्राणिनां स्वभूतानां पोषणानां करणे सखा मित्रभूतः । सर्वस्योपकारित्वात् । किंच हर्यतः कामयमानस्य यजमानस्य स्वभूतं सोमं पिबन्निति शेषः । श्मश्रु श्मश्रूणि वृथानायासेनाप्रयत्नेन प्र व्यदूधोत् प्रकर्षेण विविधं कंपयति यः पूषादाभ्यः शत्रुभिरहिंस्यः स इति पूर्वेण संबंधः ॥

आ ते रथस्य पूषन्नजा धुरं ववृत्युः । विश्वस्यार्थिनः सखा सनोजा अनपच्युतः ॥८॥
आ । ते । रथस्य । पूषन् । अजाः । धुरं । ववृत्युः । विश्वस्य । अर्थिनः । सखा ।
सनःऽजाः । अनपऽच्युतः ॥८॥

हे पूषन्देव ते त्वदीयस्य रथस्य धुरमजा वाहनत्वेना ववृत्युः । आवर्तयंति । आवहंतीत्यर्थः । यस्त्वं विश्वस्य सर्वस्यार्थिनो याचकस्याभिलषितार्थप्रदातृत्वात्सखिभूतः सनोजास्थिरं जातोऽनपच्युतः स्वाधिकारादनपगतः तस्य ते रथमिति संबंधः ॥

अस्माकमूर्जा रथं पूषा अविष्टु माहिनः । भुवद्वाजानां वृध इमं नः शृणवद्धवं ॥९॥
अस्माकं । ऊर्जा । रथं । पूषा । अविष्टु । माहिनः । भुवत् । वाजानां । वृधः । इमं ।
नः । शृणवत् । हवं ॥९॥

माहिनो महान्पूषास्माकं स्वभूतं रथमूर्जा बलेनान्नेन वाविष्टु । अवतु । रक्षतु । किंच वाजानामन्नानां वृधो वर्धको भुवत् । भवतु । नोऽस्मदीयमिममीदृग्भूतं हवमाह्वानं शृणवत् । शृणोतु ॥ ॥१४॥

असत्सु म इति चतुर्विंशत्यृचमेकादशं सूक्तं । इंद्रपुचस्य वसुक्रस्यार्षं त्रैष्टुभमैंद्रं । तथा चानुक्रांतं । असत्सु चतुर्विंशतिरैंद्रो वसुक्र इति ॥ महाव्रते मरुत्वतीयशस्त्र एतत्सूक्तं । तथैव पंचमारण्यके सूचितं च । असत्सु मे जरितः साभिवेगः पिबा सोममभि यमुग्र तर्दः । ऐ० आ० ५. १. १. । इति ॥

असत्सु मे जरितः साभिवेगो यत्सुन्वते यजमानाय शिक्षं ।
अनाशीर्दामहमस्मि प्रहंता सत्यध्वृतं वृजिनायंतमाभुं ॥१॥
असत् । सु । मे । जरितरिति । सः । अभिऽवेगः । यत् । सुन्वते । यजमानाय । शिक्षं ।
अनाशीःऽदां । अहं । अस्मि । प्रऽहंता । सत्यऽध्वृतं । वृजिनऽयंतं । आभुं ॥१॥

वासुक्रेषु सूक्तेषु वाजश्चैमेंद्रः सूयते । इदानीमिंद्रो वसुक्रं स्तोतुमुद्यतं पुत्रं संबोध्य स्वसामर्थ्यं कथयति येन विज्ञातदेवतारूपः सन् सुखेन स्तोष्यतीति । यद्वा । कार्यकारणयोरैक्योपचारादात्मा वै पुत्रनामासीति वचनादिंद्ररूपेणावस्थितो वसुक्र आत्मानं स्तौति । क्वचित्क्वचिदिंद्रं चेति । हे जरितः स्तोतः मे मम सु शोभनः स तादृशोऽभिवेगोऽभिगमनं मनसो वृत्तिविशेषोऽसत् । अस्ति । विद्यते । यद्येनाभिवेगेन सुन्वते मदर्थं सोमाभिषवं कुर्वते यजमानाय यज्वने शिक्षं अभिलषितमर्थं ददामि । किंचाहमनाशीर्दा । आशीरन्यत्र प्रार्थना इह तु सामर्थ्यात्प्रार्थितं हविरुच्यते । तन्नास्यमददतं जनं । यद्वा । आशीरिति सोमाश्रयणं दध्युच्यते । तस्यादातारं । असोमयाजिनमित्यर्थः । प्रहंतास्मि । प्रकर्षेण हिंसिता भवामि । कीदृशं । सत्यध्वृतं सत्यस्य हिंसकं । अनृतवादिनं चेत्यर्थः । वृजिनायंतं पापं कर्तुमिच्छंतमाभुं व्याप्नुवंतं ॥

यदीदहं युधये संनयान्यदेवयून्त्वा३ शूशुजानान् ।
अमा ते तुभ्यं वृषभं पचानि तीव्रं सुतं पंचदशं नि षिंचं ॥२॥
यदि । इत् । अहं । युधये । संऽनयानि । अदेवऽयून् । तन्वा । शूशुजानान् ।
अमा । ते । तुभ्यं । वृषभं । पचानि । तीव्रं । सुतं । पंचऽदशं । नि । सिंचं ॥२॥

यदीयदाहमेव युधये युद्धार्थमदेवयून् देवान्यष्टुमनिच्छतोऽयज्वनः संनयानि संगमयामि । कीदृशान् । तन्वा स्वशरीरेण शूशुजानानात्मंभरित्वात्पुष्टिलक्षणया दीप्त्या युक्तान् । पुष्टानित्यर्थः । तदा हे इंद्र अहमम-

लिंगादिभिः सहितस्ते तुभ्यं तुभ्यं प्रेरकं बलिनं । पीवानमित्यर्थः । वृषभं सेचनसमर्थं पुंपशुं पचामि । किंच तीव्रं मद्करररसं सुतमभिषुतं पंचदशं । प्रतिपत्प्रभृतिपंचदशसंख्याकासु तिथिषु शुक्लपक्ष एकोत्तरवृद्ध्या पर्णानि आयंते । कृष्णपक्षे तु तद्वन्निहीयंते । एवंभूतत्वात्पंचदशः सोम उच्यते । तं । यद्वा । चिवृत्पंचदशस्तोमोपेतं माध्यंदिनसवनकमित्यर्थः । नि षिंचं । दशापवित्रे द्रोणकलशे चमसपात्रेऽग्नौ वा सिंचामि । प्रक्षिपामीत्यर्थः ॥

नाहं तं वेद य इति ब्रवीत्यदेवयून्त्समरणे जघन्वान् ।
यदावाख्यात्समरणमृघावदादिद्धं मे वृषभा प्र ब्रुवंति ॥३॥
न । अहं । तं । वेद । यः । इति । ब्रवीति । अदेवऽयून् । सऽअरणे । जघन्वान् ।
यदा । अवऽअख्यत् । सऽअरणं । ऋघावत् । आत् । इत् । ह । मे । वृषभा । प्र । ब्रुवंति ॥३॥

यो जनोऽदेवयून् देवानकामयमानान्देवद्विषो राक्षसादीन्समरणे संग्रामे जघन्वान् अहं हतवानिति ब्रवीति वदति तं तादृशं मद्व्यतिरिक्तं जनमहं न वेद । न जानामि । मत्तोऽन्यः संग्रामे शत्रूणां हंता नास्तीत्यर्थः । किंच यदा यस्मिन्काले समरणं संग्राममवाख्यत् अवाक्षीत् व्यक्तमहं पश्यामि । कीदृशं । ऋघावदृघावंतं परस्परं हिंसायुक्तं । अत्यंतक्रूरमित्यर्थः । आत्तदानीं मे मम स्वभूतानि वृषभा वृषभकर्माणि दर्पितवृषभस्येव विक्रांतकर्माणि प्र ब्रुवंति । विद्वज्जना इति शेषः । इद्वेतीमौ पदपूरणौ ॥

यदज्ञातेषु वृजनेष्वासं विश्वे सतो मघवानो म आसन् ।
जिनामि वेत्क्षेम आ संतमाभुं प्र तं क्षिणां पर्वते पादगृह्य ॥४॥
यत् । अज्ञातेषु । वृजनेषु । आसं । विश्वे । सतः । मघऽवानः । मे । आसन् ।
जिनामि । वा । इत् । क्षेमे । आ । संतं । आभुं । प्र । तं । क्षिणां । पर्वते । पादऽगृह्य ॥४॥

यद्यदाज्ञातेषु शरीरवस्त्रास्त्रबलादिभिरपरिज्ञातेषु वृजनेषु संग्रामेष्वासं अहं युद्धार्थमुपविशामि तदा विश्वे सर्वे मघवानो हविर्लक्षणतपोलक्षणधनवंत ऋषयः सत एवं वर्तमानस्य मे ममेंद्रस्य समीप आसन् । उपविशंति । मम वीर्यवृद्ध्यर्थं मां स्तुवंतस्तिष्ठंतीत्यर्थः । अपि च क्षेमे जगत्पालने निमित्त आ संतं । आकारोऽभीत्यस्यार्थे वर्तते । सर्वमभिभवंतमाभुं महांतं शत्रुं जिनामि वा । विनाशयाम्येव । नाच विनाशे संशयः । इदिति पूरणः । तं महांतं शत्रुं पादगृह्य पादौ गृहीत्वा पर्वते गिरौ प्र क्षिणां । प्रहिनस्मि । प्रक्षिपामि ॥

न वा उ मां वृजने वारयंते न पर्वतासो यदहं मनस्ये ।
मम स्वनात्क्रुधुकर्णो भयात एवेदनु द्यून्किरणः समेजात् ॥५॥
न । वै । ऊं इति । मां । वृजने । वारयंते । न । पर्वतासः । यत् । अहं । मनस्ये ।
मम । स्वनात् । क्रुधुऽकर्णः । भयाते । एव । इत् । अनु । द्यून् । किरणः । सं । एजात् ॥५॥

वै उ इत्येवैव । वृजने संग्रामे मां युद्धार्थमुपस्थितं संतं न वारयंते । केचिन्निवारयितुं समर्था न भवंति । अहं यत्कर्म मनस्ये मनसा कर्तुमिच्छामि पर्वतासोऽवितरणक्षमा हिमवदादयो गिरयस्तत्कर्म मनसा प्रोढुं न शक्नुवंतीत्यर्थः । किंच ममेंद्रस्य स्वनाच्छब्दादेव क्रुधुकर्णो नामासुरः यद्वा क्रुधुकर्णो ह्रस्वकर्णो मंदश्रवणेंद्रियो बधिरः स्थावरपिपीलिकादिरपि भयाते । बिभेति । अपि चैवेदेवमेव क्रुधुकर्णवदशु द्यून् । प्रतिदिनमित्यर्थः । किरणः । अंतर्णीतमत्वर्थमेतत् । किरणवान्रश्मिमानादित्यः समेजात् । सम्यगेकपथे । चलति । नियमेन प्रयातीत्यर्थः ॥ ॥१५॥

दर्शन्वचं भृतपाँ अनिंद्रान्बाहुक्षदः शरवे पत्यमानान् ।
घृषुं वा ये निनिदुः सखायमध्यू न्वेषु पवयो ववृत्युः ॥ ६॥
दर्शन्। नु। अचं। भृतऽपान्। अनिंद्रान्। बाहुऽक्षदः। शरवे। पत्यमानान्।
घृषुं। वा। ये। निनिदुः। सखायं। अधि। ऊं इति। नु। एषु। पवयः। ववृत्युः ॥ ६॥

अवास्मिञ्जगति भृतपाञ्कृतानि पक्वानि सोमादिहवींष्यपहृत्य पिबतोऽनिंद्रानिंद्रेण मया वर्जितान् बाहुवदो बाहुभिर्यजमानाञ्शत्रूनलीकुर्वतः शरवे हिंसार्थं पत्यमानानभिपततोऽसुरादीन्नु क्षिप्रं दर्शन्। अहमिंद्रः पश्यामि। एवंभूतेष्वेष्वधुपरि पवयो मदीयान्यायुधानि ववृत्युः। वर्तते। वाशब्दः समुच्चये। घृषुं महांतं च सखायं सखिवत्प्रियं हितस्य कर्तारं मां ये निनिदुः निंदंति। उ इति समुच्चये। एषु चोपरि मदीयान्यायुधानि क्षिप्रं वर्तंते ॥

अभूर्वीक्षीर्व्यु१ आयुरानड्दर्षन्नु पूर्वो अपरो नु दर्षत्।
द्वे पवस्ते परि तं न भूतो यो अस्य पारे रजसो विवेष ॥ ७॥
अभूः। ऊं इति। औक्षीः। वि। ऊं इति। आयुः। आनट्। दर्षत्। नु। पूर्वः। अपरः।
नु। दर्षत्।
द्वे इति। पवस्ते इति। परि। तं। न। भूतः। यः। अस्य। पारे। रजसः। विवेष ॥ ७॥

अत्र मध्यमपुरुषत्वेनेंद्रस्योच्यमानत्वादुक्त इंद्रं स्तौति। उ इत्यवधारणे। हे इंद्र अभूः। त्वमेव प्रादुर्भवसि। औक्षीः। काले काले त्वमेव पृथिवीं सिंचसि। नान्य इत्यर्थः। आनडित्यादौ सर्वत्र परोक्षनिर्देशे प्रत्यक्षीकरणार्थं मध्यमपुरुषेण प्रक्रांतत्वादेकवाक्यतायै युष्मच्छब्दसमानार्थौ भवच्छब्दोऽध्याहर्तव्यः। वि इति वैविध्ये। उ इति चार्थे। आयुर्जीवितमुच्यते। इंद्रो भवान्विविधमायुश्चानट्। व्याप्नोति। आ भूतसंप्लवाज्जीवतीत्यर्थः। किंच पूर्वः पुरातनो भवानिंद्रो नु क्षिप्रं दर्षत्॥ दृ विदारणे। सिच्लुङि लेटि॥ वज्रेण शत्रून्विदारयति। अपरोऽन्यः शत्रुर्नु दर्षत्। नु इति निषेधार्थे। भवंतमिंद्रं न विदारयति। भवानेव सर्वं शत्रुजातं हिनस्तीत्यर्थः। अपि च यो भवानिंद्रोऽस्येदृशस्य रजसो लोकस्य। त्रैलोक्यस्येत्यर्थः। पारे परतः। परमसूक्ष्मवायुरूपेण सृष्टिकारणात्मना स्थितेति शेषः। विवेष सर्वतो व्याप्नोति तं भवंतमिंद्रं द्वे इति सामर्थ्याद्द्यावापृथिव्यौ न परि भूतः। न परिभवतः। अभिभवितुं न शक्नुत इत्यर्थः। कीदृश्यौ। पवस्ते॥ पवतिर्गतिकर्मा। अस्मादौणादिको ऽस्तप्रत्ययः। अतोऽजाद्यतष्टाप्। पा० ४. १. ४.। इति टापि कृते प्रथमाद्विवचने चैतद्रूपं भवति॥ महत्त्वेन सर्वस्याभिभवनाय गच्छंत्यौ॥

गावो यवं प्रयुता अर्यो अक्षन्ना अपश्यं सहगोपाश्चरंतीः।
हवा इदर्यो अभितः समायन्किर्यदासु स्वपतिश्छंदयाते ॥ ८॥
गावः। यवं। प्रऽयुताः। अर्यः। अक्षन्। ताः। अपश्यं। सहऽगोपाः। चरंतीः।
हवाः। इत्। अर्यः। अभितः। सं। आयन्। किर्यत्। आसु। स्वऽपतिः। छंदयाते ॥ ८॥

गावो धेनवः प्रयुताः प्रकर्षेण मिश्रिताः परस्परेण सह भूता यवं मदृष्टिजनितयवादिघासमक्षन्। अदंति। भक्षयंति। अर्यः सर्वस्य स्वाम्यहं ता गा अपश्यं। पश्यामि। कीदृशीः। सहगोपाः पशुपालकेन सहिताश्चरंतीर्घासं भक्षयंतीः। एवंभूताश्चाहं परया प्रीत्या पश्यामीत्यर्थः। किंच हवा वाहनदोहनार्थमाह्वानार्हा गावो अर्यः। द्वितीयार्थे प्रथमा। अर्यं स्वामिनं प्रत्यभितः सर्वतः समायन्। समित्येकीभावे।

एकीभूयागच्छंति । इदिति पूरणः । आगतास्वासु गोषु स्वपतिः स्वासां गवां स्वामी क्षियत्क्षीरं क्षदयति । दोग्धुं कामयते । मदर्थं दोग्धीत्यर्थः । गाव आशिरं दुदुह्रे । ऋ० ८. ६९. ६. । इति वचनात् ॥

सं यद्वयं यवसादो जनानामहं यवाद उर्वज्रे अंतः ।
अचा युक्तोऽवसातारमिच्छादथो अयुक्तं युनजद्ववन्वान् ॥९॥
सं । यत् । वयं । यवसऽअदः । जनानां । अहं । यवऽअदः । उरुऽअजे । अंतरिति । अच । युक्तः । अवऽसातारं । इच्छात् । अथो इति । अयुक्तं । युनजत् । ववन्वान् ॥९॥

अचेदु मे मंससे सत्यमुक्तं द्विपाच्च यच्चतुष्पात्संसृजानि ।
स्त्रीभिर्यो अच वृषणं पृतन्यादयुद्धो अस्य वि भजानि वेदः ॥१०॥
अच । इत् । ऊं इति । मे । मंससे । सत्यं । उक्तं । द्विऽपात् । च । यत् । चतुःऽपात् । सं ऽसृजानि । स्त्रीभिः । यः । अच । वृषणं । पृतन्यात् । अयुद्धः । अस्य । वि । भजानि । वेदः ॥१०॥

मे ममाचाक्षिण्वोच उक्तं मया कथितं सत्यमित्यथाभूतमेव मंससे । त्वं जानीहि । अर्थवादरूपेण नैतद्ध्यारोपितगुणमित्यर्थः । उ इति पूरणः । किंच द्विपाच्च मनुष्यादिकं च चतुष्पाच्च पश्वादिकं च यत्स्थावरजंगमात्मकं जगत्संसृजानि । अहमुत्पादयामीति । अचाक्षिञ्जगति स्त्रीभिः स्त्रीसदृशैर्बलादिहीनैः पुरुषैः सह यः शूरंमन्यो जनो वृषणमभिलषितस्य वर्षितारं मां । परित्यज्येति शेषः । पृतन्यात् युद्धं कर्तुमिच्छति अहमस्त्रीसदृशस्य स्वभूतं वेदो धनमयुद्धस्तेन पुरुषेणायोद्धा सन् बलादपहृत्य वि भजानि । स्तोतृभ्यो यष्टृभ्यश्च ददामीत्यर्थः ॥ ॥१६॥

यस्यानक्षा दुहिता जात्वास कस्तां विद्वाँ अभि मन्याते अंधां ।
कतरो मेनिं प्रति तं मुचाते य ईं वहाते य ईं वा वरेयात् ॥११॥
यस्य । अनक्षा । दुहिता । जातु । आस । कः । तां । विद्वान् । अभि । मन्याते । अंधां । कतरः । मेनिं । प्रति । तं । मुचाते । यः । ईं । वहाते । यः । ईं । वा । वरेऽयात् ॥११॥

यस्येंद्रस्य मम कारणरूपेणावस्थितस्यानक्षाचिवर्जिता दर्शनहीना । अचेतनेत्यर्थः । दुहिता प्रकृत्याख्या जातु कदाचिदास ॥ असतेर्गत्यर्थस्य लिटि रूपं ॥ सामर्थ्यान्महाप्रलये मय्येव लीना सती सर्वत्र वर्तते तां प्रकृतिं विद्वान् मय्येव लीनां जानन् मत्तोऽन्यो देवः को भवति । न कोऽपीत्यर्थः । अपि चांधां दर्शनहीनामचेतनां तामभि मन्याते । आत्मन्याश्रयप्रदानेन को देवोऽभिपूजयति । यद्वा । क्षीरोदकवत् घटाकाशवच्च मया सहैकीभूतां तामाभिमुख्येन को जानाति । अहमेव सर्वज्ञः स्वात्मन्याश्रयप्रदानेनाभिपूजयामि । मया सहैकीभूतां तां तत्त्वतोऽहमेव जानामि । नान्य इति । किंच कतरो देवो मेनिं वज्रं तं प्रसिद्धं वृत्रादिशत्रुं प्रति मुचाते । मुंचति । स्वयमेव प्रक्षमुत्पाट्येदानीं प्रतिक्षिपति । यो देव ईमेनं शत्रुं वहाते वहति । अपि वा य ईमेनं वरेयात् वरयितुमिच्छति । स चाहमेव नान्यो मत्सदृशोऽस्तीत्यर्थः ॥

कियती योषा मर्यतो वधूयोः परिप्रीता पन्यसा वार्येण ।
भद्रा वधूर्भवति यत्सुपेशाः स्वयं सा मित्रं वनुते जने चित् ॥१२॥
कियती । योषा । मर्यतः । वधूऽयोः । परिऽप्रीता । पन्यसा । वार्येण । भद्रा । वधूः । भवति । यत् । सुऽपेशाः । स्वयं । सा । मित्रं । वनुते । जने । चित् ॥१२॥

कियती किंपरिमाणा योषा स्त्रीजातिर्मर्यतो मनुष्यसंबंधिनो भोगानाचरतो वधूयोः स्त्रीकामस्य सर्वात्मकस्यांतर्यामिरूपेणावस्थितस्येंद्रस्य परिप्रीता । अनुरक्ता । वशवर्तिनीत्यर्थः । कीदृशस्य । वार्येण वरणीयेन पत्यसा सोचेण सुतस्य सत इति शेषः । अपि च यदा वधूर्भद्रा कल्याणी सुपेशाः शोभनरूपा च भवति सा द्रौपदीदमयंत्यादिका वधूः स्वयमात्मनैव अग्ने चित्रजनमध्येऽवस्थितमिति मित्रं प्रियमर्जुननलादिकं पतिं वनुते । याचते । स्वयंवरधर्मेण प्रार्थयते । स च प्रीयमाणो वरजनोऽहमेवेत्यभिप्रायः । रूपंरूपं प्रतिरूपो बभूव । ऋ० ६. ४७. १८. । इति मंत्रलिंगात्सर्वात्मकत्वादिति ॥

पत्तो जगार प्रत्यंचमत्ति शीर्ष्णा शिरः प्रति दधौ वरूथं ।
आसीन ऊर्ध्वामुपसि क्षिणाति न्यङ्ङुत्तानामन्वेति भूमिं ॥१३॥
पत्तः । जगार । प्रत्यंचं । अत्ति । शीर्ष्णा । शिरः । प्रति । दधौ । वरूथं ।
आसीनः । ऊर्ध्वा । उपसि । क्षिणाति । न्यङ् । उत्तानां । अनु । एति । भूमिं ॥१३॥

अचादित्यात्मनेंद्रः स्तूयते तदंशत्वात् । आदित्यरूपेंद्रः पत्तो रश्म्याख्यैः पादैर्जगार । वृष्टिलक्षणमुदकं गिरति गृह्णाति वा । गृहीत्वा च प्रत्यंचमात्मानं प्रतिगतमुदकमत्ति । भक्षयति । मंडलेऽवस्थापयतीत्यर्थः । तदनंतरं वरूथं वरणीयं वृष्टिलक्षणमुदकं शीर्ष्णा शिरःस्थानीयेन रश्मिजालेन शिरः सर्वस्य लोकस्य मस्तकं प्रति दधौ । दधाति । प्रतिक्षिपतीत्यर्थः । किंचोपस्युपस्थे स्वसमीपस्थाने मंडल आसीन उपविष्टः सन्नूर्ध्वा-सुप्तनां स्वदीप्तिं क्षिणाति । हिनस्ति । आलोककरणाय प्रक्षिपतीत्यर्थः । न्यङ् रश्मिसमूहरूपेण नीचैरंचिता गंता सत्तुत्तानां विस्तृतां भूमिमन्वेति । अनुगच्छति ॥

बृहन्नच्छायो अपलाशो अर्वा तस्थौ माता विषितो अत्ति गर्भः ।
अन्यस्या वत्सं रिहती मिमाय कया भुवा नि दधे धेनुरूधः ॥१४॥
बृहन् । अच्छायः । अपलाशः । अर्वा । तस्थौ । माता । विऽसितः । अत्ति । गर्भः ।
अन्यस्याः । वत्सं । रिहती । मिमाय । कया । भुवा । नि । दधे । धेनुः । ऊधः ॥१४॥

वसुक्रोऽनयादित्यात्मानमिंद्रं स्तौति । बृहन्महानादित्योऽच्छायश्छायावर्जितः । तमोरहित इत्यर्थः । अपलाशः पर्णरहितः पराशदनवर्जितः । विनाशरहित इत्यर्थः । अर्वा सततगामी तस्थौ । तिष्ठति । किंच माता वृष्टिप्रदानद्वारेण सर्वस्य जगतो निर्माता विषितो विमुक्तः । निरालंबन इत्यर्थः । गर्भस्त्रैलोक्यस्य गर्भभूत आदित्यात्मेंद्रोऽत्ति । हवींषि भक्षयति । यद्वा । अग्नेन विनाशनं लक्ष्यते । पापानि नाशयति । किंचान्यस्या अदित्याख्याया देवमातुर्वत्समपत्यभूतमादित्यं रिहत्यास्वादयंत्युपजीवंती वर्धयंती मिमाय । निर्मिमीते । पूर्वस्यां दिश्यहन्यहन्युत्पादयतीत्यर्थः । कया भुवा केन भावेनाभिप्रायेण । भक्त्या भयेन वेत्यर्थः । धेनुर्गौरुदक-स्याधारत्वात् चरितृत्वाच्चोधःस्थानीयमादित्यं नि दधे । स्थापयति । यद्वा । धेनुर्गौरूधो यथा तद्वदादित्यं धौर्धारयति ॥

सप्त वीरासो अधरादुदायन्नष्टोत्तरात्तात्समजग्मिरन्ते ।
नवं पश्चातास्थिविमंत आयन्दश प्राक्सानु वि तिरंत्यभ्रः ॥१५॥
सप्त । वीरासः । अधरात् । उत् । आयन् । अष्ट । उत्तरात्तात् । सं । अजग्मिरन् । ते ।
नवं । पश्चातात् । स्थिविऽमंतः । आयन् । दश । प्राक् । सानु । वि । तिरंति । अभ्रः ॥१५॥

अग्नेयेंद्रः प्रजापतिरूपेण स्तूयते । सप्त सप्तसंख्याका वीरासः प्रजापतेः पुत्रा विश्वामित्रादयोऽधरात्प्रजा-

पतेरधःकायादुदायन् । उत्पन्ना बभूवुः । अष्टाष्टसंख्याकाश्चे प्रसिद्धा वालखिल्याद्य उत्तरात्तादुत्तरात्का-यप्रदेशात्समजग्मिरन् । संजग्मिरे । स्थविमंतः स्थानवंतो नव नवसंख्याकाः भृगवः पश्चात्तात्पृष्ठत आयन् । आगताः । उत्पन्ना इत्यर्थः । तथा दश दशसंख्याका अंगिरसः प्रागग्रत उत्पन्नाः संतोऽग्नेऽग्नवतो बुध्नोकस्य सानुन्नतप्रदेशं वि तिरंति । वर्धयंति ॥ अपर आह । सप्तसंख्योपेता वीरा मरुतोऽधरादिंद्रस्य दक्षिणभागा-दुदगमन् । अष्टसंख्याकाश्चे मरुत उत्तरभागात्संगच्छंते । स्थानवंतो नवसंख्याकाश्चे मरुतः पृष्ठभागादागच्छंति । दशसंख्याकाश्चेऽग्नेऽग्नवत इंद्रस्य प्राक्प्रदेशे स्थिताः समुच्छ्रितमुदकं तेजो वा वि तिरंति । मरुतः प्रतिदि-ग्रमवस्थायेंद्रस्य साहाय्यं कुर्वंतीत्यर्थः ॥ ॥ १७ ॥

दशानामेकं कपिलं समानं तं हिन्वंति क्रतवे पार्याय ।
गर्भे माता सुधितं वक्षणास्ववेनंतं तुषयंती बिभर्ति ॥ १६ ॥
दशानां । एकं । कपिलं । समानं । तं । हिन्वंति । क्रतवे । पार्याय ।
गर्भे । माता । सुऽधितं । वक्षणासु । अवेनंतं । तुषयंती । बिभर्ति ॥ १६ ॥

दशानां दशसंख्याकानां पूर्वोक्तानामेवांगिरसां मध्य एकं मुख्यं कपिलमेतन्नामानं तं प्रसिद्धमृषिं । कीदृशं । समानं सदृशं । केन । सामर्थ्यात्प्रजापतिना । हिन्वंति । अवशिष्टा अंगिरसः प्रेरयंति । किमर्थं । क्रतवे यज्ञा-दिजगत्प्रवर्तनकर्मणे । यद्वा । सम्यग्ज्ञानलक्षणप्रज्ञानाय । कीदृशाय । पार्याय परिसमापयितव्याय । प्रणेत-व्याय वा । यज्ञादिकर्मोपदेशनायेत्यर्थः । माता प्रकृत्याख्या च वक्षणासु । वक्षणा इति नद्य उच्यंते । ताभि-श्चापो लक्ष्यंते । प्रकृतिस्थासु सूक्ष्मास्वप्सु सुधितं सुहितं । प्रजापतिना स्थापितमित्यर्थः । अवेनंतं । वेनतिः कांतिकर्मा । तत्र निवासमकामयमानं तादृशं प्रजापतेर्गर्भं तुषयंती तुष्यंती सम्यग्ज्ञानादुपदेष्टुं योग्योऽयमिति प्रीता सती बिभर्ति । प्रजापतेर्नियोगाद्धारयति ॥

पीवानं मेषमपचंत वीरा न्युप्ता अक्षा अनु दीव आसन् ।
द्वा धनुं बृहतीमप्स्वंतः पविचवंता चरतः पुनंता ॥ १७ ॥
पीवानं । मेषं । अपचंत । वीराः । निऽउप्ताः । अक्षाः । अनु । दीवे । आसन् ।
द्वा । धनुं । बृहतीं । अप्ऽसु । अंतरिति । पविचऽवंता । चरतः । पुनंता ॥ १७ ॥

वीराः प्रजापतेः पुत्रा अंगिरसः पीवानं स्थूलं । मेदोमांसादियुक्तमित्यर्थः । मेषमजमपचंत । प्रजापति-रूपस्येंद्रस्यार्थाय पक्तवंतोऽभवन् । पशुयागं कुर्वंत इत्यर्थः । किंच । न्युप्तोपममेतत् । यथा देवानामद्य दीवि देवने रमणस्थाने न्युप्ता निक्षिप्ताः संतोऽन्वासन् संक्रीडमानयोर्द्वयोरेकतरस्यानुगता भवंति तथा सर्वे ऽंगिरसः प्रजापतेरनुगता भवंति । द्वांगिरसां मध्ये द्वावंगिरसौ धनुं । धनुश्शब्दोऽत्र धनुःशब्दपर्यायो धन-शब्दपर्यायो वा । धनुर्यथा वधसाधनं तथाज्ञानादिवधसाधनं धनवत्प्रीतिकरं वा । कपिलमित्यर्थः । बृहतीं प्रजापतेराज्ञया वर्धयित्रीं प्रकृतिमप्स्वंतः प्रकृतिस्थानां सूक्ष्माणामुदकानां मध्ये चरतः । प्रजापत्यादेशादा-राधयतः । कीदृशौ । पविचवंता पविचवंतौ । मंत्रः पविचमुच्यते । ध्यानसाधनप्रणवमंत्रवंतौ पुनंता शुद्धौ । प्रणवध्यानेनात्मानं संस्कुर्वंताविति यावत् ॥

वि क्रोशनासो विष्वंच आयन्पचांति नेमो नहि पक्षदूर्धः ।
अयं मे देवः सविता तदाह दुन्न इद्वनवत्सर्पिरन्नः ॥ १८ ॥
वि । क्रोशनासः । विष्वंचः । आयन् । पचांति । नेमः । नहि । पक्षत् । अर्धः ।
अयं । मे । देवः । सविता । तत् । आह । दुऽअन्नः । इत् । वनवत् । सर्पिःऽअन्नः ॥ १८ ॥

वि क्रोशनासो विविधं प्रजापतिं पितरमाहुयंतो विष्वंचो नानागतयो नानापूजना वा सर्वेऽङ्गिरस आयन् । आगच्छन् । प्रजापतेः सकाशादुत्पन्ना इत्यर्थः । उत्पद्यमानो नेमोऽर्धोऽङ्गिरसां मध्य एको भागः पचति । प्रजापत्यर्थं हवींषि पचति । अर्धोऽपरो भागो नहि पचत् । नहि पचति । एतत्सर्वं कथमङ्गायि उच्यते । अयमीदृशो देवो द्योतमानः सविता सर्वस्य प्रेरक आदित्यो वा प्रजापतिर्वा मे मह्यं तत्सर्वं यथोक्तमाह । किंच सर्पिरन्नो घृतीदगो द्रुत्र इहार्वोदगोऽग्निरपि वनवत् । हविर्दानेन प्रजापतिं वनुते । संभजते ॥

अपश्यं यामं वहमानमारादचक्रया स्वधया वर्तमानं ।
सिषक्त्यूर्यः प्र युगा जनानां सद्यः शिश्ना प्रमिनानो नवीयान् ॥१९॥
अपश्यं । यामं । वहमानं । आरात् । अचक्रया । स्वधया । वर्तमानं ।
सिसक्ति । अर्यः । प्र । युगा । जनानां । सद्यः । शिश्ना । प्रऽमिनानः । नवीयान् ॥१९॥

अपश्यं । वसुक्रोऽहं प्रजापतिरूपमिंद्रं सम्यग्ज्ञानेन दृष्टवानस्मि । कीदृशं । यामं यामभूतं संघं वहमानं प्राहयंतं । स्रजंतमित्यर्थः । कुतः । आराद्दूरात् । उपादानकारणात्प्रकृतित इत्यर्थः । अचक्रया चक्रवर्जितया रथहीनया स्वधया स्वयमात्मानं धारयंत्या सेनया वर्तमानमागच्छंतं । एवंभूतमपश्यमित्यर्थः । किंचार्यः सर्वस्य स्वामींद्रो जनानां यजमानानां कार्यत्वेन संबंधिनो युगा युगानि यज्ञकालविशेषान्स सिषक्ति । प्रकर्षेण सेवते । कीदृशः । सद्यस्तदानीमेव शिश्ना शिश्नानि । शिश्नं श्नथतेरिति निर्वचनात् । नि० ४.१९. । श्नथितॄणि ताडयितॄणि राक्षसादिवृंदानि प्रमिनानः प्रकर्षेण हिंसन्नवीयान्नूतनरीरेण च बलपौरुषनयनादिभिश्च नवतरः ॥

एतौ मे गावौ प्रमरस्य युक्तौ मो षु प्र सेधीर्मुहुरिन्ममंधि ।
आपश्चिदस्य वि नशंत्यर्थं सूरश्च मर्क उपरो बभूवान् ॥२०॥
एतौ । मे । गावौ । प्रऽमरस्य । युक्तौ । मो इति । सु । प्र । सेधीः । मुहुः । इत् । ममंधि ।
आपः । चित् । अस्य । वि । नशंति । अर्थं । सूरः । च । मर्कः । उपरः । बभूवान् ॥२०॥

कार्यकारणयोरुपचारादात्मा वै पुत्रनामासीति वचनाच्चेंद्ररूपेणावस्थितस्य प्रमरस्य प्रकर्षेण शत्रूणां मारयितुर्मे मम स्वभूतावेतावेतादृशौ युक्तौ सुष्ठु पूजितौ गावौ शत्रून्यज्ञांश्च प्रति गंतारौ हरी मो प्र सेधीः । सृत्युपसंहारकरणेनास्मद्यज्ञान्मापगमय । किं तर्हि मुहुरिन्मुहुर्मुहुर्ममंधि । पुनःपुनः स्तुहि ममात्मन्नित्यर्थः । आपश्चिद्वृष्टिलक्षणान्युदकान्यप्यस्येंद्रस्यार्थं गतिं वि नशंति । विनशतिर्व्याप्तिकर्मा । व्याप्नुवंति । तथा सूरश्च सूर्यश्च व्याप्नोति । कीदृशः । मर्को मार्जयिता सर्वस्य शोधयितोपरो मेघसदृशो बभूवान् भवन् । मेघवच्छीघ्रगतिः सन्नित्यर्थः ॥ ॥१८॥

अयं यो वज्रः पुरुधा विवृत्तोऽवः सूर्यस्य बृहतः पुरीषात् ।
अव इदेना परो अन्यदस्ति तदव्यथी जरिमाणस्तरंति ॥२१॥
अयं । यः । वज्रः । पुरुधा । विऽवृत्तः । अवः । सूर्यस्य । बृहतः । पुरीषात् ।
अवः । इत् । एना । परः । अन्यत् । अस्ति । तत् । अव्यथी । जरिमाणः । तरंति ॥२१॥

योऽयं वज्र इंद्रस्य स्वभूतः सूर्यस्यादित्यस्य बृहतो महतः पुरीषात्पूरकान्मंडलादवोऽवस्तादधोभागे स्थितेषु विवृत्तो वृष्ट्यर्थं प्रवृत्तः पतितः । इच्छब्दोऽप्यर्थे । तच्छब्दश्रुतेर्यच्छब्दोऽध्याहार्यः । परः परस्तादंतरिक्षलोकस्योपरि स्थिते सूर्यमंडले स्थितमेतत् । अव इत्यन्ननाम । तच्च तुल्यादुदकं अव इत्युच्यते । यदप्युदकं मेघोदरगतादुदकादन्यदप्यस्ति अव्यथी व्यथारहिता जरिमाणः स्तोतारो मरुदादयस्तत्तादृशमुदकं तरंति । अंतरिक्षलोकं प्लवतारयंति ॥

वृक्षेवृक्षे नियता मीमयद्गौस्ततो वयः प्र पतान्पूरुषादः ।
अथेदं विश्वं भुवनं भयात इंद्राय सुन्वदृषये च शिक्षन् ॥२२॥
वृक्षेऽवृक्षे । निऽयता । मीमयत् । गौः । ततः । वयः । प्र । पतान् । पुरुषऽअदः ।
अथ । इदं । विश्वं । भुवनं । भयाते । इंद्राय । सुन्वत् । ऋषये । च । शिक्षत् ॥२२॥

वृक्षे वृक्षे सर्वस्मिन्वृक्षमये धनुषि नियता संबद्धा गौर्गोसंबंधिनी स्नायुमती मौर्वी मीमयत् । मीमयतिः शब्दकर्मा । आक्रष्यमाणा सती शब्दं करोति । ततस्तस्माज्जुषः पुरुषादः शत्रुजनानामत्तारः । मारयितार इत्यर्थः । वयः पक्षिसदृशा गंतारो बाणाः प्र पतान् । शत्रून्प्रति प्रपतंति । अथ तदानीमिंद्रायेंद्रार्थं सुन्वत्सोमयागं कुर्वदृषये च शिक्षत्कर्मणां द्रष्ट्र ऋत्विजे च संपूर्णा दक्षिणां ददद्पीदमीदृशं विश्वं समस्तं भुवनं भूतजातं भयाते । इंद्राद्बिभेति । अन्यत्किमुतेत्यर्थः ॥

देवानां माने प्रथमा अतिष्ठन्कृंतचादेषामुपरा उदायन् ।
चयस्तपंति पृथिवीमनूपा द्वा बृबूकं वहतः पुरीषं ॥२३॥
देवानां । माने । प्रथमाः । अतिष्ठन् । कृंतचात् । एषां । उपराः । उत् । आयन् ।
चयः । तपंति । पृथिवीं । अनूपाः । द्वा । बृबूकं । वहतः । पुरीषं ॥२३॥

देवानां सर्वेषां माने निर्माणे । सृष्टिकाल इत्यर्थः । जगत्स्थितिहेतुभूतरसानुप्रदानकर्मणि सृष्टत्वेन प्रथमा अतिष्ठन् । इंद्रादेशादेते पूर्वं स्थिताः । क एते । मेघाः । कुत एतदवगम्यते । परस्मिन्पादे तेषामनुकथनात् । उक्तं हि । मेघा एव माध्यमिका देवगणा इति । नि० २. २२. । एषामेवंभूतानां मेघानां कृंतचाच्छेदनादुपराः । मेघनामैतत् । तत्तस्मा आप उच्यंते । मेघस्था आप उदायन् । उत्पन्नाः । वृष्टिभावेन भूमौ निपातिता इत्यर्थः । पातितास्वप्स्विंद्रस्याज्ञया पर्जन्यो वायुरादित्य इत्येते चयो देवाः पृथिवीं भूमिं । तत्तस्मा ओषधीरित्यर्थः । तपंति । वृष्टिशीतोष्णैः संतापयंति । पावयंतीत्यर्थः । कीदृशाः । अनूपा वर्षादीनामानुपूर्व्येण वप्तारः प्रभावयितारः । प्रचेप्तार इत्यर्थः । द्वा द्वौ वाय्वादित्यौ पाचितास्वोषधीषु स्थितं पुरीषं सर्वस्य प्रीणयितृ वा बृबूकमुदकमादित्यमंडलं प्रति वहतः । वायुः शोषयन् आदित्यो रश्मिभिराददान इत्यर्थः ॥

सा ते जीवातुरुत तस्य विद्धि मा स्मैतादृगप गूहः समर्ये ।
आविः स्वः कृणुते गूहते बुसं स पादुरस्य निर्णिजो न मुंच्यते ॥२४॥
सा । ते । जीवातुः । उत । तस्य । विद्धि । मा । स्म । एतादृक् । अप । गूहः । सऽमर्ये ।
आविः । स्वरिति स्वः । कृणुते । गूहते । बुसं । सः । पादुः । अस्य । निःऽनिजः ।
न । मुच्यते ॥२४॥

अथांतरात्मेंद्रः स्तूयते । हे अंतरात्मन् ते तव सा तादृश्यादित्यात्मिका देवता जीवातुर्जीविका जीवनहेतुः । उतापि च तस्यादित्यस्थितादृगीदृशं स्वरूपं समर्ये । संग्रामवाची समर्यशब्दोऽत्र यज्ञवाची । यज्ञे विद्धि । जागीहि । सुप्यलेनेति शेषः । मा स्माप गूहः । मा खल्वपवृणोः । किंच निर्णिजः सर्वस्य शोधयितुरादित्यस्य स पादुस्तस्य पादनं गमनं रश्मिद्वारेण गत्वा स्वः सर्वं त्रैलोक्यमाविष्कृणुते । प्रकाशीकरोति । बुसमुदकं गूहते । संवृणोति । आदत्त इत्यर्थः । अस्मै प्रयोजनद्वयायादित्येन निर्वेदनाच्छब्देन वा गमनं न मुच्यते । न कदाचित्परित्यज्यत इत्यर्थः ॥ ॥ १९ ॥

विश्वो हीति द्वादशर्चं द्वादशं सूक्तं वैदभं । इंद्रवसुक्रयोः पितापुत्रयोः संवादोऽत्र क्षिप्यते । पुरा वसुक्रे

यज्ञं कुर्वाणे सतींद्रः प्रच्छन्नरूप आजगाम। तं वसुक्रपत्नींद्रागमनाक्षांक्षिणी विप्रकृष्टमिवाचयास्तौत्। अतस्तस्याः सर्षिः इंद्रो देवता। अथ तस्याः प्रीतौ वसुक्रेण सहेंद्रः संवादमकरोत्। द्वितीयादियुजश्चतुर्थीरहिताः पंचर्च इंद्रवाक्यानि। अतस्तासां स ऋषिः। यद्यप्यासु वसुक्रः संबोध्यत्वाद्देवता तथापि ता ऋच ऐंद्रे कर्मणि विनियोक्तव्या इंद्रलिंगसद्भावात्। चतुर्थीसहिताः शिष्टास्तृतीयाद्या वसुक्रवाक्यानि। अतः स ऋषिस्तासां इंद्रो देवता। तथा चानुक्रांतं। विश्वो हि द्वादशेंद्रवसुक्रयोः संवाद ऐंद्रः सूक्तस्य प्रथमयेंद्रस्य स्तुषा परोक्षवदिंद्रमहिंद्रस्य युजः शेषा ऋषेश्चतुर्थी चेति ॥ गतो विनियोगः ॥

विश्वो ह्यन्यो अरिराजगाम ममेदह श्वशुरो ना जगाम।
जक्षीयाद्धाना उत सोमं पपीयात्स्वाशितः पुनरस्तं जगायात् ॥१॥
विश्वः। हि। अन्यः। अरिः। आऽजगाम। मम। इत्। अह। श्वशुरः। न। आ। जगाम।
जक्षीयात्। धानाः। उत। सोमं। पपीयात्। सुऽआशितः। पुनः। अस्तं। जगायात्॥१॥

अनया वसुक्रपत्नींद्रं स्तौति। अन्य इंद्रव्यतिरिक्तोऽरिरयं ईश्वरो विश्वो हि सर्व एव देवगण आजगाम। अस्मद्यज्ञं प्रत्यायथो। इदित्यवधारणे। अहेत्यद्भुते। सर्वदेवगण आगते सति ममैव श्वशुर इंद्रो ना जगाम। स इंद्रो यद्यागच्छेत् तर्हि धाना भृष्टयवाञ्जचीयात्। भक्षयेत्। उतापि च सोममभिषुतं पपीयात्। पिबेत्। ततः स्वाशितः सुष्ठु भुक्तसृष्टः सन् पुनर्भूयोऽस्तं स्वगृहं प्रति जगायात्। गच्छेत्॥

स रोरुवद्वृषभस्तिग्मशृंगो वर्ष्मन्तस्थौ वरिमन्ना पृथिव्याः।
विश्वेष्वेनं वृजनेषु पामि यो मे कुक्षी सुतसोमः पृणाति ॥२॥
सः। रोरुवत्। वृषभः। तिग्मऽशृंगः। वर्ष्मन्। तस्थौ। वरिमन्। आ। पृथिव्याः।
विश्वेषु। एनं। वृजनेषु। पामि। यः। मे। कुक्षी इति। सुतऽसोमः। पृणाति॥२॥

वृषभः कामानां वर्षिता तिग्मशृंगस्तीक्ष्णरश्मिः स इंद्रोऽहं पृथिव्या अंतरिक्षस्य वर्ष्मन् वर्ष्मणि। वर्ष्मन्शब्द उन्नतवचनः स्थिरवचनो वा। एवंभूते वरिमन् विस्तीर्णे प्रदेशे रोरुवच्छब्दं शब्दायमानः सन्ना तस्थौ। आतिष्ठामि। एवंभूतोऽहं विश्वेषु सर्वेषु वृजनेषु संग्रामेष्वेनमीदृशं वसुक्रं यजमानं पामि। रक्षामि। यो यजमानः सुतसोमोऽभिषुतसोमो मे मम कुक्षी उभौ पार्श्वौ पृणाति सोमरसपुरोडाशादिहविर्भिः पूरयति। ईदृशं रक्षामीति संबंधः॥

अद्रिणा ते मंदिन इंद्र तूयान्त्सुन्वंति सोमान्पिबसि त्वमेषां।
पचंति ते वृषभाँ अत्सि तेषां पृक्षेण यन्मघवन्हूयमानः ॥३॥
अद्रिणा। ते। मंदिनः। इंद्र। तूयान्। सुन्वंति। सोमान्। पिबसि। त्वं। एषां।
पचंति। ते। वृषभान्। अत्सि। तेषां। पृक्षेण। यत्। मघऽवन्। हूयमानः॥३॥

हे इंद्र ते त्वदर्थं मंदिनो मादयितॄंस्तूयानविलंबितान्सोमानद्रिणाभिषवग्राव्णा सुन्वंति। यजमाना अभिषुण्वंति। एषामस्मदादियजमानानां संबंधिनः सोमांस्त्वं पिबसि। किंच त्वदर्थं वृषभान्यशून्ये च यजमानाः पचंति तेषां संबंधिनो हविर्भूतान्पशूनत्सि। भक्षयसि। हे मघवन्धनवन्निंद्र त्वं यदा पृक्षेण हविर्भूतेनान्नेन निमित्तेन हूयमानः यजमानैर्ह्रयसे तदेति पूर्वेण संबंधः॥

इदं सु मे जरितरा चिकिद्धि प्रतीपं शापं नद्यो वहंति।
लोपाशः सिंहं प्रत्यंचमत्साः क्रोष्टा वराहं निरतक्त कक्षात् ॥४॥

इदं । सु । मे । जरितः । आ । चिकिद्धि । प्रति । ईपं । शापं । नद्यः । वहंति ।
लोपाशः । सिंहं । प्रत्यंचं । अत्सारिणं । क्रोष्टा । वराहं । निः । अतक्त । कक्षात् ॥४॥

हे जरितः शत्रूणां जरयितरिंद्र त्वं मे मम सु शोभनमपीदमीदृशं रूपं सामर्थ्यमा चिकिद्धि । आ समंताज्जानीहि । कीदृशं । नद्यो गंगाद्याः सरितः प्रतीपं प्रतिकूलं शापमुदकं वहंति । अपि च लोपाशः । लुप्यमानं तृणमश्नातीति लोपाशो मृगः । मया प्रेषितः सन् प्रत्यंचमात्मानं प्रति गच्छंतं सिंहमत्साः । अत्सारीत् । आभिमुख्येन गच्छति । तथा क्रोष्टा शृगालो वराहं बलवंतमपि सूकरं कक्षादतियहनदेशान्निरतक्त । निर्गमयति । एतदपि सर्वं सामर्थ्यं त्वत्पुत्रे मयि त्वत्प्रसादाल्लब्धमपि जानीहीत्यर्थः ॥

कथा त एतदहमा चिकेतं गृत्सस्य पाकस्तवसो मनीषां ।
त्वं नो विद्वाँ ऋतुथा वि वोचो यमर्धं ते मघवन्क्षेम्या धूः ॥५॥
कथा । ते । एतत् । अहं । आ । चिकेतं । गृत्सस्य । पाकः । तवसः । मनीषां ।
त्वं । नः । विद्वान् । ऋतुऽथा । वि । वोचः । यं । अर्धं । ते । मघऽवन् । क्षेम्या । धूः ॥५॥

हे इंद्र पाकः पक्तव्यप्रज्ञोऽहं गृत्सस्य मेधाविनस्तवसो वृद्धस्य ते तव मनीषां सुतिं । कर्तुमिति शेषः । एतदीदृशं त्वदीयं सामर्थ्यं कथा कथं केन प्रकारेणा चिकेतं । आ समंताज्जानामि । त्वदुपदेशं विना न जानामीत्यर्थः । तस्मात्कारणाद्विद्वान् सर्वज्ञस्त्वमेव नोऽस्मभ्यमृतुथा काले काले वि वोचः । विशेषेण ब्रूहि । हे मघवन्धनवन्निंद्र ते तवार्धं यं सुत्यवयवं कुर्मः सा सुतिर्धूः क्षेम्या क्षेमे भवा क्लेशरहिता वोढुं शक्यास्ति । यस्मात्तव सुत्यवयवमेव वयमक्लेशेन कर्तुं न शक्नुमोऽस्माकं मंदबुद्धित्वात् तस्मात्त्वमेवास्मभ्यं स्वसामर्थ्यं सुतिप्रकारं च पुनरपि कथयेत्यर्थः ॥

एवा हि मां तवसं वर्धयंति दिवश्चिन्मे बृहत उत्तरा धूः ।
पुरू सहस्रा नि शिशामि साकमशत्रुं हि मा जनिता जजान ॥६॥
एव । हि । मां । तवसं । वर्धयंति । दिवः । चित् । मे । बृहतः । उत्ऽतरा । धूः ।
पुरू । सहस्रा । नि । शिशामि । साकं । अशत्रुं । हि । मा । जनिता । जजान ॥६॥

हि यस्मात्कारणादेवमुक्तप्रकारेण तवसं प्रवृद्धं मां स्तोतारः सुतिभिः सुवंतो वीर्येण वर्धयंति तस्मात्कारणाद्बृहतो महतो मे ममेंद्रस्य दिवश्चिद्द्युलोकादपि धूः सुतिरुत्तरोन्नततराधिकतरा । किंच पुरू पुरूणि बहूनि सहस्रा शत्रूणां सहस्राणि साकं युगपन्नि शिशामि । तनूकरोमि । हिनस्मीत्यर्थः । हि यस्मात्कारणाज्जनिता सर्वस्य जनयिता प्रजापतिर्मा मामिंद्रमशत्रुमविद्यमानशत्रुं जजान जनितवान् ॥ ॥२०॥

एवा हि मां तवसं जज्ञुरुग्रं कर्मन्कर्मन्वृषणमिंद्रं देवाः ।
वधीं वृत्रं वज्रेण मंदसानोऽप व्रजं महिना दाशुषे वं ॥७॥
एव । हि । मां । तवसं । जज्ञुः । उग्रं । कर्मन्ऽकर्मन् । वृषणं । इंद्रं । देवाः ।
वधीं । वृत्रं । वज्रेण । मंदसानः । अप । व्रजं । महिना । दाशुषे । वं ॥७॥

हि यस्मात्कारणादेवमनेनोक्तप्रकारेण हे इंद्र देवा मरुदादय ऋत्विग्यजमाना वा तवसं महांतं त्वत्पुत्रं त्वद्रूपेणावस्थितं संतं वसुक्रं मां कर्मन्कर्मन् वृत्रवधादौ सर्वस्मिन्कर्मण्युग्रं शूरमसह्यं वा वृषणं वर्धितारं हविषां दातारं जज्ञुः जानंति अतो मंदसानो मोदमानोऽहं वज्रेणायुधेन वृत्रं मेघासुरं वधीं । अवधिषं ।

किंच दाशुषे हविर्दत्तवते यजमानाय वृष्टिप्रदानार्थं महिना महत्त्वेन व्रजं मेघसमूहमप वं । अपावं । अपवृणोमि ॥

देवास आयन्परशूँरबिभ्रन्वना वृश्चंतो अभि विड्भिरायन् ।
नि सुद्वं१ दधतो वक्षणासु यचा कृपीटमनु तद्दहंति ॥ ८॥
देवासः । आयन् । परशून् । अबिभ्रन् । वना । वृश्चंतः । अभि । विट्ऽभिः । आयन् ।
नि । सुऽद्वं । दधतः । वक्षणासु । यच । कृपीटं । अनु । तत् । दहंति ॥ ८॥

देवासो देवा इंद्रेण चोदिताः संत आयन् । गच्छंति । मेघवधार्थं परशून्वज्रानबिभ्रन् । धारयंति च । तदनंतरं विड्भिर्मरुदादिप्रजाभिः सहिता वृश्चंतो मेघांश्छिंदंतो वना वनानि वृष्टिलक्षणान्युदकान्यभ्यायन् । आभिमुख्येन गच्छंति । ततः सुद्वं शोभनद्रवणं वृष्युदकं वक्षणासु नदीषु नि दधतो नियमेन स्थापयंतो यच यस्मिन्मेघजाते कृपीटं । उदकनामैतत् । निगूढमुदकं तिष्ठति त इमे देवास्तन्मेघजातमनु लक्षीकृत्य दहंति । उदकनिर्गमनार्थं शोषयंति ॥

शशः क्षुरं प्रत्यंचं जगारार्द्रिं लोगेन व्यभेदमारात् ।
बृहंतं चिदृहते रंधयानि वयद्वत्सो वृषभं शूशुवानः ॥ ९॥
शशः । क्षुरं । प्रत्यंचं । जगार । अर्द्रिं । लोगेन । वि । अभेदं । आरात् ।
बृहंतं । चित् । ऋहते । रंधयानि । वयत् । वत्सः । वृषभं । शूशुवानः ॥ ९॥

वसुक इंद्रं प्रतिब्रूते । शशः एतत्संज्ञितो मया प्रेरितो मृगविशेषः प्रत्यंचं वधायात्मानं प्रति गच्छंतं क्षुरं क्षुरवंतं दृढदीर्घतीक्ष्णनखं सिंहव्याघ्रादिकं । बलवत्क्रूरमृगमित्यर्थः । जगार । गिरति गृह्णाति वा । किंच लोगेन लोष्टेनार्द्रिं हिमवदादिकं पर्वतमाराद्दूरे स्थितमपि व्यभेदं । अहं भिनद्मि । बृहंतं चिन्महांतमपि हस्त्यादिकमृहते ह्रस्वकायाल्पाय शशकादिकाय रंधयानि । वशं गमयानि । शूशुवानो वीर्येण वर्धमानो वत्सो वृषभं महोक्षं वयत् । युद्धाय गच्छति । हे इंद्र एतदपि सर्वं त्वत्प्रसादादहं करोमीत्यर्थः ॥

सुपर्ण इत्था नखमा सिषायावरुद्धः परिपदं न सिंहः ।
निरुद्धश्चिन्महिषस्तर्ष्यावान्गोधा तस्मा अयथं कर्षदेतत् ॥ १०॥
सुऽपर्णः । इत्था । नखं । आ । सिसाय । अवऽरुद्धः । परिऽपदं । न । सिंहः ।
निऽरुद्धः । चित् । महिषः । तर्ष्याऽवान् । गोधा । तस्मै । अयथं । कर्षत् । एतत् ॥ १०॥

सुपर्णः पक्षिरूपा गायत्रीत्यामुत्र द्युलोके नखमात्मीयमा सिषाय । सोमाहरणकाल इंद्रार्थमाबबंध । इंद्रस्य प्रसादाद्दिवि पदं न्यस्तवतीत्यर्थः । तत्र दृष्टांतः । अवरुद्धः पंजरेणावृतः परिवेष्टितः सिंहः परिपदं न । यथा करस्योपरि सर्वतः पादमवबध्नाति । किंच । चिदित्युपमार्थे । यथा केनापि बद्धपादो निरुद्धो महिषस्तर्ष्यावानुदकाभावे तृषावान्भवति एवमिंद्रः सोमाहरणात्पूर्वं सोमाभावे तृषितवानभूदिति शेषः । तस्मै । तादर्थ्ये चतुर्थी । तादृशस्य तृषितस्येंद्रस्यार्थं गोधा । गमयति वर्णानिति गौर्वाक् तत्र निधीयमानत्वान्नायत्री गोधा । यद्वा । गुधिर्निष्कर्षणार्थः । निष्कृष्यसोमाहरणान्नोधा गायत्री । अयथमयत्नेन । लीलयेत्यर्थः । एतत्सोमजातं कर्षत् । आकृष्टवती । दिवः सकाशादाहृतवतीत्यर्थः ॥

तेभ्यो गोधा अयथं कर्षदेतद्ये ब्रह्मणः प्रतिपीयंत्यन्नैः ।
सिम उक्षणोऽवसृष्टाँ अदंति स्वयं बलानि तन्वः शृणानाः ॥ ११॥

तेभ्यः । गोधाः । अयथं । कर्षत् । एतत् । ये । ब्रह्मणः । प्रतिऽपीयंति । अन्नैः ।
सिमः । उक्षणः । अवऽसृष्टान् । अदंति । स्वयं । बलानि । तन्वः । शृणानाः ॥११॥

ये मरुदादिदेवगणा ब्रह्मणः परिवृढस्येंद्रस्य स्वभूतैरन्नैः सोमाख्यैः । तृप्ताः संत इति शेषः । प्रतिपीयंति । पीयतिर्हिंसाकर्मा । इंद्रादेशाद्धिंसकान्प्रतिहिंसंति तेभ्यस्तेषां देवगणानामर्थाय गोधाः पूर्वोक्ता गायत्र्ययथमनायासेनैतत्सोमजातं कर्षत् । आकृष्टवती । किंच सिमः सिमाञ्श्रेष्ठान् । यद्वा । सिमशब्दः सर्वशब्दपर्यायः । सर्वान् । उक्षणः सिंचतोऽवसृष्टानिंद्रेण निसृष्टाननुज्ञाताञ्हविर्भूतान्सोमान्यज्ञेष्वदंति । भक्षयंति । किं कुर्वतः । स्वयमात्मनैव बलानि शत्रूणां सैन्यानि तन्वः शरीराणि च शृणाना हिंसंतः । गायत्रीद्रादेशाद्देवेभ्यः सोममाहृतवतीत्यर्थः ॥

एते शमीभिः सुशमी अभूवन्ये हिन्विरे तन्वः सोमं उक्थैः ।
नृवद्वदन्नुप नो माहि वाजान्दिवि श्रवो दधिषे नाम वीरः ॥१२॥
एते । शमीभिः । सुऽशमी । अभूवन् । ये । हिन्विरे । तन्वः । सोमे । उक्थैः ।
नृऽवत् । वदन् । उप । नः । माहि । वाजान् । दिवि । श्रवः । दधिषे । नाम । वीरः ॥१२॥

ये देवर्थादयस्तन्वः शरीराणि सोमे सोमयाग उक्थैः शस्त्रैर्हिन्विरे वर्धयंति एते देवादय इंद्रादेशात्सोम आहृते सति शमीभिः सोमयागकर्मभिः सुशमी सुकर्माणोऽभूवन् । नृवन्मनुष्यवद्वदन् इदं युष्मभ्यं मया दत्तमिति व्यक्तां वाचमुच्चारयन् नोऽस्मभ्यमुप माहि । उपगम्य वाजानन्नानि बलानि वा हे इंद्र त्वं देहीति शेषः । अतः कारणाद्वीरो दानशूरस्त्वं दिवि द्युलोके श्रवो दानपतिरिति कीर्तितं नाम नामधेयं दधिषे । धारयसि ॥ ॥२१॥

वने न वेत्यष्टर्चं चयोदशं सूक्तं वसुक्रस्यार्षं त्रैष्टुभमैंद्रं । अनुक्रांतं च । वने नाष्टाविति ॥ चतुर्थेऽहनि स्तोमवृद्धौ ब्राह्मणाच्छंसिन एतत्सूक्तमावापार्थं । सूचितं च । स्तोमे वर्धमाने को अद्य नर्यो वने न वा यः । आ० ७. १२. । इति ॥ महाव्रते निष्केवल्य एतत्सूक्तं । सूचितं च । प्र वो महे मंदमानायांधस इति निविद्धानं वने न वा यो न्यधायि चाकन् । ऐ० आ० ५. ३. १. । इति ॥

वने न वा यो न्यधायि चाकञ्छुचिर्वां स्तोमो भुरणावजीगः ।
यस्येदिंद्रः पुरुदिनेषु होता नृणां नर्यो नृतमः क्षपावान् ॥१॥
वने । न । वा । यः । नि । अधायि । चाकन् । शुचिः । वां । स्तोमः । भुरणौ । अजीगरिति ।
यस्य । इत् । इंद्रः । पुरुऽदिनेषु । होता । नृणां । नर्यः । नृऽतमः । क्षपाऽवान् ॥१॥

वने न वायो न्यधायीति । वने न वन इव वृक्ष इव शकुनिः स्वे नीडे वायमात्मीयं पुत्रं न्यधायि निदधाति शिशुकमजातपक्षं । स यथा तत्र निहितश्चाकन्पश्यन् भयाहिंसो निरीक्षमाण आसीत् । अथवा । कामयमानस्तदुत्सुकमना आसीत् । एवमयमस्मासु वृक्षस्य नीडभूतेषु शकुनिपुत्रभूतः शुचिर्व्यपगतसर्वदोषो युवयोः स्वभूतः स्तोमः हे भुरणौ भर्तारावश्विनौ शीघ्रौ वा । भुरण्युरिति क्षिप्रनामेति । किंच यस्य स्तोमस्य पुरुदिनेषु बहुष्वहःस्विंद्रो होतेंद्रोऽध्वर्युराङ्गाता भवति ममायं स्तोमः स्यादिति । किंलक्षणः पुनरिंद्र आङ्गाता । यो नृणां मनुष्याणां नृतमः मनुष्याणामपि मनुष्यतमः । शूराणामपि मध्ये शूरतम इत्यर्थः । नर्यश्च नृभ्यो हितो यः क्षपावांश्च रात्रिपर्यायेषु सोमभागः । एवंगुणयुक्तेन यः स्तोम इंद्रेणापि प्रार्थ्यतेऽस्मासु वर्तमानः स युवां प्रत्यजीगः । नित्यकालमेव गच्छतीत्यर्थः । एतावदेतामृचमाश्विनीमिति कृत्वा व्याचष्टे । तदसाधु । ऐंद्रे हि सूक्ते प्रथमैवेयं भवति । तच्च पुनः पृष्ठ्यस्य षष्ठेऽहनि स्तोमे वर्धमाने माध्यंदिने सवने ब्राह्मणाच्छंसिनः शस्त्रे

विनियुज्यते। हे भुरणौ भर्तारौ देवानां पती य एष सोमोऽस्मासु निहितः शुचिर्व्यपगतदोषः शकुनिपुत्र इव वने वनावयवे वृषे चाकन्पश्चन्निव कामयमान इव वेंद्रमासे। यस्य सोमस्य किमिति। यस्येंद्रः पुरुदिनेषु बहुष्वहःस्वाङ्गाताभूत् अपि नाम मामनेन सोमेन स्तुयुरिति। किंलक्षणः पुनराङ्गाता। यस्येदिंद्र इति नृणां नृतमो नर्यश्च शपावांश्च समानमेतत्पूर्वार्धेन। यमेवमिंद्रः प्रार्थयते स एष सोमस्तं प्रत्यजीगः। गच्छतीत्यर्थः। अथवा स एष सोमोऽस्माभिरुदीर्यमाणस्तस्येंद्रस्य गुणान्गृह्णातीति स्यात्। जिगर्तिर्गृह्णातिकर्मेति ह्युक्तं। नि० ६.८.। एवमत्र चाकन्नित्यस्य चायन्निति वा कामयमान इति वेत्येतौ विपरिणामानुपपत्तेः शब्दसाम्ख्यादर्थाविरोधाच्च। एतस्मिन्निगमे पदविभागगतः कश्चिद्विचारोऽस्ति। तमाह भाष्यकारः। वेति च य इति च चकार शाकल्य इति। वेति य इति च पदे चकार शाकल्यः पदकारः। तदेतद्विचार्यमाणं न साधु भवति। किं कारणं। उदात्तं त्वेवमाख्यातमभविष्यत्। एवमेतस्मिन्पदद्वये सति यदेतदाख्यातं न्यधायीति तदुदात्तमभविष्यत्। यदनुदात्तात्परस्य नित्यमाख्यातस्य निघातो न भवतीति लक्षणविदो मन्यंते। न चेदमुदात्तं तस्माच्च इति नेदं यदनुदात्तं किंतर्हि वाय इत्येकमेव पदं। किंच। असुसमाप्तस्यार्थः। अपुष्कलः। एवमेव तस्मिन्पदद्वये सति मंत्रस्यार्थोऽसुसमाप्तो भवति॥

प्र ते अस्या उषसः प्रापरस्या नृतौ स्याम नृतमस्य नृणां।
अनु चिशोकः शतमावहन्नृन्कुत्सेन रथो यो असत्ससवान् ॥२॥
प्र। ते। अस्याः। उषसः। प्र। अपरस्याः। नृतौ। स्याम। नृऽतमस्य। नृणां।
अनु। चिऽशोकः। शतं। आ। अवहत्। नृन्। कुत्सेन। रथः। यः। असत्। ससऽवान्॥२॥

अस्या वर्तमानाया ईदृश्या उषसो नृतौ ॥ नृ नये ॥ नयने प्रापणे। उदयकाल इत्यर्थः। नृणां नेतॄणां मध्ये नृतमस्यातिशयेन नेतुस्ते तवेंद्रस्य स्तुत्या यागेन च प्र स्याम। वयं प्रकृष्टा भवेम। तथा हे इंद्र अपरस्या आगामिन्याश्चोषसो नृतौ प्रापणे तव स्तुत्या यागेन च वयं प्रकृष्टा भवेमेत्याशास्महे। किंच चिशोको नामर्षिर्हे इंद्र त्वामाराध्य त्वत्प्रसादाच्छतं बहूनन्यनुचरभूतान्नृन्मनुष्यानावहत्। प्रापितवान्। लब्धवानित्यर्थः। तथा तव कुत्सस्य च ससवान् सनिता युगपदेव संभक्ता यो रथोऽसत् अस्ति स रथः कुत्सेन। कुत्सो लब्धवानिति शेषः। तथा च मंत्रांतरे श्रूयते। यासि कुत्सेन सरथमवस्युः। ऋ० ४.१६.११.। इति। यस्मादेवं तस्मात्त्वत्प्रसादाद्वयं प्रकृष्टा भवेमेत्यर्थः॥

कस्ते मद इंद्र रंत्यो भूदुरो गिरो अभ्युग्रयो वि धाव।
कद्वाहो अर्वागुप मा मनीषा आ त्वा शक्यामुपमं राधो अन्नैः ॥३॥
कः। ते। मदः। इंद्र। रंत्यः। भूत्। दुरः। गिरः। अभि। उग्रयः। वि। धाव।
कत्। वाहः। अर्वाक्। उप। मा। मनीषा। आ। त्वा। शक्यां। उपऽमं। राधः। अन्नैः॥३॥

हे इंद्र ते तवेषमध्यमोत्तमानां सोमजन्यानां मदानां मध्ये को मदो रंत्यो रमयिता प्रीतिकरो भूत्। भवति। त्वत्प्रीतिकरमदयोग्यसोमदानाभिप्रायेणायं प्रश्नः। उग्र ओजस्वी त्वं दुरो यज्ञगृहद्वाराणि गिरः स्तुतिलक्षणा वाचश्चाभि वि धाव। अभ्यागच्छ। किंच कत् कदा वाहः। इंद्रं प्रत्युह्यत इति वाहः सोम उच्यते। एवंभूतोऽर्वाक् त्वत्प्रसादात्फलदानायास्मदभिमुखो भविष्यतीति शेषः। अपि च कदा मनीषा सर्वार्थदर्शिका प्रज्ञा सर्वगुणग्राहिणी स्तुतिर्वा मा मां त्वत्प्रसादादुपगमिष्यतीति शेषः। कदा हे इंद्र त्वा त्वां। आ इत्युपसर्गश्रुतेर्योग्यपदाध्याहारः। आराध्य वयमन्नैः सह राधो धनमुपमं मत्समीपं शक्यां। शक्तिरत्र गत्यर्थोऽंतर्भावितण्यर्थः। संगमयेयं॥

कदु द्युम्नमिंद्र त्वावतो नृन्कया धिया करसे कन्न आगन्।
मिमो न सत्य उरुगाय भृत्या अन्ने समस्य यदसन्मनीषाः ॥४॥

कत्। ऊं इति। द्युम्नं। इंद्र। त्वाऽवंतः। नृन्। कया। धिया। करसे। कत्। नः। आ। अगन्।
मित्रः। न। सत्यः। उरुऽगाय। भृत्यै। अन्ने। समस्य। यत्। असन्। मनीषाः ॥४॥

हे इंद्र त्वं कदु कदा वा द्युम्नं हविर्लक्षणमस्मदीयमन्नं भुक्षेति शेषः। कया धिया केन कर्मणा नृन्नेतॄन-स्मांस्त्वावतस्त्वत्सदृशान्करसे। करिष्यसि। कत् कदा नोऽस्मान्प्रत्यागन्। आगमिष्यसि। सत्यः। अनवद्य इत्यर्थः। मित्रो न सखेव तथा। हे उरुगाय बहुकीर्त इंद्र त्वं भृत्यै भरणाय पोषणाय भवसीति शेषः। यदा समस्यास्मदादिकस्य सर्वस्य जगतोऽन्ने जगत्स्थितिनिमित्त आहारे मनीषा अन्नाभिलक्षणा बुद्धयोऽसन् भवेयुः। तदा सर्वस्य पोषणाय त्वं भवसीत्यर्थः ॥

प्रेरय सूरो अर्थं न पारं ये अस्य कामं जनिधा इव ग्मन्।
गिरश्च ये ते तुविजात पूर्वीर्नरं इंद्र प्रतिशिक्षंत्यन्नैः ॥५॥
प्र। ईरय। सूरः। अर्थं। न। पारं। ये। अस्य। कामं। जनिधाःऽइव। ग्मन्।
गिरः। च। ये। ते। तुविऽजात। पूर्वीः। नरः। इंद्र। प्रतिऽशिक्षंति। अन्नैः ॥५॥

सूरः सूर्योऽर्थं न यथार्तारं गंतारं योगिनमनुगृह्णन् पारं संसारस्यांतमपवर्गं गमयति तथा हे इंद्र त्वं यजमानान्संसारस्यांतं प्रेरय। गमय। येऽस्मदादयो यजमाना अस्य तवेंद्रस्य कामं सोमपानेच्छां ग्मन्। गमिरत्र विपूर्वोऽंतर्भावितण्यर्थश्च द्रष्टव्यः। विगमयंति महता सोमपानेनापनयंति। तत्र दृष्टांतः। जनिधा इव जनीनां जायानां संभोगकाले शय्यासु धारयितारः पतयो यथा प्रभूतसंभोगप्रदानेन मैथुनेच्छामपनयंति तद्वत्। किंच नरो नेतारोऽस्मदादयो ये यजमाना हे तुविजात बहुरूप। रूपंरूपं प्रतिरूपो बभूव। ऋ० ६. ४७. १८.। इति वचनात्। सर्वात्मन्निंद्र ते तुभ्यं पूर्वीरनादिकालप्रवृत्ता गिरश्च स्तुतिलक्षणा वाचश्चान्नैः पुरोडाशादिहविर्भिः सह प्रतिशिक्षंति प्रतिकालं प्रयच्छंति तानस्मदीयान्यजमानान्पारं गमयेति पूर्वेण संबंधः ॥ ॥२२॥

माचे नु ते सुमिते इंद्र पूर्वी द्यौर्मज्मना पृथिवी काव्येन।
वरांय ते घृतवंतः सुतासः स्वाद्मन्भवंतु पीतये मधूनि ॥६॥
माचे इति। नु। ते। सुमिते इति सुऽमिते। इंद्र। पूर्वी इति। द्यौः। मज्मना।
पृथिवी। काव्येन।
वरांय। ते। घृतऽवंतः। सुतासः। स्वाद्मन्। भवंतु। पीतये। मधूनि ॥६॥

हे इंद्र ते तव स्वभूतेन मज्मना शत्रूणां मज्जकेन काव्येन कर्मणा द्यौः पृथिवी द्यावापृथिव्यौ नु क्षिप्रं सुमिते। निर्मिते। कीदृश्यौ। माचे निर्माच्यौ पूर्वी पूर्व्यौ महत्यौ। यस्मादीदृशेन महत्त्वेन युक्ताः तस्माद्घृतवंतोऽभिमुखत्वात् त्वां चरंतो दीप्तिमंतो वा सुसंस्कृतत्वात् यद्वाज्यसंयुक्ताः सुतासोऽभिषुताः सोमा वराय श्रेष्ठाय तुभ्यमिंद्राय स्वाद्मन् भवंतु। आस्वादिताः संतु। किमर्थं। पीतये पानाय। मधूनि मधुररसात्मकानि पुरोडाशादीन्यन्नानि हवींषि भक्षणार्थं दत्तानि भवंतु ॥

आ मध्वो अस्मा असिचन्नमत्रमिंद्राय पूर्णं स हि सत्यराधाः।
स वावृधे वरिमन्ना पृथिव्या अभि क्रत्वा नर्यः पौंस्यैश्च ॥७॥

आ । मध्वः । अस्मै । असिचन् । अमत्रं । इंद्राय । पूर्णं । सः । हि । सत्यऽराधाः ।
सः । ववृधे । वरिमन् । आ । पृथिव्याः । अभि । क्रत्वा । नर्यः । पौंस्यैः । च ॥७॥

अस्मा इंद्रायेंद्रार्थं मध्वो मधुररसस्य सोमस्य पूर्णममत्रं ग्रहचमसादिकं पात्रमासिचन् । आभिमुख्येन क्षिप्त्वा परया भक्त्याऽऽदरेण ऋत्विजः सिक्तवंतः । अथो प्रचिक्षरवंतः । हि यस्मात्कारणात्स इंद्रः सत्यराधाः सत्यधनः । यजमानेभ्यो दातव्यस्वेनाविसंवादिधन इत्यर्थः । तस्मादसिचन्निति संबंधः । अमावासिक्तेन तेन पात्रेण तृप्तः स इंद्रः पृथिव्या अंतरिक्षस्य वरिमन्नतिशयेन विस्तीर्णे स्थाने आगत्याभि ववृधे । अभिवर्धते । कीदृश इंद्रः । नर्यो नृभ्यो हितः । क्रत्वा वृत्रवधादिकर्मणा प्रज्ञानेन वा पौंस्यैश्च युक्त इति शेषः ॥

व्यानळिंद्रः पृतनाः स्वोजा आस्मै यतंते सख्याय पूर्वीः ।
आ स्मा रथं न पृतनासु तिष्ठ यं भद्रया सुमत्या चोदयासे ॥८॥
वि । आनट् । इंद्रः । पृतनाः । सुऽओजाः । आ । अस्मै । यतंते । सख्याय । पूर्वीः ।
आ । स्म । रथं । न । पृतनासु । तिष्ठ । यं । भद्रया । सुऽमत्या । चोदयासे ॥८॥

स्वोजाः शोभनबल इंद्रः पृतनाः शत्रुसेना व्यानट् । व्याप्नोति । स इंद्रः संग्रामेषु केनाप्यप्रतिहन्यमानः सञ्छत्रूञ्जयतीत्यर्थः । किंच पूर्वीः । अत्र पूर्वशब्द उत्कृष्टवाची । उत्कृष्टाः शत्रुसेना अप्रभवत्यः सत्योऽस्मा अस्मिंद्रस्य सख्याय संधिलक्षणाय सख्याया यतंते । संधिं कर्तुमिच्छंतीत्यर्थः । अपरोऽर्धर्चः प्रत्यक्षकृतत्वाद्भिन्नं वाक्यं । हे इंद्र त्वं यं स्वीयं रथं भद्रया कल्याण्या सुमत्या शोभनया परानुग्रहया बुद्ध्या चोदयासे यज्ञान्प्रति प्रेरयसि तं रथमस्मद्यज्ञं प्रत्यागंतुं महतादरेणा तिष्ठ । आरोह । तत्र दृष्टांतः । पृतनासु संग्रामेषु रथं न यथा स्वरथं महतादरेणातिष्ठसि तद्वत् । स्वीति पदपूरणः ॥ ॥२३॥ ॥२॥

तृतीयेऽनुवाके चत्वारिंश सूक्तानि । तत्र प्र देवत्रेति पंचदशर्चं प्रथमं सूक्तं । इलूषपुत्रस्य कवषस्यार्षं त्रैष्टुभमैंद्रवत्यमपांनपाद्दैवतार्कं वा । तथा चानुक्रांतं । प्र देवत्रा पंचोना कवष ऐलूष आपमपोनप्त्रीयं वेति ॥ अपयिष्ठ होतरित्युक्तः सन् होता प्र देवत्रेत्यादावा नवर्चोऽनुब्रूयात् । सूचितं च । प्र देवत्रा ब्रह्मणे गातुरेत्विति नव हिनोता नो अध्वरं देवयज्येति दशमीं । आ० ५. १. । इति ॥

प्र देवत्रा ब्रह्मणे गातुरेत्वपो अच्छा मनसो न प्रयुक्ति ।
महीं मित्रस्य वरुणस्य धासिं पृथुज्रयसे रीरधा सुवृक्तिं ॥१॥
प्र । देवऽत्रा । ब्रह्मणे । गातुः । एतु । अपः । अच्छ । मनसः । न । प्रऽयुक्ति ।
महीं । मित्रस्य । वरुणस्य । धासिं । पृथुऽज्रयसे । रीरध । सुऽवृक्तिं ॥१॥

ब्रह्मणे । तृतीयार्थे चतुर्थी । ब्रह्मणा स्तोत्रेण । स्तूयमान इति शेषः । गातुर्देवानपो वा प्रतिगमनशीलः सोमो देवत्रा देवेषूत्तमाना अपो वसतीवर्येकधनालक्षणान्युदकान्यच्छाभि प्रेतु । प्रकर्षेण गच्छतु । तत्र दृष्टांतः । मनसो न प्रयुक्ति यथा मनसः प्रयुक्तिः प्रयोग उद्योगः शीघ्रं गच्छति तद्वत् । एवं सोमेऽपः प्रतिगते सति हे मदीयात्मन् अध्वर्यो वा महीं धासिं महत्सोमलक्षणमन्नं मित्रस्य वरुणस्य चार्थाय पृथुज्रयसे विस्तीर्णजवाय । महागतेरिंद्रस्य चार्थायेत्यर्थः । रीरध । संसाधय । संस्कुरु । दानयोग्यं कुरु । सुवृक्तिं सुष्ठु दोषैर्वर्जितां स्तुतिं च कुरु ॥

अध्वर्यवो हविष्मतो हि भूताच्छाप इतोशतीरुशंतः ।
अव याश्वष्टे अरुणः सुपर्णस्तमास्यध्वमूर्मिमद्या सुहस्ताः ॥२॥

अध्वर्यवः । हविष्मंतः । हि । भूत । अच्छ । अपः । इत । उशतीः । उशंतः ।
अव । याः । चष्टे । अरुणः । सुऽपर्णः । तं । आ । अस्यध्वं । ऊर्मिं । अद्य । सुऽहस्ताः ॥२॥

हे अध्वर्यवः यूयं हविष्मंतो ह्यभिषोतव्येन सोमलक्षणेन हविषा युक्ताः खलु भूत । भवत । किंच हे उशंतः सोमाभिषवं कर्तुं कामयमाना अध्वर्यवः यूयमुशतीः सोमाभिषवांगभावमभिलषंतीरेकधनालक्षणा अपो ऽच्छाभिमुख्येनेत । गच्छत । अरुणो रक्तवर्णः सुपर्णः सुपतनः सोमोऽवाधस्तादंतरिक्षे या मेघोद्गता अपश्यष्टे पश्यति हे सुहस्ताः सोमाभिषवादिशोभनकर्मकारित्वात् सुवर्णमयपवित्राद्यलंकृताः । यद्वा । शोभनहस्ताः । एतेऽध्वर्यवः यूयमद्येदानीं तं तादृशमूर्मिं सोमसंघातं ताभिरद्भिः सहास्यध्वं । आभिमुख्येन क्षिप्त महतादरेण दशापवित्रे शोधनार्थं प्रक्षिपत ॥

अध्वर्यवोऽप इता समुद्रमपां नपातं हविषा यजध्वं ।
स वो ददूर्मिमद्या सुपूतं तस्मै सोमं मधुमंतं सुनोत ॥३॥
अध्वर्यवः । अपः । इत । समुद्रं । अपां । नपातं । हविषा । यजध्वं ।
सः । वः । ददत् । ऊर्मिं । अद्य । सुऽपूतं । तस्मै । सोमं । मधुऽमंतं । सुनोत ॥३॥

हे अध्वर्यवः यूयमप एकधनालक्षणान्युदकानि । आहर्तुमिति शेषः । समुद्रमुदधिस्थानीयं जलाशयमित । गच्छत । इदानीमुत्तरोऽर्धचौ व्याख्यायते पश्चाद्द्वितीयः पादः । स्वार्थिकोऽयं क्रमः । अद्येदानीं सोऽपां नपाद्वो जलाशयं प्रतिगतेभ्यो युष्मभ्यं सुपूतं सुशुद्धमूर्मिं जलसमूहं ददत् । ददातु । यूयमपि तेन समूहेन तस्मा अपां नपाते मधुमंतं मधुरस्वादूपेतं सोमं सुनोत । अभिषुणुत । अभिषुतेन सोमाख्येन हविषापां नपातं वृष्टिकर्मण्यधिकृतं देवं यजध्वं ॥

यो अनिध्मो दीदयदप्स्वंतर्यं विप्रास ईळते अध्वरेषु ।
अपां नपान्मधुमतीरपो दा याभिरिंद्रो वावृधे वीर्याय ॥४॥
यः । अनिध्मः । दीदयत् । अप्ऽसु । अंतः । यं । विप्रासः । ईळते । अध्वरेषु ।
अपां । नपात् । मधुऽमतीः । अपः । दाः । याभिः । इंद्रः । ववृधे । वीर्याय ॥४॥

उत्तरार्धस्य प्रत्यक्षकृतत्वादेकवाक्यतायै युष्मच्छब्देन समानार्थो भवच्छब्दः प्रथमार्धेऽध्याहार्यः । यो भवानपां नपाद्प्स्वंतरपां मध्ये मेघस्थानेऽनिध्मः काष्ठवर्जितः सन् दीदयत् दीप्यते विप्रासो मेधाविन ऋत्विग्यजमाना अध्वरेषु यागेषु यं भवंतमीळते स्तुवंति हे अपां नपात् स त्वं मधुमतीर्मधुररसयुक्ता अपो वृष्टिलक्षणा दाः । अस्मभ्यं देहि । याभिर्वसतीवर्येकधनारूपाभिः सोमेन मिश्रिताभिरद्भिरिंद्रो वीर्याय वृत्रवधादिशूरकर्मणे ववृधे वर्धते ता अपो देहीति संबंधः ॥

याभिः सोमो मोदते हर्षते च कल्याणीभिर्युवतिभिर्न मर्यः ।
ता अध्वर्यो अपो अच्छा परेहि यदासिंचा ओषधीभिः पुनीतात् ॥५॥
याभिः । सोमः । मोदते । हर्षते । च । कल्याणीभिः । युवतिऽभिः । न । मर्यः ।
ताः । अध्वर्यो इति । अपः । अच्छ । परा । इहि । यत् । आऽसिंचाः । ओषधीभिः ।
पुनीतात् ॥५॥

अभिषुतः सोमो याभिर्वसतीवर्येकधनाख्याभिरद्भिः सह मोदते मुदितो भवति हर्षते च । पुनश्चात्रादः

रार्था। अत्यर्थं हृष्यतीत्यर्थः। तत्र दृष्टांतः। कल्याणीभिः कमनीयाभिर्युवतिभिस्तरुणीभिः स्त्रीभिः सह मर्यो न यथा मनुष्यो मोदते तद्वत्। हे अध्वर्यो त्वं तास्तादृशीरपोऽच्छाभिप्राप्तुं परेहि। जलाशयं प्रतिगच्छ। किंच यद्यदाहृताभिस्ताभिरद्भिरासिंचाः आ समंतात्सोमानासिंचसि तदौषधीभिः सोमैः सहापश्च पुनीतात्। दृशापवित्रेण पुनीहि ॥ ॥२४॥

एवेद्यूने युवतयो नमंत यदीमुशन्नुशतीरित्यच्छ।
सं जानते मनसा सं चिकित्रेऽध्वर्यवो धिषणापश्च देवीः ॥६॥
एव। इत्। यूने। युवतयः। नमंत। यत्। ईं। उशन्। उशतीः। एति। अच्छ।
सं। जानते। मनसा। सं। चिकित्रे। अध्वर्यवः। धिषणा। आपः। च। देवीः ॥६॥

युवतयस्तरुण्यः स्त्रियो यूने तरुणाय नमंत यथा प्रह्वीभवंति एवैवं वसतीवर्येकधनाख्या आपः सोमाय प्रह्वीभवंति। यद्वा। युवतयः सोमेन सह मिश्रयित्र्य आपो यूनेऽभिषवादिकर्मणामात्मना सह मिश्रयित्रे अत्रैवंऽध्वर्यवे नमंत। प्रह्वीभवंत्येव। इदिति पूरणः। कदा। यद्यदोशन्नभिषवार्थं वसतीवरीः कामयमानः सोमः सोमाभिषवं कर्तुं कामयमानोऽध्वर्युर्वोशतीः सोमेन सह मिश्रीभावमभिषवादिकर्मांगभावं च कामयमाना ईमेना अपोऽच्छ प्राप्तुमेति गच्छति तदोपनमंते। अध्वर्यवो धिषणा तदीया स्तुतिलक्षणा वाक्च देवीर्दिव्य आपश्च मनसा विशिष्टया बुद्ध्या सं जानते। सम्यग्जानंति। सं चिकित्रे। स्वं स्वमधिकारं परस्परोपकारं च चक्षुषा सम्यक् पश्यंति ॥

यो वो वृताभ्यो अकृणोदु लोकं यो वो मह्या अभिश्रस्तेरमुंचत्।
तस्मा इंद्राय मधुमंतमूर्मिं देवमादनं प्र हिणोतनापः ॥७॥
यः। वः। वृताभ्यः। अकृणोत्। ऊं इति। लोकं। यः। वः। मह्याः। अभिऽश्रस्तेः। अमुंचत्।
तस्मै। इंद्राय। मधुऽमंतं। ऊर्मिं। देवऽमादनं। प्र। हिणोतन। आपः ॥७॥

य इंद्रो वृताभ्यो मेघैरावृताभ्यः परिवेष्टिताभ्यो वो युष्मभ्यमद्यो लोकं मेघोदरान्निर्गमनमार्गमकरणोत् अकरोत्। उ इति पूरणः। किंच यो वो युष्मानपो मह्या महत्या अभिश्रस्तेर्मेघपरिवेष्टनाभिहिंसनादमुंचत् मोचितवान्। हे आपः यूयं तस्मै तादृशायेंद्राय मधुमंतं मधुरस्वादुयुक्तं देवमादनमिंद्रादिदेवानां सोमेन सह मिश्रीभूय तर्पयितारमूर्मिमप्संघातं प्र हिणोतन। अस्मदग्रं प्रति गमयत। सोमाभिषवकर्मांगभावाय प्रस्थापयत ॥

प्रास्मै हिनोत मधुमंतमूर्मिं गर्भो यो वः सिंधवो मध्व उत्सः।
घृतपृष्ठमीड्यमध्वरेष्वापो रेवतीः शृणुता हवं मे ॥८॥
प्र। अस्मै। हिनोत। मधुऽमंतं। ऊर्मिं। गर्भः। यः। वः। सिंधवः। मध्वः। उत्सः।
घृतऽपृष्ठं। ईड्यं। अध्वरेषु। आपः। रेवतीः। शृणुत। हवं। मे ॥८॥

अत्र यच्छब्दसंबंधाद्वितीयः पादः पूर्वं व्याख्येयः। हे सिंधवः स्यंदनशीला आपः वो युष्माकं यो गर्भो मध्वो मधुररसस्योत्स उत्स्यंदनः प्रस्रवणः। यच्छब्दयोगात्तच्छब्दोऽध्याहार्यः। तं मधुमंतं मधुररसोपेतमूर्मिमप्संघातं। सारमित्यर्थः। अस्मा अस्मिंद्रस्यार्थाय प्र हिनोत। प्रहिणुत ॥

तं सिंधवो मत्सरमिंद्रपानमूर्मिं प्र हेत य उभे इयर्ति।
मदच्युतमौशनं नभोजां परि चितंतुं विचरंतमुत्सं ॥९॥

नं । सिंधवः । मत्सरं । इंद्रऽपानं । ऊर्मिं । प्र । हेत । यः । उभे इति । इयर्ति । मदऽच्युतं । औशानं । नभःऽजां । परि । चिऽतंतुं । विऽचरंतं । उत्सं ॥ ९॥

हे सिंधवः स्यंदनशीला आपः यो युष्मदीयः सारभूतः समूह उभे अस्मभ्यं दृष्टादृष्टफले दाता सन्नियर्ति कर्मांगभावं प्रतिपद्यते मत्सरं मादयितारमिंद्रादिदेवानां तर्पयितारमिंद्रपानं देवानां प्रमुखेनेंद्रेण पानीयं तं तादृशमूर्मिमुदकसमूहं प्र हेत । प्रगमयत । अस्मद्यज्ञं प्रति प्रेरयत । कीदृशं । मदच्युतं मदस्य च्यावकमौशानं सोमेन सह मिश्रीभावं कामयमानं नभोजां नभस्यंतरिक्षे वृष्टिरूपेण जातं परि सर्वतस्त्रितंतुं त्रयाणां लोकानां तनितारं विस्तारयितारं विचरंतं यज्ञपात्रेषु गच्छंतमुत्समुत्स्यंदनं । तर्पितारं देवान्प्रत्यूर्ध्वं गंतारमित्यर्थः ॥

अपोनप्त्रीय एकधनाख्यावृत्ताख्यावर्वृततीरित्येषा । सूचितं च । आवर्वृततीरध नु द्विधारा इत्यावृत्ताख्येक-धनासु । आ० ५. १. । इति । तत्रैव हिनोता न इत्येषा । सूत्रं पूर्वमुदाहृतं ॥

आवर्वृततीरध नु द्विधारा गोषुयुधो न नियवं चरंतीः ।
ऋषे जनित्रीर्भुवनस्य पत्नीरपो वंदस्व सवृधः सयोनीः ॥१०॥
आऽवर्वृततीः । अध । नु । द्विऽधाराः । गोषुऽयुधः । न । निऽयवं । चरंतीः ।
ऋषे । जनित्रीः । भुवनस्य । पत्नीः । अपः । वंदस्व । सऽवृधः । सऽयोनीः ॥१०॥

अधाथानंतरं गोषुयुधो न । गोष्वप्सु निमित्तभूतासु मेघैः सह युध्यत इति गोषुयुदिंद्रः । तस्य यथा वृष्टिलक्षणा अपो द्विधाराः । द्विशब्दोऽनेकत्ववाची । अनेकधाराः । अपर्यंतधारा इत्यर्थः । अस्माकमध्वरेवस्थिता आवर्वृततीरावृत्ता नियवं सोमं प्रति निश्चयेन मिश्रीभावं चरंतीर्गच्छंतीर्भुवनस्य लोकस्य जनित्रीर्जनयित्रीः पत्नीः पालयित्रीश्च सवृधः सह सोमस्य वर्धयित्रीः सयोनीः सोमेन सह समानस्थाना हे ऋषे मदीयांतरात्मन् अध्वर्यो वा त्वमेवंभूता अपो नु क्षिप्रं वंदस्व । स्तुहीत्यर्थः ॥ ॥२५॥

हिनोता नो अध्वरं देवयज्या हिनोत ब्रह्म सनये धनानां ।
ऋतस्य योगे वि ष्यध्वमूधः श्रुष्टीवरीर्भूतनास्मभ्यमापः ॥११॥
हिनोत । नः । अध्वरं । देवऽयज्या । हिनोत । ब्रह्म । सनये । धनानां ।
ऋतस्य । योगे । वि । स्यध्वं । ऊधः । श्रुष्टीऽवरीः । भूतन । अस्मभ्यं । आपः ॥११॥

हे ऋत्विजः हिनोत प्रहिणुत प्रगमयत प्रीत्सर्पयतैतमध्वरं यज्ञं देवयज्या देवयज्यायै देवयजनार्थं । किंच प्रहिणुत ब्रह्म स्तुत्याख्यं यथाशास्त्रक्रमेण सनये लब्धये नोऽस्माकं धनानां । किंचतस्य यज्ञस्य योगे संयोगे यदेतदूधरिव सोमपूर्णमधिषवणचर्म वर्तते । अथवा योगसंबंधाच्छकटं योगः । तद्धि तत्रैव युज्यते । तेनाधिषवणचर्मण ऊधसोऽधस्तादवस्थितेनेति मन्यमानो निरुक्तकारो ब्रवीति याज्ञे शकट इति वा । नि० ६. २२. । इति । यदेतद्यज्ञशकटस्याधस्तादुपरि वाधिषवणचर्म एतद्धि ष्यध्वं । विमुंचध्वं । यद्दचमसस्थाल्यादिषु यो निषेकः सोमस्यैतद्विमोचनमधिषवणचर्मोधसः । तद्धि सोम उत्सिच्यमाने स्रधीभवति यथेतरन्नोरूधो दुह्यमानायां गवि । एवमृत्विज उत्काधुनेव सोमसंमिश्रा अपो ब्रवीति । यूयमपि हे आपः एभिश्छत्विग्भिरुत्सिच्यमानाः श्रुष्टीवरीः सुखवत्यो भूतन । भवतास्मभ्यं । एवमच प्रशब्देनार्थस्य सुतरां प्रकटता भवतीति भाष्यकारेण प्रशब्दोऽध्याहृतः प्रहिणुतेति । अध्वरमित्यनेन संबंधाद्धिनोतेर्गत्यर्थत्वमुपपद्यते । एतस्या ऋचो व्याख्यानं निरुक्तटीकाया उद्धृतं ॥

प्रातरनुवाकस्यापो रेवतीरित्येषा प्रतिपत् । सूचितं च । आपो रेवतीः क्षयथा हि वस्व उपप्रयंत इति सूक्ते । आ० ४. १३. । इति ॥

आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं बिभृथामृतं च ।
रायश्च स्थ स्वपत्यस्य पत्नीः सरस्वती तद्गृणते वयो धात् ॥१२॥
आपः । रेवतीः । क्षयथ । हि । वस्वः । क्रतुं । च । भद्रं । बिभृथ । अमृतं । च ।
रायः । च । स्थ । सुऽअपत्यस्य । पत्नीः । सरस्वती । तत् । गृणते । वयः । धात् ॥१२॥

हे आपो रेवती रेवत्यो धनवत्यः यूयं वस्वो वसुनो धनस्य क्षयथ हि । ईशिध्वे खलु । किंच भद्रं भजनीयं क्रतुं च सोमयागादिलक्षणं कर्म चामृतं चामरणरूपं तज्जन्यफलं च बिभृथ । धारयथ । पुष्णीथ वा । तथा रायश्च धनस्य च स्वपत्यस्य शोभनपुत्रस्य च पत्नीः पत्न्यः पालयित्र्यः स्थ । भवथ । तथा सरस्वती तदभिमानिनी देवता गृणते स्तुवते मह्यं तदिदं सर्वं वयोऽन्नलक्षणं धनं धात् । ददातु ॥

अपोनप्त्रीये प्रति यदाप इत्येषा । सूचितं च । प्रति यदापो अदृश्रमायतीरिति प्रतिदृश्यमानासु । आ० ५. १. । इति ॥

प्रति यदापो अदृश्रमायतीर्घृतं पयांसि बिभ्रतीर्मधूनि ।
अध्वर्युभिर्मनसा संविदाना इंद्राय सोमं सुषुतं भरंतीः ॥१३॥
प्रति । यत् । आपः । अदृश्रं । आऽयतीः । घृतं । पयांसि । बिभ्रतीः । मधूनि ।
अध्वर्युऽभिः । मनसा । संऽविदानाः । इंद्राय । सोमं । सुऽसुतं । भरंतीः ॥१३॥

हे आपः आयतीरस्मद्यज्ञं प्रत्यागच्छंतीर्यत् ॥ सुपां सुलुगिति विभक्तेर्लुक् ॥ या युष्मान्प्रत्यदृश्रं प्रतिपश्यामि घृत सोमसंसृष्टमाज्यं मधूनि मधुसदृशानि मृष्टरसानि पयांस्युदकानि च संभूय बिभ्रतीर्यागकाले धारयंतीः तथाध्वर्युभिर्मनसांतःकरणेन संविदानाः संभाषमाणाः किंचिंद्रायेंद्रार्थं सुषुतं सुष्ठु सुतं सोमं भरंतीर्धारयंतीः एवंभूतास्ता युष्मान्स्तौमीति शेषः ॥

अपोनप्त्रीय एमा अग्मन्निति द्वे । सूचितं च । एमा अग्मन्रेवतीर्जीवधन्या इति द्वे सन्नासूत्तरया परिधाय । आ० ५. १. । इति ॥

एमा अग्मन्रेवतीर्जीवधन्या अध्वर्यवः सादयता सखायः ।
नि बर्हिषि धत्तन सोम्यासोऽपां नप्त्रा संविदानास एनाः ॥१४॥
आ । इमाः । अग्मन् । रेवतीः । जीवऽधन्याः । अध्वर्यवः । सादयत । सखायः ।
नि । बर्हिषि । धत्तन । सोम्यासः । अपां । नप्त्रा । संऽविदानासः । एनाः ॥१४॥

रेवती रेवत्यो धनवत्यो जीवधन्या जीवानां पालयित्र्यः प्रीणयित्र्यो वेमा ईदृग्भूता आप आगमन् । अस्मद्यज्ञं प्रत्यागच्छन् । एतज्ज्ञात्वा हे सखायः सखिभूता हे अध्वर्यवः यूयमपां नप्त्रा वृष्टिकर्मस्वधिष्ठातेन देवेन सह संविदानाः संजानयमाना एना एता अपः सादयत । स्थापयत । कुत्र सादयाम इति उच्यते । सोम्यासः सोमसंपादिनोऽध्वर्यवः यूयं बर्हिषि वेद्यामास्तीर्णे कुशमये नि धत्तन । नियमेन स्थापयत ॥

आग्मन्नाप उशतीर्बर्हिरेदं न्यध्वरे असदन्देवयंतीः ।
अध्वर्यवः सुनुतेंद्राय सोममभूदु वः सुशका देवयज्या ॥१५॥

आ। अग्मन्। आपः। उशतीः। बर्हिः। आ। इदं। नि। अध्वरे। असदन्। देवऽयंतीः।
अध्वर्यवः। सुनुत। इंद्राय। सोमं। अभूत्। उं इति। वः। सुऽशकः। देवऽयज्या ॥१५॥

आपो वसतीवर्येकधनाख्या इदमीदृशं बर्हिर्वेदिस्तरणमुशतीरुशत्यः कामयमाना आगमन्। आगच्छन्। अस्मद्यज्ञं प्रत्या आगत्य चाध्वरेऽस्मदीये यज्ञे देवयंतीर्देवान्कामयमानाः। तर्पयितुमिच्छंत्य इत्यर्थः। न्यसदन्। न्यसीदन्। एतज्ज्ञात्वा हे अध्वर्यवः यूयमिंद्रायेंद्रार्थं सोमं सुनुत। अभिषुणुत। इदानीमपां प्रसादाद्वो युष्माकं देवयज्या देवानिंद्रादीनुद्दिश्य क्रियमाणा यागक्रिया सुशका सुष्ठु कर्तुं शक्याभूदु। आसीदेव ॥ ॥२६॥

आ न इत्येकादशर्चं द्वितीयं सूक्तं कवषस्यार्षं वैष्टुभं वैश्वदेवं। अनुक्रांतं च। आ न एकादश वैश्वदेवमिति ॥ गतः सूक्तविनियोगः ॥ एकादशिनस्य वैश्वदेवस्य पशोः पुरोडाशस्या न इत्येषानुवाक्या। सूचितं च। विश्वे अद्य मरुतो विश्व ऊती नो देवानामुप वेतु शंसः। आ० ३. ७.। इति ॥

आ नो देवानामुप वेतु शंसो विश्वेभिस्तुरैरवसे यजत्रः।
तेभिर्वयं सुषखायो भवेम तरंतो विश्वा दुरिता स्याम ॥१॥
आ। नः। देवानां। उप। वेतु। शंसः। विश्वेभिः। तुरैः। अवसे। यजत्रः।
तेभिः। वयं। सुऽसखायः। भवेम। तरंतः। विश्वा। दुःऽइता। स्याम ॥१॥

देवानां स्तोतॄणां नोऽस्माकं शंसः स्तोतव्यो यजत्रो यष्टव्यः एवंभूत इंद्रस्तुरैस्त्वरणशीलैर्विश्वेभिः सर्वैर्मरद्भिः सहावसेऽस्मद्यज्ञरक्षणार्थमोप वेतु। उपागच्छतु। वयमपि तेभिस्तैः सह सुसखायः शोभनसखायो भवेम। स्याम। किंच विश्वा दुरिता विश्वानि दुरितानि पापानि तरंतः स्याम ॥

परि चिन्मर्तो द्रविणं ममन्यादृतस्य पथा नमसा विवासेत्।
उत स्वेन क्रतुना सं वदेत श्रेयांसं दक्षं मनसा जगृभ्यात् ॥२॥
परि। चित्। मर्तः। द्रविणं। ममन्यात्। ऋतस्य। पथा। नमसा। आ। विवासेत्।
उत। स्वेन। क्रतुना। सं। वदेत। श्रेयांसं। दक्षं। मनसा। जगृभ्यात् ॥२॥

मर्तो मनुष्यो यजमानः परि चित्सर्वतो द्रविणं विश्वेषां देवानां यागार्थं धनं ममन्यात्। मन्यतिः कांतिकर्मा। कामयेत। लब्धुमिच्छेत्। धनं लब्ध्वा चर्तस्य यज्ञस्य पथा मार्गेण नमसा हविराख्येनान्नेना विवासेत्। परिचरेत्। उतापि च स्वेनात्मीयेन क्रतुना प्रज्ञानेन। मनसेत्यर्थः। सं वदेत। संवादोऽत्र समाधानमुच्यते। हविर्गृहीत्वा वषट्करिष्यन्विश्वान्देवान्मनसाधायेदित्यर्थः। विश्वेषां देवानां यागानंतरं च तत्प्रसादाच्छ्रेयांसमतिशयेन प्रशस्यमात्मानं दक्षं प्रवृद्धं सर्वव्यापिनं मनसा ध्यानसाधनेनांतःकरणेन जगृभ्यात्। गृह्णीयात् ॥

अधायि धीतिरसमृग्मंशास्तीर्थे न दस्ममुप यंत्यूमाः।
अभ्यानशम सुवितस्य भूषं नवेदसो अमृतानामभूम ॥३॥
अधायि। धीतिः। असमृग्यं। अंशाः। तीर्थे। न। दस्मं। उप। यंति। ऊमाः।
अभि। आनशम। सुवितस्य। भूषं। नवेदसः। अमृतानां। अभूम ॥३॥

धीतिर्देवयागक्रियाधायि। निहिता। स्थापिता। अस्माभिः प्रवर्तितेत्यर्थः। तदनंतरमूमा अवितारस्तर्पयितारोऽंशा अस्माभिर्दत्ता हविर्भागा दस्मं दर्शनीयं शत्रूणामुपक्षपयितारं वासक्षयमसमानदृष्टिं। उत्कृष्टजन्मानमित्यर्थः। एवंभूतं देवसंघमुप यंति। उपगच्छंति। तत्र दृष्टांतः। तीर्थे न यथा गंगादितीर्थे तर्पणमुक्ते

विरुष्टा अपामंशा देवसंघमुपगच्छंति तद्वत्। तदनंतरं वयं सुवितस्य सु इतस्य सुष्ठु प्राप्तस्य स्वर्गादिकस्य शुभं सुखमभ्यानशुम । अभिप्राप्नवाम । किंच वयममृतानां देवानां नवेदसः ॥ न वेदेत्येतस्मिन्नर्थे नवेदःशब्दो नञ्राग्नपान्नवेदा इति निपातितः ॥ न न वेत्तारो वेत्तार एव । स्वरूपतो ज्ञातार एवेत्यर्थः । अभूम । भवेमेत्याशास्महे ॥

नित्यश्चाकन्यात्स्वपतिर्दमूना यस्मा उ देवः सविता जजान ।
भगो वा गोभिरर्यमेमनज्यात्सो अस्मै चारुश्छदयदुत स्यात् ॥४॥
नित्यः। चाकन्यात्। स्वऽपतिः। दमूनाः। यस्मै। ऊं इति। देवः। सविता। जजान।
भगः। वा। गोभिः। अर्यमा। ईं। अनज्यात्। सः। अस्मै। चारुः। छदयत्। उत। स्यात्॥४॥

नित्यः कल्पावस्थायी प्रजापतिश्चाकन्यात् । तस्मै दृष्टादृष्टफलं दातुं कामयतां । कीदृशः । स्वपतिः स्वीयानां प्रजानां स्वामी धनपतिर्वा दमूना दानमनाः । कस्मै कामयतामिति उच्यते । उ उतापि च यस्मै यजमानाय मह्यं सविता सर्वस्य प्रेरको देवो जजान जनितवान् दृष्टादृष्टफलं दत्तवानित्यर्थः । वाशब्दः समुच्चये । तथा भगो देवश्च गोभिरस्मदीयाभिः स्तुतिरूपाभिर्वाग्भिरर्यमा देवश्चेमीदृग्भूतं दृष्टादृष्टफलमनज्यात् । व्यक्तीकुर्यात् । दद्यादित्यर्थः । उतापि च स्यात् अन्योऽपि यो देवगणोऽस्ति चारू रमणीयः सोऽपि देवगणोऽस्मै यजमानाय मह्यं छदयत् । दृष्टादृष्टफलं दातुं कामयतामित्येतदाशास्महे ॥

इयं सा भूया उषसामिव क्षा यद्ध क्षुमंतः शवसा समायन् ।
अस्य स्तुतिं जरितुर्भिक्षमाणा आ नः शग्मास उप यंतु वाजाः ॥५॥
इयं। सा। भूयाः। उषसाऽइव। क्षाः। यत्। ह। क्षुऽमंतः। शवसा। संऽआयन्।
अस्य। स्तुतिं। जरितुः। भिक्षमाणाः। आ। नः। शग्मासः। उप। यंतु। वाजाः॥५॥

क्षुमंतः। क्षुशब्दोऽन्नवाची शब्दवाची वा । अन्नवंतः स्तुतिमंतो वेत्यर्थः । एवंभूता देवाः शवसा बलेन यद्यामस्मदीयां स्तुतिं प्रति समायन् समागच्छन् संप्राप्ताः सेयं स्तुतिर्देवानां प्राप्या भूयाः । भूयात् । भवतु । उषसामिव क्षाः यथा पृथिव्युषसां व्याप्त्या सर्वेषां प्राप्या भवति तद्वत् । किंच जरितुः स्तोतुरस्य मम स्तुतिं भिक्षमाणा याचमानाः शग्मासः । शग्ममिति सुखनाम । सुखाः सुखकरा वाजाः सुधन्वनः पुत्रास्त्वयोऽप्युर्विभ्वा वाज इत्येते नोऽस्मानाभिमुख्येनोप यंतु । उपगच्छंतु ॥ ॥२७॥

अस्येदेषा सुमतिः पप्रथानाभवत्पूर्व्या भूमना गौः ।
अस्य सनीळा असुरस्य योनौ समाने आ भरणे बिभ्रमाणाः ॥६॥
अस्य। इत्। एषा। सुऽमतिः। पप्रथाना। अभवत्। पूर्व्या। भूमना। गौः।
अस्य। सऽनीळाः। असुरस्य। योनौ। समाने। आ। भरणे। बिभ्रमाणाः॥६॥

इदिदानीमस्य देवगणसंबंधिन्येषा सुमतिः सुष्टुस्तुतिः पप्रथानाभवत् । विस्तीर्यमाणाभूत् । अस्माभिः क्रियमाणेत्यर्थः । कीदृशी । पूर्व्या पूर्वकालीना भूमना भूम्ना बहुत्वेन युक्तेति शेषः । सर्वदेवसंबंधित्वाद्बहुत्वं जातेत्यर्थः । गौर्दैवान्प्रतिगंत्री । एतज्ज्ञात्वा सर्वे देवा असुरस्य प्रजारूपबलवतोऽस्य मम संबंधिनि समाने सर्वदेवसाधारणे भरणे सर्वेषां देवानां पुष्टिकरे योनौ यज्ञाख्ये स्थाने सनीळाः समानस्थाना बिभ्रमाणा अस्मदर्थं दृष्टादृष्टफलं धारयंत आ गच्छंतिति शेषः ॥

किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः ।
संतस्थाने अजरे इतऊती अहानि पूर्वीरुषसो जरंत ॥७॥
किं । स्वित् । वनं । कः । ऊं इति । सः । वृक्षः । आस । यतः । द्यावापृथिवी इति । निःऽततक्षुः ।
संतस्थाने इति संऽतस्थाने । अजरे इति । इतऊती इतीतःऽऊती । अहानि । पूर्वीः । उषसः । जरंत ॥७॥

यतो यस्मादृक्षाद्द्यावापृथिवी द्यावापृथिव्यौ निष्टतक्षुः देवा निःशेषेण क्षतवंतः स तादृशो वृक्षः क उ आस । कीदृग्वा बभूव । तदुत्पादकं वनमरण्यं किं स्वित् । संतस्थाने सम्यक्तिष्ठंत्यावजरे जरावर्जिते इतऊती इत एतेभ्यो देवेभ्यो रक्षणं ययोस्ते । किंचाहानि सर्वाणि दिनानि पूर्वीर्बहूरुषसश्च देवा निष्टतक्षुः । एवंभूतान्देवाञ्जरंत । स्तोतारः स्तुवंति ॥

नैतावदेना परो अन्यदस्त्युक्षा स द्यावापृथिवी बिभर्ति ।
त्वचं पवित्रं कृणुत स्वधावान्यदीं सूर्यं न हरितो वहंति ॥८॥
न । एतावत् । एना । परः । अन्यत् । अस्ति । उक्षा । सः । द्यावापृथिवी इति । बिभर्ति ।
त्वचं । पवित्रं । कृणुत । स्वधाऽवान् । यत् । ईं । सूर्यं । न । हरितः । वहंति ॥८॥

द्यावापृथिव्योर्निर्माणरूपमेतावद्देवजातं सामर्थ्येन युक्तमिति न । अपि त्वेनेतेभ्यो देवेभ्यः पर उत्कृष्टो ऽन्यदन्यो हिरण्यगर्भोऽस्ति । उक्षा सेक्ता । प्रजानां स्रष्टेत्यर्थः । हिरण्यगर्भः परमसूक्ष्मो वायुरूपो लिंगात्मापः प्रविश्य द्यावापृथिवी द्यावापृथिव्यौ बिभर्ति । धारयति । किंच स्वधावान्बलवानन्नवान्वा स हिरण्यगर्भः पवित्रं पवित्रमयं त्वचमात्मीयं शरीरं दीप्तं मंत्रं वा क्षणुत । करोति । कदेति उच्यते । यद्यदेमिमां त्वचं हरितोऽश्वाः सूर्यं न वहंति न प्रापयंति तदेति । रुष्टेः प्रागित्यर्थः ॥

स्तेगो न क्षामत्येति पृथ्वीं मिहं न वातो वि ह वाति भूम ।
मित्रो यत्र वरुणो अज्यमानोऽग्निर्वने न व्यसृष्ट शोकं ॥९॥
स्तेगः । न । क्षां । अति । एति । पृथ्वीं । मिहं । न । वातः । वि । ह । वाति । भूम ।
मित्रः । यत्र । वरुणः । अज्यमानः । अग्निः । वने । न । वि । असृष्ट । शोकं ॥९॥

स्तेगः ॥ स्त्यै ष्टै शब्दसंघातयोः ॥ रश्मिसंघात्मादित्यः पृथ्वीं विस्तीर्णां क्षां भूमिं तेजसा नात्येति । नातिगच्छति । मर्यादया तिष्ठतीत्येवमादित्यः स्तूयते । वातो वायुरपि खलु भूम भूमिं मिहं वृष्टिं न वि वाति । समर्थोऽपि सन् विविधं न गमयति । भूमिं प्रति सावशेषमेव वर्षयतीति वातः स्तूयते । यत्र यस्मिन्प्रजापतौ मित्रो देवोऽज्यमानो व्यज्यमानो व्यक्तीभवन् । उत्पाद्यमान इत्यर्थः । शोकं स्वीयां दीप्तिं व्यसृष्ट विसृजति सर्वतो विक्षिपति तथा वरुणश्च व्यक्तीभवन्स्वदीप्तिं विक्षिपति । तत्र दृष्टांतः । अग्निर्देवो वने न यथा वृक्षसंघाते स्वदीप्तिं सर्वतो विसृजति तद्वत् । तादृशं प्रजापतिं स्तौमीति शेषः ॥

स्तरीर्यत्सूत सद्यो अज्यमाना व्यथिरव्यथीः कृणुत स्वगोपा ।
पुत्रो यत्पूर्वः पित्रोर्जनिष्ट शम्यां गौर्जगार यद्ध पृच्छान् ॥१०॥

स्तरीः । यत् । सूते । सद्यः । अज्यमाना । व्यथिः । अव्यथीः । कृणुते । स्वऽगोपा ।
पुत्रः । यत् । पूर्वैः । पित्रोः । जनिष्ट । शम्यां । गौः । जगार । यत् । ह । पृच्छान् ॥१०॥

अरण्योः कारणभूतां शमीं गोत्वेन रूपयति । स्तरीर्निवृत्तप्रसवा गौः सद्यः शीघ्रमद्यमाना निषिध्यमानेतस्का सती यद्यदा सूते वत्सं प्रसूते तदा व्यथिर्दुःखानां बाधयित्री स्वगोपा स्वायत्तगोमृका स्वभूतरक्षणा वा सती सा गौरव्यथीर्व्यथारहिताः प्रजाः कृणुते । करोति । यदा शमी पुत्रस्थानीयमश्वत्थं प्रसूते तदानीमरण्याहरणाय तादृशमश्वत्थमन्विष्यतामृत्विजामश्वत्थस्य जनयित्री शमी सुखहेतुर्भवतीत्यर्थः । शमीगर्भादश्वत्थादरणी आहर्तव्ये । श्रूयते हि । शमीगर्भादग्निं मंथंतीति । अपि च पूर्वैः पुरातनैः पुत्रः । पुन्नाम्नो नरकात्त्राता । यद्वा । पुत्रस्थानीयोऽग्निः । पित्रोर्जनयित्र्योररण्योः सकाशाद्यदा जनिष्ट मथनेन प्रादुर्भवति तदानीं गौः पृथिवी तयोररण्योर्मातृभूतां शम्यामश्वत्थगर्भां तां शमीं ॥ सुपां सुलुगिति सुपो ङ्यादेशः ॥ जगार । उन्निरति । यत्र यां खलु शमीं पृच्छान् ऋत्विजः पृच्छंति वीप्संति गवेषयंति ॥

उत कण्वं नृषदः पुत्रमाहुरुत श्यावो धनमादत्त वाजी ।
प्र कृष्णाय रुशदपिन्वतोधर्ऋतमत्र नकिरस्मा अपीपेत् ॥११॥
उत । कण्वं । नृऽसदः । पुत्रं । आहुः । उत । श्यावः । धनं । आ । अदत्त । वाजी ।
प्र । कृष्णाय । रुशत् । अपिन्वत । ऊधः । ऋतं । अत्र । नकिः । अस्मै । अपीपेत् ॥११॥

उतापि च कण्वमृषिं नृषदः पुत्रमाहुः । वेदवादिनो वदंति । उतापि च वाजी हविर्लक्षणान्नवान्कण्वः श्यावः श्यामवर्णः सन्नस्मादग्नेः सकाशाद्धनमादत्त । अगृह्णात् । कृष्णाय श्यामवर्णाय नार्षदाय कण्वायाग्नेरूधा रुशद्रोचमानरूपं प्रापिन्वत । प्रासिंचत् । अचेत्यमग्निव्यतिरिक्तः कश्चिदपि देवोऽस्मै कण्वायर्तं यज्ञं नकिरपीपेत् । नावर्धयत् । युवं श्यावाय रुशतीमदत्तं । ऋ० १. ११७. ८. । इत्युक्तं ॥ ॥२८॥

प्र सु ग्मंतेति नवर्चं तृतीयं सूक्तं । आदितः पंच जगत्यः । अथ चतस्रस्त्रिष्टुभः । पूर्ववदृषिर्देवते । तथा चानुक्रांतं । प्र सु ग्मंता नव पंचाद्या जगत्य इति ॥ गतो विनियोगः ॥

प्र सु ग्मंता धियसानस्य सक्षणि वरेभिर्वरां अभि षु प्रसीदतः ।
अस्माकमिंद्र उभयं जुजोषति यत्सोम्यस्यांधसो बुबोधति ॥१॥
प्र । सु । ग्मंता । धियसानस्य । सक्षणि । वरेभिः । वरान् । अभि । सु । प्रऽसीदतः ।
अस्माकं । इंद्रः । उभयं । जुजोषति । यत् । सोम्यस्य । अंधसः । बुबोधति ॥१॥

इंद्रः स्वभूतौ हरी धियसानस्येंद्रागमनं चिंतयतो यजमानस्य मम संबंधिनि सक्षणि सेवायां सवनके सेवे यज्ञे निमित्ते ग्मंतागच्छंतौ सु सुष्ठु प्रेरयति । ततः स इंद्रो वरेभिर्वरणीयैर्मार्गैः प्रसीदतो हविरासादयतो यजमानस्य वरानुत्कृष्टान्हविर्विशेषान् स्तुतिविशेषांश्चाभि लक्षीकृत्य सु सुष्ठागच्छतु । इंद्र आगतः सन्नस्माकं स्वभूतमुभयं हविश्च स्तुतिश्चेतदुभयं जुजोषति । सेवतां । भक्षयतु शृणोतु चेत्यर्थः । यद्यदा सोम्यस्य सोमसंपादिनो ममांधसोऽन्नरूपस्य सोमस्य । रसमिति शेषः । बुबोधति बुध्यते जिह्वया विजानाति । सोमं पिबतीत्यर्थः । तदा जुजोषतीति पूर्वेण संबंधः ॥

वींद्र यासि दिव्यानि रोचना वि पार्थिवानि रजसा पुरुष्टुत ।
ये त्वा वहंति मुहुरध्वरां उप ते सु वन्वंतु वग्वनाँ अराधसः ॥२॥

वि। इंद्र। यासि। दिव्यानि। रोचना। वि। पार्थिवानि। रजसा। पुरुऽस्तुत।
ये। त्वा। वहंति। मुहुः। अध्वरान्। उप। ते। सु। वन्वंतु। वग्वनान्। अराधसः॥२॥

हे इंद्र दिव्यानि दिवि भवानि रोचना रोचनानि दीप्तिस्वभावकानि ज्योतींषि यद्वा दिव्यालोकान्वि यासि। व्याप्नोषि। हे पुरुष्टुत बहुभिः स्तुतेंद्र पार्थिवानि पृथिव्यां भवानि रजसात्मीयेन ज्योतिषा विशुद्धत्वेन। यद्वा ॥ रजःशब्दाच्छस आकारः ॥ पार्थिवाल्लोकान्। व्याप्नोषि। ये त्वदीया अश्वा मुहुः पुनःपुनरध्वरानस्मदीयान्यज्ञान्प्रति त्वा त्वामुप वहंति समीपे प्रापयंति तेऽश्वा वग्वनान्वचनेन स्तुत्या संभक्तॄनराधसो धनरहितानस्मान् सु सुष्ठु वन्वंतु। धनप्रदानार्थं संभजंतां ॥

तदिन्मे छंत्सद्वपुषो वपुष्टरं पुचो यज्जानं पित्रोरधीयति।
जाया पतिं वहति वग्मुना सुमत्पुंस इन्द्रो वहतुः परिष्कृतः ॥३॥
तत्। इत्। मे। छंत्सत्। वपुषः। वपुःऽतरं। पुचः। यत्। जानं। पित्रोः। अधिऽइयति।
जाया। पतिं। वहति। वग्मुना। सुऽमत्। पुंसः। इत्। भद्रः। वहतुः। परिऽकृतः॥३॥

वपुषः। वपू रूपं। तद्वाञ्छ्यते। वपुष्मतोऽपि वपुष्टरं रूपवत्तरमत्यंतं सुरूपं तद्यज्ञकर्म मे मह्यं कृंतत्। इंद्रः कामयतां। यद्यदा पुचो जानं जन्मात्मन उत्पत्तिं पित्रोर्मातापित्रोः सकाशादधीयति संकीर्तनद्वारेणाधिगच्छति। सुब्रह्मण्याद्वानकालेऽसुकशर्मणः पुचो यजत इत्यात्मनो जन्म संकीर्तयति। यद्वा। यज्जननादागतं धनं पित्रोः सकाशात्पुत्रोऽधिगच्छति तदेव मह्यमिच्छतु। जाया पत्नी पतिं यजमानं सुमत्कल्याणेन वपुना वायूपेण शब्देन वहति। आत्मसमीपं प्रापयति। भद्रो भजनीयः परिष्कृतः सुसंस्कृतः पुंस इत्। पत्युरेवेत्यर्थः। वहतुर्जायायै प्रदातव्यः। तदुक्तं। सुभद्रमर्य भोजनं बिभर्षि। ऋ० ८. १. ३४.। इति। यद्वा। पुंसोऽतिशूरस्येंद्रस्यार्थाय भद्रो भजनीयो वहतुर्वहनशीलो देवान्प्रति स सोमः परिष्कृतः संस्कृतो भवति। तदिंद्रः कामयतामित्यर्थः ॥

तदित्सधस्थमभि चारु दीधय गावो यच्छासन्वहतुं न धेनवः।
माता यन्मंतुर्यूथस्य पूर्व्याभि वाणस्य सप्नधातुरिज्जनः ॥४॥
तत्। इत्। सधऽस्थं। अभि। चारु। दीधय। गावः। यत्। शासन्। वहतुं। न। धेनवः।
माता। यत्। मंतुः। यूथस्य। पूर्व्या। अभि। वाणस्य। सप्नऽधातुः। इत्। जनः ॥४॥

तदित्तदेव सधस्थं। सह तिष्ठंत्यत्रेति सधस्थं स्थानं यज्ञाख्यं। चारु शोभनमभि दीधय। हे इंद्र अभितो दीप्यस्व। यद्यदा गावः स्तुतिलक्षणा वाच इंद्र आगच्छ हरिव आगच्छेत्येवमाद्याः शासन् अस्मद्यज्ञं प्रति त्वदागमनमाशासते। तत्र दृष्टांतः। वहतुं न धेनवः यथा धेनवो नवप्रसूता गावः प्रापणसाधनं गृहमाशासते तद्वत्। यत आगत्यप्रकाशस्ततोऽत्र कारणमाह। यद्यस्मान्मंतुः। मन्यतिरर्चतिकर्मा। अर्चकस्य मम स्वभूता माता देवतागुणानां निष्पादयित्री स्तुतिर्यूथस्य यष्टृस्तोतृगणस्य पूर्व्या प्रथमभाविनी खलु। यस्माच्च सप्नधातुः। धार्यंते क्रियंते कर्माण्येभिरिति धातवश्छंदांस्यृतवो वा। सप्नच्छंदस्कः सप्नर्तुकः सप्नहोत्रात्मको वायं जनो वाणस्य स्तुतिशब्दस्याभि कर्ता खलु। तस्माच्छीघ्रमागच्छेति भावः। यद्वा। यत्कल्याणं तदेव स्थानमस्मदभिधारय। प्रयच्छ। यस्मिन्स्थाने धेनवः पयःप्रदानेन प्रीणयित्र्यो गावो वहतुं। उह्यते पुरुषोऽनेनेति वहतुरन्नं। पयोघृतादयमुशासति। न संप्रत्यर्थे। इदानीं प्रयच्छंति। तथा यस्मिन्मंतुर्मंतव्या पूजनीया पुत्रसमूहस्य माताभिगच्छति वाणस्य वाद्यस्य सप्नधातुर्निषादादिसप्तस्वरोपेतो जनोऽभिगच्छति तद्वत्तन्नामोपेतं प्रयच्छेति भावः ॥

प्र वोऽच्छा रिरिचे देवयुष्पदमेको रुद्रेभिर्याति तुर्वणिः ।
जरा वा येष्वमृतेषु दावने परि व ऊमेभ्यः सिंचता मधु ॥५॥
प्र । वः । अच्छ । रिरिचे । देवऽयुः । पदं । एकः । रुद्रेभिः । याति । तुर्वणिः ।
जरा । वा । येषु । अमृतेषु । दावने । परि । वः । ऊमेभ्यः । सिंचत । मधु ॥५॥

हे यजमानाः देवयुर्देवान्कामयमानो होता वो युष्माकं पदमच्छ स्थानं प्रति प्र रिरिचे । प्ररिक्तोऽभूत् । अथ होतृभ्यः सकाशादेको मुख्य इंद्रो रुद्रेभी रुद्रपुत्रैर्मरुद्भिः सह तुर्वणिः क्षिप्रगामी सन्याति । गच्छति युष्मदीयं यज्ञं । जरा वा । वाशब्दोऽप्यर्थे । सुतिरपि येष्वमृतेषु मरणधर्मरहितेषु देवेषु दावने धनप्रदानाय समर्था भवति । तस्माद्वो यूयं ॥ छांदसो वसादेशः ॥ ऊमेभ्यो रक्षितृभ्यो देवेभ्यो मधु मदकरं सोममद्भिः परि षिंचत ॥ ॥२९॥

निधीयमानमपगूळ्हमप्सु प्र मे देवानां व्रतपा उवाच ।
इंद्रो विद्वाँ अनु हि त्वा चचक्ष तेनाहमग्ने अनुशिष्ट आगां ॥६॥
निऽधीयमानं । अपऽगूळ्हं । अप्ऽसु । प्र । मे । देवानां । व्रतऽपाः । उवाच ।
इंद्रः । विद्वान् । अनु । हि । त्वा । चचक्ष । तेन । अहं । अग्ने । अनुऽशिष्टः । आ । अगां ॥६॥

कुरुश्रवणस्य यज्ञे निधीयमानोऽग्निरभिधीयते । निधीयमानमध्वर्युणाहवनीयेऽग्नावप्सु मातृभूतास्वपगूळ्हमंतर्हितं देवानां व्रतपाः कर्मणो रक्षक इंद्रो मे मह्यं प्रोवाच । प्रावादीत् । हे अग्ने विद्वाज्ज्ञानान इंद्रः स्वाधिकारमस्मद्व्रतं वा त्वा त्वामनु हि चचक्ष । अनुगतः पश्चाद्दर्शं । तेनेंद्रेणानुशिष्टोऽहमनेन पथा त्वया स्वर्गो गंतव्य इत्येवमुपदिष्टः सन्नागां । आभिमुख्येन स्वर्गं गच्छेयं ॥

अक्षेत्रवित्क्षेत्रविदं ह्यप्राट् स प्रैति क्षेत्रविदानुशिष्टः ।
एतद्वै भद्रमनुशासनस्योत सुतिं विंदत्यंजसीनां ॥७॥
अक्षेत्रऽवित् । क्षेत्रऽविदं । हि । अप्राट् । सः । प्र । एति । क्षेत्रऽविदा । अनुऽशिष्टः ।
एतत् । वै । भद्रं । अनुऽशासनस्य । उत । सुतिं । विंदति । अंजसीनां ॥७॥

सेयमनुशासनसुतिः प्रासंगिकी । अक्षेत्रवित् ॥ क्षि निवासगत्योः ॥ क्षीयते गम्यतेऽनेनेति क्षेत्रं पंथाः । पंथानमजानन् पुरुषः क्षेत्रविदं क्षेत्रज्ञं पुरुषमप्राट् । पृष्टवान् । स क्षेत्रविदा पथिज्ञेन तेनानुशिष्टः प्रदर्शितमार्गः सन् प्रैति । स्वाभिलषितं देशं गच्छति । अनुशासनस्य मार्गोपदेशरूपस्यैतद्वा एतत्खलु भद्रं भजनीयं कल्याणकरं । किं तत् । उतापि चांजसीनामृजुना मार्गेण गंतव्यानामपां सुतिं मार्गं पिपासितः सन् विंदति । लभते । यद्वा । अंजसीनामिति सुतेर्विशेषणं । ऋजुमकुटिलमप्रयासेन गंतव्यं मार्गं लभते खलु ॥

अद्येदु प्राणीदमन्वमाहापीवृतो अधयन्मातुरूधः ।
एमेनमाप जरिमा युवानमहेळन्वसुः सुमना बभूव ॥८॥
अद्य । इत् । ऊं इति । प्र । आनीत् । अमंमन् । इमा । अहा । अपिऽवृतः । अधयत् ।
मातुः । ऊधः ।
आ । ईं । एनं । आप । जरिमा । युवानं । अहेळन् । वसुः । सुऽमनाः । बभूव ॥८॥

अयमग्निरवेदथैवाग्निन्दिने प्राणीत्। मथनेन चेष्टितोऽभवत् ॥ श्वस प्राणने अन चेति धातुः ॥ तदानीमेवेमेमान्यहाहानि सौमिकान्यममन्। नेतुममन्यत ॥ मन ज्ञाने। व्यत्ययेन सुः। तिङ उत्तरत्वादनिघातः॥ अपि चापीवृतस्तेजोभिः परिवृतः सन् मातुः पृथिव्या ऊधः सारभूतं सोमादिकं हविरधयत्। पिबति। तथा युवानं नित्यतरुणं देवानां हविषा मिश्रयंतं वैनमग्निं जरिमा ॥ जरतिः स्तुतिकर्मा। तस्मादौणादिक इमनिच्॥ स्तोतृभिः क्रियमाणा स्तुतिरापः। आभिमुख्येन व्याप्नोति। ईमिति पूरणः। ततोऽहेळन्नक्रुध्यन् स्तोतॄन्प्रति वसुर्वासयिता सर्वेषां धनदानेनाच्छादयिता तेजोभिः शुचूणां वा वसुमान्वाग्निः सुमनाः शोभनमनस्को बभूव॥

एतानि भद्रा कलश क्रियाम कुरुश्रवण ददतो मघानि।
दान इन्द्रो मघवानः सो अस्त्वयं च सोमो हृदि यं बिभर्मि ॥९॥
एतानि। भद्रा। कलश। क्रियाम। कुरुऽश्रवण। ददतः। मघानि।
दानः। इत्। वः। मघऽवानः। सः। अस्तु। अयं। च। सोमः। हृदि। यं। बिभर्मि ॥९॥

हे कलश सर्वकलापरिपूर्ण। यद्वा। लुप्तमत्वर्थीयः। द्रोणकलशवत्। हे कुरुश्रवण। कुरव ऋत्विजः। तेषां स्वभूतानां स्तुतीनां श्रोतर्हे इंद्र मघानि धनानि स्तोतृभ्यो यष्टृभ्यश्च ददतः प्रयच्छतस्तवेंद्रस्यार्थमेतानि भद्रा भजनीयानि हवींषि स्तोत्राणि च क्रियाम। विधेयास्म ॥ करोतेराशीर्लिङि रिङ् शयग्लिंगु। पा० ७. ४. २८.। इति रिङादेशः॥ अथ स्तोतॄन्प्रत्याह। हे मघवानो महनीयस्तोत्रूपधनवंतः वो युष्माकं स इंद्रो दान इत्तनादेर्दातैवास्तु। भवतु। अयं च यज्ञे स्थितः सोमो दातास्तु हृदय आत्मीये यं पीतं सोमं बिभर्मि धारयामि ॥ डुभृञ् धारणपोषणयोः। जौहोत्यादिकः। भृआमिदित्यभ्यासस्येत्वं। यद्योगादनिघातः॥ यद्वा। हे कलशकुलजात हे कुरुश्रवणेतन्नामक चसदस्योः पुत्र राजन् ऋत्विग्भ्यो धनानि प्रयच्छतस्तवार्थं वयं कर्माणि क्रियाम। मघवानः कुरुश्रवणाः। पूजायां बहुवचनपदं। यागकर्म कुर्वाणस्य तवेंद्रो दाता भवतु। अयं सोमश्च धनानि प्रयच्छतु ॥ ॥३०॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये सप्तमाष्टके सप्तमोऽध्यायः॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥

अथाष्टमोऽध्याय आरभ्यते। तत्र प्र मेति नवर्चं चतुर्थं सूक्तं। ऐलूषस्य कवषस्यार्षं। आद्या त्रिष्टुप् सा च वैश्वदेवी। द्वितीयातृतीये बृहतीसतोबृहत्यावैंद्र्यौ। पराः षड्जायज्यः। कुरुश्रवणमावृणीति द्वाभ्यां चसदस्युपुत्रस्य कुरुश्रवणनाम्नो राज्ञो दानं तुष्टाव। अतस्तद्देवताके। अथ यस्य प्रस्तादस्य इत्यादिभिश्चतसृभिर्मिश्चातिथिनाम्नि राज्ञि परलोकं गते शोकाभिभूतं तस्य पुत्रमुपमश्रवोनामानं कवष ऋषिः स्नेहवशादभिगत्य विगतशोकमकरोत्। अतस्तासां तद्देवतात्वं। तथा चानुक्रांतं। प्र माद्या वैश्वदेवैंद्रः प्रगाथः परा गायत्री द्वे कुरुश्रवणस्य चासदस्यवस्य दानस्तुतिः पराभिर्मृते मित्रातिथौ राज्ञि तत्स्नेहादृषिरुपमश्रवसं पुत्रमस्य व्यशोकयदिति॥ गतो विनियोगः॥

प्र मा युयुज्रे प्रयुजो जनानां वहामि स्म पूषणमंतरेण।
विश्वे देवासो अध मामरक्षन्दुःशासुरागादिति घोष आसीत् ॥१॥

प्र। मा। युयुजे। प्रऽयुजः। जनानां। वहामि। स्म। पूषण। अंतरेण।
विश्वे। देवासः। अध। मां। अरक्षन्। दुःऽशासुः। आ। अगात्। इति। घोषः। आसीत्॥१॥

जनानां यजमानानां प्रयुजः प्रयोक्तारो देवा मा मां कवषमृषिं प्र युयुजे। कुरुश्रवणं प्रति युक्तवंतः। अंतरेण मार्गे पूषणं देवमध्वनां पतिं सखायमहं वहामि स्म। ऊढवानस्मि। तथा श्रूयते। ऐंद्राग्नमेकादशकपालं निर्वपेज्जनतामेव्यन्नित्युपक्रम्य पौष्णं चरुमनु निर्वपेत्। तै० सं० २. २. १. ४.। इति। अधाथ मार्गे विश्वे देवा मां कवषमरक्षन्। रक्षितवंतः। दुःशासुः केनापि दुःशासनोऽयमृषिरागात् आगच्छतीति घोषः शब्दश्च मार्ग आसीत्। अभूत्॥

सं मा तपंत्यभितः सपत्नीरिव पर्शवः।
नि बाधते अमतिर्न्ग्नता जसुर्वेर्न वेवीयते मतिः॥२॥
सं। मा। तपंति। अभितः। सपत्नीःऽइव। पर्शवः।
नि। बाधते। अमतिः। नग्नता। जसुः। वेः। न। वेवीयते। मतिः॥२॥

मा मां देवताप्रसादरहितं कवषं पर्शवः पार्श्वास्थीन्यन्नाभावाद्दौर्बल्यात्कृशत्वनाच्च सपत्नीरिव यथा सपत्न्यस्तद्वदभित उभयतः सं तपंति। दुःखयंतीत्यर्थः। किंचामतिर्दारिद्र्यादागता दुर्मतिः सर्वार्थविषया सा मां नि बाधते। मां पीडयति। वस्त्राभावादागता नग्नता च मां नि बाधते। जसुरशनाभावादागत उपचयोऽपि मां नि बाधते। किंच वेर्न यथा पक्षिणो मतिः शाकुनिकव्याधभयात्कंपयते तथा मे मतिः शत्रोर्वेवीयते। भृशं कंपयते॥

मूषो न शिश्ना व्यदंति माध्यः स्तोतारं ते शतक्रतो।
सकृत्सु नो मघवन्निंद्र मृळयाधा पितेव नो भव॥३॥
मूषः। न। शिश्ना। वि। अदंति। मा। आऽध्यः। स्तोतारं। ते। शतक्रतो इति शतऽक्रतो।
सकृत्। सु। नः। मघऽवन्। इंद्र। मृळय। अध। पिताऽइव। नः। भव॥३॥

हे शतक्रतो बहुकर्मन् मघवन् धनवंस्त्वेंद्र ते तव स्तोतारं मा मां कवषमाध्य आधयो मूषो न यथा मूषिकाः शिश्नास्नातानि सूत्राण्यश्नंति तथा व्यदंति। विविधमदंति। तथा च यास्कः। संतपंति मामभितः सपत्न्य इवेमाः पर्शवः कूपपर्शवो मूषिका इवास्नातानि सूत्राणि व्यदंति स्वांगाभिधानं वा स्याच्छिश्नानि व्यदंतीति संतपंति माध्यः कामाः। नि० ४. ६.। इति। तथा च सति नोऽस्मान्सकृत्सु मृळय। अभीष्टप्रदानेन सम्यक् सुखय। अधाथ नोऽस्माकं पितेव यथा पिता तद्वद्धिता भव॥

कुरुश्रवणमावृणि राजानं चासदस्यवं। मंहिष्ठं वाघतामृषिः॥४॥
कुरुऽश्रवणं। अवृणि। राजानं। चासदस्यवं। मंहिष्ठं। वाघतां। ऋषिः॥४॥

ऋषिरतींद्रियपदार्थद्रष्टा कवषोऽहं चासदस्यवं चसदस्योः पुत्रं मंहिष्ठं धनानामतिशयेन दातारं कुरुश्रवणं। कुरव ऋत्विजः। तदीयानां स्तुतीनां श्रोतारं कुरुश्रवणं तन्नामकं राजानं वाघतामृत्विजामर्थायावृणि। धनानि प्रार्थये॥

यस्य मा हरितो रथे तिस्रो वहंति साधुया। स्तवै सहस्रदक्षिणे॥५॥
यस्य। मा। हरितः। रथे। तिस्रः। वहंति। साधुऽया। स्तवै। सहस्रऽदक्षिणे॥५॥

यस्य कुत्सश्रवणाख्यस्य राज्ञः स्वभूतास्त्रिस्रो हरितस्त्रयोऽश्वा रथे प्रस्थितं मा मां कवषं साधुया साधु वहंति कुत्सश्रवणं राजानमहं सहस्रदक्षिणेऽस्मिन्यागे स्तवै । स्तौमि । प्रष्टिवाहिनं रथं परिगृह्यर्षिराशास्ते ॥ ॥१॥

अतः परं यस्येत्यादिकेन सूक्तशेषेण मित्रातिथौ रात्रौ मृते तत्पुत्रस्योपमश्रवसः समीपमागत्य कवषः स्नेहाच्छोकं निवारयति ॥

यस्य प्रस्वादसो गिरं उपमश्रवसः पितुः । क्षेत्रं न रण्वमूचुषे ॥६॥
यस्य । प्रऽस्वादसः । गिरः । उपमऽश्रवसः । पितुः । क्षेत्रं । न । रण्वं । ऊचुषे ॥६॥

हे राजन् उपमश्रवसस्तव पितुर्यस्य मित्रातिथेर्गिरो वाचः प्रस्वादसः प्रकर्षेण स्वादयित्र्यः । तत्र दृष्टांतः । ऊचुषे सेवमानाय दरिद्राय दानार्थं प्रकल्पितं रण्वं रमणीयं क्षेत्रं न यथा क्षेत्रं स्वादयितु तद्वदित्यर्थः । उत्तरत्र संबंधः ॥

अधि पुत्रोपमश्रवो नपान्मित्रातिथेरिहि । पितुष्टे अस्मि वंदिता ॥७॥
अधि । पुत्र । उपमऽश्रवः । नपात् । मित्रऽअतिथेः । इहि । पितुः । ते । अस्मि । वंदिता ॥७॥

हे पुत्रोपमश्रवो मित्रातिथेर्नपात्पुत्र त्वमधीहि । मत्समीपमागच्छ । ते तव पितुस्तस्य मित्रातिथेरहं वंदिता स्तोतास्मि । एतज्ज्ञात्वा शोकं मा कुरु । यद्देयं द्रव्यमस्ति तत्सर्वं मह्यं देहि ॥

यदीशीयामृतानामुत वा मर्त्यानां । जीवेदिन्मघवा मम ॥८॥
यत् । ईशीय । अमृतानां । उत । वा । मर्त्यानां । जीवेत् । इत् । मघऽवा । मम ॥८॥

उतापि च यद्यमृतानां देवानां मर्त्यानां मनुष्याणां वा मरणहेतूनामीशीय अहमीश्वरः स्यां तर्हि मम कवषस्य याज्यो मघवा धनवान्मित्रातिथो राजा जीवेत् । प्राणान्धारयेत् । तथा च नाहं मरणहेतोरीश्वरः तस्मादयं राजा मृत इत्यर्थः ॥

न देवानामति व्रतं शतात्मा चन जीवति । तथा युजा वि वावृते ॥९॥
न । देवानां । अति । व्रतं । शतऽआत्मा । चन । जीवति । तथा । युजा । वि । ववृते ॥९॥

देवानां ब्रह्मादीनां व्रतं मर्यादालक्षणं कर्मात्यतिक्रम्य शतात्मा चन शतसंवत्सरः कश्चन जीवति । तथा युजा सहायादिना वि ववृते । विवर्तते । वियुक्तो भवतीति ज्ञात्वा शोकं मा कुर्वित्यर्थः ॥ ॥२॥

प्रावेपा इति चतुर्दशर्चं पंचमं सूक्तमैलूषस्य कवषस्यार्षं मुजवतः पुत्रस्याचाख्यस्य वा । सप्तमी जगती शिष्टास्त्रयोदश त्रिष्टुभः । अत्र द्वादश्यचास्तीति नवम्यादौ च सप्तमी । अतस्तास्तद्देवत्याः । चयोदशी ऋषिं स्तौति । अतस्तस्याः सा देवता । एवं पंच गताः । शिष्टाभिर्नवभिः कितवोऽत्राक्ष निंदते । अतस्ता अपि तद्देवत्याः । तथा चानुक्रांतं । प्रावेपाः षळूना मौजवान्वाचोऽक्षऋषिप्रशंसा चाक्षकितवनिंदा च सप्तमी जगतीति ॥ गतो विनियोगः ॥

प्रावेपा मा बृहतो मादयंति प्रवातेजा इरिणे ववृतानाः ।
सोमस्येव मौजवतस्य भक्षो विभीदको जागृविर्मह्यमच्छान् ॥१॥
प्रावेपाः । मा । बृहतः । मादयंति । प्रवातेऽजाः । इरिणे । ववृतानाः ।
सोमस्यऽइव । मौजऽवतस्य । भक्षः । विऽभीदकः । जागृविः । मह्यं । अच्छान् ॥१॥

बृहतो महतो विभीतकस्य फलत्वेन संबंधिनः प्रवातेजाः प्रवणे देशे जाता इरिणे आस्कारे वर्तमानाः प्रवर्तमानाः प्रावेपाः प्रवेपिणः कंपनशीला अक्षा मा मां मादयंति। हर्षयंति। किंच जागृविर्जयपराजययोर्हर्षशोकाभ्यां कितवानां जागरणस्य कर्ता विभीदको विभीतकविकारोऽक्षो मह्यं मामच्छान्। अचच्छदत्। अत्यर्थं मादयति। तत्र दृष्टांतः। सोमस्येव यथा सोमस्य मौजवतस्य। मुञ्जवति पर्वते जातो मौजवतः। तस्य। तत्र ह्युत्तमः सोमो जायते। भक्षः पानं यजमानान्देवांश्च मादयति तद्वदित्यर्थः। तथा च यास्कः। प्रवेपिणो मा महतो विभीतकस्य फलानि मादयंति। प्रवातेजाः प्रवणेजा इरिणे वर्तमाना इरिणं निर्ऋणमृणातेरपार्णं भवत्यपरता अस्मादोषधय इति वा सोमस्येव मौजवतस्य भक्षो मौजवतो मुञ्जवति जातो मुञ्जवान्पर्वतो मुंजवान्मुंजो विमुच्यत इषीकयेषीकेषतेर्गतिकर्मण इयमपीतरेषीकेतस्मादेव विभीतको विभेदनाज्जागृविर्जागरणान्मह्यमचच्छदत्। नि० ९. ८.। इति ॥

न मा मिमेथ न जिहीळ एषा शिवा सखिभ्य उत मह्यमासीत्।
अक्षस्याहमेकपरस्य हेतोरनुव्रतामप जायामरोधं ॥२॥

न। मा। मिमेथ। न। जिहीळे। एषा। शिवा। सखिऽभ्यः। उत। मह्यं। आसीत्।
अक्षस्य। अहं। एकऽपरस्य। हेतोः। अनुऽव्रतां। अप। जायां। अरोधं ॥२॥

एषास्मदीया जाया मा मां कितवं न मिमेथ न च चुक्रोध न जिहीळे न च लज्जितवती। सखिभ्योऽस्मदीयेभ्यः कितवेभ्यः शिवा सुखकर्यासीत्। अभूत्। उतापि च मह्यं शिवासीत्। इत्यमनुव्रतामनुकूलां जायामेकपरश्चिकः परः प्रधानं यस्य तस्याक्षस्य हेतोः कारणादहमपारोधं। परित्यक्तवानस्मीत्यर्थः ॥

द्वेष्टि श्वश्रूरप जाया रुणद्धि न नाथितो विंदते मर्डितारं।
अश्वस्येव जरतो वस्न्यस्य नाहं विंदामि कितवस्य भोगं ॥३॥

द्वेष्टि। श्वश्रूः। अप। जाया। रुणद्धि। न। नाथितः। विंदते। मर्डितारं।
अश्वस्यऽइव। जरतः। वस्न्यस्य। न। अहं। विंदामि। कितवस्य। भोगं ॥३॥

श्वश्रूर्जायाया माता गृहगतं कितवं द्वेष्टि। निंदतीत्यर्थः। किंच जाया भार्यापि रुणद्धि। निरुणद्धि। अपि च नाथितो याचमानः कितवो धनं मर्डितारं धनदानेन सुखयितारं न विंदते। न लभते। इत्थं बुद्ध्या विमृशन्नहं जरतो वृद्धस्य वस्न्यस्य। वस्नं मूल्यं। तदर्हस्याश्वस्येव कितवस्य भोगं न विंदामि। न लभे ॥

अन्ये जायां परि मृशंत्यस्य यस्यागृधद्वेदने वाज्यक्षः।
पिता माता भ्रातर एनमाहुर्न जानीमो नयता बद्धमेतं ॥४॥

अन्ये। जायां। परि। मृशंति। अस्य। यस्य। अगृधत्। वेदने। वाजी। अक्षः।
पिता। माता। भ्रातरः। एनं। आहुः। न। जानीमः। नयत। बद्धं। एतं ॥४॥

यस्य कितवस्य वेदने धने वाजी बलवानक्षो देवोऽगृधत् अभिकांक्षां करोति तस्यास्य कितवस्य जायां भार्यामन्ये प्रतिकितवाः परि मृशंति। वस्त्रकेशाद्याकर्षणेन संस्पृशंति। किंच पिता जननी च भ्रातरः सहोदराश्चैनं कितवमाहुः। वदंति। न वयमस्मदीयमेनं जानीमः। रज्ज्वा बद्धमेतं कितवं हे कितवाः यूयं नयत। यथेष्टदेशं प्रापयतेति ॥

यदादीध्ये न दविषाण्येभिः परायद्भ्योऽवं हीये सखिभ्यः।
न्युप्ताश्च बभ्रवो वाचमक्रतेमीदेषां निष्कृतं जारिणीव ॥५॥

यत्। आऽदीध्ये। न। दविषाणि। एभिः। परायत्ऽभ्यः। अवं। हीये। सखिऽभ्यः।
निऽउप्नाः। च। बभ्रवः। वाचं। अक्रत। एमिं। इत्। एषां। निःऽकृतं। जारिणीऽइव॥५॥

यद्यदाहमादीध्ये ध्यायामि तदानीमेभिरक्षैर्न दविषाणि । न दूषये । न परितपामि । यद्वा । न दविषाणि । न देविष्यामीत्यर्थः । परायद्भ्यः स्वयमेव परागच्छद्भ्यः सखिभ्यः सखिभूतेभ्यः कितवेभ्योऽव हीये। अवहितो भवामि । नाहं प्रथममक्षान्विच्छजामीति । किंच बभ्रवो बभ्रुवर्णा अक्षा न्युप्ताः कितवैरवचिप्ताः संतो वाचमक्रत । शब्दं कुर्वंति । तदा संकल्पं परित्यज्याक्षव्यसनेनाभिभूयमानोऽहमेषामक्षाणां निष्कृतं स्थानं जारिणीव यथा कामव्यसनेनाभिभूयमाना स्वैरिणी संकेतस्थानं याति तद्वदेमीत्। गच्छाम्येव ॥ ॥३॥

सभामेति कितवः पृच्छमानो जेष्यामीति तन्वा३ शूशुजानः ।
अक्षासो अस्य वि तिरंति कामं प्रतिदीव्ने दधत आ कृतानि ॥६॥
सभां। एति। कितवः। पृच्छमानः। जेष्यामि। इति। तन्वा। शूशुजानः।
अक्षासः। अस्य। वि। तिरंति। कामं। प्रतिऽदीव्ने। दधतः। आ। कृतानि ॥६॥

तन्वा शरीरेण शूशुजानः शोशुचानो दीप्यमानः कितवः कोऽचाक्षि धनिकस्यं जेष्यामीति पृच्छमानः पृच्छन् सभां कितवसंबंधिनीमेति । गच्छति । तत्र प्रतिदीव्ने प्रतिदेविने कितवाय कृतानि देवनोपयुक्तानि कर्माण्या दधतो जयार्थमाभिमुख्येन मर्यादया वा दधतोऽस्य कितवस्य काममिच्छामक्षासोऽचा वि तिरंति । वर्धयंति ॥

अक्षास इदंकुशिनो नितोदिनो निकृत्वानस्तपनास्तापयिष्णवः ।
कुमारदेष्णा जयतः पुनर्हणो मध्वा संपृक्ताः कितवस्य बर्हणा ॥७॥
अक्षासः। इत्। अंकुशिनः। निऽतोदिनः। निऽकृत्वानः। तपनाः। तापयिष्णवः।
कुमारऽदेष्णाः। जयतः। पुनःऽहनः। मध्वा। संऽपृक्ताः। कितवस्य। बर्हणा ॥७॥

अक्षास इदक्षा एवांकुशिनोऽंकुशवंतो नितोदिनो नितोदितवंतश्च निकृत्वानः पराजये निकर्तनशीलाश्छेत्तारो वा तपनाः पराजये कितवस्य संतापकास्तापयिष्णवः सर्वस्वहारकत्वेन कुटुंबस्य संतापनशीलाश्च भवंति । किंच जयतः कितवस्य कुमारदेष्णा धनदानेन धान्यतां लंभयंतः कुमाराणां दातारो भवंति । अपि च मध्वा मधुना संपृक्ताः प्रतिकितवेन बर्हणा परिवृढेन सर्वस्वहरणेन कितवस्य पुनर्हणः पुनर्हंतारो भवंति ॥

त्रिपंचाशः क्रीळति व्रात एषां देव इव सविता सत्यधर्मा ।
उग्रस्य चिन्मन्यवे ना नमंते राजा चिदेभ्यो नम इत्कृणोति ॥८॥
त्रिऽपंचाशः। क्रीळति। व्रातः। एषां। देवःऽइव। सविता। सत्यऽधर्मा।
उग्रस्य। चित्। मन्यवे। न। नमंते। राजा। चित्। एभ्यः। नमः। इत्। कृणोति ॥८॥

एषामक्षाणां त्रिपंचाशत्यधिकपंचाशत्संख्याको व्रातः संघः क्रीळति । आस्कारे विहरति । अधिकाः प्रायेण तावद्भिरक्षैर्दीव्यंति हि । तत्र दृष्टांतः । सत्यधर्मा सविता सर्वस्य जगतः प्रेरकः सूर्यो देव इव । यथा सविता देवो जगति विहरति तद्वदक्षाणां संघ आस्कारे विहरतीत्यर्थः । किंचोग्रस्य चित् क्रूरस्यापि मन्यवे क्रोधायितेऽचा न नमंते । न प्रह्वीभवंति । न वशे वर्तंते । तं नमयंतीत्यर्थः । राजा चिज्जगत ईश्वरोऽप्येभ्यो नम इन्नमस्कारमेव देवनवेलायां कृणोति । नावज्ञां करोतीत्यर्थः ॥

नीचा वर्तंत उपरि स्फुरंत्यहस्तासो हस्तवंतं सहंते ।
दिव्या अंगारा इरिणे न्युप्ताः शीताः संतो हृदयं निर्दहंति ॥९॥
नीचा । वर्तंते । उपरि । स्फुरंति । अहस्तासः । हस्तऽवंतं । सहंते ।
दिव्याः । अंगाराः । इरिणे । निऽउप्ताः । शीताः । संतः । हृदयं । निः । दहंति ॥९॥

अपि चैतेऽक्षा नीचा नीचीनस्थले वर्तंते । तथाप्युपरि पराजयाज्जीतानां द्यूतकराणां कितवानां हृदयस्थोपरि स्फुरंति । अहस्तासो हस्तरहिता अथवा हस्तवंतं द्यूतकरं कितवं सहंते । पराजयकरणेनाभिभवंति । दिव्या दिवि भवा अपक्वता अंगारा अंगारसदृशा अक्षा इरिण इंधनरहित आस्फारि न्युप्ताः शीताः शीतस्पर्शाः संतोऽपि हृदयं कितवानामंतःकरणं निर्दहंति । पराजयजनितसंतापेन भस्मीकुर्वंति ॥

जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्व स्वित् ।
ऋणावा बिभ्यद्धनमिच्छमानोऽन्येषामस्तमुप नक्तमेति ॥१०॥
जाया । तप्यते । कितवस्य । हीना । माता । पुत्रस्य । चरतः । क्व । स्वित् ।
ऋणऽवा । बिभ्यत् । धनं । इच्छमानः । अन्येषां । अस्तं । उप । नक्तं । एति ॥१०॥

क्व स्वित् क्वापि चरतो निर्वेदान्नच्छतः कितवस्य जाया भार्या हीना परित्यक्ता सती तप्यते । वियोगजसंतापेन संतप्ता भवति । माता जनन्यपि पुत्रस्य क्वापि चरतः कितवस्य संबंधाद्धीना तप्यते । पुत्रशोकेन संतप्ता भवति । ऋणावाश्वपराजयादृणवान् कितवः सर्वतो बिभ्यद्धनं स्वीयजनितमिच्छमानः कामयमानोऽन्येषां ब्राह्मणादीनामस्तं गृहं । अस्तं पस्त्यमिति गृहनामसु पाठात् । नक्तं रात्रावुपैति । चौर्यार्थमुपगच्छति ॥ ॥४॥

स्त्रियं दृष्ट्वाय कितवं ततापान्येषां जायां सुकृतं च योनिं ।
पूर्वाह्णे अश्वान्युयुजे हि बभ्रून्त्सो अग्नेरंते वृषलः पपाद ॥११॥
स्त्रियं । दृष्ट्वाय । कितवं । ततापं । अन्येषां । जायां । सुऽकृतं । च । योनिं ।
पूर्वाह्णे । अश्वान् । युयुजे । हि । बभ्रून् । सः । अग्नेः । अंते । वृषलः । पपाद ॥११॥

कितवं कितवः ॥ विभक्तिव्यत्ययः ॥ अन्येषां स्वव्यतिरिक्तानां पुरुषाणां जायां जायाभूतां स्त्रियं नारीं सुखेन वर्तमानां सुकृतं सुष्ठु कृतं योनिं गृहं च दृष्ट्वाय मज्जाया दुःखिता गृहं चासंस्कृतमिति ज्ञात्वा ततापं । तप्यते । पुनः पूर्वाह्णे प्रातःकाले बभ्रून्बभुवर्णानश्वान्व्यापकानश्वान्युयुजे । युनक्ति । पुनश्च वृषलो वृषलकर्मा स कितवो रात्रावग्नेरंते समीपे पपाद् । शीतार्तः सञ्छेते ॥

यो वः सेनानीर्महतो गणस्य राजा व्रातस्य प्रथमो बभूव ।
तस्मै कृणोमि न धना रुणध्मि दशाहं प्राचीस्तदृतं वदामि ॥१२॥
यः । वः । सेनाऽनीः । महतः । गणस्य । राजा । व्रातस्य । प्रथमः । बभूव ।
तस्मै । कृणोमि । न । धना । रुणध्मि । दश । अहं । प्राचीः । तत् । ऋतं । वदामि ॥१२॥

हे अक्षाः वो युष्माकं महतो गणस्य संघस्य योऽयः सेनानीर्जेता बभूव भवति व्रातस्य च । गणव्रातयोरल्पो भेदः । राजेश्वरः प्रथमो मुख्यो बभूव तस्मा अक्षाय कृणोम्यहं । अंजलिं करोमि । अतः परं धना

धनान्यद्यार्थमहं न रणधि । न संपादयामीत्यर्थः । एतदेव दर्शयति । अहं दश दशसंख्याका अंगुलीः प्राचीः प्राङ्मुखीः करोमि । तदेतदहमृतं सत्यमेव वदामि । नानृतं ब्रवीमीत्यर्थः ॥

अक्षैर्मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहु मन्यमानः ।
तत्र गावः कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः ॥१३॥
अक्षैः । मा । दीव्यः । कृषिं । इत् । कृषस्व । वित्ते । रमस्व । बहु । मन्यमानः ।
तत्र । गावः । कितव । तत्र । जाया । तत् । मे । वि । चष्टे । सविता । अयं । अर्यः ॥१३॥

हे कितव बक्ष मन्यमानो मद्वचने विश्वासं कुर्वंस्त्वमक्षैर्मा दीव्यः । द्यूतं मा कुरु । कृषिमित्कृषिमेव कृषस्व । कुरु । वित्ते कृष्या संपादिते धने रमस्व । मतिं कुरु । तत्र कृषौ गावो भवंति । तत्र जाया भवति । तदेव धर्मरहस्यं श्रुतिस्मृतिकर्ता सविता सर्वस्य प्रेरकोऽयं दृष्टिगोचरोऽर्य ईश्वरो वि चष्टे । विविधमाख्यातवान् ॥

मित्रं कृणुध्वं खलु मृळतां नो मा नो घोरेण चरताभि धृष्णु ।
नि वो नु मन्युर्विशतामरातिरन्यो बभ्रूणां प्रसितौ त्वस्तु ॥१४॥
मित्रं । कृणुध्वं । खलु । मृळतं । नः । मा । नः । घोरेण । चरत । अभि । धृष्णु ।
नि । वः । नु । मन्युः । विशतां । अरातिः । अन्यः । बभ्रूणां । प्रऽसितौ । नु । अस्तु ॥१४॥

हे अत्राः यूयं मित्रं कृणुध्वं । अस्मासु मैत्रीं कुरुत । खल्विति पूरणः । नोऽस्मान्मृळत । सुखयत च । नोऽस्मान्धृष्णु धृष्णुना । तृतीयार्थे प्रथमा । घोरेणास्महीन माभि चरत । मा गच्छत । किंच वो युष्माकं मन्युः क्रोधोऽरातिरस्माकं शत्रुर्नि विशतां । अस्मच्छत्रुषु तिष्ठतु । अन्योऽस्माकं शत्रुः कश्चिद्बभ्रूणां बभ्रुवर्णानां युष्माकं प्रसितौ प्रबंधने नु क्षिप्रमस्तु । भवतु ॥ ॥५॥

अबुध्रमिति चतुर्दशर्चं षष्ठं सूक्तं । धनाकपुत्रस्य शुश्रुस्यार्षं । इदमुत्तरं च वैश्वदेवं । चयोदशीचतुर्दश्यौ त्रिष्टुभौ शिष्टा द्वादश जगत्यः । तथा चानुक्रांतं । अबुध्रं शुश्रो धानाको वैश्वदेवं तु द्वित्रिष्टुबंतं त्विति ॥ गतः सूक्तविनियोगः ॥ एकादशिनस्य वैश्वदेवस्य पशोर्वपायागस्यानुवाक्या विश्वे अद्येत्येषा । सूचितं च । विश्वे अद्य मरुतो विश्व ऊत्या नो देवानामुप वेतु शंसः । आ० ३. ७. । इति ॥

अबुध्रमु त्य इंद्रवंतो अग्नयो ज्योतिर्भरंत उषसो व्युष्टिषु ।
मही द्यावापृथिवी चेततामपोऽद्या देवानामव आ वृणीमहे ॥१॥
अबुध्रं । ऊं इति । त्ये । इंद्रऽवंतः । अग्नयः । ज्योतिः । भरंतः । उषसः । विऽउष्टिषु ।
मही इति । द्यावापृथिवी इति । चेततां । अपः । अद्य । देवानां । अवः । आ । वृणीमहे ॥१॥

इंद्रवंतो यष्टव्येनेंद्रसंबंधिनस्त्वे तेऽमी आहवनीयादयोऽग्नय उषसो व्युष्टिषु व्युच्छनेषु तमसां विवासनकालेषु ज्योतिस्तेजो भरंतो धारयंतोऽबुध्रं । प्रबुद्धा आसन् । मही महत्यौ द्यावापृथिव्यावपः कर्म । अपोऽग्र इति कर्मनामसु पाठात् । चेततां । जानीतां । अद्यास्मिन्नहनि देवानामिंद्रादीनामवो रक्षणं वयमा वृणीमहे ॥

द्यावस्पृथिव्योरव आ वृणीमहे मातॄन्त्संधून्पर्वताञ्छर्यणावतः ।
अनागास्त्वं सूर्यमुषासमीमहे भद्रं सोमः सुवानो अद्या कृणोतु नः ॥२॥

दिवःपृथिव्योः । अवः । आ । वृणीमहे । मातॄन् । सिंधून् । पर्वतान् । शर्यणाऽवतः ।
अनागाःऽत्वं । सूर्ये । उषसं । ईमहे । भद्रं । सोमः । सुवानः । अद्य । कृणोतु । नः ॥२॥

दिवःपृथिव्योर्द्यावापृथिव्योः कार्यत्वेन संबंधयो रक्षणं वयमा वृणीमहे । किंच मातॄँल्लोकस्य निर्मातॄन्सिंधून्शर्यणावतः सरसः संबंधिनः पर्वतान्श्लोकयांश्च तथा सूर्यमुषसं चानागास्त्वं कर्मवैगुण्यजनितपापराहित्यमीमहे । वयं याचामहे । किंचाद्यास्मिन्नहनि नोऽस्माकं सुवानोऽभिषूयमाणः सोमो भद्रं कल्याणं कृणोतु । करोतु ॥

द्यावा नो अद्य पृथिवी अनागसो मही चायेतां सुविताय मातरा ।
उषा उच्छंत्यप बाधतामघं स्वस्त्यग्निं समिधानमीमहे ॥३॥
द्यावा । नः । अद्य । पृथिवी इति । अनागसः । मही इति । चायेतां । सुविताय । मातरा ।
उषाः । उच्छंती । अप । बाधतां । अघं । स्वस्ति । अग्निं । सं ऽइधानं । ईमहे ॥३॥

मही महत्यौ मातरा मातरौ सर्वस्य मातृभूते द्यावा पृथिवी द्यावापृथिव्यावद्यास्मिन्नहन्यनागसोऽपराधरहितान्नोऽस्मान्सुविताय सुखाय चायेतां । रक्षेतां । किंचोच्छंती तमांसि विवासयंत्युषा अस्माकमघं पापमप बाधतां । अपनयतु । अपि च समिधानं सम्यग्दीप्यमानमग्निं स्वस्ति सर्वप्रकाराविनाशमीमहे । वयं याचामहे ॥

इयं नं उस्रा प्रथमा सुदेव्यं रेवत्सनिभ्यो रेवती व्युच्छतु ।
आरे मन्युं दुर्विदत्रस्य धीमहि स्वस्त्यग्निं समिधानमीमहे ॥४॥
इयं । नः । उस्रा । प्रथमा । सुऽदेव्यं । रेवत् । सनिऽभ्यः । रेवती । वि । उच्छतु ।
आरे । मन्युं । दुःऽविदत्रस्य । धीमहि । स्वस्ति । अग्निं । सं ऽइधानं । ईमहे ॥४॥

रेवती धनवती प्रथमा मुख्येयमुस्रा पापानामुत्सारिण्युषाः सुदेव्यं शोभनदेवार्हं रेवद्धनवत्प्रधानयागकालत्वं सनिभ्यो भजमानेभ्यो नोऽस्मभ्यं प्रयच्छंती व्युच्छतु । तमांसि विवासयतु । किंच दुर्विदत्रस्य दुर्धनस्य पुरुषस्य मन्युं क्रोधमारे दूरे धीमहि । निधीमहि । सिद्धमन्यत् ॥

प्र याः सिस्रते सूर्यस्य रश्मिभिर्ज्योतिर्भरंतीरुषसो व्युष्टिषु ।
भद्रा नो अद्य श्रवसे व्युच्छत स्वस्त्यग्निं समिधानमीमहे ॥५॥
प्र । याः । सिस्रते । सूर्यस्य । रश्मिऽभिः । ज्योतिः । भरंतीः । उषसः । विऽउष्टिषु ।
भद्राः । नः । अद्य । श्रवसे । वि । उच्छत । स्वस्ति । अग्निं । सं ऽइधानं । ईमहे ॥५॥

या उषसः सूर्यस्य रश्मिभिः किरणैः प्र सिस्रते संगच्छंते व्युष्टिषु व्युच्छनेषु तमसां विवासनकालेषु ज्योतिरात्मीयं तेजो भरंतीः भरंति च ता यूयं नोऽस्माकमद्यास्मिन्नहनि श्रवसेऽन्नाय भद्रा भजनीया भवत । व्युच्छत । तमांसि विवासयत च । सिद्धमन्यत् ॥ ॥६॥

अनमीवा उषस आ चरंतु न उदग्नयो जिहतां ज्योतिषा बृहत् ।
आयुक्षातामश्विना तूतुजिं रथं स्वस्त्यग्निं समिधानमीमहे ॥६॥

अनमीवाः । उषसः । आ । चरंतु । नः । उत् । अग्नयः । जिहतां । ज्योतिषा । बृहत् ।
अयुक्षातां । अश्विना । तूतुजिं । रथं । स्वस्ति । अग्निं । संऽइधानं । ईमहे ॥६॥

अनमीवा रोगरहिता उषसो नोऽस्माना चरंतु । आगच्छंतु । बृहद्बृहता महता ज्योतिषा तेजसा युक्ता अग्नयोऽप्युज्जिहतां । उन्नच्छंतु । अश्विनाश्विनौ तूतुजिं क्षिप्रगामिनं रथमायुक्षातां । अस्मान्प्रत्यागंतुं रासभाभ्यां युंक्तां । हरित आदित्यस्य रासभावश्विनोरिति पाठात् । सिद्धमन्यत् ॥

श्रेष्ठं नो अद्य सवितर्वरेण्यं भागमा सुव स हि रत्नधा असि ।
रायो जनित्रीं धिषणामुप ब्रुवे स्वस्त्यग्निं समिधानमीमहे ॥७॥
श्रेष्ठं । नः । अद्य । सवितः । वरेण्यं । भागं । आ । सुव । सः । हि । रत्नऽधाः । असि ।
रायः । जनित्रीं । धिषणां । उप । ब्रुवे । स्वस्ति । अग्निं । संऽइधानं । ईमहे ॥७॥

हे सवितः त्वमद्यास्मिन्नहनि नोऽस्मभ्यं वरेण्यं वरणीयं श्रेष्ठं प्रशस्यतमं भागं भजनीयं धनमा सुव । प्रेरय । देहीत्यर्थः । हि यस्मादप्रार्थितस्त्वं रत्नधाः श्रेष्ठानां धनानां संविभक्तासि भवसि । तथा च निगमांतरं । विभक्तारं हवामहे वसोश्चित्रस्य राधसः सवितारं नृचक्षसं । ऋ० १. २२. ७. । इति । रायो धनस्य जनित्रीं धिषणां सर्वदेवस्तुतिरूपां वाचमुप ब्रुवे । अहमुपब्रवीमि । यद्वा । धिषणां देवीमुप ब्रुवे । उपस्तौमीत्यर्थः । सिद्धमन्यत् ॥

पिपर्तु मा तदृतस्य प्रवाचनं देवानां यन्मनुषाऽ अमन्महि ।
विश्वा इदुस्राः स्पळुदेति सूर्यः स्वस्त्यग्निं समिधानमीमहे ॥८॥
पिपर्तु । मा । तत् । ऋतस्य । प्रऽवाचनं । देवानां । यत् । मनुष्याः । अमन्महि ।
विश्वाः । इत् । उस्राः । स्पट् । उत् । एति । सूर्यः । स्वस्ति । अग्निं । संऽइधानं । ईमहे ॥८॥

यदृतस्य यज्ञस्य सत्यस्य वा संबंधि देवानां प्रवाचनं प्रकर्षेण गुणानां कथनं स्तोत्रं मनुष्या वयममन्महि कर्तुं जानीमः तत्प्रवाचनं मा मां पिपर्तु । पालयतु । किंच सूर्यो विश्वाः सर्वा उस्रा उषसः स्पट् स्पृशन्नवगच्छन्नोदेति । सिद्धमन्यत् ॥

अद्वेषो अद्य बर्हिषः स्तरीमणि ग्राव्णां योगे मन्मनः साधं ईमहे ।
आदित्यानां शर्मणि स्था भुरण्यसि स्वस्त्यग्निं समिधानमीमहे ॥९॥
अद्वेषः । अद्य । बर्हिषः । स्तरीमणि । ग्राव्णां । योगे । मन्मनः । साधं । ईमहे ।
आदित्यानां । शर्मणि । स्थाः । भुरण्यसि । स्वस्ति । अग्निं । संऽइधानं । ईमहे ॥९॥

अद्यास्मिन्नहनि बर्हिषः स्तरीमणि वेद्यां स्तरणे मन्मनो मननीयस्याभीष्टस्य फलस्य साधे साधके ग्राव्णामभिषवपाषाणानां योगे सोमेन सह संयोगे च सत्यद्वेषो द्वेषवर्जितानादित्यानीमहे । वयमभीष्टं याचामहे । हे स्तोतः त्वं तेषामादित्यानां देवानां शर्मणि सुखे स्थाने वा स्थाः । तिष्ठ । भुरण्यसि । कर्तव्यानि कर्माणि बिभर्षि । गच्छसि वा । सिद्धमन्यत् ॥

आ नो बर्हिः सधमादे बृहद्दिवि देवाँ ईळे सादया सप्त होतॄन् ।
इंद्रं मित्रं वरुणं सातये भगं स्वस्त्यग्निं समिधानमीमहे ॥१०॥

आ । नः । बर्हिः । सधऽमादे । बृहत् । दिवि । देवान् । ईळे । सादय । सप्त । होतॄन् ।
इंद्रं । मित्रं । वरुणं । सातये । भगं । स्वस्ति । अग्निं । संऽइधानं । ईमहे ॥१०॥

नोऽस्माकं बृहद्बृहति महति दिवि दीप्ते सधमादे । सह मादयंति देवा यत्र तस्मिन् । बर्हिर्बर्हिषि यज्ञे सप्त सप्तसंख्याकान्होतॄन्वषट्कर्तॄनिंद्रं मित्रं च वरुणं च भगं च देवानितरानपि यष्टव्यान्देवान् हे अग्ने त्वमा सादय । अग्नेराभिमुख्यकरणं दृहादय दैव्यं जनं बर्हिरा सादया वसो । ऋ० १. ४५. ९. । इत्येवमादिमंत्रैरवगम्यते । तत्र त्वयासादितांस्तानिंद्रादीन्देवानहं सातये धनलाभायेळे । स्तौमि । सिद्धमन्यत् ॥ ॥७॥

त आदित्या आ गता सर्वतातये वृधे नो यज्ञमवता सजोषसः ।
बृहस्पतिं पूषणमश्विना भगं स्वस्त्यग्निं समिधानमीमहे ॥११॥
ते । आदित्याः । आ । गत । सर्वतातये । वृधे । नः । यज्ञं । अवत । सऽजोषसः ।
बृहस्पतिं । पूषणं । अश्विना । भगं । स्वस्ति । अग्निं । संऽइधानं । ईमहे ॥११॥

हे आदित्याः येऽस्माभिराहूतास्ते यूयं सर्वतातये यज्ञार्थमा गत । आगच्छत । आगत्य च हे सजोषसः संगताः यूयं नोऽस्माकं वृधे वर्धनाय यज्ञं प्रत्यवत । गच्छत । वयं च बृहस्पतिं पूषणं चाश्विनाश्विनौ च भगं भगाख्यं देवं च समिधानं सम्यग्दीप्तमग्निं च स्वस्ति सर्वप्रकाराविनाशमीमहे । याचामहे ॥

तन्नो देवा यच्छत सुप्रवाचनं छर्दिरादित्याः सुभरं नृपाय्यं ।
पश्वे तोकाय तनयाय जीवसे स्वस्त्यग्निं समिधानमीमहे ॥१२॥
तत् । नः । देवाः । यच्छत । सुऽप्रवाचनं । छर्दिः । आदित्याः । सुऽभरं । नृऽपाय्यं ।
पश्वे । तोकाय । तनयाय । जीवसे । स्वस्ति । अग्निं । संऽइधानं । ईमहे ॥१२॥

हे आदित्या देवाः यूयं सुप्रवाचनमत्यंतं प्रशस्तं सुभरं सुसमृद्धं नृपाय्यं नृणां रक्षकं तदस्मदभिलषितं छर्दिर्गृहं नोऽस्माकं पश्वे पश्वात्मकाय तोकाय पुत्राय तनयाय पौत्राय च जीवसे जीवनार्थं यच्छत । दत्त । सिद्धमन्यत् ॥

विश्वे अद्य मरुतो विश्व ऊती विश्वे भवंत्वग्नयः समिद्धाः ।
विश्वे नो देवा अवसा गमंतु विश्वमस्तु द्रविणं वाजो अस्मे ॥१३॥
विश्वे । अद्य । मरुतः । विश्वे । ऊती । विश्वे । भवंतु । अग्नयः । संऽइद्धाः ।
विश्वे । नः । देवाः । अवसा । आ । गमंतु । विश्वं । अस्तु । द्रविणं । वाजः । अस्मे इति ॥१३॥

अद्यास्मिन्नहनि प्रधानयागदिवसे विश्वे सर्वे मरुतो विश्वे सर्वे मरुद्गणसहचरिता रुद्रादयो देवास्तोत्तृणां रक्षणाय भवंतु । अपि च विश्वे सर्वेऽग्नय आहवनीयादयः समिद्धाः संदीप्ता भवंतु । अपि च विश्वे सर्वे रुद्रादयो देवा नोऽस्माकमवसा रक्षणेना गमंतु । आगच्छंतु । किंचास्मे अस्मासु विश्वं सर्वं द्रविणं धनं वाजोऽन्नं चास्तु । भवतु ॥

यं देवासोऽवथ वाजसातौ यं शर्यध्वे यं पिपृथात्यंहः ।
यो वो गोपीथे न भयस्य वेद ते स्याम देववीतये तुरासः ॥१४॥

यं। देवासः। अवथ। वाजेऽसातौ। यं। चायध्वे। यं। पिपृथ। अति। अंहः।
यः। वः। गोऽपीथे। न। भयस्य। वेद। ते। स्याम। देवऽवीतये। तुरासः ॥१४॥

हे तुरासोऽभीष्टप्रदाने क्षिप्रा देवासो देवाः यूयं वाजसातौ संग्रामे यं मनुष्यमवथ रक्षथ यं च चायध्वे शत्रोः पालयथ यं चांहः पापमत्यतिनीय पिपृथ कामैः पूरयथ यस्यापि मनुष्यो वो युष्माकं कार्यलक्षण संबंधिनि गोपीथे रक्षणे भयस्य भयं न वेद न जानाति ते सर्वे वयं देववीतये यज्ञार्थं स्याम। भवेम ॥ ॥८॥

उषासानक्तेति चतुर्दशर्चं सप्तमं सूक्तं। धानाकस्य लुशस्यार्षं। आदितो द्वादश जगत्यस्ततो द्वे त्रिष्टुभौ। विश्वे देवा देवता। पूर्वसूक्ते वैश्वदेवं तु द्वित्रिष्टुबंतं त्वित्युक्तत्वात्। उषासानक्तेत्यनुक्रांतं ॥ आभिप्लविके षष्ठेऽहनि वैश्वदेव इदं वैश्वदेवनिविद्धानं। सूचितं च। कतरा पूर्वोषासानक्तेति वैश्वदेवं। आ० ७. ७.। इति ॥

उषासानक्ता बृहती सुपेशसा द्यावाक्षामा वरुणो मित्रो अर्यमा।
इंद्रं हुवे मरुतः पर्वताँ अप आदित्यान्द्यावापृथिवी अपः स्वः ॥१॥
उषसानक्ता। बृहती इति। सुऽपेशसा। द्यावाक्षामा। वरुणः। मित्रः। अर्यमा।
इंद्रं। हुवे। मरुतः। पर्वतान्। अपः। आदित्यान्। द्यावापृथिवी इति। अपः।
स्वरिति स्वः ॥१॥

बृहती बृहत्यौ महत्यौ सुपेशसा सुरूपे उषासानक्ता रात्र्युषसौ द्यावाक्षामा द्यावापृथिव्यौ च वरुणो मित्रो मित्रावरुणौ चार्यमा च येऽत्र विहिता देवाः तानेतानिंद्रं मरुतश्च पर्वतांश्चाप उदकानि चादित्यांश्च द्यावापृथिवी द्यावापृथिव्यौ च। पुनर्द्यावापृथिव्योर्ग्रहणमादरार्थं। अपोऽंतरिक्षं च स्वः सर्वं च यष्टव्यं देवजातं हुवे। हूयामि ॥

द्यौश्च नः पृथिवी च प्रचेतस ऋतावरी रक्षतामंहसो रिषः।
मा दुर्विदत्रा निर्ऋतिर्नो ईशत तद्देवानामवो अद्या वृणीमहे ॥२॥
द्यौः। च। नः। पृथिवी। च। प्रऽचेतसा। ऋतवरी इत्यृतऽवरी। रक्षतां। अंहसः। रिषः।
मा। दुःऽविदत्रा। निःऽऋतिः। नः। ईशत। तत्। देवानां। अवः। अद्य। वृणीमहे ॥२॥

प्रचेतसा सुबुद्धी ऋतावरी यज्ञवत्यौ सत्यवत्यौ द्यौश्च पृथिवी च द्यावापृथिव्यावुभे नोऽस्मान्रिषो हिंसकादंहसः पापाच्च रक्षतां। किंच दुर्विदत्रा कुत्सितज्ञाना निर्ऋतिर्मृत्युदेवता नोऽस्माकं मेशत। ईश्वरी मा भूत। किंच वयं देवानां संबंधि तदसाधारणमवो रक्षणमद्यास्मिन्नहनि प्रधानयागदिवसे वृणीमहे। प्रार्थयामहे ॥

विश्वस्मान्नो अदितिः पात्वंहसो माता मित्रस्य वरुणस्य रेवतः।
स्वर्वज्ज्योतिरवृकं नशीमहि तद्देवानामवो अद्या वृणीमहे ॥३॥
विश्वस्मात्। नः। अदितिः। पातु। अंहसः। माता। मित्रस्य। वरुणस्य। रेवतः।
स्वःऽवत्। ज्योतिः। अवृकं। नशीमहि। तत्। देवानां। अवः। अद्य। वृणीमहे ॥३॥

रेवतो धनवतो मित्रस्य वरुणस्य च धनवतोर्मित्रावरुणयोर्माता जनयित्र्यदितिर्देवी नोऽस्मान्विश्वस्मात्सर्वस्मादंहसः पापात्पातु। रक्षतु। किंच वयमवृकं बाधकरहितं स्वर्वत् सर्वं ज्योतिष्टोमो नशीमहि। नशिः पलायनकर्मा। पलायनं च शीघ्रगमनं। शीघ्रं प्राप्नुम इत्यर्थः। सिद्धमन्यत् ॥

यावा वदन्नप रक्षाँसि सेधतु दुष्वप्न्यं निर्ऋतिं विश्वमत्रिणँ ।
आदित्यं शर्म मरुतामशीमहि तद्देवानामवो अद्या वृणीमहे ॥४॥
यावा । वदन् । अप । रक्षाँसि । सेधतु । दुःऽस्वप्न्यं । निःऽऋतिं । विश्वं । अत्रिणं ।
आदित्यं । शर्म । मरुतां । अशीमहि । तत् । देवानां । अवः । अद्य । वृणीमहे ॥४॥

यावाभिषवपाषाणो वदन्नभिषववेलायां शब्दं कुर्वन्रक्षांसि यागविघ्नकारीण्यप सेधतु । विनिवारयतु । दुःस्वाप्यं दुःस्वप्नप्रभवमस्मदीयमनिष्टं चाप सेधतु । निर्ऋतिं मृत्युदेवतां चाप सेधतु । अत्रिणमदनशीलं विश्वं सर्वं पिशाचादिकं चाप सेधतु । एवं निर्विघ्नेन निष्पन्ने यागे वयमादित्यमादित्यानां संबंधि मरुतां च संबंधि शर्म सुखमशीमहि । प्राप्नुयाम । सिद्धमन्यत् ॥

एंद्रो बर्हिः सीदतु पिन्वतामिळा बृहस्पतिः सामभिर्ऋक्वो अर्चतु ।
सुप्रकेतं जीवसे मन्म धीमहि तद्देवानामवो अद्या वृणीमहे ॥५॥
आ । इंद्रः । बर्हिः । सीदतु । पिन्वतां । इळा । बृहस्पतिः । सामऽभिः । ऋक्वः । अर्चतु ।
सुऽप्रकेतं । जीवसे । मन्म । धीमहि । तत् । देवानां । अवः । अद्य । वृणीमहे ॥५॥

इंद्रो बर्हिरा सीदतु । इळा माध्यमिका स्तनयित्नुलक्षणा वागपि पिन्वतां । किंतु सामभिर्गीयमान ऋक्वः स्तुतिमान्बृहस्पतिरप्यर्चतु । अस्मान्पूजयतु । किंच वयं सुप्रकेतं सुप्रज्ञानं मन्म मननीयं धनं स्तोत्रं वा धीमहि निदधीमहि जीवसे जीवनाय । सिद्धमन्यत् ॥ ॥९॥

दिविस्पृशं यज्ञमस्माकमश्विना जीराध्वरं कृणुतं सुम्नमिष्टये ।
प्राचीनरश्मिमाहुतं घृतेन तद्देवानामवो अद्या वृणीमहे ॥६॥
दिविऽस्पृशं । यज्ञं । अस्माकं । अश्विना । जीरऽअध्वरं । कृणुतं । सुम्नं । इष्टये ।
प्राचीनऽरश्मिं । आऽहुतं । घृतेन । तत् । देवानां । अवः । अद्य । वृणीमहे ॥६॥

हे अश्विनौ युवां नोऽस्माकं यज्ञं दिविस्पृशं दिवि स्पष्टारं गंतारं कृणुतं । कुरुतं । तथा जीराध्वरं क्षिप्रं हिंसारहितं च यज्ञं नोऽस्माकं कृणुतं । कुरुतं । इष्टयेऽभिलषितसिद्ध्यर्थं सुम्नं सुखं च कुरुतं । किंच घृतेनाज्येनाक्तमग्निं प्राचीनरश्मिं देवाभिमुखं कुरुतमित्यर्थः । सिद्धमन्यत् ॥

उप ह्वये सुहवं मारुतं गणं पावकमृष्वं सख्याय शंभुवं ।
रायस्पोषं सौश्रवसाय धीमहि तद्देवानामवो अद्या वृणीमहे ॥७॥
उप । ह्वये । सुऽहवं । मारुतं । गणं । पावकं । ऋष्वं । सख्याय । शंऽभुवं ।
रायः । पोषं । सौश्रवसाय । धीमहि । तत् । देवानां । अवः । अद्य । वृणीमहे ॥७॥

सुहवं स्वाह्वानं पावकं शोधकमृष्वं दर्शनीयं शंभुवं सुखस्य भावयितारं रायो धनस्य पोषं पोषकं मारुतं मरुतां संबंधिनं गणं संघं सख्याय सखिभावायोप ह्वये । उपगम्य ह्वयामि । आगतं गणं सौश्रवसाय शोभनान्नवत्त्वाय सुयशस्त्वाय वा वयं धीमहि । बुद्धौ निदधीमहि । सिद्धमन्यत् ॥

अपां पेरुं जीवधन्यं भरामहे देवाय्यं सुहवमध्वरश्रियं ।
सुरश्मिं सोममिंद्रियं यमीमहि तद्देवानामवो अद्या वृणीमहे ॥८॥

अपां। पेरुं। जीवऽधन्यं। भरामहे। देवऽअर्ध्यं। सुऽहवं। अध्वरऽश्रियं।
सुऽरश्मिं। सोमं। इंद्रियं। यमीमहि। तत्। देवानां। अवः। अद्य। वृणीमहे ॥८॥

अपामुदकानां पेरुं पालकं जीवधन्यं। धन्या जीवा यस्मिन्नसौ जीवधन्यः। तं देवार्ह्यं देवानां तर्पकं सुहवं शोभनाह्वानं शोभनस्तुतिं वाध्वरश्रियं सुरश्मिं शोभनांशुं सोमं भरामहे। धारयामः। पत्नीशालातो हविर्धानं प्रति प्रापयामो वा। भृतं तं सोममिंद्रियं वीर्यं यमीमहि। वयं याचामहे। सिद्धमन्यत् ॥

सनेम तत्सुसनितो सनित्वभिर्वयं जीवा जीवपुत्रा अनागसः।
ब्रह्मद्विषो विष्वगेनो भरेरत तद्देवानामवो अद्या वृणीमहे ॥९॥
सनेम। तत्। सुऽसनितः। सनित्वऽभिः। वयं। जीवाः। जीवऽपुत्राः। अनागसः।
ब्रह्मऽद्विषः। विष्वक्। एनः। भरेरत। तत्। देवानां। अवः। अद्य। वृणीमहे ॥९॥

जीवा जीवंतो जीवपुत्रा जीवनवत्पुत्राश्चानागसोऽपराधवर्जिताश्च वयं धनाका सुप्राः सनित्वभिः संभक्तृभिः पुत्रपौत्रादिभिः सह सुसनिता शोभनेन भजनेन तद्देवजातं सनेम। सुत्या हविष्प्रदानेन च संभजेमहि। किंच ब्रह्मद्विषो ब्राह्मणानामस्माकं द्वेष्टारो विष्वग्नानागच्छदेनोऽस्मदीयं पापं भरेरत। आत्मनि धारयंतु। पोषयंतु। सिद्धमन्यत् ॥

ये स्था मनोर्यज्ञियास्ते शृणोतन यद्वो देवा ईमहे तद्दातन।
जैत्रं क्रतुं रयिमद्वीरवद्यशस्तद्देवानामवो अद्या वृणीमहे ॥१०॥
ये। स्थ। मनोः। यज्ञियाः। ते। शृणोतन। यत्। वः। देवाः। ईमहे। तत्। ददातन।
जैत्रं। क्रतुं। रयिमत्। वीरऽवत्। यशः। तत्। देवानां। अवः। अद्य। वृणीमहे ॥१०॥

हे देवाः ये यूयं मनोर्मनुष्यस्य यज्ञिया यज्ञार्हाः स्थ भवथ ते यूयं शृणोतन। अस्मदीयां स्तुतिं शृणुत। किंच हे देवाः वो युष्मान्यदभीष्टमीमहे याचामहे तज्जैत्रं जयशीलं क्रतुं प्रज्ञानं रयिमद्धनवद्वीरवत्पुत्रायुपेतं यशश्च ददातन। नोऽस्मभ्यं प्रयच्छत। सिद्धमन्यत् ॥ ॥१०॥

महद्व महतामा वृणीमहेऽवो देवानां बृहतामनर्वणां।
यथा वसु वीरजातं नशामहै तद्देवानामवो अद्या वृणीमहे ॥११॥
महत्। अद्य। महतां। आ। वृणीमहे। अवः। देवानां। बृहतां। अनर्वणां।
यथा। वसु। वीरऽजातं। नशामहै। तत्। देवानां। अवः। अद्य। वृणीमहे ॥११॥

अद्यास्मिन्नहनि महतां श्रेष्ठानां बृहतां वृद्धानामनर्वणामप्रतिगतानां देवानामिंद्रादीनां संबंधि महदधिकमवो रक्षणमा वृणीमहे। प्रार्थयामहे। किंच वयं यथा वसु धनं वीरजातमपत्यजातं च नशामहै प्राप्नुयाम तथा ते देवाः कुर्वंत्विति शेषः ॥

महो अग्नेः समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये।
श्रेष्ठे स्याम सवितुः सवीमनि तद्देवानामवो अद्या वृणीमहे ॥१२॥
महः। अग्नेः। संऽइधानस्य। शर्मणि। अनागाः। मित्रे। वरुणे। स्वस्तये।
श्रेष्ठे। स्याम। सवितुः। सवीमनि। तत्। देवानां। अवः। अद्य। वृणीमहे ॥१२॥

समिधानस्य समिध्यमानस्य महो महतोऽग्नेः शर्मणि सुखे वयं स्याम । भवेम । किंच वयमनागा अनागसः ॥ वचनव्यत्ययः ॥ स्याम । अपि च मित्रे वरुणे मित्रावरुणयोः । षष्ठ्यर्थे सप्तमी । सवितुश्च सवीमनि प्रसवे स्वस्तये सर्वप्रकाराविनाशाय स्याम । सिद्धमन्यत् ॥

ये सवितुः सत्यसवस्य विश्वे मित्रस्य व्रते वरुणस्य देवाः ।
ते सौभगं वीरवन्नोमदग्नो दधातन द्रविणं चित्रमस्मे ॥१३॥
ये । सवितुः । सत्यऽसवस्य । विश्वे । मित्रस्य । व्रते । वरुणस्य । देवाः ।
ते । सौभगं । वीरऽवत् । गोऽमत् । अग्नः । दधातन । द्रविणं । चित्रं । अस्मे इति ॥१३॥

ये विश्वे देवाः सत्यसवस्य सत्यप्रसवस्य सवितुर्मित्रस्य वरुणस्य मित्रावरुणयोश्च व्रते प्रसवाख्ये कर्मणि भवंति ते यूयं सौभगं सौभाग्यं वीरवत्पुत्रादियुपेतं गोमन्नोयुक्तं चित्रं पूजनीयं द्रविणं धनं चाग्नः कर्म चास्मे मह्यं दधातन । प्रयच्छत ॥

सविता पश्चातात्सविता पुरस्तात्सवितोत्तरात्तात्सवितादरात्तात् ।
सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ॥१४॥
सविता । पश्चातात् । सविता । पुरस्तात् । सविता । उत्तरात्तात् । सविता । अधरात्तात् ।
सविता । नः । सुवतु । सर्वऽतातिं । सविता । नः । रासतां । दीर्घं । आयुः ॥१४॥

पश्चातात्पश्चिमतः स्थितः सविता पुरस्तात्पूर्वतश्च स्थितः सवितोत्तरात्तादुत्तरतः स्थितश्च सविता नो ऽस्माकं सर्वतातिं सर्वमभिलषितं धनादिकं सुवतु । प्रेरयतु । किंच सवितैव नोऽस्मभ्यं दीर्घं बहुकालीनमायू रासतां । ददातु । बहुधा सवितृपदग्रहणमत्यंतमादरार्थं ॥ ॥११॥

नमो मित्रस्येति द्वादशर्चमष्टमं सूक्तं । अभितपा नाम सूर्यपुत्र ऋषिः । इदमादीनि पंच सूक्तानि जागतानि । अस्य सूक्तस्य दशमी त्रिष्टुप् । सूर्यो देवता । तथा चानुक्रांतं । नमो द्वादश सौर्योऽभितपाः सौर्यं जागतं वै त्रिष्टुब्दशमीति ॥ आश्विनशस्त्रे सूर्योदयादूर्ध्वं सौर्यकांड एतत्सूक्तं । सूचितं च । चित्रं देवानां नमो मित्रस्य । आ० ६. ५० । इति ॥ विषुवति निष्केवल्य आद्यस्तृचोऽनुरूपः । सूचितं च । विभ्राड्बृहत्पिबतु सोम्यं मधु नमो मित्रस्य वरुणस्य चक्षस इति स्तोत्रियानुरूपौ । आ० ८. ६. । इति ॥ स्वपंतमभ्यस्तमये सति रात्रिशेषं स्थित्वा प्रातर्येन सूर्यो ज्योतिषेत्यादिभिः पंचभिः सूर्य उपस्थेयः । सूचितं च । अव्याधितं चेत्स्वपंतमादित्यो ऽभ्यस्तमियाद्वाग्यतोऽनुपविशन्नात्रिशेषं भुक्त्वा येन सूर्य ज्योतिषा बाधसे तम इति पंचभिरादित्यमुपतिष्ठेत । स्वपंतमभ्युदिते यस्य ते विश्वेत्यादिभिश्चतसृभिः सूर्य उपस्थेयः । सूचितं च । अभ्युदियाच्चेदकर्मश्रांतमनभिरूपेण कर्मणा वाग्यत इति समानमुत्तराभिश्चतसृभिरुपस्थानं । आ० गृ० ३. ७. १-२. । इति ॥ एकादशिनस्य सौर्यस्य पशोर्हविषो याज्या । सूचितं च । शं नो भव चक्षसा शं नो अह्ना वायो भूष शुचिपाः । आ० ३. ८. । इति ॥ होत्रकाणां शुक्लाधाने यद्वो देवा इत्येषा । आ० ६. १२. ॥ विवाहे कन्यारोदनीये जीवं रुदंतीत्येषा जप्या । आ० गृ० १. ८. ४. ॥

नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत ।
दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शंसत ॥१॥
नमः । मित्रस्य । वरुणस्य । चक्षसे । महः । देवाय । तत् । ऋतं । सपर्यत ।
दूरेऽदृशे । देवऽजाताय । केतवे । दिवः । पुत्राय । सूर्याय । शंसत ॥१॥

हे ऋत्विजः यूयं मित्रस्य वरुणस्य मित्रावरुणयोश्चक्षसे द्रष्ट्रे महो महते देवाय द्योतमानाय दूरेदृशे दूरे संतमपि पश्यते देवजाताय देवेषु जाताय देवार्थमुत्पन्नाय केतवे विश्वस्य प्रज्ञापकाय दिवः पुत्राय पुत्रभूताय। दिवि जायमानत्वात्तत्पुत्रत्वव्यपदेशः। सूर्याय सूर्यार्थं नमः हुत्वा तद्धितमृतं यागादिलक्षणं कर्म सपर्यत। पूजयत। शंसत। स्तुतिमपि कुरुत ॥

सा मा सत्योक्तिः परि पातु विश्वतो द्यावा च यच्च ततनन्नहानि च।
विश्वमन्यन्नि विशते यदेजति विश्वाहापो विश्वाहोदेति सूर्यः ॥२॥
सा। मा। सत्यऽउक्तिः। परि। पातु। विश्वतः। द्यावा। च। यच्च। ततनन्। अहानि। च।
विश्वं। अन्यत्। नि। विशते। यत्। एजति। विश्वाहा। आपः। विश्वाहा। उत्।
एति। सूर्यः ॥२॥

सा सत्योक्तिर्यत्सत्यवचनं मा मां विश्वतः सर्वतः परि पातु। परिरक्षतु। यया सत्योक्त्या यच्च यस्मिन्देशे द्यावा च द्यावापृथिव्यावहानि रात्रयश्च ततनन् अतन्वन् तच्च विश्वं सर्वमन्यद्भूतजातं नि विशते। विश्राम्यति। यदेतद्भूतजातमेजति कंपते विश्वाहा सर्वदापश्च स्यंदंते विश्वाहा सर्वदा सूर्यश्चोदेति। सा सत्योक्तिर्मां परिपात्वित्यर्थः ॥

न ते अदेवः प्रदिवो नि वासते यदेतशेभिः पतरै रथुर्यसि।
प्राचीनमन्यदनु वर्तते रज उदन्येन ज्योतिषा यासि सूर्य ॥३॥
न। ते। अदेवः। प्रऽदिवः। नि। वासते। यत्। एतशेभिः। पतरैः। रथुर्यसि।
प्राचीनं। अन्यत्। अनु। वर्तते। रजः। उत्। अन्येन। ज्योतिषा। यासि। सूर्य ॥३॥

हे सूर्य ते तव समीपे प्रदिवः प्रत्नः पुरातनः कश्चिददेवोऽसुरो राक्षसो वा न नि वासते। न निवसति। कदेत्यत आह। यदा यदा त्वं पतरैर्गमनशीलैरेतशेभिरश्वै रथुर्यसि रथं कामयसे योक्तुं। किंच प्राचीनमन्यत्तवदीयं ज्योती रज उदकमनु वर्तते। अन्येन तेन ज्योतिषोदासि। उदेषि। यद्वा। प्राचीनमन्यद्रजस्यद्राख्यं ज्योतिस्त्वामनु वर्तते ततस्त्वमन्येन ज्योतिषा सहोदेषीत्यर्थः ॥

येन सूर्य ज्योतिषा बाधसे तमो जगच्च विश्वमुदियर्षि भानुना।
तेनास्मद्विश्वामनिरामनाहुतिमपामीवामप दुष्ष्वप्न्यं सुव ॥४॥
येन। सूर्य। ज्योतिषा। बाधसे। तमः। जगत्। च। विश्वं। उत्ऽइयर्षि। भानुना।
तेन। अस्मत्। विश्वां। अनिरां। अनाहुतिं। अप। अमीवां। अप। दुःऽस्वप्न्यं। सुव ॥४॥

हे सूर्य त्वं येन ज्योतिषा तेजसा तमोऽंधकारं बाधसे निवारयसि येन च भानुना तेजसा विश्वं सर्वं जगज्जंगममुदियर्षि उन्नमयसि तेन ज्योतिषास्मदस्मत्तोऽनिरामन्नाभावमनाऽऽहुतिमहोमं चामीवां रोगजातं चाप सुव। अपगमय। दुःस्वप्न्यं दुःष्वप्नप्रभवमनिष्टं चाप सुव ॥

विश्वस्य हि प्रेषितो रक्षसि व्रतमहेळयन्नुच्चरसि स्वधा अनु।
यद्य त्वा सूर्योपब्रवामहै तं नो देवा अनु मंसीरत क्रतुं ॥५॥

विश्वस्य। हि। प्रऽईषितः। रक्षसि। व्रतं। अहेळयन्। उत्ऽचरसि। स्वधाः। अनु।
यत्। अद्य। त्वा। सूर्य। उपऽब्रवामहै। तं। नः। देवाः। अनु। मंसीरत। क्रतुं ॥५॥

हे सूर्य प्रेषितः प्रेरितस्त्वमहेळयन्नक्रुध्यन्विश्वस्य सर्वस्य यजमानस्य व्रतं कर्म रक्षसि हि। यज्ञविध्वंसकेभ्यो राक्षसेभ्यः पालयसि। स्वधा हवींष्यभूश्चरसि। उन्नच्छसि च। प्रातर्होमे निवृत्ते सति पश्चादुन्नच्छसीत्यर्थः। तथा च यद्यदाद्याह्नि प्रातरहनि त्वा त्वामुपब्रवामहै उपब्रूमः तदा नोऽस्माकं तं क्रतुं तत्कर्म देवा इंद्रादयोऽनु मंसीरत। अनुमन्यंतां ॥

तं नो द्यावापृथिवी तन्न आप इंद्रः शृण्वंतु मरुतो हवं वचः।
मा शूने भूम सूर्यस्य संदृशि भद्रं जीवंतो जरणामशीमहि ॥६॥
तं। नः। द्यावापृथिवी इति। तत्। नः। आपः। इंद्रः। शृण्वंतु। मरुतः। हवं। वचः।
मा। शूने। भूम। सूर्यस्य। संऽदृशि। भद्रं। जीवंतः। जरणां। अशीमहि ॥६॥

द्यावापृथिवी द्यावापृथिव्यावापश्चेंद्रश्च मरुतश्च नोऽस्माकं तं हवमाह्वानं नोऽस्माकं तद्वचः स्तुतिरूपं वाक्यं च। न इति द्विरुक्तिरादरार्था। शृण्वंतु। किंच वयं सूर्यस्य संदृशि संदर्शने शूने प्रवृद्धाय दुःखाय मा भूम। मैव भवेम। किंतु जीवंतश्चिरं प्राणान्धारयंतो वयं भद्रं कल्याणं जरणां वृद्धत्वममरत्वं चाशीमहि। प्राप्नुयाम ॥ ॥१२॥

विश्वाहा त्वा सुमनसः सुचक्षसः प्रजावंतो अनमीवा अनागसः।
उद्यंतं त्वा मित्रमहो दिवेदिवे ज्योग्जीवाः प्रति पश्येम सूर्य ॥७॥
विश्वाहा। त्वा। सुऽमनसः। सुऽचक्षसः। प्रजाऽवंतः। अनमीवाः। अनागसः।
उत्ऽयंतं। त्वा। मित्रऽमहः। दिवेऽदिवे। ज्योक्। जीवाः। प्रति। पश्येम। सूर्य ॥७॥

हे सूर्य त्वा त्वां सुमनसः प्रीतियुक्तमनस्काः सुचक्षसः सुदर्शनाः प्रजावंतः पुत्रादियुक्ता अनमीवा रोगरहिता अनागसोऽपराधवर्जिताश्च वयं विश्वाहा सर्वदा यजेमेति शेषः। किंच हे मित्रमहो मित्राणां पूजयितः सूर्य दिवेदिवे प्रतिदिनमुद्यंतमुदयं प्राप्नुवंतं त्वा त्वां ज्योक् चिरं जीवा जीवंतो वयं प्रति पश्येम ॥

महि ज्योतिर्बिभ्रतं त्वा विचक्षण भास्वंतं चक्षुषेचक्षुषे मयः।
आरोहंतं बृहतः पाजसस्परि वयं जीवाः प्रति पश्येम सूर्य ॥८॥
महि। ज्योतिः। बिभ्रतं। त्वा। विऽचक्षण। भास्वंतं। चक्षुषेऽचक्षुषे। मयः।
आऽरोहंतं। बृहतः। पाजसः। परि। वयं। जीवाः। प्रति। पश्येम। सूर्य ॥८॥

हे विचक्षण विद्रष्टः सूर्य महि महज्ज्योतिस्तेजो बिभ्रतं धारयंतं भास्वंतं दीप्तिमंतं चक्षुषे चक्षुषे सर्वेषां द्रष्टॄणां चक्षुषे मयः सुखकरं बृहतो महतः पाजसो बलवतः परि। महतो बलवतः समुद्रस्योदकस्योपरीत्यर्थः। आरोहंतं त्वा त्वां जीवाश्चिरं जीवंतो वयं प्रति प्रतिदिनं पश्येम ॥

यस्य ते विश्वा भुवनानि केतुना प्र चेरते नि च विशंते अक्तुभिः।
अनागास्त्वेन हरिकेश सूर्याहाहा नो वस्यसावस्यसोदिहि ॥९॥

यस्य । ते । विश्वा । भुवनानि । केतुना । प्र । च । ईरते । नि । च । विशते । अक्तुऽभिः ।
अनागाःऽत्वेन । हरिऽकेश । सूर्य । अह्नाऽअह्ना । नः । वस्यसाऽवस्यसा । उत् । इहि ॥९॥

हे हरिकेश हरितवर्णकेश सूर्य यस्य ते तव केतुना प्रज्ञानेन विश्वा विश्वानि भुवनानि भूतजातानि प्र चेरते प्रकर्षेण गच्छंति अक्तुभी रात्रिभिर्नि विशंते च विश्राम्यंति च । स्वपंतीत्यर्थः । स त्वं नोऽस्माकमनागास्त्वेनापराधवर्जितत्वेन वस्यसा वस्यसात्यंतश्रेयस्करेण वसुमत्तरेण वाह्नाह्ना तेन तेन दिवसेनोदिहि । उन्नच्छ ॥

शं नो भव चक्षसा शं नो अह्ना शं भानुना शं हिमा शं घृणेन ।
यथा शमध्वञ्छमसद्दुरोणे तत्सूर्य द्रविणं धेहि चित्रं ॥१०॥
शं । नः । भव । चक्षसा । शं । नः । अह्ना । शं । भानुना । शं । हिमा । शं । घृणेन ।
यथा । शं । अध्वन् । शं । असत् । दुरोणे । तत् । सूर्य । द्रविणं । धेहि । चित्रं ॥१०॥

हे सूर्य त्वं चक्षसा तेजसा नोऽस्माकं शं सुखकरो भव । अह्ना दिवसेन च शं सुखकरो नोऽस्माकं भव । भानुना रश्मिना च शं भव । अस्माकं सुखकरो भव । हिमा शैत्येन च शं भव । घृणेनौष्ण्येन च शंकरो भव । यथा यादृशेन नोऽस्माकमध्वन्नध्वनि मार्गे शं भवति दुरोणे गृहे च शं सुखमसत् भवति तच्चित्रं पूजनीयं द्रविणं धनं धेहि । अस्मभ्यं प्रयच्छ ॥

अस्माकं देवा उभयाय जन्मने शर्म यच्छत द्विपदे चतुष्पदे ।
अदत्पिबदूर्जयमानमाशितं तदस्मे शं योरर्पो दधातन ॥११॥
अस्माकं । देवाः । उभयाय । जन्मने । शर्म । यच्छत । द्विऽपदे । चतुःऽपदे ।
अदत् । पिबत् । ऊर्जयमानं । आशितं । तत् । अस्मे इति । शं । योः । अरपः । दधातन ॥११॥

हे देवाः सूर्येणाभ्यनुज्ञाता यूयमस्माकं द्विपदे मनुष्यात्मकाय चतुष्पदे पश्वात्मकाय चोभयायोभयविधाय जन्मने भूतजाताय शर्म सुखं यच्छत । दत्त । किंच यथास्मत्पुत्रादिकमदन्नक्षणीयं भक्षयत् पिबत्पानीयं पिबन्नोर्जयमानं बलवंतमिवात्मानमाचरन्नाशितं सुहितं च भवति तथा शं रोगशांतिनिमित्तकं सुखं योर्विषययोगजनितं सुखं चारपोऽपापं च दधातन । प्रयच्छत ॥

यद्वो देवाश्चकृम जिह्वया गुरु मनसो वा प्रयुती देवहेळनं ।
अरावा यो नो अभि दुच्छुनायते तस्मिन्तदेनो वसवो नि धेतन ॥१२॥
यत् । वः । देवाः । चकृम । जिह्वया । गुरु । मनसः । वा । प्रऽयुती । देवऽहेळनं ।
अरावा । यः । नः । अभि । दुच्छुनऽयते । तस्मिन् । तत् । एनः । वसवः । नि । धेतन ॥१२॥

हे वसवो वासयितारो देवाः वो युष्माकं वयं जिह्वया वाचा मनसः प्रयुती प्रयुत्या प्रयोगेण गुरु महद्देवहेळनं देवक्रोधनं च यदेनश्चकृम अकार्ष्म योऽस्मच्छत्रुर्नोऽस्मानभि प्रत्यरावा गमनवान्भूत्वा दुच्छुनायते पापान्याचरत्यस्मानुद्वेजयति वा तस्मिन्नस्मच्छत्रौ तदेनोऽस्माभिः कृतं पापं नि धेतन । सूर्यस्याज्ञया विधत्त । स्थापयतेत्यर्थः ॥ ॥१३॥

अस्मिन्न इति पंचर्चं नवमं सूक्तं जागतमैंद्रं । मुष्कविशिष्ट इंद्राख्य ऋषिः । तथा चानुक्रांतं । अस्मिन्नः पंच मुष्कवानिंद्र इति ॥ गतो विनियोगः ॥ अपरे तु तांडवाः शाट्यायनका अस्य सूक्तस्य मुष्कवानिंद्रो देवता लुप्त ऋषिरिति वर्णयंति ॥

अस्मिन्वं इंद्र पृत्सुतौ यशस्वति शिमीवति क्रंदसि प्राव सातये ।
यच गोषाता धृषितेषु खादिषु विष्वक्पतंति दिद्यवो नृषाह्ये ॥१॥
अस्मिन्। नः। इंद्र। पृत्सुतौ। यशस्वति। शिमीऽवति। क्रंदसि। प्र। अव। सातये।
यच। गोऽसाता। धृषितेषु। खादिषु। विष्वक्। पतंति। दिद्यवः। नृऽसह्ये ॥१॥

हे इंद्र त्वं यशस्वति कीर्तिमति शिमीवति परस्परप्रहारलक्षणकर्मवत्यस्मिन्नुपस्थिते पृत्सुतौ संग्रामे क्रंदसि। सिंहनादं करोषि। सातये धनलाभाय प्राव नोऽस्मान्प्ररक्षसि च। कस्मिन्नित्यत्राह। यच यस्मिन्गोषाता गोसातौ लब्धपशुके नृषाह्ये नृणामभिभावुके च संग्रामे खादिषु परस्परखादकेषु च योद्धृषु धृषितेषु धृष्टेषु सत्सु दिद्यव आयुधानि विष्वक् सर्वतः पतंति ॥

स नः क्षुमंतं सदने व्यूर्णुहि गोअर्णसं रयिमिंद्र श्रवाय्यं ।
स्याम ते जयंतः शक्र मेदिनो यथा वयमुश्मसि तद्वसो कृधि ॥२॥
सः। नः। क्षुऽमंतं। सदने। वि। ऊर्णुहि। गोऽअर्णसं। रयिं। इंद्र। श्रवाय्यं।
स्याम। ते। जयंतः। शक्र। मेदिनः। यथा। वयं। उश्मसि। तत्। वसो इति। कृधि ॥२॥

हे इंद्र स सर्वानुग्राहकत्वेन प्रसिद्धस्त्वं नोऽस्माकं सदने गृहे क्षुमंतमन्नवंतं शब्दवंतं वा गोअर्णसं। गावो ऽर्ण उदकमिव प्रवृद्धा यस्मिन्। तं श्रवाय्यं श्रवणीयं रयिं धनं व्यूर्णुहि। विविधमाच्छादय। किंच हे वसो वासक शक्रेंद्र जयतः शत्रुं ते तव प्रसादाद्वयं मेदिनो मेदसा युक्ता बलवंतः स्याम। भवेम। किं बहुक्त्या। यथा यद्वयमुश्मसि कामयामहे तत्सर्वं कृधि। कुरु ॥

यो नो दास आर्यो वा पुरुष्टुतादेव इंद्र युधये चिकेतति ।
अस्माभिष्टे सुषहाः संतु शत्रवस्त्वया वयं तान्वनुयाम संगमे ॥३॥
यः। नः। दासः। आर्यः। वा। पुरुऽस्तुत। अदेवः। इंद्र। युधये। चिकेतति।
अस्माभिः। ते। सुऽसहाः। संतु। शत्रवः। त्वया। वयं। तान्। वनुयाम। संऽगमे ॥३॥

हे पुरुष्टुत बहुस्तुतेंद्र यो दासः कर्मकरः शूद्र आर्यस्त्रैवर्णिकोऽदेवो देवादन्योऽसुरो वा नोऽस्मान्युधये युद्धाय चिकेतति जानाति ते सर्वे शत्रवोऽस्मदरयस्ते तव प्रसादादस्माभिः सुसहाः स्वभिभवाः संतु। भवंतु। किंच वयं त्वया सहायेन ताञ्शत्रून्संगमे संग्रामे वनुयाम। हन्याम ॥

यो द्रभेभिर्हव्यो यश्च भूरिभिर्यो अभीके वरिवोविद्वृषाह्ये ।
तं विखादे सख्यिमद्य श्रुतं नरमवोचमिंद्रमवसे करामहे ॥४॥
यः। द्रभेभिः। हव्यः। यः। च। भूरिऽभिः। यः। अभीके। वरिवः।ऽवित्। नृऽसह्ये।
तं। विऽखादे। सख्यिं। अद्य। श्रुतं। नरं। अवोचं। इंद्रं। अवसे। करामहे ॥४॥

नृसह्ये नृणामभिभावुके विखादे विशेषेण भक्षके ऽभीके संग्रामे वरिवोविद्धनस्य लंभको य इंद्रो द्रभेभिः स्वल्पैर्हव्यो ह्वातव्यो यश्च भूरिभिर्बहुभिर्हव्यः तं सख्यिं सुचिं श्रुतं सर्वत्र विख्यातं नरं नेतारमिंद्रमवाख्यिन्नहत्यवसेऽस्मद्रक्षणायावोचमस्मदभिमुखं करामहे। कुर्मः ॥

स्ववृजं हि त्वामहमिंद्र शुश्रवानानुदं वृषभ रध्रचोदनं ।
प्र मुंचस्व परि कुत्सादिहा गंहि किमु त्वावान्मुष्कयोर्बर्ह आसते ॥५॥
स्वऽवृजं । हि । त्वां । अहं । इंद्र । शुश्रव । अननुऽदं । वृषभ । रध्रऽचोदनं ।
प्र । मुंचस्व । परि । कुत्सात् । इह । आ । गहि । किं । ऊं इति । त्वाऽवान् । मुष्कयोः ।
बर्हः । आसते ॥५॥

हे वृषभ कामानां वर्षकेंद्र स्ववृजं स्वयमेव छेत्तारमननुदमनपेक्षितबलानुप्रदानं रध्रचोदनं राधकस्य चोदकं प्रेरकं त्वामहं शुश्रव अश्रौषं हि यस्मात् तस्मात्त्वं मुंचस्व । कुत्सेन वार्ध्रीश्वतेनांडयोर्बद्धमात्मानं बंधनाद्विमुंच । अथ परि सर्वतः परिवृतस्त्वं कुत्सात्कुत्साख्यादृषेरिहास्मद्याग आ गहि । आगच्छ । किमु त्वावांस्त्वत्सदृशोऽन्यः कश्चिन्मुष्कयोर्बर्ह आसते । न कोऽपीतादृशो निर्लज्जस्त्वत्तोऽन्योऽस्तीत्यभिप्रायः । तच्च शाट्यायनकं । कुत्सश्च शुश्रश्चेंद्रं व्यह्वयेतां स कुत्सस्याह्वयमागच्छत् तं शतेन वार्ध्रीभिरांडयोरबध्नात् तं शुश्रोऽभ्यवदत् स्ववृजं हि त्वामहमिंद्र शुश्रवानानुदं वृषभ रध्रचोदनं प्र मुंचस्व परि कुत्सादिहा गहि किमु त्वावान्मुष्कयोर्बर्ह आसत इति ताः सर्वाः संलुप्य शुश्रमभि प्रादुद्रुवदिति । छंदोगब्राह्मणमपि । कुत्सश्च शुश्रश्च युगपदिंद्रमाह्वतवंतौ स्वं स्वं यज्ञं प्रत्यंगभावाय सखित्वादिंद्रः कुत्सं प्रति जगाम तं तु गतं वशित्वात्कुत्सो वार्ध्रीश्वतेनांडयोरबध्नादिति ॥ ॥१४॥

यो वामिति चतुर्दशर्चं दशमं सूक्तं । कक्षीवतो दुहिता घोषा नाम ब्रह्मवादिन्यृषिः । अंत्या त्रिष्टुप् । शिष्टा जगत्यः । अश्विनौ देवता । तथा चानुक्रांतं । यो वां षळूना काक्षीवती घोषाश्विनं हि त्रिष्टुबंतमिति ॥ प्रातरनुवाकाश्विनशस्त्रयोर्जागते छंदसीदमादीनि तीणि सूक्तानि । सूचितं च । यो वां परिज्मेति तीणि त्रिष्टुभो अथ । आ० ४. १५. । इति ॥

यो वां परिज्मा सुवृदश्विना रथो दोषामुषासो हव्यो हविष्मता ।
शश्वत्तमासस्तमु वामिदं वयं पितुर्न नाम सुहवं हवामहे ॥१॥
यः । वां । परिऽज्मा । सुऽवृत् । अश्विना । रथः । दोषां । उषसः । हव्यः । हविष्मता ।
शश्वत्ऽतमासः । तं । ऊं इति । वां । इदं । वयं । पितुः । न । नाम । सुऽहवं । हवामहे ॥१॥

हे अश्विनाश्विनौ वां युवयोः परिज्मा परितो गंता सुवृत्सुष्ठु वर्तमानो यो रथो दोषां रात्रिमुषसश्च । अहोरात्रयोरित्यर्थः । हविष्मता यजमानेन हव्यो ह्वातव्यो वां युवयोः स्वभूतं सुहवं शोभनाह्वानं तमु तमेव रथं शश्वत्तमासोऽतिशयेन चिरंतना वयं पितुर्न यथा पितुरिदं नाम तथा हवामहे । ह्वयामः ॥

चोदयंतं सूनृताः पिन्वंतं धिय उत्पुरंधीरीरयंतं तदुश्मसि ।
यशसं भागं कृणुतं नो अश्विना सोमं न चारुं मघवत्सु नस्कृतं ॥२॥
चोदयंतं । सूनृताः । पिन्वंतं । धियः । उत् । पुरंऽधीः । ईरयंतं । तत् । उश्मसि ।
यशसं । भागं । कृणुतं । नः । अश्विना । सोमं । न । चारुं । मघवत्ऽसु । नः । कृतं ॥२॥

हे अश्विनाश्विनौ युवां सूनृता वाच उषसो वा चोदयतं । प्रेरयतं । अस्माकं धियः कर्माणि च पिन्वतं । पूरयतं । पुरंधीर्बहूीः प्रज्ञाश्चोदीरयतं । उन्नमयतं । प्रेरयतं । उत्पादयतमित्यर्थः । तदेतत्त्रयमुश्मसि । वयं कामयामहे । किंच नोऽस्माकं यशसं यशस्विनं भागं भजनीयं धनादिकं कृणुतं । कुरुतं । चारुं कल्याणं सोमं न सोममिव नोऽस्मान्मघवत्सु धनवत्सु कृतं । कुरुतं ॥

अमाजुरश्चिद्भवथो युवं भगोऽनाशोश्चिद्वितारापमस्य चित् ।
अंधस्य चिन्नासत्या कृशस्य चिद्युवामिद्धुभिषजा रुतस्य चित् ॥३॥
अमाऽजुरः । चित् । भवथः । युवं । भगः । अनाशोः । चित् । अवितारा । अपमस्य । चित् ।
अंधस्य । चित् । नासत्या । कृशस्य । चित् । युवां । इत् । आहुः । भिषजा । रुतस्य । चित् ॥३॥

हे नासत्या नासत्यौ युवं युवाममाजुरश्चित्पितृगृहे जूर्यत्या अपि दुर्भगाया घोषाया भगो भवथः । शोभनरूपेणात्मानं परिणमय्य पतिं दत्तवंती स्य इत्यर्थः । तथा च निगमांतरं । घोषायै चित्पितृषदे दुरोणे पतिं जूर्यंत्या अश्विनावदत्तं । ऋ० १. ११७. ७. । इति । अनाशोश्चिदनशनस्याप्यवितारा रक्षितारौ युवां भवथः । अपमस्य चिज्जात्यातिनिकृष्टस्यापि रक्षितारौ भवथः । अंधस्य चिच्चक्षुर्विकलस्यापि रक्षितारौ भवथः । कृशस्य चिद्दुर्बलस्यापि रक्षितारौ भवथः । किंच युवामिद्युवामेवंतस्य चिद्यज्ञस्यापि भिषजौ वैद्यावाङ्गविदांसः ॥

युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः ।
निष्टौग्र्यमूहथुरद्भ्यस्परि विश्वेत्ता वां सवनेषु प्रवाच्या ॥४॥
युवं । च्यवानं । सनयं । यथा । रथं । पुनः । युवानं । चरथाय । तक्षथुः ।
निः । तौग्र्यं । ऊहथुः । अत्ऽभ्यः । परि । विश्वा । इत् । ता । वां । सवनेषु । प्रऽवाच्या ॥४॥

हे अश्विनौ युवं युवां सनयं पुराणं च्यवानमृषिं यथा रथं जीर्णं रथमिव पुनर्युवानं तरुणं चरथाय चरणार्थं तक्षथुः । ततक्षथुः । अकुरुतमित्यर्थः । तथा च यास्कः । युवं च्यवानं सनयं पुराणं यथा रथं पुनर्युवानं चरणाय ततक्षथुर्युवा प्रयौति कर्माणि तक्षतिः करोतिकर्मा । नि० ४. १९. । इति । किंच युवां तौग्र्यं तुग्रपुत्रं भुज्युमब्धेः परि समुद्रस्योपरि निरूहथुः । किंच वां युवयोर्विश्वा विश्वानि ता तानि कर्माणि सवनेषु यज्ञेषु प्रवाच्या प्रवाच्यानि प्रकर्षेण वक्तव्यानि ॥

पुराणा वां वीर्या३ प्र ब्रवा जनेऽथो हासथुर्भिषजा मयोभुवा ।
ता वां नु नव्यावसे करामहेऽयं नासत्या श्रदरिर्यथा दधत् ॥५॥
पुराणा । वां । वीर्या । प्र । ब्रव । जने । अथो इति । ह । आसथुः । भिषजा । मयःऽभुवा ।
ता । वां । नु । नव्यै । अवसे । करामहे । अयं । नासत्या । श्रत् । अरिः । यथा । दधत् ॥५॥

हे अश्विनौ वां युवयोः पुराणा पुराणानि वीर्याणि जने लोके प्र ब्रव । प्रब्रवीमि । अथो अपि च हे नासत्या नासत्यौ युवां मयोभुवा सुखस्य भावयितारौ भिषजा भिषजौ वैद्यावासथुः । बभूवथुः । ता तौ युवामवसे रक्षणाय नव्यै स्तुत्यै करामहे । कुर्मः । अयमरिर्गंता पतिर्यजमानो यथा श्रद्दधत् । श्रद्धादिति ॥ ॥१५॥

इयं वामह्वे शृणुतं मे अश्विना पुचायेव पितरा मह्यं शिक्षतं ।
अनापिरज्ञा असजात्यामतिः पुरा तस्या अभिशस्तेरव स्पृतं ॥६॥
इयं । वां । अह्वे । शृणुतं । मे । अश्विना । पुचायऽइव । पितरा । मह्यं । शिक्षतं ।
अनापिः । अज्ञाः । असजात्या । अमतिः । पुरा । तस्याः । अभिऽशस्तेः । अव । स्पृतं ॥६॥

हे अश्विनाश्विनौ वां युवामियं घोषाहमद्रे। आह्वयामि। मे मम संबंधिनमिममाह्वानं शृणुतं। श्रुत्वा चाह्वानं मह्यं पुत्रायेव यथा पुत्राय पितरौ मातापितरौ तद्वच्छिक्षतं। धनं दत्तं। अनापिरबंधुरश्वा अक्षत-श्रासजात्यामतिरश्वेया चाभिशस्तिर्मामागच्छति। तस्या अभिशस्तेः पुरा प्रागेवाव श्रुतं। मामवपारयतं॥

युवं रथेन विमदाय शुंध्युवं न्यूहथुः पुरुमित्रस्य योषणां।
युवं हवं वध्रिमत्या अगच्छतं युवं सुषुतिं चक्रथुः पुरंधये ॥७॥
युवं। रथेन। विऽमदाय। शुंध्युवं। नि। ऊहथुः। पुरुऽमित्रस्य। योषणां।
युवं। हवं। वध्रिऽमत्याः। अगच्छतं। युवं। सुऽसुतिं। चक्रथुः। पुरंऽधये ॥७॥

हे अश्विनौ युवं युवां पुरुमित्रस्य पुरुमित्रनामधेयस्य योषणां दुहितरं शुंध्युवं नाम जायां विमदाय विमदनामधेयायर्षये रथेन स्वसेनापरिवृतेन रथेन न्यूहथुः। प्रापयतं। विमदस्य गृहं नीतवंतौ स्थ इत्यर्थः। तथा च निगमांतरं। यावर्भगाय विमदाय जायां सेनाजुवा न्यूहतू रथेन। ऋ० १. ११६. १.। इति। किंच युवं युवां वध्रिमत्याः संग्रामे शत्रुभिश्छिन्नहस्ताया हवमाह्वानमगच्छतं। आगत्य च तस्यै हिरण्मयं हस्तं प्रायच्छतं। तथा च निगमांतरं। अजोहवीन्नासत्या करा वां महे यामन्पुरुभुजा पुरंधिः श्रुतं तच्छासुरिव वध्रिमत्या हिरण्यहस्तमश्विनावदत्तं। ऋ० १. ११६. १३.। इति। किंच युवं युवां पुरंधये बहुप्रजायै वध्रिमत्यै सुषुतिं सुप्रसवं शोभनमैश्वर्यं वा चक्रथुः। कृतवंतौ स्थः॥

युवं विप्रस्य जरणामुपेयुषः पुनः कलेरकृणुतं युवद्वयः।
युवं वंदनमृश्यदादुदूपथुर्युवं सद्यो विश्पलामेतवे कृथः ॥८॥
युवं। विप्रस्य। जरणां। उपऽइयुषः। पुनरिति। कलेः। अकृणुतं। युवत्। वयः।
युवं। वंदनं। ऋश्यऽदात्। उत्। ऊपथुः। युवं। सद्यः। विश्पलां। एतवे। कृथः ॥८॥

हे अश्विनौ युवं युवां विप्रस्य मेधाविनो जरणां जरामुपेयुष उपगतवतः कलेः कलिनामधेयस्यर्षेर्वयः पुनरपि युवद्युवत्वयुक्तमकृणुतं। अकुरुतं। तथा च निगमांतरं। कलिं याभिर्वित्तजानिं दुवस्यथः। ऋ० १. ११२. १५.। इति। किंच युवं युवां वंदनं जायावियोगसंतापेन कूपपतितं वंदनाख्यमृषिमृश्यदात्कूपादुदूपथुः। उदैरयतं। तथा निगमांतरं। उद्वंदनमैरयतं स्वर्दृशे। ऋ० १. ११२. ५.। इति। किंच युवं युवां विश्पलां। खेलस्य राज्ञः सेनायां योद्त्री विश्पला नाम काचित् स्त्री। तां संग्रामे शत्रुभिश्छिन्नजंघां सद्यस्तदैवैतवे गमनाय कृथः। अकुरुतं। तथा च निगमांतरं। चरित्रं हि वेरिवाच्छेदि पर्णमाजा खेलस्य परितक्म्यायां। सद्यो जंघामायसीं विश्पलायै धने हिते सर्तवे प्रत्यधत्तं। ऋ० १. ११६. १५.। इति॥

युवं ह रेभं वृषणा गुहा हितमुदैरयतं ममृवांसमश्विना।
युवमूबीसमुत तप्नमचय ओमन्वंतं चक्रथुः सप्नवंध्ये ॥९॥
युवं। ह। रेभं। वृषणा। गुहा। हितं। उत्। ऐरयतं। ममृऽवांसं। अश्विना।
युवं। ऊबीसं। उत। तप्नं। अचये। ओमन्ऽवंतं। चक्रथुः। सप्नऽवंध्ये ॥९॥

हे वृषणा वर्षितारावश्विनाश्विनौ युवं युवां गुहा गुहायां हितममुरैर्निहितं ममृवांसं म्रियमाणं रेभं रेभाख्यमृषिमुदैरयतं। उत्तारितवंतौ स्थः। तथा च निगमांतरं। दश रात्रीरशिवेना नव द्यूनवनद्धं ग्रथित-मप्स्वंतः। विप्रुतं रेभमुदनि प्रवृक्तमुन्निन्यथुः सोममिव सुवेण। ऋ० १. ११६. २४.। इति। उत किंच युवं युवां तप्नमूबीसमपिकुंडमचयेऽचैरर्थायौमन्वंतमवनवंतं चक्रथुः। वृष्ट्या निशमय्य गीतं कृतवंतौ स्थ इत्यर्थः। तथा च निगमांतरं। हिमेनाग्निं ग्रंसमवारयेथां पितुमतीमूर्जमस्मा अधत्तं। ऊबीसे अग्निमश्विनावनीतमुन्निन्यथुः

सर्वगणं स्वस्ति । ऋ० १. ११६. ८. । इति । किंच युवां सप्तवध्रयेऽश्वमेधेन राज्ञा केनचिदपराधेन काष्ठमयमंजूषायां निहितस्य सप्तवध्रिनामधेयस्यर्षेरर्थाय चक्रथुः । मंजूषोद्घाटनं कृतवंती स्थ इत्यर्थः । तथा च निगमांतरं । वि जिह्रीष्व वनस्पते योनिः सूष्यंत्या इव । श्रुतं मे अश्विना हवं सप्तवध्रिं च मुंचतं । ऋ० ५. ७८. ५. । इति ॥

युवं श्वेतं पेदवेऽश्विनाश्वं नवभिर्वाजिनैनवती च वाजिनं ।
चर्कृत्यं दद्थुर्द्रावयत्सखं भगं न नृभ्यो हव्यं मयोभुवं ॥१०॥
युवं । श्वेतं । पेदवे । अश्विना । अश्वं । नवऽभिः । वाजैः । नवती । च । वाजिनं ।
चर्कृत्यं । दद्थुः । द्रवयत्ऽसखं । भगं । न । नृऽभ्यः । हव्यं । मयःऽभुवं ॥१०॥

हे अश्विनाश्विनौ युवं युवां पेदवे पेदुनामधेयाय राज्ञे श्वेतं श्वेतवर्णं वाजिनं बलिनं नवभिर्नवती नवत्यश्वैः सहितं चर्कृत्यं संग्रामाणामत्यर्थं कर्तारं शत्रूणां जेतारं वा द्रवयत्सखं शत्रुसखीनां द्रावयितारं हव्यं हूतव्यं मयोभुवं सुखस्य भावयितारमश्वं नृभ्यो मनुष्येभ्यो भगं न भजनीयं धनमिव ददथुः । प्रायच्छतं ॥ ॥१६॥

न तं राजानावदिते कुतश्चन नांहो अश्नोति दुरितं नकिर्भयं ।
यमश्विना सुहवा रुद्रवर्तनी पुरोरथं कृणुथः पत्या सह ॥११॥
न । तं । राजानौ । अदिते । कुतः । चन । न । अंहः । अश्नोति । दुःऽइतं । नकिः । भयं ।
यं । अश्विना । सुऽहवा । रुद्रवर्तनी इति रुद्रऽवर्तनी । पुरः ऽरथं । कृणुथः । पत्या ।
सह ॥११॥

हे राजानावीश्वरावदिते अदीनौ सुहवौ स्वाह्वानौ रुद्रवर्तनी रोचयुक्तमार्गौ हे अश्विनाश्विनौ युवां यं जनं पुरोरथमग्रतोरथं पत्या सह स्वयंवरे कृणुथः कुरुथः तं जनं कुतश्चन कुतोऽप्यंहः पापं नाश्नोति । न व्याप्नोति । दुरितं दुर्गतिरपि नाश्नोति । नकिर्न च भयं संसारभयं न प्राप्नोति ॥

आ तेन यातं मनसो जवीयसा रथं यं वामृभवश्चक्रुरश्विना ।
यस्य योगे दुहिता जायते दिव उभे अहनी सुदिने विवस्वतः ॥१२॥
आ । तेन । यातं । मनसः । जवीयसा । रथं । यं । वां । ऋभवः । चक्रुः । अश्विना ।
यस्य । योगे । दुहिता । जायते । दिवः । उभे इति । अहनी इति । सुदिने इति सुऽदिने ।
विवस्वतः ॥१२॥

हे अश्विनाश्विनौ वां युवयोर्यं रथमृभवश्चक्रुः अकार्षुः यस्य रथस्य योगे संबंधे सति दिवो दुहितोषा जायते प्रादुर्भवति यस्य च योगे विवस्वतो भास्करादुभे अहनी अहोरात्रे सुदिने शोभने जायेते तेन रथेन मनसोऽपि जवीयसा वेगवत्तरेणा यातं । युवामागच्छतं ॥

ना वर्तिर्यातं जयुषा वि पर्वतमपिन्वतं शयवे धेनुमश्विना ।
वृकस्य चिद्वर्तिकामंतरास्याद्युवं शचीभिर्यमिताममुंचतं ॥१३॥

ता । वर्तिः । यातं । जयुषा । वि । पर्वतं । अपिन्वतं । शयवे । धेनुं । अश्विना ।
वृकस्य । चित् । वर्तिकां । अंतः । आस्यात् । युवं । शचीभिः । यसितां । अमुंचतं ॥१३॥

हे अश्विनाश्विनौ ता तौ युवां जयुषा जयशीलेन रथेन पर्वतमद्रिं प्रति वर्तिर्मार्गं वि यातं । विविधं गच्छथः । तथा च निगमांतरं । वि जयुषा रथ्या यातमद्रिं श्रुतं हवं वृषणा वधिमत्याः । ऋ० ६. ६२. ७. इति । किंच युवां शयवे शयोरर्थाय धेनुमपिन्वतं । निवृत्तप्रसवां वृद्धां गां प्रभूतस्य पयसो दोग्ध्रीं कृतवंतौ स्थ इत्यर्थः । तथा च निगमांतरं । युवं धेनुं शयवे नाधितायापिन्वतमश्विना पूर्व्याय । ऋ० १. ११८. ८. । इति । किंच युवं युवां वृकस्यांतरनुप्रविष्टां यसितां वृकेण ग्रस्तां वर्तिकां । वर्तिका नाम चटका । तामास्याद्वृकस्य मुखाच्छचीभिः प्रज्ञाभिः कर्मभिर्वामुंचतं । अमोचयतं । तथा च निगमांतरं । अजोहवीदश्विना वर्तिका वामास्नो यत्सीममुंचतं वृकस्य । ऋ० १. ११७. १६. । इति ॥

एतं वां स्तोममश्विनावकर्मातक्षाम भृगवो न रथं ।
न्यमृक्षाम योषणां न मर्ये नित्यं न सूनुं तनयं दधानाः ॥१४॥
एतं । वां । स्तोमं । अश्विनौ । अकर्म । अतक्षाम । भृगवः । न । रथं ।
नि । अमृक्षाम । योषणां । न । मर्ये । नित्यं । न । सूनुं । तनयं । दधानाः ॥१४॥

हे अश्विनाश्विनौ ततो वां युवयोरेतं यथोक्तं स्तोमं स्तोत्रमकर्म । अकुर्म । तदेवाह । भृगवो न भृगव इव रथमतक्षाम । वयं स्तोत्रं संस्कृतवंतः । कर्मयोगाद्भृगव उच्यंते । अथवा रथकारा भृगवः । किंच वयं नित्यं शाश्वतं तनयं यागादीनां कर्मणां तनितारं सूनुं नौरसं पुत्रमिव स्तोमं दधाना धारयंतो मर्ये मनुष्ये न्यमृक्षाम । युवयोः स्तुतिं नितरां संस्कृतवंतः । तत्र दृष्टांतः । योषणां न । यथा जायां तद्वदित्यर्थः ॥ ॥१७॥

रथं यांतमिति चतुर्दशर्चमेकादशं सूक्तं । काक्षीवत्या घोषाया आर्षं । जागतमाश्विनं । रथं यांतमित्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

रथं यांतं कुह को ह वां नरा प्रति द्युमंतं सुवितायं भूषति ।
प्रातर्यावाणं विभ्वं विशेविशे वस्तोर्वस्तोर्वहमानं धिया शमि ॥१॥
रथं । यांतं । कुह । कः । ह । वां । नरा । प्रति । द्युऽमंतं । सुवितायं । भूषति ।
प्रातःऽयावानं । विऽभ्वं । विशेऽविशे । वस्तोःऽवस्तोः । वहमानं । धिया । शमि ॥१॥

हे नरा कर्मणां नेतारावश्विनौ वां युवयोः संबंधिनं द्युमंतं दीप्तिमंतं प्रातर्यावाणं यज्ञं प्रति प्रातःकाले गंतारं विभ्वं विभुं व्यापिनं विशे विशे सर्वेषु मनुष्येषु वस्तोर्वस्तोरन्वहं वहमानं धनं प्रापयंतं यांतं गच्छंतं रथं कुह कस्मिन्देशे को ह कः खलु यजमानः शमि यज्ञरूपे कर्मणि धिया स्तुतिरूपेण कर्मणा सुवितायाभ्युदयार्थं प्रति भूषति । अलंकरोति । कस्मिन्देशे यज्ञे कोऽन्यो यजमानो युवां स्तुतिभिर्हविर्भिश्च पूजितवान् येनास्मद्यज्ञं प्रति विलंबेनागतवंतौ स्थ इत्यभिप्रायः ॥

कुह स्विद्दोषा कुह वस्तोरश्विना कुहाभिपित्वं करतः कुहोषतुः ।
को वां शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ ॥२॥
कुह । स्वित् । दोषा । कुह । वस्तोः । अश्विना । कुह । अभिऽपित्वं । करतः । कुह । ऊषतुः ।
कः । वां । शयुऽत्रा । विधवाऽइव । देवरं । मर्यं । न । योषा । कृणुते । सधऽस्थे । आ ॥२॥

हे अश्विनाश्विनौ कुह स्वित् क्व चिद्दोषा रात्रौ भवथ इति शेषः। कुह वस्तोः क्व वा दिवा भवथः। कुह क्व वाभिपित्वमभिप्राप्तिं करतः। कुरुथः। कुह क्व वोषथुः। वसथः। किंच वां युवां को यजमानः सधस्थे सहस्थाने वेद्याख्य आ ह्वयति। आकुरुते। परिचरणार्थमात्माभिमुखीकरोति। तत्र दृष्टांतौ दर्शयति। शयुवा शयने विधवेव यथा मृतभर्तृका नारी देवरं भर्तृभ्रातरमभिमुखीकरोति। मर्य न यथा च सर्वं मनुष्यं योषा सर्वा नारी संभोगकालेऽभिमुखीकरोति तद्वदित्यर्थः। तथा च यास्कः। क्व स्विद्रात्रौ भवथः क्व दिवा क्वाभिप्राप्तिं कुरुथः क्व वसथः को वां शयने विधवेव देवरं देवरः कस्माद्द्वितीयो वर उच्यते विधवा विधातृका भवति विधवनाद्वा विधावनाद्वेति चर्मण्विरा अपि वा धव इति मनुष्यनाम तद्वियोगाद्विधवा देवरो दीव्यतिकर्मा मर्यो मनुष्यो मरणधर्मा योषा यौतेराकुरुते सधस्थाने। नि० ३.१५.। इति ॥

प्रातर्जरेथे जरणेव कापया वस्तोर्वस्तोर्यजता गच्छथो गृहं।
कस्य ध्वस्रा भवथः कस्य वा नरा राजपुत्रेव सवनाव गच्छथः ॥३॥
प्रातः। जरेथे इति। जरणाऽइव। कापया। वस्तोःऽवस्तोः। यजता। गच्छथः। गृहं।
कस्य। ध्वस्रा। भवथः। कस्य। वा। नरा। राजपुत्राऽइव। सवना। अव। गच्छथः ॥३॥

हे नरा नेतारावश्विनौ युवां प्रातः प्रातःकाले जरेथे। स्तोतृभिः स्तूयेथे। तत्र दृष्टांतः। जरणेव यथा जरणावैश्वर्येण वृद्धौ राजानौ कापया। प्रातःप्रबोधकस्य वंदिनो वाणी कापा। तया स्तूयेते। तद्वदित्यर्थः। किंच वस्तोर्वस्तोरन्वहं यजता यष्टव्यौ युवां गृहं यजमानस्य मंदिरं गच्छथः। प्राप्नुथः। तौ युवां कस्य यजमानसंबंधिनो दोषस्य ध्वस्रा ध्वंसकौ विनाशयितारौ भवथः। कस्य यजमानस्य सवना सवनानि राजपुत्रेव राजकुमाराविव युवामव गच्छथः। प्राप्नुथः ॥

युवां मृगेव वारणा मृगण्यवो दोषा वस्तोर्हविषा नि ह्वयामहे।
युवं होत्रामृतुथा जुह्वते नरेषं जनाय वहथः शुभस्पती ॥४॥
युवां। मृगाऽइव। वारणा। मृगण्यवः। दोषा। वस्तोः। हविषा। नि। ह्वयामहे।
युवं। होत्रां। ऋतुऽथा। जुह्वते। नरा। इषं। जनाय। वहथः। शुभः। पती इति ॥४॥

हे अश्विनौ युवां वारणा वारणौ मृगेव यथा शार्दूलौ मृगण्यवो मृगयवः तद्वद्वयं दोषा रात्रौ वस्तोरहनि च हविषा नि ह्वयामहे। नियमेन ह्वयामः। किंच हे नरा नेतारावश्विनौ युवं युवामृतुथा काले काले होत्रामाहुतिं जुह्वते। जुह्वति। यजमाना इति शेषः। किंच युवां शुभः शुभस्य वृष्युदकस्य पती स्वामिनौ संतौ जनाय जनार्थमिषमन्नं वहथः। प्रापयथः ॥

युवां ह घोषा पर्यश्विना यती राज्ञ ऊचे दुहिता पृच्छे वां नरा।
भूतं मे अह उत भूतमक्तवेऽश्वावते रथिने शक्रमर्वते ॥५॥
युवां। ह। घोषा। परि। अश्विना। यती। राज्ञः। ऊचे। दुहिता। पृच्छे। वां। नरा।
भूतं। मे। अहे। उत। भूतं। अक्तवे। अश्वऽवते। रथिने। शक्रं। अर्वते ॥५॥

हे नरा नेतारावश्विनौ युवां खलु परि परितो यती गच्छंती राज्ञो दीप्तस्य कक्षीवतो दुहिता पुत्री घोषा घोषाख्याहमूचे। संनिहितेभ्यो वृद्धेभ्य उक्तवत्यस्मि। किंच वां युवां पृच्छे। वृद्धान्संनिहितान् कीदृशावश्विनाविति पृच्छामि। तथा सति मे ममाहे दिवसाय दिवसनिर्वर्त्यकर्मणे भूतं। भवतं। उतापि चाक्तवे रात्र्यै रात्रिनिर्वर्त्यकर्मणे भूतं। भवतं। तथाश्ववतेऽश्वयुक्ताय रथिने रथवते चार्वते भ्रातृव्याय शक्रं। निरसने शक्तौ भवतं ॥ ॥१८॥

युवं कवी ष्टः पर्यश्विना रथं विशो न कुत्सो जरितुर्नशायथः ।
युवोर्ह मक्षा पर्यश्विना मधासा भरत निष्कृतं न योषणा ॥ ६॥
युवं। कवी इति। स्थः। परि। अश्विना। रथं। विशः। न। कुत्सः। जरितुः। नशायथः।
युवोः। ह। मक्षा। परि। अश्विना। मधु। आसा। भरत। निःऽकृतं। न। योषणा ॥ ६॥

हे अश्विनाश्विनौ कवी मेधाविनौ युवं युवां रथं परि ष्टः। परितो भवथः। अथ जरितुः स्तोतुर्यज्ञं प्रति गमनाय नशायथः। रथं प्राप्नुथः। तत्र दृष्टांतः। कुत्सो न यथा कुत्सश्चेंद्रश्च सरथमधितिष्ठतः। तथा च मंत्रांतरं। यासि कुत्सेन सरथमवस्युस्तोदो वातस्य हर्योरीशानः। ऋ० ४. १६. ११.। इति। किंच हे अश्विनाश्विनौ युवोर्ह युवयोः खलु स्वभूतं मधु मक्षा मक्षिकासाख्येन परि भरत। बिभर्ति। तत्र दृष्टांतः। निष्कृतं न यथा निष्कृतं संस्कृतं मधु योषणा नारी। तद्वदित्यर्थः। तथा च मंत्रांतरं। उत स्या वां मधुमन्मक्षिकारपन्मदे सोमस्यौशिजो दुवन्यति। ऋ० १. ११९. ९.। इति ॥

युवं ह भुज्युं युवमश्विना वशं युवं शिंजारमुशनामुपारथुः ।
युवो ररावा परि सख्यमासते युवोरहमवसा सुम्नमा चके ॥ ७॥
युवं। ह। भुज्युं। युवं। अश्विना। वशं। युवं। शिंजारं। उशनां। उप। आरथुः।
युवोः। ररावा। परि। सख्यं। आसते। युवोः। अहं। अवसा। सुम्नं। आ। चके ॥ ७॥

हे अश्विनाश्विनौ युवं ह युवां खलु भुज्युं समुद्रमध्ये विपन्नावं तुग्रपुत्रं भुज्युमुपारथुः। उत्तारयितुमुपगतवंतौ भवथः। किंच युवं युवां वशं हस्तिबलेन शत्रुभिः पराजयमानं वशनामधेयं राजानं रक्षणायोपारथुः। किंच युवं युवां शिंजारमत्रिमश्मिकूटादुत्तारयितुमुशनां कमनीयां स्तुतिं च श्रोतुमुपारथुः। तथा च मंत्रांतरं। अत्रिं शिंजारमश्विना। ऋ० ८. ५. २५.। इति। किंच युवोर्युवयोः सख्यं मित्रत्वं रराव हविषां प्रदाता यजमानो पर्यासते। पर्यास्ते ॥ वचनव्यत्ययः ॥ किंच युवोर्युवयोरवसा रक्षणेनाहं घोषा सुम्नं सुखमा चके। कामये ॥

युवं ह कृशं युवमश्विना शयुं युवं विधंतं विधवामुरुष्थयः ।
युवं सनिभ्यः स्तनयंतमश्विनापं व्रजमूर्णुथः सप्तास्यं ॥ ८॥
युवं। ह। कृशं। युवं। अश्विना। शयुं। युवं। विधंतं। विधवां। उरुष्थयः।
युवं। सनिऽभ्यः। स्तनयंतं। अश्विना। अप। व्रजं। ऊर्णुथः। सप्तऽआस्यं ॥ ८॥

हे अश्विनाश्विनौ युवं ह युवां खलु कृशं दुर्बलं कृशनामधेयं वोरुष्थयः। रक्षथः। किंच युवं युवां शयुं शयुनामानमृषिमुरुष्थयः। किंच युवं युवां विधंतं परिचरंतं मनुष्यं विधवां पतिकां वह्निमतीं योषां स्त्रियं चोरुष्थयः। किंच हे अश्विनाश्विनौ युवं युवां स्तनयंतं शब्दं कुर्वंतं सप्तास्यं सर्पणशीलद्वारं व्रजं मेघं। व्रजद्वारिति मेघनामसु पाठात्। सनिभ्यो हविषां दातृभ्योऽपोर्णुथः। विवृतद्वारं कृतवंतौ स्थ इत्यर्थः ॥

जनिष्ट योषा पतयत्कनीनको वि चारुहद्वीरुधो दंसना अनु ।
आस्मै रीयंते निवनेव सिंधवोऽस्मा अहे भवति तत्पतित्वनं ॥ ९॥
जनिष्ट। योषा। पतयत्। कनीनकः। वि। च। अरुहत्। वीरुधः। दंसनाः। अनु।
आ। अस्मै। रीयंते। निवनाऽइव। सिंधवः। अस्मै। अहे। भवति। तत्। पतिऽत्वनं ॥ ९॥

हे अश्विनौ युवयोः प्रसादादियं घोषा योषा स्त्रीगुणोपेता सुभगा जनिष्ट । जाता । अस्याः समीपे कनीनकः कन्याकामः पतिः पतयत् । पततु । अस्मै कनीनकाय युवयोर्दंसना अनु वृष्टिलक्षणानि कर्माणि लक्षीकृत्य वीरुध ओषधयो वि चावहन् । विरोहंतु । प्रादुर्भवंतु । अस्मै कनीनकाय निवनेव प्रवणेनेव सिंधव उदकान्या रीयंते । ता वीरुधोऽभिगच्छंतु । किंचाहं केनाप्यहंतव्यायास्मै कनीनकाय तत्संभोगसमर्थं पतित्वनं यौवनं भवति । भवतु ॥

जीवं रुदंति वि मयंते अध्वरे दीर्घामनु प्रसितिं दीधियुर्नरः ।
वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्यो जनयः परिष्वजे ॥१०॥
जीवं । रुदंति । वि । मयंते । अध्वरे । दीर्घां । अनु । प्रऽसितिं । दीधियुः । नरः ।
वामं । पितृऽभ्यः । ये । इदं । समऽएरिरे । मयः । पतिऽभ्यः । जनयः । परिऽस्वजे ॥१०॥

हे अश्विनौ युवयोरनुग्रहाय नरः पतयो जायानां जीवं जीवनमुद्दिश्य रुदंति । रोदनेनापि जायानां जीवनमेवाशासत इत्यर्थः । ता जाया अध्वरे यज्ञे वि मयंते निवेशयंति च किंच तासु दीर्घां महतीं प्रसितिं भुजयोः प्रबंधनमनु दीधियुः अनुदधति इदं वामं वननीयमपत्यं पितृभ्यः समेरिरे संप्रेरयंति च तेभ्यः पतिभ्यो जनयो जायाः परिष्वजे परिष्वंगार्थं मयः सुखं कुर्वतीति शेषः ॥ ॥१९॥

न तस्य विद्म तदु षु प्र वोचत युवा ह यद्युवत्याः क्षेति योनिषु ।
प्रियोस्रियस्य वृषभस्य रेतिनो गृहं गमेमाश्विना तदुश्मसि ॥११॥
न । तस्य । विद्म । तत् । ऊं इति । सु । प्र । वोचत । युवा । ह । यत् । युवत्याः ।
क्षेति । योनिषु ।
प्रियऽउस्रियस्य । वृषभस्य । रेतिनः । गृहं । गमेम । अश्विना । तत् । उश्मसि ॥११॥

हे अश्विनाश्विनौ तस्य तत्सुखं वयं न विद्म । न जानीमः । तत्सुखं यूयं सु सुष्ठु प्र वोचत । बहुवचनं पूजार्थं । युवा ह तरुणः खलु मत्पतिर्युवत्या यौवनान्विताया मम योनिषु गृहेषु यत्क्षेति निवसतीति । किंच प्रियोस्रियस्य प्रिययुवतेर्वृषभस्य सेक्तू रेतिनो रेतस्विनो मत्पतेर्गृहं गमेम । गच्छेम । वयं तन्नृहमुश्मसि । कामयामहे ॥

आ वामगन्त्सुमतिर्वाजिनीवसू न्यश्विना हृत्सु कामा अयंसत ।
अभूतं गोपा मिथुना शुभस्पती प्रिया अर्यम्णो दुर्याँ अशीमहि ॥१२॥
आ । वां । अगन् । सुऽमतिः । वाजिनीवसू इति वाजिनीऽवसू । नि । अश्विना ।
हृत्ऽसु । कामाः । अयंसत ।
अभूतं । गोपा । मिथुना । शुभः । पती इति । प्रियाः । अर्यम्णः । दुर्यान् । अशीमहि ॥१२॥

हे वाजिनीवसू अन्नधनौ शुभस्पती उदकस्य स्वामिनौ हे अश्विनाश्विनौ मिथुना मिथुनौ परस्परं सहितौ वां युवां सुमतिरागन् । आगच्छतु । हृत्स्वस्मदीयेषु हृदयेषु कामा अभिलाषा न्ययंसत । नियम्यंतां । किंच युवां गोपा मम गोपायितारावभूतं । भवतं । अपि च प्रियाः सत्यो वयमर्यम्णः पत्युर्दुर्याग्गृहानशीमहि । प्राप्नुयाम ॥

ता मंदसाना मनुषो दुरोण आ धत्तं रयिं सहवीरं वचस्यवे ।
कृतं तीर्थे सुप्रपाणं शुभस्पती स्थाणुं पथेष्ठामप दुर्मतिं हतं ॥१३॥
ता । मंदसाना । मनुषः । दुरोणे । आ । धत्तं । रयिं । सहऽवीरं । वचस्यवे ।
कृतं । तीर्थे । सुऽप्रपानं । शुभः । पती इति । स्थाणुं । पथेऽस्थां । अप । दुःऽमतिं । हतं ॥१३॥

हे अश्विनौ मंदसाना मंदसानौ ता तौ युवां मनुषो मनुष्यस्य मत्पतेर्दुरोणे गृहे वचस्यवे युष्मत्स्तुतिकामाय मह्यं सहवीरं पुत्रादिसहितं रयिं धनमा धत्तं । स्थापयतं । किंच हे अश्विनौ शुभस्पती उदकस्य स्वामिनौ युवां पतिगृहं गच्छंत्या मम तीर्थे पानाय सुप्रपाणं कृतं । कृतवंतं । किंच युवां पथेष्ठां मार्गस्थं स्थाणुं वृक्षं दुर्मतिं दुर्बुद्धिं परिपंथिनं चाप हतं । अपगमयतं ॥

क्व स्विदद्य कतमास्वश्विना विक्षु दस्रा मादयेते शुभस्पती ।
क ईं नि येमे कतमस्य जग्मतुर्विप्रस्य वा यजमानस्य वा गृहं ॥१४॥
क्व । स्वित् । अद्य । कतमासु । अश्विना । विक्षु । दस्रा । मादयेते इति । शुभः । पती इति ।
कः । ईं । नि । येमे । कतमस्य । जग्मतुः । विप्रस्य । वा । यजमानस्य । वा । गृहं ॥१४॥

हे अश्विनाश्विनौ दस्रा दर्शनीयौ शुभस्पती उदकस्य पती स्वामिनौ भवंती क्व स्वित्क्व स्थिती जनपदे ऽद्यास्मिन्नहनि कतमासु कासु विक्षु प्रजासु मादयेते । आत्मानं तर्पयतः । किंच को यजमान ईंमेनौ नि येमे । नियच्छति । किंच भवंती कतमस्य विप्रस्य मेधाविनः स्तोतुर्यजमानस्य गृहं वा जग्मतुः । गतवंतौ ॥ ॥२०॥

समानमिति तृचं द्वादशं सूक्तं घोषायाः पुत्रस्य सुहस्त्यस्यार्षं जागतमाश्विनं । अनुक्रांतं च । समानं तृचं सुहस्त्यो घौषेय इति ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

समानमु त्यं पुरुहूतमुक्थ्यं१ रथं चिचक्रं सवना गनिग्मतं ।
परिज्मानं विद्थ्यं सुवृक्तिभिर्वयं व्युष्टा उषसो हवामहे ॥१॥
समानं । ऊं इति । त्यं । पुरुऽहूतं । उक्थ्यं । रथं । चिऽचक्रं । सवना । गनिग्मतं ।
परिऽज्मानं । विद्थ्यं । सुवृक्तिऽभिः । वयं । विऽउष्टौ । उषसः । हवामहे ॥१॥

हे अश्विनौ युवयोः समानमु साधारणमेव त्यं तं पुरुहूतं बहुभिराहूतमुक्थ्यं प्रशस्यं चिचक्रं सवना सवनानि यज्ञाग्निगमतं प्रतिगच्छंतं परिज्मानं परितो गंतारं विद्थ्यं यज्ञहितं रथमुषसो व्युष्टौ सुवृक्तिभिः सुष्ठु दोषवर्जिताभिः स्तुतिभिर्वयं हवामहे । आह्वयामः ॥

प्रातर्युजं नासत्याधि तिष्ठथः प्रातर्यावाणं मधुवाहनं रथं ।
विशो येन गच्छथो यज्वरीर्नरा कीरेश्चिद्यज्ञं होतृमंतमश्विना ॥२॥
प्रातःऽयुजं । नासत्या । अधि । तिष्ठथः । प्रातःऽयावानं । मधुऽवाहनं । रथं ।
विशः । येन । गच्छथः । यज्वरीः । नरा । कीरेः । चित् । यज्ञं । होतृऽमंतं । अश्विना ॥२॥

हे नासत्या नासत्यभूतौ सत्यस्य प्रणेतारौ वा नरा नेतारावश्विनौ युवां प्रातर्युजं प्रातःकालेऽश्वैर्युज्यमानं प्रातर्यावाणं प्रातर्गंतारं मधुवाहनं मधुनोऽमृतस्य वाहकं तं रथमधि तिष्ठथः । आरोहतमित्यर्थः । यज्वरीर्यजनशीला विशः प्रजा येन रथेन गच्छथः । येन च कीरेश्चित्स्तोतुरपि होतृमंतमृत्विग्युक्तं यज्ञं गच्छथः ॥

अध्वर्यु वा मधुपाणिं सुहस्त्यमग्निधं वा धृतदक्षं दमूनसं ।
विप्रस्य वा यत्सवनानि गच्छथोऽत आ यातं मधुपेयमश्विना ॥३॥
अध्वर्यु । वा । मधुऽपाणिं । सुऽहस्त्यं । अग्निधं । वा । धृतऽदक्षं । दमूनसं ।
विप्रस्य । वा । यत् । सवनानि । गच्छथः । अतः । आ । यातं । मधुऽपेयं । अश्विना ॥३॥

हे अश्विनौ युवां मधुपाणिं सोमपाणिमध्वर्युं वा सुहस्त्यं सुहस्तेनामानमृषिं मां धृतदक्षं धृतबलं दमूनसं दानमनसमग्निधं वर्त्मन्निग्नेषं समायातं । तदेव दर्शयति । यद्यपि विप्रस्यान्यस्य मेधाविनः सवनानि यज्ञान्गच्छथः तथाप्यतस्तेभ्यो यज्ञेभ्यो मधुपेयमस्माकं सोमात्मकं पेयमा यातं । अन्वागच्छतं ॥ ॥२१॥

अस्तेवेत्येकादशर्चं चतोदशं सूक्तमांगिरसस्य क्षणाख्यस्यार्षं त्रैष्टुभमैंद्रं । अनुक्रांतं च । अस्तेवैकादश क्षण इति ॥ आभिप्लविकेषूक्थ्येषु स्तोमवृद्ध्यविदं सूक्तं ब्राह्मणाच्छंसिन आवापार्थं । सूचितं च । यश्चि दिव इति सूक्ते अस्तेव सु प्रतरं । आ० ७. ९. । इति ॥

अस्तेव सु प्रतरं लायमस्यन्भूषन्निव प्र भरा स्तोममस्मै ।
वाचा विप्रास्तरत वाचमर्यो नि रामय जरितः सोम इंद्रं ॥१॥
अस्ताऽइव । सु । प्रऽतरं । लायं । अस्यन् । भूषन्ऽइव । प्र । भर । स्तोमं । अस्मै ।
वाचा । विप्राः । तरत । वाचं । अर्यः । नि । रमय । जरितरिति । सोमे । इंद्रं ॥१॥

प्रतरं प्रवृद्धतरं लायं संश्लेषणं हृदयवेधिनं शरं सु सुष्ठ्वस्यन् क्षिपन्नस्तेव यथा क्षेप्ता धानुष्को भूषन्निव यथा चालंकारमलंकुर्वन्नलंकर्ता तद्वत्स्तोममस्मा इंद्राय प्र भर । प्रापय । हे अंतरात्मन् त्वमिति शेषः । किंच हे विप्रा मेधाविनः यूयं वाचा स्तुत्यार्योऽरेः शत्रोर्वाचं तरत । नितरां तरत । निराकुरुतेत्यर्थः । हे जरितः स्तोतः त्वं सोमे सोमयाग इंद्रं नि रमय । क्रीडय ॥

दोहेन गामुप शिक्षा सखायं प्र बोधय जरितर्जारमिंद्रं ।
कोशं न पूर्णं वसुना न्यृष्टमा च्यावय मघदेयाय शूरं ॥२॥
दोहेन । गां । उप । शिक्ष । सखायं । प्र । बोधय । जरितः । जारं । इंद्रं ।
कोशं । न । पूर्णं । वसुना । निऽऋष्टं । आ । च्यवय । मघऽदेयाय । शूरं ॥२॥

हे जरितः त्वं दोहेन कामानां दोहनार्थं गां गोरूपं सखायं प्रियमिंद्रमुप शिक्ष । वशं नय । किंच जारं भूतानां जरयितारमिंद्रं प्र बोधय । स्तुतिभिः प्रबुद्धं कुरु । किंच पूर्णमुदकेन पूरितं कोशं न पात्रमिव वसुना हिरण्यादिना धनेन न्यृष्टं नीचैर्गतं शूरं वीरमिंद्रं मघदेयाय धनदानाया च्यवय । अभिमुखं कुर्वित्यर्थः ॥

किमंग त्वा मघवन्भोजमाहुः शिशीहि मा शिश्यं त्वा शृणोमि ।
अप्रस्वती मम धीरस्तु शक्र वसुविदं भगमिंद्रा भरा नः ॥३॥
किं । अंग । त्वा । मघऽवन् । भोजं । आहुः । शिशीहि । मा । शिश्यं । त्वा । शृणोमि ।
अप्रस्वती । मम । धीः । अस्तु । शक्र । वसुऽविदं । भगं । इंद्र । आ । भर । नः ॥३॥

अंगेति सामान्याह्वानं । अंग हे मघवन्धनवञ्शक्रेंद्र त्वा त्वां किं किमर्थं भोजं स्तोतृणां भोजकमभीष्टमाहुः सर्वे विद्वांसः । यदि न ददासीत्यध्याहारः । तस्माद्ददास्येव स्तोतृभ्यो धनानीत्यर्थः । तथा सति मा

स्तोतारं शिशीहि । धनदानेन तीक्ष्णीकुरु । त्वा त्वां शिश्रथं स्तोतॄणां संस्कर्तारं शृणोमि । किंच मम धीर्बुद्धिरप्रस्वती कर्मवत्यस्तु । भवतु । किंच नोऽस्माकं वसुविदं धनस्य लंभकं भगं भाग्यमा भर । आहर ॥

त्वां जना ममसत्येष्विंद्र संतस्थाना वि ह्वयंते समीके ।
अचा युजं कृणुते यो हविष्मान्नासुन्वता सख्यं वष्टि शूरः ॥४॥
त्वां । जनाः । ममऽसत्येषु । इंद्र । संऽतस्थानाः । वि । ह्वयंते । संऽईके ।
अचं । युजं । कृणुते । यः । हविष्मान् । न । असुन्वता । सख्यं । वष्टि । शूरः ॥४॥

हे इंद्र त्वां जना ममसत्येषु संग्रामेषु वि ह्वयंते । विविधमाह्वयंति साहाय्यार्थं । एतदेव दर्शयति । समीके युद्धे संतस्थानाः सह तिष्ठंतो जना वि ह्वयंत इति । अचास्मिन्नाह्वाने स शूरो वीर इंद्रस्त्वां युजं सखायं कृणुते कुरुते यो हविष्मान्भवति । असुन्वता सोमाभिषवमकुर्वता पुरुषेण सह सख्यं सखित्वं न वष्टि । न कामयते ॥

धनं न स्यंद्रं बहुलं यो अस्मै तीव्रान्सोमाँ आसुनोति प्रयस्वान् ।
तस्मै शचून्सुतुकान्प्रातरह्नो नि स्वष्ट्रान्युवति हंति वृत्रं ॥५॥
धनं । न । स्यंद्रं । बहुलं । यः । अस्मै । तीव्रान् । सोमान् । आऽसुनोति । प्रयस्वान् ।
तस्मै । शचून् । सुऽतुकान् । प्रातः । अह्नः । नि । सुऽअष्ट्रान् । युवति । हंति । वृत्रं ॥५॥

प्रयस्वान् हविष्मान्यो यजमानः स्यंद्रं स्यंदनशीलं गवाश्वादिकं बहुलं प्रभूतं धनं न यथा धनं दरिद्राय पात्रभूताय दातुं संस्करोति तद्वदस्मा इंद्राय तीव्रांस्तीव्ररसान्सोमानासुनोति अभिषुणोति । अभिषवाख्येन संस्कारेण संस्करोतीत्यर्थः । तस्मै यजमानाय प्रातरह्नः पूर्वाह्णे सुतुकान्सुप्रेरणाञ्शोभनपुत्रसहितान्वा स्वष्ट्राञ्शोभनायुधाञ्शचून्नि युवति । स इंद्रः पृथक्करोति । किंच वृत्रं तदीयमुपद्रवं हंति । हिनस्ति ॥ ॥२२॥

यस्मिन्वयं दधिमा शंसमिंद्रे यः शिश्राय मघवा कामंमस्मे ।
आराच्चित्सन्भयतामस्य शचुर्न्यस्मै द्युम्ना जन्या नमंतां ॥६॥
यस्मिन् । वयं । दधिम । शंसं । इंद्रे । यः । शिश्राय । मघऽवा । कामं । अस्मे इति ।
आरात् । चित् । सन् । भयतां । अस्य । शचुः । नि । अस्मै । द्युम्ना । जन्या । नमंतां ॥६॥

यस्मिन्निंद्रे वयं धीषियाः सुहस्त्याः शंसं स्तुतिं दधिम विदध्मः । यश्च मघवा धनवानिंद्रोऽस्मे अस्मासु काममभिलाषं शिश्राय श्राययति । अस्येंद्रस्य शत्रुरारादूर एव संश्चित् सन्नपि भयतां । बिभेतु । किंचास्मा इंद्राय जन्या जन्यानि शत्रुजनपदभवानि द्युम्ना द्युम्नान्यन्नानि नि नमंतां । प्रह्वीभवंतु । भोजनीयानि भवंत्वित्यर्थः ॥

आराच्छत्रुमप बाधस्व दूरमुग्रो यः शंबः पुरुहूत तेन ।
अस्मे धेहि यवमन्नोमदिंद्र कृधी धियं जरित्रे वाजरत्नां ॥७॥
आरात् । शत्रुं । अप । बाधस्व । दूरं । उग्रः । यः । शंबः । पुरुऽहूत । तेन ।
अस्मे इति । धेहि । यवऽमत् । गोऽमत् । इंद्र । कृधि । धियं । जरित्रे । वाजऽरत्नां ॥७॥

हे पुरुहूत बहुभिराहूतेंद्र तव य उग्र उत्तूर्णः शंबो वज्रः । तथा च यास्कः । शंब इति वज्रनाम शमयतेर्वा शातयतेर्वा । नि० ५. २४. । इति । तेन वज्रेण शत्रुमस्मदरिमारादस्मत्समीपाद्दूरमपि बाधस्व । त्वमपगमय । किंचास्मे अस्मासु यवमयवयुक्तं गोमद्गोयुक्तं च धनं धेहि । निधेहि । किंच जरित्रे स्तोत्रे मह्यं वाजरत्नां रमणीयान्नं धियं कर्म क्षधि । कुरु ॥

प्र यमंतर्वृषसवासो अग्मन्नीव्राः सोमा बहुलांतास इंद्रं ।
नाहं दामानं मघवा नि यंसच्चि सुन्वते वहति भूरि वामं ॥ ८॥
प्र । यं । अंतः । वृषऽसवासः । अग्मन् । तीव्राः । सोमाः । बहुलऽअंतासः । इंद्रं ।
न । अहं । दामानं । मघऽवा । नि । यंसत् । नि । सुन्वते । वहति । भूरि । वामं ॥ ८॥

अंतर्जठरे यमिंद्रं वृषसवासो वृषसवा अग्नौ सोमस्य वर्षितृभिरध्वर्युभिरभिषुतास्तीव्रासस्तीव्ररसा बहुलांतासो बहुलमन्नादिकमंते येभ्यस्ते बहुलांताः सोमाः प्राग्मन् प्रगच्छंति स मघवा धनवानिंद्रो दामानं दातारं यजमानं नाह नैव नि यंसत् । नियच्छति । किंतु सुन्वते सोमाभिषवं कुर्वते यजमानाय भूर्यधिकं वामं वननीयं धनं नि वहति । नितरां प्रापयति ॥

उत प्रहामतिदीव्या जयाति कृतं यच्छ्वघ्नी विचिनोति काले ।
यो देवकामो न धना रुणद्धि समित्तं राया सृजति स्वधावान् ॥ ९॥
उत । प्रऽहां । अतिऽदीव्या । जयाति । कृतं । यत् । श्वऽघ्नी । विऽचिनोति । काले ।
यः । देवऽकामः । न । धना । रुणद्धि । सं । इत् । तं । राया । सृजति । स्वधाऽवान् ॥ ९॥

उतापि चेंद्रः प्रहां प्रहंतारमतिदीव्य । अतिरभिपूजितार्थे वर्तते । दीव्यतिर्गत्यर्थे । अभिपूजितं गमयित्वा जयाति । जयति । किंच यद्यथा । अत्र प्रकारवचनप्रत्ययस्य लोपो द्रष्टव्यः । श्वघ्नी कितवः कृतं कृतसमयं प्रतिकितवं कितवानां मध्ये विचिनोति परीक्ष्य गृह्णाति तद्वदिंद्रः काले युद्धकाले बलवंतं शत्रुं परीक्ष्य वधार्थं गृह्णातीत्यर्थः । किंच यो मनुष्यो देवकामो देवान्यष्टुं स्तोतुं वाभिलाषवान्भवति तस्यार्थाय धना धनानि न रुणद्धि । नावृणोति । नाच्छादयतीत्यर्थः । किंतु स्वधावान्बलवानिंद्रस्तं देवकामं राया धनेन सं सृजति । संयोजयत्येव ॥

गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वां ।
वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम ॥ १०॥
गोभिः । तरेम । अमतिं । दुःऽएवां । यवेन । क्षुधं । पुरुऽहूत । विश्वां ।
वयं । राजऽभिः । प्रथमाः । धनानि । अस्माकेन । वृजनेन । जयेम ॥ १०॥

हे पुरुहूत बहुभिराहूतेंद्र तव प्रसादाद्दुरेवां दुष्टागमनां दारिद्र्यादागताममतिं दुर्बुद्धिं वयं धौवेयाः सुहस्त्या गोभिः पशुभिस्तरेम । निस्तरेम । किंच यवेन विश्वां व्याप्तां क्षुधं तरेम । किंच प्रथमा मुख्यानि धनानि राजभिर्धनानामीश्वरैः । लभेमहीति शेषः । यद्वा । प्रथमा वयमिति संबंधः । किंचास्माकेनास्मदीयेन वृजनेन बलेन जयेम । शत्रूनिति शेषः ॥

बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।
इंद्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥ ११॥

बृहस्पतिः । नः । परि । पातु । पश्चात् । उत । उत्ऽतरस्मात् । अधरात् । अघऽयोः ।
इंद्रः । पुरस्तात् । उत । मध्यतः । नः । सखा । सखिऽभ्यः । वरिवः । कृणोतु ॥११॥

पश्चात्पश्चिमतो योऽघायुरागच्छति तस्मादघायोः पापकाच्चोर्नोऽस्मान्बृहस्पतिः परि पातु । रक्षतु । उतापि चोत्तरस्मादुत्तरतोऽधरादधस्ताच्च योऽघायुरागच्छति तस्मादघायोर्नोऽस्मान्परि पातु । उतापि चेंद्रः पुरस्तात्पूर्वतो मध्यतश्च योऽघायुरागच्छति तस्मादघायोर्नोऽस्मान्परि पातु । किंच सखा सखिभूतेंद्रः सखिभ्यः प्रियेभ्योऽस्मभ्यं वरिवो धनं कृणोतु । करोतु ॥ ॥२३॥ ॥३॥

चतुर्थेऽनुवाकेऽष्टादश सूक्तानि । तत्राच्छा म इत्येकादशर्चं प्रथमं सूक्तं । दशम्येकादश्यौ त्रिष्टुभौ । शिष्टा जगत्यः । पूर्ववदृषिर्देवते । तथा चानुक्रांतं । अच्छा मे द्विचिष्टुबंतमिति ॥ उक्थ्ये ब्राह्मणाच्छंसिनशस्त्रीयसवन एतत्सूक्तं । सूचितं च । अच्छा म इंद्रं बृहस्पते युवमिंद्रश्च वस्व इति याज्ये । आ० ६. १. । इति ॥ षष्ठेऽहन्यग्नेस्तीव्रसुते-तत्सूक्तं । सूचितं च । अच्छा म इंद्रमिति नित्यमैकाहिकं । आ० ८. ३. । इति ॥

अच्छा म इंद्रं मतयः स्वर्विदः सध्रीचीर्विश्वा उशतीरनूषत ।
परि ष्वजंते जनयो यथा पतिं मर्यं न शुंध्युं मघवानमूतये ॥१॥
अच्छ । मे । इंद्रं । मतयः । स्वःऽविदः । सध्रीचीः । विश्वाः । उशतीः । अनूषत ।
परि । स्वजंते । जनयः । यथा । पतिं । मर्यं । न । शुंध्युं । मघऽवानं । ऊतये ॥१॥

आंगिरसस्य कृष्णस्य मे मम स्वर्विदः सर्वस्य लंभयित्र्यः सध्रीचीः संगता विश्वा व्याप्ता उशतीः कामयमाना मतयः स्तुतय इंद्रमच्छानूषत । अभिष्टुवंति । किंच जनयो जाया यथा पतिं मर्तारं मर्यं न यथा च मनुष्यं शुंध्युं शुद्धं दोषरहितं मघवानं धनवंतमूतये रक्षणार्थं परि ष्वजंते आलिंगंति तद्वदिंद्रं मे स्तुतयः परि ष्वजंते ॥

न घा त्वद्रिगप वेति मे मनस्त्वे इत्कामं पुरुहूत शिश्रय ।
राजेव दस्म नि षदोऽधि बर्हिष्यस्मिन्त्सु सोमेऽवपानमस्तु ते ॥२॥
न । घ । त्वद्रिक् । अप । वेति । मे । मनः । त्वे इति । इत् । कामं । पुरुऽहूत । शिश्रय ।
राजाऽइव । दस्म । नि । सदः । अधि । बर्हिषि । अस्मिन् । सु । सोमे । अवऽपानं ।
अस्तु । ते ॥२॥

हे पुरुहूत बहुभिराहूत दस्म दर्शनीयेंद्र त्वद्रिक् त्वदभिमुखं मे मदीयं मनो न घ न खल्वप वेति । त्वत्तोऽपगच्छति । किंच त्वे इत् त्वय्येव काममभिलाषं शिश्रय । स्थापयामि । किंच राजेवेश्वर इव बर्हिष्यधि नि षदः । निषीद । किंच ते तवास्मिन्सोमेऽवपानमस्तु । भवतु ॥

विषूवृदिंद्रो अमतेरुत क्षुधः स इद्रायो मघवा वस्व ईशते ।
तस्येदिमे प्रवणे सप्त सिंधवो वयो वर्धंति वृषभस्य शुष्मिणः ॥३॥
विषुऽवृत् । इंद्रः । अमतेः । उत । क्षुधः । सः । इत् । रायः । मघऽवा । वस्वः । ईशते ।
तस्य । इत् । इमे । प्रवणे । सप्त । सिंधवः । वयः । वर्धंति । वृषभस्य । शुष्मिणः ॥३॥

इंद्रोऽमतेरस्माकं दुर्बुद्धेः प्रज्ञापहारिण्याः पिपासाया वा विषूवृद्विष्वग्वर्तको भवतु । उतापि च क्षुधो बुभुक्षाया विषूवृच्च भवतु । किंच स इत् स एव मघवा धनवानिंद्रो वस्वो वासयितृ रायो धनस्येशते । ईष्टे ।

किंच वृषभस्य वर्षितुस्तस्येदिंद्रस्यैवेमे प्रसिद्धाः सप्त सप्तसंख्याकाः सिंधवो नद्यः प्रवणे देशे वयोऽन्नं वर्धंति। वर्धयंति ॥

वयो॒ न वृक्षं॑ सुपला॒शमास॑दन्त्सो॒मास॒ इंद्रं॑ मंदि॒नश्च॑मू॒षदः॑ ।
प्रैषा॒मनी॑कं॒ शव॑सा॒ दवि॑द्युतद्वि॒दत्स्व१॑र्मनवे॒ ज्योति॒रार्य॑म् ॥४॥
वयः॑। न। वृक्षं॑। सु॒ऽप॒ला॒शं। आ। अस॑दन्। सो॒मासः॑। इंद्रं॑। मं॒दि॒नः॑। च॒मू॒ऽसदः॑।
प्र। ए॒षां॒। अनी॑कं। शव॑सा। दवि॑द्युतत्। वि॒दत्। स्वः॑। मन॑वे। ज्योतिः॑। आर्य॑म् ॥४॥

वयो न यथा पक्षिणः सुपलाशं शोभनपर्णं वृक्षमासीदंति तद्वन्मंदिनो मदकराश्चमूषदश्चमसपात्रेषु स्थातारः सोमासः सोमा इंद्रमासदन्। आसीदंति। अधितिष्ठंतीत्यर्थः। एषामिंद्रमधितिष्ठतां सोमानां शवसा वेगेन युक्तमनीकमग्रं प्र दविद्युतत्। प्रद्योतते। किंचायमिंद्रः स्वः स्वात्मनार्यं प्रेर्यं ज्योतिरादित्याख्यं तेजो मनवे मनुष्येभ्यो विदत्। प्रयच्छतु ॥

कृ॒तं न श्वघ्नी॒ वि चि॑नोति॒ देव॑ने॒ संव॑र्गं॒ यन्म॒घवा॒ सूर्यं॑ जय॑त् ।
न तन्ते॑ अ॒न्यो अनु॑ वी॒र्यं॑ शक॒न्न पु॑रा॒णो म॑घवन्नो॒त नू॒तनः॑ ॥५॥
कृ॒तं। न। श्व॒ऽघ्नी। वि। चि॒नो॒ति॒। देव॑ने। सं॒ऽव॑र्गं। यत्। म॒घऽवा॑। सूर्यं॑। जय॑त्।
न। तत्। ते॒। अ॒न्यः। अनु॑। वी॒र्यं॑। श॒क॒त्। न। पु॒रा॒णः। म॒घ॒ऽव॒न्। न। उ॒त। नू॒तनः॑ ॥५॥

श्वघ्नी परस्वानां हंता कितवो देवने द्यूते कृतं न यथा कृतं वि चिनोति तद्वदिंद्रः सूर्यं मृगयते। कदेत्यत आह। यदा यदा मघवा धनवानिंद्रः संवर्गं सम्यग्वृष्टेर्वर्जयितारं सूर्यमादित्यं जयत् तदीयरसापहरणद्वारेण जयति। अथ प्रत्यक्षस्तुतिः। हे मघवन्धनवन्निंद्र ते तव तत्सूर्यजयलक्षणं वीर्यं वीरत्वमन्यस्त्वत्तोऽन्यो भविष्यत्कालीनः पुमानन्वनुकर्तुं न शकत्। न शक्नोति। पुराणः पूर्वोऽपि त्वदीर्यमनुकर्तुं न शकत्। न शक्नोति। उतापि च नूतनो वर्तमानकालीनोऽपि त्वदीयं वीर्यमनुकर्तुं न शक्नोति ॥ ॥२४॥

विशं॑विशं मघवा॒ पर्य॑शायत॒ जना॑नां॒ धेना॒ अव॑चाकशद्वृ॒षा ।
यस्याह॒ शक्रः॑ सव॑नेषु॒ रण्य॑ति॒ स तीव्रैः॑ सो॒मैः॑ सहते पृतन्य॒तः ॥६॥
विशं॑ऽविशं। म॒घऽवा॑। परि॑। अ॒शा॒य॒त॒। जना॑नां। धेनाः॑। अव॑ऽचाकशत्। वृषा॑।
यस्य॑। अह॑। शक्रः॑। सव॑नेषु। रण्य॑ति। सः। तीव्रैः॑। सो॒मैः॑। सह॑ते। पृ॒त॒न्य॒तः ॥६॥

वृषा कामानां वर्षिता मघवा धनवानिंद्रो विशंविशं सर्वान्मनुष्यान्पर्यशायत। परिशेते। किंच जनानां स्तोतृजनानां धेनाः स्तुतीरवचाकशत्। अभिपश्यति। किंच शक्र इंद्रो यस्याह यस्यैव यजमानस्य सवनेषु रण्यति रमते स यजमानस्तीव्रैस्तीव्रकरैः प्रदीयमानैः सोमैः पृतन्यतः संग्राममिच्छतः शत्रून् सहते। अभिभवति ॥

आपो॒ न सिंधु॒मभि यत्स॒मक्ष॑रन्त्सो॒मास॒ इंद्रं॑ कु॒ल्या इ॑व ह्र॒दं ।
वर्ध॑न्ति॒ विप्रा॒ महो॑ अस्य॒ सादने॒ यवं॒ न वृ॒ष्टिर्दि॒व्येन॒ दानु॑ना ॥७॥
आपः॑। न। सिंधु॑। अ॒भि। यत्। स॒म॒ऽअक्ष॑रन्। सो॒मासः॑। इंद्रं॑। कु॒ल्याः॑ऽइव। ह्र॒दं।
वर्ध॑न्ति। विप्राः॑। महः॑। अ॒स्य॒। सद॑ने। यव॑ं। न। वृ॒ष्टिः। दि॒व्येन॑। दानु॑ना ॥७॥

यद्यदा सोमासः सोमा इंद्रमभि समचरन् अभिचरंति । अभिगच्छंतीत्यर्थः । तत्र दृष्टांतौ दर्शयति । आपो न यथापः सिंधुं समुद्रमभिसंचरंति । कुल्या इव यथा च कुल्या ह्रदमभिसंचरंति तद्वदित्यर्थः । तदानीमस्मिंद्रस्य महो महत्त्वं सदने यज्ञगृहे विप्रा मेधाविनो वर्धंति । तत्र दृष्टांतमाह । यवं न यथा यवं यवसस्यं वृष्टिः ॥ कर्तरि क्त ॥ वर्षिता पर्जन्यो दिव्येन दिवि भवेन दानुना दानेन वर्षणेन वर्धयति तद्वदित्यर्थः ॥

वृषा न क्रुद्धः पतयद्रजःस्वा यो अर्यपत्नीरकृणोदिमा अपः ।
स सुन्वते मघवा जीरदानवेऽविंदज्ज्योतिर्मनवे हविष्मते ॥ ८॥
वृषा । न । क्रुद्धः । पतयत् । रजःऽसु । आ । यः । अर्यऽपत्नीः । अकृणोत् । इमाः । अपः ।
सः । सुन्वते । मघऽवा । जीरऽदानवे । अविंदत् । ज्योतिः । मनवे । हविष्मते ॥ ८॥

रजःसु लोकेषु वृषा न यथा वृषभः क्रुद्धः सन् प्रतिवृषभवधाय पतयत् गच्छति तद्वद्य इंद्रः क्रुद्धः सन्मेघवधाय पतयति हत्वा च मेघमर्यपत्नीः सर्वस्य जगतः स्वामिन इंद्रस्य पालयितव्या इमाः प्रसिद्धा अपो वृष्युदकान्याकृणोत् आकृणोति अस्मदभिमुखं करोति स मघवा धनवानिंद्रः सुन्वते सोमाभिषवं कुर्वते जीरदानवे क्षिप्रदानाय हविष्मते मनवे मनुष्याय । यजमानायेत्यर्थः । ज्योतिस्तेजोऽविंदत् । प्रायच्छत् ॥

उज्जायतां परशुर्ज्योतिषा सह भूया ऋतस्य सुदुघा पुराणवत् ।
वि रोचतामरुषो भानुना शुचिः स्वर्ण शुक्रं शुशुचीत सत्पतिः ॥ ९॥
उत् । जायतां । परशुः । ज्योतिषा । सह । भूयाः । ऋतस्य । सुऽदुघा । पुराणऽवत् ।
वि । रोचतां । अरुषः । भानुना । शुचिः । स्वः । न । शुक्रं । शुशुचीत । सत्ऽपतिः ॥ ९॥

परशुरिंद्रस्य वज्रो ज्योतिषा तेजसा सहोज्जायतां । अस्मच्छत्रुवधे मेघवधे च व्याप्रियतामित्यर्थः । किंचतस्य सत्यस्य सुदुघा माध्यमिका वाक् पुराणवत् प्रत्नवत्काले भूयाः । भूयात् ॥ पुरुषव्यत्ययः ॥ किंचेंद्रो ऽरुष आरोचमानो भानुना दीप्त्या शुचिर्ज्वलन् वि रोचतां । प्रकाशतां । किंच सत्पतिः सतां पतिरिंद्रः स्वर्नादित्य इव शुक्रं ज्वलञ्शुशुचीत । अत्यंतं दीप्यतां ॥

गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वां ।
वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम ॥ १०॥
गोभिः । तरेम । अमतिं । दुःऽएवां । यवेन । क्षुधं । पुरुऽहूत । विश्वां ।
वयं । राजऽभिः । प्रथमाः । धनानि । अस्माकेन । वृजनेन । जयेम ॥ १०॥

बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।
इंद्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥ ११॥
बृहस्पतिः । नः । परि । पातु । पश्चात् । उत । उत्ऽतरस्मात् । अधरात् । अघऽयोः ।
इंद्रः । पुरस्तात् । उत । मध्यतः । नः । सखा । सखिऽभ्यः । वरिवः । कृणोतु ॥ ११॥

एतदृग्द्वयं प्रागेव व्याख्यातं ॥ ॥ २५॥

आ यात्विंद्रोऽवादशर्चं द्वितीयं सूक्तमांगिरसस्य कृष्णस्यार्षमैंद्रं । आदितस्तिस्रस्त्रिष्टुभः । ततः षड्जगत्यः । ततो द्वे त्रिष्टुभौ । तथा चानुक्रांतं । आ यातु त्रित्रिष्टुबादीति ॥ आभिप्लविकेषूक्थ्येषु ब्राह्मणाच्छंसिनः स्तोमवृद्ध्याविदमावापार्थं । सूचितं च । आ यात्विंद्रः स्वपतिरिमां धियमिति ब्राह्मणाच्छंसी । आ० ७. ९. । इति ॥

आ यात्विंद्रः स्वपतिर्मदाय यो धर्मणा तूतुजानस्तुविष्मान् ।
प्रत्वक्षाणो अति विश्वा सहांस्यपारेण महता वृष्ण्येन ॥१॥
आ । यातु । इंद्रः । स्वऽपतिः । मदाय । यः । धर्मणा । तूतुजानः । तुविष्मान् ।
प्रऽत्वक्षाणः । अति । विश्वा । सहांसि । अपारेण । महता । वृष्ण्येन ॥१॥

य इंद्रस्तूतुजानस्त्वरमाणस्तुविष्मान्बृहिमान्विश्वा विश्वानि सहांसि शत्रुबलान्यपारेण महताधिकेन वृष्ण्येन बलेन प्रत्वक्षाणः प्रकर्षेण तनूकुर्वन्नति । गच्छतीति शेषः । स्वपतिर्धनपतिरिंद्रो मदाय मदार्थं धर्मणा धारकेण रथेना यातु । अस्मदग्रं प्रत्यागच्छतु ॥

सुष्टामा रथः सुयमा हरी ते मिम्यक्ष वज्रो नृपते गभस्तौ ।
शीभं राजन्त्सुपथा याह्यर्वाङ् वर्धाम ते पपुषो वृष्ण्यानि ॥२॥
सुऽस्थामा । रथः । सुऽयमा । हरी इति । ते । मिम्यक्ष । वज्रः । नृऽपते । गभस्तौ ।
शीभं । राजन् । सुऽपथा । आ । याहि । अर्वाङ् । वर्धाम । ते । पपुषः । वृष्ण्यानि ॥२॥

हे नृपते नृणां पालकेंद्र ते तव रथः सुष्टामा शोभनावस्थानो हरी अश्वावपि सुयमा सुयमौ । सुबद्धाविति यावत् । किंच तव गभस्तौ बाहौ वज्रो मिम्यक्ष । संहतो भवति । तथा सति हे राजन् सर्वस्येश्वरेंद्र शीभं शीघ्रं सुपथा शोभनेन मार्गेणार्वाङस्मदभिमुख आ याहि । आगच्छ । आगत्य पपुषः सोमं पीतवतस्ते तव वृष्ण्यानि बलानि वर्धाम । वयं वर्धयामः ॥

एंद्रवाहो नृपतिं वज्रबाहुमुग्रमुग्रासस्तविषासं एनं ।
प्रत्वक्षसं वृषभं सत्यशुष्ममेमस्मत्रा सधमादो वहंतु ॥३॥
आ । इंद्रऽवाहः । नृऽपतिं । वज्रऽबाहुं । उग्रं । उग्रासः । तविषासः । एनं ।
प्रऽत्वक्षसं । वृषभं । सत्यऽशुष्मं । आ । ईं । अस्मऽत्रा । सधऽमादः । वहंतु ॥३॥

नृपतिं नरां नेतृणां पालकं वज्रबाहुं वज्रहस्तमुग्रमुद्गूर्णं प्रत्वक्षसं शत्रुबलानां प्रकर्षेण तनूकर्तारं वृषभं कामानां वर्षितारं सत्यशुष्मसविसंवादिबलमेनमिंद्रं । आ ईमिति पूरणौ । उग्रास उद्गूर्णास्तविषासः प्रवृद्धाः सधमादः सह माद्यंत इंद्रवाह इंद्रस्य वोढारोऽस्मत्रास्मान्वा वहंतु ॥

एवा पतिं द्रोणसाचं सचेतसमूर्जः स्कंभं धरुण आ वृषायसे ।
ओजः कृष्व सं गृभाय त्वे अपसो यथा केनिपानामिनो वृधे ॥४॥
एव । पतिं । द्रोणऽसाचं । सऽचेतसं । ऊर्जः । स्कंभं । धरुणे । आ । वृषऽयसे ।
ओजः । कृष्व । सं । गृभाय । त्वे इति । अपि । असः । यथा । केऽनिपानां । इनः । वृधे ॥४॥

हे इंद्र त्वमेवैवं पतिं पालकं द्रोणसाचं द्रोणकलशस्य सेवितारं सचेतसं सप्रज्ञमूर्जः स्कंभं बलस्य धारकं सोमं धरुणे धारके जठर आ वृषायसे । आसिंचसे । धारयसीत्यर्थः । किंच मह्यमोजो बलं कृष्व । कुरुष्व ।

स्वे स्वस्यस्मानपि सं गृभाय । संगृहाण च । किंच केनिपानां मेधाविनामस्माकं । केनिप उशिज इति मेधाविनामसु पाठात् । वृधे वर्धनाय यथा यथावत्सर्वथेनः स्वाम्यसः । भवसि ॥

गमन्नस्मे वसून्या हि शंसिषं स्वाशिषं भरमा याहि सोमिनः ।
त्वमीशिषे सास्मिन्ना सत्सि बर्हिष्यनाधृष्या तव पात्राणि धर्मणा ॥५॥
गमन् । अस्मे इति । वसूनि । आ । हि । शंसिषं । सुऽआशिषं । भरं । आ । याहि । सोमिनः ।
त्वं । ईशिषे । सः । अस्मिन् । आ । सत्सि । बर्हिषि । अनाधृष्या । तव । पात्राणि । धर्मणा ॥५॥

हे इंद्र वसूनि त्वदेयानि धनान्यस्मे मह्यं गमन् । आगच्छंतु । हि यस्मात्त्वामहं शंसिषं स्तौमि । किंच सोमिनः सोमवतो मम स्वाशिषं शोभना आशिषो यस्मिंस्तं भरं यज्ञमा याहि । त्वमागच्छ । किंच त्वमीशिषे । धनस्येश्वरोऽसि । एवंविधः स त्वमस्मिन्नस्मदीये वेदासृते बर्हिष्या सत्सि । आसीद । किंच तव सोमपात्राणि धर्मणा राक्षसानां कर्मणानाधृष्याणि धर्षयितुमशक्यानि ॥ ॥२६॥

पृथक् प्रायन्प्रथमा देवहूतयोऽकृण्वत श्रवस्यानि दुष्टरा ।
न ये शेकुर्यज्ञियां नावमारुहमीर्मैव ते न्यविशंत केपयः ॥६॥
पृथक् । प्र । आयन् । प्रथमाः । देवऽहूतयः । अकृण्वत । श्रवस्यानि । दुस्तरा ।
न । ये । शेकुः । यज्ञियां । नावं । आऽरुहं । ईर्मा । एव । ते । नि । अविशंत । केपयः ॥६॥

हे इंद्र तव प्रसादात्ते पृथक् प्रायन् देवलोकान्पृथग्गच्छंति ये प्रथमाः पूर्वे मुख्या वा देवहूतयो देवानामाह्वातारः ॥ कर्तरि क्त ॥ किंच दुष्टरान्यैर्दुस्तराणि श्रवस्यानि श्रवणीयानि यशांस्यकृण्वत अकुर्वत । किंच ये त्वत्प्रसादरहिता जना यज्ञियां यज्ञसंबंधिनीं । यज्ञमयीमित्यर्थः । नावमारुहमारोढुं न शेकुः न शक्नुवंति ते केपयः कुत्सितपूयकर्माणः पापकर्माणो जना ईर्मैव ऋणेनैव न्यविशंत । नीचैरविशंत । अधोगतिं प्राप्ता इत्यर्थः । तथा च यास्कः । पृथक् प्रायन् पृथक् प्रथतेः प्रथमा देवहूतयो ये देवानाह्वयंताकुर्वत श्रवणीयानि यशांसि दुरनुकराण्यन्यैर्येऽशक्नुवन्यज्ञियां नावमारोढुमथ ये नाशक्नुवन्यज्ञियां नावमारोढुमीर्मैव ते न्यविशंत ऋणेनैव ते न्यविशंतास्मिन्नेव लोक इति वा । नि० ५. २५. । इति ॥

एवैवापागपरे संतु दूढ्योऽश्वा येषां दुर्युज आयुयुज्रे ।
इत्था ये प्रागुपरे संति दावने पुरूणि यत्र वयुनानि भोजना ॥७॥
एव । एव । अपाक् । अपरे । संतु । दुःऽध्यः । अश्वाः । येषां । दुःऽयुजः । आऽयुयुज्रे ।
इत्था । ये । प्राक् । उपरे । संति । दावने । पुरूणि । यत्र । वयुनानि । भोजना ॥७॥

एवैवमेव दूढ्यो दुर्बुद्धयोऽपरेऽन्ये । अयज्वान इत्यर्थः । अपागपाचीना अधोगंतारः संतु भवंतु येषां यज्ञमकुर्वतामश्वा दुर्युजो दुर्योजाः प्रबला अश्वा आयुयुज्रे रथेषु युज्यंते । ये सत्यपि सामर्थ्ये न यजंति ते नरकं गच्छंतीति भावः । किंचेत्थमित्थं ते स्वर्गगामिनो भवंति य उपरे यज्वानः प्रारंमरणात्पूर्वमेव दावने देवानां हविर्दानाय संति भवंति । यत्र येषु च यज्ञकारिषु वयुनानि प्रज्ञानानि कांतानि वा भोजना भोग्यानि धनानि पुरूणि बहूनि देवेभ्यो दानाय संति ॥

गिरीँरजान्रेजमानाँ अधारयद्द्यौः क्रँदद्न्तरिक्षाणि कोपयत् ।
समीचीने धिषणे वि ष्कभायति वृष्णः पीत्वा मद उक्थानि शंसति ॥८॥
गिरीन् । अजान् । रेजमानान् । अधारयत् । द्यौः । क्रंदत् । अंतरिक्षाणि । कोपयत् ।
समीचीने इति संऽईचीने । धिषणे इति । वि । स्कभायति । वृष्णः । पीत्वा । मदे ।
उक्थानि । शंसति ॥८॥

गिरीन्मेघानजान्गमनशीलान्रेजमानान्कंपमानानधारयत् । इंद्रो धारितवान् । निश्चलान्कृतवानित्यर्थः । किंच द्यौर्द्युलोकस्थनिवासी वा जनोऽसुरराक्षसेभ्यो भीतः सन् क्रंदत् । क्रंदति । इंद्रमाह्वयत्यात्मनः परित्राणार्थं । किंचेंद्रोऽन्तरिक्षाणि कोपयत् । कोपयति । संक्षोभयतीत्यर्थः । किंचेंद्रः समीचीने परस्परं संगते धिषणे द्यावापृथिव्यौ वि ष्कभायति । अंतरिक्षेण स्तभ्नाति । स्तंभयतीत्यर्थः । किंचेंद्रो वृष्णः स्वोदरस्थासेक्तृन्सोमान्पीत्वा मदे सत्युक्थानि प्रशस्यानि वचनानि शंसति । प्रब्रवीति ॥

इमं बिभर्मि सुकृतं ते अंकुशं येनारुजासि मघवञ्छफारुजः ।
अस्मिन्त्सु ते सवने अस्वोक्यं सुत इष्टौ मघवन्बोध्याभगः ॥९॥
इमं । बिभर्मि । सुऽकृतं । ते । अंकुशं । येन । आऽरुजासि । मघऽवन् । शफऽआरुजः ।
अस्मिन् । सु । ते । सवने । अस्तु । ओक्यं । सुते । इष्टौ । मघऽवन् । बोधि । आऽभगः ॥९॥

हे मघवन्धनवन्निंद्र ते तव सुकृतं संस्कृतमिममंकुशं बिभर्मि । धारयामि । अत्रांकुशशब्देन प्रेरकत्वगुणयोगात्स्तुतिरुच्यते । स्तुतिं धारयामीत्यर्थः । येन स्तुतिलक्षणांकुशेन स्तुतः संस्त्वं शफारुज आभिमुख्येन परबलानां हंतॄनैरावतादीन्गजानारुजासि आभिमुख्येन रुजसि । पीडयसीत्यर्थः । किंच ते तवास्मिन्नस्मदीये सवन ओक्यमोको निवासोऽस्तु । भवतु । किंच हे मघवन्धनवन्निंद्र आभग आभजनीयस्त्वं सुते सुतसोम इष्टौ यज्ञे बोधि । अस्मदीयाः स्तुतीर्बुध्यस्व ॥

गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वाँ ।
वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम ॥१०॥
गोभिः । तरेम । अमतिं । दुःऽएवां । यवेन । क्षुधं । पुरुऽहूत । विश्वां ।
वयं । राजऽभिः । प्रथमाः । धनानि । अस्माकेन । वृजनेन । जयेम ॥१०॥

बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।
इंद्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥११॥
बृहस्पतिः । नः । परि । पातु । पश्चात् । उत । उत्ऽतरस्मात् । अधरात् । अघऽयोः ।
इंद्रः । पुरस्तात् । उत । मध्यतः । नः । सखा । सखिऽभ्यः । वरिवः । कृणोतु ॥११॥

इदमृग्द्वयं व्याख्यातचरं ॥ ॥२७॥

दिवस्परीति द्वादशर्चं तृतीयं सूक्तं भालंदनस्य वत्सप्रेरार्षं त्रैष्टुभमाप्तेयं । तथा चानुक्रांतं । दिवस्परि द्वादश वत्सप्रिराप्तेयं त्रिति ॥ प्रातरनुवाकाश्विनशस्त्रयोरिदमादिके द्वे सूक्ते अस्य सूक्तस्यांत्यां वर्जयित्वा ।

सूचितं च । दिवस्परीति सूक्तयोः पूर्वस्योत्तमामुद्धरेत् । आ० ४. १३. । इति ॥ वामदेव्यामक्रंददग्निरित्येषा याज्या । सूचितं च । अग्ने त्वमस्मद्युयोध्यमीवा अक्रंददग्निः स्तनयन्निव द्यौः । आ० ३. १३. । इति ॥

दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परि जातवेदाः ।
तृतीयमप्सु नृमणा अजस्रमिंधान एनं जरते स्वाधीः ॥१॥
दिवः । परि । प्रथमं । जज्ञे । अग्निः । अस्मत् । द्वितीयं । परि । जातऽवेदाः ।
तृतीयं । अप्ऽसु । नृऽमनाः । अजस्रं । इंधानः । एनं । जरते । सुऽआधीः ॥१॥

अग्निः प्रथमं पूर्वं दिवो द्युलोकस्य पर्युपर्यादित्यात्मना जज्ञे । जातः । जातवेदा जातप्रज्ञो जातधनो वाग्निर्द्वितीयमस्मदस्माकं पर्युपरि पार्थिवात्मना जज्ञे । नृमणा नृषु मनुष्येष्वनुग्राहकतयासक्तचित्तोऽग्निस्तृतीयमप्स्वंतरिक्षे वैद्युतात्मना जज्ञे । एवंविधमेनमग्निं स्वाधीः सुप्रज्ञाताजस्रमनवरतमिंधानो दीपयञ्जरते । स्तौति । यद्वा । वाजसनेयकोक्तप्रकारेणास्य मंत्रस्यार्थो द्रष्टव्यः । तद्यथा । दिवस्परि प्रथमं जज्ञे अग्निरिति प्राणो वै द्यौः प्राणाद्वा एष प्रथममजायतास्मद्द्वितीयं परि जातवेदा इति यदेनमदो द्वितीयं पुरुषविधोऽजनयत्तृतीयमग्निमिति यदेनमदस्तृतीयमद्योऽजनयन्नृमणा अजस्रमिति प्रजापतिर्वै नृमणा अग्निरजस्रमिंधान एनं जरते स्वाधीरिति यो वा एनमिंधे स एनं जनयते स्वाधीः । शत० ६. ७. ४. ३. । इति ॥

विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते धाम विभृता पुरुत्रा ।
विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यत आजगंथ ॥२॥
विद्म । ते । अग्ने । त्रेधा । त्रयाणि । विद्म । ते । धाम । विऽभृता । पुरुऽत्रा ।
विद्म । ते । नाम । परमं । गुहा । यत् । विद्म । तं । उत्सं । यतः । आऽअजगंथ ॥२॥

हे अग्ने ते तव त्रेधा त्रिषु स्थानेषु पृथिव्यंतरिक्षद्युलोकेषु स्थितानि त्रयाण्यग्निवाय्वादित्याख्यानि त्रीणि रूपाणि विद्म । वयं जानीमः । किंच हे अग्ने ते तव धाम सज्ञानि स्थानानि विभृता विभृतानि पुरुत्रा बहुधा बहूनि वा गार्हपत्याहवनीयान्वाहार्यपचनादीनि विद्म । किंच ते तव गुहा गूढमवेदविद्भिरविज्ञातं परममुत्कृष्टं वेदे प्रसिद्धं यन्नामास्ति तद्विद्म । वेदविदो वयं विजानीमः । किंच त्वं यतो यस्मादाजगंथ आगतवानसि । उत्पन्नवानित्यर्थः । तमुत्समुत्स्यंदयितारमुत्पादयितारं कारणात्मानं विद्म । जानीमः ॥

समुद्रे त्वा नृमणा अप्स्वंतर्नृचक्षा ईधे दिवो अग्न ऊधन् ।
तृतीये त्वा रजसि तस्थिवांसमपामुपस्थे महिषा अवर्धन् ॥३॥
समुद्रे । त्वा । नृऽमनाः । अप्ऽसु । अंतः । नृऽचक्षाः । ईधे । दिवः । अग्ने । ऊधन् ।
तृतीये । त्वा । रजसि । तस्थिऽवांसं । अपां । उपऽस्थे । महिषाः । अवर्धन् ॥३॥

हे अग्ने समुद्रे महोदधौ जायमानमप्स्वंतरपां मध्ये वडवात्मना स्थितं त्वा त्वां नृमणा नृषु मनुष्येष्वनुग्राहकतयासक्तचित्तो वरुण ईधे । संदीपितवान् । किंच नृचक्षा नृणां प्रत्यक्षेण द्रष्टादित्यो दिवो द्युलोकस्य संबंधिन्यूधन्नूधस्यूधःस्थानीय आदित्यमंडले यज्ञे वेधे । संदीपितवान् । किंच तृतीये त्रयाणां पूरकेऽपां वृष्युदकानामुपस्थे स्थाने रजस्यंतरिक्षलोके तस्थिवांसं विद्युद्रूपेणावस्थितं त्वां महिषा महांतो माध्यमिका देवगणा मरुदादयः स्तोतारोऽवर्धन् । स्तुतिभिरवर्धयन् । यद्वा । वाजसनेयकोक्तप्रकारेणार्थो द्रष्टव्यः । तद्यथा । समुद्रे त्वा नृमणा अप्स्वंतरिति प्रजापतिर्वै नृमणा अप्सु त्वा प्रजापतिरित्येतन्नृचक्षा ईधे दिवो अग्न ऊधन्निति प्रजापतिर्वै नृचक्षा आपो दिव ऊधस्तृतीये त्वा रजसि तस्थिवांसमिति द्यौर्वै तृतीयं रजोऽपामुपस्थे महिषा अवर्धन्निति प्राणा वै महिषा दिवि त्वा प्राणा अवर्धन्नित्येतत् । शत० ६. ७. ४. ५. । इति ॥

अक्रंददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समंजन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यंतः ॥४॥
अक्रंदत् । अग्निः । स्तनयन्ऽइव । द्यौः । क्षामं । रेरिहत् । वीरुधः । सं ऽअंजन् ।
सद्यः । जज्ञानः । वि । हि । ईं । इद्धः । अख्यत् । आ । रोदसी इति । भानुना ।
भाति । अंतरिति ॥४॥

दावरूपोऽग्निः स्तूयते । अग्निर्दावाग्निः स्तनयन्निव द्यौर्यथा दीप्तो विद्युद्रूपः पर्जन्यो महांतं शब्दं करोति तद्वदक्रंदत् । महांतं शब्दं करोति । किं कुर्वन्नित्यत्राह । क्षाम क्षामां पृथिवीं रेरिहदास्वादयन्वीरुध ओषधीश्च समंजन् म्रक्षयन् । संतापयन्नित्यर्थः । किंच सद्यस्तत्क्षणे समाने काले जज्ञानो जायमान इद्धो दीप्त ईमिदं स्वेन दग्धं वस्तुजातं व्यख्यत् । विविधं पश्यति । हीति पादपूरणः । किंच रोदसी द्यावापृथिवी द्यावापृथिव्यावंतरंतरेण भानुना स्वदीप्त्या भाति । प्रकाशते । यद्वा । वाजसनेयकोक्तार्थो द्रष्टव्यः । तद्यथा । अक्रंददग्निः स्तनयन्निव द्यौरिति क्रंदतीव हि पर्जन्यः स्तनयन्क्षामा रेरिहद्वीरुधः समंजन्निति क्षामां वै रेरिह्यमाणो वीरुधः समनक्ति सद्यो जज्ञानो वि हीमिद्धो अख्यदिति सद्यो वा एष जज्ञान इदं सर्वं विख्यापयत्या रोदसी भानुना भात्यंतरितीमे वै द्यावापृथिवी रोदसी ते एष भानुना भात्यंतः । शत० ६.७.३.२. इति वैद्युतस्य स्तुतिः । यद्वा । इयं दावाग्नेः स्तुतिरिति ॥

श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः ।
वसुः सूनुः सहसो अप्सु राजा वि भात्यग्र उषसामिधानः ॥५॥
श्रीणां । उत्ऽआरः । धरुणः । रयीणां । मनीषाणां । प्रऽअर्पणः । सोमऽगोपाः ।
वसुः । सूनुः । सहसः । अप्ऽसु । राजा । वि । भाति । अग्रे । उषसां । इधानः ॥५॥

श्रीणां विभूतीनामुदार उन्नमयिता दाता रयीणां धनानां धरुणो धारको मनीषाणामीप्सितार्थानां प्रार्पणः प्रापयिता सोमगोपाः सोमस्य गोपा वसुः सर्वस्य लोकस्य वासकः सहसो बलस्य सूनुरप्सूदकेषु स्थितो राजा सर्वस्येश्वर उषसामग्रे प्रभातकाल इधानोऽग्निहोत्रार्थं समिध्यमानोऽग्निर्वि भाति । प्रकाशते ॥

विश्वस्य केतुर्भुवनस्य गर्भ आ रोदसी अपृणाज्जायमानः ।
वीळुं चिदद्रिमभिनत्परायञ्जना यदग्निमयजंत पंच ॥६॥
विश्वस्य । केतुः । भुवनस्य । गर्भः । आ । रोदसी इति । अपृणात् । जायमानः ।
वीळुं । चित् । अद्रिं । अभिनत् । पराऽयन् । जनाः । यत् । अग्निं । अयजंत । पंच ॥६॥

विश्वस्य सर्वस्य केतुः प्रज्ञापको भुवनस्योदकस्य गर्भो गर्भभूतोऽग्निर्जायमानः प्रादुर्भवन्नेव रोदसी द्यावापृथिव्यावापृणात् । आपूरयति । परायन् परागच्छन् वीळुं चिद्दृढमप्यद्रिं मेघमभिनत् । भिनत्ति च । कदेत्यत्राह । यद्यदा पंच जना मनुष्या अग्निमयजंत यजंते ॥ ॥२८॥

उशिक्पावको अरतिः सुमेधा मर्तेष्वग्निरमृतो नि धायि ।
इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन् ॥७॥
उशिक् । पावकः । अरतिः । सुऽमेधाः । मर्तेषु । अग्निः । अमृतः । नि । धायि ।
इयर्ति । धूमं । अरुषं । भरिभ्रत् । उत् । शुक्रेण । शोचिषा । द्यां । इनक्षन् ॥७॥

उशिग्घवींषि कामयमानः पावकः सर्वस्य लोकस्य शोधकोऽरतिर्गंता भूतानामारयिता वा सुमेधाः सुप्रज्ञोऽमृतो मरणधर्मरहितोऽग्निर्मर्तेषु मनुष्येषु नि धायि । निहितः । सोऽयमग्निर्धूममियर्ति । प्रेरयति । किंचारुषमारोचमानं रूपं भरिभ्रज्जारयञ्शुक्रेण शुक्रेण शोचिषा रोचिषा द्यां दिवमिनद्भ्यामुवन् गच्छतीति शेषः ॥

दृशानो रुक्म उर्विया व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौर्जनयत्सुरेताः ॥ ८॥
दृशानः । रुक्मः । उर्विया । वि । अद्यौत् । दुःऽमर्षं । आयुः । श्रिये । रुचानः ।
अग्निः । अमृतः । अभवत् । वयःऽभिः । यत् । एनं । द्यौः । जनयत् । सुऽरेताः ॥ ८॥

दृशानः प्रत्यक्षेण दृश्यमानो रुक्मो रोचमानोऽग्निरुर्वियोर्वत्यंतं व्यद्यौत् । विद्योतते । किंचायुर्गता स सर्वतोऽयमग्निः श्रिये विभूत्यै दुर्मर्षं दुरभिभवं यथा भवति तथा रुचानो रोचमानो भवति । सोऽयमग्निर्वयोभिरन्नैर्वनस्पतिभिरमृतो मरणरहितोऽभवत् यदयस्मात्कारणादेनमग्निं सुरेताः शोभनरेतस्को द्यौः प्राण आदित्यो वा जनयत् जनयति ॥

यस्ते अद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने ।
प्र तं नय प्रतरं वस्यो अच्छाभि सुम्नं देवभक्तं यविष्ठ ॥ ९॥
यः । ते । अद्य । कृणवत् । भद्रऽशोचे । अपूपं । देव । घृतऽवंतं । अग्ने ।
प्र । तं । नय । प्रऽतरं । वस्यः । अच्छ । अभि । सुम्नं । देवऽभक्तं । यविष्ठ ॥ ९॥

हे भद्रशोचे कल्याणदीप्ते हे देव द्योतमान यविष्ठ युवतमाग्ने ते तुभ्यं यो यजमानोऽद्यास्मिन्नहनि घृतवंतं घृतेन युक्तमपूपं पुरोडाशं कृणवत् करोति प्रतरं प्रकृष्टतरं यजमानं वस्यो वसीयोऽच्छ प्रति प्र नय । अत्यर्थं प्रापय । तथा देवभक्तं स्तुतिभिर्हविर्भिश्च देवानां संभक्तारं सेवितारं तं यजमानं सुम्नं सुखमभि प्रति प्र नय ॥

आ तं भज सौश्रवसेष्वग्न उक्थउक्थ आ भज शस्यमाने ।
प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनदुज्जनित्वैः ॥ १०॥
आ । तं । भज । सौश्रवसेषु । अग्ने । उक्थेऽउक्थे । आ । भज । शस्यमाने ।
प्रियः । सूर्ये । प्रियः । अग्ना । भवाति । उत् । जातेन । भिनदत् । उत् । जनिऽत्वैः ॥ १०॥

हे अग्ने त्वं सौश्रवसेषु । शोभनानि श्रवांस्यन्नानि हवींषि येषु कर्मसु तानि सौश्रवसानि । तेषु क्रियमाणेषु तं यजमानं स्तोतारं वा भज । अभीष्टफलप्रदानेन सेवस्व । किंचोक्थे शस्त्रे शस्यमाने पठ्यमाने सति तमा भज । अभीष्टफलप्रदानेनैव सेवस्व । सोऽयं यजमानः स्तोता वा सूर्ये प्रियो भवाति । भवतु । तथाग्नाग्नावपि प्रियो भवाति । किंच सोऽयं जातेनोत्पन्नेन पुत्रेणोज्जिनदत् । शत्रून्विदारयतु । तथा जनित्वैर्जनयिष्यमाणैश्च पुत्रैः शत्रूनुज्जिनदत् ॥

त्वामग्ने यजमाना अनु द्यून्विश्वा वसु दधिरे वार्याणि ।
त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो वि वव्रुः ॥ ११॥

त्वां। अग्ने। यजमानाः। अनु। द्यून्। विश्वा। वसु। दधिरे। वार्याणि।
त्वया। सह। द्रविणं। इच्छमानाः। व्रजं। गोऽमंतं। उशिजः। वि। वव्रुः ॥११॥

हे अग्ने त्वां प्रति यजमाना अनु द्यून् प्रत्यहं विश्वा विश्वानि वार्याणि वरणीयानि वसु वसूनि धनानि दधिरे। धारयंति। किंच त्वया सह द्रविणमसुरैरपहृतं गोरूपं धनमिच्छमानाः कामयमाना उशिजो मेधाविनो देवा गोमंतं पशुमंतं व्रजं वि वव्रुः। विवृतद्वारं कृतवंतः ॥

अस्तांव्यग्निर्नरां सुशेवो वैश्वानर ऋषिभिः सोमगोपाः।
अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरं ॥१२॥
अस्तावि। अग्निः। नरां। सुऽशेवः। वैश्वानरः। ऋषिऽभिः। सोमऽगोपाः।
अद्वेषे इति। द्यावापृथिवी इति। हुवेम। देवाः। धत्त। रयिं। अस्मे इति। सुऽवीरं ॥१२॥

अद्वेषे द्यावापृथिवी द्यावापृथिव्यौ हुवेम। वयं हुयेम। किंच हे देवाः यूयं सुवीरं शोभनपुत्रादियुपेतं रयिं धनमस्मे अस्मासु धत्त। धारयत ॥ ॥२९॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थाश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्ये सप्तमाष्टकेऽष्टमोऽध्यायः समाप्तः ॥

THE RAMAKRISHNA MISSION INSTITUTE OF CULTURE
LIBRARY
CALCUTTA

॥ श्रीरस्तु ॥

॥ कल्याणं भूयात् ॥

ओं

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
सप्तमेऽष्टममध्यायं व्याख्यायाचार्यवंशजः। अष्टमे सायनाचार्य आदिमं व्याकरोत्यथ ॥

अच्छा म इति चतुर्थेऽनुवाकेऽष्टादश सूक्तानि। तत्र प्र होतेति चतुर्थं दशर्चं सूक्तं। प्र होता दशेत्यनुक्रांतं। अनुवर्तमानाद्वाखंदनस्य वत्सप्रेरार्षं। अनादेशपरिभाषया चेष्टुभं। आग्नेयं ॥ पूर्वसूक्तेन सहोक्तो विनियोगः ॥

प्र होता॑ जा॒तो म॒हान्न॒भो॒विन्नृ॒षद्वा॑ सीद॒दपा॒मुप॑स्थे।
दधि॒र्यो धायि॒ स ते॒ वयाँ॑सि यं॒ता वसू॑नि विध॒ते त॑नू॒पाः ॥१॥
प्र। होता॑। जा॒तः। म॒हान्। न॒भः॒ऽवित्। नृ॒ऽसद्वा॑। सी॒द॒त्। अपा॑। उप॑ऽस्थे।
दधिः॑। यः। धायि॑। सः। ते॒। वयाँ॑सि। यं॒ता। वसू॑नि। वि॒ध॒ते। त॒नू॒ऽपाः ॥१॥

यो नृषद्वाग्निरपां। अंतरिक्षनामैतत्। अंतरिक्षस्योपस्थ उत्संगे वैद्युतरूपेण निषण्णोऽभूत् स इदानीं होता यजमानानां होमनिष्पादको जातः प्रादुर्भूतो महान् गुणैः पूज्यो नभोविदंतरिक्षस्य वेत्ता। यतस्तत्रोत्पन्नः अतस्तस्य ज्ञाता ॥ नृषद्वा नृषु सीदन्। सदेः क्वनिप् क्वत्वरः ॥ प्र सीदत्। वेद्यां प्रसीदति। अपामुपस्थे महिषा अगृभ्णत। ऋ० ६. ८. ४.। इति हि निगमः। यद्वा। अपां। अपसामित्यर्थः। कर्मणामुपस्थ उपस्थाने समीपे वेद्यामुत्तरलक्षणः सन्। अथवा। अपासुदकानामुपस्थे मध्ये योऽग्निर्हविर्वोढुमसहमानो निगूढः स देवैः पुनः प्रार्थित उक्तविधः सन् वेद्यां प्रसीदति। योऽग्निर्दधिर्धाता यज्ञस्य धारकः सन् धायि वेद्यां निहितोऽभूत् सोऽग्निर्हे वत्सप्रे विधते परिचरते ते तुभ्यं वयांस्यन्नानि वसूनि धनानि च यंता। नियमिता भवतु। किंच तनूपास्ते तन्वः पाता च भवत्विति शेषः ॥

इ॒मं वि॒धंतो॒ अपां॒ स॒धस्थे॑ प॒शुं न न॒ष्टं प॒दैरनु॑ ग्मन्।
गुहा॒ चत॑ंतमु॒शिजो॒ नमो॑भिरि॒च्छंतो॒ धीरा॒ भृग॑वोऽविंदन् ॥२॥
इ॒मं। वि॒धंतः॑। अपां॑। स॒धऽस्थे॑। प॒शुं॑। न। न॒ष्टं॑। प॒दैः॑। अनु॑। ग्म॒न्।
गुहा॑। चत॑ंतं। उ॒शिजः॑। नमः॑ऽभिः। इ॒च्छंतः॑। धीराः॑। भृग॑वः। अ॒विं॒दन् ॥२॥

इममग्निमपासुदकानां सधस्थे सहस्थाने मध्ये निगूढं विधंतः परिचरंत उपचारं वदंतो वर्षयत्र पदैः ज्ञायनमार्गवयंजकैर्नष्टं चोरादिभिरपहृतं पशुमिवानु ग्मन्। अनुजग्मुः ॥ गमेर्लुङि मंचे घसेति च्लेर्लुक् ॥ तेषु मध्ये गुहा गुहायां चतंतं। चतिर्गतिकर्मा। अप्सु विलीनमित्यर्थः। उशिजः कामयमाना नमोभिर्नमस्कारैः होत्रैर्वेच्छंत आत्मन इच्छंतो धीरा धीमंतो भृगवोऽविंदन्। लब्धवंतः। अग्नेर्हविर्वोढुमसहमानस्य पलाय्याप्सु विशो देवानामन्वेषणं चाग्निस्तुत्यो व्यायांस इत्यत्र स्पष्टमाख्यातं। तै० सं० २. ६. ६.। अन्वेषणं कुर्वतां मध्ये गृणानमग्निमाभ इमं विधंतो अपां सधस्थे द्वितादधुर्भृगव इत्यत्रोक्तं। ऋ० २. ४. २.॥

इमं चितो भूर्यविंदद्दिच्छन्वैभूवसो मूर्धन्यघ्न्यायाः ।
स शेवृधो जात आ हर्म्येषु नाभिर्युवा भवति रोचनस्य ॥३॥
इमं । चितः । भूरि । अविंदत् । इच्छन् । वैभुऽवसः । मूर्धनि । अघ्न्यायाः ।
सः । शेऽवृधः । जातः । आ । हर्म्येषु । नाभिः । युवा । भवति । रोचनस्य ॥३॥

इमं भूरि महांतमग्निं वैभूवसो विभूवसः पुत्रस्यित ऋषिरिच्छन्नैच्छद्भूमिमिच्छन्नघ्न्यायाः । अघ्न्या भूमिः । तस्या भूम्या मूर्धनि । भूम्यामित्यर्थः । तत्राविंदत् । लब्धवान् । सोऽग्निः शेवृधः सुखस्य वर्धयिता सन् हर्म्येषु यजमानगृहेष्वा सर्वतो जातः प्रादुर्भूतः सन्रोचनस्य रोचमानस्य स्वर्गाख्यस्य फलस्योत्तमलक्षणस्य यज्ञस्यादित्यस्य वा नाभिर्बंधको भवति ॥

मंद्रं होतारमुशिजो नमोभिः प्रांचं यज्ञं नेतारमध्वराणां ।
विशामकृण्वन्नरतिं पावकं हव्यवाहं दधतो मानुषेषु ॥४॥
मंद्रं । होतारं । उशिजः । नमःऽभिः । प्रांचं । यज्ञं । नेतारं । अध्वराणां ।
विशां । अकृण्वन् । अरतिं । पावकं । हव्यऽवाहं । दधतः । मानुषेषु ॥४॥

उशिजः कामयमाना ऋत्विजो मंद्रं मादनीयं होतारं होमनिष्पादकं प्रांचं गार्हपत्यादाहवनीयं प्रति प्रागंचंतं यज्ञं यजनीयमध्वराणां यागानां नेतारं प्रापयितारमरतिं गंतारं सर्वदा यागगृहे वर्तमानं पावकं शोधकं हव्यवाहं हविषो वोढारं मानुषेषु मनुष्येषु मध्ये दधतो दधाना ऋत्विजो विशां यजमानानामर्थाय । यद्वा । विशां प्रजानामरतिमर्यं । स्वामिनमित्यर्थः । नमोभिर्नमस्कारैः । स्तुतिभिरित्यर्थः । अकृण्वन् । अकुर्वन् । सुप्रीतं कृतवंतः ॥

प्र भूर्जयंतं महां विपोधां मूरा अमूरं पुरां दर्माणं ।
नयंतो गर्भं वनां धियं धुर्हिरिश्मश्रुं नार्वाणं धनंचं ॥५॥
प्र । भूः । जयंतं । महां । विपःऽधां । मूराः । अमूरं । पुरां । दर्माणं ।
नयंतः । गर्भं । वनां । धियं । धुः । हिरिऽश्मश्रुं । न । अर्वाणं । धनऽअंचं ॥५॥

हे स्तोतः त्वं जयंतं जेतव्याञ्शत्रूञ्जयंतं महां महांतं विपोधां मेधाविनो धर्तारमग्निं प्र भूः । प्रभव । समर्थो भव । स्तोतुमिति शेषः । उन्नीथस्तु भूर्जयंतमित्येकपदं मत्वा भूरादीङ्लोकाञ्जयंतमिति व्याचकार । न केवलं त्वमेक एव अपि तु मूरा मूढाः सर्वेऽपि पुरुषा अमूरममूढं पुरां दर्माणं दारकं ॥ औणादिको मनिः । प्रत्ययस्वरः ॥ गर्भमरण्योर्गर्भभूतं वनां वननीयं ॥ वा छंदसि । पा० ६. १. १०६–१०७. । इति वचनादग्नि पूर्वाभावः ॥ हिरिश्मश्रुं नार्वाणं । नेत्युपमार्थीयः । श्मश्रुशब्दोऽत्र रोमसामान्यवचनः । हरितरोमोपेतमर्वाणमरणशीलमश्वमिव । उत्तमलक्षणाश्ववद्धरितकेशस्थानीयज्वालोपेतं धनंचं प्रीणनसुतिं ॥ शकंध्वादित्वात्पररूपत्वं ॥ ईदृशमग्निं नयंतो हविर्भिः प्रापयंतो धियं कर्म स्तोत्रं वा धुः । प्रापयंति ॥ गातिस्थेति सिचो लुक् ॥ ॥१॥

नि पस्त्यासु चितः स्तभूयन्परिवीतो योनौ सीदद्दंतः ।
अतः संगृभ्या विशां दमूना विधर्मणायंचैरीयते नॄन् ॥६॥
नि । पस्त्यासु । चितः । स्तभुऽयन् । परिऽवीतः । योनौ । सीदत् । अंतरिति ।
अतः । संऽगृभ्य । विशां । दमूनाः । विऽधर्मणा । अयंचैः । ईयते । नॄन् ॥६॥

चितस्रिषु स्थानेषु गार्हपत्यादिषु तायमानः स्तूयमानः यजमानगृहान् संभवितुमिच्छन् ॥ इच्छार्थे क्वचि तदंताच्छतरि रूपं ॥ परिवीतः परितो ज्वालाभिर्व्याप्तः सन् पस्त्यासु यागगृहेषु योनावंतः स्वीये वेद्यात्मके स्थाने नि षीदत्। निषीदति। अतोऽस्मात्स्थानाद्विप्रां प्रजानां संबंधीनि हवींषि संगृभ्य संगृह्येंद्रादीनुद्दिश्य प्रत्तानि चरुपुरोडाशादीनि स्वीकृत्य दमूना देवेभ्यो दानमना यजमानाय वाभिमतप्रदानमना विधर्मणा तासां विविधेन कर्मणा निमित्तेन दानमना देवेभ्यो दानपत्ये विविधगमनरूपेण कर्मणायंत्रैः शकूनां नियमनैः सह नृन्देवानीयते। गच्छति ॥

अस्याजरासो दमामरित्रा अर्चद्धूमासो अग्नयः पावकाः।
श्वितीचयः श्वाचासो भुरण्यवो वनर्षदो वायवो न सोमाः ॥७॥
अस्य। अजरासः। दमां। अरित्राः। अर्चत्ऽधूमासः। अग्नयः। पावकाः।
श्वितीचयः। श्वाचासः। भुरण्यवः। वन्ऽसदः। वायवः। न। सोमाः ॥७॥

अत्र वक्तृत्वेन स्तूयते। अस्य यजमानस्य संबंधिनोऽजरासो जरारहिता दमां दमनीयानां रक्षःप्रभृतीनां ॥ दमेः क्विपि सावेकाच इति विभक्तेरुदात्तत्वं ॥ तेषामरित्राः कारका अर्चद्धूमासोऽर्चंतोऽर्चनीया धूमा धूमोपलक्षिता ज्वाला वा येषां ते तथोक्ताः पावकाः शोधकाः श्वितीचयः श्वेतिमानमंचंतः ॥ श्वितिः श्वेतः। श्रीणादिक इः ॥ श्वाचासः। छिप्रनामैतत्। छिप्रधर्मका भुरण्यवो भरणशीला वनर्षदो वनेषु सीदंतः ॥ संहितायां छांदसं दीर्घत्वं ॥ वायवो न सोमा गंतारः सोमा इव। हविर्दातुर्यजमानस्य शीघ्रा भवंतीति ॥

प्र जिह्वया भरते वेपो अग्निः प्र वयुनानि चेतसा पृथिव्याः।
तमायवः शुचयंतं पावकं मंद्रं होतारं दधिरे यजिष्ठं ॥८॥
प्र। जिह्वया। भरते। वेपः। अग्निः। प्र। वयुनानि। चेतसा। पृथिव्याः।
तं। आयवः। शुचयंतं। पावकं। मंद्रं। होतारं। दधिरे। यजिष्ठं ॥८॥

योऽग्निर्जिह्वया ज्वालया वेपः। कर्मनामैतत्। कर्म प्र भरते तथा योऽग्निर्वयुनानि प्रज्ञानानि स्तोत्राणि पृथिव्या रक्षणाय चेतसानुग्रहयुक्तेन मनसा प्र भरते तमग्निमायवो गंतारो मनुष्याः शुचयंतं दीप्यमानं पावकं शोधकं मंद्रं स्तुत्यं होतारमाह्वातारं होमनिष्पादकं वा यजिष्ठमतिशयेन यष्टव्यं यष्टृतमं वा दधिरे। धारयंति ॥

द्यावा यमग्निं पृथिवी जनिष्टामापस्त्वष्टा भृगवो यं सहोभिः।
ईळेन्यं प्रथमं मातरिश्वा देवास्ततक्षुर्मनवे यजत्रं ॥९॥
द्यावा। यं। अग्निं। पृथिवी इति। जनिष्टां। आपः। त्वष्टा। भृगवः। यं। सहःऽभिः।
ईळेन्यं। प्रथमं। मातरिश्वा। देवाः। ततक्षुः। मनवे। यजत्रं ॥९॥

यमग्निं द्यावा पृथिवी द्यावापृथिव्यौ जनिष्टां अजनिषातां ॥ जनेर्लुङि व्यत्ययेन परस्मैपदं ॥ आपश्च यमुदपादयन् वैद्युतरूपेण त्वष्टा च यमजनयत् भृगवश्च यं सहोभिर्बलैः स्तोत्रादिसाधनैर्लब्धवंतः। भृगवो ऽविंदन्निति श्रुतं। ऋ० १०. ४६. २। ईळेन्यं स्तुत्यं यं प्रथमं मातरिश्वा वायुरुदपादयत् अन्ये देवाश्च मनवे राज्ञे मनोरथाय यजत्रं यष्टव्यमग्निं ततक्षुः। निष्पादितवंतः ॥

यं त्वा देवा दधिरे हव्यवाहं पुरुस्पृहो मानुषासो यजत्रं।
स यामन्नग्ने स्तुवते वयो धाः प्र देवयन्यशसः सं हि पूर्वीः ॥१०॥

यं । त्वा । देवाः । दधिरे । हव्यऽवाहं । पुरुऽस्पृहः । मानुषासः । यजत्रं ।
सः । यामन् । अग्ने । स्तुवते । वयः । धाः । प्र । देवऽयन् । यशसः । सं । हि । पूर्वीः ॥१०॥

हे अग्ने हव्यवाहं यं त्वा त्वां देवा दधिरे धारितवंतः मानुषासो मनुष्याश्च पुरुस्पृहो बहुकामान् स्पृहयंतो यजत्रं यष्टव्यं दधिरे धारितवंतः हे अग्ने स त्वं यामन् यामनि यज्ञे स्तुवते मह्यं वयोऽन्नं धाः। देहि। हे अग्ने त्वत्तो देवयन् देवकामो यजमानः पूर्वीर्बहूनि बहूनि यशसो यशांसि । सं हीत्युपसर्गश्रुतेर्योग्यक्रियाध्याहारः । संप्राप्नोति खलु ॥ ॥२॥

अगृभ्मा त इत्यष्टर्चं पंचमं सूक्तमांगिरसस्य सप्तगुनाम्न आर्षं त्रैष्टुभं । विकुंठा नामासुरस्त्री । सा चेंद्रसदृशं पुत्रं कामयमाना कृच्छ्रचांद्रायणादिकं तपस्तेपे । मत्सदृशोऽन्यः कश्चिन्मा अनिष्टेति बुद्ध्येंद्र एव तस्याः पुत्रोऽजायत । तादृशो वैकुंठ इंद्रो देवता । तथा चानुक्रांतं । अगृभ्माष्टौ सप्तगुर्वैकुंठमिंद्रं तुष्टावेत्यादि । गतो विनियोगः ॥

अगृभ्मा ते दक्षिणमिंद्र हस्तं वसूयवो वसुपते वसूनां ।
विद्मा हि त्वा गोपतिं शूर गोनामस्मभ्यं चित्रं वृषणं रयिं दाः ॥१॥
अगृभ्म । ते । दक्षिणं । इंद्र । हस्तं । वसुऽयवः । वसुऽपते । वसूनां ।
विद्म । हि । त्वा । गोऽपतिं । शूर । गोनां । अस्मभ्यं । चित्रं । वृषणं । रयिं । दाः ॥१॥

वसूनां वसुपते बहूनां धनानां स्वामिन्निंद्र ते तव दक्षिणं हस्तं वसूयवो वसुकामा वयं अगृभ्म । गृह्णीमः । यथा बहुप्रदस्यार्थिनो मह्यमदत्त्वा न गंतव्यमिति हस्तं गृह्णंति तद्वत् । हे शूर विक्रांतेंद्र त्वा त्वां गोनां गोपतिं । अत्र वृत्त्यवृत्तिभ्यां स्वामित्वं बहुत्वं च प्रतिपाद्यते । बहूनां गवां गोपतिं विद्म । जानीमः । अतोऽस्मभ्यं चित्रं चायनीयं वृषणं वर्षकं रयिं धनं दाः । देहि ॥

स्वायुधं स्ववसं सुनीथं चतुःसमुद्रं धरुणं रयीणां ।
चर्कृत्यं शंस्यं भूरिवारमस्मभ्यं चित्रं वृषणं रयिं दाः ॥२॥
सुऽआयुधं । सुऽअवसं । सुऽनीथं । चतुःऽसमुद्रं । धरुणं । रयीणां ।
चर्कृत्यं । शंस्यं । भूरिऽवारं । अस्मभ्यं । चित्रं । वृषणं । रयिं । दाः ॥२॥

स्वायुधं शोभनवज्रायायुधं स्ववसं शोभनरक्षणं सुगमनं वा सुनीथं सुनयनं चतुःसमुद्रं चतुरः समुद्रान्यो यशसा व्याप्नोति तं धरुणं धारकं । केषां । रयीणां धनानां । चर्कृत्यं पुनःपुनः कर्तव्यं शंस्यं स्तुत्यं भूरिवारं भूरीणां दुःखानां वारकं बहुभिर्वरणीयं वा त्वां विशेषेति शेषः । तादृशोऽस्मभ्यमित्यादि पूर्ववत् । यद्वा । हे इंद्र उक्तगुणविशिष्टं पुत्राख्यं रयिं दाः । देहि ॥

सुब्रह्माणं देववंतं बृहंतमुरुं गभीरं पृथुबुध्नमिंद्र ।
श्रुतऋषिमुग्रमभिमातिषाहमस्मभ्यं चित्रं वृषणं रयिं दाः ॥३॥
सुऽब्रह्माणं । देवऽवंतं । बृहंतं । उरुं । गभीरं । पृथुऽबुध्नं । इंद्र ।
श्रुतऽऋषिं । उग्रं । अभिमातिऽसहं । अस्मभ्यं । चित्रं । वृषणं । रयिं । दाः ॥३॥

हे इंद्र त्वं सुब्रह्माणं । ब्रह्म परिवृढं स्तुतिलक्षणं कर्म । शोभनस्तुतिकमित्यर्थः । देववंतं बृहंतं महांतमुरुं विस्तीर्णं गभीरमसुरादिभिरगम्यं पृथुबुध्नं विस्तृतमूलं श्रुतऋषिं श्रुता ऋषयो येन तादृग्ग्रमृषीणां ख्यापयितारं

प्रथितज्ञानं वोयमुत्पूर्णवयसं अत एवाभिमातिषाहमभिमातीनां शत्रूणामभिभवितारं हंतारमस्मभ्यं चित्रं पूज्यं वृषणं वर्षकं पुत्रं रयिं धनं दाः। देहि। अथवा विशेषणविशेष्यभावः। उक्तलक्षणं पुत्राख्यं रयिं दाः॥

सनद्वाजं विप्रवीरं तरुत्रं धनस्पृतं शूशुवांसं सुदक्षं।
दस्युहनं पूर्भिदमिंद्र सत्यमस्मभ्यं चित्रं वृषणं रयिं दाः ॥४॥
सनत्ऽवाजं। विप्रऽवीरं। तरुत्रं। धनऽस्पृतं। शूशुऽवांसं। सुऽदक्षं।
दस्युऽहनं। पूःऽभिदं। इंद्र। सत्यं। अस्मभ्यं। चित्रं। वृषणं। रयिं। दाः ॥४॥

सनद्वाजं लब्धान्नं विप्रवीरं मेधाविनं पुत्रं तरुत्रं तारकं धनस्पृतं धनानां पूरकं स्प्रष्टारं वा॥ स्पृणोतेः स्पृशतेर्वोत्तरपदं॥ शूशुवांसं वर्धमानं सुदक्षं शोभनबलं दस्युहनं शत्रूणां हंतारं पूर्भिदं शत्रूणां पुरां भेत्तारं सत्यं सत्यकर्माणं। शिष्टमुक्तं॥

अश्वावंतं रथिनं वीरवंतं सहस्रिणं शतिनं वाजमिंद्र।
भद्रव्रातं विप्रवीरं स्वर्षामस्मभ्यं चित्रं वृषणं रयिं दाः ॥५॥
अश्वऽवंतं। रथिनं। वीरऽवंतं। सहस्रिणं। शतिनं। वाजं। इंद्र।
भद्रऽव्रातं। विप्रऽवीरं। स्वःऽसां। अस्मभ्यं। चित्रं। वृषणं। रयिं। दाः ॥५॥

अश्वावंतं बहुभिरश्वैरुपेतं रथिनं रथवंतं वीरवंतं वीरैः पुत्रैरुपेतं सहस्रिणं सहस्रवंतं शतिनं शतवंतं। असंख्यातगवादियुक्तमित्यर्थः। भद्रव्रातं भद्रगणं कल्याणैः सेवकैः परिवृतं विप्रवीरं विप्रैर्वीरैश्चोपेतं स्वर्षां सर्वस्य संभक्तारं वाजं बलवंतं हे इंद्र। शिष्टमुक्तं॥ ॥३॥

प्र सप्तगुमृतधीतिं सुमेधां बृहस्पतिं मतिरच्छा जिगाति।
य आंगिरसो नमसोपसद्योऽस्मभ्यं चित्रं वृषणं रयिं दाः ॥६॥
प्र। सप्तऽगुं। ऋतऽधीतिं। सुऽमेधां। बृहस्पतिं। मतिः। अच्छ। जिगाति।
यः। आंगिरसः। नमसा। उपऽसद्यः। अस्मभ्यं। चित्रं। वृषणं। रयिं। दाः ॥६॥

सप्तगुं मां मतिः स्तुतिर्देववियाच्छा जिगाति। कीदृशं सप्तगुं। ऋतधीतिं सत्यकर्माणं सुमेधां शोभनप्रज्ञं बृहस्पतिं बृहतो मंत्रस्य स्वामिनं। यः सप्तगुरांगिरसोऽंगिरोगोत्रोत्पन्नोऽहं नमसा नमस्कारेण देवानुपसद्यः। उपगतः। यद्वा। नमसान्नेनोपसद्य उपसदनीयः। देवैरनुयाह्य इत्यर्थः। तादृशायास्मभ्यं मह्यं चित्रं वृषणं रयिं दाः॥

वनीवानो मम दूतास इंद्रं स्तोमाश्चरंति सुमतीरियानाः।
हृदिस्पृशो मनसा वच्यमाना अस्मभ्यं चित्रं वृषणं रयिं दाः ॥७॥
वनीवानः। मम। दूतासः। इंद्रं। स्तोमाः। चरंति। सुऽमतीः। इयानाः।
हृदिऽस्पृशः। मनसा। वच्यमानाः। अस्मभ्यं। चित्रं। वृषणं। रयिं। दाः ॥७॥

वनीवानो वननवंतः॥ छंदसीवनिपाविति मत्वर्थीयो वनिप्॥ मम सप्तगोर्दूतासो दूतसदृशाः दूता यथा भर्तुरभिमतार्थं प्रापणीयं प्रापयंति तद्वत्स्तुत्याभ्युणान्प्रापयंतः स्तोमाः स्तवाः सुमतीस्त्वेंद्रस्वाद्विषया अनुकूला बुद्धीरियाना याचमाना इंद्रं चरंति। प्राप्नुवंति। पुनश्च त एव विशेष्यंते। हृदिस्पृशो

हृदये सृग्रंतः । सुत्यस्य प्रियभूता इत्यर्थः ॥ हृद्युभ्यामित्युपसंख्यानात् ङेरलुक् ॥ मनसा सत्त्वोद्रिक्तेन वक्ष्यमाणा उच्यमानाः । अस्मभ्यमित्यादि गतं ॥

यत्त्वा यामि दद्धि तन्न इंद्र बृहंतं क्षयमसमं जनानां ।
अभि तद्द्यावापृथिवी गृणीतामस्मभ्यं चित्रं वृषणं रयिं दाः ॥८॥
यत् । त्वा । यामि । दद्धि । तत् । नः । इंद्र । बृहंतं । क्षयं । असमं । जनानां ।
अभि । तत् । द्यावापृथिवी इति । गृणीतां । अस्मभ्यं । चित्रं । वृषणं । रयिं । दाः ॥८॥

हे इंद्र त्वा त्वां यद्वक्ष्यमाणं यामि याचामि ॥ वर्णलोपश्छांदसः ॥ याच्यमानं तद्दद्धि । देहि ॥ ददातेर्लोटि व्यत्ययेन परस्मैपदं । बहुलं छंदसीति शपो लुक् ॥ तदिति सामान्येन निर्दिष्टं विशेषयति । बृहंतं महांतं क्षयं निवासं जनानामन्येषामसममसाधारणं देहि । त्वया दातव्यं द्यावापृथिवी अभि गृणीतां । अस्मभ्यमित्यादि गतं ॥ ॥४॥

अहं भुवमित्येकादशर्चं षष्ठं सूक्तं । पूर्वसूक्तेन सप्तगुणा स्तुतो हृष्टः सन्निदमादिसूक्तत्रयेण स्वयमात्मानमस्तौत् । तस्माद्वैकुंठस्येंद्रस्य वाक्यत्वाद्यस्य वाक्यं स ऋषिरिति परिभाषयेंद्र ऋषिः । वैकुंठस्येंद्रस्य च स्तूयमानत्वाद्वा तेनोच्यते सा देवतेति परिभाषयेंद्र एव देवता । दशम्येकादशीसप्तम्यस्त्रिष्टुभः । शिष्टास्त्रिष्टुबंतपरिभाषया जगत्यः । तथा चानुक्रांतं । स सप्तगुस्तुतिसंहृष्ट आत्मानमुत्तरैस्त्रिभिस्तुष्टावाहं भुवमेकादशांत्ये चिष्टुभौ सप्तमी चेति ॥ अतिरात्रे द्वितीयपर्याये होतुः शस्त्र एतत्सूक्तं । सूचितं च । अहं भुवमपाद्यस्यांधसो मदायेति याज्या । आ० ६. ४. । इति ॥ समूढस्य दशरात्रस्य तृतीये छंदोमे निष्केवल्येऽप्येतत्सूक्तं । अहं भुवं तन्त इंद्रियमिति निष्केवल्यं । आ० ८. ७. । इति सूचितं ॥

अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि सं जयामि शश्वतः ।
मां हवंते पितरं न जंतवोऽहं दाशुषे वि भजामि भोजनं ॥१॥
अहं । भुवं । वसुनः । पूर्व्यः । पतिः । अहं । धनानि । सं । जयामि । शश्वतः ।
मां । हवंते । पितरं । न । जंतवः । अहं । दाशुषे । वि । भजामि । भोजनं ॥१॥

अहमिंद्रो वसुनो धनस्य पूर्व्यो मुख्योऽसाधारणः पतिः स्वामी भुवं । अभवं ॥ भवतेर्लङि बहुलं छंदसीति शपो लुक् । अचि शुधातुभ्रुवांमित्युवङादेशः । अडभावश्छांदसः ॥ तथाहं शश्वतः । बहुनामेतत् । बहोः शश्वोः संबंधीनि धनानि । समित्येकीभावे । सह जयामि । किंच मामेव जंतवः प्राणिनो यजमाना हवंते । आह्वयंति । पितरं न पितरमिव पुत्राः । अहं दाशुषे दात्रे यजमानाय भोजनमन्नं वि भजामि । ददामि ॥

अहमिंद्रो रोधो वक्षो अथर्वणस्तिताय गा अजनयमहेरधि ।
अहं दस्युभ्यः परि नृम्णमा ददे गोत्रा शिक्षन् दधीचे मातरिश्वने ॥२॥
अहं । इंद्रः । रोधः । वक्षः । अथर्वणः । तिताय । गाः । अजनयं । अहेः । अधि ।
अहं । दस्युऽभ्यः । परि । नृम्णं । आ । ददे । गोत्रा । शिक्षन् । दधीचे । मातरिश्वने ॥२॥

आद्यपादस्येतिहासमाहुः । आथर्वणं दध्यंचं मधुविद्यावंतमिंद्र आगत्य मधुविद्यां कस्यचिन्न ब्रूया इति नियमितवान् । यदि ब्रूयास्ते शिरो हरामीत्युक्तवान् । स चाथर्वणोऽश्विभ्यामुवाच । इदं वै तन्मधु दध्यङाथर्वणोऽश्विभ्यामुवाच । शत० १४. ५. ५. १६. । अश्वस्य शीर्ष्णा प्र यदीमुवाच । ऋ० १. ११६. १२. । इति हि श्रुतिः । स चेंद्र आगत्य दधीचः शिरोऽहरदिति तचोच्यते । इंद्रोऽहमथर्वणोऽथर्वणः पुत्रश्च दधीचो वयः ।

तदुपलक्षितं शिर इत्यर्थः । तस्य रोधो रोधको हर्तास्मि । तथा चितायेतन्नामकायाम्याच कूपपतितायोद्धरणार्थमहमेघस्याधुपरि गा उदकान्यजनयं । उदपादयं । चितस्य कूपपतितस्येंद्रं प्रत्युद्धरणप्रार्थनं सं मा तपत्यभितः । ऋ० १०. ३३. २.। इत्यत्र प्रतिपादितं । तथाहं दस्युभ्य उपक्षपयितृभ्यः शत्रुभ्यः सकाशान्नृम्णं धनमा ददे । आदत्तवानस्मि । किं कुर्वन् । गोत्रा गवामुदकानां रक्षकान्मेघाञ्छत्रून् विनयन् । किमर्थं । मातरिश्वने मातरिश्वनः पुत्राय दधीच एतन्नामकायर्षये वर्षकामाय प्रवर्षयितुमिच्छन् ॥

मह्यं त्वष्टा वज्रमतक्षदायसं मयि देवासोऽवृजन्नपि क्रतुं ।
ममानीकं सूर्यस्येव दुष्टरं मामार्यंति कृतेन कर्त्वेन च ॥३॥
मह्यं । त्वष्टा । वज्रं । अतक्षत् । आयसं । मयि । देवासः । अवृजन् । अपि । क्रतुं ।
मम । अनीकं । सूर्यस्यऽइव । दुस्तरं । मां । आर्यंति । कृतेन । कर्त्वेन । च ॥३॥

मह्यं मदर्थं त्वष्टा देव आयसमयोमयं वज्रमायुधमतक्षत् । संपादितवान् । देवा मयि विषये क्रतुं स्वविरोधिहननरूपं कर्माप्यवृजन् । समपादयन् । ममानीकं सेनासमूहं सूर्यानीकमिव दुष्टरं । अन्येन तरीतुमशक्यं । मामेव कृतेन कर्मणा कर्त्वेनेतः परं कर्तव्येन वृत्रवधादिरूपेणार्यंति । गच्छंति । आर्यतिर्गतिकर्मा । यद्वा । आर्यमीश्वरं कुर्वते ॥

अहमेतं गव्ययमश्व्यं पशुं पुरीषिणं सायकेना हिरण्ययं ।
पुरू सहस्रा नि शिशामि दाशुषे यन्मा सोमास उक्थिनो अमंदिषुः ॥४॥
अहं । एतं । गव्ययं । अश्व्यं । पशुं । पुरीषिणं । सायकेन । हिरण्ययं ।
पुरु । सहस्रा । नि । शिशामि । दाशुषे । यत् । मा । सोमासः । उक्थिनः । अमंदिषुः ॥४॥

अहमेतं गव्ययं गोमयमश्व्यमश्वमयं हिरण्ययं हिरण्यालंकारोपेतं पुरीषिणं । पुरीषमुदकं क्षीररूपं । तद्वंतं पशुं शत्रुसंबंधिनं । जात्येकवचनं । पशुसंघमित्यर्थः । तं सायकेनायुधेनाजयं । तथा पुरू पुरूणि सहस्रा सहस्राणि शस्त्राणि नि शिशामि संस्करोमि दाशुषे हविर्दत्तवते यजमानाय । वैरिनाशायेत्यर्थः । कदेति उच्यते । यद्यदा मा मां सोमासः सोमा उक्थिनः शस्त्रोपेताः संतः अथवा सोमेन शस्त्रैश्चोपेता यजमाना अमंदिषुः तर्पयंति ॥

अहमिंद्रो न परा जिग्य इद्धनं न मृत्यवेऽव तस्थे कदा चन ।
सोममिन्मा सुन्वंतो याचता वसु न मे पूरवः सख्ये रिषाथन ॥५॥
अहं । इंद्रः । न । परा । जिग्ये । इत् । धनं । न । मृत्यवे । अव । तस्थे । कदा । चन ।
सोमं । इत् । मा । सुन्वंतः । याचत । वसु । न । मे । पूरवः । सख्ये । रिषाथन ॥५॥

इंद्रो धनस्य सर्वस्य स्वाम्यहं धनमात्मीयं न परा जिग्य इत् । नैव पराभावयामि । मदीयं धनं न पराभूयत इत्यर्थः । किंचाहं मृत्यवे सर्वेषां मारकाय कदा चन कदापि नाव तस्थे । नावस्थितो भवामि । इंद्रभक्ता न मृत्युभाजो भवंति किल किमु वक्तव्यमिंद्रस्य मृत्युविरहे । यस्मादेवं तस्मात्सोमं सुन्वंतो हे यजमानाः वसु युष्मदभिमतं धनं मेऽस्मामेव याचत । हे पूरवो मनुष्याः मे सख्ये न रिषाथन । मा रिष्टा भवथ । मत्सख्यं मा विनाशयत ॥ ॥५॥

अहमेताञ्छाश्वसतो द्वाविंद्रं ये वज्रं युधयेऽकृण्वत ।
आह्वयमानाँ अव हन्मनाहनं दृळ्हा वदन्नमस्युर्नमस्विनः ॥६॥

अहं । एतान् । शाश्वसतः । द्वाऽद्वा । इंद्रं । ये । वज्रं । युधये । अकृण्वत ।
आऽहूयमानान् । अवं । हन्मना । अहनं । दृळ्हा । वदन् । अनमस्युः । नमस्विनः ॥ ६ ॥

अहमिंद्र एतान्वक्ष्यमाणाञ्शाश्वसतो भृशं प्राणतः प्रवृद्धबलाञ्शत्रून् द्वाद्वा द्वौ द्वौ । युग्मभूतानित्यर्थः । तानहनमिति संबंधः । एतानित्युक्तं कानित्याह । ये शत्रव इंद्रं शत्रूणां दारकं । इंद्रः शत्रूणां दारयितेति निरुक्तं । १०. ८. । ईदृशं वज्रं बलिनं यद्वा वज्रवंतं युधये युद्धायाकृण्वत अकुर्वत । तानेतानित्यर्थः । पुनः कीदृशान् । आहूयमानान् एहि युध्यस्वेत्याहूयतः शत्रून् नमस्विनो नमनवतो बलान्नामयित्वानमस्कुर्वतः प्रणतिशीलः सन् दृळ्हा दृढानि भयजनकानि स्थिराणि वचनानि वदन्नहनं । हतवानस्मि ॥

अभी३दमेकमेको अस्मि निष्षाळभी द्वा किमु चयः करंति ।
खले न पर्षान् प्रति हन्मि भूरि किं मा निंदंति शत्रवोऽनिंद्राः ॥ ७ ॥
अभि । इदं । एकं । एकः । अस्मि । निष्षाट् । अभि । द्वा । किं । ऊं इति । चयः । करंति ।
खले । न । पर्षान् । प्रति । हन्मि । भूरि । किं । मा । निंदंति । शत्रवः । अनिंद्राः ॥ ७ ॥

अहमिदमिदानीमेकं शत्रुमेकोऽसहाय एव सन्नभ्यस्मि । अभिभवामि । किंच निष्षाट् सपत्नान्निःसहमाणोऽहं द्वा द्वावप्यसह्यौ शत्रू अभ्यस्मि । किमु किं वा चयः शत्रवः करंति । कुर्वंति । तानप्यभिभवामीत्यर्थः । किं बहुना । खले न खलनिष्पादने यथा जीर्णव्रीह्यादिस्तंबानगायासेन प्रतिहंति कर्षकः तद्वत्पर्षान्निष्ठुरान्भूरि बहून्शत्रून्प्रति हन्मि । मा मामनिंद्रा इंद्ररहिता इंद्रमजानंत इंद्रविरोधिनः शत्रवो मामिंद्रं किं निंदंति । निंदितुमशक्ता इत्यर्थः । अचाभिभवामीत्यादि निरुक्तं द्रष्टव्यं । नि० ३. १०. ॥

अहं गुंगुभ्यो अतिथिग्वमिष्कंरमिषं न वृंचतुरं विष्षु धारयं ।
यत्पर्णयघ्न उत वा करंजहे प्राहं महे वृंचहत्ये अष्टुभ्रवि ॥ ८ ॥
अहं । गुंगुऽभ्यः । अतिथिऽग्वं । इष्कंरं । इषं । न । वृचऽतुरं । विष्षु । धारयं ।
यत् । पर्णयऽघ्ने । उत । वा । करंजऽहे । प्र । अहं । महे । वृचऽहत्ये । अष्टुभ्रवि ॥ ८ ॥

अहमिंद्रो गुंगुभ्य एतन्नामकेभ्यो जनपदेभ्यो रक्षणायातिथिग्वमतिथिगोः पुत्रं दिवोदासमृषिमिष्करं निष्कर्तारं वृचतुरं शत्रूणां हिंसकं विष्षु प्रजासु मध्य इषं नाम्नमिव तासामन्नं यथा भोगाय भवति तद्वदन्नस्थानीयं धारयं । धारितवानस्मि । कदेति उच्यते । यद्यदा पर्णयघ्ने पर्णयनामकस्यासुरस्य हननवति उतापि च करंजह एतन्नामकस्य हननोपेते महे महति वृचहत्ये संग्रामेऽष्टुभ्रवि श्रुतोऽभवं ॥

प्र मे नमी साप्य इषे भुजे भूद्गवामेषे सख्या कृणुत द्विता ।
दिद्युं यदस्य समिधेषु मंहयमादिदेनं शंस्यमुक्थ्यं करं ॥ ९ ॥
प्र । मे । नमी । साप्यः । इषे । भुजे । भूत् । गवां । एषे । सख्या । कृणुत । द्विता ।
दिद्युं । यत् । अस्य । संऽइधेषु । मंहयं । आत् । इत् । एनं । शंस्यं । उक्थ्यं । करं ॥ ९ ॥

मे मम मत्संबंधी नमी । नामकत्वान्नमः स्तोत्रं । तदस्यास्तीति नमी स्तोता साप्यः सर्वैराश्रयणीय इषेऽन्नाय भुजे भोगाय प्र भूत् । प्रभवति । तं मत्स्तोतारं मनुष्या गवामेषेऽन्वेषणाय सख्या सख्याय च द्विता द्विविधं द्विप्रकाराय कृणुत । कुर्वंति । गवां दातारं सखायं च कुर्वंतीत्यर्थः । यद्वा । गवामेष एषणे द्विता द्वैधाय सख्याय शारीराय सैनिकाय च सख्याय कृण्वंति । कदेति उच्यते । यद्यदास्य मत्संबंधिनः स्तोतुर्जयार्थं

समिद्धेषु संग्रामेषु दिद्युमायुधं मंहयं। स्वीकुर्यामित्यर्थः। आदिदनंतरमेवैनं स्तोतारं शंसं सुत्यमुक्थ्यमुक्थार्हं करं। अकरं। करोमि॥

प्र नेमस्मिन्ददृशे सोमो अंतर्गोपा नेममाविरस्था कृणोति।
स तिग्मशृंगं वृषभं युयुत्सन् दुहस्तस्थौ बहुले बडो अंतः॥१०॥
प्र। नेमस्मिन्। ददृशे। सोमः। अंतः। गोपाः। नेमं। आविः। अस्था। कृणोति।
सः। तिग्मऽशृंगं। वृषभं। युयुत्सन्। दुहः। तस्थौ। बहुले। बडः। अंतरिति॥१०॥

नेमस्मिन्। नेमशब्दोऽर्धपर्यायः। यष्टायष्टा च द्वौ पुरुषौ युध्यंतौ। तयोरेकस्मिन्यष्टरीत्यर्थः। तस्मिन्नंतः सोमो ददृशे। दृश्यते। तं नेममर्धमेकं गोपा गोपायितेंद्रोऽस्था क्षेपणसाधनेन वज्रेणाविष्कृणोति। प्रकटयति। शत्रुभिरनभिभूतं करोतीत्यर्थः। स यत्र सोमो न दृश्यते स तिग्मशृंगं तीक्ष्णायुधं वृषभं बाणान्वर्षयंतमिंद्रेणानुगृहीतं प्रति युयुत्सन् योद्धुमिच्छन् द्रुहो द्रोग्धा बडः सन् बलेऽंधकारेऽंतस्य मध्ये तस्थौ। तिष्ठति। यद्वा। एवं व्याख्येयं। नेमस्मिन्निंद्रभक्तेऽंतः सोमो ददृशे। नेममन्यं गोपाः स्वभक्तरक्षक इंद्रोऽस्था वज्रेणाविष्कृणोति। आविष्करोति। वज्रेण पीडयतीत्यर्थः। स नेमो द्रुहस्तिग्मशृंगं वृषभमिंद्रं युयुत्सन्। शिष्टं समानं॥

आदित्यानां वसूनां रुद्रियाणां देवो देवानां न मिनामि धाम।
ते मा भद्राय शवसे ततक्षुरपराजितमस्तृतमषाळ्हं॥११॥
आदित्यानां। वसूनां। रुद्रियाणां। देवः। देवानां। न। मिनामि। धाम।
ते। मा। भद्राय। शवसे। ततक्षुः। अपराऽजितं। अस्तृतं। अषाळ्हं॥११॥

आदित्यानां वसूनां रुद्रियाणां रुद्राणां यद्वा रुद्रपुत्राणां मरुतां च देवानां धाम स्थानं देव इंद्रो न मिनाति। न हिनस्ति। त आदित्यादयो मा मां भद्राय शवसे ततक्षुः। अनुगृह्णंतु। अपराजितमस्तृतमहिंसितमषाळ्हमनभिभूतं॥ ॥६॥

अहं दामित्येकादशर्चं सप्तमं सूक्तं। वैकुंठ एवर्षिर्देवता च। द्वितीयैकादश्यौ त्रिष्टुभौ। शिष्टा जगत्यः। अनुक्रांतं च। अहं दामंत्योपाद्ये चेति॥ द्वितीये रात्रिपर्याये मैत्रावरुणस्येदं सूक्तं। सूचितं च। अहं दां पाता सुतमिंद्रो अस्तु सोमं। आ०६.४.। इति॥

अहं दां गृणते पूर्व्यं वस्वहं ब्रह्म कृणवं मह्यं वर्धनं।
अहं भुवं यजमानस्य चोदितायज्वनः साक्षि विश्वस्मिन्भरे॥१॥
अहं। दां। गृणते। पूर्व्यं। वसु। अहं। ब्रह्म। कृणवं। मह्यं। वर्धनं।
अहं। भुवं। यजमानस्य। चोदिता। अयज्वनः। साक्षि। विश्वस्मिन्। भरे॥१॥

अहमिंद्रो गृणते स्तुवते पूर्व्यं मुख्यं वसु धनं दां। अदां। अहमेव ब्रह्म परिवृढं कर्म स्तुतिलक्षणं मह्यं वर्धनं क्षणवं। करोमि। स्तोतुः संबंधि स्तोत्रं तथा धनं प्रयच्छन् मह्यमेव वर्धनं करोमीत्यर्थः। तथाहं यजमानस्य मामुद्दिश्य यष्टुर्धनस्य चोदिता प्रेरको भुवं। भवामि। अयज्वनोऽयष्टुः। अयष्टारमित्यर्थः। तं विश्वस्मिन्भरे सर्वस्मिन्नपि संग्रामे साक्षि। अभिभवामि॥

मां धुरिंद्रं नाम देवता दिवश्च ग्मश्चापां च जंतवः।
अहं हरी वृषणा विव्रता रघू अहं वज्रं शवसे धृष्णवा ददे॥२॥

मां । धुः । इंद्रं । नामं । देवता । दिवः । च । ग्मः । च । अपां । च । जंतवः ।
अहं । हरी इति । वृषणा । विऽव्रता । रघू इति । अहं । वज्रं । शवसे । धृष्णु । आ । ददे ॥२॥

इंद्रं नामेंद्रनामानं मां देवता देवानां मध्ये दिवो द्युलोकस्य । ग्मा पृथिव्यापोऽंतरिक्षं । एतेषु लोकेषु जंतवो जाता मा मामेव धुः । दधुः । धारयंति हविर्भिः स्तुतिभिश्च । अहं यज्ञगमनाय संग्रामगमनाय वा हरी हरितवर्णौ वृषणा पुंस्त्वोपेतौ विव्रता विविधकर्माणौ रघू लघू शीघ्रगती अश्वौ नियोजयामि रथे । तथाहं धृष्णु धर्षकं वज्रमायुधं शवसे बलाय ददे । स्वीकरोमि ॥

अहमत्कं कवयें शिश्नथं हथैरहं कुत्समावमाभिरूतिभिः ।
अहं शुष्णस्य श्नथिता वधर्यमं न यो ररे आर्यं नाम दस्यवे ॥३॥
अहं । अत्कं । कवयें । शिश्नथं । हथैः । अहं । कुत्सं । आवं । आभिः । ऊतिऽभिः ।
अहं । शुष्णस्य । श्नथिता । वधः । यमं । न । यः । ररे । आर्यं । नाम । दस्यवे ॥३॥

अहमिंद्रोऽत्कमाच्छादकं शत्रुपुत्रं कवय उशनस ऋषये तस्य सुखार्थं हथैर्वज्रप्रकारैः प्रहरिस्तत्साधनैरायुधैर्वा शिश्नथं । ताडितवानस्मि । श्नथतिर्वधकर्मा । किंचाहं कुत्समेतन्नामकमृषिमाभिरूतिभिर्धादिरूपैः । कुत्साय शुष्णमशुषं नि बर्हीः । ऋ० ४. १६. १२. । इत्यादि मंत्रांतरं । रक्षणीरावं । अरक्षं । पूर्वमेव कृतान्यपि रक्षणानीदानीमिव कृतानीत्यनुवदति । कुत्सार्थं शुष्णस्वेतन्नामकस्यासुरस्य श्नथिता हिंसिता । तस्य हननायेत्यर्थः । वधर्वज्रं यमं । प्रहरणाय नियमितवानस्मि । अपि चाहमार्यमार्यसंबंधि । आर्याणां देयमित्यर्थः । तादृग्नं नाम । उदकनामैतत् । नामकमुदकं दस्यवे शत्रव उपक्षपयित्रे न ररे । न दत्तवानस्मि । यद्वा । आर्यं पूज्यमित्यसाधारणं नाम दस्यवे न दत्तवानस्मि । अथेंद्रस्यात्मस्तुतौ कुत्सरक्षणशुष्णवधादिकं आवः कुत्समिंद्र यस्मिञ्चाकन् । ऋ० १. ३३. १४. । शुष्णं पिप्रुं कुयवं वृचमिंद्र । ऋ० १. १०३. ८. । इत्यादिषु बहुधा प्रपंचितं । अतोऽत्र ग्रंथविस्तरभयान्न लिख्यते ॥

अहं पितेव वेतसूँरभिष्टये तुग्रं कुत्साय स्मदिभं च रंधयं ।
अहं भुवं यजमानस्य राजनि प्र यद्भरे तुजये न प्रियाधृषे ॥४॥
अहं । पिताऽइव । वेतसून् । अभिष्टये । तुग्रं । कुत्साय । स्मत्ऽइभं । च । रंधयं ।
अहं । भुवं । यजमानस्य । राजनि । प्र । यत् । भरे । तुजये । न । प्रिया । आऽधृषे ॥४॥

अहमिंद्रः पितेव पिता पुत्रायेव स यथा तस्मै निर्वाहार्थमभिमतं प्रदेशं प्रसाधयति तद्वेतसूनेतन्नामकाञ्जनपदानभिष्टयेऽभीच्छते कुत्साय महर्षये तुग्रं स्मदिभं च रंधयं । वशमनयं । अहं यजमानस्य राजनि राजनार्थं भुवं । अभवं । समर्थ इति शेषः । यद्यस्मात्तुजये न पुत्रायेव पिता तस्मै यजमानायाधृषे शत्रूणां धर्षणाय प्रिया प्रियाणि प्र भरे प्रभरामि तस्माद्यजमानस्य राजनि भुवमिति संबंधः ॥

अहं रंधयं मृगयं श्रुतर्वणे यन्माजिहीत वयुना चनानुषक् ।
अहं वेशं नम्रमायवेऽकरमहं सव्याय पड्गृभिमरंधयं ॥५॥
अहं । रंधयं । मृगयं । श्रुतर्वणे । यत् । मा । अजिहीत । वयुना । चन । आनुषक् ।
अहं । वेशं । नम्रं । आयवे । अकरं । अहं । सव्याय । पट्ऽगृभिं । अरंधयं ॥५॥

अहमिंद्रो मृगयमेतन्नामकमसुरं श्रुतर्वण एतन्नामकाय महर्षये रंधयं । रध्यतिर्वशगमने । वशमनयं । यद्यस्माच्छ्रुतर्वा मा मामजिहीत ॥ ओहाङ् गतौ ॥ आगच्छत् । तदेवोच्यते । वयुना प्रज्ञानेन स्रोचिषानुषग-

नुषक्तोऽभूत्। चनेति पूरणः। अहं वेशमेतन्नामानं नक्षं प्रक्षं करं। अकार्षं ॥ करोतेर्लुङि छमृदृरुहिभ्यश्छंदसीति च्लेरङ्। अडभावश्छांदसः ॥ अहं सव्यायेतन्नामकाय पञ्चभिमेतन्नामकमरंधयं ॥ ॥७॥

अहं स यो नवंवास्त्वं बृहद्रथं सं वृचेव दासं वृचहारुजं।
यद्वर्धयंतं प्रथयंतमानुषग्दूरे पारे रजसो रोचनाकरं ॥६॥
अहं। सः। यः। नवऽवास्त्वं। बृहत्ऽरथं। सं। वृचाऽइव। दासं। वृचऽहा। अरुजं।
यत्। वर्धयंतं। प्रथयंतं। आनुषक्। दूरे। पारे। रजसः। रोचना। अकरं ॥६॥

अहमिंद्रः सोऽस्मि योऽहं नववास्त्वं बृहद्रथं च वृचेव वृक्षमिव दासमुपक्षपयितारमिव नववास्त्वं बृहद्रथं चारुजं। अहं भग्नमकरवं ॥ रुजो भंगे ॥ यद्यदा वर्धयंतं वर्धमानं प्रथयंतं प्रथमानं चोभौ शत्रू आनुषगानुषक्तः सन्रोचना रोचनस्य रजसो लोकस्य दूरे पारेऽकरं कृतवानस्मि ॥

अहं सूर्यस्य परि याम्याशुभिः प्रैतशेभिर्वहमान ओजसा।
यन्मा सावो मनुष आह निर्णिज ऋधक्कृषे दासं कृत्व्यं हथैः ॥७॥
अहं। सूर्यस्य। परि। यामि। आशुऽभिः। प्र। एतशेभिः। वहमानः। ओजसा।
यत्। मा। सावः। मनुषः। आह। निःऽनिजे। ऋधक्। कृषे। दासं। कृत्व्यं। हथैः ॥७॥

अहं सूर्यस्य देवस्याशुभिः शीघ्रगामिभिरेतशेभिरेतशवर्णैरश्वैर्वहमान उह्यमान ओजसात्मीयेन बलेन प्रकर्षेण परि यामि। परिगच्छामि सूर्यात्मना। किंच यद्यदा मा मां मनुषो मनुष्यस्य सावः सोमाभिषव आह ब्रूते। आह्वयतीत्यर्थः। किमर्थमाह। निर्णिजे। निर्णिगिति रूपनाम। यज्ञस्वरूपायेत्यर्थः। तदानीं कृत्व्यं कर्तव्यं। हंतव्यमित्यर्थः। दासमुपक्षपयितारं शत्रुं हथैर्हननसाधनैर्वज्रैर्ऋधक्कृषे। पृथक्करोमि। ऋधगित्यव्ययं पृथगर्थे ॥

अहं संप्रहा नहुषो नहुष्टरः प्राश्रावयं शवसा तुर्वशं यदुं।
अहं न्यन्यं सहसा सहस्करं नव व्राधतो नवतिं च वक्षयं ॥८॥
अहं। सप्रऽहा। नहुषः। नहुःऽतरः। प्र। अश्रवयं। शवसा। तुर्वशं। यदुं।
अहं। नि। अन्यं। सहसा। सहः। करं। नव। व्राधतः। नवतिं। च। वक्षयं ॥८॥

अहं सप्रसंख्याकानां पुरां शत्रूणां वा हंता। सप्र यत्पुरः शर्म शारदीः। ऋ० १.१७४.२.। इत्युक्तं। यद्वा। सप्र नमुच्यादीन् हतवान्। किंच नहुषो बंधकस्यापि नहुष्टरो बंधकतरोऽहं शवसा बलेन तुर्वशं यदुं च प्राश्रावयं। शत्रुसंबंधिगवादिप्रदानेन श्रावितवानस्मि। तौ यथा लोके श्रुतौ भवतः तथाकार्षमित्यर्थः। किंचाहमन्यं चास्मत्स्तोतारं सहसा बलेन सहो बलिनं करं। अकार्षं ॥ करोतेर्लुङि छमृदृरुहीति च्लेरङ्। अडभाव आर्षः ॥ किंच नव नवसंख्याका नवतिं च नवतिसंख्याकाश्च। नवोत्तरनवतिमित्यर्थः। कथंभूताः। व्राधतो वर्धमानाः। वक्षयं। अवहं। क्षयमित्यर्थः ॥

अहं सप्र स्रवतो धारयं वृषा द्रविन्वः पृथिव्यां सीरा अधि।
अहमर्णांसि वि तिरामि सुक्रतुर्युधा विदं मनवे गातुमिष्टये ॥९॥
अहं। सप्र। स्रवतः। धारयं। वृषा। द्रविन्वः। पृथिव्यां। सीराः। अधि।
अहं। अर्णांसि। वि। तिरामि। सुऽक्रतुः। युधा। विदं। मनवे। गातुं। इष्टये ॥९॥

वृषा वर्षकोऽहं सप्त स्रवतः स्रवंतीर्नदीर्धारयं । अधारयं । कीदृशस्ताः । द्रवित्न्वो द्रवंतीः ॥ वा छंदसीति पूर्वसवर्णदीर्घाभावः ॥ सीराः सरणशीलाः । कुच । पृथिव्यां । सुक्रतुः शोभनकर्माहमर्णांस्युदकानि वि तिरामि । प्रयच्छामि । किंच मनवे मनुष्यायेष्टये तस्य गमनाय गातुं मार्गं युधा संप्रहरिण । निरोधपरिहरिणेत्यर्थः । विदं । अलभं । प्रायच्छमित्यर्थः ॥ विदेर्लाभार्थस्य पुषादित्वात् । पा० ३. १. ५५. । ङिरङ् ॥

अहं तदासु धारयं यदासु न देवश्चन त्वष्टाधारयदुर्शत् ।
स्याहं गवामूधःसु वक्षणास्वा मधोर्मधु श्वाच्यं सोममाशिरं ॥१०॥
अहं । तत् । आसु । धारयं । यत् । आसु । न । देवः । चन । त्वष्टा । अधारयत् । रुशत् ।
स्याहं । गवां । ऊधःऽसु । वक्षणासु । आ । मधोः । मधु । श्वाच्यं । सोमं । आऽशिरं ॥१०॥

अहं तत्प्रसिद्धं पय आसु गोषु धारयं । धृतवानस्मि ॥ धृञ् धारणे । यंतस्य लङि रूपं ॥ यत्पय आसु गोषु देवश्चन त्वष्टा देवशिल्पी सूर्यो वा देवो न चनाधारयत् धर्तुं नाशक्नोत् । कीदृक् पयोऽधारयमिति चेत् उच्यते । रुशद्दीप्तं स्याहं सुहणीयं । केषु प्रदेशेष्विति उच्यते । गवामूधःसु उद्ततरेषु गवां पयोधारणप्रदेशेषु । किंच मधूदकं वक्षणासु । नदीनामैतत् । वहनशीलासु नदीषु धारयामीत्यनुषज्यते । नधुदकधारणस्यावधिरुच्यते । आ मधोरोदकोत्पत्तेः । आगामिवर्षसमयपर्यंतमित्यर्थः । कीदृशं मध्विति तदुच्यते । श्वाच्यं । श्वाचमिति क्षिप्रनाम । क्षिप्रगमनार्हं । यद्वा । श्वाच्यमित्युत्तरत्र संबध्यते । श्वाच्यं सुखावहं सोमं प्रत्याशिरं धारयं ॥

एवा देवाँ इंद्रो विश्वे नॄन् प्र च्यौत्नेन मघवा सत्यराधाः ।
विश्वेत्ता ते हरिवः शचीवोऽभि तुरासः स्वयशो गृणंति ॥११॥
एव । देवान् । इंद्रः । विश्वे । नॄन् । प्र । च्यौत्नेन । मघऽवा । सत्यऽराधाः ।
विश्वा । इत् । ता । ते । हरिऽवः । शचीऽवः । अभि । तुरासः । स्वऽयशः । गृणंति ॥११॥

अथानयेंद्र इंद्रभावं परित्यज्य ऋषिभावेनाह । एवैवमुक्तप्रकारेण देवान्नॄंश्चेंद्रो देवः प्र विश्वे । प्रकर्षेण गमयति । तस्मात्पराचीः प्रजाः प्र वीयंते प्रतीचीर्जायंते । तै० सं० ६. ३. १. ४. । इति ब्राह्मणं । किमन्यसहायेन नेत्याह । च्यौत्नेन स्वीयेन बलेन । कीदृश इंद्रः । मघवा धनवान् सत्यराधाः सत्यधनः । अथ प्रत्यक्षेणाह । हे हरिवो हरिभ्यां तद्वन्श्चचीवः कर्मवन् हे स्वयशः स्वायत्तकीर्तेऽन्नवन्निंद्र ता तानि विश्वा सर्वाणि कर्माणि ते तव संबंधीनि येषु कर्मसु तुरासस्त्वरमाणा ऋत्विजोऽभि गृणंति अभिष्टुवंति ॥ ॥ ८ ॥

प्र वो महे इत्यष्टर्चमष्टमं सूक्तं । आदितो द्वे जगत्यौ । के ते नर इत्यादिके द्वे अभिसारिण्यौ । आदितो द्वौ दशाक्षरौ ततो द्वौ द्वादशकौ साभिसारिणी । तदुक्तं । वैराजौ जागतौ चाभिसारिणी । अनु० ९. ४. । इति । ततस्त्रिष्टुबेका । ततो द्वे जगत्यौ । पूर्ववदृषिदेवते । तथा चानुक्रांतं । प्र वो महे सप्त द्विजगत्यावंतं के तेऽभिसारिण्याविति ॥ महाव्रते निष्केवल्य एतत्सूक्तं निविद्धानं । सूचितं च । प्र वो महे मंदमानायांधस इति निविद्धानं । ऐ० आ० ५. ३. १. । इति ॥

प्र वो महे मंदमानायांधसोऽर्चा विश्वानराय विश्वाभुवे ।
इंद्रस्य यस्य सुमखं सहो महि श्रवो नृम्णं च रोदसी सपर्यतः ॥१॥
प्र । वः । महे । मंदमानाय । अंधसः । अर्चा । विश्वानराय । विश्वऽभुवे ।
इंद्रस्य । यस्य । सुऽमखं । सहः । महि । श्रवः । नृम्णं । च । रोदसी इति । सपर्यतः ॥१॥

हे स्तोतः वस्त्वं ॥ पूजार्थे चतुर्थीवचनं ॥ महे महतेऽंधसः । अंधसेत्यर्थः । सोमेन मंदमानाय मोदमानाय

विश्वानराय सर्वस्य नेत्रे ॥ नरे संज्ञायामिति दीर्घः ॥ विश्वासुवे सर्वस्य भावयित्रे मह्यमिंद्राय प्रार्च । अर्चतिः स्तुतिकर्मा । प्रोच्चारय । यस्य ममेंद्रस्य सुमखं सुष्ठु मंहनीयं सहो बलं महि महच्छ्रवोऽन्नं नृम्णं सुखं च रोदसी द्यावापृथिव्यौ सपर्यतः पूजयतः । तस्मा इंद्रायार्चेति समन्वयः ॥

सो चिन्नु सख्या नर्यो नृनः स्तुतश्चर्कृत्य इंद्रो मावते नरे ।
विश्वासु धूर्षु वाजकृत्येषु सत्पते वृत्रे वाप्स्व१भि शूर मंदसे ॥२॥
सः । चित् । नु । सख्या । नर्यः । नृनः । स्तुतः । चर्कृत्यः । इंद्रः । माऽवते । नरे ।
विश्वासु । धूःऽसु । वाजऽकृत्येषु । सत्ऽपते । वृत्रे । वा । अप्ऽसु । अभि । शूर । मंदसे ॥२॥

सो चिन्नु स खल्विंद्रः सख्या सखिभूतेन निमित्तेन नर्यो नृभ्यो हित नृनः सर्वस्येश्वरः स्तुतः सर्वैरभिष्टुतः । सख्या स्तुत इति वान्वयः । मावते मत्सदृशाय नरे नराय चर्कृत्यः । पुनःपुनः कर्तव्यः । परिचरणीय इत्यर्थः । अथ प्रत्यक्षवादः । हे सत्पते सतां पालकेंद्र स त्वं विश्वासु सर्वासु धूर्षु वोढव्येषु कार्यभारेषु वाजकृत्येषु च बलकृत्येषु च वृत्रे वाप्सु मेघे वर्तमानेषूदकेषु च निमित्तेषु हे शूर त्वमभि मंदसे । अभिष्टूयसे ॥

के ते नरं इंद्र ये तं इषे ये ते सुम्नं सधन्य१मियक्षान् ।
के ते वाजायासुर्याय हिन्विरे के अप्सु स्वासूर्वरासु पौंस्ये ॥३॥
के । ते । नरः । इंद्र । ये । ते । इषे । ये । ते । सुम्नं । सऽधन्यं । इयक्षान् ।
के । ते । वाजाय । असुर्याय । हिन्विरे । के । अप्ऽसु । स्वासु । उर्वरासु । पौंस्ये ॥३॥

हे इंद्र ते के नरः के मनुष्या इति प्रश्नः । ते महांतो मया ज्ञातव्या इत्यभिप्रायः । प्रष्टव्यानाह । ये नरास्ते तवेषेऽन्नाय प्रभवंतीति शेषः । ये च ते सुम्नं सुखं त्वदीयं सधन्यं धनयुक्तमियक्षान् गच्छंति । इयक्षतिर्गतिकर्मा । त्वदीयमन्नं सुखं धनं च ये लभंते ते के महात्मान इति । किंच के ते तवासुर्यायासुरसंबंधिने तेषां वधनिमित्ताय वाजाय बलाय हिन्विरे । प्रेरयंति सोमादि हविः । के वाप्सु स्वासु स्वापेक्षितेषूदकेषूर्वरासु सर्वसस्याढ्यासु भूमिषु पौंस्ये पुंस्त्वे चेति तेषु निमित्तभूतेषु हविः प्रेरयंतीत्यनुवर्तते । उक्तविधा महांतो दुर्लभा इति भावः ॥

भुवस्त्वमिंद्रेति दर्शपूर्णमासयोर्महेंद्रस्य हविषो याज्या । सूचितं च । महाँ इंद्रो य ओजसा भुवस्त्वमिंद्र ब्रह्मणा महान् । आ० १. ६. । इति ॥ देवसुवां हविःष्विंद्रस्य ज्येष्ठस्यैषैव याज्या । भुवस्त्वमिंद्र ब्रह्मणा महानसीवास इळया । आ० ४. ११. । इति हि सूचितं ॥ एषैव भूनाम्येकाहे निष्केवल्ये सूक्तमुखीया । सूचितं च । शस्त्रसूक्तं बृहस्पतिसवेन त्वं भुवः प्रतिमानं पृथिव्या भुवस्त्वमिंद्र ब्रह्मणा महान् । आ० ९. ५. । इति ॥

भुवस्त्वमिंद्र ब्रह्मणा महान्भुवो विश्वेषु सवनेषु यज्ञियः ।
भुवो नॄँश्यौत्नो विश्वस्मिन्भरे ज्येष्ठश्च मंचो विश्वचर्षणे ॥४॥
भुवः । त्वं । इंद्र । ब्रह्मणा । महान् । भुवः । विश्वेषु । सवनेषु । यज्ञियः ।
भुवः । नॄन् । श्यौत्नः । विश्वस्मिन् । भरे । ज्येष्ठः । च । मंचः । विश्वऽचर्षणे ॥४॥

हे इंद्र त्वं ब्रह्मणाऽत्मकृतेन परिवृढेन स्तोत्रेण महान्भुवः । अभवः ॥ भवतेर्लेटि भूसुवोस्तिङीति गुणप्रतिषेध उवङादेशः ॥ तथा विश्वेषु सर्वेषु सवनेषु यज्ञियो यष्टव्यो भुवः । अभवः । तथा विश्वस्मिन्भरे संग्रामे नृन्नेतॄणां शत्रूणां श्यौत्नश्यावयितोभवः । हे विश्वचर्षणे सर्वस्य द्रष्टरिंद्र मंचो मंचयितव्यस्त्वं ज्येष्ठश्चाभवः सर्वेषां मध्ये ॥

अवा नु कं ज्यायान् यज्ञवनसो महीं त ओमांचां कृष्टयो विदुः ।
असो नु कमजरो वर्धीश्च विश्वेदेता सवना तूतुमा कृषे ॥५॥
अव । नु । कं । ज्यायान् । यज्ञऽवनसः । महीं । ते । ओमांचां । कृष्टयः । विदुः ।
असः । नु । कं । अजरः । वर्धीः । च । विश्वा । इत् । एता । सवना । तूतुमा । कृषे ॥५॥

हे इंद्र त्वं ज्यायान् प्रशस्यतरस्त्वं यज्ञवनसः संभक्तयज्ञान् स्तोतॄन् नु कं क्षिप्रमव । रक्ष ॥ अधेतारो नु कमिति पदद्वयं कुर्वंति तथापि हिकं नुकमित्यादीनि नवोत्तराणि पदानीत्युक्तवान्यास्काचार्यः । नै० ३. १२. । अतः केवलानां हिकं नुकमित्येवमादीनां यावानर्थः स एव विशिष्टानामपि । तैत्तिरीया अप्येकमेव पदं कुर्वंति ॥ अवेत्युक्तं । इंद्रस्यावनप्रसिद्धिं दर्शयति । हे इंद्र ते तवौमांचां रक्षणं महीं महद्विदुः कृष्टयो मनुष्या ऋषयः ॥ ओमांचां । अम गत्यादिषु । औणादिक आचन्प्रत्ययः । छांदस उमादेशः ॥ किंच त्वमजरो जरारहितोऽसः । भव । नु कं क्षिप्रं वर्धीश्च । वर्धस्व च हविराज्यादिना । किंच विश्वेत् सर्वाण्येतानि सवना सवनानि तूतुमा तूर्णानि कृषे । करोषि ॥ कृषे । छांदसे लिटि च्छंदसि वेति द्विर्वचनाभावः ॥

एता विश्वा सवना तूतुमा कृषे स्वयं सूनो सहसो यानि दधिषे ।
वराय ते पात्रं धर्मणे तना यज्ञो मंचो ब्रह्मोद्यतं वचः ॥६॥
एता । विश्वा । सवना । तूतुमा । कृषे । स्वयं । सूनो इति । सहसः । यानि । दधिषे ।
वराय । ते । पात्रं । धर्मणे । तना । यज्ञः । मंचः । ब्रह्म । उत्ऽयतं । वचः ॥६॥

हे इंद्र एतैतानि विश्वा सवना सर्वाणि सवनानि तूतुमा तूर्णानि कृषे । करोषि । एतानीत्युक्तं कानीति तत्राह । हे सहसो बलस्य सूनो पुत्र । बलवन्नित्यर्थः । स्वयं यानि दधिषे धारयसि । हे इंद्र ते तव वराय शत्रूणां वारकाय ते तव स्वभूतं पात्रं रक्षणं भवत्वस्माकं । किंच धर्मणे धारणाय तना धनं भवत्विति शेषः । किंच तुभ्यं यज्ञो मंत्रः । इज्यतेऽनेनेति यज्ञकरणसाधनभूतो मंत्रः । यजुरित्यर्थः । ब्रह्म परिवृढं । शस्त्रमित्यर्थः । तदुभयात्मकं वच उद्यतं भवतीति शेषः ॥

ये ते विप्र ब्रह्मकृतः सुते सचा वसूनां च वसुनश्च दावने ।
प्र ते सुम्नस्य मनसा पथा भुवन्मदे सुतस्य सोम्यस्यांधसः ॥७॥
ये । ते । विप्र । ब्रह्मऽकृतः । सुते । सचा । वसूनां । च । वसुनः । च । दावने ।
प्र । ते । सुम्नस्य । मनसा । पथा । भुवन् । मदे । सुतस्य । सोम्यस्य । अंधसः ॥७॥

हे विप्र मेधाविन्निंद्र ते तुभ्यं ये ब्रह्मकृतः स्तोत्रकृतो हविष्कर्तारो वा स्तोतारः सचा संघीभूताः सुते सोमेऽभिषुते वसूनां बहूनां धनानां वसुनश्चैकस्य निवासयोग्यस्य धनस्य च दावने दानाय परिचरंतीति शेषः । अत्र वसूनामिति बहुवचनेनैहिकभोगसाधनानि धनान्यभिप्रेतानि । एकवचनांतेन च निवासयोग्यं स्वर्गाख्यं धनमभिप्रेतमित्यवगंतव्यं । तेऽनुष्ठातारः सुम्नस्य सुखस्य लाभाय मनसा पथा मनोमार्गेण । स्तोत्रवर्त्मनेत्यर्थः । प्र भुवन् । प्रभवंतु । उक्तवसुदानाय योग्या भवंत्वित्यर्थः । कदेति उच्यते । सुतस्याभिषुतस्य सोम्यस्य सोमसंबंधिनोऽधसोऽन्नस्य मदे सति ॥ ॥९॥

महत्तदिति नवर्चं नवमं सूक्तं । वज्रभूतेन षष्ठ्क्षरेण देवानां हविर्वहनेन च हृतेषु भ्रातृषु कनिष्ठः सौचीको नामाग्निर्वषट्कारहविर्वहनाभ्यां भीतो देवेभ्यो निर्गत्यापः प्राविशत् । स च मत्स्यैः प्रदर्शितः सन्नन्वेषुमागतैर्देवैः सहेदमादिसूक्तवचेन संवादं कृतवान् । अस्य सूक्तस्य द्वितीयादियुजस्यतसो विश्वे देवाः शास्त्रमिति षड्ऋचमुत्तरसूक्तं चेति दशर्चोऽग्निवाक्यं । अयुजः प्रथमाद्याः पंचर्चो यमैच्छाम मनसेत्येकादशर्चमुत्तरसूक्तं च

देवानां वाक्यं। तच्च तदेव वाचः प्रथमं मसीयेति द्वयस्त्वमेवाक्यं। अतोऽग्निवाक्येषु देवा देवताग्निर्ऋषिः। देवोक्तिष्वग्निर्दैवता देवा ऋषयः। अनादेशपरिभाषयेदमुत्तरं च द्वे त्रैष्टुभे विशेषानभिधानात्। तथा चानुक्रांतं। षषष्ठ्यारेण वृक्तेषु भ्रातृषु सौचीकोऽग्निरपः प्रविश्य देवैः समवदद्भुक्तरैस्त्रिभिर्मंहत्तन्नव तच्च युजोऽग्निवाक्यं विश्व इत्युत्तरं षड्भमयुजो देवानां यमैच्छामेत्युत्तरं चैकादशकं तदवेति तु द्वयोऽग्नेरिति॥ गतो विनियोगः॥ सूक्तत्रयोक्तार्थे तैत्तिरीयब्राह्मणं। अग्नेस्त्रयो ज्यायांसो भ्रातर आसन् ते देवेभ्यो हव्यं वहंतः ग्रामीयंत सोऽग्निरबिभेदित्यं वाव स्व आर्तिमारिष्यतीति स निलायत सोऽपः प्राविशत्तं देवताः प्रेषमैच्छन्नित्यादि। तै० सं० २. ६. ६.॥ तत्रायया देवा अग्निमाहुः॥

महत्तदुल्बं स्थविरं तदासीद्येनाविष्टितः प्रविवेशिथापः।
विश्वा अपश्यद्बहुधा ते अग्ने जातवेदस्तन्वो देव एकः॥१॥

महत्। तत्। उल्बं। स्थविरं। तत्। आसीत्। येन। आऽविष्टितः। प्रऽविवेशिथ। अपः। विश्वाः। अपश्यत्। बहुधा। ते। अग्ने। जातऽवेदः। तन्वः। देवः। एकः॥१॥

तदुल्बं वक्ष्यमाणं प्रावरणं महत् स्थविरमत्यंतं स्थूलं च तदासीत् येनोल्बेनाविष्टित आवेष्टितः सन् हे अग्ने प्रविवेशिथापः उदकानि प्रविष्टवानसि। हे अग्ने जातवेदो जातप्रज्ञान विश्वाः सर्वास्तन्वस्तनूः सर्वाण्यंगानि बहुधा बहुप्रकारमेको देवोऽपश्यत्। दृष्टवान्॥

को मा ददर्श कतमः स देवो यो मे तन्वो बहुधा पर्यपश्यत्।
क्वाहं मित्रावरुणा क्षियंत्यग्नेर्विश्वाः समिधो देवयानीः॥२॥

कः। मा। ददर्श। कतमः। सः। देवः। यः। मे। तन्वः। बहुधा। परिऽअपश्यत्। क्व। अहं। मित्रावरुणा। क्षियंति। अग्नेः। विश्वाः। सम्ऽइधः। देवऽयानीः॥२॥

इदमग्नेर्वाक्यं। एको देवोऽपश्यदित्युक्तं पृच्छति। को मा मां ददर्श। दृष्टवान्। स देवः कतमः यो मे मम तन्वस्तनूर्बहुधा बहुप्रकारं स्थिताः पर्यपश्यत् परिदृष्टवान्। हे मित्रावरुणा मित्रावरुणौ अग्नेर्मम विश्वाः सर्वाः समिधो दीप्ता देवयानीर्देवयानसाधनभूतास्तन्वो दृष्टा इत्युक्तं यदि दृष्टाश्चेत्तर्हि क्व क्षियंति क्व निवसंतीत्येवं देवानां पुरतो वर्तमानौ मित्रावरुणावाहाग्निः॥

ऐच्छाम त्वा बहुधा जातवेदः प्रविष्टमग्ने अप्स्वोषधीषु।
तं त्वा यमो अचिकेच्चित्रभानो दशांतरुष्यादतिरोचमानं॥३॥

ऐच्छाम। त्वा। बहुधा। जातऽवेदः। प्रऽविष्टं। अग्ने। अप्ऽसु। ओषधीषु।
तं। त्वा। यमः। अचिकेत्। चित्रभानो इति चित्रऽभानो। दशऽअंतरुष्यात्। अतिऽरोचमानं॥३॥

एवमग्निना पृष्टा देवा अग्निं ब्रुवंति। हे जातवेदो जातप्रज्ञाग्ने त्वा त्वामन्वैच्छाम। कीदृशं त्वां। अप्सूदकेष्वोषधीषु च बहुधा प्रविष्टं। अन्विष्य च तं तादृशं प्रविष्टं त्वा त्वां यमो देवोऽचिकेत् ज्ञातवान् हे चित्रभानो चायनीयरश्मे। कुत्र स्थितं ज्ञातवानिति तदुच्यते। दशांतरुष्यात्। अंतरुष्यं गूढमावासस्थानं तस्य स्थानं दशसंख्योपेतं। तादृशं स्थानमतिरोचमानमतीत्य प्रकाशमानं। अग्नेर्हि गूढानि दश स्थानानि भवंति पृथिव्यादयस्त्रयो लोका अग्निवाय्वादित्यास्त्रयो देवा आप ओषधयो वनस्पतयः प्राणिशरीरमिति दश स्थानानि॥

होचादहं वरुण बिभ्यदायं नेदेव मा युनजन्नर्च देवाः ।
तस्य मे तन्वो बहुधा निविष्टा एतमर्थं न चिकेताहमग्निः ॥४॥
होचात् । अहं । वरुण । बिभ्यत् । आयं । न । इत् । एव । मा । युनजन् । अर्च । देवाः ।
तस्य । मे । तन्वः । बहुधा । निऽविष्टाः । एतं । अर्थं । न । चिकेत । अहं । अग्निः ॥४॥

अनया देवगणा मां ज्ञातवंत इति निश्चित्य गूहनस्य प्रयोजनमाह । हे वरुण देव अहं होचाद्द्योतयात् । हविर्वहनादित्यर्थः । तस्माद्बिभ्यदायं । आगतवानस्मि । अतो मा मामेवंवं पूर्वप्रकारेणाचार्यिम्हविर्वहनप्रयोजने नेयुनजन् मैव योजयंत देवाः । तस्य तादृशस्य बिभ्यतो मे तन्वो बहुधा निविष्टा अप्सु । एतमर्थमेतद्धविर्वहनकार्यमग्निरहं न चिकेत । न बुध्ये । नांगीकरोमि ॥

एहि मनुर्देवयुर्यज्ञकामोऽरंकृत्या तमसि क्षेष्यग्ने ।
सुगान्पथः कृणुहि देवयानान्वहा हव्यानि सुमनस्यमानः ॥५॥
आ । इहि । मनुः । देवऽयुः । यज्ञऽकामः । अरंऽकृत्य । तमसि । क्षेषि । अग्ने ।
सुऽगान् । पथः । कृणुहि । देवऽयानान् । वह । हव्यानि । सुऽमनस्यमानः ॥५॥

अग्निनैवमुक्ता देवाः पुनरग्निमाद्रियंति । हे अग्ने एहि । आगच्छ । मनुर्मनुष्यो यष्टा मननीयो मनू राजा वा देवयुर्देवान्यष्टुमिच्छन् यज्ञकामश्च भवति । अत एहि । किं कुर्वन् यज्ञकामो भवतीति चेत् उच्यते । अरंकृत्य केवलं तेजःपुंजमेवालंकुर्वन् । यद्वेदमुत्तरत्र संबध्यते । त्वमलंकृत्यात्मानमलंकुर्वन् तमस्यन्धीभूतमप्रकाशेऽधकारे क्षेषि । निवससि । हे अग्ने आगत्य च देवयानान् देवान्प्रति यैर्मनुष्या गच्छंति तान्पथो मार्गान् सुगान्कृणुहि । कृत् ॥ क्षवि हिंसाकरणयोश्च । धिन्विकृण्व्योरच्येत्युप्रत्ययः ॥ संमत्या नो यज्ञनिष्पत्तेर्देवयानाः सुपथा भवंति । वह हव्यान्यस्मदीयानि सुमनस्यमानः सौमनस्यमाचरंस्त्वं ॥ ॥१०॥

अग्नेः पूर्वे भ्रातरो अर्थमेतं रथीवाध्वानमन्वावरीवुः ।
तस्माद्भिया वरुण दूरमायं गौरो न क्षेप्नोरविजे ज्यायाः ॥६॥
अग्नेः । पूर्वे । भ्रातरः । अर्थं । एतं । रथीऽइव । अध्वानं । अनु । आ । अवरीवुरिति ।
तस्मात् । भिया । वरुण । दूरं । आयं । गौरः । न । क्षेप्नोः । अविजे । ज्यायाः ॥६॥

अनयाग्निः स्वपलायननिमित्तमाह । हे देवाः अग्नेर्मम पूर्वे पूर्वमुत्पन्ना भ्रातरो भूपतिर्भुवनपतिर्भूतानां पतिरिति त्रयोऽयजा एतमर्थं हविर्वहनाख्यमर्थमन्वावरीवुः । अनुक्रमेण वृतवंतः ॥ तत्र वृणोतेर्यङ्लुगंताद्धुडि ह्येरूङ्छांदसो लुक् । बहुलं छंदसीत्युत्वं ॥ आवरीवृष्टांतः । रथीवाध्वानं अध्वानं यथा रथी वृणुते तद्वत् । ते भ्रातरस्त्रयो कुर्वंतो हताः । तस्मान्मरणाद्भिया भीत्या हे वरुण दूरं देशमायं । किंच क्षेप्नोरिषुक्षिप्तुर्धनुषो ज्यायाः सकाशाद्गौरो न मृग इव स यथा बिभेति चलति वा तद्वदविजे । अकंपे ॥ ओविजी भयचलनयोः । अनुदात्तेत्तौदादिकः । तस्य लङ्युत्तमे रूपं ॥

कुर्मस्त आयुरजरं यदग्ने यथा युक्तो जातवेदो न रिष्याः ।
अथा वहासि सुमनस्यमानो भागं देवेभ्यो हविषः सुजात ॥७॥
कुर्मः । ते । आयुः । अजरं । यत् । अग्ने । यथा । युक्तः । जातऽवेदः । न । रिष्याः ।
अथ । वहासि । सुऽमनस्यमानः । भागं । देवेभ्यः । हविषः । सुऽजात ॥७॥

इदं देवानां वाक्यं। हे अग्ने यदायुरायुष्मत्तरं जरारहितमस्ति तत्ते कुर्मः। तथा तेनायुषा युक्तस्त्वं हे जातवेदो जातप्रज्ञ यथा न रिष्याः न म्रियसे तथा कुर्मः। अथ वहासि वह सुमनस्यमानः सौमनस्यं कुर्वन् वोढव्यं वहन्। तदेव दर्शयति। हविषो यजमानप्रत्तस्य भागं। केभ्यः। देवेभ्यः। हे सुजात शोभनजन्मन्नग्ने ॥

प्रयाजान्मे अनुयाजांश्च केवलानूर्जस्वंतं हविषो दत्त भागं।
घृतं चापां पुरुषं चौषधीनामग्नेश्च दीर्घमायुरस्तु देवाः ॥८॥
प्रऽयाजान्। मे। अनुऽयाजान्। च। केवलान्। ऊर्जस्वंतं। हविषः। दत्त। भागं।
घृतं। च। अपां। पुरुषं। च। ओषधीनां। अग्नेः। च। दीर्घं। आयुः। अस्तु। देवाः ॥८॥

अनेनाग्निर्हविर्वहने दातव्यान्युक्ता दत्तेति प्रतिजानाति। हे देवाः मे मह्यं प्रयाजान् प्रधानस्य प्रमुखे यष्टव्यानेतन्नामकान् हविर्भागान् तथानुयाजानपि प्रधानात्पश्चाद्यष्टव्यानेतन्नामकान् केवलानसाधारणान्दत्त। प्रयच्छत। तथोर्जस्वंतं प्रत्यभिधारणात्सारवंतं हविषः सर्वस्यापि चरुपुरोडाशादेर्भागं स्विष्टकृदाख्यं भागं दत्त। अथवोर्जस्वंतं हविषो भागं प्रयाजानुयाजाख्यं दत्तेति योज्यं। किंचापां सारभूतं ताभ्य उत्पन्नं वा घृतमाज्यभागादिसाधनमोषधीनामोषधीभ्य उत्पन्नं पुरुषं च भागं दत्त। किंचाग्नेर्मम दीर्घमायुश्चास्तु। वषट्कारकृतवधभयं मा भूदित्यर्थः। असुमितिहासं प्रस्तुत्य कौषीतकिब्राह्मणं। तस्मादाकरात्रेयाः प्रयाजा आग्नेया अनुयाजा आग्नेयमाज्यमाग्नेयः पुरोडाश इति। शरीरदाया ह वा अग्नयो भवंतीति च ब्राह्मणं पुरुषाकृतिर्यस्य प्रियतमेति च ॥

तवं प्रयाजा अनुयाजाश्च केवल ऊर्जस्वंतो हविषः संतु भागाः।
तवाग्ने यज्ञोऽयमस्तु सर्वस्तुभ्यं नमंतां प्रदिशश्चतस्रः ॥९॥
तवं। प्रऽयाजाः। अनुऽयाजाः। च। केवले। ऊर्जस्वंतः। हविषः। संतु। भागाः।
तवं। अग्ने। यज्ञः। अयं। अस्तु। सर्वः। तुभ्यं। नमंतां। प्रऽदिशः। चतस्रः ॥९॥

एवमग्निना याच्यमाना देवाः प्रतिब्रुवते। हे अग्ने तव प्रयाजा अनुयाजाश्च केवलेऽसाधारणा ऊर्जस्वंतो बलवंतो हविषो भागाः संतु। हे अग्ने अयं सर्वो यज्ञश्च तवास्तु। तथा प्रदिशः प्रकृष्टा मुख्याश्चतस्रो दिशस्तुभ्यं नमंतां। अत एहि हविर्वहेति शेषः ॥ ॥११॥

विश्वे देवाः शास्तनेति षडृचं दशमं सूक्तं सौचीकस्याग्नेरार्षं वैश्वदेवं ॥ गतः सूक्तविनियोगः ॥ सुगादापनात्पूर्वभाविनि जपे विनियुक्ता। सूचितं च। विश्वे देवाः शास्तन मा यथेहाराधि होता निषदा यजीयान्। आ० १. ४.। इति ॥

विश्वे देवाः शास्तनं मा यथेह होता वृतो मनवै यन्निषद्य।
प्र मे ब्रूत भागधेयं यथा वो येन पथा हव्यमा वो वहानि ॥१॥
विश्वे। देवाः। शास्तन। मा। यथा। इह। होता। वृतः। मनवै। यत्। निऽसद्य।
प्र। मे। ब्रूत। भागऽधेयं। यथा। वः। येन। पथा। हव्यं। आ। वः। वहानि ॥१॥

एतत्सूक्तं कृत्स्नमाग्नेयं। हे विश्वे देवाः यूयं मा मां शास्तन। अनुज्ञां दत्त। यथेह यज्ञे होता देवानामाह्वाता सन् वृतो होतृत्वेन वृतोऽहं मनवै स्तौमि भवतः। यथास्मिन्यज्ञे स्तौमि तथाज्ञापयत। मे मम भागधेयं प्र ब्रूत। यथा वो यूयं भागं कल्पितवंतः तथा तं भागं प्र ब्रूत। येन च पथा वो हव्यमा वहानि वहनं करोमि ॥

अहं होता न्यसीदं यजीयान् विश्वे देवा मरुतो मा जुनंति ।
अहरहरश्विनाध्वर्यवं वां ब्रह्मा समिद्भवति साहुतिर्वा ॥२॥
अहं । होता । नि । असीदं । यजीयान् । विश्वे । देवाः । मरुतः । मा । जुनंति ।
अहःऽअहः । अश्विना । आध्वर्यवं । वां । ब्रह्मा । संऽइत् । भवति । सा । आऽहुतिः । वां ॥२॥

यजीयान् यष्टृतमोऽहं होता सन्न्यसीदं । निषण्णोऽस्मि । निषद्ये तं निषण्णं विश्वे व्याप्ता मरुतो देवा जुनंति । प्रेरयंति हविर्वहनाय । हे अश्विना वां युवयोराध्वर्यवमहरहः प्रतिदिनं कर्तव्यमिति शेषः । आध्वर्यवं भवज्ज्ञामनुज्ञातव्यमित्यर्थः । ब्रह्मा भवति भवतु । कः । समित् समिद्यश्चंद्रमाः । चंद्रमा ब्रह्मा भवतु । किंच सा । स इत्यर्थः । स च समित् समिद्यश्चंद्रमा वां युवयोर्होमार्थं वां युवाभ्यां क्रियमाणायाध्वर्यवकर्मण आकृतिर्भवत्वित्यर्थः । सोमात्मको हि चंद्रमा श्रूयते । एष वै सोमो राजेत्युपक्रम्य तदेवोभयं भवतीति हि च्छंदोगब्राह्मणं । अथवैवं योजना । याकृतिराध्वर्यवमनुष्ठितवद्भ्यां होतव्या सा वां युवयोर्युवाभ्यां भवति । भवतु । आध्वर्यवं वामित्यस्यैव विवरणमेतत् ॥

अयं यो होता किरु स यमस्य कमप्यूहे यत्समंजंति देवाः ।
अहरहर्जायते मासिमास्यथा देवा दधिरे हव्यवाहं ॥३॥
अयं । यः । होता । किः । ऊं इति । सः । यमस्य । कं । अपि । ऊहे । यत् । संऽअंजंति । देवाः ।
अहःऽअहः । जायते । मासिऽमासि । अथ । देवाः । दधिरे । हव्यऽवाहं ॥३॥

योऽयं होता स किः । को भवति । कीदृशो भवति । तस्य को व्यापार इत्यर्थः । तस्योत्तरमुच्यते । यमस्य मृत्योर्भीतः सन्निति शेषः । कमपि ऊतमूहे । वहति । यद्वा । सर्वमृत्विग्जातं नियमयतीति यमो यजमानः । तस्य कमपि ऊतमूहे । वहति देवान्प्रति । यत्समंजंति यद्यविः प्राप्नुवंति देवाः । किंचाग्निरहरहः प्रतिदिनमग्निहोत्रार्थं जायते । प्रादुर्भवति । तथा मासि मासि प्रतिमासं जायते पितृयज्ञार्थं । एतत्कालद्वयमुपलक्षणं पक्षचतुर्मासषण्मासंवत्सरादीनां । अपरे पुनरेवमाहुः । अहरहः सूर्यात्मना जायते मासि मासि चंद्रात्मनेति । अथ तमिममग्निं देवा दधिरे हव्यवाहं हविषां वोढारं । एवमग्निरात्मानं स्वयमेवोक्तवान् ॥

मां देवा दधिरे हव्यवाहमपम्लुक्तं बहु कृच्छ्रा चरंतं ।
अग्निर्विद्वान्यज्ञं नः कल्पयाति पंचयामं त्रिवृतं सप्ततंतुं ॥४॥
मां । देवाः । दधिरे । हव्यऽवाहं । अपऽम्लुक्तं । बहु । कृच्छ्रा । चरंतं ।
अग्निः । विद्वान् । यज्ञं । नः । कल्पयाति । पंचऽयामं । त्रिऽवृतं । सप्तऽततुं ॥४॥

मामग्निं देवा हव्यवाहं हविर्वोढारं दधिरे । कृतवंतः । कीदृशं मां । अपम्लुक्तमपक्रम्यागतं बहु कृच्छ्रा बहूनि कृच्छ्राणि स्थानानि चरंतं गच्छंतं । कया मनीषया दधिर इति उच्यते । अयमग्निर्विद्वान् सर्वं जानन्नो ऽस्माकं यज्ञं कल्पयाति । कीदृशं यज्ञं । पंचयामं पंचविधगमनं । पांक्तो हि यज्ञः । त्रिवृतं सवनत्रयभेदेन त्रिप्रकारं सप्ततंतुं सप्तभिश्छंदोमयैः स्तुतिभिर्विस्तृतं ॥

आ वो यक्ष्यमृतत्वं सुवीर्यं यथा वो देवा वरिवः करांणि ।
आ बाह्वोर्वज्रमिंद्रस्य धेयामथेमा विश्वाः पृतना जयाति ॥५॥

आ। वः। यक्षि। अमृतऽत्वं। सुऽवीरं। यथा। वः। देवाः। वरिवः। करांणि।
आ। बाह्वोः। वज्रं। इंद्रस्य। धेयां। अर्थ। इमाः। विश्वाः। पृतनाः। जयाति ॥५॥

हे देवाः वो युष्माना यक्षि । आयाचे । किं । अमृतत्वमविनाशित्वं सुवीरं सुपुत्रं च । हे देवाः वो युष्माकं वरिवः परिचर्यां हवीरूपं धनं वा यथा कराणि करवाणि तदर्थमित्यर्थः । किंचेंद्रस्य बाह्वोर्वज्रमा धेयां । ग्राहयामीत्यर्थः । अग्नेर्हीतृत्वाभाव इंद्रस्य सोमाद्यभावाद्दुर्बलत्वेन वज्रधारणं नोपपद्यते । अतस्तत्कृत्वा वज्रं ग्राहयामीत्यर्थः । अथैवं सतीमा विश्वाः सर्वाः पृतनाः शत्रुसेना जयाति । जयति । जयतु वा ॥

चीणि शता ची सहस्राण्यग्निं चिंशच्च देवा नव चासपर्यन् ।
औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयंत ॥६॥
चीणि। शता। ची। सहस्राणि। अग्निं। चिंशत्। च। देवाः। नव। च। असपर्यन्।
औक्षन्। घृतैः। अस्तृणन्। बर्हिः। अस्मै। आत्। इत्। होतारं। नि। असादयंत ॥६॥

चीणि शता शतानि चीणि सहस्राणि चिंशच्च नव च एतत्संख्याका देवा अग्निं मामसपर्यन् । पर्यचरन् । परिचर्याप्रकार उच्यते । घृतैः चरश्चिराज्यैरौक्षन् । सिक्तवंतः । अस्मा अग्नये मह्यं च बर्हिरस्तृणन् । आस्तृतवंतः । आदिदास्तरणानंतरं होतारमाह्वातारं न्यसादयंत । नियमेनासादितवंतः ॥ ॥ १२॥

यमैच्छामित्येकादशर्चमेकादशं सूक्तं । देवानां वाक्यत्वाद्देवा ऋषयः । तदुक्तेः तृचस्य सौचीकोऽग्निर्ऋषिः । तंतुं तन्वन्नित्यादया अष्टमीवर्जिता जगत्यः । अष्टमी शिष्टाश्च त्रिष्टुभः । तथा चानुक्रांतं । तंतुमादया जगत्योऽष्टमीवर्जमिति । शिष्टसूक्तं ॥ गतः सूक्तविनियोगः ॥

यमैच्छाम मनसा सो३यमागाद्यज्ञस्य विद्वान्परुषश्चिकित्वान् ।
स नो यक्षद्देवताता यजीयान्नि हि षत्सदंतरः पूर्वो अस्मत् ॥१॥
यं। ऐच्छाम। मनसा। सः। अयं। आ। अगात्। यज्ञस्य। विद्वान्। परुषः। चिकित्वान्।
सः। नः। यक्षत्। देवऽताता। यजीयान्। नि। हि। सत्सत्। अंतरः। पूर्वः। अस्मत् ॥१॥

यमग्निमैच्छाम अन्विष्टवंतो वयं मनसा हविष्प्रापणबुद्ध्या । मह्यं हविः प्रापयतीति बुद्धेरित्यर्थः । सो ऽयमग्निरागात् । आजगाम । कीदृशोऽग्निः । यज्ञस्य यज्ञं विद्वान् तथा परुषः पर्रूषि संधातव्यान्यंगानि चिकित्वानभिगच्छन् । सोऽग्निर्यजीयान्यष्टृतमो नोऽस्माद्देवताता देवतातौ यज्ञे यजत् । यजतु । नि हि षत्सत् । न्यसीदत्खलु वेद्यामिति शेषः । कीदृशः सन् । अंतरं ऋत्विजां यष्टव्यानां देवानां च मध्ये संचरन् अस्मत्पूर्वोऽस्मत्तो देवेभ्यः पूर्वभावी सन् । अग्निं समिध्य पश्चाद्धि देवा आह्वयंते ॥

दर्शपूर्णमासयोः पुराराधीत्यिषा जप्या । सूत्रमुदाहृतं ॥

अराधि होता निषदा यजीयानभि प्रयांसि सुधितानि हि ख्यत् ।
यजामहै यज्ञियान्हंत देवाँ ईळामहा ईड्याँ आज्येन ॥२॥
अराधि। होता। निऽसदा। यजीयान्। अभि। प्रयांसि। सुऽधितानि। हि। ख्यत्।
यजामहै। यज्ञियान्। हंत। देवान्। ईळामहे। ईड्यान्। आज्येन ॥२॥

अयमग्निर्होता होमनिष्पादको यजीयान्यष्टृतमश्च सन्निषदा वेद्यां निषदनेनाराधि । सिद्धोऽभूत् । आकृतियोग्योऽभूदित्यर्थः । तथाभूतोऽयं सुधितानि सुष्ठु निहितानि प्रयांसि चरुपुरोडाशाद्यन्नान्यभि हि

स्यात् । अभिचष्टे । सर्वतः पश्यति । हीति पादपूरणः । कया वुच्चेति । यज्ञियान्यष्टव्यानाऽऽहुतिभाजो देवान् हंत शीघ्रमाज्येन यजामहै तथेडान् स्तुतिभाजो देवान् स्तुत्येळामहा इति वुच्चेति शेषः ॥

यस्मिन्यजमाने जीवति मृतशब्दो जायते तस्य सुरभिमतीष्टिः कर्तव्या । साध्वीमकरित्येषा तत्र याज्या । सूचितं च । अग्निर्होता न्यसीदद्यजीयान् साध्वीमकर्देववीतिं नो अद्य । आ० ३. १३. । इति ॥

साध्वीमकर्देववीतिं नो अद्य यज्ञस्य जिह्वामविदाम गुह्यां ।
स आयुरागात्सुरभिर्वसानो भद्रामकर्देवहूतिं नो अद्य ॥३॥
साध्वीं । अकः । देवऽवीतिं । नः । अद्य । यज्ञस्य । जिह्वां । अविदाम । गुह्यां ।
सः । आयुः । आ । अगात् । सुरभिः । वसानः । भद्रां । अकः । देवऽहूतिं । नः । अद्य ॥३॥

अयमग्निरद्य नोऽस्माकं देववीतिं देवानामागमनवंतं देवानां हविर्भक्षणोपेतं वा यज्ञं साध्वीमकः । साधुमकरोत् । वयं च यज्ञस्य जिह्वां गुह्यां गूढतरां जिह्वामविदाम । लब्धवंतः स्म । अग्निर्हि यज्ञस्य जिह्वा तेन देवानां पानाज्जिह्वात्वेनोपचारः । स तादृशोऽग्निः सुरभिः सुगंध आयुर्देवैर्दत्तमायुथं वसान आच्छाद-यन्नागात् । आगच्छति । आगत्य च नोऽस्मदर्थं देवहूतिं देवानामाह्वानवंतं यज्ञं भद्रामकः । कल्याणं कृतवान् । अद्येदानीं ॥

दर्शपूर्णमासयोः सामिधेन्यर्थं प्रेषितेन होत्रा तदद्य वाच इत्येषा जप्या । स्रुगादापनात्पूर्वमपि जप्या । सूचितं च । तदद्य वाचः प्रथमं मसीयेति समाप्य । आ० १. २. । इति ॥

तदद्य वाचः प्रथमं मसीय येनासुराँ अभि देवा असाम ।
ऊर्जो उत यज्ञियासः पंच जना मम होत्रं जुषध्वं ॥४॥
तत् । अद्य । वाचः । प्रथमं । मसीय । येन । असुरान् । अभि । देवाः । असाम ।
ऊर्जः । अदः । उत । यज्ञियासः । पंच । जनाः । मम । होत्रं । जुषध्वं ॥४॥

इदमुत्तरं चाग्नेर्वाक्यमित्युक्तं । अद्येदानीं प्रथमं । मुख्यनामैतत् । वाचां मुख्यं तद्वाचो वचो वचनं मसीय । मंसीय । उच्चारयामि । येन वचसाहं देवाश्च वयमसुरानभ्यसाम अभिभवेम । किं तत्प्रथमं वचनमिति उच्यते । ऊर्जादो हे अन्नाद उतापि च यज्ञियासो यज्ञार्हा हे पंच जना देवमनुष्यादयः यूयं मम होत्रं जुषध्वं । सेवध्वमिति । एवं वह्रुच्यमानेऽग्निमनूवंति सर्वे देवा इत्यभिप्रायः । अत्र तदद्य वाच इत्यादि निगदं द्रष्टव्यं । नि० ३. ८. ॥

पंच जना मम होत्रं जुषंतां गोजाता उत ये यज्ञियासः ।
पृथिवी नः पार्थिवात्पात्वंहसोऽन्तरिक्षं दिव्यात्पात्वस्मान् ॥५॥
पंच । जनाः । मम । होत्रं । जुषंतां । गोऽजाताः । उत । ये । यज्ञियासः ।
पृथिवी । नः । पार्थिवात् । पातु । अंहसः । अंतरिक्षं । दिव्यात् । पातु । अस्मान् ॥५॥

पंच जना देवादयो मम होत्रं हवमाह्वानं जुषंतां । सेवंतां । अपि च गोजाता भूम्यासुत्पन्नाः । यद्वा । गोशब्देन तज्जं पयआदिकमुच्यते । हविरर्थं प्रादुर्भूता इत्यर्थः । तादृशा ये संति । उतापि च ये यज्ञियासो यज्ञार्हाः संति ते मम होत्रं जुषंतां । किंच पृथिवी पृथिवीदेवता पार्थिवात्पृथिवीसंबंधान्नोऽस्मानंहसः पापात्पातु । रक्षतु । तथांतरिक्षमंतरिक्षदेवता दिव्यादांतरिक्षादंहसः पापसकाशादस्मान्पातु ॥ ॥१३॥

गार्हपत्यादारभ्याहवनीयादेदिं वेदतृणीरादृणाति तंतुमित्यनया । सूचितं च । अविधून्वन् संततं जुह्वत्

सवेन गार्हपत्यादाहवनीयमिति तंतुं तन्वन्रजसो भानुमन्विहि । आ० १. ११. । इति ॥ अग्निहोत्रहोमेऽप्यनयोर्द्वधारा स्रावणीया । सूचितं च । गार्हपत्यादाहवनीयमिच्छिन्नामुदकधारां हरेत्तंतुं तन्वन्रजसो भानुमन्विहि । आ० २. २. । इति ॥ अन्यंतरालेऽतिक्रमणेऽनया गार्हपत्याहवनीययोर्मध्य उदकेन भस्मना चापूरयेत् । सूचितं च । गार्हपत्याहवनीययोरंतरं भस्मराज्योदकराज्या च संतनुयात् । आ० ३. १०. । इति ॥ आग्निमारुतेऽग्निषा धाय्या । सूचितं च । तंतुं तन्वन्रजसो भानुमन्विह्येवा न इंद्रो मघवा विरप्शी । आ० ५. २०. । इति ॥

तंतुं तन्वन्रजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान् ।
अनुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनं ॥ ६ ॥
तंतुं । तन्वन् । रजसः । भानुं । अनु । इहि । ज्योतिष्मतः । पथः । रक्ष । धिया । कृतान् ।
अनुल्बणं । वयत । जोगुवां । अपः । मनुः । भव । जनय । दैव्यं । जनं ॥ ६ ॥

हे अग्ने तंतुं यज्ञं तन्वन्विस्तारयन्रजसो रंजनात्मकस्य लोकस्य भानुं भासकमादित्यमन्विहि । अनुगच्छ । रश्मिद्वारा सूर्यमंडलं प्रविशेत्यर्थः । किंच ज्योतिष्मतः प्रकाशवतो यज्ञस्य पथो गमनमार्गान् अथवा ज्योतिष्मतो द्योतिमतः स्वर्गस्य पथो मार्गान्देवयानान् रक्ष । पालय । कीदृशान्मार्गान् । धिया कर्मणा कृतान् संपादितान् । किंच सोऽग्निर्जोगुवां स्तोतॄणामपः । कर्मनामैतत् । क्रियया व्याप्यं कर्मानुल्बणमनतिरिक्तं वयत । करोतु । यदेव यज्ञस्य उल्बणं क्रियते तस्यैवैषा शांतिः । तै० सं० ३. ४. ३. ७. । इति हि ब्राह्मणं । स त्वं मनुर्भव । मंतव्यो भव । स्तुत्यो भवेत्यर्थः । किंच दैव्यं जनं देवसंघं जनय । उत्पादय । यज्ञाभिगमनवंतं कुर्वित्यर्थः ॥

अक्षानहो नह्यतनोत सोम्या इष्कृणुध्वं रशना ओत पिंशत ।
अष्टावंधुरं वहताभितो रथं येन देवासो अनयन्नभि प्रियं ॥ ७ ॥
अक्षऽनहः । नह्यतन । उत । सोम्याः । इष्कृणुध्वं । रशनाः । आ । उत । पिंशत ।
अष्टाऽवंधुरं । वहत । अभितः । रथं । येन । देवासः । अनयन् । अभि । प्रियं ॥ ७ ॥

अत्र यज्ञजिगमिषवो देवाः परस्परं ब्रुवते । हे सोम्याः सोमार्हा देवाः यूयमश्वानहोऽक्षेषु नह्यान् बंधनीयानश्वान्नह्यतन । नह्यत । बध्नीत रथे । उतापि च रशना अश्वबंधनप्रग्रहानिष्कृणुध्वं । निष्कुरुत । सम्यक् संस्कुरुत ॥ नकारलोपश्छांदसः ॥ उतापि चा पिंशत ॥ पिश अवयवे ॥ अश्वानलंकुरुतेत्यर्थः । अष्टावंधुरं । वंधुरं सारथिनिवासस्थानं । अष्टसंख्याकवंधुरोपेतं रथं सूर्यसंबंधिनमभितः सर्वतो वहत । सूर्यरथेन सार्कं युष्मदीयान्रथान्यज्ञं प्रति गमयतीत्यर्थः । येन देवासो देवाः प्रियमस्थानमनयन् अभिगमयंति तं रथमभितो वहतेति संबंधः । यद्वा । तं यज्ञं प्रति वहतेति योज्यं ॥

वैवाहिके प्रयाणे यदि नावा तार्या नदी स्यात् तदानीमश्मन्वतीत्यर्धर्चेन वधूं नावमारोहयेत् उत्तरेणार्धर्चेन नदीमुत्क्रमयेत् । सूचितं च । अश्मन्वती रीयते सं रभध्वमित्यर्धर्चेन नावमारोहयेदुत्तरेणोत्क्रमयेत् । आ० गृ० १. ८. २-३. । इति ॥

अश्मन्वती रीयते सं रभध्वमुत्तिष्ठत प्र तरता सखायः ।
अत्रा जहाम ये असन्नशेवाः शिवान्वयमुत्तरेमाभि वाजान् ॥ ८ ॥
अश्मन्ऽवती । रीयते । सं । रभध्वं । उत् । तिष्ठत । प्र । तरत । सखायः ।
अत्र । जहाम । ये । असन् । अशेवाः । शिवान् । वयं । उत् । तरेम । अभि । वाजान् ॥ ८ ॥

अनयापि देवा यज्ञविवमिषवः परस्परं ब्रुवते । अश्मन्वती नाम नदी रीयते । गच्छति ॥ री गतिरे-

षणयोः ॥ तां यज्ञगमनायोत्तरीतुमुत्तिष्ठत । उन्नच्छत । तथा कृत्वा प्र तरत । तां नदीमुल्लंघयत । हे सखायो यजमानस्य सखिभूता इति देवानां संबोधनं । अचास्यां नद्यां जहाम । परित्यजाम । कानिति उच्यते । येऽशेवाः । शेवमिति सुखनाम । येऽसुखभूता असन् अभवन् अस्मानाश्रित्य वर्तंते तान्जहाम । तथा कृत्वा शिवान् सुखकराणि वाजानन्नानि हवींष्यभि प्रातुमुत्तरेम ॥

त्वष्टा माया वेदपसामपस्तमो बिभ्रत्पात्रा देवपानानि शंतमा ।
शिशीते नूनं परशुं स्वायसं येन वृश्चादेतशो ब्रह्मणस्पतिः ॥९॥
त्वष्टा । मायाः । वेत् । अपसां । अपः ऽतमः । बिभ्रत् । पात्रा । देवऽपानानि । शंऽतमा ।
शिशीते । नूनं । परशुं । सुऽआयसं । येन । वृश्चात् । एतशः । ब्रह्मणः । पतिः ॥९॥

अयं त्वष्टा देवशिल्पी मायाः । कर्मनामैतत् । कर्माणि पात्रनिर्माणविषयाणि वेत् । वेत्ति । जानाति । स च त्वष्टापसां शोभनकर्मवतां मध्येऽपस्तमोऽतिशयेन शोभनकर्मा देवपानानि । देवाः पिबंति येषु तानि पात्रा सोमपात्राणि बिभ्रद्धारयन्वर्तत इति शेषः । स च त्वष्टा नूनमिदानीमग्नौ हविर्वहनायांगीकृते सति स्वायसं शोभनायःसारभूतं परशुं शिशीते । तीक्ष्णयति । त्वष्टा पात्रसंपादनार्थं येन परशुनैतश्च एतशवर्णो ब्रह्मणस्पतिर्ब्रह्मणो मंत्रस्य पाता पात्रादिसंपादनरूपस्य कर्मणः स्वामी वा वृश्चात् वृश्चति ॥

सतो नूनं कवयः सं शिशीत वाशीभिर्याभिरमृताय तक्षथ ।
विद्वांसः पदा गुह्यानि कर्तन येन देवासो अमृतत्वमानशुः ॥१०॥
सतः । नूनं । कवयः । सं । शिशीत । वाशीभिः । याभिः । अमृताय । तक्षथ ।
विद्वांसः । पदा । गुह्यानि । कर्तन । येन । देवासः । अमृतऽत्वं । आनशुः ॥१०॥

हे कवयो मेधाविनस्त्वष्टुर्मम शिष्या ऋभवः सतः । संत इत्यर्थः । प्रशस्ताः यूयं नूनमिदानीं सं शिशीत । अत्यर्थं तीक्ष्णीकुरुत वाशीः । याभिर्वाशीभिः पात्राण्यमृताय सोमाय । तत्पानायेत्यर्थः । यद्वा । युष्माकममृतत्वाय । तदर्थं तक्षथ । संपादयथ । हे कवयो विद्वांसः यूयं गुह्यानि गोपनीयानि पदा पदानि निवासस्थानानि कर्तन । कुरुत । येन स्थानकरणेन देवासो देवाः यूयममृतत्वमानशुः प्राप्ता यूयं । एवं स्वशिष्यानाह ॥

गर्भे योषामदधुर्वत्समास्न्यपीच्येन मनसोत जिह्वया ।
स विश्वाहा सुमना योग्या अभि सिषासनिर्वनते कार इज्जितिं ॥११॥
गर्भे । योषां । अदधुः । वत्सं । आसनि । अपीच्येन । मनसा । उत । जिह्वया ।
सः । विश्वाहा । सुऽमनाः । योग्याः । अभि । सिसासनिः । वनते । कारः । इत् । जितिं ॥११॥

ते मरुतो गर्भे मृताया गोर्मध्ये ग्राह्यके चर्मणि मृताया गोः संबंधिनि योषां कांचिन्नामदधुः । धारितवंतः । निश्चर्मणो गामरिणीत धीतिभिः । ऋ० १. १६१. ७. । इत्युक्तं । तथासनि मृताया आस्ये वत्समदधुः । केन साधनेन । अपीच्येन मनसा देवत्वमाकांक्षतोतापि च जिह्वया । सादृश्यप्रधानोऽयं निर्देशः । जिह्वावदायतया वाग्नेत्यर्थः । यद्वा । जिह्वया युक्तां योषामिति संबंधः । सिषासनिः संभजनशीलः स ऋभुसंघो विश्वाहा सर्वेष्वहःसु सर्वदा योग्याः स्वोचिताः सुमनाः सुतीरभि वनते । स च संघो जितिं शत्रुजयं कामं कार इत् कर्तैव । शत्रुजयकर्तैव ॥ ॥१४॥

तां सु त इति षड्र्चं द्वादशं सूक्तं वामदेवगोत्रस्य बृहदुक्थस्यार्षं त्रैष्टुभमैंद्रं । तथा चानुक्रांतं । तां सु षड् बृहदुक्थो वामदेव्य इति ॥ समूढस्य दशरात्रस्य द्वितीये छंदोम एतत्सूक्तं । सूचितं च । अपूर्व्या पुरुतमानि तां

सु ते कीर्तिं त्वं महाँ इंद्र । आ० ८.७.। इति ॥ महाव्रते निष्केवल्य एतत्सूक्तं । सूचितं च । तां सु ते कीर्तिं मघवन्महित्वा भूय इद्वावृधे वीर्याय । ऐ० आ०५.१.६.। इति ॥

तां सु ते कीर्तिं मघवन्महित्वा यत्त्वा भीते रोदसी अह्वयेतां ।
प्रावो देवाँ आतिरो दासमोजः प्रजायै त्वस्यै यदशिक्ष इंद्र ॥१॥
तां।सु।ते।कीर्तिं।मघऽवन्।महिऽत्वा।यत्।त्वा।भीते इति।रोदसी इति।अह्वयेतां।
प्र।आवः।देवान्।आ।अतिरः।दासं।ओजः।प्रऽजायै।त्वस्यै।यत्।अशिक्षः।इंद्र॥१॥

हे इंद्र मघवन् धनवन् ते तव संबंधिनीं महित्वा महत्त्वेनागतां कीर्तिं सु सुष्ठु कीर्तयामीति शेषः । किंच यदादा त्वा त्वां प्रति भीते असुरैर्भयं प्राप्ते रोदसी द्यावापृथिव्यावह्वयेतां अवेत्यब्रूतां तदानीं देवान्प्रावः । प्रारक्षः । तथा दासं देवानामुपक्षयकर्तारमसुरमातिरः । व्यनाशयः । असुरान् हत्वा देवानां रक्षणेन द्यावापृथिव्योर्भीतिं पर्यहर इति यदस्ति किंच त्वस्या एकस्यै प्रजायै यजमानरूपायै यद्यस्मभ्यं प्रायच्छः । तां कीर्तिं कीर्तयामीत्यर्थः ॥

यदचरस्तन्वा वावृधानो बलानींद्र प्रब्रुवाणो जनेषु ।
मायेत्सा ते यानि युद्धान्याहुर्नाद्य शत्रुं ननु पुरा विवित्से ॥२॥
यत्।अचरः।तन्वा।ववृधानः।बलानि।इंद्र।प्रऽब्रुवाणः।जनेषु।
माया।इत्।सा।ते।यानि।युद्धानि।आहुः।न।अद्य।शत्रुं।ननु।पुरा।विवित्से॥२॥

हे इंद्र तन्वा शरीरेण स्तोत्रेण वा वावृधानो वर्धमानो जनेषु प्राणिषु बलानि प्रब्रुवाणो वृत्रवधादिरूपाणि सामर्थ्यानि प्रकर्षेण कथयन्नचर इति यत्संचारं कृतवानिति यदस्ति ते तव सा गतिर्मायेत्याहैव । मृषेत्यर्थः । किंच यानि युद्धानि शत्रुविषयाण्याहुः ब्रुवते पुराविद ऋषयः तान्यपि मायैव । कुत इति आह । अद्येदानीं शत्रुं हंतव्यं न विवित्से । न लभसे । अद्य मा भूत् पूर्वं हतवानसीति यद्रूषे तदपि नेत्याह । ननिति प्रश्ने । किं पुरा शत्रुमलभथाः । तदपि नेत्यर्थः ॥

क उ नु ते महिमनः समस्यास्मत्पूर्व ऋषयोऽंतमापुः ।
यन्मातरं च पितरं च साकमजनयथास्तन्वः स्वायाः ॥३॥
के।ऊं इति।नु।ते।महिमनः।समस्य।अस्मत्।पूर्वे।ऋषयः।अंतं।आपुः।
यत्।मातरं।च।पितरं।च।साकं।अजनयथाः।तन्वः।स्वायाः॥३॥

हे इंद्र ते तव महिमनो महिम्नः समस्य सर्वस्याप्यंतं पारमस्मदस्मत्तः पूर्व ऋषयः क आपुः। प्राप्नुवन्। न कोऽपीत्यर्थः। यद्यपि महत्त्वं प्रख्यापयंति तथापि न कात्स्न्र्येनेति। तत्र कारणमाह। यस्मात्मातरं पितरं च। द्यौः पिता पृथिवी मातेति हि श्रुतं। अतो द्यावापृथिव्यावित्यर्थः। ते उभे अपि साकं सहैव स्वायास्तन्वः स्वकीयाच्छरीरादजनयथाः। उदपादयः। अतो नापुरिति संबंधः ॥

चत्वारि ते असुर्याणि नामादाभ्यानि महिषस्य संति ।
त्वमंग तानि विश्वानि वित्से येभिः कर्माणि मघवञ्चकर्थ ॥४॥
चत्वारि।ते।असुर्याणि।नाम।अदाभ्यानि।महिषस्य।संति।
त्वं।अंग।तानि।विश्वानि।वित्से।येभिः।कर्माणि।मघऽवन्।चकर्थ॥४॥

हे इंद्र महिषस्य महतः पुरुषस्य ते तव चत्वार्यसुर्याण्यसुरविघातीन्यदाभ्यान्यन्यैरहिंस्यान्युत्तरसूक्त उपांत्यवर्जिते दूरे तन्नामेत्यादिषु प्रतिपादितानि यानि नाम नामकानि शरीराणि संति अंग सखे त्वं तानि विश्वानि सर्वाणि वित्से । अदाभ्यान्यहिंस्यानि वेत्सि । जानासि । येभिर्यैर्नामभिः कर्माणि वृत्रवधादिरूपाणि चकर्थ कुरुषे हे मघवन् तानि वेत्सीति ॥

त्वं विश्वा दधिषे केवलानि यान्याविर्या च गुहा वसूनि ।
काममिन्मे मघवन्मा वि तारीस्त्वमाज्ञाता त्वमिद्रासि दाता ॥५॥
त्वं । विश्वा । दधिषे । केवलानि । यानि । आविः । या । च । गुहा । वसूनि ।
कामं । इत् । मे । मघऽवन् । मा । वि । तारीः । त्वं । आऽज्ञाता । त्वं । इंद्र । असि । दाता ॥५॥

हे इंद्र त्वं विश्वा सर्वाणि केवलान्यन्येषामसाधारणानि वसूनि धनानि दधिषे । धारयसि । विश्वानीत्युक्तं कथं विश्वत्वमित्यत आह । यान्याविराविर्भूतानि सर्वैः प्रसिद्धानि वसूनि वासयोग्यानि धनानि संति या च गुहा गुहायां निगूढे प्रदेशे वर्तमानानि वसूनि संति तानि विश्वानि दधिष इति । यस्मादेवं तस्मान्मे मम कामं कांक्षितं हे मघवन् धनवन्निंद्र मा वि तारीः । मा हिंसीः । इदिति पादपूरणः । वर्धयेति शेषः । हे इंद्र त्वमाज्ञातासि प्रापयितास्यभिलषितं धनं । तथा हे इंद्र त्वं दातासि ॥

यो अदधाज्ज्योतिषि ज्योतिरंतर्यो असृजन्मधुना सं मधूनि ।
अध प्रियं चूषमिंद्राय मन्म ब्रह्मकृतो बृहदुक्थादवाचि ॥६॥
यः । अदधात् । ज्योतिषि । ज्योतिः । अंतः । यः । असृजत् । मधुना । सं । मधूनि ।
अध । प्रियं । चूषं । इंद्राय । मन्म । ब्रह्मऽकृतः । बृहत्ऽउक्थात् । अवाचि ॥६॥

य इंद्रो ज्योतिषि द्योतमान आदित्यादिके तेजस्यंतर्ज्योतिस्तेजोऽदधात् धारितवान् । यदादित्याग्न्यादिषु तेजोऽस्ति तदिंद्रकृतमित्यर्थः । यश्च मधुना मधुरेण रसेन मधुनि सोमादिमधुद्रव्याणि समसृजत् समयोजयत् । यद्वा । मधुना । अत्र मधुशब्देन सर्वैः सेव्यमान आदित्य उच्यते । तेन सह मधून्युदकानि समसृजत् । अध संप्रति तस्मा इंद्राय प्रियं प्रीतिजनकं चूषं बलं शत्रूणां शोषकत्वाद्बलकरं मन्म मननीयं स्तोत्रं ब्रह्मकृतो मंत्रकृतो बृहदुक्थात् प्रभूतशस्त्रयुक्तादेतन्नामकादृषिर्भक्तोऽवाचि । उक्तमभूत् ॥ ॥१५॥

दूरे तदित्यष्टर्चं चयोदशं सूक्तं । ऋष्यादयाः पूर्ववत् । दूर इत्यनुक्रांतं ॥ गतः सूक्तविनियोगः ॥

दूरे तन्नाम गुह्यं पराचैर्यत्त्वा भीते अह्रयेतां वयोधै ।
उदस्तभ्नाः पृथिवीं द्यामभीके भ्रातुः पुत्रान्मघवन्तित्विषाणः ॥१॥
दूरे । तत् । नाम । गुह्यं । पराचैः । यत् । त्वा । भीते इति । अह्रयेतां । वयःऽधै ।
उत् । अस्तभ्नाः । पृथिवीं । द्यां । अभीके । भ्रातुः । पुत्रान् । मघऽवन् । तित्विषाणः ॥१॥

अनया चत्वारि ते असुर्याणि नामेत्युक्तस्यार्धं नाम स्तूयते । हे इंद्र ते तव तदुच्यमाणं नाम सर्वेषां नामकं शरीरं पराचैः पराङ्मुखैर्मनुषैः । मनुष्याणामित्यर्थः । गुह्यं गोपनीयमप्रकाशितं सद्दूर इतो विप्रकृष्टे दूरदेशे वर्तत इति शेषः । यद्यदा त्वा त्वां रोदसी द्यावापृथिव्यौ भीते सती अह्रयेतां अवेत्यबूतां । किमर्थं । वयोधा अन्नस्य निधानार्थं । जगतोऽन्नस्य साधनायेत्यर्थः । तदानीं तेन शरीरेणाभीके । अंतिकनामैतत् । तव समीप एव पृथिवीं द्यां चोर्ध्वं परस्परवियुक्तं यथा भवति तथास्तभ्नाः । स्तंभितवानसि । किं कुर्वन् । हे मघवन्निंद्र भ्रातुः पर्जन्यस्य पुत्रान् पुत्रस्थानीयानुदकसंस्त्यायांस्त्वित्विषाणो दीपयन् ॥

महत्तन्नाम गुह्यं पुरुस्पृग्येन भूतं जनयो येन भव्यं ।
प्रत्नं जातं ज्योतिर्यदस्य प्रियं प्रियाः समविशंत पंच ॥२॥
महत्। तत्। नाम। गुह्यं। पुरुऽस्पृक्। येन। भूतं। जनयः। येन। भव्यं।
प्रत्नं। जातं। ज्योतिः। यत्। अस्य। प्रियं। प्रियाः। सं। अविशंत। पंच ॥२॥

हे इंद्र तव तन्नुह्यं गोपनीयमन्यैरविज्ञातं पुरुस्पृग्बहुभिर्वृष्ण्यर्थिभिः स्पृहणीयमाकाशात्मकं नाम शरीरं महदत्यंतं प्रवृद्धं येन नाम्ना भूतं भव्यं च पूर्वं जगयः उत्पादितवानसि । भूतभव्योभयान्वयाय येनेत्यस्यावृत्तिः स्यात् । आकाशात्मकाद्धि परमेश्वरस्वरूपाद्भूतभव्यात्मकं जगदुत्पद्यते । आकाशाद्वायुरित्यादिश्रुतेः । किंच प्रत्नं पुराणं पूर्वकालीनं यज्ज्योतिर्द्योतमानमादित्याख्यमुदकाख्यं वास्येंद्रस्य प्रियं प्रियभूतं तत्त्वं जातमुत्पन्नं प्रियाः प्रीयमाणाः पंच । पंच जना इति शेषः । भीमसेनो भीम इतिवदेकदेशग्रहणात् । निषादपंचमाश्चत्वारो वर्णाः समविशंत । संविशंते । स्वनिर्वाहार्थं भजंत इत्यर्थः ॥

आ रोदसी अपृणादोत मध्यं पंच देवाँ ऋतुशः सप्तसप्त ।
चतुस्त्रिंशता पुरुधा वि चष्टे सरूपेण ज्योतिषा विव्रतेन ॥३॥
आ। रोदसी इति। अपृणात्। आ। उत। मध्यं। पंच। देवान्। ऋतुऽशः। सप्तऽसप्त।
चतुःऽत्रिंशता। पुरुधा। वि। चष्टे। सऽरूपेण। ज्योतिषा। विऽव्रतेन ॥३॥

अयमिंद्र आत्मीयेन शरीरेण तेजसा वा रोदसी द्यावापृथिव्यावा सर्वतोऽपृणात् । पूरयति । उतापि च मध्यं बुभूष्यपेक्षया मध्यभूतमंतरिक्षमपृणादिति वर्तते । तदपि स्वशरीरेण तेजसा वा पूरयति । किंच पंच देवान् देवमनुष्यपित्रसुरराक्षससंज्ञकान् तथा सप्त सप्त । द्विरुक्त्या सप्तसंख्याकानि तत्त्वानि लोके यानि संति तानि परिगृह्यंते । कानि तानीति सप्त मरुद्गणान् सप्तादित्यरश्मीन् सप्त चेंद्रियाणि सप्त लोकानन्यानपि सप्तसंख्योपेतानृतुशः काले काले चतुस्त्रिंशता चतुस्त्रिंशत्संख्याकेन देवगणेन सह पुरुधा बहुप्रकारं वि चष्टे । विपश्यति । सर्वं देवते । अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्च विराट् चेति चतुस्त्रिंशत्त्वं देवानां । केनेति तदुच्यते । सरूपेण समानरूपेण ज्योतिषा प्रकाशकेन विव्रतेन विविधेन कर्मणा ॥

यदुष औच्छः प्रथमा विभानामजनयो येन पुष्टस्य पुष्टं ।
यत्ते जामित्वमवरं परस्या महन्महत्या असुरत्वमेकं ॥४॥
यत्। उषः। औच्छः। प्रथमा। विऽभानां। अजनयः। येन। पुष्टस्य। पुष्टं।
यत्। ते। जामिऽत्वं। अवरं। परस्याः। महत्। महत्याः। असुरऽत्वं। एकं ॥४॥

अत्र प्रसंगात्सूर्यात्मकेंद्रसंबंधिन्युषाः स्तूयते । हे उष उषोदेवते विभानां विभासकानां ग्रहनक्षत्रादीनां प्रथमा प्रथमभूता सत्यौच्छः । विभासनमकरोः । अग्रे ह्युषसः प्रादुर्भवंति पश्चादन्यानि तेजांसि । येन च तेजसा पुष्टस्य पोषयुक्तस्यापि पदार्थस्य पुष्टमतिशयेन पोषयुक्तमादित्यमजनयः उदपादयः । यत् यद्वा ते तव जामित्वं बांधवमवरमवाङ्मुखं । अस्मदभिमुखमित्यर्थः । कीदृशास्तवेति उच्यते । परस्याः । उपरि स्थिताया इत्यर्थः । तदिदं महत्यास्तव महदतिप्रवृद्धमेकमसाधारणमेकमेव वासुरत्वं प्रज्ञष्टबलवत्त्वं । तव बलेन कृतमित्यर्थः ॥

महाव्रते निष्केवल्ये विधुं दद्राणमित्येषा । सूचितं च । आ याह्यर्वाङुप वंधुरेष्टा विधुं दद्राणं । ऐ० आ० ५.३.१.। इति ॥

विधुं दद्राणं समने बहूनां युवानं संतं पलितो जगार ।
देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ॥५॥
विऽधुं । दद्राणं । समने । बहूनां । युवानं । संतं । पलितः । जगार ।
देवस्य । पश्य । काव्यं । महिऽत्वा । अद्य । ममार । सः । ह्यः । सं । आन ॥५॥

अनया कालात्मक इंद्रः स्तूयते । विधुं विधातारं सर्वस्य युद्धादेः कर्तारं । विपूर्वो दधातिः करोत्यर्थः । तथा समने । अननमनः प्राणनं । सम्यगननोपेते संग्रामे बहूनां शत्रूणां दद्राणं द्रावकं ईदृक्सामर्थ्योपेतं युवानं संतं पुरुषं पलितो जरा जगार । निगिरतींद्राज्ञया । एवमुक्तलक्षणं वक्ष्यमाणलक्षणं च देवस्य कालात्मकस्येंद्रस्य महित्वा महत्त्वेनोपेतं काव्यं सामर्थ्यं पश्य । पश्यत हे जनाः । तथा जरसा प्राप्तोऽयं ममार । म्रियते । स ह्यः परेद्युः समान । सम्यक्चेष्टते । पुनर्जन्मांतरे प्रादुर्भवतीत्यर्थः । तदेवं चत्वारि नामानि शरीराख्युक्तानि ॥ ॥१६॥

शाकमना शाको अरुणः सुपर्ण आ यो महः शूरः सनादनीळः ।
यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दाता ॥६॥
शाकमना । शाकः । अरुणः । सुऽपर्णः । आ । यः । महः । शूरः । सनात् । अनीळः ।
यत् । चिकेत । सत्यं । इत् । तत् । न । मोघं । वसु । स्पार्हं । उत । जेता । उत । दाता ॥६॥

शाकमना । शकीव शाकम । शकमना बलेन शाकः शक्तः ॥ शक्लृ शक्तौ ॥ स्वशक्तीव सर्वं कर्तुं शक्त इत्यर्थः । न हींद्रस्य सहायांतरापेक्षास्तींद्रत्वादेव । अरुणोऽरुणवर्णः सुपर्णः कश्चिच्छोभनपर्णः पक्षो गच्छतीत्यध्याहारः । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः । यो महो महाञ्शूरो विक्रांतः सनात् पुराणोऽनीळोऽनीडो नीडस्याकर्ता । न हींद्रोऽग्निवत् कुत्रचिदपि यज्ञे निकेतनं करोति । एवं सुपर्णरूपेणेंद्रमाह । स पक्षींद्रो यच्चिकेत कर्तव्यत्वेन जानाति तत्सत्यमित् सत्यमेव न तु मोघं व्यर्थं भवति । स स्पार्हं स्पृहणीयं वसूत जेता जयति शत्रुभ्यः सकाशात् उतापि दाता प्रयच्छति च स्तोतृभ्यः ॥ न लोकाव्ययेत्यादिना षष्ठीप्रतिषेधः ॥

एभिर्ददे वृष्ण्या पौंस्यानि येभिरौक्षद्वृचहत्याय वज्री ।
ये कर्मणः क्रियमाणस्य महू ऋतेकर्ममुदजायंत देवाः ॥७॥
आ । एभिः । ददे । वृष्ण्या । पौंस्यानि । येभिः । औक्षत् । वृचऽहत्याय । वज्री ।
ये । कर्मणः । क्रियमाणस्य । महा । ऋतेऽकर्मे । उत्ऽअजायंत । देवाः ॥७॥

इंद्र एभिर्मरद्भिः सह वृष्ण्यानि वर्षकाणि पौंस्यानि बलान्या ददे । आदत्ते । येभिर्मरद्भिः सहितो वृचहत्याय । प्राण्युपकारकवृष्ट्यावरकत्वाद्वृचः पापं । तस्य हत्याय । मनुष्याणामुपद्रवशमनायेत्यर्थः । तदर्थं वज्री वज्रवानिंद्र औक्षत् । वर्धति । ये च मरुतो देवा महा महतेंद्रेण क्रियमाणस्य कर्मणो वृष्टिप्रदानलक्षणस्य साहाय्यार्थमृतेकर्ममृतकर्म वृष्टिप्रदानकर्म प्रत्युदजायंत उन्मुखा जायंते स्वयमेव तैरेभिर्ददे इति समन्वयः ॥

युजा कर्माणि जनयन्विश्वौजा अशस्तिहा विश्वमनास्तुराषाट् ।
पीत्वी सोमस्य दिव आ वृधानः शूरो निर्युधाधमद्दस्यून् ॥८॥

युजा। कर्माणि। जनयन्। विश्वऽओजाः। अशस्तिऽहा। विश्वऽमनाः। तुराषाट्।
पीत्वी। सोमस्य। दिवः। आ। वृधानः। शूरः। निः। युधा। अधमत्। दस्यून्॥८॥

स इंद्रो युजा मरुतां साहाय्येन कर्माणि प्रवर्षणादीनि जनयन्नुत्पादयन् विश्वौजा व्याप्तबलोऽशस्तिहा रक्षोहा विश्वमना व्याप्तमना अत्यंतं जनस्री तुराषाट् तूर्णमभिभविता शत्रूणां। एवंमहानुभाव इंद्रः सोमस्य सोमं पीत्वी पीत्वा दिवो द्युलोकादागत्य सोमं पीत्वा वृधानो वर्धमानः शूरः सन् युधायुधेन प्रहरिणा वा दस्यून्शत्रून्निरधमत्। निर्धमति। युद्धेनासुरानपबाधत इत्यर्थः॥ ॥१७॥

इदं त इति सप्तर्चं चतुर्दशं सूक्तं। वामदेवपुत्रो बृहदुक्थ ऋषिः। चतुर्थीपंचमीषष्ठ्यो जगत्यः। आदित्स्निष्टुप् सप्तमी च त्रिष्टुभः। विश्वे देवा देवता। तथा चानुक्रांतं। इदं ते सप्त वैश्वदेवं तु चतुर्थ्याद्यास्तिस्रो जगत्य इति॥ गतः सूक्तविनियोगः॥ आहवनीये वाद्यादिकारणेनायतनान्निष्क्रम्य शम्यापरासादर्वाचीने देशे दीप्यमाने सति तमग्निमनया पुनरायतने संवपेत्। सूचितं च। आहवनीयमवदीप्यमानमर्वाक् शम्यापरासादिदं त एकं पर ऊ त एकमिति संवपेत्। आ० ३. १०.। इति॥

इदं त एकं पर ऊं त एकं तृतीयेन ज्योतिषा सं विशस्व।
संवेशने तन्वश्चारुरेधि प्रियो देवानां परमे जनित्वे॥१॥
इदं। ते। एकं। परः। ऊं इति। ते। एकं। तृतीयेन। ज्योतिषा। सं। विशस्व।
संऽवेशने। तन्वः। चारुः। एधि। प्रियः। देवानां। परमे। जनित्वे॥१॥

एतदादिभिर्बृहदुक्थो वाजिनं नाम स्वपुत्रं मृतं वदति। हे मृत पुत्र ते तवेदं। उपरि ज्योतिषेति वक्ष्यमाणत्वादत्रेदंशब्देन ज्योतिरभिधीयते। इदं ज्योतिरन्याख्यमेकमेकोऽंशः। अतस्तमग्निं तव देहगतामन्यंशेन वाह्यमग्निं सं विशस्व। संगच्छस्व। तथा पर उ अन्योऽपि ते तवैकं वाय्वाख्योऽंशः। ते तव प्राणवाय्वाख्यांशेन सं विशस्व। शरीरामिप्राणवाय्वोर्वाह्याग्निवाय्वोश्चैकत्वादंशत्वमिति भावः। तथा तृतीयेन ज्योतिषादित्याख्येन तेजसा तवात्मना सं विशस्व। सूर्यगतात्मचैतन्यदेहगतात्मचैतन्ययोरभेदादंशत्वं। तद्योऽहं सोऽसौ योऽसौ सोऽहं सूर्य आत्मा जगतस्तस्थुषश्चेति श्रुतिरात्मनः सूर्यप्रवेशो युक्तः। तन्वस्तन्वाः संवेशने तस्मिन्सूर्ये संविश्य चारुरेधि। कल्याणो भव। कीदृशस्त्वं। प्रियस्तेन सह प्रीयमाणः। कीदृशे तस्मिन्। देवानां परम उत्तमे जनित्वे जनके। देवानां ह्येतत्परमं जनित्वं यत्सूर्य इति हि श्रुतिः॥

तनूष्टे वाजिन्तन्वं नयंती वाममस्मभ्यं धातु शर्म तुभ्यं।
अहंतो महो धरुणाय देवान्दिवीव ज्योतिः स्वमा मिमीयाः॥२॥
तनूः। ते। वाजिन्। तन्वं। नयंती। वामं। अस्मभ्यं। धातु। शर्म। तुभ्यं।
अहंतः। महः। धरुणाय। देवान्। दिविऽइव। ज्योतिः। स्वं। आ। मिमीयाः॥२॥

हे वाजिन्नेतन्नामक पुत्र ते तव तन्वं शरीरं नयंती स्वशरीरं प्रापयंती तनूरियं पृथिवी। उभयोरपि पार्थिवत्वात्तव शरीरस्य पृथिवीप्राप्तौ सत्यां तस्यास्तव शरीरनयनं युक्तं। तादृशी पृथिवी वामं वननीयं धनमस्मभ्यं धातु। दधातु। शर्म च सुखं तुभ्यं धातु। दधातु। स त्वमहंतोऽनवपतितः सन् महो महतो देवांस्तव कारणभूतान् दिवीव ज्योतिर्द्युलोके वर्तमानं सूर्यं च। इवशब्दस्यार्थे निपातानामनेकार्थत्वात्। तं च स्वं तव स्वभूतमा मिमीयाः। आविश॥

वाज्यसि वाजिनेना सुवेनीः सुवितः स्तोमं सुवितो दिवं गाः।
सुवितो धर्म प्रथमानु सत्या सुवितो देवान्त्सुवितोऽनु पत्म॥३॥

वाजी । असि । वाजिनेन । सुऽवेनीः । सुवितः । स्तोमं । सुवितः । दिवं । गाः ।
सुवितः । धर्मं । प्रथमा । अनु । सत्या । सुवितः । देवान् । सुवितः । अनु । पत्म ॥३॥

हे पुत्र त्वं वाजिनेनान्नरसेन बलेन वा वाज्यसि । तद्वान्भवसि । कीदृशस्त्वं । सुवेनीः सुष्ठु कांतः ॥ वी गत्यादिषु ॥ तादृशस्त्वं सुवितः सुष्ठु प्रेरितस्त्वं स्तोमं पूर्वं त्वया कृतं स्तोमं तदभिमानिदेवमनु गाः । अन्वगाः । अनुगच्छ । तथा सुवितो दिवं गाः । तथा सुवितो धर्मत्वया संपादितानि धर्माख्यनुगच्छ । कीदृशानि । प्रथमा मुख्यानि सत्या सत्यफलानि । तथा सुवितो देवानिंद्रादीन् । तथा सुवितः पत्म पतञ्ज्योतिरादित्याख्यमनु गाः ॥

महिम्न एषां पितरश्चनेशिरे देवा देवेष्वदधुरपि क्रतुं ।
समविव्यचुरुत यान्यस्विषुरेषां तनूषु नि विविश्रुः पुनः ॥४॥
महिम्नः । एषां । पितरः । चन । ईशिरे । देवाः । देवेषु । अदधुः । अपि । क्रतुं ।
सं । अविव्यचुः । उत । यानि । अस्विषुः । आ । एषां । तनूषु । नि । विविश्रुः । पुनरिति ॥४॥

पितरश्चनास्मत्पितरोऽप्यंगिरस एषां देवानां महिम्नो महत्त्वस्येशिरे । ईश्वरा अभवन् । ते देवा अपि देवत्वं प्राप्ता अंगिरसो देवेष्विंद्रादिषु क्रतुं संकल्पमदधुः । धृतवंतः । उतापि च यानि तेजांस्यस्विषुः दीप्यंते तानि समविव्यचुः । संगता आसन् । एषां देवानां तनूषु शरीरेषु नि विविश्रुः । निविशंति पितरोऽंगिरसः । अतस्त्वमपि तथा कुर्वित्यर्थः ॥

सहोभिर्विश्वं परि चक्रमू रजः पूर्वा धामान्यमिता मिमानाः ।
तनूषु विश्वा भुवना नि येमिरे प्रासारयंत पुरुध प्रजा अनु ॥५॥
सहःऽभिः । विश्वं । परि । चक्रमुः । रजः । पूर्वा । धामानि । अमिता । मिमानाः ।
तनूषु । विश्वा । भुवना । नि । येमिरे । प्र । असारयंत । पुरुध । प्रऽजाः । अनु ॥५॥

मदीयाः पितरः सहोभिर्बलैः स्वीयैर्विश्वं सर्वं रजो लोकं । लोका रजांस्युच्यंत इति निरुक्तं । पूर्वा पूर्वाणि धामानि स्थानान्यमितान्यैरमितानि मिमानाः परिच्छिंदंतः परि चक्रमुः । पर्यक्रामन् । किंच तथा कुर्वंतो विश्वा सर्वाणि भुवना भूतजातानि नि येमिरे । नियमितवंतः । किंच पुरुध पुरुधा बहुप्रकारं प्रजा अनु ज्योतींष्युदकानि वा प्रासारयंत । प्रसारितवंतः । अस्मत्पितरः पूर्वेऽंगिरसः स्वसामर्थ्येन सर्वं लोकं व्याप्य पुरातनानि ग्रहनक्षत्रादीनि परिच्छिद्य सर्वभूतानि नियम्य प्रजा अनूदकानि तेजांसि वा प्रसारितवंत इत्यर्थः । अतस्त्वमप्येवं कुर्विति भावः ॥

द्विधा सूनवोऽसुरं स्वर्विदमास्थापयंत तृतीयेन कर्मणा ।
स्वां प्रजां पितरः पित्र्यं सह आवरेष्वदधुस्तंतुमाततं ॥६॥
द्विधा । सूनवः । असुरं । स्वःऽविदं । आ । अस्थापयंत । तृतीयेन । कर्मणा ।
स्वां । प्रऽजां । पितरः । पित्र्यं । सहः । आ । अवरेषु । अदधुः । तंतुं । आऽततं ॥६॥

सूनव आदित्यस्य पुत्रा देवा अंगिरसः । देवानां ह्येतत्परमं जनित्रं यत्सूर्य इति प्रदर्शितत्वादादित्यस्य सूनव इति गम्यते । असुरं बलवंतं स्वर्विदं सर्वज्ञं स्वर्गस्य लंभकं वादित्यं तृतीयेन कर्मणा प्रजोत्पत्त्याख्येन । ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः । तै० सं० ६. ३. १०. ५. । इति श्रुतेः प्रजोत्पादनस्य तृतीयकर्मत्वं ।

तेनादित्यं द्विधास्थापयंत । द्विप्रकारमास्थापयंति । उदितं चास्तमितं च कुर्वंति । उद्गाभं च निम्राभं च ब्रह्म देवा अवीवृधन् । तै० सं० १. १. १३. १. । इति मंत्रस्य ब्राह्मणेऽसौ वा आदित्य उद्यन्नुद्गाभ एष निम्रोचन्निम्राभः । तै० सं० ५. ४. ६. ६. । इति श्रुतत्वाद्देवानामादित्यस्य द्विःस्थापनमुदयास्तमयकरणमिति गम्यते । किंच पितरो मदीया अंगिरसः स्वां प्रजां । उत्पादयेति शेषः । पित्र्यं सहः पितुरादित्यस्य संबंधिनमपराभिभवत्वं बलमवरेष्वादधुः । निकृष्टेषु स्वप्रजाभूतेषु मनुष्येषु स्थापितवंतः । यथा पित्र्यं धनं सम्यक् परिरक्ष्य स्वपुत्रेभ्यः प्रयच्छंति तद्वत्पितुरादित्यस्य प्रकाशादित्वं मनुष्येषु न्यदधुरित्यर्थः । किंच तंतुं प्रजामाततं वितनं कृतवंत इति शेषः । पुत्रपौत्रादिरूपेणानवच्छिन्नां प्रजामित्यर्थः । अयं ह्याततंतंतुर्यत्प्रजेति ब्राह्मणं । प्रजातंतुं मा व्यवच्छेत्सीः । तै० आ० ७. ११. १. । इति च । तंतुं तन्वन् । ऋ० १०. ५३. ६. । इत्यस्य ब्राह्मणं प्रजा वै तंतुः । ऐ० ब्रा० ३. ३८. । इति ॥

नावा न क्षोदः प्रदिशः पृथिव्याः स्वस्तिभिरति दुर्गाणि विश्वा ।
स्वां प्रजां बृहदुक्थो महित्वावरेष्वदधादा परेषु ॥७॥
नावा । न । क्षोदः । प्रऽदिशः । पृथिव्याः । स्वस्तिऽभिः । अति । दुःऽगानि । विश्वा ।
स्वां । प्रऽजां । बृहत्ऽउक्थः । महिऽत्वा । आ । अवरेषु । अदधात् । आ । परेषु ॥७॥

नावा नोदकोत्तरणसाधनेनेव चोद उदकं यथा मनुष्या नावोदकमतितरंति यथा वा स्वस्तिभिः क्षेमैर्विश्वा सर्वाणि दुर्गाणि दुःखेन गंतव्यान्यतितरंति तद्वद्बृहदुक्थः स्वां प्रजां वाजिनं मृतं पुत्रं महित्वा स्वमहत्त्वेनावरेष्वग्न्यादिष्वादधात् । कृतवान् । तदा परेषु दिव्येषु सूर्यादिष्वादधात् । एवमृषिर्ब्रूते स्वयमेव वा स्वात्मानं परोक्षेणाह ॥ ॥१८॥

मा प्र गामेति षड्चं पंचदशं सूक्तं गायत्रं वैश्वदेवं । ऐक्ष्वाकोऽसमातिर्नाम राजा । तस्य बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधुश्चेति चत्वारः पुरोहिता आसन् । ते च गौपायनाः । स च राजा तांस्त्यक्त्वान्यौ मायाविनावृषी पुरोहितत्वेनावृणीत । ततो बंध्वादयः क्रुद्धाः संत इमं राजानमभिचरितवंतः । एतज्ज्ञात्वा मायाविनौ पुरोहितावेषामन्यतमं सुबंधुं प्राणैर्वियोजितवंतौ । मृतस्यास्य भ्रातरो बंधुः श्रुतबंधुर्विप्रबंधुरित्येतेऽविनाशप्राप्तिहेतुभूतमिदं दृष्ट्वा जपंति स्म । अतस्तेऽस्य सूक्तस्यर्षयः । प्रतिपाद्यत्वादावर्तमानं मनो देवता । तथा चानुक्रांतं । अथ हैक्ष्वाको राजासमातिर्गौपायनान्बंध्वादीन्पुरोहितांस्त्यक्त्वान्यौ मायाविनौ श्रेष्ठतमौ मत्वा पुरोदधे तमितरे क्रुद्धा अभिचेरुः अथ तौ मायाविनौ सुबंधोः प्राणानाचिच्छिषतुरथ ह्यस्य भ्रातरस्त्रयो मा प्र गामेति षट्कं गायत्रं स्वस्त्ययनं जप्त्वेति ॥ अग्निसमीपाद्देशांतरगमनसमय इदं सूक्तं जप्यं । सूचितं च । प्रव्रजेदनपेक्षमाणो मा प्र गामेति सूक्तं जपन् । आ० २. ५. । इति ॥ महापितृयज्ञेऽप्येतदृत्विग्भिर्जप्यं । सूचितं च । मा प्र गामाग्ने त्वं न इति जपंतः । आ० २. १९. । इति ॥ निविद्ः स्थानातिपत्तौ विदं सूक्तं ग्रस्त्वा सूक्तांतरे निवित्प्रवेशनत्वा । सूचितं च । स्थानं चेन्निविदोऽतिहरेन्मा प्र गामेति पुरस्तात्सूक्तं ग्रस्त्वा । आ० ६. ६. । इति ॥

मा प्र गाम पथो वयं मा यज्ञादिंद्र सोमिनः । मांतः स्युर्नो अरातयः ॥१॥
मा । प्र । गाम् । पथः । वयं । मा । यज्ञात् । इंद्र । सोमिनः । मा । अंतरिति । स्युः ।
नः । अरातयः ॥१॥

अत्रोक्ताख्याने शाट्यायनकं । असमातिं राथप्रौष्ठं गौपायना अभ्यगमंस्ते खांडवे सत्त्रमासताथ ह्यसमातौ राथप्रौष्ठे किलाताकुली ऊषतुरसुरमायौ तं ह स्नानयौ निधायौदनं पचतोऽग्नौ मांसमथासुरान्नं दग्ध्वेत्याकवः पराबभूवुः । तमसमातिं राथप्रौष्ठं गौपायनानामाद्रुतयोऽभ्यतपन् सोऽब्रवीदिमौ किलाताकुली इमा वै मा गौपायनानामाद्रुतयोऽभितपंतीति तावब्रूतां तस्य वा आवामेव भिषजौ स्व आवां प्रायश्चित्तिरावां तथा करिष्यावो यथा त्वेता नाभितपंतीति । तौ परेत्य सुबंधोर्गौपायनस्य स्वपतः प्रमत्तस्यासुमाद्रुत्वांतःपरिधि न्यधत्तामित्यादि । तं सुबंधोरसुमादातुं खांडवादसमातिं प्रतिगच्छंतो गौपायना वदंति । हे

इंद्र वयं गौपायनाः पथः समीचीनान्मार्गान्मा प्र गाम । मा परागच्छाम । असमातिगृहमेव गच्छाम । मा च सोमिनोऽसमातेर्यज्ञात्प्र गाम । मा स्थुर्मा तिष्ठंतु नोऽस्माकमंतर्मार्गमध्येऽरातयः शत्रवः । यद्वा । सोमिनः सोमवतो यागान्मा प्र गाम ॥

यो यज्ञस्य प्रसाधनस्तंतुर्देवेष्वाततः । तमाहुतं नशीमहि ॥२॥

यः । यज्ञस्य । प्रऽसाधनः । तंतुः । देवेषु । आऽततः । तं । आऽहुतं । नशीमहि ॥२॥

योऽयमग्न्याख्यस्तंतुराहवनीयादिरूपेण विसृतो यज्ञस्य प्रसाधनः प्रकर्षेण साधयिता देवैः स्तोतृभिर्ऋत्विग्भिर्विस्तारितो वर्तते वेद्यां तमाहुतं सर्वतो ह्रियमाणं नशीमहि । प्राप्नुयाम । नशतिर्व्याप्तिकर्मा ॥

पिंडपितृयज्ञे मनो न्वा हुवामह इति तृचेन पिंडाभिमानिनः पितर उपस्थेयाः । सूचितं च । मनो न्वा हुवामह इति चतसृभिरृचैनान्प्रवाहयेत् । आ० २. ७. । इति ॥

मनो न्वा हुवामहे नाराशंसेन सोमेन । पितॄणां च मन्मभिः ॥३॥

मनः । नु । आ । हुवामहे । नाराशंसेन । सोमेन । पितॄणां । च । मन्मऽभिः ॥३॥

वयं बंधुश्रुतबंध्वाद्यो मनः सुबंधोः संबंधि मायाविभिरपहृतं नु क्षिप्रमा हुवामहे । केन साधनेनेति तदुच्यते । नाराशंसेन नराशंसचमसगतेन सोमेन । नरैः शस्यंत इति नराशंसाः पितरः । तेषां चमसानां कंपनमेव होमः । तथाविधेन सोमेन पितॄणामंगिरसां मन्मभिर्मननीयैः स्तोत्रैश्च ॥

आ त एतु मनः पुनः क्रत्वे दक्षाय जीवसे । ज्योक्च सूर्यं दृशे ॥४॥

आ । ते । एतु । मनः । पुनरिति । क्रत्वे । दक्षाय । जीवसे । ज्योक् । च । सूर्यं । दृशे ॥४॥

हे सुबंधो ते मनः पुनरेतु । अभिचरतः सकाशात्पुनरागच्छतु । किमर्थमिति उच्यते । क्रत्वे कर्मणे लौकिकवैदिकविषयाय दक्षाय बलाय च । यद्वा । क्रत्वेऽपानाय दक्षाय प्राणाय । प्राणो वै दक्षोऽपानः क्रतुरिति हि श्रुतिः । जीवसे जीवनाय च ज्योक्च चिरकालं सूर्यं दृशे सूर्यं द्रष्टुं । अत्यंतचिरजीवनायेत्यर्थः ॥

पुनर्नः पितरो मनो ददातु दैव्यो जनः । जीवं व्रातं सचेमहि ॥५॥

पुनः । नः । पितरः । मनः । ददातु । दैव्यः । जनः । जीवं । व्रातं । सचेमहि ॥५॥

नोऽस्माकं पितरः पितृभूता अंगिरसो जनः । तेषां संघ इत्यर्थः । स च जीवं व्रातं प्राणादींद्रियसंघातं पुनर्ददातु । तथा दैव्यो जनः । जनशब्दः संघवचनः । देवानां संघोऽपि जीवं व्रातं च ददातु । वयं च तदुभयं सचेमहि । प्राप्नुयाम ॥

वयं सोम व्रते तव मनस्तनूषु बिभ्रतः । प्रजावंतः सचेमहि ॥६॥

वयं । सोम । व्रते । तव । मनः । तनूषु । बिभ्रतः । प्रजाऽवंतः । सचेमहि ॥६॥

हे सोम देव वयं बंध्वाद्यस्तव व्रते त्वदीये कर्मणि । व्रतमिति कर्मनाम । तव तनूषु त्वदीयेष्वंगेषु च मनो बिभ्रतस्तात्पर्ययुक्तां बुद्धिं धारयंतः प्रजावंतः प्रजाभिः पुत्रपौत्रादिभिर्युक्ताः सचेमहि । संगच्छेमहि । जीवं व्रातं चेति शेषः ॥ ॥१९॥

यत्ते यममिति द्वादशर्चं षोडशं सूक्तमानुष्टुभं । बंध्वाद्य ऋषयः सुबंधुर्देहान्निर्गतस्येंद्रियवर्गसहितस्य मनसः पुनस्तस्मिन्प्रवेशनार्थमिदं सूक्तं दृष्ट्वाजपत् । अतस्तेऽस्यर्षयः । प्रतिपाद्यत्वादावर्तमानं मन एव देवता । तथा चानुक्रांतं । यत्त इति द्वादशर्चमानुष्टुभं मनआवर्तनं त्रैपुरिति ॥ मतो विनियोगः ॥

यत्ते यमं वैवस्वतं मनो जगाम दूरकं। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥१॥
यत्। ते। यमं। वैवस्वतं। मनः। जगाम। दूरकं। तत्। ते। आ। वर्तयामसि। इह। क्षयाय। जीवसे ॥१॥

पुरुषस्य म्रियमाणस्य मनो नाम महद्भूतं बहुधा विशीर्णं भवति। तस्य पुनःसंभरणमत्रोच्यते। हे म्रियमाण पुरुष यत्ते तव मनो वैवस्वतं विवस्वतः पुत्रं यमं दूरकमत्यंतं दूरं यथा भवति तथा जगाम ते तव तत्मन आ वर्तयामसि। आवर्तयामः। किमर्थं। इह यायेह लोके निवासाय जीवसे। चिरकालजीवनायेत्यर्थः ॥

यत्ते दिवं यत्पृथिवीं मनो जगाम दूरकं। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥२॥
यत्। ते। दिवं। यत्। पृथिवीं। मनः। जगाम। दूरकं। तत्। ते। आ। वर्तयामसि। इह। क्षयाय। जीवसे ॥२॥

हे सुबंधो यन्मनो दिवं जगाम यच्च पृथिवीं दूरकं। दूरकमिति क्रियाविशेषणं। तदिह निवासाय जीवनाय चावर्तयामः ॥

यत्ते भूमिं चतुर्भृष्टिं मनो जगाम दूरकं। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥३॥
यत्। ते। भूमिं। चतुःऽभृष्टिं। मनः। जगाम। दूरकं। तत्। ते। आ। वर्तयामसि। इह। क्षयाय। जीवसे ॥३॥

हे सुबंधो यन्मनो भूमिं चतुर्भृष्टिं। चतुर्दिक्षु भंगो यस्याः सा। तां जगाम तदावर्तयामः ॥

यत्ते चतस्रः प्रदिशो मनो जगाम दूरकं। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥४॥
यत्। ते। चतस्रः। प्रऽदिशः। मनः। जगाम। दूरकं। तत्। ते। आ। वर्तयामसि। इह। क्षयाय। जीवसे ॥४॥

हे सुबंधो यत्ते मनः प्रदिशः प्रकृष्टा महादिशश्चतस्रो जगाम तदावर्तयामः ॥

यत्ते समुद्रमर्णवं मनो जगाम दूरकं। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥५॥
यत्। ते। समुद्रं। अर्णवं। मनः। जगाम। दूरकं। तत्। ते। आ। वर्तयामसि। इह। क्षयाय। जीवसे ॥५॥

हे सुबंधो यत्ते मनोऽर्णवं। अर्णांस्युदकानि। तद्वंतं समुद्रं मेघं वा जगाम तदावर्तयामः ॥

यत्ते मरीचीः प्रवतो मनो जगाम दूरकं। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥६॥
यत्। ते। मरीचीः। प्रऽवतः। मनः। जगाम। दूरकं। तत्। ते। आ। वर्तयामसि। इह। क्षयाय। जीवसे ॥६॥

हे सुबंधो यत्ते मनः प्रवतः प्रगच्छंतीर्मरीचीर्दीप्तीर्जगाम तदिति गतं ॥ ॥२०॥

यत्ते॒ अपो॒ यदोष॑धीर्मनो॒ जगा॑म दू॒रक॑म्। तत्त॒ आ व॑र्तयामसीह॒ क्षया॑य जी॒वसे॑ ॥७॥
यत्। ते॒। अपः॑। यत्। ओष॑धीः। मनः॑। जगा॑म। दू॒रक॑म्। तत्। ते॒। आ। व॒र्त॒या॒म॒सि॒। इ॒ह। क्षया॑य। जी॒वसे॑ ॥७॥

यत्ते॒ सूर्य॑ यदु॒षस॑ मनो॒ जगा॑म दू॒रक॑म्। तत्त॒ आ व॑र्तयामसीह॒ क्षया॑य जी॒वसे॑ ॥८॥
यत्। ते॒। सूर्य॑। यत्। उ॒षस॑। मनः॑। जगा॑म। दू॒रक॑म्। तत्। ते॒। आ। व॒र्त॒या॒म॒सि॒। इ॒ह। क्षया॑य। जी॒वसे॑ ॥८॥

यत्ते॒ पर्व॑तान्बृह॒तो मनो॒ जगा॑म दू॒रक॑म्। तत्त॒ आ व॑र्तयामसीह॒ क्षया॑य जी॒वसे॑ ॥९॥
यत्। ते॒। पर्व॑तान्। बृ॒ह॒तः। मनः॑। जगा॑म। दू॒रक॑म्। तत्। ते॒। आ। व॒र्त॒या॒म॒सि॒। इ॒ह। क्षया॑य। जी॒वसे॑ ॥९॥

यत्ते॒ विश्व॒मिदं॒ जग॒न्मनो॒ जगा॑म दू॒रक॑म्। तत्त॒ आ व॑र्तयामसीह॒ क्षया॑य जी॒वसे॑ ॥१०॥
यत्। ते॒। विश्व॑म्। इ॒दम्। जग॑त्। मनः॑। जगा॑म। दू॒रक॑म्। तत्। ते॒। आ। व॒र्त॒या॒म॒सि॒। इ॒ह। क्षया॑य। जी॒वसे॑ ॥१०॥

चतस्र ऋचो निगदसिद्धाः ॥

यत्ते॒ परा॑ः परा॒वतो॒ मनो॒ जगा॑म दू॒रक॑म्। तत्त॒ आ व॑र्तयामसीह॒ क्षया॑य जी॒वसे॑ ॥११॥
यत्। ते॒। परा॑ः। परा॑ऽवतः। मनः॑। जगा॑म। दू॒रक॑म्। तत्। ते॒। आ। व॒र्त॒या॒म॒सि॒। इ॒ह। क्षया॑य। जी॒वसे॑ ॥११॥

हे सुबंधो यत्ते मनः पराः परावतोऽत्यंतं दूरदेशाज्जगाम तदिति गतं ॥

यत्ते॒ भूतं॑ च भव्यं॑ च॒ मनो॒ जगा॑म दू॒रक॑म्। तत्त॒ आ व॑र्तयामसीह॒ क्षया॑य जी॒वसे॑ ॥१२॥
यत्। ते॒। भूत॑म्। च॒। भव्य॑म्। च॒। मनः॑। जगा॑म। दू॒रक॑म्। तत्। ते॒। आ। व॒र्त॒या॒म॒सि॒। इ॒ह। क्षया॑य। जी॒वसे॑ ॥१२॥

हे सुबंधो यत्ते मनो भूतं च भव्यं चेत्यनेन भूतभव्यात्मकव्यतिरेकेण कस्यचिद्भावाद्वर्तमानस्य पृथगेवाभिधानात् क्षत्रं प्रपंचसूक्तं भवति । तत्र सर्वत्र गतं मनो जीवनाय निवासाय चावर्तयामः ॥ ॥२१॥

प्र तारीति दशर्चं सप्तदशं सूक्तं बंध्वादीनां चयाणां गौपायनानामार्षं । आदितः सप्त त्रिष्टुभः । अष्टमी पंचाष्टका पंक्तिः । नवमी षडष्टका महापंक्तिः । दशमी पंक्त्युत्तरा । आद्यौ दशकावष्टकास्त्रयः । अनु० ९. ११. । इत्युक्तलक्षणसद्भावात् । एकाक्षराधिक्याद्भूरिग्विशेषणेयं वेदितव्या । सूक्तस्यादितस्चतस्रो देहात्प्राणान्निर्गमयित्र्या निर्ऋतेर्निवृत्त्यर्थं बंध्वादयोऽजपन् । मो षु णः सोमेति चतुर्ष्वामेव मृत्युनिवृत्त्यर्थं सोममसुवन् । अतश्चतसृणां निर्ऋतिर्देवता चतुर्ष्वाः सोमश्च । असुनीते मन इति द्वाभ्यामसुनीतिनाम्नीं देवीमसुवन् अतस्तयोः सा देवता । पुनर्नो असुमित्यस्याः पृथिव्यावा लिंगोक्ता देवताः । ततस्त्रिष्टुभिः शिष्टाभिः पंक्तिमहापंक्तिपंक्त्युत्तराभिर्द्यावापृथिव्याविति द्यावापृथिव्यौ देवते । समिंद्रेत्यर्धर्चस्येंद्रो देवता । तथा चानुक्रांतं । प्र तारीति दशर्चं चतस्रो निर्ऋत्यपनोदनार्थं त्रेपुश्चतुर्ष्वा सोमं चासुवन्मृत्योरपगमायोत्तराभ्यां दैवीमसुनीतिं सप्तम्यां लिंगोक्तदेवताः शिष्टाभिः पंक्तिमहापंक्तिपंक्त्युत्तराभिर्द्यावापृथिव्यौ समिंद्रेतींद्रं चार्धर्चेनेति ॥ गतो विनियोगः ॥

प्र तार्यायुः प्रतरं नवीयः स्थातारेव क्रतुमता रथस्य ।
अध च्यवान उत्तवीत्यर्थे परातरं सु निर्ऋतिर्जिहीतां ॥१॥
प्र । तारि । आयुः । प्रऽतरं । नवीयः । स्थातारौऽइव । क्रतुऽमता । रथस्य ।
अध । च्यवानः । उत् । तवीति । अर्थे । पराऽतरं । सु । निःऽऋतिः । जिहीतां ॥१॥

सुबंधोरायुरायुषं प्र तारि । प्रवर्धतां । प्रपूर्वस्तिरतिर्वर्धनार्थः । कथं प्रवर्धतामिति उच्यते । प्रतरं प्रवृद्धतरं नवीयो नवतरं । यौवनोपेतमित्यर्थः । निर्ऋत्यनुग्रहादेवमायुर्वर्धतां । तत्र दृष्टांतः । क्रतुमता कर्मवता सारथिना रथस्य स्थातारेव रथे स्थितावेव वर्धेते तद्वत् । अधाथ च्यवानो जीवितात्प्रच्यवमानोऽर्थे स्वाभिलषितमायुर्लक्षणमुत्तवीति । वर्धयति । सुबंधुप्राणापहर्त्री निर्ऋतिः पापदेवता परातरमत्यंतं दूरतरं जिहीतां । परित्यजतु । गच्छतु ॥

सामन्नु राये निधिमन्वन्नं करामहे सु पुरुध श्रवांसि ।
ता नो विश्वानि जरिता ममत्तु परातरं सु निर्ऋतिर्जिहीतां ॥२॥
सामन् । नु । राये । निधिऽमत् । नु । अन्नं । करामहे । सु । पुरुध । श्रवांसि ।
ता । नः । विश्वानि । जरिता । ममत्तु । पराऽतरं । सु । निःऽऋतिः । जिहीतां ॥२॥

सामन्नु सान्नि गीयमाने सति । नु चार्थे । राये जीवायूरूपधनार्थं निधिमन्निधानवदन्नं हविश्च करामहे । कुर्मः । अत्र त्विति चार्थे । निर्ऋतेर्वै स्तुतिं हविश्चोभयं कुर्म इत्यर्थः । तदेवाह । सु सुष्ठु पुरुध पुरुधा बहुप्रकारं श्रवांस्यन्नानि हवींषि करामहे । ता तानि हवींषि नोऽस्माकं संबंधीनि विश्वानि सर्वाणि जरिता जीर्णा स्तुता वा । जरा स्तुतिः । नि० १०. ८. । ममत्तु । स्वदतां । आस्वाद्य च निर्ऋतिः परातरमत्यंतं दूरदेशं जिहीतां । गच्छतां ॥

अभी ष्व१र्यः पौंस्यैर्भवेम द्यौर्न भूमिं गिरयो नाजान् ।
ता नो विश्वानि जरिता चिकेत परातरं सु निर्ऋतिर्जिहीतां ॥३॥
अभि । सु । अर्यः । पौंस्यैः । भवेम । द्यौः । न । भूमिं । गिरयः । न । अजान् ।
ता । नः । विश्वानि । जरिता । चिकेत । पराऽतरं । सु । निःऽऋतिः । जिहीतां ॥३॥

वयमर्योऽरीन्शत्रून्पौंस्यैः पुंस्त्वैर्बलैः सु सुष्ठभि भवेम । द्यौर्न भूमिं सूर्यो यथा स्वरश्मिभिर्भूमिमभिभवति तद्वत् । गिरयो नाजान् । गिरिर्वज्रः । ते यथाजानजनशीलान्मेघानभिभवंति तद्वत् । ता तानि यानि नोऽस्माभिः कृतानि स्तोत्राणि तानि विश्वानि सर्वाणि जरिता स्तुता सती निर्ऋतिश्चिकेत । जानाति । शिष्टमुक्तं ॥

मो षु णः सोम मृत्यवे परा दाः पश्येम नु सूर्यमुच्चरंतं ।
द्युभिर्हितो जरिमा सू नो अस्तु परातरं सु निर्ऋतिर्जिहीतां ॥४॥
मो इति । सु । नः । सोम । मृत्यवे । परा । दाः । पश्येम । नु । सूर्यं । उत्ऽचरंतं ।
द्युऽभिः । हितः । जरिमा । सु । नः । अस्तु । पराऽतरं । सु । निःऽऋतिः । जिहीतां ॥४॥

हे सोम नोऽस्मान् सु सुष्ठु मृत्यवे मो परा दाः । मैव परादां कुरु । मृत्यधीनान्नोऽस्मान्मा कार्षीः । किंतु त्विदानीमुच्चरंतमूर्ध्वं गच्छंतमुदयंतं सूर्यं पश्येम । चिरकालं जीवेमेत्यर्थः । जीवाभावे सूर्यादर्शनादित्य-

भिप्रायः । किंच युष्मिः । अहर्नामैतत् । अहोभिर्दिवसैर्हितः प्रेरितो अरिमा अराभावो नोऽस्माकं सु सुखकरोऽस्तु । ग्रिष्टमुक्तं ॥

असुनीते मनो अस्मासु धारय जीवातवे सु प्र तिरा नु आयुः ।
रारंधि नः सूर्यस्य संदृशि घृतेन त्वं तन्वं वर्धयस्व ॥५॥
असुऽनीते । मनः । अस्मासु । धारय । जीवातवे । सु । प्र । तिर । नुः । आयुः ।
रारंधि । नः । सूर्यस्य । संऽदृशि । घृतेन । त्वं । तन्वं । वर्धयस्व ॥५॥

हे असुनीते मनुष्याणामसूनां नेचि देवि अस्मासु मनः पुनर्धारय । किंच जीवातवे जीवितुं सु प्र तिर सुष्ठु वर्धय नोऽस्माकमायुः । किंच रारंधि स्थापय नोऽस्मान् सूर्यस्य संदृशि चिरसंदर्शने । त्वं च घृतेनास्माभिर्दत्तेन तन्वं शरीरं वर्धय । वर्धयस्व ॥ ॥२२॥

असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगं ।
ज्योक् पश्येम सूर्यमुच्चरंतमनुमते मृळया नः स्वस्ति ॥६॥
असुऽनीते । पुनः । अस्मासु । चक्षुः । पुनरिति । प्राणं । इह । नः । धेहि । भोगं ।
ज्योक् । पश्येम । सूर्यं । उत्ऽचरंतं । अनुऽमते । मृळय । नः । स्वस्ति ॥६॥

हे असुनीते प्राणदायिनि देवि अस्मासु । अस्मदीये सुबंधावित्यर्थः । पुनश्चक्षुः प्रकाशकं नयनं । ईक्षणसामर्थ्यमित्यर्थः । किंच पुनः प्राणमस्मासु धेहि । स्थापय । वयं च ज्योक्चिरमुच्चरंतमुन्नच्छंतं सूर्यं पश्येम । हे अनुमते देवि स्वस्त्यविनाशं यथा स्यात्तथा नोऽस्मान्मृळय । सुखय ॥

पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुनरंतरिक्षं ।
पुनर्नः सोमस्तन्वं ददातु पुनः पूषा पथ्यां३ या स्वस्तिः ॥७॥
पुनरिति । नः । असुं । पृथिवी । ददातु । पुनरिति । द्यौः । देवी । पुनरिति । अंतरिक्षं ।
पुनरिति । नः । सोमः । तन्वं । ददातु । पुनरिति । पूषा । पथ्यां । या । स्वस्तिः ॥७॥

पृथिवी देवी नोऽस्मभ्यमसुं प्राणं ददातु पुनः । द्यौर्देवतासुं ददातु । तथांतरिक्षमंतरिक्षदेवतासुं ददातु । तथा सोमो नस्तन्वं शरीरं पुनर्ददातु । तथा पूषा पोषाभिमानिनी देवता पथ्यां । पंथा अंतरिक्षं । निं० ११. ४५. । तत्र भवां वाचं । वागात्मकः शब्दो ह्याकाशादुत्पद्यते । तां पुनर्ददातु । किंच या स्वस्तिर्या लोके वेदे च स्वस्तिरुच्यते तामपि पूषा प्रयच्छतु । यद्वा । पूषा पोषं प्रयच्छतु । या स्वस्तिर्वाग्मयी देव्यस्ति सा पथ्यां वाचं प्रयच्छतु । वाग्वै पथ्या स्वस्तिः । शत० ३. २. ३. ८. । इति ब्राह्मणं ॥

शं रोदसी सुबंधवे यह्वी ऋतस्य मातरा ।
भरंतामप यद्रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं चनाममत् ॥८॥
शं । रोदसी इति । सुऽबंधवे । यह्वी इति । ऋतस्य । मातरा ।
भरंतां । अप । यत् । रपः । द्यौः । पृथिवि । क्षमा । रपः । मो इति । सु । ते । किं ।
चन । आममत् ॥८॥

इदमादिभिस्तिसृभिर्द्यावापृथिव्योः स्तुतिः । रोदसी द्यावापृथिव्यौ सुबंधवे शं सुखं प्रयच्छतां । कीदृश्यौ ते । यद्वी महत्यौ ऋतस्य यज्ञस्योदकस्य वा मातरा निर्मात्र्यौ । यद्रपः पापं द्यक्ष्मस्ति तदप भरतां । अपहरतां । अपनयतां । हे द्यौः हे पृथिवि हे द्यावापृथिव्यौ क्षमा क्षमायां सत्यां । यद्वा । क्षमा पृथग्युच्यते । क्षमाप्यपहरतु । एवमुक्ता सुबंधुं बंध्वादयो ब्रुवते । हे सुबंधो ते त्वां मो षु मैव सु सुष्ठु किं चन परं रपः द्यक्ष्मामामत् । हिनस्तु ॥

अव द्वके अव चिका दिवश्चरंति भेषजा ।
क्षमा चरिष्ण्वेककं भरतामप यद्रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं चना-
मंमत् ॥९॥

अव । द्वके इति । अव । चिका । दिवः । चरंति । भेषजा ।
क्षमा । चरिष्णु । एककं । भरतां । अप । यत् । रपः । द्यौः । पृथिवि । क्षमा । रपः ।
मो इति । सु । ते । किं । चन । आममत् ॥९॥

दिवो द्युलोकाच्छेषजा भेषजानि द्वके द्विकं चिका चिकं चाव चरंति । अचाश्विनौ द्विकमवचरतः । इळा सरस्वती भारती चिकमवचरंति । क्षमा क्षमायां चरिष्णु चरत्येककमेकं भेषजमित्यभिप्रायमाह । तानि सर्वाणि सुबंधोः प्राणं रक्षंतिति शेषः ॥

समिंद्रेरय गामनड्वाहं य आवहदुशीनराण्या अनः ।
भरतामप यद्रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं चनाममत् ॥१०॥
सं । इंद्र । ईरय । गां । अनड्वाहं । यः । आ । अवहत् । उशीनराण्याः । अनः ।
भरतां । अप । यत् । रपः । द्यौः । पृथिवि । क्षमा । रपः । मो इति । सु । ते । किं ।
चन । आममत् ॥१०॥

हे इंद्र समीरय प्रेरय । किं । गां गंतारमनड्वाहमनोवहनसमर्थं । योऽनड्वानावहत् आवहत्यस्मान्प्रति । किं । अनः शकटं । कस्य । उशीनराण्या एतन्नामिकाया ओषधेः । ययार्तमनुलिंपंति सोशीनराणी । भरतामित्यादि गतं ॥ ॥२३॥

आ जनमिति द्वादशर्चमष्टादशं सूक्तं । गौपायना बंध्वादय ऋषयः । षष्यास्त्वगस्त्यस्य स्वसैषां मातर्यिका । आदितः पंच गायत्र्यः । अष्टमीनवम्यौ पंक्ती शिष्टा अनुष्टुभः । आदितस्तनूनामसमातिनाम्नो राज्ञः स्तूयमानत्वात् स एव देवता । पंचम्या इंद्रः । षष्ठ्या अप्यसमातिः । ततः पंचानां सुबंधोर्जीविताङ्गानरूपो ऽर्थो देवता । अयं मे हस्त इत्यस्या लब्धसंज्ञस्य सुबंधोः स्पर्शनहेतुभूतो देवता । तथा चानुक्रांतं । आ जनमिति द्वादशर्चमानुष्टुभं चतसृभिरसमातिमसुवन्पंचम्येंद्रं षष्ठ्यागस्त्यस्य स्वसा मातैषां राजानमस्तौत्पराभिः सुबंधोर्जीवमाङ्गयंसमंत्रया लब्धसंज्ञमसृग्रन् पंचम्यावा गायत्र्योऽष्टम्यावे पंक्ती इति ॥

आ जनं त्वेषसंदृशं माहीनानामुपस्तुतं । अगन्म बिभ्रतो नमः ॥१॥
आ । जनं । त्वेषऽसंदृशं । माहीनानां । उपऽस्तुतं । अगन्म । बिभ्रतः । नमः ॥१॥

इदमादिभिस्तिसृभी राजानं स्तुवंति । वयं बंध्वादयो जनं जनपदमसुनीतिस्वभूतमागन्म । अभिगताः ॥ गमेर्लुङि मंत्रे घसेति च्लेर्लुक् । ग्लोरिति मकारस्य नकारः ॥ कीदृशं जनं । त्वेषसंदृशं दीप्तदर्शनं माहीनानां महतामुपस्तुतमुपगतस्तुतिं ॥ तादौ चेति गतेः प्रकृतिस्वरः ॥ कीदृशा वयं । नमो नमस्कारं बिभ्रतो धारयंतः ।

कुर्वंत इत्यर्थः । यद्वा । जनमसमातिमित्यर्थः । शिष्टं समानं । नमो विधत इति राजन्ति नमस्कारं धारयंत इत्यर्थः ॥

असमातिं नितोशनं त्वेषं नियुयिनं रथं । भजेरथस्य सत्पतिं ॥२॥
असमातिं । निऽतोशनं । त्वेषं । निऽयुयिनं । रथं । भजेऽरथस्य । सत्ऽपतिं ॥२॥

असमातिं राजानं नितोशनं शत्रूणां हंतारं । नितोशतिर्वधकर्मा । त्वेषं दीप्तं । नियुयिनं रथमित्युपमाप्रधानो निर्देशः । रथवत्सर्वाभिमतप्राप्तिसाधनं भजेरथस्येतन्नामकस्य राज्ञो वंशे जातं । यद्वा । एतन्नामा कश्चिदस्य शत्रुः । तस्य नियुयिनं ॥ हलदंतात् । पा० ६. ३. ९. । इति सप्तम्या अलुक् ॥ सत्पतिं सतां पालकं ॥

यो जनान्महिषाँ इवातितस्थौ पवीरवान् । उतापवीरवान्युधा ॥३॥
यः । जनान् । महिषान्ऽइव । अतिऽतस्थौ । पवीरवान् । उत । अपवीरवान् । युधा ॥३॥

योऽसमातिर्जनान् स्वविरोधिभूतानतितस्थौ अतिक्रम्य तिष्ठति । पराभावयतीत्यर्थः । क इव । महिषान् सिंह इव । कीदृशः सन् । पवीरवान् । पवीरः पविः । खड्गवान् । उतापि चापवीरवानपगतखड्गः सन् । शस्त्रसाहाय्यमपि कदाचिन्नापेक्षत इत्यर्थः । किं कुर्वन् । युधा योधनेन । युद्धेत्यर्थः ॥

यस्येक्ष्वाकुरुप व्रते रेवान्मराय्येधते । दिवीव पंच कृष्टयः ॥४॥
यस्य । इक्ष्वाकुः । उप । व्रते । रेवान् । मरायी । एधते । दिविऽइव । पंच । कृष्टयः ॥४॥

यस्य जनपदस्येक्ष्वाकू राजा व्रते कर्मणि रक्षणरूप उपैधते । प्रवर्धते । कीदृशः सन् । रेवान्प्रियवान् मरायी शत्रूणां मारकश्च सन् । विशेषणद्वयेन जनानां दानादिरूपेण धनलाभः पररात्रोपद्रवापत्तिश्चोक्ता भवति । एवं सति तद्विषयस्थाः पंच कृष्टयो निषादपंचमाश्चत्वारो वर्णा दिवीव द्युलोके यथा संकल्पसिद्धाः संतः सुखिनो भवंति तद्वत्सुखिनो भवंतीति शेषः ॥

इंद्र क्षचासमातिषु रथप्रोष्ठेषु धारय । दिवीव सूर्यं दृशे ॥५॥
इंद्र । क्षचा । असमातिषु । रथऽप्रोष्ठेषु । धारय । दिविऽइव । सूर्यं । दृशे ॥५॥

अनयेंद्रमाद्रियतेऽसमात्यर्थं । हे इंद्र क्षचा क्षत्राणि बलानि रथप्रोष्ठेष्वसमातिषु ॥ एकस्मिन्बहुवचनं पूजार्थं ॥ रथप्रोष्ठेऽसमातौ धारय । दिवीव सूर्यं दिवि यथा सूर्यं दृशे सर्वेषां संदर्शनाय स्थापितवानसि तद्वदत्र बलं धारय ॥

अगस्त्यस्य नप्त्यः सप्ती युनक्षि रोहिता । पणीन्त्यक्रमीरभि विश्वान्राजन्नराधसः ॥६॥
अगस्त्यस्य । नप्त्ऽभ्यः । सप्ती इति । युनक्षि । रोहिता । पणीन् । नि । अक्रमीः । अभि । विश्वान् । राजन् । अराधसः ॥६॥

अनयागस्त्यस्य स्वसा बंध्वादीनां माता राजानं स्तौति । हे राजन्नसमाते स्वमगस्त्यस्यर्षेर्नप्त्र्यो नंदयितृभ्यो बंध्वादिभ्यो निमित्तभूतेभ्यस्तेषां धनप्राप्तये सप्ती सर्पणस्वभावावश्वौ रोहिता रोहितवर्णौ युनक्षि । योजय रथे । तथा कृत्वा विश्वान् सर्वानराधसोऽदातॄनयजमानान्पणीन्वणिजो लुब्धकान्नि निकृष्टं नितरां वाभक्रमीः । अभिभव ॥ ॥२४॥

अयं मातायं पितायं जीवातुरागमत्। इदं तव प्रसर्पणं सुबंधवेहि निरिहि ॥७॥
अयं। माता। अयं। पिता। अयं। जीवातुः। आ। अगमत्। इदं। तव। प्रऽसर्पणं।
सुबंधो इति सुऽबंधो। आ। इहि। निः। इहि ॥७॥

अत्र शेषे ग्राव्यायनकं। अथाग्निं द्वैपदेन सूक्तेनासुवन्। अग्निः सुत आजगाम। आगत्य चाह किंकामा मागच्छतेति। सुबंधोरेवासुं पुनर्वसुयामेत्यब्रुवन्। एषांतःपरिधीत्यब्रवीत्तमाद्ब्रह्मेति। तन्निराह। अयं मातायं पितेति। शौनकश्च।

सुतः स राजा सुप्रीतस्त्वष्टा गौपायनानभि। सूक्तेन तेऽसुवन्नग्निं द्वैपदेन यथाविधु ॥
अथाग्निरब्रवीदेतानयमंतःपरिधिसुः। सुबंधोरस्य चेत्त्वाकीर्मया गुप्तो हितार्थिना ॥
सुबंधवे प्रदायासुं जीवेत्युक्त्वा च पावकः। सुतो गौपायनैः प्रीतो जगाम चिदिवं प्रति ॥
अयं मातेति हृष्टास्ते सुबंधोरसुमाहृयन्। शरीरमभिनिर्दिश्य सुबंधोः पतितं भुवि ॥
सूक्तशेषं जगुश्चास्य चेतसो धारणाय ते। बृ० ७. १०७२-१०७६.। इति ॥

अयमग्निर्माता। अयमेव पिता। अयं जीवातुर्जीवयितागमत्। आजगाम। अतो हे सुबंधो जीवपरिधौ वर्तमान इदं तव शरीरं तव प्रसर्पणं प्रकर्षेण सर्पणसाधनं। अत इदं प्रत्येहि। आगच्छ। निरिहि। निर्गच्छ परिधेः सकाशात्। अन्य एवं व्याचक्षते। हे निर्गतप्राण सुबंधो अयं॥ विभक्तिव्यत्ययः॥ इयं मातायं पितायं जीवातुर्जीवनफलभूतः पुत्रश्चागमदिति संबध्यते। सर्वे त्वामागता दुःखिताः संतः। शिष्टं समानं॥

यथा युगं वरत्रया नह्यंति धरुणाय कं।
एवा दाधार ते मनो जीवातवे न मृत्यवेऽथो अरिष्टतातये ॥८॥
यथा। युगं। वरत्रया। नह्यंति। धरुणाय। कं।
एव। दाधार। ते। मनः। जीवातवे। न। मृत्यवे। अथो इति। अरिष्टऽतातये ॥८॥

यथा युगं वरत्रया पाशेन नह्यंति बध्नंति धरुणाय रथादिधारणाय। कमिति पादपूरणः। एवैवं ते मनो दाधार परिधावग्निः। किमर्थं। जीवातवे जीवनाय न मृत्यवे मरणाय न अथो अपि चारिष्टतातये ऽविनाशाय॥ स्वार्थिकस्तातिः॥

यथेयं पृथिवी मही दाधारेमान्वनस्पतीन्।
एवा दाधार ते मनो जीवातवे न मृत्यवेऽथो अरिष्टतातये ॥९॥
यथा। इयं। पृथिवी। मही। दाधार। इमान्। वनस्पतीन्।
एव। दाधार। ते। मनः। जीवातवे। न। मृत्यवे। अथो इति। अरिष्टऽतातये ॥९॥

यथेयं पृथिवी महीमान्वनस्पतीन्वृक्षादीन्दाधार। शिष्टमुक्तं॥

यमाद्हं वैवस्वतात्सुबंधोर्मन आभरं। जीवातवे न मृत्यवेऽथो अरिष्टतातये ॥१०॥
यमात्। अहं। वैवस्वतात्। सुऽबंधोः। मनः। आ। अभरं। जीवातवे। न। मृत्यवे।
अथो इति। अरिष्टऽतातये ॥१०॥

इयं निगदसिद्धा॥

न्य१ग्वातोऽवं वाति न्यक्तपति सूर्यः । नीचीनमघ्या दुहे न्यग्भवतु ते रपः ॥११॥
न्यक् । वातः । अवं । वाति । न्यक् । तपति । सूर्यः । नीचीनं । अघ्या । दुहे । न्यक् । भवतु । ते । रपः ॥११॥

वातो वायुर्युलोकान्न्यग्नीचीनमव वाति । गच्छति । सूर्यश्च न्यक् तपति । अघ्याहननीया गौर्नीचीनं दुहे । दुग्धे । एवं ते रपः पापं न्यग्नीचीनं भवतु ॥

अयं मे हस्तो भगवानयं मे भगवत्तरः । अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः ॥१२॥
अयं । मे । हस्तः । भगऽवान् । अयं । मे । भगवत्ऽतरः । अयं । मे । विश्वऽभेषजः । अयं । शिवऽअभिमर्शनः ॥१२॥

अनया बंध्वादयो लब्धजीवं सुबंधुं पाणिभिरसृशन् । अयं मे हस्तो भगवान् यस्मात्सजीवं सुबंधुं स्पृशति तस्मात् । तथायं मे हस्तो भगवत्तरः । अतिशयेन भगवान् । तथायं मे हस्तो विश्वभेषजो जीवचिकित्सासाधनसर्वौषधवान् तत्स्थानीयो वा । अयं शिवाभिमर्शनो मंगलस्पर्शनः । यतो जीवंतं स्पृशत्यत इत्यर्थः ॥ ॥२५॥ ॥४॥

पंचमेऽनुवाकेऽष्टौ सूक्तानि । तत्रेदमित्येति सप्तविंशत्यृचं प्रथमं सूक्तं मानवस्य नाभानेदिष्ठस्यार्षं वैष्टुभं । इदमादीनि षट् सूक्तानि वैश्वदेवानि । तथा चानुक्रांतं । इदमित्या सप्ताधिका नाभानेदिष्ठो मानवो वैश्वदेवं तदिति ॥ पृष्ठ्यस्य षष्ठेऽहनि वैश्वदेवशस्त्र आभिप्लविकातिदेशप्राप्तस्योषासानक्तेत्यस्य स्थाने इदं सूक्तं । सूचितं च । उद्वृत्य चोत्तमं सूक्तं चीणीदमित्या रौद्रमिति । आ० ८. १. इति ॥ अथैतरेयब्राह्मणं । नाभानेदिष्ठं वै मानवं ब्रह्मचर्यं वसंतं भ्रातरो निरभजंत्सोऽब्रवीदेत्य किं मह्यमभागैत्येतमेव निष्ठावमववदितारमित्यब्रुवन्नित्यादि । ऐ० ब्रा० ५. १४. ॥ तत्र नाभानेदिष्ठो भ्रातृभिर्भागे निराकृतः पितुसमीप्यमागत्य किं मह्यं भागं न व्यलिप्तवानसीत्यपृच्छत् । स च किमनेन भागेन । अंगिरसः स्वर्गार्थं सत्त्रमासीनाः षष्ठाहःपर्यंतमनुष्ठाय मुह्यंति । तानिदमित्येति सूक्ते शंसय ते स्वर्गं यंतो वसिष्ठा गाः सहस्रसंख्याकान्दास्यंतीति पित्रा प्रेरितोऽंगिरसां समीपमागत्य तेभ्यः सत्त्रपरिवेषणं गोसहस्रमुत्कोचं परिकल्प्य तानेते सूक्ते षष्ठेऽहन्यशंसयत् । ते च तत्सूक्तसामर्थ्याद्यज्ञं पारं प्रापय्य स्वर्जिगमिषवोऽस्मै गोसहस्रं प्रादुः । तं च तन्नोसहस्रं स्वीकुर्वाणं कञ्चन कृष्णशवासी पुरुष उत्तरत उत्थाय ब्राह्मण मदीयं यज्ञशेषभागं मा स्वीकुर्वित्यब्रवीत् । स च मह्यमंगिरसः प्रादुरिति प्रत्यब्रवीत् । तर्हि ब्राह्मण तव पितरमेव पृच्छ कस्मै भागः प्राप्नुयादित्युक्तः पितुसमीपमागत्य पित्रा रुद्रायायं न्याय्य इति तेनोक्तस्तवैवायं भाग इति मम पिताब्रवीदिति प्रत्युवाच । ततो यथार्थकथनेन तुष्टः पुरुषो नाभानेदिष्ठायैव स्वं भागं प्रादादित्युक्तं ॥ तथाध्वर्युब्राह्मणेऽपि मनुः पुत्रेभ्यो दायं व्यभजत् स नाभानेदिष्ठं । तै० सं० ३. १. ९. ४. । इत्यादिनायमर्थ उक्तः । तत्सर्वमत्रानुसंधेयं ॥

इदमित्था रौद्रं गूर्तवचा ब्रह्म कृत्वा शच्यामंतराजौ ।
क्राणा यदस्य पितरा मंहनेष्टा: पर्षत्पक्थे अहन्ना सप्त होतॄन् ॥१॥
इदं । इत्था । रौद्रं । गूर्तऽवचाः । ब्रह्म । कृत्वा । शच्यां । अंतः । आजौ । क्राणा । यत् । अस्य । पितरा । मंहनेऽस्याः । पर्षत् । पक्थे । अहन् । आ । सप्त । होतॄन् ॥१॥

गूर्तवचा उद्यतवचनो नाभानेदिष्ठ इदं ब्रह्म स्तोत्रं रौद्रं रुद्रप्रणीतमित्येत्यमिदानींक्रियमाणप्रकारं कृत्वा प्रज्ञानेन निष्पाद्य स्तोत्रं शच्यामंतः कर्मणि सत्त्रमध्य आजावंगिरसां संघे करोतीति शेषः । यत्स्तोत्रं क्राणा भागं कुर्वाणा भागं कुर्वाणावस्य पितरा पितरावन्ये च मंहनेष्टा भागप्रदाने वर्तमाना भ्रातरस्य गोलाभसाधनत्वेनाकल्पयन्निति शेषः । तेन नाभानेदिष्टः पक्थे पक्तव्येऽहन्नहनि । षष्ठेऽहनीत्यर्थः । ते षष्ठंषष्ठमेवाहरारभ्य

मुह्यंति तानेते सूक्ते षष्ठेऽहनि शंसंत्य। ऐ० ब्रा० ५. १४.। इत्युक्तत्वात्। सप्त होतृन् होतृप्रशास्तृब्राह्मणाच्छंस्यादिक्राना पर्यंत्। सर्वतोऽपूरयत्। इदमित्येति सूक्ताभ्यां यज्ञपारं प्रापयामासेत्यर्थः ॥

स इद्दानाय दभ्याय वन्वञ्च्यवानः सूदैरमिमीत वेदिं।
तूर्वयाणो गूर्तवचस्तमः क्षोदो न रेत इतऊति सिंचत् ॥२॥
सः। इत्। दानाय। दभ्याय। वन्वन्। च्यवानः। सूदैः। अमिमीत। वेदिं।
तूर्वयाणः। गूर्तवचःऽतमः। क्षोदः। न। रेतः। इतःऽऊति। सिंचत् ॥२॥

स इत् स कृष्णशवासी पुरुषो रुद्राख्यो दानाय स्तोतृणां धनप्रदानाय दभ्याय शत्रूणां वधाय च वन्वन् स्तोतॄन्संभजन् सूदैः सूदकैर्हिंसकैः शस्त्रैश्च्यवानो रक्षांसि च्यावयन् वेदिममिमीत। परिमितवान्। यज्ञवास्त्वधिष्ठितवानित्यर्थः। तं कृष्णशवास्युत्तरत उपोत्थायाब्रवीन्मम वा इदं मम वै वास्तुहमितीति ब्राह्मणं। ऐ० ब्रा० ५. १४.। तदेवाह। तूर्वयाणस्तूर्णगमनो गूर्तवचस्तमोऽत्यंतमुद्यतवचा रुद्रः क्षोदो नोदकमिव। उदकं यथा घनः सिंचति तद्वद्रेतः स्वसामर्थ्यमितऊतीतोगमनवद्यथा भवति तथा सिंचत्। प्रेरितवानित्यर्थः। यद्वा। अनेनोत्तरार्धेनोत्तराभ्यां च प्रासंगिक्यश्विनोः स्तुतिः क्रियते। तूर्वयाणस्तूर्णगमनोऽतिशयेनोद्यतवचनो रुद्रः क्षोदो नोदकमिव रेत उत्पादनसामर्थ्योपेतं रेत इतऊति सिंचत्। अनयामासाश्विनौ। अन्यचेतऊतीत्यश्विनोरभिधानादन्यत्र तयो रुद्रपुत्रत्वसिद्धेश्चायमर्थो लभ्यते ॥

मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो द्रवंता।
आ यः शर्याभिस्तुविनृम्णो अस्याश्रीणीतादिशं गभस्तौ ॥३॥
मनः। न। येषु। हवनेषु। तिग्मं। विपः। शच्या। वनुथः। द्रवंता।
आ। यः। शर्याभिः। तुविऽनृम्णः। अस्य। अश्रीणीत। आऽदिशं। गभस्तौ ॥३॥

हे अश्विनौ युवां मनो न मन इव यथा मनस्तिग्मं तीक्ष्णमाशु धावति आगच्छति एवं येषु हवनेष्वाह्वानेषु विपः स्तोतुः शच्या प्रज्ञानेन गंतव्यमिति बुद्ध्या द्रवंता द्रवंती गच्छंती वनुथः संभजथः। योऽध्वर्युरा आभिमुख्येन तुविनृम्णः प्रभूतहविर्लक्षणधनः सन्नस्य कर्मणि प्रवृत्तस्य मम संबंधी शर्याभिरंगुलीभिरश्रीणीत श्रीणाति। किं कृत्वा। गभस्तौ हस्ते धृत्वादिशं। इदमश्विभ्यामिति निर्दिश्येत्यर्थः। तादृशं मदीयमध्वर्युं येषु हवनेषु वनुथः संभजथः तौ युवां ऊर्व इत्युत्तरत्र संबंधः ॥

कृष्णा यन्नोष्वरुणीषु सीदद्दिवो नपाताश्विना हुवे वां।
वीतं मे यज्ञमा गतं मे अन्नं ववन्वांसा नेषमस्मृतध्रू ॥४॥
कृष्णा। यत्। गोषु। अरुणीषु। सीदत्। दिवः। नपाता। अश्विना। हुवे। वां।
वीतं। मे। यज्ञं। आ। गतं। मे। अन्नं। ववन्वांसा। न। इषं। अस्मृतध्रू इत्यस्मृतऽध्रू ॥४॥

कृष्णा रात्रिर्यद्यदारुणीष्वरुणवर्णासु गोषु सीदत् निवसति। उषा विभासनाय रथमधितिष्ठतीत्यर्थः। अरुणो गाव उषसामिति निरुक्तं। उषःकाले हे दिवो नपाता दीप्यमानस्य स्वर्गस्य प्रकाशात्मकस्य यागस्य वा न पातयितारौ हे अश्विनौ वां ऊर्वे। आहूये। वीतं कामयेथां मेऽन्नं हविर्लक्षणं। तदर्थं मे यज्ञमा गतं। आगच्छतं। इषमन्नं ववन्वांसा न संभजमानावश्वाविव। तद्वदा गतं। कीदृशौ युवां। अस्मृतध्रू अस्मृतद्रोहौ मयि द्रोहमकुर्वंतौ ॥

प्रथिष्ट यस्य वीरकर्ममिष्णदनुष्टितं नु नर्यो अपौहत् ।
पुनस्तदा वृहति यत्कनाया दुहितुरा अनुभूतमनर्वा ॥५॥
प्रथिष्ट । यस्य । वीरऽकर्म । इष्णत् । अनुऽस्थितं । नु । नर्यः । अप । औहत् ।
पुनरिति । तत् । आ । वृहति । यत् । कनायाः । दुहितुः । आः । अनुऽभूतं । अनर्वा ॥५॥

यथा स्वांशेन भगवानुद्रः प्रजापतिर्वास्तोष्पतिं रुद्रमसृजत् तदेतदादिभिस्तिसृभिर्वदति । यस्य प्रजापतेरिष्णदेषणवद्वीरकर्म ॥ लिंगव्यत्ययः ॥ वीरकर्म । रेत इत्यर्थः । येन रेतसोत्पन्ना वीरा भवंति तादृग्रेतः प्रथिष्ट प्रथितमासीत् तद्रेतोऽनुष्ठितं प्रजापतिनापत्यार्थं निषिक्तं नर्यो नरेभ्यो हितो यद्वा नेतृभ्यो देवेभ्यो हितो रुद्रोऽपौहत् । अपोहति । तदेवाह । पुनस्तद्रेत आ वृहति । सर्वत उत्खिद्दति । उन्नमयति पुरुषाकारेण स्वयमुत्पन्नः सन् । कीदृशं रेतः । यद्रेतः कनायाः कांतायाः दुहितुः स्वपुत्र्याः । तस्यामित्यर्थः । तच्च प्रजापतिनानुभूतमासीत् ॥ अस्तेः सिपि ---॥ कीदृशो रुद्रः । अनर्वान्यस्मिन्नप्रवृतः । प्रजापतिर्वै स्वां दुहितरमभ्यध्यायद्दिवमित्यन्य आऋषभमित्यन्ये । ऐ० ब्रा० ३. ३३. । इति ब्राह्मणं ॥ ॥२६॥

मध्या यत्कर्त्वमभवद्भीके कामं कृण्वाने पितरि युवत्यां ।
मनानयेतो जहतुर्वियंता सानौ निषिक्तं सुकृतस्य योनौ ॥६॥
मध्या । यत् । कर्त्वं । अभवत् । अभीके । कामं । कृण्वाने । पितरि । युवत्यां ।
मनानक् । रेतः । जहतुः । विऽयंता । सानौ । निऽसिक्तं । सुऽकृतस्य । योनौ ॥६॥

कामं यथेच्छं कृण्वाने कुर्वाणे पितरि प्रजापतौ युवत्यां दुहितर्युषसि दिवि वा । द्यौर्मित्यन्य इति हि ब्राह्मणं प्रदर्शितं । मध्या तयोर्मध्येऽंतरिक्षमध्ये वाभीके समीपे यत्कर्त्वं कर्माभवत् मिथुनीभावाख्यं तदानीं मनानग्ल्यं रेतो जहतुः । त्यक्तवंतौ । किं कुर्वाणाविति तदाह । वियंती परस्परमभिगच्छंती । प्रजापतिना सानौ समुच्छ्रिते स्थाने सुकृतस्य यज्ञस्य योनौ निषिक्तमासीदित्यर्थः । ततो रुद्र उत्पन्न इत्यर्थः ॥

पिता यत्स्वां दुहितरमधिष्कन्क्षमया रेतः संजग्मानो नि षिंचत् ।
स्वाध्योऽजनयन्ब्रह्म देवा वास्तोष्पतिं व्रतपां निरतक्षन् ॥७॥
पिता । यत् । स्वां । दुहितरं । अधिऽस्कन् । क्षमया । रेतः । संऽजग्मानः । नि । सिंचत् ।
सुऽआध्यः । अजनयन् । ब्रह्म । देवाः । वास्तोः । पतिं । व्रतऽपां । निः । अतक्षन् ॥७॥

पिता प्रजापतिर्यदा स्वां दुहितरं दिवमुषसं वाधिष्कन् अध्यस्कंदत् तदानीमेव क्षमया पृथिव्या सह संजग्मानः संगच्छमानः प्रजापतिरन्तरिक्षलोके रोहितो भूत्वा रेतो नि षिंचत् । निषेकमकरोत् । तामृक्षो भूत्वा रोहितं भूतामग्नेदिति ब्राह्मणं । ऐ० ब्रा० ३. ३३. । तदानीं स्वाध्यः सुध्यानाः सुकर्माणो वा देवा ब्रह्माजनयन् । उदपादयन् । किं तद्ब्रह्मेति तदाह । वास्तोष्पतिं यज्ञवास्तुस्वामिनं व्रतपां व्रतस्य कर्मणो रक्षःप्रभृतिभ्यः पालकं निरतक्षन् । समुदपादयन् । यज्ञवास्तुस्वामिनं दत्त्वा कर्मरक्षकत्वेन निर्मितवंत इत्यर्थः ॥

स ईं वृषा न फेनमस्यदाजौ स्मदा परेदप दभ्रचेताः ।
सरत्पदा न दक्षिणा परावृङ्ग ता नु मे पृश्न्यो जगृभ्रे ॥८॥
सः । ईं । वृषा । न । फेनं । अस्यत् । आजौ । स्मत् । आ । परा । एत् । अप । दभ्रऽचेताः ।
सरत् । पदा । न । दक्षिणा । पराऽवृक् । न । ताः । नु । मे । पृश्न्यः । जगृभ्रे ॥८॥

अंगिरसां सत्त्रांते नाभानेदिष्ठो गा निरोधयंतं वास्तोष्पतिं पुरतः पश्यन्वदति । स ईं सोऽयं वृषा न वर्षक इंद्र इव स यथा नमुचेर्वधार्थमाजौ संग्रामे फेनमस्यत् क्षिप्तवान् तद्वत्क्षेपमना वास्तोष्पतिरिदानीं तवैव वासुभागो युक्त इति यथार्थकथनानंतरं स्वदस्यत्त आप परेत् । अपपरागच्छति । दभ्रचेता अल्पमनस्को यः कश्चिद्दक्षिणा दक्षिणार्थानां गवां परावृक् परावर्जयिता सन् पदा पदानि न सरत् । न सरति । अस्मदभिमुखमागच्छति । मे मम संबंधिन्यस्ता गा अंगिरोभिर्दत्ताः पृश्न्यः पथिकानामभिस्पर्शनकुशलो रुद्रो न जगृभे । न गृह्णातीत्येवमाशास्ते ॥

मक्षू न वह्निः प्रजाया उपब्दिरग्निं न नग्न उप सीददूधः ।
सनितेध्मं सनितोत वाजं स धर्ता जज्ञे सहसा यवीयुत् ॥९॥
मक्षु । न । वह्निः । प्रऽजायाः । उपब्दिः । अग्निं । न । नग्नः । उप । सीदत् । ऊधः ।
सनिता । इध्मं । सनिता । उत । वाजं । सः । धर्ता । जज्ञे । सहसा । यविऽयुत् ॥९॥

वास्तोष्पतिना रुद्रेण गोप्यमाणेऽस्मिन्यज्ञे वह्निर्वहिवहाहको राक्षसादिर्मनु न शीघ्रं नोप सीदत् । नागच्छति । यो वह्निः प्रजाया उपब्दिरुपपीडको भवति यज्ञविघातार्थमागच्छति । ऋत्विगादिरूपायाः प्रजाया न पीडां करोत्यहनि । तथोधः । रात्रिनामैतत् । रात्रावप्यग्निं ज्वलंतं नग्नो विवसनो राक्षसादिर्नोप सीदत् । एवं रुद्रे रक्षितरि सति सोऽग्निरिध्मं समिता जज्ञे । उत्पन्नः । उतापि च वाजमन्नं हविः सनिता जज्ञे । स धर्ता यज्ञस्य फलस्य वा धारक उत्पन्नः सोऽग्निः सहसा बलेन यवीयुर्यज्ञमिश्रयितॄणां रक्षःप्रभृतीनां योद्धा जज्ञे ॥

मक्षू कनायाः सख्यं नवग्वा ऋतं वदंत ऋतयुक्तिमग्मन् ।
द्विबर्हसो य उप गोपमागुरदक्षिणासो अच्युता दुदुक्षन् ॥१०॥
मक्षु । कनायाः । सख्यं । नवऽग्वाः । ऋतं । वदंतः । ऋतऽयुक्तिं । अग्मन् ।
द्विऽबर्हसः । ये । उप । गोपं । आ । अगुः । अदक्षिणासः । अच्युता । दुदुक्षन् ॥१०॥

नवग्वा अंगिरसः । गवामयनाख्यं सत्त्रमनुतिष्ठतामंगिरसां मध्ये ये नवसु मासेषु लब्धगावः संत उत्थितास्ते नवग्वाः । त ऋतं वदंतो मनु शीघ्रं कनायाः कमनीयायाः स्तुतेर्नाभानेदिष्ठप्रेरिताया सकाशादृतयुक्तिमग्मन् । उक्तयोगपरिसमाप्तिमगमन् । प्राप्ताः । यद्वा । ऋतयुक्तिं यज्ञयोगोपेतमृतं शब्दं स्तुतिं वदंतो अंगिरसः कनायाः पृश्न्याः सख्यमगमन्निति योजना । द्विबर्हसो द्वयोः स्थानयोर्द्यावापृथिव्योः परिवृढा ये अंगिरसो गोपं गोपायितारं नाभानेदिष्ठमिंद्रं वोपागुः उपगताः तेऽदक्षिणासो दक्षिणारहिताः । अदक्षिणानि सत्त्राणीत्याकुरिति हि वचनं ये यजमानास्त ऋत्विज इति । ते चाच्युतोदक्कान्यक्षीणानि फलानि वा दुदुक्षन् ॥ ॥२७॥

मक्षू कनायाः सख्यं नवीयो राधो न रेत ऋतमित्तुरण्यन् ।
शुचि यत्ते रेक्ण आयजंत सबर्दुघायाः पय उस्रियायाः ॥११॥
मक्षु । कनायाः । सख्यं । नवीयः । राधः । न । रेतः । ऋतं । इत् । तुरण्यन् ।
शुचि । यत् । ते । रेक्णः । आऽअयजंत । सबःऽदुघायाः । पयः । उस्रियायाः ॥११॥

मनु शीघ्रं कनायाः कमनीयाया धर्मदोग्ध्र्या नवीयो नवतरं सख्यं । प्राप्तिति शेषः । अथवा नवीय इति राधोविशेषणं । नवतरं राधो धनमिव रेतः सिच्यमानमृतमुदकं तुरण्यन् । दिवः सकाशात्प्रेरितवंतः ।

हे इंद्र ते तुभ्यं यद्यदा रेक्णः पाथोलक्षणं धनमाभिमुख्येन यजंत अपूजयन्। कीदृशं रेक्णः। सवर्दुघायाः। सवरित्यमृतनाम। अमृतदोग्ध्र्या उस्रियाया गोः पयः पानयोग्यं रसं। तदोदकं तुरण्यन्निति। अत्राध्वर्यु-ब्राह्मणं। अंगिरसो वै सत्त्रमासत तेषां पृश्निर्घर्मधुगासीत् सर्वौषधाजीवत् तेऽब्रुवन् कथं नु सत्त्रमाप्नुयेम ये ऽस्या ओषधीर्न जनयाम इति ते दिवो वृष्टिमरुजंत। तै० ब्रा० २. १. १. १.। इति ॥

पश्वा यत्पश्वा वियुता बुधंतेति ब्रवीति वक्वरी रराणः।
वसोर्वसुत्वा कारवोऽनेहा विश्वं विवेष्टि द्रविणमुप क्षु ॥१२॥
पश्वा। यत्। पश्वा। विऽयुता। बुधंते। इति। ब्रवीति। वक्वरि। रराणः।
वसोः। वसुऽत्वा। कारवः। अनेहा। विश्वं। विवेष्टि। द्रविणं। उप। क्षु ॥१२॥

यद्यदा स्तोतारः पश्वा पशुना। गोसमूहेनेत्यर्थः। तेन वियुता वियुक्तानि स्वकीयानि गोस्थानानि पश्वा पश्वाद्बुधंत अजानन् तदानीं कारवः। कारुरित्यर्थः। इति ब्रवीति। इत्थं ब्रूते। किमिति। वक्वरि स्तोतरि रराणो रममाणो वसोर्वासकाद्वसुत्वातिशयेन वासयिता। यद्वा। वसुत्वेति समूहार्थे त्वा नामकरणः। गोरूपधनवतोऽतिशयेन गोसमूहवानित्यर्थः। अनेहा अपाप इंद्रो विश्वं सर्वं द्रविणं गोरूपं पणिभिरपहृतं धनं क्षु। मक्षित्यर्थः। क्षीघ्रमुप विवेष्टि। उपव्याप्नोति पुनरादातुं। अयमर्थः। यदींद्रस्य स्तोतारोऽसुरैरपहृतमात्मीयं गोधनं जानंति ततः प्रागेवागत्येंद्रस्तं न्यरुधदिति ॥

तदिन्वस्य परिषद्वानो अग्मन्पुरू सदंतो नार्षदं बिभित्सन्।
वि शुष्णस्य संग्रथितमनर्वा विदत्पुरुप्रजातस्य गुहा यत् ॥१३॥
तत्। इत्। नु। अस्य। परिऽसद्वानः। अग्मन्। पुरु। सदंतः। नार्षदं। बिभित्सन्।
वि। शुष्णस्य। संऽग्रथितं। अनर्वा। विदत्। पुरुऽप्रजातस्य। गुहा। यत् ॥१३॥

तदित्तत्रैव नु क्षिप्रमस्येंद्रस्य परिषद्वानः परितो वर्तमानाः परिचारका रश्मयोऽग्मन्। प्रकाशनार्थ-मगच्छन्। पुरू पुरूणि क्षत्रियाणि सदंतः सीदंतोऽसुरा नार्षदं नृषदः पुत्रं बिभित्सन्। भेत्तुमिच्छन्। किंचायं शुष्णश्चैतन्नामकस्यासुरस्य पुरुप्रजातस्य वज्रप्रादुर्भावस्य संग्रथितं मर्म विदत्। वेत्ति। अयमिंद्रो यदसुरस्य दुर्ज्ञेयं मर्म गुहा गुहायां गोपितं तद्विदत् ॥

भगो ह नामोत यस्य देवाः स्वर्ण ये चिषधस्थे निषेदुः।
अग्निर्ह नामोत जातवेदाः श्रुधी नो होतर्ऋतस्य होताध्रुक् ॥१४॥
भगः। ह। नाम। उत। यस्य। देवाः। स्वः। न। ये। चित्ऽसधस्थे। निऽसेदुः।
अग्निः। ह। नाम। उत। जातऽवेदाः। श्रुधि। नः। होतः। ऋतस्य। होता। अध्रुक् ॥१४॥

उतापि च भगो ह नाम तत्तेजः किल प्रसिद्धं यस्य तेजस आप्तेयस्य संबंधिनि चिषधस्थे बर्हिषि ये देवाः संति ते सर्वे स्वर्णं स्वर्गे यथा तथैव निषेदुः निषीदंति। उतापि च तत्तेजोऽग्निर्ह नामाग्निः किल नाम। उतापि च जातवेदा जातप्रज्ञो ज्ञातानां वेदितेतदपि तस्य तेजसो नाम। अग्नेर्भग इत्यग्निरिति जातवेदा इति च त्रीणि नामानीत्यर्थः। अथ प्रत्यक्षकृतः। हे होतर्होमनिष्पादकौक्तनामाग्ने ऋतस्य होता यज्ञस्य संबंधिनां देवानामाह्वाताध्रुग्द्रोहरहितस्त्वं नोऽस्माकमाह्वानं श्रुधि। शृणु ॥

उत त्या मे रौद्रावर्चिमंता नासत्याविंद्र गूर्तये यजध्यै।
मनुष्वद्वृक्तबर्हिषे रराणा मंदू हितप्रयसा विक्षु यज्यू ॥१५॥

उत । त्या । मे । रौद्रौ । अर्चिऽमंता । नासत्यौ । इंदु । गूर्तये । यजध्यै ।
मनुष्वत् । वृक्तऽबर्हिषे । रराणा । मंदू इति । हितऽप्रयसा । विक्षु । यज्यू इति ॥१५॥

उतापि च हे इंद्र त्वा तौ प्रसिद्धौ रौद्रौ रुद्रपुत्रौ । चोदो न रेत इतऊति सिंचत् । ऋ० १०. ६१. २. । इति हि रुद्रपुत्रत्वमुक्तं । अर्चिमंता दीप्तिमंतौ नासत्यावश्विनौ मे गूर्तये सुतये यजध्यै यागाय च भवेतामिति शेषः । किंच मनुष्वन्मम पितुर्मनोरिव तस्य यज्ञे यथा तथैव वृक्तबर्हिषे स्तीर्णबर्हिषे मह्यं रराणा रममाणौ मंदू मदिष्णू हितप्रयसा प्रेरितधनौ विक्त्वृत्विक्त्वत्सदीयेषु तथा यज्यू यष्टव्यौ भवतमिति शेषः ॥ ॥२८॥

अयं स्तुतो राजा वंदि वेधा अपश्च विप्रस्तरति स्वसेतुः ।
स कक्षीवंतं रेजयत्सो अग्निं नेमिं न चक्रमर्वतो रघुद्रु ॥१६॥
अयं । स्तुतः । राजा । वंदि । वेधाः । अपः । च । विप्रः । तरति । स्वऽसेतुः ।
सः । कक्षीवंतं । रेजयत् । सः । अग्निं । नेमिं । न । चक्रं । अर्वतः । रघुऽद्रु ॥१६॥

अयं वेधाः सर्वस्य विधाता राजा सोमः स्तुतः सर्ववेदि । स्तूयतेऽस्माभिः । किंच विप्रो विशेषेण पूरको विप्रवच्छुद्धो वा स्वसेतुर्यस्य स्वभूता रश्मयो जगद्बंधकाः संति स सोमोऽपश्चांतरिक्षं च तरति । लंघयति प्रतिदिनं । स सोमः कक्षीवंतमृषिं पर्वतमध्ये सोमार्थं गतं रेजयत् सः स एवाग्निं हविर्वोढुमशक्तं संतं पलाय्याप्सु प्रविष्टं रेजयत् । अकंपयत् । कंपने दृष्टांतः । नेमिं नमनशीलं रघुद्रु लघुगमनं चक्रमर्वतोऽश्वा इव ते यथा तथा रेजयत् ॥ तुमभावश्छांदसः ॥

स द्विबंधुर्वितरणो यष्टा सबर्धुं धेनुमस्वं दुहध्यै ।
सं यन्मिचावरुणा वृंज उक्थैर्ज्येष्ठेभिर्यमणं वरूथैः ॥१७॥
सः । द्विऽबंधुः । वितरणः । यष्टा । सबःऽधुं । धेनुं । अस्वं । दुहध्यै ।
सं । यत् । मिचावरुणा । वृंजे । उक्थैः । ज्येष्ठेभिः । अर्यमणं । वरूथैः ॥१७॥

सोऽग्निर्द्विबंधुर्द्वयोर्लोकयोर्बंधुभूतो वैतरणः सर्वस्य विशेषेण तारयिता । यद्वा । वितरणार्हो हविष्प्रदानार्हः । यष्टा देवानां याजकोऽग्निः सबर्धुममृतोपमपयोदोग्ध्रीं धेनुमस्वमप्रसूतां निवृत्तप्रसवां शृयवे दुहध्यै दोहायाकरोत् । यद्वा स शृयुर्मिचावरुणावर्यमणं च ज्येष्ठेभिर्ज्येष्ठैः प्रशस्तैर्वरूथैर्वरणीयैरुक्थैः शस्त्रैः सं वृंजे सम्यक् स्तौति । यदा स शृयुर्मिचावरुणार्यम्णां स्तुतिं करोति तदा तेषामाज्ञयाग्निर्निवृत्तप्रसवां पयोदोग्ध्रीमकरोदिति ॥

तद्बंधुः सूरिर्दिवि ते धियंधा नाभानेदिष्ठो रपति प्र वेनन् ।
सा नो नाभिः परमास्य वा घाहं तत्पश्चा कतिथश्चिदास ॥१८॥
तत्ऽबंधुः । सूरिः । दिवि । ते । धियंऽधाः । नाभानेदिष्ठः । रपति । प्र । वेनन् ।
सा । नः । नाभिः । परमा । अस्य । वा । घ । अहं । तत् । पश्चा । कतिथः । चित् । आस ॥१८॥

तद्बंधुः । सैव पृथिवी बंधुकोत्पत्त्यधिष्ठानत्वेन यस्यासौ तद्बंधुः । तन्मातृक इत्यर्थः । सूरिः सुतेः प्रेरको दिवि वर्तमानस्य ते तव स्वभूत इति शेषः । त्वदपत्यभूत इति यावत् । षष्ठीसामर्थ्यात्संबंधसामान्यं प्रतीयते । तस्मादित्यपुत्रो मनुर्मनोः पुत्रो नाभानेदिष्ठ इत्येवं सूर्यापत्यत्वं पर्यवस्यति । सूर्यनाभानेदिष्ठयोः संबंधस्मरणपाद् उत्तरमंत्रे च वक्ष्यति । स च धियंधाः कर्मणां धारको नाभानेदिष्ठो वेनन्नंगिरोदत्तं गोसहस्रं वेनन्कामयन् प्र

रपति । प्रलपति । स्तौतीत्यर्थः । वापि चेत्यर्थः । सा द्यौर्नोऽस्माकं परमोत्कृष्टा नाभिर्बंधिका चास्यादित्यस्याधिष्ठानभूतास्ति । धेति पूरणः । अहं तत्तस्यादित्यस्य पश्चा पश्चादनंतरं कतिथः कतिपयानां पूरण आस । अभवं । अनेन ममादित्येन जन्यजनकभावः संबंधः संनिकृष्ट इत्युक्तं भवति ॥

इयं मे नाभिरिह मे सधस्थमिमे मे देवा अयमस्मि सर्वः ।
द्विजा अहं प्रथमजा ऋतस्येदं धेनुरदुहज्जायमाना ॥१९॥
इयं । मे । नाभिः । इह । मे । सधऽस्थं । इमे । मे । देवाः । अयं । अस्मि । सर्वः ।
द्विऽजाः । अहं । प्रथमऽजाः । ऋतस्य । इदं । धेनुः । अदुहत् । जायमाना ॥१९॥

इयं माध्यमिका वाङ्मे नाभिः संनाहिनी । आदित्यस्य तस्यास्याभेदादस्यैर्षमाध्यमिका वाग्बंधिका भवति । तथा च ब्राह्मणं । सा या वागसौ स आदित्य इति ब्राह्मणं । इहास्मिन्मंडले मे मम सधस्थं स्थानं । इमे मे देवा द्योतमाना रश्मयो मे मम स्वभूताः । अयमहमस्मि सर्वः । सूर्यस्य स्वस्योक्तेन प्रकारेणाभेदात्तद्द्वारा सर्वात्मकत्वं । अह किंचेत्यर्थः । द्विजा विप्रा ऋतस्य प्रथमजाः सत्यस्य प्रथमजाः सत्यभूतस्य ब्रह्मणः प्रथमोत्पन्नाः । धेनुः पृश्निदेवता माध्यमिका वाग्जायमानेदं सर्वमदुहत् । दुदोह । उदपादयदित्यर्थः ॥

अधासु मंद्रो अरतिर्विभावावं स्यति द्विवर्तनिर्वनेषाट् ।
ऊर्ध्वो यच्छ्रेणिर्न शिश्नुर्दन्मक्षू स्थिरं शेवृधं सूत माता ॥२०॥
अध । आसु । मंद्रः । अरतिः । विभाऽवा । अवं । स्यति । द्विऽवर्तनिः । वनेषाट् ।
ऊर्ध्वो । यत् । श्रेणिः । न । शिश्नुः । दन् । मक्षु । स्थिरं । शेऽवृधं । सूत । माता ॥२०॥

अधाथासु चतसृषु दिशु मंद्रो मोदमानोऽरतिर्गंता विभावा दीप्तिमान् द्विवर्तनिर्द्वयोर्लोकयोर्गंता वनेषाड्वने काष्ठानामभिभवितात्मिरव स्यति । अवसन्नो भवति यागार्थं । यश्च योऽग्निरूर्ध्वोमुखा श्रेणिर्न शिश्नुः शंसनीयः सेनेव मक्षु शीघ्रं दन् शत्रून्दमयति तमिमं स्थिरं निश्चलं शेवृधं सुखस्य वर्धकं मातारणिः सूत । यज्ञे जनयामास ॥ ॥२९॥

अधा गाव उपमातिं कनाया अनु श्वांतस्य कस्य चित्परेयुः ।
श्रुधि त्वं सुद्रविणो नस्त्वं याळाश्वघ्नस्य वावृधे सूनृताभिः ॥२१॥
अध । गावः । उपऽमातिं । कनायाः । अनु । श्वांतस्य । कस्य । चित् । परा । ईयुः ।
श्रुधि । त्वं । सुऽद्रविणः । नः । त्वं । याट् । आश्वऽघ्नस्य । ववृधे । सूनृताभिः ॥२१॥

अध संप्रति कस्य चिच्छ्वांतस्य प्रवृद्धस्य श्वांतस्य वा । आत्मनो निर्देशः । ईदृशस्य नामानेदिदृशस्य कनायाः कमनीयायाः स्तुतेर्गावो वाचः । यद्वा । वाचः सूनृतयः कनायाः कमनीयायाः सूनृतोपमातिसुपमानभूतमिंद्रमनु परेयुः । अनु परागच्छंति । हे सुद्रविणः सुधनापि त्वं श्रुधि । शृणु । नोऽस्माकमिममिंद्रं याट् । अयाट् । यज्ञ । त्वं चाश्वघ्नस्य । अश्वघ्नोऽश्वमेधयाजी मनुः । तस्य पुत्रस्य मम सूनृताभिः स्तुतिभिर्ववृधे । वर्धसे ॥ पुरुषव्यत्ययः ॥ अथवायं वर्धत इति परोक्षेण निर्देशः ॥

अध त्वमिंद्र विड्भ्य१स्मान्महो राये नृपते वज्रबाहुः ।
रक्षा च नो मघोनः पाहि सूरीनन्नेहसस्ते हरिवो अभिष्टौ ॥२२॥

अध। त्वं। इंद्र। विड्डि। अस्मान्। महः। राये। नृऽपते। वज्रऽबाहुः।
रक्षा। च। नः। मघोनः। पाहि। सूरीन्। अनेहसः। ते। हरिऽवः। अभिष्टौ ॥२२॥

हे इंद्र अधाधुना वज्रबाहुस्त्वमस्मान्महो महते राये धनाय विड्डि। जानीहि। हे इंद्र मघोनो हविष्मतः सूरीन् स्तुतिप्रेरकान्नोऽस्मान्रक्ष च। हे हरिवो हरिभ्यां तद्वन्निंद्र ते तवाभिष्टावभिगमनेऽनेहसोऽपापाः स्यामेति शेषः ॥

अध यद्राजाना गविष्टौ सरत्सरण्युः कारवे जरण्युः।
विप्रः प्रेष्ठः स होषां बभूव परा च वक्षदुत पर्षदेनान् ॥२३॥
अध। यत्। राजाना। गोऽइष्टौ। सरत्। सरण्युः। कारवे। जरण्युः।
विप्रः। प्रेष्ठः। सः। हि। एषां। बभूव। परा। च। वक्षत्। उत। पर्षत्। एनान् ॥२३॥

हे राजाना राजमानौ मित्रावरुणौ अधाधुना सत्रसमाप्तौ यद्यस्माद्गविष्टौ गवामेषणायां सत्यां सरण्युः सरणशीलो यमः सरत् गच्छति कारवे कर्माणि कुर्वतेऽङ्गिरसां गणाय। किमिच्छन्। जरण्युस्तस्मा अंगिरसां गणाय स्तुतिमिच्छन्। तस्मात्स विप्रो मामाभिदिष्ट एषामंगिरसां प्रेष्ठः प्रियतमो बभूव। भवतु। हीति पूरणः। तेषां कर्तव्यं परा च वक्षत्। परावहतु। उतापि चैनानंगिरसः पर्षत् पारयत्वित्यात्मन एवाशास्ते ॥

अधा न्वस्य जेन्यस्य पुष्टौ वृथा रेभंत ईमहे तदू नु।
सरण्युरस्य सूनुरश्वो विप्रश्चासि श्रवसश्च सातौ ॥२४॥
अध। नु। अस्य। जेन्यस्य। पुष्टौ। वृथा। रेभंतः। ईमहे। तत्। ऊं इति। नु।
सरण्युः। अस्य। सूनुः। अश्वः। विप्रः। च। असि। श्रवसः। च। सातौ ॥२४॥

अनया वरुणं पृथक् स्तौति। अधाथ नु विप्रमस्य जेन्यस्य जयशीलस्य स्तुत्या जेतव्यस्य वा तत्स्वभूतं गवादिधनं पुष्टौ पोषे निमित्ते सति तस्य पुष्ट्यर्थं वा वृथानायासेन रेभंतः स्तुवंतो नु क्षिप्रमीमहे। याचामहे। सरण्युः शीघ्रसरणशीलोऽश्वोऽस्य वरुणस्य सूनुः पुत्रः। वरुणाद्यश्च उत्पन्नः। अथ प्रत्यक्षकृतः। हे वरुण त्वं विप्रश्चासि। विप्रवत्पूज्यः शुद्धो वा भवसि। श्रवसश्चान्नस्य सातौ लाभेऽस्माकमन्नलाभाय प्रवृत्तश्च भवसि ॥

युवोर्यदिं सख्यायास्मे शर्धाय स्तोमं जुजुषे नमस्वान्।
विश्वे च यस्मिन्ना गिरः समीचीः पूर्वीरिव गातुरा शंत्सूनृतायै ॥२५॥
युवोः। यदि। सख्याय। अस्मे इति। शर्धाय। स्तोमं। जुजुषे। नमस्वान्।
विश्वे। यस्मिन्। आ। गिरः। सम्ऽईचीः। पूर्वीऽइव। गातुः। दाशत्। सूनृतायै ॥२५॥

हे मित्रावरुणौ युवोर्युवयोः शर्धाय बलवतोऽस्मे अस्माकं सख्याय। यद्वा। युवयोः सख्यायास्मे अस्माकं शर्धाय बलाय च। यदि नमस्वान्नम्रवानध्वर्युः स्तोत्रवान्होता वा स्तोमं जुजुषे सेवते। यस्मिन् सख्ये सिद्धे सति विश्वे च विश्वस्मिञ्जनपदे गिरोऽङ्गिरसां संबंधिन्यः समीचीः समीच्य आ गच्छंतीति शेषः। उदाराणां गृह इदं गृहाणीदं गृहाणीत्येवंरूपाः श्रूयंत इत्यर्थः। यद्वा। यागानुष्ठातॄणां स्तुतिगिर आगच्छंतीति। पूर्वीव गातुः प्राची दिगिव सा यथा गच्छतां सुखं प्रयच्छति तद्वत्। यद्वा। पूर्वी पुरा प्रसिद्धा पुरातनीव गातुः सरणिरिव सा यथा गच्छतां सुखं प्रयच्छति तद्वत्। सूनृतायै प्रियसत्यरूपायै स्तुतिवाचे दाशत्। प्रयच्छतु ॥

स गृणानो अङ्गिर्देववानिति सुबंधुर्नमसा सूक्तैः ।
वर्धदुक्थैर्वचोभिरा हि नूनं व्यध्वैति पयस उस्रियायाः ॥२६॥
सः । गृणानः । अत्ऽअभिः । देवऽवान् । इति । सुऽबंधुः । नमसा । सुऽउक्तैः ।
वर्धत् । उक्थैः । वचःऽअभिः । आ । हि । नूनं । वि । अध्वा । एति । पयसः । उस्रियायाः ॥२६॥

देवताभिर्देववान् सुबंधुः शोभनबंधनः स वरुण इतीत्थंभूतप्रकारेण नमसा नमस्कारेण सूक्तैश्च गृणानः स्तूयमानः सन्वर्धत् । वर्धतां । उक्थैर्वचोभिरुच्यमानैः प्रशस्तैर्वा स्तुतिवचोभिर्नूनमिदानीमा गच्छतीति शेषः । हीति पूरणः । तस्य यागार्थमुस्रियाया गोः पयसोऽध्वा मार्गो वेति । स्तनायाणि चरंतीत्यर्थः ॥

त ऊ षु णो महो यजत्रा भूत देवास ऊतये सजोषाः ।
ये वाजाँ अनयता वियंतो ये स्था निचेतारो अमूराः ॥२७॥
ते । ऊं इति । सु । नः । महः । यजत्राः । भूत । देवासः । ऊतये । सऽजोषाः ।
ये । वाजान् । अनयत । विऽयंतः । ये । स्थ । निऽचेतारः । अमूराः ॥२७॥

अनयर्षिरंगिरस आशास्ते । हे यजत्रा यष्टव्या देवासो देवाः ते यूयं । उ इति पूरणः । महो महते नोऽस्माकमूतये रक्षणाय सजोषाः संगता भूत । भवत । ये च यूयमंगिरसो मह्यं वाजानन्नान्यनयत प्रापयत वियंतः सततमुक्थाय विविधं गच्छंतः संतः । ये च यूयममूराः । षष्ठाहःप्रयोगमौढ्यरहिता इत्यर्थः । तादृशा निचेतारो गवां विविक्तारः स्थ भवथ । ते सजोषा भूतेति समन्वयः ॥ ॥३०॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थाश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्येऽष्टमाष्टकस्य प्रथमोऽध्यायः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् । निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
व्याख्याय प्रथमं विद्वानष्टमस्याष्टकस्य सः । अध्यायं सायणामात्यो द्वितीयं व्याचिकीर्षति ॥

तत्र ये यज्ञेनेत्येकादशर्चमनुवाकापेक्षया द्वितीयं सूक्तं । मानवस्य नाभानेदिष्ठस्यार्षं । आदितस्चतसो जगत्यः । पंचम्यनुष्टुप् । षष्ठी बृहती । सप्तमी सतोबृहती । अष्टमीनवम्यावनुष्टुभौ । दशमी गायत्री । एकादशी त्रिष्टुप् । आदितः षण्णां विश्वे देवा अंगिरसो वा देवता । सप्तमी वैश्वदेवी । अष्टम्याद्यासु चतसृषु सावर्णेर्मनोरात्मनः दानं स्तूयते । अतस्तास्तद्देवताकाः । तथा चानुक्रम्यते । ये यज्ञेनैकादशाद्याः षळंगिरसां स्तुतिर्वाद्या त्रिष्टुप्पंचम्यनुष्टुप्प्रगाथोऽनुष्टुभौ गायत्री चतसोऽन्त्याः सावर्णेर्दानस्तुतिरिति ॥ षष्ठेऽहनि वैश्वदेवशस्त्र एतत्सूक्तं । सूचितं च । इदमित्या रौद्रमिति प्रागुपोत्तमाया ये यज्ञेनेत्यावपति । आ० ८. १. । इति ॥

ये यज्ञेन दक्षिणया समक्ता इंद्रस्य सख्यममृतत्वमानश ।
तेभ्यो भद्रमंगिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥१॥
ये । यज्ञेन । दक्षिणया । संऽअक्ताः । इंद्रस्य । सख्यं । अमृतऽत्वं । आनश ।
तेभ्यः । भद्रं । अंगिरसः । वः । अस्तु । प्रति । गृभ्णीत । मानवं । सुऽमेधसः ॥१॥

नाभानेदिष्ठः स्वपिता मनुनाभ्यनुज्ञातः सत्रमासीनानंगिरसोऽभ्येत्य मां प्रतिगृह्णीत युष्मभ्यं यज्ञं प्रवक्ष्यामीति यदुक्तवान् तदुच्यते । इतिहासस्त्विदमित्येति पूर्वसूक्ते नाभानेदिष्ठं शंसति नाभानेदिष्ठं वै मानवमिति ब्राह्मणानुसारेण मनुः पुत्रेभ्यो दायं व्यभजदिति तैत्तिरीयब्राह्मणानुसारेण च सप्रपंचमभिहितः । तथा चाख्या ऋचोऽयमर्थः । यज्ञेन यजनीयेन हविषा दक्षिणयर्त्विग्भ्यो देयया समक्ताः संगता येऽहीनैकाहसत्राणि कुर्वतो यूयमिंद्रस्य सख्यं सखिकर्म अत एवामृतत्वममरणधर्मं देवत्वमानशुः आनशिरे प्राप्ताः स्थ ॥ अश्नोतेर्लिटि मध्यमे व्यत्ययेन बहुवचनं । अश्नोतेरिति गुडागमः । यद्वृत्तयोगादभिघातः ॥ हे अंगिरसः तेभ्यो वो युष्मभ्यं भद्रं कल्याणं कर्मासु । हे सुमेधसः सुप्रज्ञा हे अंगिरसः ते यूयमिदानीमागतं मानवं मनोः पुत्रं मां प्रति गृभ्णीत । प्रतिगृह्णीत । मयि प्रतिगृहीते सति यज्ञं साधु करिष्यामीति तदर्थं प्रतिगृह्णीत ॥

य उदाजन्पितरो गोमयं वस्वृतेनाभिंदन्परिवत्सरे वलं ।
दीर्घायुत्वमंगिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥२॥
ये । उत्ऽआजन् । पितरः । गोऽमयं । वसु । ऋतेन । अभिंदन् । परिवत्सरे । वलं ।
दीर्घायुऽत्वं । अंगिरसः । वः । अस्तु । प्रति । गृभ्णीत । मानवं । सुऽमेधसः ॥२॥

हे अंगिरसः पितरोऽस्माकं पूर्वजत्वेन पितृभूता ये यूयं गोमयं गवात्मकं पणिभिरपहृतं वसु धनमुदाजन् तैरधिष्ठितात्पर्वतादुदगमयन् । किंचैतेन सत्यभूतेन यज्ञेन परिवत्सरे पर्यागते वत्सरे संपूर्णे । सत्रांत इत्यर्थः । तत्र वलं वलनामानं गवामपहर्तारमसुरमभिंदन् व्यनाशयन् तेभ्यो वो युष्मभ्यं दीर्घायुत्वं प्रभूतजीवनमस्तु । शेषं पूर्ववत् ॥

य ऋतेन सूर्यमारोहयन् दिव्यप्रथयन्पृथिवीं मातरं वि ।
सुप्रजास्त्वमंगिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥३॥
ये । ऋतेन । सूर्यं । आ । अरोहयन् । दिवि । अप्रथयन् । पृथिवीं । मातरं । वि ।
सुप्रजाःऽत्वं । अंगिरसः । वः । अस्तु । प्रति । गृभ्णीत । मानवं । सुऽमेधसः ॥३॥

हे अंगिरसः ये भवंत ऋतेन सत्यभूतेन यज्ञेन दिवि द्युलोके सूर्यं सुष्ठु सर्वस्य प्रेरकमादित्यमारोहयन् अस्थापयन् किंच मातरं सर्वेषां निर्मात्रीं पृथिवीं व्यप्रथयन् प्रसिद्धामकुर्वन् सत्रादिकर्मकरणेन तेभ्यो युष्मभ्यं सुप्रजास्त्वं सुपुत्रत्वमस्तु ॥ नित्यमसिच् प्रजामेधयोरित्यसिच्समासांतः । तस्माद्भावप्रत्ययः ॥

अयं नाभा वदति वल्गु वो गृहे देवपुचा ऋषयस्तच्छृणोतन ।
सुब्रह्मण्यमंगिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥४॥
अयं । नाभा । वदति । वल्गु । वः । गृहे । देवऽपुचाः । ऋषयः । तत् । शृणोतन ।
सुऽब्रह्मण्यं । अंगिरसः । वः । अस्तु । प्रति । गृभ्णीत । मानवं । सुऽमेधसः ॥४॥

हे देवपुत्रा देवानां पुत्रा अग्नेः पुत्रा ऋषयोऽतींद्रियार्थस्य द्रष्टारो हे अंगिरसः अयं नाभा नाभानेदिष्ठः पुरोवर्ती जनो वो युष्माकं गृहे गृहभूते यज्ञे वल्गु कल्याणं वचो वदति । तद्वाक्यं यूयं शृणोतन । महतादरेण शृणुत ॥ शृ श्रवणे । तप्तनप्तनथनाश्चेति तनबादेशः ॥ तेभ्यो युष्मभ्यं सुब्रह्मण्यं शोभनं ब्रह्मवर्चस्मस्तु । इदानीमागतं मानवं मां प्रति गृभ्णीत । प्रतिगृह्णीत ॥

विरूपास इदृषयस्त इन्नभीरवेपसः। ते अंगिरसः सूनवस्ते अग्नेः परि जज्ञिरे ॥५॥
विऽरूपासः। इत्। ऋषयः। ते। इत्। गंभीरऽवेपसः। ते। अंगिरसः। सूनवः।
ते। अग्नेः। परि। जज्ञिरे ॥५॥

परोक्षतयर्षिराह। ऋषयः कर्मणां द्रष्टार एत ऋषयो विरूपास इदन्योन्यं वर्णतो रूपतश्च नानारूपा भवंति। त इत्त एवामी अंगिरसो गंभीरवेपसः। वेप इति कर्मनाम। गंभीरकर्माणो भवंति। त इमेऽंगिरसः सूनवः पुत्राः खलु। तदेवाह। त इमेऽंगिरसोऽग्नेः परि जज्ञिरे। सर्वतो जाताः प्रादुर्भूताः। येऽंगारा आसंस्तेऽंगिरसोऽभवन्। ऐ० ब्रा० ३. ३४.। इति ब्राह्मणं। अत्र निरुक्तं च द्रष्टव्यं। नि० ३. १७. ॥ ॥१॥

ये अग्नेः परि जज्ञिरे विरूपासो दिवस्परि।
नवग्वो नु दशग्वो अंगिरस्तमः सचा देवेषु मंहते ॥६॥
ये। अग्नेः। परि। जज्ञिरे। विऽरूपासः। दिवः। परि।
नवऽग्वः। नु। दशऽग्वः। अंगिरःऽतमः। सचा। देवेषु। मंहते ॥६॥

विरूपासो विविधरूपा येऽंगिरसो दिवस्परि द्युलोकादग्नेः परि जज्ञिरे परितो जाताः। यद्वा। दिवस्परि। परिः पंचम्यर्थद्योतकः। स्वतेजसा दीप्यमानादग्नेर्जाताः। तेषां मध्ये नवग्वो दशग्वश्चांगिरसामो ऽंगिरसां वरिष्ठः। सत्त्रमासीनानामंगिरसां मध्ये केचन नवसु मास्सु कर्म छत्वोदतिष्ठन् केचन दशसु मास्स्वित्येवमंगिरसामयनमुक्तं। तेषामग्निर्नवग्वश्च दशग्वश्चोक्तः। तादृशो देवेषु सचा सहावस्थितः सोऽग्निर्मंहते। मह्यं धनं प्रयच्छति। मंहतिर्दानकर्मा ॥

इंद्रेण युजा निः सृजंत वाघतो व्रजं गोमंतमश्विनं।
सहस्रं मे ददतो अष्टकर्ण्यः श्रवो देवेष्वक्रत ॥७॥
इंद्रेण। युजा। निः। सृजंत। वाघतः। व्रजं। गोऽमंतं। अश्विनं।
सहस्रं। मे। ददतः। अष्टऽकर्ण्यः। श्रवः। देवेषु। अक्रत ॥७॥

वाघतः कर्मणां वोढारो विश्वे देवा अंगिरसो वेंद्रेण युजा सहायेन निः सृजंत। निरगमयन्। किं। गोमंतं गोयुक्तमश्विनमश्ववंतं पणिभिरवरुद्धं व्रजं। ते मे मां प्रति सहस्रं सहस्रसंख्याकं धनं सत्त्रपरिवेषणम-ष्टकर्ण्यः ॥ अष्ट इति अश्नु व्याप्तौ निष्ठायां रूपं ॥ विस्तृतकर्णाः। उपलक्षणमेतत्। व्याप्तसर्वावयवा गाश्च ददतो मह्यं प्रयच्छंतो देवेष्विंद्रादिषु श्रवो हविर्लक्षणमन्नं कीर्तिं वाक्रत। अकुर्वत ॥ करोतेर्लुङि मंत्रे घसेति च्लेर्लुक् ॥ एवं नाभानेदिष्ठेनांगिरसः सुतास्तस्मै धनं प्रादुः। तदुक्तं शौनकेन। ऋषयोऽंगिरससुता यद्दुर्मा-नवाय तु। तत्पुण्याय च कर्मणि ये यज्ञेनेत्यकीर्तयत् ॥

उत्तराभिश्चतसृभिरस्मै मानवायर्षये सावर्णिना यद्दत्तं तत्प्रशस्यति। तदप्युक्तं शौनकेन। सावर्णिना च यद्दत्तं मानवाय महद्वसु। तदुक्तं सूक्तशेषेण प्र नूनं जायतामिति ॥

प्र नूनं जायतामयं मनुस्तोकेव रोहतु। यः सहस्रं शताश्वं सद्यो दानाय मंहते ॥८॥
प्र। नूनं। जायतां। अयं। मनुः। तोकाऽइव। रोहतु। यः। सहस्रं। शतऽअश्वं।
सद्यः। दानाय। मंहते ॥८॥

अयं सावर्णिर्मनुर्भूयं क्षिप्रं प्र जायतां। प्रजातो भवतु धनादिभिः पुत्रादिभिश्च रोहतु। प्रादुर्भवतु। तत्र

दृष्टांतः । लोकवत् । यथा जलक्लिन्नं बीजं प्रादुर्भवति एवं कर्मफलसंयुक्तः स मनुः पुत्रादिभी रोहतु । योऽयं मनुः घृताश्वं बहुश्वसंयुक्तं सहस्रं गवां सप्तसदानीमेव दानाय मंहते अस्मा ऋषये दातुं प्रेरयति ॥

न तमंहो॑ति॒ कश्च॒न दि॒व ई॑व सा॒नवा॑रभं॑। सा॒व॒र्ण्यस्य॒ दक्षि॑णा॒ वि सिं॑धु॒रिव॑ प॒प्रथे॑ ॥९॥

न। तं। अ॒श्नो॒ति॒। कः। च॒न। दि॒वःऽइ॑व। सानु॑। आऽरभं॑। सा॒व॒र्ण्यस्य॑। दक्षि॑णा। वि। सिं॑धुःऽइ॑व। प॒प्रथे॑ ॥९॥

तं सावर्णिं मनुं कश्चन कश्चिदप्यारभमारब्धुं स्वकर्मणा नाश्नोति । न व्याप्नोति । यथा मनुः प्रयच्छति तथान्यो दातुं न शक्नोतीत्यर्थः । कथंस्थितं । दिव इव द्युलोकस्य सानु समुच्छ्रितं तेजसा कैश्चिदप्यप्रधृष्यमादित्यमिव स्थितं ॥ आरभं । शकि णमुल्कमुलौ । पा० ३. ४. १२. । इति कमुल् ॥ तस्य सावर्ण्यस्य मनोरियं गवादिदक्षिणा सिंधुरिव स्यंदमाना नदीव पृथिव्यां पप्रथे । विप्रथते । विस्तीर्णा भवति ॥

उ॒त दा॒सा प॑रि॒विषे॑ स्म॒हिष्टी॑ गो॒पर॑ीणसा। यदु॑स्तु॒र्वश्च॑ मामहे ॥१०॥

उ॒त। दा॒सा। प॒रि॒ऽविषे॑। स्म॒हिष्टी॒ इति॑ स्मत्ऽदिष्टी। गो॒ऽपरी॑णसा। यदु॑ः। तु॒र्वः। च॒। म॒म॒हे॒ ॥१०॥

उतापि च स्महिष्टी कल्याणादेशिनी गोपरीणसा गोपरिणसौ गोभिः परिवृतौ बहुगवादियुक्तौ दासा दासवत्प्रेष्यवत्स्थितौ तेनाधिष्ठितौ यदुश्च तुर्वश्चैतन्नामकौ राजर्षी परिविषेऽस्य सावर्णेर्मनोर्भोजनाय ममहे । पशून्प्रयच्छतः ॥ प्रत्येकमन्वयादेकवचनं ॥

सह॑स्रदा ग्रा॒मणी॑र्मा रिषन्मनुः सू॒र्येण॑स्य यत॑माने॒तु दक्षि॑णा ।
सा॒व॒र्णेर्दे॒वाः प्र ति॑रन्त्वायु॒र्यस्मि॒न्नश्रा॑ता॒ असना॑म॒ वाज॑ं ॥११॥

सह॑स्रऽदाः। ग्रा॒मऽणीः। मा। रि॒ष॒त्। मनुः॑। सू॒र्येण॑। अ॒स्य॒। यत॑माना। ए॒तु॒। दक्षि॑णा।
सा॒व॒र्णेः। दे॒वाः। प्र। ति॒र॒न्तु॒। आयुः॑। यस्मि॑न्। अश्रा॑ताः। असना॑म। वाज॑ं ॥११॥

सहस्रदा गवादीनां सहस्रस्य दाता ग्रामणीर्ग्रामाणां नेता कर्ता जनपदानामयं मनुर्मा रिषत् । न कैश्चिदपि रिष्टो हिंसितो भवतु । यद्वा । कर्मनेतृत्वस्थाश्चा हिनस्तु किंतु धनादिदानेन पूजयतु । अस्य यतमाना गच्छंती दक्षिणा सूर्येण सहैतु । संगच्छतां । विषु लोकेषु प्रसिद्धा भवत्वित्यर्थः । तस्मात्स्य सावर्णेः सवर्णपुत्रस्य मनोर्देवा इंद्रादय आयुर्जीवनं प्र तिरंतु । प्रवर्धयंतु । अश्रांताः कर्मस्वनलसाः सर्वे कर्म कुर्वंतो वयं यस्मिन्मनौ वाजं गोलक्षणमन्नमसनाम संभजेमहि । नाभानेदिष्ठोऽहमस्मभ इत्याम्नाते ॥ ॥२॥

परावतो य इति सप्तदशर्चं तृतीयं सूक्तं ऋतेः पुत्रस्य गयस्यार्षं । षोडशीसप्तदश्यौ त्रिष्टुभौ । पंचदश्यौ त्रिष्टुब्जगती वा । शिष्टास्तुतदेश्च जगत्यः । स्वस्ति नः पथ्यास्विति द्वे पथ्यास्वस्तिदेवताके । शिष्टा वैश्वदेव्यः । तथा चानुक्रांतं । परावतस्त्र्यूना गयः स्नातो द्वित्रिष्टुबंतं तु स्वस्ति नस्त्रिष्टुब्भा सह षोडशरचा पथ्यास्वस्तिदेवत्येति ॥ पृष्ठ्याभिप्लवयोस्तृतीयेऽहनि वैश्वदेव एतत्सूक्तं वैश्वदेवं विद्वानं । सूचितं च । अनश्वो जातः परावतो य इति वैश्वदेवं । आ० ७. ७. । इति ॥

प॒रा॒व॒तो॒ ये दि॑धिषंत॒ आप्यं॑ मनुप्रीतासो॒ जनि॑मा॒ विव॑स्वतः ।
य॒या॒तेर्ये न॑हु॒ष्य॑स्य ब॒र्हिषि॑ दे॒वा आस॑ते॒ ते अधि॑ ब्रुवंतु नः ॥१॥

परा॒ऽवतः॑। ये। दि॒धिष॑न्ते। आप्य॑म्। मनु॑ऽप्रीतासः। जनि॑म। वि॒वस्व॑तः।
य॒याते॑रिव। ये। नहु॑ष्यस्य। ब॒र्हिषि॑। दे॒वाः। आस॑ते। ते। अधि॑। ब्रु॒व॒न्तु॒। नः॒ ॥१॥

ये देवाः परावतो दूरदेशादागत्याप्यं ज्ञातेयं मनुष्यैः सह बंधुत्वं दिधिषंते धारयंति। यद्वा। हविषां प्रदातृभिर्मनुष्यैः सह सख्यं कुर्म इति परस्परं शब्दायंते ॥ धिष शब्दे जौहोत्यादिकः। छांदसो झस्यांतादेशः। धिष धारण इति केचिदप्युपगम्यते ॥ उक्तार्थमेव विशिनष्टि। मनुप्रीतासो मनुष्यैः प्रीता देवा विवस्वतो विवस्वत्पुत्रस्य मनोर्जनिम जन्मानि मनुष्यान्धारयंति। किंच ये देवा नहुष्यस्य नहुषपुत्रस्य ययातेरेतन्नामकस्य राजर्षेर्बर्हिषि यज्ञे आसते उपविशंति ते देवा नोऽस्मानधि ब्रुवंतु। धनादिप्रदानेनास्मानधिकं वदंतु। पूजयंत्वित्यर्थः ॥

विश्वा॒ हि वो॑ नम॒स्या॑नि॒ वंद्या॒ नामा॑नि देवा उ॒त य॒ज्ञिया॑नि वः।
ये स्थ जा॒ता अदि॑तेर॒स्परि॒ ये पृ॑थि॒व्यास्ते म॑ इ॒ह श्रु॒ता ह॒वं ॥२॥
विश्वा॑। हि। वः॒। न॒म॒स्या॑नि। वंद्या॑। नामा॑नि। दे॒वाः॒। उ॒त। य॒ज्ञिया॑नि। वः॒।
ये। स्थ। जा॒ताः। अदि॑तेः। अ॒त्ऽभ्यः। परि॑। ये। पृ॒थि॒व्याः। ते। मे॒। इ॒ह। श्रु॒त॒। ह॒वं॥२॥

हे देवा इंद्रादयः। हिरवधारणे। वो युष्माकमेव नामानि नमनीयानि विश्वा सर्वाणि शरीराणि नमस्यानि नमस्कारार्हाणि भवंति वंद्या वंद्यानि स्तोतव्यानि च भवंति। ये यूयमदितेरदीनाद्द्युलोकादन्नः। अंतरिक्षनामैतत्। अंतरिक्षात्। परिः पंचम्यर्थद्योतकः। पृथिव्याश्च जाताः प्रादुर्भूताः स्थ भवथ ते यूयमिहास्मिन्यज्ञे आगत्य मे मदीयं हवमाह्वानं श्रुत। शृणुत ॥

अग्निष्टोमे वैश्वदेवशस्त्रे येभ्यो मातेत्येषा धाय्या। सूचितं च। अयं वेनश्चोदयत्पृश्निगर्भा येभ्यो माता मधुमत्। आ० ५. १८.। इति ॥

येभ्यो॑ मा॒ता मधु॑म॒त्पिन्व॑ते॒ पयः॑ पी॒यूष॒ द्यौर॑दि॒तिर॒द्रिब॑र्हाः।
उ॒क्थ॒शु॒ष्मान्वृ॑षभ॒रान्त्स्व॒प्नस॒स्ताँ आ॑दि॒त्याँ अनु॑ मदा स्व॒स्तये॑ ॥३॥
येभ्यः॑। मा॒ता। मधु॑ऽमत्। पिन्व॑ते। पयः॑। पी॒यूष॑म्। द्यौः। अ॒दि॒तिः। अ॒द्रि॒ऽब॑र्हाः।
उ॒क्थ॒ऽशु॒ष्मान्। वृ॒ष॒ऽभ॒रान्। सु॒ऽअ॒प्नसः॑। तान्। आ॒दि॒त्यान्। अनु॑। म॒द॒। स्व॒स्तये॑॥३॥

माता सर्वस्य निर्मात्री पृथिवी येभ्यो देवेभ्यो देवार्थं मधुमन्माधुर्योपेतं पयः सारभूतं क्षीरं पिन्वते क्षरति। तथादितिरदीनाद्रिबर्हा मेघैः परिवृढा प्रवृद्धा परिवृद्धमेघा वा द्यौश्च पीयूषं पिन्वते। द्यावापृथिव्यौ हविरुत्पादयत इत्यर्थः। ऋषिरात्मानं संबोधयति। उक्थशुष्मानतिबलान् वृषभरान्वृष्टेराहर्तॄन् ॥ ह्रयहोर्भ इति भः ॥ स्वप्नसः सुकर्मणस्तानादित्यानदितेः पुत्रान्देवान् स्वस्तयेऽविनाशायानु मद। अनुसुहि ॥ माधतेर्लोटि व्यत्ययेन श्नप्। मंदतेर्वा स्तुत्यर्थस्यानित्यमागमशासनमिति गुमभावः ॥

नृ॒चक्ष॑सो॒ अनि॑मिषंतो॒ अर्ह॑णा बृ॒हद्दे॒वासो॑ अमृत॒त्वमा॑नशुः।
ज्योति॑रदि॒त्या अ॑हि॒माया॒ अना॑गसो दि॒वो व॒र्ष्माणं॑ वसते स्व॒स्तये॑ ॥४॥
नृ॒ऽचक्ष॑सः। अनि॑ऽमिषंतः। अर्ह॑णा। बृ॒हत्। दे॒वासः॑। अ॒मृ॒त॒ऽत्वं। आ॒न॒शुः॒।
ज्योतिः॑ऽअदित्याः। अ॒हि॒ऽमायाः। अना॑गसः। दि॒वः। व॒र्ष्माण॑। व॒स॒ते॒। स्व॒स्तये॑॥४॥

नृचक्षसः कर्मणेतॄणां मनुष्याणां द्रष्टारः अत एवानिमिषंतो निमेषमकुर्वाणाः सर्वदा जागरूका देवासो

देवा अर्हणा लोकस्य परिचरणार्थं स्तोतव्यत्वाय बृहद्बृंहितममृतत्वममरणधर्मभागभुः । प्राप्नाः । देवाः खलु मनुष्यैः पूज्याः । तस्मात्पूजार्हितुं देवत्वमानशिरे । अत एव ज्योतीरथा दीप्यमानरथोपेता अहिमायाः कैश्चिद्-यहंतव्यप्रज्ञा अनागसः पापरहिता आदित्या दिवो द्युलोकस्य वर्ष्माणं नाभिस्थानं समुच्छ्रितं देशं स्वस्तये ऽविनाशाय लोकस्य क्षेमकरणार्थं वसते । अधिवसंति । यद्वा । स्वतेजसाच्छादयंति ॥

सम्राजो॒ ये सु॒वृधो॑ यज्ञमा॑यय॒युरप॑रिह्वृता दधिरे दि॒वि क्ष्यं॑ ।
ताँ आ वि॑वास॒ नम॑सा सुवृ॒क्तिभि॑र्महो आ॑दि॒त्याँ अदि॑तिं स्व॒स्तये॑ ॥५॥
स॒ंऽराज॑ः । ये । सु॒ऽवृधः । यज्ञ॑ं । आ॒ऽअ॒य॒युः । अप॑रिऽह्वृताः । द॒धि॒रे । दि॒वि । क्ष्यं॑ ।
तान् । आ । वि॒वा॒स॒ । नम॑सा । सु॒वृ॒क्तिऽभिः । म॒हः । आ॒दि॒त्यान् । अदि॑तिं । स्व॒स्तये॑ ॥५॥

सम्राजः सर्वेषां राजानः स्वतेजोभिः सम्यग्राजमानाः सुवृधः सुवृद्धा ये देवा यज्ञमाययुः आयांति सोमादिहविर्भक्षणार्थं । ततोऽपरिह्वृताः कैश्चिदप्यहिंसिता ये देवा दिवि द्युलोके स्वयं निवासं दधिरे विदधति कुर्वंति । ऋषिरात्मानमाह । महो महतो गुणाधिक्येनादित्यानदितेः पुत्रांस्तान्प्रसिद्धान्देवानदितिं तेषां मातरमेतन्नामिकां च स्वस्तयेऽविनाशाय नमसा हवीरूपेणान्नेन सुवृक्तिभिः शोभनाभिः स्तुतिभिश्च विवास । आभिमुख्येन परिचर । विवासतिः परिचरणकर्मा ॥ ॥३॥

को व॒ः स्तोमं॑ राधति॒ यं जु॒जोष॑थ॒ विश्वे॑ देवासो मनुषो॒ यति॒ ष्ठन॑ ।
को वो॑ऽध्व॒रं तु॑विजाता॒ अरं॑ कर॒द्यो नः॒ पर्ष॑दत्यंहः॒ स्व॒स्तये॑ ॥६॥
कः॑ । व॒ः । स्तोम॑ं । रा॒धति॒ । यं । जु॒जोष॑थ । विश्वे॑ । दे॒वा॒सः॑ । म॒नु॒षः॒ । यति॑ । स्थन॑ ।
कः॑ । व॒ः । अ॒ध्व॒रं । तु॒वि॒ऽजा॒ताः॒ । अर॑ं । क॒र॒त् । यः । नः॒ । पर्ष॑त् । अति॑ । अं॒हः॒ । स्व॒स्तये॑ ॥६॥

ऋषिर्देवान्प्रति बहुधा वितर्कयति । हे देवाः वो युष्माकं कः स्तोता स्तोमं विवृत्यंचदशादिलक्षणं राधति । संसाधयति । न कश्चिदस्तीत्यर्थः । यद्वा । मदन्यः को वो युष्मभ्यं स्तोमं करोति । यूयं यं स्तोतारं जुजोषथ सेवध्वे ॥ जुषी प्रीतिसेवनयोः । लेटि शपः स्लुः । अडागमः ॥ किंच हे मनुषो मंतारो ज्ञातारो हे विश्वे देवासो देवाः यूयं यति यत्संख्याः स्थन भवथ ॥ यच्छब्दादपि च्छांदसो डतिर्द्रष्टव्यः ॥ हे तुविजाता धात्रादिविभागेन बहुजनना हे देवाः युष्मदर्थं को वा यजमानोऽध्वरं यज्ञमरं करत् । अलंकरोति स्तुतिभिर्हविर्भिश्च । मदन्यो नास्तीत्यर्थः । यो यज्ञो नोऽस्मान् स्वस्तयेऽविनाशायांहः पापरूपं मार्गमवैदिकमति पर्षत् अतिपारयति तं यज्ञं को वालंकरोतीति ॥

येभ्यो॒ होचाँ॑ प्रथ॒मामा॑ये॒जे मनुः॒ समि॑द्धाग्नि॒र्मन॑सा स॒प्त होतृ॑भिः ।
त आ॑दित्या॒ अभ॑यं॒ शर्म॑ यच्छत सु॒गा नः॑ कर्त सु॒पथा॑ स्व॒स्तये॑ ॥७॥
येभ्यः॑ । होचा॑ं । प्र॒थ॒मां । आ॒ऽअ॒ये॒जे । मनुः॑ । समि॑द्धऽअग्निः । मन॑सा । स॒प्त । होतृ॑ऽभिः ।
ते । आ॒दि॒त्याः॒ । अभ॑यं । शर्म॑ । य॒च्छ॒त॒ । सु॒ऽगा । नः॒ । क॒र्त॒ । सु॒ऽपथा॑ । स्व॒स्तये॑ ॥७॥

समिद्धाग्निर्हविर्भिः सम्यगदीप्ताग्निर्मनुर्वैवस्वतो मनुष्याणां प्रथमभावी श्रद्धानेन मनसा सप्त सप्तसंख्याकैर्होतृभिर्ऋषिभिश्चित्तिभिश्च सह येभ्यो युष्मभ्यं प्रथमां प्रथमं मुख्यं यद्वा सर्वेषां मनुष्याणामग्रे क्रियमाणत्वादाद्यं होचां । ह्रियंते हवींष्यनेनेति होचा यज्ञः । तं । यद्वा । आह्रयंते देवाः स्तुतिभिरनेनेति । तं यज्ञमायेजे आभिमुख्येनेष्टवान् ॥ यजेर्लिटि रूपं । यद्वा । लटि लोपस्त आत्मनेपदेष्विति तलोपः । यजिवप्योरलिट्येत्वं वक्तव्यं । का० ६.४.१२०.४.। इति वचनादेकारः ॥ हे आदित्या अदितेः पुत्रा हे देवाः ते यूयं नोऽस्मभ्यमभयं

शर्म च सुखं प्रयच्छत । किंच नोऽस्माकं स्वस्तये क्षेमाय सुपथा सुपथानि शोभनान्वेदिक्षमार्गान् सुगा सुष्ठु गंतव्यान् कर्त । कृणुत ॥ करोतेर्लोटि बहुलं छंदसीति विकरणस्य लुक् । तवादेशः ॥

य ईशिरे भुवनस्य प्रचेतसो विश्वस्य स्थातुर्जगतश्च मंतवः ।
ते नः कृतादकृतादेनसस्पर्यद्या देवासः पिपृता स्वस्तये ॥ ८॥
ये । ईशिरे । भुवनस्य । प्रऽचेतसः । विश्वस्य । स्थातुः । जगतः । च । मंतवः ।
ते । नः । कृतात् । अकृतात् । एनसः । परि । अद्य । देवासः । पिपृत । स्वस्तये ॥ ८॥

प्रचेतसः प्रकृष्टज्ञाना मंतवः सर्वस्य वेदितारो ये देवाः स्थातुः स्थावरस्य जगतो जंगमस्य विश्वस्य सर्वस्य भुवनस्य लोकस्येशिरे ईश्वरा भवंति । अथ प्रत्यक्षकृतः । हे देवासो देवाः य उक्तगुणास्ते यूयं नोऽस्माकृतात्कायिकात्पापात् अकृतात्करचरणादिभिरकृतादेनसः किंतु मानसात्पापाच्चाद्यास्मिन्दिने स्वस्तयेऽविनाशायायुषोऽभिवृद्धये पिपृत । पारयत । पापरहितान्कुरुतेत्यर्थः ॥

भरेष्विंद्रं सुहवं हवामहेंऽहोमुचं सुकृतं दैव्यं जनं ।
अग्निं मित्रं वरुणं सातये भगं द्यावापृथिवी मरुतः स्वस्तये ॥ ९॥
भरेषु । इंद्रं । सुऽहवं । हवामहे । अंहःऽमुचं । सुऽकृतं । दैव्यं । जनं ।
अग्निं । मित्रं । वरुणं । सातये । भगं । द्यावापृथिवी इति । मरुतः । स्वस्तये ॥ ९॥

अंहोमुचमंहसः पापस्य मोचकं सुहवं शोभनाह्वानमिंद्रं भरेषु । भृणंति भर्त्सयंति विनाशयंति शत्रूनेति भराः संग्रामाः । तेषु हवामहे । रक्षणायाह्वयामः । किंच सुकृतं सुकर्माणं दैव्यं देवसंबंधिनमन्यं जनं चाह्वयामहे । तं जनमुद्दिशति । अग्निं मित्रं वरुणं भगं भजनीयमेतन्नामानं देवं द्यावापृथिवी द्यावापृथिव्यौ मरुतश्च सातयेऽन्नलाभाय स्वस्तयेऽविनाशाय रक्षणायाह्वयामहे ॥

अदितिदेवताकस्य पशोः सुचामाणमित्येषा वपायागस्य याज्या । सूचितं च । अदितिर्द्यौरदितिरंतरिक्षमदितिर्मातासौ स पिताऽसौ स पुत्रः । विश्वे देवा अदिते पंच जना अदितिर्जातमदितिर्जनित्वं सुचामाणं पृथिवीं द्यामनेहसं । आ० ३. ८. । इति ॥ प्रायणीयेष्टावादित्यस्य हविष एषैवानुवाक्या सैवोदयनीयाया याज्या । सूचितं च । सुचामाणं पृथिवीं द्यामनेहसं महीमू षु मातरं सुव्रतानां । आ० ४. ३. । इति ॥ प्रयाणेऽनयैव नावमारोहेत् । सूचितं च । सुचामाणं पृथिवीं द्यामनेहसमिति नावं । आ० गृ० २. ६. ८. । इति ॥

सुचामाणं पृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिं ।
दैवीं नावं स्वरित्रामनागसमस्रवंतीमा रुहेमा स्वस्तये ॥ १०॥
सुऽचामाणं । पृथिवीं । द्यां । अनेहसं । सुऽशर्माणं । अदितिं । सुऽप्रनीतिं ।
दैवीं । नावं । सुऽअरित्रां । अनागसं । अस्रवंतीं । आ । रुहेम । स्वस्तये ॥ १०॥

द्युलोको नौरूपकतया स्तूयते । सुचामाणं सुष्ठु चायंतीं पृथिवीं विस्तृतामनेहसं पापरहितां सुशर्माणं शोभनसुखयुक्तामदितिमदीनां सुप्रणीतिं सुप्रणयनां सुष्ठु प्रणेत्रीं दैवीं देवसंबंधिनीं स्वरित्रां शोभनारित्रां जलाहरणशीलदारुयुक्तामनागसं पापरहितामस्रवंतीमगच्छंतीमविनश्वरीं नावं नावमिव स्थितां द्यां स्वस्तयेऽविनाशाय देवत्वप्राप्तय आ रुहेम । वयमारोहेम ॥ रोहतेर्लिङि लिङ्याशिष्यङिति लिङ्प्रत्ययः ॥ ॥ ४॥

विश्वे यजत्रा अधि वोचतोतये त्रायध्वं नो दुरेवाया अभिह्रुतः ।
सत्यया वो देवहूत्या हुवेम शृण्वतो देवा अवसे स्वस्तये ॥ ११॥

विश्वे । यजत्राः । अधि । वोचत । ऊतये । चायध्वं । नः । दुःऽएवायाः । अभिऽह्रुतः ।
सत्यया । वः । देवऽहूत्या । हुवेम । शृण्वतः । देवाः । अवसे । स्वस्तये ॥ ११ ॥

हे यजत्रा यजनीया हे विश्वे सर्वे देवाः यूयमूतये रक्षणार्थमधि वोचत । अस्मानधिब्रूत । आभाष्य चाभिह्रुतोऽभिहिंसित्र्या दुरेवाया दुर्गतेर्नोऽस्मांस्त्रायध्वं । यद्येवं कुरुथ तर्हि हे देवाः शृण्वतः स्तोत्राण्यस्माभिरुक्तानि तादृशान्वो युष्मान् सत्यया यथार्थभूतया देवहूत्या । देवा ह्वयंतेऽनयेति देवहूतिः स्तुतिः । तया वयं हुवेम । आह्वयेम । किमर्थं । अवसे रक्षणाय शत्रुभ्यः स्वस्तये क्षेमाय जीवनाभिवृद्धये च ॥

अपामीवामप विश्वामनाहुतिमपारातिं दुर्विदत्रामघायतः ।
आरे देवा द्वेषो अस्मद्युयोतनोरु णः शर्म यच्छता स्वस्तये ॥ १२ ॥
अप । अमीवां । अप । विश्वां । अनाहुतिं । अप । अरातिं । दुःऽविदत्रां । अघऽयतः ।
आरे । देवाः । द्वेषः । अस्मत् । युयोतन । उरु । नः । शर्म । यच्छत । स्वस्तये ॥ १२ ॥

हे देवाः अमीवां रोगादिकं यद्वा रोगवद्बाधकं शत्रुमस्मत्तो दूरेऽप कुरुत । पृथक्कुरुत । तथा विश्वां सर्वामनाकृतिं देवानामनाह्वानबुद्धिं यद्वा देवानां महाशत्रुं पृथक्कुरुत । किंचारातिमदानं लोभबुद्धिं यद्वा देवेभ्यो हविषामदातारं शत्रुमप गमयत । अपि चाघायतः पापमिच्छतः शत्रोर्दुर्विदत्रां दुर्विज्ञानं दुष्टां बुद्धिं इत्यं च द्वेषो द्वेष्टॄन् सर्वाञ्छत्रूनस्मदस्मत्त आरे दूरे युयोतन । पृथक्कुरुत । एवं सति यूयं नोऽस्मभ्यमुरु विस्तीर्णं शर्म सुखं स्वस्तये कल्याणाय प्रयच्छत ॥

अरिष्टः स मर्तो विश्व एधते प्र प्रजाभिर्जायते धर्मणस्परि ।
यमादित्यासो नयथा सुनीतिभिरति विश्वानि दुरिता स्वस्तये ॥ १३ ॥
अरिष्टः । सः । मर्तः । विश्वः । एधते । प्र । प्रऽजाभिः । जायते । धर्मणः । परि ।
यं । आदित्यासः । नयथ । सुनीतिऽभिः । अति । विश्वानि । दुःऽइता । स्वस्तये ॥ १३ ॥

हे विश्वे देवाः विश्वः सर्वो मर्तः स मनुष्योऽरिष्टः कैश्चिदप्यहिंसितः सन्नेधते पश्वादिभिर्वर्धते । तथा धर्मणस्परि धारकात्कर्मणोऽनंतरं स मनुष्यः प्रजाभिः पुत्रादिभिः प्र जायते । प्रकर्षेणाविर्भूतो भवति । हे आदित्यास आदित्या देवाः यं मनुष्यं सुनीतिभिः सुनयनैर्विश्वानि सर्वाणि दुरिता दुरितानि पापानि तद्रूपाञ्छत्रून्वा स्वस्तये क्षेमायाति नयथ अतीत्य सन्मार्गं नयथ । स वर्धत इति समन्वयः ॥

यं देवासोऽवथ वाजसातौ यं शूरसाता मरुतो हिते धने ।
प्रातर्यावाणं रथमिंद्र सानसिमरिष्यंतमा रुहेमा स्वस्तये ॥ १४ ॥
यं । देवासः । अवथ । वाजऽसातौ । यं । शूरऽसाता । मरुतः । हिते । धने ।
प्रातःऽयावानं । रथं । इंद्र । सानसिं । अरिष्यंतं । आ । रुहेम । स्वस्तये ॥ १४ ॥

हे देवासो देवाः वाजसातावन्नभजनेऽन्नलाभे वा यं रथमवथ रक्षथ हे मरुतः शूरसाता । संग्रामनामैतत् शूराः स्यंति खिद्यंतेऽत्रेति शूराः सीदंते विनश्यंते योद्धृभिरत्रेति । तस्मिन्युद्धे यं रथं हिते निहिते धने धनमुद्दिश्य ॥ निमित्तात्कर्मसंयोगे । पा० २. ३. ३६. ६. । इति सप्तमी ॥ तदुद्दिश्य रक्षथ । सर्वेषां देवानां मुख्यत्वादिंद्रमेवाभिलक्ष्य वदत्युत्तरार्धेन । हे इंद्र सर्वेषां मुख्य प्रातर्यावाणं प्रातरेव युद्धं प्रति गंतारं सानसिं संभजनीयमरिष्यंतं कैश्चिदप्यहिंसितं । यद्वा । इंद्रसहायानां मरुतामबाधकं । तं रथं स्वस्तयेऽस्माकं रक्षणाय वयमा रुहेम । आरोहेम ॥

प्रावणीयेष्टौ पथ्यास्वस्तेर्यागस्य स्वस्ति नः पथ्यास्वितीषानुवाक्या । उत्तरा याज्या । सूचितं च । स्वस्ति नः पथ्यासु धन्वस्विति द्वे अग्ने नय सुपथा राये अस्मान् । आ० ४. ३. । इति । उदयनीयायामेत एव विपर्यये याज्यानुवाक्ये । सूचितं च । विपरीतास्तु याज्यानुवाक्या इति ॥

स्वस्ति नः पथ्यासु धन्वसु स्वस्त्यप्सु वृजने स्वर्वति ।
स्वस्ति नः पुचकृथेषु योनिषु स्वस्ति राये मरुतो दधातन ॥१५॥
स्वस्ति । नः । पथ्यासु । धन्वऽसु । स्वस्ति । अप्ऽसु । वृजने । स्वःऽवति ।
स्वस्ति । नः । पुचऽकृथेषु । योनिषु । स्वस्ति । राये । मरुतः । दधातन ॥१५॥

हे मरुतो मितराविणो देवाः नोऽस्माकं पथ्यासु पथियोग्येषु सोदकेषु देशेषु स्वस्ति कल्याणं कुरुत । तथा धन्वसु निरुदकेषु देशेषु स्वस्ति कल्याणमुदकजननलक्षणं कुरुत । तथाप्सूदकेषु स्वस्ति । तथा स्वर्वति सर्वैरायुधैर्युक्ते सेनालक्षणे वृजने शत्रूणामावर्जके बले च कल्याणं कुरुत । नोऽस्माकं पुचकृथेषु पुत्राणां कर्तृषूत्पादकेषु स्त्रीणां योनिषु स्वस्ति कल्याणं यथा गर्भा न पतंति तथा क्षेमं कुरुत । किंच नोऽस्माकं राये धनाय गवादिलक्षणाय स्वस्ति क्षेमं दधातन । धत्त । कुरुत ॥

स्वस्तिरिद्धि प्रपथे श्रेष्ठा रेकणस्वत्यभि या वाममेति ।
सा नो अमा सो अरणे नि पातु स्वावेशा भवतु देवगोपा ॥१६॥
स्वस्तिः । इत् । हि । प्रऽपथे । श्रेष्ठा । रेकणस्वती । अभि । या । वामं । एति ।
सा । नः । अमा । सो इति । अरणे । नि । पातु । सुऽआवेशा । भवतु । देवऽगोपा ॥१६॥

या पृथिवी गंतुमुद्युक्तानां प्रपथे प्रकृष्टाय मार्गाय स्वस्तिरित् क्षेमकारिण्येव भवति श्रेष्ठा प्रशस्ततमा रेकणस्वती धनवती या पृथिवी वामं वननीयं यज्ञमभ्येति उत्तरवेद्यात्मना वाभिप्राप्नोति सा पृथिवी नोऽस्माकममा । गृहनामैतत् । गृहं रक्षतु । तथा सो सा उ सैवारणे गंतव्ये देशेऽरणेऽरमणेऽरण्यादिके देशे वा नोऽस्मान्नि पातु । नितरां रक्षतु । तथा देवगोपा देवा गोपायितारो यस्याः संति सा पृथिव्यस्माकं स्वावेशा शोभननिवासा भवतु ॥

एवा ह्यतेः सूनुरवीवृधद्वो विश्व आदित्या अदिते मनीषी ।
ईशानासो नरो अमर्त्येनास्तावि जनो दिव्यो गयेन ॥१७॥
एव । ह्यतेः । सूनुः । अवीवृधत् । वः । विश्वे । आदित्याः । अदिते । मनीषी ।
ईशानासः । नरः । अमर्त्येन । अस्तावि । जनः । दिव्यः । गयेन ॥१७॥

हे विश्व आदित्याः सर्वे देवा हे अदिते देवानां मातरेतन्नामिके देवि वो युष्माकमयमीषी प्राज्ञः स्तोता ह्यतेरेतन्नामकस्यर्षेः सूनुः पुत्रो गयो नामैवंविधस्तुतरीत्यावीवृधत् । स्तुतिभिरवर्धयत् । वर्धतेर्यङंतस्य स्तुति रूपं । अमर्त्येन मनुष्यधर्मरहितेन स्तुतेन येन देवजनेन नरो मनुष्या ईशानासो धनस्येश्वराः स्वामिनो भवंति स दिव्यो दिवि भवो जनो देवगणो गयेनैतन्नामकेन मयास्तावि । अभिष्टुतोऽभूत् । स्तौतेः कर्मणि स्तुडि चडि रूपं ॥ ॥५॥

कयेति सप्तदशर्चं चतुर्थं सूक्तं भ्रातस्य गयस्यार्षं वैश्वदेवं । यां मे धियमिषिरा द्वादशी षोडशीसप्तदशी च त्रिष्टुभः शेषा जगत्यः । तथा चानुक्रांतं । कया यां मे त्रिष्टुविति ॥ गतो विनियोगः ॥

कथा देवानां कतमस्य यामनि सुमंतु नाम शृण्वतां मनामहे ।
को मृळाति कतमो नो मयस्करत्कतम ऊती अभ्या ववर्तति ॥१॥
कथा । देवानां । कतमस्य । यामनि । सुऽमंतु । नाम । शृण्वतां । मनामहे ।
कः । मृळाति । कतमः । नः । मयः । करत् । कतमः । ऊती । अभि । आ । ववर्तति ॥१॥

ऋषिर्बर्कुरात्मानं वितर्कयति । यामनि । यांति गच्छंत्यत्रेति यामा यज्ञः । तस्मिन्शृण्वतामस्माभिरुक्तानि स्तोत्राणि देवानां मध्ये कतमस्य देवस्य सुमंतु सुष्ठु मननीयं स्तोतव्यं नाम कथा कथं मनामहे । उच्चारयामः । अस्मान्को वा मृळाति । मृळतिरुपदयाकर्मेति यास्कः । नि० १०. १५. । छपां करोति । कतमो वा नोऽस्माकं मयः सुखं करत् । करोति । कतमो वोती ॥ चतुर्थ्याः पूर्वसवर्णदीर्घः ॥ ऊत्या अस्माकं रक्षणायाभ्या ववर्तति । अभ्यागच्छतीत्यर्थः ॥

क्रतूयंति क्रतवो हृत्सु धीतयो वेनंति वेनाः पतयंत्या दिशः ।
न मर्डिता विद्यते अन्य एभ्यो देवेषु मे अधि कामा अयंसत ॥२॥
क्रतुऽयंति । क्रतवः । हृत्ऽसु । धीतयः । वेनंति । वेनाः । पतयंति । आ । दिशः ।
न । मर्डिता । विद्यते । अन्यः । एभ्यः । देवेषु । मे । अधि । कामाः । अयंसत ॥२॥

हृत्सु हृदयेषु धीतयो निधातव्या निहिताः क्रतवः प्रज्ञाः क्रतूयंति । अग्निहोत्रादि कर्म कर्तुमिच्छंति । तदेवाह । वेनाः कांताः प्रज्ञा वेनंति । देवान्कामयंते । वेनो वेनतेः कांतिकर्मण इति यास्कः । नि० १०. ३८. । तथा दिशोऽस्माभिर्निर्दिश्यमानाः प्रेर्यमाणाः कामा आ पतयंति । देवान्फलावाप्तय आगच्छंति । यत एभ्यो देवेभ्योऽन्यो देव एषां कामानां मर्डिता सुखयिता न विद्यते । किं बहुना । देवेष्वधि । अधिशब्दः सप्तम्यर्थद्योतकः । इंद्रादिषु देवेषु मे मदीयाः कामा अयंसत । नियम्यंते ॥ यच्छतेः कर्मणि लुङि रूपं ॥

नरां वा शंसं पूषणमगोह्यमग्निं देवेडमभ्यर्चसे गिरा ।
सूर्यामासा चंद्रमसा यमं दिवि चितं वातमुषसमक्तुमश्विना ॥३॥
नराशंसं । वा । पूषणं । अगोह्यं । अग्निं । देवऽईडं । अभि । अर्चसे । गिरा ।
सूर्यामासा । चंद्रमसा । यमं । दिवि । चितं । वातं । उषसं । अक्तुं । अश्विना ॥३॥

ऋषिः स्वात्मानं संबोधयाह । नराशंसं ॥ उभे वनस्पत्यादिषु युगपदिल्लुप्तयपदप्रकृतिस्वरत्वं । संहितायां विप्रकर्षश्छांदसः ॥ नरैः शंसनीयमेतन्नामानं पूषणं स्तोतृणां धनदानेन पोषकमेतन्नामानं तथागोह्यमगूहितमन्यैर्गंतुमशक्यं देवेडं व।मदेवादिभिर्ऋषिभिर्दीपितमग्निं च गिरा स्तुत्याभ्यर्चसे । अभिष्टुहि । तथा सूर्यामासा चंद्रमसा । मा इति चंद्रमसो विशेषणं । माति पचमिति मासचंद्रमाः । तौ सूर्याचंद्रमसौ दिवि द्युलोके स्थितं यमं च चितं चिषु लोकेषु ततं स्वमहिम्ना विस्तृतं चिस्थानं वा तमिंद्रं वातं वायुमुषसमुषःकालमक्तुं रात्रिमश्विनाश्विनौ चैतान्देवांस्तत्तल्लिंगैः स्तोत्रैरभिष्टुहि ॥

कथा कविस्तुवीरवान्कया गिरा बृहस्पतिर्वावृधते सुवृक्तिभिः ।
अज एकपात्सुहवेभिर्ऋक्वभिरहिः शृणोतु बुध्न्यो३ हवीमनि ॥४॥
कथा । कविः । तुविऽरवान् । कया । गिरा । बृहस्पतिः । ववृधते । सुवृक्तिऽभिः ।
अजः । एकऽपात् । सुऽहवेभिः । ऋक्वऽभिः । अहिः । शृणोतु । बुध्न्यः । हवीमनि ॥४॥

कविः क्रांतप्रज्ञोऽग्निः कथा कथं केन प्रकारेण तुवीरवाग्बहुस्तोतृयुक्तो भवति ॥ मत्वर्थीयप्रत्ययावृत्तिः। यद्वा। तुविशब्दस्य रो मत्वर्थीयः। बाहुल्ययुक्तदेवैः सहितो भवति ॥ कया वा गिरा स्तुत्या बहुलाभवति। बृहस्पतिरेतन्नामको देवः सुवृक्तिभिः शोभनाभिः स्तुतिभिस्तथा वावृधते। तथैकपात्। एकोऽसहाय एव पतति गच्छतीत्येकपात्। तादृशो दिवो धारयिताऽऽ एतन्नामको देवस्य सुहवेभिः शोभनाह्वानैर्बहुभिर्मन्त्रवद्भिः स्तोत्रैर्वावृधते। एते त्रयो देवा वर्धंते ॥ चित्वापेचया बहुवचनं। वृधु वृद्धौ। व्यत्ययेन शपः श्लुः ॥ अहिर्बुध्न्यश्चैतन्नामको देवश्च हवीमन्याह्वानेऽस्माञ्शृणोतु ॥

दक्षस्य वादिते जन्मनि व्रते राजाना मित्रावरुणा विवाससि ।
अतूर्तपंथाः पुरुरथो अर्यमा सप्रहोता विषुरूपेषु जन्मसु ॥५॥
दक्षस्य। वा। अदिते। जन्मनि। व्रते। राजाना। मित्रावरुणा। आ। विवाससि।
अतूर्तऽपंथाः। पुरुऽरथः। अर्यमा। सप्रऽहोता। विषुऽरूपेषु। जन्मऽसु ॥५॥

हे अदिते पृथिवि दक्षस्य सूर्यस्य जन्मनि तस्मिञ्जाते व्रते तस्य यज्ञकर्मणि राजाना राजंतौ मित्रावरुणौ विवाससि। वाशब्द उपमार्थः। यथा त्वं वेदिभूता सती तौ पर्यचरः एवमिदानीमप्यस्मद्यज्ञे कुर्विति पृथिवीमाशास्ते। सोऽर्यमारीणां तमसां यंता नियंता सूर्यो विषुरूपेषु नानारूपेषु जन्मसु कर्मस्वन्वहमुद्यन् सप्रहोता। सप्र रश्मयो यस्मिन्नसाञ्जुहुति प्रक्षिपंति स एतादृशो भवति। अतूर्तपंथाः। अतूर्तस्त्वरारहितः पंथा यस्य सः। नियतगतित्वात् त्वरमाणो ह्यनियतगतिर्भवति। पुरुरथः। रथो रंहतेः। प्रत्यहं भुक्तिभेदाद्बहुरंहणो भवति ॥ यद्वा। हे अदिते प्रातस्त्वनि संधौ दक्षस्यादित्यस्य जन्मन्युदयाख्ये जन्मनि कर्मणि। उद्यत्यादित्य इत्यर्थः। वाशब्दः श्रुतिसामर्थ्याद्दक्षस्य वा जन्मनि त्वत्तस्त्व वा जन्मनि दक्षादिति। राजाना दीप्यमानौ मित्रावरुणा। अहर्वै मित्रो रात्रिर्वरुणः। ऐ० ब्रा० ४. १०.। इति श्रुतेरहोरात्रौ मित्रावरुणावुच्येते। तौ विवाससि। परिचरसि। कथं। तदनुप्रवेशेन। अर्धं हि संध्याया रात्रिमनुप्रविश्यत्यर्धमहरिति। उत्तरार्धः पूर्ववत्। सप्रहोता। हुयतेरर्चतिकर्मण इदं रूपं। सप्तर्षयो भरद्वाजादयो होतारः स्तोतारः संतीति। अथवा सप्रहोता। मलिम्लुचांहसस्पतिसहिताः सप्तर्तवो यस्य होतारो भवंति तादृशः। अत्र निरुक्तं। दक्षस्य वादिते जन्मनि कर्मणि व्रते राजानौ। नि० ११. २३.। इत्यादि ॥ ॥६॥

ते नो अर्वंतो हवनश्रुतो हवं विश्वे शृण्वंतु वाजिनो मितद्रवः ।
सहस्रसा मेधसातावि त्मना महो ये धनं समिथेषु जभ्रिरे ॥६॥
ते। नः। अर्वंतः। हवनऽश्रुतः। हवं। विश्वे। शृण्वंतु। वाजिनः। मितऽद्रवः।
सहस्रऽसाः। मेधसातौऽइव। त्मना। महः। ये। धनं। सम्ऽइथेषु। जभ्रिरे ॥६॥

हवनश्रुत आह्वानं शृण्वंतो वाजिनो बलवंतो मितद्रवो मितमार्गा अध्वानं परिच्छिंदंतो विश्वे सर्वे प्रसिद्धा अर्वंतोऽश्वा इंद्रादीनां वाहनभूता हर्यादयो नोऽस्माकं हवमाह्वानं शृण्वंतु। कीदृशाः। मेधसाताविव। मेधाः स्तुतयः सायंते संभज्यंतेऽनेति मेधसातिर्यज्ञः। तस्मिन्निव त्मनात्मनैव सहस्रसाः सहस्रसंख्याकधनस्य दातारः। ते शृण्वंतु येऽश्वाः समिथेषु। संग्राममनामैतत्। संप्राप्यते योद्धृभिरनेति। तेषु संग्रामेषु महो महद्धनं जभ्रिरे शत्रुभ्य आहरंति ॥ हर्यश्वोभः ॥

प्र वो वायुं रथयुजं पुरंधिं स्तोमैः कृणुध्वं सख्याय पूषणं ।
ते हि देवस्य सवितुः सवीमनि क्रतुं सचंते सचितः सचेतसः ॥७॥
प्र। वः। वायुं। रथऽयुजं। पुरंऽधिं। स्तोमैः। कृणुध्वं। सख्याय। पूषणं।
ते। हि। देवस्य। सवितुः। सवीमनि। क्रतुं। सचंते। सऽचितः। सऽचेतसः ॥७॥

हे स्तोतारः वो यूयं वायुं रथयुजं रथस्य योक्तारं पुरंधिं बहुकर्माणमिंद्रं पूषणमेतन्नामानं च सोमैस्तिवृत्पंचदशादिलक्षणैः सख्याय सखिकर्मणे प्र कृणुध्वं । प्रकुरुध्वं । यथा तेऽस्माकं धनादिप्रदानेन सखायो भवंति तथा कुरुत । हि यस्मात्सचितो ज्ञानयुक्तास्ते देवाः सचेतसः परस्परं समानवुद्धयः संतः सवितुः सर्वप्रेरकस्य देवस्यादित्यस्य सवीमनि प्रसवेऽद्रिं क्रतुं यज्ञं सचंते सेवंते तस्मात्प्रकुरुध्वं ॥

त्रिः स॒प्त सस्रा॒ नद्यो॑ म॒हीर॒पो वन॒स्पती॒न्पर्व॑ताँ अ॒ग्निमू॒तये॑ ।
कृ॒शानु॒मस्तॄ॒न्नि॒ष्यं॑ स॒धस्थ॒ आ रु॒द्रं रु॒द्रेषु॑ रु॒द्रियं॑ हवामहे ॥८॥

त्रिः । स॒प्त । सस्राः । नद्यः । म॒हीः । अपः । वन॒स्पती॑न् । पर्व॑तान् । अ॒ग्निं । ऊ॒तये॑ ।
कृ॒शानु॑ं । अस्तॄ॑न् । नि॒ष्यं॑ । स॒धऽस्थे॑ । आ । रु॒द्रं । रु॒द्रेषु॑ । रु॒द्रिय॑ं । ह॒वा॒म॒हे॒ ॥८॥

त्रिः सप्तैकविंशतिसंख्याकाः सस्राः सरंतीर्नद्यो नदीः । सरस्वती सरयुः सिंधुरिति चयाणां गणानां प्रधानभूताः । तदाद्या नदीर्महीर्महांत्यपस्तासामुदकानि सोमाभिषवार्थं वनस्पतीन्दारुमयांश्चमसादीन्पर्वतान्सोमाभिषवार्थं याज्ञोऽग्निं होमनिष्पादकं कृशानुं सोमपालमेतन्नामानं गंधर्वमस्तॄनिषूणां क्षेप्तॄंस्तदनुचरान्गंधर्वानूतये सोमरक्षणाय तिष्यं नक्षत्रं च रुद्रियं रुद्रस्तोमार्हं रुद्रं हविर्भागिनं रुद्रमेतन्नामानं यद्वा परिशिष्टस्वामिनं रुद्रं च एतान्सर्वान्सधस्थे । सह तिष्ठंत्यत्रेति सधस्थो यज्ञः । तस्मिन् रुद्रेषु स्तोत्रकारिषु तदर्थं हवामहे । स्तुत्यर्थेनाङ्ह्वयामहे ॥

सर॑स्वती स॒रयुः॑ सिंधु॒रूर्मि॑भि॒र्महो॑ म॒हीरव॒सा य॑ंतु॒ वक्ष॑णीः ।
दे॒वीरापो॑ मा॒तर॑ः सूदयित्न्वो॒ घृत॑वत्पयो॒ मधु॑मन्नो॒ अर्च॑त ॥९॥

सर॑स्वती । स॒रयु॑ः । सिंधु॑ः । ऊ॒र्मिऽभिः॑ । म॒हः । म॒हीः । अव॑सा । आ । य॑ंतु॒ । वक्ष॑णीः ।
दे॒वीः । आपः॑ । मा॒तर॑ः । सू॒द॒यि॒त्न्वः॑ । घृत॑ऽवत् । पयः॑ । मधु॑ऽमत् । नः॒ । अर्च॑त ॥९॥

महो महतोऽपि महीर्महत्योऽत्यंतं महत्य ऊर्मिभिः सहिताः सरस्वती सरयुः सिंधुरेतदाद्या एकविंशतिसंख्याका वक्षणीरिमा नद्योऽवसा रक्षणेन हेतुना यंतु । अस्मदीयं यज्ञं प्रत्यागच्छंतु । ततो देवीर्देवनशीला मातरो मातृभूताः सूदयित्न्वः प्रेरयित्र्यस्तासामापो घृतवद्घृतयुक्तं मधुमन्मधुसहितमात्मीयं पयो नोऽस्मभ्यमर्चत । प्रयच्छत ॥

उ॒त मा॒ता बृ॑ह॒द्दिवा शृ॑णोतु नस्त्वष्टा॑ दे॒वेभि॒र्जनि॑भिः पि॒ता वचः॑ ।
ऋ॒भु॒क्षा वाजो॑ रथ॒स्पति॒र्भगो॑ र॒ण्वः शंसः॑ शश॒मान॑स्य पातु नः ॥१०॥

उ॒त । मा॒ता । बृ॒ह॒त्ऽदि॒वा । शृ॒णो॒तु॒ । नः॒ । त्वष्टा॑ । दे॒वेभिः॑ । जनि॑ऽभिः । पि॒ता । वचः॑ ।
ऋ॒भु॒क्षाः॑ । वाजः॑ । र॒थ॒ऽपतिः॑ । भगः॑ । र॒ण्वः । शंसः॑ । श॒श॒मान॑स्य । पा॒तु॒ । नः॒ ॥१०॥

उतापि च बृहद्दिवा । महद्दिवेति यास्कः । नि० ११. ४९. । महती दिवा दीप्तिर्यस्याः सा माता देवमाता नोऽस्माकमाह्वानं शृणोतु । तथा देवेभिर्देवैरिंद्रादिभिर्जनिभिर्देवपत्नीभिश्च पिता सर्वेषां त्वष्टैतन्नामको ऽस्मदीयं वचः शृणोतु । तथर्भुक्षा इंद्रो वाजस्तत्सहायो वाजो नाम सौधन्वनः कनीयान्रथस्पती रथस्य पतिर्भगश्च तथा रण्वो रमणीयः शंसः स्तुत्यो मरुद्गणश्च ततः शशमानस्य शंसमानं स्तोतॄनोऽस्मान्पातु । रक्षतु ॥ ॥७॥

र॒ण्वः संदृ॑ष्टौ पितुमाँ इव क्षयो॑ भ॒द्रा रु॒द्राणां॑ मरुता॒मुप॑स्तुतिः ।
गोभिः॒ ष्याम य॒शसो॒ जने॒ष्वा सदा॑ दे॒वास॒ इळ॑या सचेमहि ॥११॥

रण्वः । संऽदृष्टौ । पितुमान्ऽइव । क्षयः । भद्रा । रुद्राणां । मरुतां । उपऽस्तुतिः ।
गोभिः । स्याम । यशसः । जनेषु । आ । सदा । देवासः । इळया । सचेमहि ॥११॥

संदृष्टौ संदर्शने रण्वो रमणीयो मरुद्गणः पितुमानिवान्नवानिव क्षयो निवासः स्तोतृणां भवति। रुद्राणां रुद्रपुत्राणां तेषां मरुतामुपस्तुतिरनुग्रहबुद्धिर्भद्रा कल्याणी भवति । तस्माज्जनेषु जनानां मध्ये वयं गोभिर्गवादिभिर्यशसो यशस्विनः स्याम । भवेम । आनंतरं हे देवासो देवाः युष्मान्सदा सर्वदेळयान्नेन हविर्लक्षणेन सचेमहि । सचेम । संगच्छेम ॥

यां मे धियं मरुत इंद्र देवा अददात वरुण मित्र यूयं ।
तां पीपयत पयसेव धेनुं कुवित्निरो अधि रथे वहाथ ॥१२॥
यां । मे । धियं । मरुतः । इंद्र । देवाः । अददात । वरुण । मित्र । यूयं ।
तां । पीपयत । पयसाऽइव । धेनुं । कुवित् । गिरः । अधि । रथे । वहाथ ॥१२॥

हे मरुतो हे इंद्र देवा हे वरुण हे मित्र यूयं यां धियं यत्कर्म मे मह्यमददात दत्तवंतः स्थ ॥ मरुत इत्यत्र वाक्यभेदादनिघातः । पूर्वपूर्वस्याविद्यमानत्वेनानुदात्तत्वं ॥ तां धियं पीपयत । फलेनाप्याययत । तत्र दृष्टांतः । पयसेव धेनुं नवप्रसूतिकां गां क्षीरेण यथाप्याययंति तद्वत् । किंच गिरोऽस्मदीयाः स्तुतीरधि रथ आत्मीये रथे कुविद्बहुवारं वहाथ । प्राप्ताः स्थ । स्तुतेषु सत्सु यज्ञं प्रत्यागमनाय रथारूढा भवथ ॥

कुविदंग प्रति यथा चिदस्य नः सजात्यस्य मरुतो बुबोधथ ।
नाभा यत्र प्रथमं संनसामहे तत्र जामित्वमदितिर्दधातु नः ॥१३॥
कुवित् । अंग । प्रति । यथा । चित् । अस्य । नः । सऽजात्यस्य । मरुतः । बुबोधथ ।
नाभा । यत्र । प्रथमं । संऽनसामहे । तत्र । जामिऽत्वं । अदितिः । दधातु । नः ॥१३॥

अंगेति संबुद्धौ । हे मरुतः यूयं नोऽस्मान्कुविद्बहुवारं प्रति बुबोधथ । तथा प्रतिबुध्यध्वं ॥ कुविच्छब्दयोगादनिघातः ॥ यथा नोऽस्मान्सजात्यस्यास्य बांधवस्य विषयभूताञ्कुरुथ तथा जानीथ । ततो नाभा पृथिव्या नाभिस्थाने यत्र यस्मिन्नुत्तरवेदिलक्षणे देशे प्रथममेव संनसामहे हविषा यत्र संगच्छेमहि तत्रैव देशेऽदितिर्देवानां माता नोऽस्माकं जामित्वं मनुष्यैः सह बांधवं दधातु । विदधातु ॥

ते हि द्यावापृथिवी मातरा मही देवी देवाञ्जन्मना यज्ञिये इतः ।
उभे बिभृत उभयं भरीमभिः पुरू रेतांसि पितृभिश्च सिंचतः ॥१४॥
ते इति । हि । द्यावापृथिवी इति । मातरा । मही इति । देवी इति । देवान् । जन्मना ।
यज्ञिये इति । इतः ।
उभे इति । बिभृतः । उभयं । भरीमऽभिः । पुरु । रेतांसि । पितृऽभिः । च । सिंचतः ॥१४॥

मातरा सर्वस्य जगतो निर्मात्र्यौ अत एव मही महत्यौ देवी देवनशीले यज्ञिये यज्ञार्हे ते द्यावापृथिवी द्यावापृथिव्यौ देवानिंद्रादीञ्जन्मनैवेतो हि । प्राप्नुतः खलु ॥ इण् गतौ । लिटि रूपं ॥ किंचोभे द्यावापृथिव्यौ भरीमभिर्भरणीनानाविधैरुभयं अन्नं देवान्मनुष्यांश्च बिभृतः । धारयतः । पोषयतः । तथा पितृभिः पालकैर्देवैः संगते ते पुरु पुरूण्यात्मीयानि रेतांस्युदकानि सिंचतः । क्षरतः । प्रत्यहेण धारयतः ॥

वि षा होचा विश्वमश्नोति वार्यं बृहस्पतिररमतिः पनीयसी ।
द्यावा यच्च मधुषुदुच्यते बृहदवीवशंत मतिभिर्मनीषिणः ॥१५॥
वि । सा । होचा । विश्वं । अश्नोति । वार्यं । बृहस्पतिः । अरमतिः । पनीयसी ।
द्यावा । यच्च । मधुऽसुत् । उच्यते । बृहत् । अवीवशंत । मतिऽभिः । मनीषिणः ॥१५॥

होचा । वाङ्नामैतत् आह्वयतेऽनया देवा इति । सा वाग्वार्यं वरणीयं विश्वं सर्वं पश्वादिसहितं धनं व्यश्नोति । विविधं व्याप्नुते । कीदृशी । बृहस्पतिर्बृहतां महतां पालयित्री अरमतिः पर्याप्तस्तुतिः यद्वा कृत्याद्यनुपरता पनीयस्यत्यंतं देवानां स्तोचकारिणी । यच्च यस्यां होचायां मधुषुत् सोममभिषुण्वन्बृहद्महान्द्यावोच्यते अभिधीयते । सूयत इत्यर्थः । तं स्तुतिमंतं यज्ञं मनीषिणो देवा मतिभिः स्तुतिभिः सहावीवशंत । कामयंते ॥ वष्टेर्णितस्य लुङि रूपं ॥ यद्वा । मनीषिणः स्तोतारः स्तुतिभिर्देवान्यज्ञं कामयमानान्कुर्वंति ॥

एवा कविस्तुवीरवाँ ऋतज्ञा द्रविणस्युर्द्रविणसश्चकानः ।
उक्थेभिरच्छ मतिभिश्च विप्रोऽपीपयद्गयो दिव्यानि जन्म ॥१६॥
एव । कविः । तुविऽरवान् । ऋतऽज्ञाः । द्रविणस्युः । द्रविणसः । चकानः ।
उक्थेभिः । अच्छ । मतिऽभिः । च । विप्रः । अपीपयत् । गयः । दिव्यानि । जन्म ॥१६॥

कविः क्रांतप्रज्ञस्तुवीरवान् ॥ मत्वर्थीयप्रत्ययावृत्तिः ॥ बहुस्तुतियुक्त ऋतज्ञा यज्ञस्य वेदिता द्रविणस्युर्धनकामः ॥ सर्वप्रातिपदिकेभ्यो लालसायामिति सुगागमः ॥ तस्यैव विशेषणं । द्रविणसश्चकान इति । पश्वादिधनं कामयमान इत्यर्थः । विप्रो मेधावी गयो नामर्षिरेवमुक्तप्रकारेणाच सूक्त उक्थेभिः शस्त्रैर्मतिभिः स्तुतिभिश्च दिव्यानि दिवि जातानि जन्म जननानि देवानपीपयत् । अवर्धयत् । अस्तावीदित्यर्थः ॥

एवा म्रतेः सूनुरवीवृधद्वो विश्व आदित्या अदिते मनीषी ।
ईशानासो नरो अमर्त्येनास्तावि जनो दिव्यो गयेन ॥१७॥
एव । म्रतेः । सूनुः । अवीवृधत् । वः । विश्वे । आदित्याः । अदिते । मनीषी ।
ईशानासः । नरः । अमर्त्येन । अस्तावि । जनः । दिव्यः । गयेन ॥१७॥

इयं व्याख्याता ॥ ॥८॥

अग्निरिंद्र इति पंचदशर्चं पंचमं सूक्तं । वसुक्रपुत्रस्य वसुकर्णस्यार्षं वैश्वदेवं । पंचदशी त्रिष्टुप् शिष्टा जगत्यः । तथा चानुक्रम्यते । अग्निरिंद्रः पंचोना वासुक्रो वसुकर्णस्त्रिष्टुबंतं त्रिति ॥

अग्निरिंद्रो वरुणो मित्रो अर्यमा वायुः पूषा सरस्वती सजोषसः ।
आदित्या विष्णुर्मरुतः स्वर्बृहत्सोमो रुद्रो अदितिर्ब्रह्मणस्पतिः ॥१॥
अग्निः । इंद्रः । वरुणः । मित्रः । अर्यमा । वायुः । पूषा । सरस्वती । सऽजोषसः ।
आदित्याः । विष्णुः । मरुतः । स्वः । बृहत् । सोमः । रुद्रः । अदितिः । ब्रह्मणः । पतिः ॥१॥

अग्न्यादय आदित्यादयो बृहद्बृहती स्वर्वीश्च सोमादय एते देवाः सजोषसः संहत्य ॥

इंद्राग्नी वृत्रहत्येषु सत्पती मिथो हिन्वाना तन्वा३ समोकसा ।
अंतरिक्षं मह्या पप्रुरोजसा सोमो घृतश्रीर्महिमानमीरयन् ॥२॥

इंद्राग्नी इति । वृचऽहत्येषु । सत्पती इति सत्ऽपती । मिथः । हिन्वाना । तन्वा ।
संऽओकसा ।
अंतरिक्षं । महि । आ । पप्रुः । ओजसा । सोमः । घृतऽश्रीः । महिमानं । ईरयन् ॥२॥

वृचहत्या युद्धानि । तेषु मिथः परस्परं तन्वा शरीरेण तत्रस्थेन बलेन शत्रून्हिन्वाना प्रेरयंती सत्पती सतां पती समोकसा समानस्थानाविंद्राग्नी । घृतश्रीरुदकं वसतीवर्याख्यं श्रयमाणो महिमानमात्मीयमीरयन् सर्वचोदीरयन्नुन्नमयन् सोमश्च । एते सर्वे च महि महदंतरिक्षमोजसा स्वबलेना पप्रुः । आपूरयंति ॥ प्रा पूरणे ॥

तेषां हि महा महतामनर्वणां स्तोमाँ इयर्म्यृतज्ञा ऋतावृधां ।
ये अप्सवमर्णवं चित्ररांधसस्ते नो रासंतां महये सुमिच्याः ॥३॥
तेषां । हि । महा । महतां । अनर्वणां । स्तोमान् । इयर्मि । ऋतऽज्ञाः । ऋतऽवृधां ।
ये । अप्सवं । अर्णवं । चित्रऽरांधसः । ते । नः । रासंतां । महये । सुऽमिच्याः ॥३॥

महा स्वमहत्त्वेन महतामनर्वणामन्यस्मिन्नप्रवृतानां शत्रुभिरनभिगंतव्यानामृतावृधां सत्यभूतेन यज्ञेन वृद्धानां तेषामग्न्यादीनां देवानामेवर्तज्ञा यज्ञस्य ज्ञाताहं स्तोमानियर्मि । प्रेरयामि ॥ ऋ गतिप्रापणयोः जौहोत्यादिकः ॥ चित्ररांधसश्चायनीयधनोपेता यद्वा पश्वादिलक्षणबहुधना ये देवा अप्सवं । अप्स इति रूपनाम । रूपवंतमर्णवं ॥ अर्णसः सलोपश्च । का० ५. २. १०९. ३. । इति मत्वर्थीयो वप्रत्ययः ॥ उदकवंतं मेघं वर्षंति ते सुमिच्याः शोभनसखिकर्माणस्ते देवा नोऽस्मभ्यं महये जनेषु मध्ये पूजार्थं धनं रासंतां । प्रयच्छंतु ॥ रासृ दाने ॥

स्वर्णरमंतरिक्षाणि रोचना द्यावाभूमी पृथिवीं स्कंभुरोजसा ।
पृक्षा इव महयंतः सुरातयो देवाः स्तवंते मनुषाय सूरयः ॥४॥
स्वःऽनरं । अंतरिक्षाणि । रोचना । द्यावाभूमी इति । पृथिवीं । स्कंभुः । ओजसा ।
पृक्षाःऽइव । महयंतः । सुऽरातयः । देवाः । स्तवंते । मनुषाय । सूरयः ॥४॥

स्वर्णरं सर्वस्य स्वस्वकर्मणि नेतारमादित्यमंतरिक्षाणि । द्यावापृथिव्योरंतरा मध्ये वियंति निवसंतीत्यंतरिक्षाणि । मध्यस्थितानि रोचना रोचमानानि तेजांसि द्यावाभूमी द्यावापृथिव्यौ पृथिवीं विस्तीर्णमंतरिक्षं च एतानादित्यादीनोजसा स्वबलेनैव देवाः स्कंभुः । धारयंति ॥ स्कंभ इति सौत्रो धातुः । क्विटि रूपं ॥ किंच पृक्षा इव दरिद्रेषु धनानि संपर्चयंत इव अत एव महयंतः स्तोतॄन्धनादिभिः पूजयंतः सुरातयः सुदाना मनुषाय मनुष्याय सूरयो धनानां प्रेरका एते देवाः स्तवंते । अस्मिन्यज्ञे सूयंते ॥

मित्राय शिक्ष वरुणाय दाशुषे या सम्राजा मनसा न प्रयुच्छतः ।
ययोर्धाम धर्मणा रोचते बृहद्ययोरुभे रोदसी नाधसी वृतौ ॥५॥
मित्राय । शिक्ष । वरुणाय । दाशुषे । या । संऽराजा । मनसा । न । प्रऽयुच्छतः ।
ययोः । धाम । धर्मणा । रोचते । बृहत् । ययोः । उभे इति । रोदसी इति । नाधसी इति ।
वृतौ ॥५॥

दाशुषे धनानि स्तोतृभ्यः प्रयच्छति मित्राय वरुणाय च शिक्ष । हवींषि प्रयच्छ । शिक्षतिर्दानकर्मा । सम्राजा सम्राजौ सर्वस्य यौ मित्रावरुणौ मनसांतःकरणेनापि न प्रयुच्छतः न प्रमाद्यतः किमुत बाह्येन व्यापरिणा ॥ युच्छ प्रमादे भौवादिकः ॥ ययोर्मित्रावरुणयोर्बृहन्महद्धाम शरीरं धर्मणात्मीयेन लोकप्रकाशनादिलक्षणेन कर्मणा रोचते सम्यग्दीप्यते । ययोश्च नाधसी ॥ णाधृ याच्ञोपतापैश्वर्याशीःषु ॥ याचमाने उभे रोदसी द्यावापृथिव्यौ वृतौ वर्तमाने भवतः । यद्वा । नाधसी देवमनुष्यैः समृद्धे द्यावापृथिव्यौ । तयोर्वृतौ वर्तमाने भवतः । तदधीने भवत इत्यर्थः ॥ ॥९॥

या गौर्वर्तनिं पर्येति निष्कृतं पयो दुहाना व्रतनीरवारतः ।
सा प्रब्रुवाणा वरुणाय दाशुषे देवेभ्यो दाशद्धविषा विवस्वते ॥६॥
या । गौः । वर्तनिं । परि । एति । निःऽकृतं । पयः । दुहाना । व्रतऽनीः । अवारतः ।
सा । प्रऽब्रुवाणा । वरुणाय । दाशुषे । देवेभ्यः । दाशत् । हविषा । विवस्वते ॥६॥

येयं मदीया पयः क्षीरादिकं दुहाना व्रतनीराश्रयणपयःप्रदानेन कर्मणो नेत्री गौर्निष्कृतं संस्कृतं वर्तनिमावासस्थानं यज्ञमवारतोऽवरणेनाप्रार्थनेनैव पर्येति परिगच्छति स्वयमेवागच्छति प्रब्रुवाणा मया प्रस्तूयमाना सा गौर्दाशुषे हविर्दत्तवते वरुणाय देवेभ्योऽन्येभ्य इंद्रादिभ्यश्च हविषान्नेन विवस्वते देवान्परिचरते मह्यं मां रुचितुं दाशत् । पयः प्रयच्छतु ॥ दाशृ दाने । लेट्यडागमः ॥ यद्वा । गौरिति माध्यमिका वाक् या पय ऊर्जं दुहाना सा नो मंद्रेषमूर्जं दुहाना । ऋ० ८. १००. ११. । इत्यादिषु दृष्टत्वात् । तत्परतया पूर्ववद्योज्यं ॥

दिवक्षसो अग्निजिह्वा ऋतावृधं ऋतस्य योनिं विमृशंत आसते ।
द्यां स्कभित्व्यप आ चक्रुरोजसा यज्ञं जनित्वी तन्वी३ नि मामृजुः ॥७॥
दिवक्षसः । अग्निऽजिह्वाः । ऋतऽवृधः । ऋतस्य । योनिं । विऽमृशंतः । आसते ।
द्यां । स्कभित्वी । अपः । आ । चक्रुः । ओजसा । यज्ञं । जनित्वी । तन्वि । नि । ममृजुः ॥७॥

दिवक्षसः स्वतेजसा दिवं व्याप्नुवंतः ॥ अक्षू व्याप्तौ । असुनि रूपं ॥ यद्वा । दिवो वोढारः । अग्निजिह्वा अग्न्यास्याः । अग्निना हवींषि लिहंत्यास्वादयंतीति तन्मुखाः । ऋतावृधो यज्ञवृद्धा यज्ञस्य वर्धयितारो देवा वर्तस्य सत्यभूतस्य यज्ञस्य योनिं स्थानं विमृशंतो विचारयंतः प्रतीक्षमाणाः संत आसते । सर्वत्र तिष्ठंति । त इमे द्यां द्युलोकं स्कभित्वी स्कभित्वा तां धारयित्वौजसा स्वबलेनापोऽपेक्षितान्युदकान्या चक्रुः । आकुर्वंति । ततो यज्ञं यजनीयं हविश्च जनित्वी जनयित्वा तन्वि स्वशरीरे नि मामृजुः । निमृजंति । नितरामलंकुर्वंति । हविर्भक्षयंतीत्यर्थः ॥

परिक्षितौ पितरा पूर्वजावरी ऋतस्य योना क्षयतः समोकसा ।
द्यावापृथिवी वरुणाय सव्रते घृतवत्पयो महिषाय पिन्वतः ॥८॥
परिऽक्षितौ । पितरा । पूर्वजावरी इति पूर्वऽजावरी । ऋतस्य । योना । क्षयतः ।
संऽओकसा ।
द्यावापृथिवी इति । वरुणाय । सव्रते इति सऽव्रते । घृतऽवत् । पयः । महिषाय ।
पिन्वतः ॥८॥

परिचिता परितो निवसंत्यौ सर्वत्र व्यापिन्यौ पितरा सर्वेषां मातापितृभूते अत एव पूर्वजावरी पूर्वं जाते समोकसा समाननिवासस्थाने एते द्यावापृथिव्यावृतस्य यज्ञस्य योना योनौ स्थाने सयतः। आङ्पूर्वधिकरणत्वेन निवसतः। हविर्धानरूपे वा सियतः। किंच सव्रते समानकर्मणी ते महिषाय महते पूज्याय वा वरुणाय। तं यष्टुं। उपलक्षणमेतत्। अन्यान्देवानपि। घृतवत्पयश्चरणवत् पय उदकं पिन्वतः। सिंचतः। उदकेन ह्यन्नं जायते॥

पर्जन्यावाता वृषभा पुरीषिणेंद्रवायू वरुणो मित्रो अर्यमा।
देवाँ आदित्याँ अदितिं हवामहे ये पार्थिवासो दिव्यासो अप्सु ये॥९॥
पर्जन्यावाता। वृषभा। पुरीषिणा। इंद्रवायू इति। वरुणः। मित्रः। अर्यमा।
देवान्। आदित्यान्। अदितिं। हवामहे। ये। पार्थिवासः। दिव्यासः। अप्ऽसु। ये॥९॥

पर्जन्यावाता पर्जन्यावायू वृषभौ कामानां सेक्तारौ पुरीषिणा पुरीषिणौ। पुरीषमुदकं। कर्तृत्वेन तद्वंतौ ताविंद्रवायू वरुणादयश्च एते स्वमहिम्ना सर्वत्र वर्तंते। वायोः पर्जन्येनेंद्रेण च तत्कार्यापेक्षया सहोपादानं। एतानादित्यान्देवानदितिं तेषां मातरं च हवामहे। अस्मिन्यज्ञे वयमाह्वयामः। किंच ये देवाः पार्थिवासः पार्थिवाः पृथिव्यां भवा ये च दिव्या दिवि जाता ये चाप्स्वंतरिक्षे समुत्पन्नाः तानाह्वयामहे॥

त्वष्टारं वायुमृभवो य ओहते दैव्या होतारा उषसं स्वस्तये।
बृहस्पतिं वृचखादं सुमेधसमिंद्रियं सोमं धनसा उ ईमहे॥१०॥
त्वष्टारं। वायुं। ऋभवः। यः। ओहते। दैव्या। होतारौ। उषसं। स्वस्तये।
बृहस्पतिं। वृचऽखादं। सुऽमेधसं। इंद्रियं। सोमं। धनऽसाः। ऊं इति। ईमहे॥१०॥

हे ऋभवः। ऋतेन सत्येन भांतीत्यृभवः। उरु प्रभूतं स्वतेजसा भांतीति वा। हे मेधाविनः यः सोमः स्वस्तये कल्याणाय युष्माकं मदाय स्वर्गप्रभृतीनोहते॥ ओहिर्गत्यर्थः। भौवादिकः॥ आवहति प्राप्नोति। तथा बृहस्पतिं सुमेधसं सुप्रज्ञं वृचखादं वृचस्यासुरस्य खादितारमिंद्रं च प्राप्नोति धनसा धनं संभजमाना वयमिंद्रियमिंद्रजुष्टं तं सोममीमहे। धनं याचामहे। ईमह इति याच्ञाकर्मा॥ ईङ् गतौ दैवादिकः। बहुलं छंदसीति विकरणस्य लुक्॥ ॥१०॥

ब्रह्म गामश्वं जनयंत ओषधीर्वनस्पतीन्पृथिवीं पर्वताँ अपः।
सूर्यं दिवि रोहयंतः सुदानव आर्या व्रता विसृजंतो अधि क्षमि॥११॥
ब्रह्म। गां। अश्वं। जनयंतः। ओषधीः। वनस्पतीन्। पृथिवीं। पर्वतान्। अपः।
सूर्यं। दिवि। रोहयंतः। सुऽदानवः। आर्या। व्रता। विऽसृजंतः। अधि। क्षमि॥११॥

ब्रह्म वर्धनसाधनमन्नं। अन्नेन हि सर्वाः प्रजा वर्धंते। गामश्वमेतत्प्रभृतीन्पशून् तथौषधीर्वनस्पतींश्च तथा पृथिवीं विस्तीर्णां भूमिं पर्वतान्शिलोच्चयान् वृथा जगदापूरकान्मेघान्वा अप उदकान्यंतरिक्षं वा एताञ्जनयंत उत्पादयंतः किंच दिवि द्युलोके सूर्यमादित्यं रोहयंतः सुदानवः शोभनदानाश्चैते देवा अधि क्षमि॥ आत इति योगविभागात्। पा० ६. ४. १४०। अकारलोपः॥ क्षमायां पृथिव्यामार्या श्रेष्ठानि कल्याणानि व्रतानि कर्माणि यागादीनि विसृजंतः प्रसारयंतः सर्वत्र वर्तंते। तान्वयं धनं याचामह इति शेषः॥

भुज्युमंहसः पिपृथो निरश्विना श्यावं पुत्रं वध्रिमत्या अजिन्वतं ।
कमद्युवं विमदायोहथुर्युवं विष्णाप्वं१ विश्वकायावं सृजथः ॥१२॥
भुज्युं । अंहसः । पिपृथः । निः । अश्विना । श्यावं । पुत्रं । वध्रिऽमत्याः । अजिन्वतं ।
कमऽद्युवं । विऽमदाय । ऊहथुः । युवं । विष्णाप्वं । विश्वकाय । अवं । सृजथः ॥१२॥

हे अश्विनाश्ववंतौ सर्वं व्याप्नुवंतौ वैतन्नामकौ हे देवौ अंहस उपद्रवकारिणः समुद्राख्यं तुग्रपुत्रमेतन्नामानं निः पिपृथः । निष्पारयथः । नितरां रक्षथः ॥ पॄ पालनपूरणयोः । जौहोत्यादिकः ॥ निष्टौग्र्यं पारयथः समुद्रात् । ऋ० १. ११८. ६. । इति निगमः । तथा श्यावं हिरण्यहस्तनामानं पुत्रं वध्रिमत्या एतन्नामिकाया अजिन्वतं । अप्रीणयतं । अदत्तं । हिरण्यहस्तमश्विना रराणा । ऋ० १. ११७. २४. । इत्यादि निगमः । तथा कमद्युवं कामस्य दीपनीं वेनपुत्रीं जायां विमदायर्षये युवमूहथुः । प्रापयथः । युवं रथेन विमदाय । ऋ० १०. ३९. ७. । इति निगमः । तथा विष्णाप्वमेतन्नामानं विनष्टं पुत्रं विश्वकायर्षेय आनीयाव सृजथः । अदत्तं । पशुं न नष्टमिव दर्शनाय । ऋ० १. ११६. २३. । इति निगमः ॥

पावीरवी तन्यतुरेकपादजो दिवो धर्ता सिंधुरापः समुद्रियः ।
विश्वे देवासः शृणवन्वचांसि मे सरस्वती सह धीभिः पुरंध्या ॥१३॥
पावीरवी । तन्यतुः । एकऽपात् । अजः । दिवः । धर्ता । सिंधुः । आपः । समुद्रियः ।
विश्वे । देवासः । शृणवन् । वचांसि । मे । सरस्वती । सह । धीभिः । पुरंऽध्या ॥१३॥

पावीरव्यायुधवती तन्यतुः स्तनयित्नुर्वाग्माध्यमिका तथा दिवो द्युलोकस्य धर्ता धारयिताज एकपात् एक एव पद्यते गच्छतीति न जायत इत्येतत्संज्ञको देवः सिंधुश्च समुद्रियः । समुद्रमंतरिक्षं । तत्र भवा आपश्च ॥ समुद्राभ्राद्ध इति भावार्थे घप्रत्ययः ॥ विश्वे देवाश्च धीभिः कर्मभिर्युक्ताः पुरंध्या बहुविधया प्रज्ञया सहिता सरस्वती च मे मदीयानि वचांसि वक्तव्यानि स्तोत्राणि शृणवन् । शृण्वंतु । पविः शस्त्रो भवति यद्विपुनाति कायमित्यादि निरुक्तमनुसंधेयं । नि० १२. ३०. ॥

विश्वे देवाः सह धीभिः पुरंध्या मनोर्यजत्रा अमृता ऋतज्ञाः ।
रातिषाचो अभिषाचः स्वर्विदः स्व१र्गिरो ब्रह्म सूक्तं जुषेरत ॥१४॥
विश्वे । देवाः । सह । धीभिः । पुरंऽध्या । मनोः । यजत्राः । अमृताः । ऋतऽज्ञाः ।
रातिऽसाचः । अभिऽसाचः । स्वःऽविदः । स्वः । गिरः । ब्रह्म । सुऽउक्तं । जुषेरत ॥१४॥

धीभिः कर्मभिः सहिताः पुरंध्या प्रज्ञानेन युक्ता मनोर्मनुष्यस्य यज्ञे यजत्रा यष्टव्या अमृता मरणधर्मरहिता ऋतज्ञाः सत्यविदो रातिषाचो दीयमानं हविः सेवमाना अभिषाच आभिमुख्येन यज्ञं समवयंतः संगतवंतः स्वर्विदः सर्वस्य लंभका विश्वे सर्वे इंद्रादयो देवाः स्वः सर्वा गिरोऽस्मदीयाः स्तुतीर्ब्रह्म महच्चान्नं सूक्तं सुष्ठु वक्तव्यं स्तोमं यद्वा सुष्ठु मंत्रेण सह दत्तमन्नं जुषेरत । सेवंतां ॥ जुषी प्रीतिसेवनयोः । तौदादिकः । अगुदात्तेत् । लिङि श्नस्य रनादेशाभावश्छांदसः । बहुलं छंदसीति शडागमः ॥

देवान्वसिष्ठो अमृतान्ववंदे ये विश्वा भुवनाभि प्रतस्थुः ।
ते नो रासंतामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥१५॥

देवान्। वसिष्ठः। अमृतान्। ववंदे। ये। विश्वा। भुवना। अभि। प्रऽतस्थुः।
ते। नः। रासंतां। उरुऽगायं। अद्य। यूयं। पात। स्वस्तिऽभिः। सदा। नः॥ १५॥

वसिष्ठो वसिष्ठकुलजोऽयमृषिरमृतान्मरणरहितान्देवान्ववंदे। एवमस्तावीत्। ये देवा विश्वा विश्वानि भुवनानि लोकानभि प्रतस्थुः स्वतेजसाभिभवंति। अभितः प्रतिष्ठंतीति वा॥ प्रपूर्वात्तिष्ठतेर्लिटि रूपं। समासस्वरः॥ ते देवा अद्यास्मिन्दिने नोऽस्मभ्यमुरुगायं प्रभूतयशस्कमन्नं रासंतां। प्रयच्छंतु। हे देवाः यूयं स्वस्तिभिः कल्याणीभिरुतिभिर्नोऽस्मान्सदा सर्वदा पात। रक्षत॥ ॥ ११॥

देवान्हुव इति पंचदशर्चं षष्ठं सूक्तं। ऋष्याद्याः पूर्ववत्। देवान्हुव इत्यनुक्रांतं॥ पृष्ठ्याभिप्लवषडहयोः पंचमेऽहनीदं वैश्वदेवनिविद्धानं। सूचितं च। इहेह व इति चतस्रो देवान्हुव इति वैश्वदेवं। आ० ७. ५.। इति॥

देवान्हुवे बृहच्छ्रवसः स्वस्तये ज्योतिष्कृतो अध्वरस्य प्रचेतसः।
ये वावृधुः प्रतरं विश्ववेदस इंद्रज्येष्ठासो अमृता ऋतावृधः॥ १॥
देवान्। हुवे। बृहत्ऽश्रवसः। स्वस्तये। ज्योतिःऽकृतः। अध्वरस्य। प्रऽचेतसः।
ये। ववृधुः। प्रऽतरं। विश्वऽवेदसः। इंद्रऽज्येष्ठासः। अमृताः। ऋतऽवृधः॥ १॥

बृहच्छ्रवसः प्रभूतान्नाज्ज्योतिष्कृत आदित्याख्यस्य तेजसः कर्तॄन्प्रचेतसः प्रकृष्टज्ञानांस्तान्देवानध्वरस्यास्य यज्ञस्य स्वस्तयेऽविनाशाय निर्विघ्नेन यज्ञपरिसमाप्तये हुवे। आह्वयामि। विश्ववेदसः सर्वधना इंद्रज्येष्ठासः। इंद्रो ज्येष्ठः प्रधानो येषां। इंद्रनेतृका इत्यर्थः। अमृता मरणधर्मरहिता ऋतावृधो यज्ञेन प्रवृद्धा ये देवाः प्रतरमत्यंतं ववृधुः वर्धंते॥

इंद्रप्रसूता वरुणप्रशिष्टा ये सूर्यस्य ज्योतिषो भागमानशुः।
मरुद्गणे वृजने मन्म धीमहि माघोने यज्ञं जनयंत सूरयः॥ २॥
इंद्रऽप्रसूताः। वरुणऽप्रशिष्टाः। ये। सूर्यस्य। ज्योतिषः। भागं। आनशुः।
मरुत्ऽगणे। वृजने। मन्म। धीमहि। माघोने। यज्ञं। जनयंत। सूरयः॥ २॥

इंद्रप्रसूता इंद्रेण तत्कार्येषु प्रेरिता वरुणप्रशिष्टा वरुणेनानुशिष्टा अनुमोदिता ये मरुतो ज्योतिषो द्योतमानस्य सूर्यस्य स्वस्वकर्मणि सर्वस्य प्रेरकस्यामुष्यादित्यस्य भागं भजनीयं लोकमानशुः आनशिरे व्याप्नवंतः। सूर्यमधिष्ठाय वर्तंत इत्यर्थः। वृजने शत्रूणां क्षेदके माघोने मघवत इंद्रस्य संबंधिनि मरुद्गणे तेषां मरुतां गणे मन्म मननीयं स्तोत्रं धीमहि। दध्मः। कुर्मः। किंच सूरयः प्राज्ञा यजमानास्तन्निमित्तमेव यज्ञं जनयंत। जनयंति। तेषां हविष्प्रदानाय कुर्वंति॥

इंद्रो वसुभिः परि पातु नो गयमादित्यैर्नो अदितिः शर्म यच्छतु।
रुद्रो रुद्रेभिर्देवो मृळयाति नस्त्वष्टा नो ग्नाभिः सुविताय जिन्वतु॥ ३॥
इंद्रः। वसुऽभिः। परि। पातु। नः। गयं। आदित्यैः। नः। अदितिः। शर्म। यच्छतु।
रुद्रः। रुद्रेभिः। देवः। मृळयाति। नः। त्वष्टा। नः। ग्नाभिः। सुविताय। जिन्वतु॥ ३॥

वसुभिरेतन्नामकैरष्टभिर्देवैः सहित इंद्रो नोऽस्मदीयं गयं। गृहनामैतत् प्रातरह्नं गायते शब्दयतेऽत्रेति वा गृहं गयं। परि पातु। परिरक्षतु। तथादितिर्देवमातादित्यैर्देवैः सह नोऽस्मभ्यं शर्म सुखं प्रयच्छतु। किंच देवो दीप्यमानो रुद्रो रुद्रेभिः स्वपुत्रैर्मरुद्भिः सह नोऽस्मान्मृळयाति। सुखयतु॥ मृड सुखने। लेट्यडागमः॥

अपि च त्वष्टा प्रजापतिर्मात्राभिर्देवपत्नीभिस्त्वंदोभिः सुविताय सुष्ठु प्राप्तव्यायाभ्युदयाय नोऽस्मान्नित्वतु । प्रीणयतु ॥

अदितिर्द्यावापृथिवी ऋतं महदिंद्राविष्णू मरुतः स्वर्बृहत् ।
देवाँ आदित्याँ अवसे हवामहे वसूनुद्रान्त्सवितारं सुदंससं ॥४॥
अदितिः । द्यावापृथिवी इति । ऋतं । महत् । इंद्राविष्णू इति । मरुतः । स्वः । बृहत् ।
देवान् । आदित्यान् । अवसे । हवामहे । वसून् । रुद्रान् । सवितारं । सुऽदंससं ॥४॥

अदितिर्द्यावापृथिवी द्यावापृथिव्यौ महत्महानृतं सत्यभूतोऽग्निरिंद्राविष्णू मरुतश्च बृहत्परिवृढः स्वरादित्यः एते देवाः सर्वत्र स्वमहिम्ना वर्तंते । एतान्देवानादित्यादीन्सुदंससं सुकर्माणं सवितारमेतन्नामानं चावसे रक्षणाय हवामहे । वयमाह्वयामहे ॥

सरस्वान्धीभिर्वरुणो धृतव्रतः पूषा विष्णुर्महिमा वायुरश्विना ।
ब्रह्मकृतो अमृता विश्ववेदसः शर्म नो यंसन् त्रिवरूथमंहसः ॥५॥
सरस्वान् । धीभिः । वरुणः । धृतऽव्रतः । पूषा । विष्णुः । महिमा । वायुः । अश्विना ।
ब्रह्मऽकृतः । अमृताः । विश्वऽवेदसः । शर्म । नः । यंसन् । त्रिऽवरूथं । अंहसः ॥५॥

धीभिः प्रज्ञाभिर्युक्तः सरस्वानेतन्नामा धृतव्रतो धृतकर्मा वरुणश्च पूषा महिमा महत्त्वेन युक्तो विष्णुश्च वायुरश्विनाश्विनौ ब्रह्मकृतः कर्मकृतः स्तोतृणामन्नदातारो वा विश्ववेदसः सर्वधना व्याप्तज्ञाना वांहसः पापरूपाणां शत्रूणां हंतारोऽमृता एते देवा नोऽस्मभ्यं त्रिवरूथं त्रिष्वंभं त्रिकक्ष्यं शर्म गृहं । यद्वा । त्रिवरूथं । द्रोणाधवनीयपूतभृत्संज्ञकानि त्रीणि पात्राणि यत्र त्रियंते संभ्रियंते तद्यज्ञसाधनं गृहं । यंसन् । प्रयच्छंतु ॥ यच्छतेर्लेटि सिप्यडागमः ॥ ॥१२॥

वृषा यज्ञो वृषणः संतु यज्ञिया वृषणो देवा वृषणो हविष्कृतः ।
वृषणा द्यावापृथिवी ऋतावरी वृषा पर्जन्यो वृषणो वृषस्तुभः ॥६॥
वृषा । यज्ञः । वृषणः । संतु । यज्ञियाः । वृषणः । देवाः । वृषणः । हविःऽकृतः ।
वृषणा । द्यावापृथिवी इति । ऋतवरी इत्यृतऽवरी । वृषा । पर्जन्यः । वृषणः ।
वृषऽस्तुभः ॥६॥

यज्ञ एषोऽस्मदीयो वृषा कामानां वर्षितासु । तथा यज्ञिया यज्ञार्हा देवाश्च वृषणः संतु । किंच देवाः स्तुतिकारिण ऋत्विजो वृषणो धनवर्षणे कारणानि संतु साधुस्तुतिकरणेन । तथा हविष्कृतो हविषां कर्तारोऽध्वर्यादयो वृषणोऽन्नयतया मंत्रसाहित्येन च हविष्प्रदानेन । अपि चर्तावरी यज्ञवत्यौ द्यावापृथिवी द्यावापृथिव्यौ वृषणा हविरुत्पादनेन कामानां वर्षयित्र्यौ भवतां । तथा पर्जन्य इंद्रो वृषापां वर्षिता भवतु । वृषस्तुभो वर्षणशीलस्तुतिभिर्देवान्स्तुवंतः सर्व ऋत्विजो वृषणो भवंतु ॥

अग्नीषोमा वृषणा वाजसातये पुरुप्रशस्ता वृषणा उप ब्रुवे ।
यावीजिरे वृषणो देवयज्यया ता नः शर्म त्रिवरूथं वि यंसतः ॥७॥

अग्नीषोमा । वृषणा । वाजऽसातये । पुरुऽप्रशस्ता । वृषणौ । उप । ब्रुवे ।
यौ । ईजिरे । वृषणः । देवऽयज्यया । ता । नः । शर्म । चिऽवरूथं । वि । यंसतः ॥ ७॥

वृषणा वर्षणशीलौ पुरुप्रशस्ता बहुभिः प्रशस्तावग्नीषोमौ वाजसातयेऽन्नलाभायोप ब्रुवे । अहमुपस्तौमि । पुनर्वृषणावित्यादरार्थं । यौ देवौ वृषण ऋत्विजो देवयज्यया । देवा इज्यंतेऽनेति देवयज्या यज्ञः ॥ छंदसि निष्टर्क्येति निपातितः ॥ तेनेजिरे यजंते हविर्भिः पूजयंति ता तौ प्रसिद्धौ नोऽस्मभ्यं चिवरूथं चित्रंभं शर्म गृहं वि यंसतः । विशेषेण प्रयच्छतां ॥

धृतव्रताः क्षुचिया यज्ञनिष्कृतो बृहद्दिवा अध्वराणामभिश्रियः ।
अग्निहोतार ऋतसापो अद्रुहोऽपो असृजन्ननु वृचतूर्ये ॥ ८॥
धृतऽव्रताः । क्षुचियाः । यज्ञनिःऽकृतः । बृहत्ऽदिवाः । अध्वराणां । अभिऽश्रियः ।
अग्निऽहोतारः । ऋतऽसापः । अद्रुहः । अपः । असृजन् । अनु । वृचऽतूर्ये ॥ ८॥

धृतव्रता धृतकर्माणो जात्या क्षुचियाः । यद्वा । क्षुचं बलं । तदर्हाः । यज्ञनिष्कृतः । यज्ञं प्रति निर्गमनं यज्ञनिः । तस्य कर्तारो बृहद्दिवा महातेजस्का अध्वराणां रक्षोभिरहिंसितानां यज्ञानामभिश्रियोऽभिसेवका अग्निहोतारोऽग्निहोताह्वाता येषां तादृशा ऋतसापः ॥ षप समवाये ॥ सत्यभाजः अत एवाद्रुहः केषांचिद्-यद्रोग्धारः । यद्वा ॥ द्रुहेः कर्मण्यौणादिकः क्विप् ॥ कैश्चिदप्यहिंस्याः । एवंप्रभावा देवा वृचतूर्ये । वृचत्यूर्यते हिंस्यतेऽनेति वृचतूर्यः संग्रामः । तस्मिन्नपामावरकमृचुवधेऽप उदकान्यन्वसृजन् । अन्वसारयन् ॥

द्यावापृथिवी जनयन्नभि व्रताप ओषधीर्वनिनानि यज्ञियाः ।
अंतरिक्षं स्वरा पप्रुरूतये वशं देवासस्तन्वी३ नि मामृजुः ॥ ९॥
द्यावापृथिवी इति । जनयन् । अभि । व्रता । आपः । ओषधीः । वनिनानि । यज्ञियाः ।
अंतरिक्षं । स्वः । आ । पप्रुः । ऊतये । वशं । देवासः । तन्वि । नि । ममृजुः ॥ ९॥

देवासो देवा इंद्रादयो द्यावापृथिवी द्यावापृथिव्यावभ्यभिलक्ष्य व्रता व्रतेन स्वेन कर्मणापः ॥ सुञ्चत्ययः ॥ अप उदकान्योषधीश्च तथा यज्ञिया यज्ञार्हान्वनिनानि वने भवान्यलाशादीन्वृक्षाञ्जनयन् । उदपादयन् । किंच ते देवाः स्वः सर्वमंतरिक्षमा पप्रुः । तेजसापूरयंति । किमर्थं । ऊतये रक्षणाय शत्रुभ्यो बाधाभावाय । अपि च वशं कामयमानं ॥ वशिरण्योरुपसंख्यानं । पा० ३. ३. ५८. ३. । इत्यकर्तरि कारकेऽप् ॥ तं यज्ञं तन्वि स्वशरीरे नि ममृजुः । नितरां शुद्धमलंकृतं चक्रुः ॥

धर्तारौ दिव ऋभवः सुहस्ता वातापर्जन्या महिषस्य तन्यतोः ।
आप ओषधीः प्र तिरंतु नो गिरो भगो रातिर्वाजिनो यंतु मे हवं ॥ १०॥
धर्तारः । दिवः । ऋभवः । सुऽहस्ताः । वातापर्जन्या । महिषस्य । तन्यतोः ।
आपः । ओषधीः । प्र । तिरंतु । नः । गिरः । भगः । रातिः । वाजिनः । यंतु । मे । हवं ॥ १०॥

दिवो द्युलोकस्य धर्तारो धारयितार ऋभवः सत्येन भासमानाः सुहस्ताः शोभनबलाद्यायुधयुक्तहस्ता देवास्तथा महिषस्य महतस्तन्यतोः शब्दस्य ॥ तनु विस्तारे । ऋतन्यंजीति यतुच्प्रत्ययः ॥ शब्दस्य कर्तारौ वातापर्जन्या वातश्च पर्जन्यश्च तत्कार्या आप ओषधीरोषधयश्च नोऽस्माकं गिरः स्तुतीः प्र तिरंतु । प्रवर्धयंतु । प्रपूर्वस्तिरतिर्वृद्ध्यर्थः । तथा रातिर्दाता भगो भजनीयोऽर्यमा च वाजिनः । अग्निर्वायुः सूर्यश्चै वै वाजिन इति तैत्तिरीयब्राह्मणं । १. ६. ३. ९. । एते देवाश्च मे मदीयं हवमाह्वानं यंतु । अभिगच्छंतु ॥ ॥ १३॥

समुद्रः सिंधू रजो अंतरिक्षमज एकपात्तनयित्नुरर्णवः ।
अहिर्बुध्न्यः शृणवद्वचांसि मे विश्वे देवास उत सूरयो मम ॥११॥
समुद्रः । सिंधुः । रजः । अंतरिक्षं । अजः । एकऽपात् । तनयित्नुः । अर्णवः ।
अहिः । बुध्न्यः । शृणवत् । वचांसि । मे । विश्वे । देवासः । उत । सूरयः । मम ॥११॥

समुद्रः समुंदनशीलः स्यंदमानोदकः सिंधुरेतन्नामकोऽंतरिक्षं द्यावापृथिव्योरंतरा मध्ये स्थितमृषिं रजो मध्यमलोकमज एकपात् । अजायमान एक एव पदयति । एतत्संज्ञको देवोऽर्णव उदकवांस्तनयित्नुः स्तनयित्नुर्मेघो बुध्न्योऽंतरिक्षे भवोऽहिरेतत्संज्ञकः एते देवा मे मम वचांसि वक्तव्यानि स्तोत्राणि शृणवत् । प्रत्येकं शृणोतु । उतापि च सूरयः प्राज्ञा विश्वे देवासो देवा मम स्तोत्राणि शृण्वंतु ॥

स्याम वो मनवो देववीतये प्रांचं नो यज्ञं प्र णयत साधुया ।
आदित्या रुद्रा वसवः सुदानव इमा ब्रह्म शस्यमानानि जिन्वत ॥१२॥
स्याम । वः । मनवः । देवऽवीतये । प्रांचं । नः । यज्ञं । प्र । नयत । साधुऽया ।
आदित्याः । रुद्राः । वसवः । सुऽदानवः । इमा । ब्रह्म । शस्यमानानि । जिन्वत ॥१२॥

हे देवाः मनवो मनुष्या वयं वो युष्मदीयाय देववीतये । देवानां वीतिर्भक्षणं यस्मिन् स यज्ञः । तस्मै यज्ञाय स्याम । यज्ञकर्तारो भवेम । ततो नोऽस्मदीयं यज्ञं साधुया ॥ सुपो याजादेशः ॥ साधु कल्याणं प्रांचं प्राचीनं प्र णयत । प्रकृष्टांचनं कुरुत । हे आदित्या हे रुद्रा रुद्रपुत्रा मरुतो हे सुदानवः शोभनदाना हे वसवः इमेमानि शस्यमानानि ब्रह्म ब्रह्माणि स्तोत्राणि जिन्वत । प्रीणयत ॥

अग्नेर्यामेऽच्छावाकातिरिक्तोक्थस्य दैव्या होतारित्येषा परिधानीया । सूचितं च । उभा उ नूनं दैव्या होतारा प्रथमा पुरोहितेति परिधानीया । आ० ९.११.। इति ॥

दैव्या होतारा प्रथमा पुरोहित ऋतस्य पंथामन्वेमि साधुया ।
क्षेत्रस्य पतिं प्रतिवेशमीमहे विश्वान्देवाँ अमृताँ अप्रयुच्छतः ॥१३॥
दैव्या । होतारा । प्रथमा । पुरःऽहिता । ऋतस्य । पंथां । अनु । एमि । साधुऽया ।
क्षेत्रस्य । पतिं । प्रतिऽवेशं । ईमहे । विश्वान् । देवान् । अमृतान् । अप्रऽयुच्छतः ॥१३॥

प्रथमा मुख्यौ पुरोहिता पुरोहितौ पुरतो निहितौ दैव्या देवसंबंधिनौ होतारा होतारावेतन्नामानावग्न्यादित्यावन्वेमि । हविर्भिरनुगच्छामि । तत ऋतस्य यज्ञस्य पंथां पंथानं साधुया कल्याणं विघ्नराहित्येनान्वेमि । अनुगच्छामि । अनंतरं प्रतिवेशं समीपे वर्तमानं क्षेत्रस्य पतिं पालयितारमेतन्नामानममृतान्मरणधर्मरहितानप्रयुच्छतोऽप्रमादतो विश्वान्सर्वान्देवांश्चेमहे । धनं याचामहे ॥

वसिष्ठासः पितृवद्वाचमक्रत देवाँ ईळाना ऋषिवत्स्वस्तये ।
प्रीता इव ज्ञातयः काममेत्यास्मे देवासोऽवं धूनुता वसु ॥१४॥
वसिष्ठासः । पितृऽवत् । वाचं । अक्रत । देवान् । ईळानाः । ऋषिऽवत् । स्वस्तये ।
प्रीताःऽइव । ज्ञातयः । कामं । आऽइत्य । अस्मे इति । देवासः । अव । धूनुत । वसु ॥१४॥

ऋषिवत् पूर्व ऋषय इव देवानीळानाः स्तुवंतो वसिष्ठासो वसिष्ठकुलजाता ऋषयः पितृवद्वसिष्ठवत्स्व-

स्तोत्रेऽविनाशाय वाचं स्तोत्रमक्रत । कुर्वंति ॥ करोतेर्लुङि मंत्रे घसेति च्लेर्लुक् ॥ हे देवासो देवाः यूयं कामम-स्मदभिलाषमेत्यागत्यास्मे अस्मासु वसु गवादिलक्षणं धनमव धूनुत । अभिमुखं प्रेरयत । तत्र दृष्टांतः । प्रीता इव यथा प्रीताः संहृष्टा ज्ञातयो बंधवः स्वजनस्य धनं प्रेरयंति तद्वत्स्तुतिकरणेन च बंधुभूयास्मासु धनं प्रेरयतेति भावः ॥

देवान्वसिष्ठो अमृतान्ववंदे ये विश्वा भुवनाभि प्रतस्थुः ।
ते नो रासंतामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥१५॥
देवान् । वसिष्ठः । अमृतान् । ववंदे । ये । विश्वा । भुवना । अभि । प्रऽतस्थुः ।
ते । नः । रासंतां । उरुऽगायं । अद्य । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥१५॥

एषर्क् पूर्वमेव व्याख्यायि ॥ ॥१४॥

इमां धियमिति द्वादशर्चं सप्तमं सूक्तमांगिरसस्यायास्यस्यार्षं त्रैष्टुभं । इदमुत्तरं च बृहस्पतिदेवताकं । तथा चानुक्रांतं । इमां धियं द्वादशायास्यो बार्हस्पत्यं त्रिति ॥ आभिप्लविकेषूक्थ्येषु स्तोमवृद्धौ ब्राह्मणाच्छंसिन इदं सूक्तमावापार्थं । सूचितं च । इमां धियमिति ब्राह्मणाच्छंसी विष्णोर्नु कमिति सूक्ते । आ० ७. ९. । इति ॥

इमां धियं सप्तशीर्ष्णीं पिता नः ऋतप्रजातां बृहतीमविंदत् ।
तुरीयं स्विज्जनयद्विश्वजन्योऽयास्य उक्थमिंद्राय शंसन् ॥१॥
इमां । धियं । सप्तऽशीर्ष्णीं । पिता । नः । ऋतऽप्रजातां । बृहतीं । अविंदत् ।
तुरीयं । स्वित् । जनयत् । विश्वऽजन्यः । अयास्यः । उक्थं । इंद्राय । शंसन् ॥१॥

अत्रेतिहासमाचक्षते । पुरा किलांगिरा नामर्षिर्बृहस्पतिं पुत्रमलभत । स तु देवानां हितोपदेशनायेंद्रस्य पुरोहितोऽभवत् । कदाचित्तस्य गावः पणिनामकैरसुरैरपहृत्य वलपुरं प्रापय्य चिषु स्थानेषु तमसावृतेषु स्थापिता आसन् । अथ तासामन्वेषणायेंद्रेण प्रेरितो बृहस्पतिर्मरुद्भिः सह तत्रागत्य गवां गुहा स्थितानां दर्शनाय सूर्यं जनयित्वा वलनामानमसुरं तदनुचरान्पणींश्च हत्वा गा आजहारेति । तदत्र दर्शयिष्यते । तथा चास्या ऋचोऽयमर्थः । धियं कर्मणां धात्रीं सप्तशीर्ष्णीं सप्तरश्मिरस्कां सप्तभिः शिरःस्थानीयैस्तद्वत्प्रधानभूतैर्म-रुद्गणैरुपेतां । यद्वा । सप्तच्छंदोमयशिरस्कां । ऋतप्रजातां यज्ञार्थमुत्पन्नां बृहतीं महतीमिमां तनुं नोऽस्माकं पितांगिरा अविंदत् । लब्धवान् । कर्मणां धातारं बृहस्पतिं पुत्रमलभतेत्यर्थः । येऽंगारा आसंस्तेऽंगिरसोऽभवन् यदंगाराः पुनरवशांता उददीप्यंत तद्बृहस्पतिरभवदिति ब्राह्मणं । ऐ० ब्रा० ३. ३४. । तथा तुरीयं खिन्नप्रारमपि जनयत् अजनयत् विश्वजन्यः सर्वजनहित इंद्रायेश्वराय बृहस्पतय इंद्राय वोक्थं स्तोत्रं शंसन्नयमयास्यो नामर्षिः । पूर्वमेव नोऽस्माकं पितेत्याकार्षीदित्याह ॥

ऋतं शंसंत ऋजु दीध्याना दिवस्पुत्रासो असुरस्य वीराः ।
विप्रं पदमंगिरसो दधाना यज्ञस्य धाम प्रथमं मनंत ॥२॥
ऋतं । शंसंतः । ऋजु । दीध्यानाः । दिवः । पुत्रासः । असुरस्य । वीराः ।
विप्रं । पदं । अंगिरसः । दधानाः । यज्ञस्य । धाम । प्रथमं । मनंत ॥२॥

ऋतं सत्यभूतं स्तोत्रं शंसंतः स्तुवंत ऋजु कल्याणं दीध्यानाः कर्माणि ध्यायंतो दिवो दीप्तस्यासुरस्य प्रज्ञानवतोऽग्नेरंगिरसः पुत्राः । अंगिरसो ह्यंगारेभ्यो जाता इत्युक्तं । अंगारेभ्यंगिराः । नि० ३. १७. । इति । वीरा विक्रांतप्रज्ञा एतेऽंगिरसो विप्रं प्रज्ञापकं यज्ञस्य धाम धारकं पदं बृहस्पत्याख्यं दधानाः कर्मणा धारयंतः संतः प्रथममादित एव मनंत । स्तुवंति । प्रज्ञापकं ह्येतत्स्थानं यद्बृहस्पतिरिति ॥

देवसुवां हविःषु बृहस्पतये वाचस्पतय इत्यस्य याज्या हंसैरिवेत्येषा । सूचितं च । बृहस्पते प्रथमं वाचो अग्रं हंसैरिव सखिभिर्वावदद्भिः । आ० ४. ११. । इति ॥

हंसैरिव सखिभिर्वावदद्भिरश्मन्मयानि नहना व्यस्यन् ।
बृहस्पतिरभिकनिक्रदद्गा उत प्रास्तौदुच्च विद्वाँ अगायत् ॥३॥
हंसैःऽइव । सखिऽभिः । वावदत्ऽभिः । अश्मन्ऽमयानि । नहना । वि ऽअस्यन् ।
बृहस्पतिः । अभिऽकनिक्रदत् । गाः । उत । प्र । अस्तौत् । उत् । च । विद्वान् । अगायत् ॥३॥

हंसैरिव मधुरवाग्भिः सखिभिः सखिभूतैर्वावदद्भिरत्यंतं शब्दायमानैर्बहुभिरश्मन्मयान्यश्ममयानि नहना गवां बंधकान्यावरकाण्यसुराणां स्थानानि व्यस्यन् विक्षिपञ्श्लथिलयन्नभिकनिक्रददाभिमुख्येन शब्दयन् गाः पणिभिरपहृतान्पशूनाजिहीर्षुः स बृहस्पतिर्वर्तते । यद्वा । वावदद्भिरत्यंतं स्तुवद्भिः स्तोतृभिः सह गाः स्तोत्रलक्षणा वाचोऽभिकनिक्रददाभिमुख्येनोच्चारयन् । उतापि च प्रास्तौत् । कर्मणि प्रवृत्तो यज्ञस्य सखिभिः सहासीनः साम गातुं प्रस्तौति । विद्वान् सर्वं जानानः स उद्गाता भूत्वोदगायत् । देवानुद्गायति । अभिष्टौति ॥

अवो द्वाभ्यां पर एकया गा गुहा तिष्ठंतीरनृतस्य सेतौ ।
बृहस्पतिस्तमसि ज्योतिरिच्छन्नुदुस्रा आकर्वि हि तिस्र आवः ॥४॥
अवः । द्वाभ्यां । परः । एकया । गाः । गुहा । तिष्ठंतीः । अनृतस्य । सेतौ ।
बृहस्पतिः । तमसि । ज्योतिः । इच्छन् । उत् । उस्राः । आ । अकः । वि । हि । तिस्रः ।
आवरित्यावः ॥४॥

पणयो गा आहृत्य चिषु स्थानेषु निदधुः । अवोऽवस्तात्स्थिता अनृतस्य तमसः सेतौ स्थाने गुहा गुहायां तिष्ठंतीर्गा द्वाभ्यां स्थानाभ्यामुदाजत् । ततः परः परस्ताद्वस्थिता गा एकयैकेन स्थानेनोदगमयत् । तदेवाह । बृहस्पतिस्तस्मिंस्तमसि ज्योतिः कर्तुमिच्छंस्तत्र स्थिता उस्रा गा उदाकः । उदकार्षीत् । प्रादुर्भूता अकार्षीत् । इत्यमयं तिस्रोऽसुराणां द्वारो व्यावः । विवृतवान्खलु ॥ वृणोतेर्बुडि मंत्रे घसेति च्लेर्लुक् । बहुलं छंदसीत्यडागमः ॥

विभिद्या पुरं शयथेमपाचीं निस्त्रीणि साकमुदधेरकृंतत् ।
बृहस्पतिरुषसं सूर्यं गामर्कं विवेद स्तनयन्निव द्यौः ॥५॥
विऽभिद्य । पुरं । शयथा । ईं । अपाचीं । निः । त्रीणि । साकं । उत्ऽधेः । अकृंतत् ।
बृहस्पतिः । उषसं । सूर्यं । गां । अर्कं । विवेद । स्तनयन्ऽइव । द्यौः ॥५॥

स बृहस्पतिः शयथोपशयेन स्थित्वापाचीं पराङ्मुखीमीमिमामसुरपुरीं विभिद्य विदार्योदधेर्वलाग्नेर्घरूपादसुरात्साकं सह युगपत् त्रीण्युषसं सूर्यं गामेतानि त्रीणि निरकृंतत् । निर्गतमकार्षीत् । तमसावृतेषु स्थानेषूषःकालतः पश्चाद्भाविनं सूर्यं च जनयित्वा पशून्निरगमयदित्यर्थः । सोऽयमर्कमर्चनीयं मंत्रं सूर्यं विवेद । प्रज्ञापयति । कथमिव । यथा स्तनयञ्छब्दं कुर्वन् द्यौरिव स्थितः ॥

इंद्रो वलं रक्षितारं दुघानां कृत्रेव वि चकर्ता रवेण ।
स्वेदाँजिभिराशिरमिच्छमानोऽरोदयत्पणिमा गा अमुष्णात् ॥६॥

इंद्रः । वलं । रक्षितारं । दुघानां । करेणऽइव । वि । चकर्त । रवेण ।
स्वेदांजिऽभिः । आऽशिरं । इच्छमानः । अरोदयत् । पणिं । आ । गाः । अमुष्णात् ॥ ६ ॥

इंद्र ईश्वरो बृहस्पतिर्दुघानां धीरस्य दोग्ध्रीणां गवां रक्षितारं वलमसुरं करेणेव सायुधकर इव स्थितेन रवेण शब्देन वलं वि चकर्त । विचिच्छेद । किंच स्वेदांजिभिः । स्वेदांजयो मरुतः वरदाभरणाः । तैः सहाशिरमाश्रयणं संयोगमिच्छमानः कामयमानः पणिं वलस्यानुचरमेतन्नामानमसुरमरोदयत् । व्यनाशयत् । ततस्तेनापहृता गा अमुष्णात् । आजहार ॥ ॥ १५ ॥

स ईं सत्येभिः सखिभिः शुचद्भिर्गोधायसं वि धनसैरदर्दः ।
ब्रह्मणस्पतिर्वृषभिर्वराहैर्घर्मस्वेदेभिर्द्रविणं व्यानट् ॥ ७ ॥
सः । ईं । सत्येभिः । सखिऽभिः । शुचत्ऽभिः । गोऽधायसं । वि । धनऽसैः । अदर्दरित्यदर्दः ।
ब्रह्मणः । पतिः । वृषऽभिः । वराहैः । घर्मऽस्वेदेभिः । द्रविणं । वि । आनट् ॥ ७ ॥

स बृहस्पतिः सत्येभिर्यथार्थबलैः सखिभिः सखिभूतैः शुचद्भिर्दीप्यमानैर्धनसैर्धनस्य संभक्तृभिर्मरुद्भिः सह गोधायसं गवां धारकमीमेनं वलं व्यदर्दः । व्यदारयत् । ततो ब्रह्मण ऋग्यजुःसामलक्षणस्य स्तोत्रस्य पतिरधिपतिः स वृषभिर्वर्षितृभिर्वराहैर्वराहारैर्वरस्य वरणीयस्योदकस्याहर्तृभिर्घर्मस्वेदैर्भिर्दीप्तागमनैः यद्वा वरदुदकैः । अथवा । घर्मो यज्ञः । तं प्रति गंतृभिः । मरुद्भिर्द्रविणं गोलक्षणं धनं व्यानट् । व्याप्नोत् ॥

ते सत्येन मनसा गोपतिं गा इयानासं इषणयंत धीभिः ।
बृहस्पतिर्मिथोऽवद्यपेभिरुदुस्रिया असृजत स्वयुग्भिः ॥ ८ ॥
ते । सत्येन । मनसा । गोऽपतिं । गाः । इयानासः । इषणयंत । धीभिः ।
बृहस्पतिः । मिथःऽअवद्यपेभिः । उत् । उस्रियाः । असृजत । स्वयुक्ऽभिः ॥ ८ ॥

गाः पणिभिरपहृतान्पश्चुनियानासोऽभिगच्छंतः सत्येन यथार्थभूतेन मनसा युक्ताः ते मरुतो धीभिरात्मीयैः कर्मभिरेतं बृहस्पतिं गोपतिं तदाहरणेन गवां स्वामिनं कर्म इतीषणयंत । ऐच्छन् । बृहस्पतिश्च मिथोऽवद्यपेभिः ॥ पातेः कर्मण्योणादिकः प्रत्ययः ॥ अवद्यरूपादसुराद्रक्षितव्या गावो येषु मरुत्सु परस्परं संगच्छंत इति ते तथोक्ताः । तैः स्वयुग्भिः स्वयमेव युक्तैर्मरुद्भिरुस्रिया गा उदसृजत । पर्वतान्निरगमयत् ॥

तं वर्धयंतो मतिभिः शिवाभिः सिंहमिव नानदतं सधस्थे ।
बृहस्पतिं वृषणं शूरसातौ भरेभरे अनु मदेम जिष्णुं ॥ ९ ॥
तं । वर्धयंतः । मतिऽभिः । शिवाभिः । सिंहंऽइव । नानदतं । सधऽस्थे ।
बृहस्पतिं । वृषणं । शूरऽसातौ । भरेऽभरे । अनु । मदेम । जिष्णुं ॥ ९ ॥

सधस्थे । सह तिष्ठंत्यत्र देवा इति सधस्थमंतरिक्षं । तस्मिन् सिंहमिव नानदतं पुनःपुनः शब्दायमानं वृषणं कामानां वर्षितारं जिष्णुं जयशीलं तं बृहस्पतिं वर्धयंतो मरुतो वयं शूरसातौ शूरैः संभजनीये भरे भरे संग्रामे शिवाभिः कल्याणीभिः स्तुतिभिरनु मदेम । अनुष्टुभः । स्तोतृपरत्वेन वा योजनीयं ॥

यदा वाजमसनद्विश्वरूपमा द्यामरुक्षदुत्तराणि सद्म ।
बृहस्पतिं वृषणं वर्धयंतो नाना संतो बिभ्रतो ज्योतिरासा ॥ १० ॥

यदा । वाजं । असनत् । विश्वऽरूपं । आ । द्यां । अरुक्षत् । उत्ऽतराणि । सद्म ।
बृहस्पतिं । वृषणं । वर्धयंतः । नाना । संतः । बिभ्रतः । ज्योतिः । आसा ॥१०॥

स बृहस्पतिर्यदा यस्मिन्काले विश्वरूपं नानारूपं वाजं गोलक्षणमन्नमसनत् भजते यदा वाहुतपशुकः सन् द्यां द्युलोकमरुक्षत् आरोहति अथवोत्तराणि वा सद्म स्थानान्यारोहति ॥ रुहेर्बुद्धि प्रेः ग्रस्य इगुपधादनिटः क्सः । पा० ३. १. ४५. ॥ तदानीं वृषणं वर्षितारं बृहस्पतिमासास्मिन देवा वर्धयंतो भवंति । तथा नाना दिक्षु संतो भवंतो ज्योतिर्बिभ्रतो धारयंतो देवास्त्र स्तुवंति ॥

सत्यामाशिषं कृणुता वयोधै कीरिं चिद्ध्यवथ स्वेभिरेवैः ।
पश्चा मृधो अप भवंतु विश्वास्तद्रोदसी शृणुतं विश्वमिन्वे ॥११॥
सत्यां । आऽशिषं । कृणुत । वयःऽधै । कीरिं । चित् । हि । अवथ । स्वेभिः । एवैः ।
पश्चा । मृधः । अप । भवंतु । विश्वाः । तत् । रोदसी इति । शृणुतं । विश्वमिन्वे इति
विश्वंऽइन्वे ॥११॥

हे बृहस्पतिप्रमुखा देवाः वयोधा अन्नस्य धानायास्मदीयामाशिषं स्तुतिं सत्यां यथार्थां कृणुत । कुरुत । तथा यूयं स्वेभिरात्मीयैरेवैर्गमनैः कीरिं स्तोतारं मामवथ । रक्षथ । हिरवधारणे । पश्चा ॥ पश्चा च छंदसि । पा० ५. ३. ३३. । इति निपातितः ॥ पश्चाद्विश्वाः सर्वा मृधो हिंसिक्योऽप भवंतु । नश्यंतु । तदिदमस्माभिरुक्तं वचनं हे विश्वमिन्वे विश्वस्य प्रीणयित्र्यौ हे रोदसी द्यावापृथिव्यौ शृणुतं ॥

इंद्रो महा महतो अर्णवस्य वि मूर्धानमभिनदर्बुदस्य ।
अहन्नहिमरिणात्सप्त सिंधून्देवो द्यावापृथिवी प्रावतं नः ॥१२॥
इंद्रः । महा । महतः । अर्णवस्य । वि । मूर्धानं । अभिनत् । अर्बुदस्य ।
अहन् । अहिं । अरिणात् । सप्त । सिंधून् । देवः । द्यावापृथिवी इति । प्र । अवतं । नः ॥१२॥

इंद्र ईश्वरो महा महत्त्वेन युक्तो बृहस्पतिर्महतो अर्णवस्योदकवतोऽर्बुदस्यांबुदस्य मेघस्य मूर्धानं शिरो व्यभिनत् । व्यच्छिनत् । तदुच्यते । अहिमहंतव्यमपामावरकं शत्रुमहन् । अवधीत् । अतः सप्त सर्पणशीलाः सिंधून स्यंदमाना अपः । यद्वा । सप्तसंख्याका गंगाद्या नदीः । अरिणात् । समुद्रं प्रत्यगमयत् । अथ प्रत्यक्षकृतः । हे द्यावापृथिव्यौ देवैः सह नोऽस्मान्प्रावतं । प्ररक्षतं ॥ ॥१६॥

उद्प्रुत इति द्वादशर्चमष्टमं सूक्तं । ऋष्याद्याः पूर्ववत् । उद्प्रुत इत्यनुक्रांतं ॥ उक्थे ब्राह्मणाच्छंसिन एतत्सूक्तं । सूचितं च । प्र मंहिष्ठायोद्प्रुतोऽच्छा म इंद्रं । आ० ६. १. । इति ॥

उद्प्रुतो न वयो रक्षमाणा वावदतो अभियस्येव घोषाः ।
गिरिभ्रजो नोर्मयो मदंतो बृहस्पतिमभ्यर्का अनावन् ॥१॥
उद्ऽप्रुतः । न । वयः । रक्षमाणाः । वावदतः । अभियस्यऽइव । घोषाः ।
गिरिऽभ्रजः । न । ऊर्मयः । मदंतः । बृहस्पतिं । अभि । अर्काः । अनावन् ॥१॥

उद्प्रुत उदकस्योन्नमयितारो वयः पक्षिणः पक्षात्तस्माद्रक्षमाणाः क्षपीवलाः । न उपमार्थे । यथा शब्दायंते । यथा च वावदतः पुनःपुनः शब्दायमानस्याभियस्येवाभ्रसमूहस्य घोषाः शब्दा यथा भवंति ।

किंच गिरिभ्रजो गिरिभ्यो मेघेभ्यो भ्रष्टा निर्गता ऊर्मयोऽप्समूहा यथा मदंतः शब्दायमाना भवंति । तथार्का अर्चकाः स्तोतारो बृहस्पतिमभ्यनावन् । अभिष्टुवंति ॥ नु स्तवने ॥

सं गोभिरांगिरसो नक्षमाणो भग इवेदर्यमणं निनाय ।
जने मित्रो न दंपती अनक्ति बृहस्पते वाजयाशूँरिवाजौ ॥२॥
सं । गोभिः । आंगिरसः । नक्षमाणः । भगःऽइव । इत् । अर्यमणं । निनाय ।
जने । मित्रः । न । दंपती इति दंऽपती । अनक्ति । बृहस्पते । वाजय । आशून्ऽइव ।
आजौ ॥२॥

आंगिरसोऽगिरसः पुत्रो नक्षमाणः स्वतेजसा व्याप्नुवन् भग इवेज्जगो देव इव स्थितो बृहस्पतिरेवार्यमणं स्तुतेः प्रेरकं स्तोतारं गोभिः सह सं निनाय । नयति । संयोजयति । मित्रो न मित्रो यथा जने जनपदे स्वरश्मीन्संयोजयति तद्वद्दंपती जायापती अनक्ति । संगमयति । स्वसामर्थ्यं तत्र स्थापयतीत्यर्थः । हे बृहस्पते आशून्व्याप्नान्स्वरश्मीन्वाजय । तव स्तोतृषु गमय । स्थापय । आशूनिव व्याप्नानश्वानाजौ संग्रामे योद्धारो यथा संगमयंति तद्वत् ॥

साध्वर्या अतिथिनीरिषिराः स्पार्हाः सुवर्णा अनवद्यरूपाः ।
बृहस्पतिः पर्वतेभ्यो वितूर्या निर्गा ऊपे यवमिव स्थिविभ्यः ॥३॥
साधुऽअर्याः । अतिथिनीः । इषिराः । स्पार्हाः । सुऽवर्णाः । अनवद्यऽरूपाः ।
बृहस्पतिः । पर्वतेभ्यः । विऽतूर्य । निः । गाः । ऊपे । यवंऽइव । स्थिविऽभ्यः ॥३॥

साध्वर्याः साधूनां कल्याणानां पयसां नेत्रीरतिथिनीः सततं गच्छंतीरिषिरा एषणीयाः स्पार्हाः स्पृहणीयाः सुवर्णाः शोभनशुक्लादिवर्णोपेता अनवद्यरूपाः प्रशस्यरूपा एता गाः पर्वतेभ्यो बलसंबंधिभ्यो वितूर्य निर्गमय्योपे । देवसमीपे निर्वपति । प्रापयति । तत्र दृष्टांतः । यवमिव यथा यवं स्थिविभ्यः कुसीदेभ्य आदाय निर्वपति ॥ डुवप् बीजसंताने । लिटि रूपं ॥ यद्वा । साधुनयनादिगुणयुक्ता गा अपः पर्वतेभ्यो मेघेभ्य आहृत्य सर्वत्र वर्षति ॥

आप्रुषायन्मधुन ऋतस्य योनिमवक्षिपन्नर्क उल्कामिव द्योः ।
बृहस्पतिरुद्धरन्नश्मनो गा भूम्या उद्नेव वि त्वचं बिभेद ॥४॥
आऽप्रुषायन् । मधुना । ऋतस्य । योनिं । अवऽक्षिपन् । अर्कः । उल्कांऽइव । द्योः ।
बृहस्पतिः । उद्धरन् । अश्मनः । गाः । भूम्याः । उद्नाऽइव । वि । त्वचं । बिभेद् ॥४॥

मधुनोदकेनाप्रुषायन् पृथिवीमाभिमुख्येन सिंचन् ॥ प्रुष स्नुष स्नेहनसेचनपूरणेषु । व्यत्ययेन विकरणस्य शायजादेशः ॥ ऋतस्योदकस्य योनिं मेघमवक्षिपन् वृष्ट्यर्थमवकिरन्नर्कोऽर्चनीयो बृहस्पतिर्द्यौर्द्युलोकादुल्कामिवोल्कां यथोद्धरति तद्वदश्मनः शिलोच्चयाद्वलेनाधिष्ठिताद्गाः पणिभिरपहृतान्पशूनुद्धरन्नूर्ध्वं गमयन्भूम्यास्त्वचं तेषां शर्कैर्वि बिभेद । विभिन्नामकार्षीत् । सर्वत्र गा वितता अकार्षीदित्यर्थः । तत्र दृष्टांतः । उद्नेव यथा वृष्ट्युदकेन पर्जन्यो भूमित्वचं विभिनत्ति तद्वत् ॥

अप ज्योतिषा तमो अंतरिक्षादुद्नः शीपालमिव वात आजत् ।
बृहस्पतिरनुमृश्या वलस्याभ्रमिव वात आ चक्र आ गाः ॥५॥

अप॑। ज्योति॑षा। तमः॑। अ॒न्तरि॑क्षात्। उ॒ग्रः। शी॒पाल॑ऽइव। वातः॑। आ। अ॒ज॒त्।
बृह॒स्पतिः॑। अ॒नु॒ऽमृश्य॑। व॒लस्य॑। अ॒भ्रंऽइ॑व। वातः॑। आ। च॒क्रे॒। आ। गाः॑ ॥ ५॥

स बृहस्पतिर्ज्योतिषा तमसावृते पर्वतविवरे क्षतेन सूर्येणांतरिक्षात्तमोऽपाजत्। अपागमयत्। तत्र दृष्टांतः। उग्रः शीपालमिव यथोदकाद्वातो वायुः शीपालं शैवालमपगमयति तद्वत्। ततः सोऽयमनुमृश्यात्र गावस्तिष्ठंतीति विचार्य निश्चित्य वलस्य स्वभूतस्य पर्वतस्यांतर्गता गा आ चक्रे। आ समंताद्व्यार्णीत्। कथमिव। अभ्रमिव यथा वायुरंतरिक्षस्थितमभ्रं मेघमाकिरति तद्वत्॥

यदा॑ व॒लस्य॒ पीय॑तो॒ जसु॑ं भे॒द्बृह॒स्पति॑रग्नि॒तपो॑भि॒र्कैः॑।
दृ॒ळ्हं न जि॒ह्वा परि॑विष्ट॒माद॑दा॒विर्नि॒धीँर॑कृणोदु॒स्रिया॑णां ॥ ६॥
यदा॑। व॒लस्य॑। पीय॑तः। जसु॑ं। भे॒त्। बृह॒स्पतिः॑। अ॒ग्नि॒तपः॑ऽभिः। अ॒र्कैः॑।
दृ॒त्ऽभिः॑। न। जि॒ह्वा। परि॑ऽविष्टं। आ॒द॒त्। आ॒विः॑। नि॒ऽधीन्। अ॒कृ॒णो॒त्। उ॒स्रिया॑णां ॥ ६॥

पीयतः। पीयतिर्हिंसाकर्मा। हिंसकस्य वलस्य जसुमायुधं यदा यस्मिन्काले भेत् भिनत्ति। केन साधनेन। अग्नितपोभिरग्निवत्तपनशीलैरर्कैरर्चनीयै रश्मिभिः अपि वा मंत्रैर्भिनत्ति। किंच दृळ्हः॥ पद्दन्नोमासित्यादिना दंतशब्दस्य दृत्रावः॥ यथा दंतैः परिविष्टं भक्ष्यं जिह्वा भक्षयति तद्वत्स परिविष्टं पर्वते पणिभिः परिवृतं वलनामानं यदादत् अभक्षयत् अवधीत् तदानीं तैरपहृतानामुस्रियाणां गवां निधीनाविरकृणोत्। आविर्भूतमकरोत्॥ ॥१७॥

बृह॒स्पति॒रम॑त॒ हि त्यदा॑सां॒ नाम॑ स्व॒रीणां॑ सद॒ने॒ गुहा॒ यत्।
आं॒डेव॑ भि॒त्त्वा श॑कु॒नस्य॒ गर्भ॑मु॒दु॒स्रिया॒ः पर्व॑तस्य॒ त्मना॑जत् ॥ ७॥
बृह॒स्पतिः॑। अम॑त। हि। त्यत्। आ॒सा॒। नाम॑। स्व॒रीणां॑। स॒द॒ने॒। गुहा॑। यत्।
आं॒डाऽइ॑व। भि॒त्त्वा। श॒कु॒नस्य॑। गर्भ॑म्। उ॒त्। उ॒स्रिया॑ः। पर्व॑तस्य। त्मना॑। आ॒ज॒त् ॥ ७॥

बृहस्पतिर्गुहा गुहायां सदने स्थाने स्वरीणां शब्दायमानानामासां गवां त्यत्तत्प्रसिद्धं नाम नामधेयं यदादामत हि ज्ञातवान्खलु॥ मनु अवबोधने। लुङि तनादिभ्यस्तथासोः। पा० २. ४. ७९.। इति सिचो लुक्॥ तदानीं पर्वतस्यांतःस्थिता उस्रिया गास्तन्नात्मनैवासहायेन पर्वतं भित्त्वोदाजत्। उद्गमयत्। तत्र दृष्टांतः। आंडेव यथा शकुनस्य पक्षिण आंडानि भित्त्वा तत्र स्थितं गर्भमुद्गमयति तद्वत्॥

अश्मा॑पिनद्धं॒ मधु॑ पर्यपश्य॒न्मत्स्यं॒ न दी॒न उद॑नि क्षि॒यंत॑ं।
नि॒ष्टज्ज॑भार चम॒सं न वृ॒क्षाद्बृह॒स्पति॑र्वि॒र्वेण॑ा वि॒कृत्य॑ ॥ ८॥
अश्मा॑। अ॒पि॒ऽन॒द्धं॒। मधु॑। परि॑। अ॒प॒श्य॒त्। मत्स्यं॑। न। दी॒ने। उद॑नि। क्षि॒यंत॑ं।
निः॑। त॒त्। ज॒भा॒र॒। च॒म॒सं॑। न। वृ॒क्षात्। बृह॒स्पतिः॑। वि॒ऽर्वेण॑। वि॒ऽकृत्य॑ ॥ ८॥

बृहस्पतिरश्मनाऽद्रिणा शिलयापिनद्धं पिहितं मधु गोलक्षणं पर्यपश्यत्। परितोऽद्राक्षीत्। तत्र दृष्टांतः। मत्स्यं न यथा दीने शुष्क उदनि। उदकशब्दस्योदन्नादेशः। उदके क्षियंतं निवसंतं मत्स्यं यथा पश्यति तद्वत्। दृष्ट्वा च तन्नोलक्षणं मधु विर्वेण विविधेन शब्देन विकृत्य वलं छित्त्वा निर्जभार। कथमिव। चमसं न। चमंति भक्षयंत्यत्रेति चमसः सोमपात्रं। तं यथा वृषाग्निर्हरति तद्वत्॥ हरतेर्लिटि रूपं। हृग्रहोर्भः॥

सोषामविंदत्स स्व१: सो अग्निं सो अर्केण वि बबाधे तमांसि ।
बृहस्पतिर्गोवपुषो वलस्य निर्मज्जानं न पर्वणो जभार ॥९॥
सः।उषां।अविंदत्।सः।स्व१रिति स्वः।सः।अग्निं।सः।अर्केण।वि।बबाधे।तमांसि।
बृहस्पतिः। गोऽवपुषः। वलस्य। निः। मज्जानं। न। पर्वणः। जभार ॥९॥

स बृहस्पतिस्तच्च पर्वतविवरे गवां दर्शनायोषासुषसमविंदत् । अलभत । स एव स्वरादित्यं सोऽग्निं लब्ध्वार्केणार्चनीयेन तेजसा तमांसि वि बबाधे । अत्यर्थं बाधितवान् । ततः स गोवपुषो गोरूपशरीरस्य पशुभिः परिवृतस्य वलस्य पर्वणः पर्वतात्ता गा निर्जभार । बलेन निर्जहार । बलादाहरणे दृष्टांतः । मज्जानं न पर्वणः अस्थ्नो मज्जानं यथातिस्नेहेन निर्हरंति तद्वत् ॥

हिमेव पर्णा मुषिता वनानि बृहस्पतिनाकृपयद्वलो गाः ।
अनानुकृत्यमपुनश्चकार यात्सूर्यामासा मिथ उच्चरातः ॥१०॥
हिमाऽइव । पर्णा । मुषिता । वनानि । बृहस्पतिना । अकृपयत् । वलः । गाः ।
अननुऽकृत्यं । अपुनरिति । चकार । यात् । सूर्यामासा । मिथः । उत्ऽचरातः ॥१०॥

हिमेव यथा हिमेन पर्णा पर्णानि पद्मपत्राणि मुषिता मुषितानि भवंति तद्वद्वलेन वनानि वननीयानि गोधनानि मुषितान्यभूवन् । अथ गवामन्वेषणाय बृहस्पतिनागतेन हेतुना वलोऽकृपयत् । अस्मै ता मुषिता गाः प्रायच्छत् । तच्चाननुकृत्यमननुकरणीयमपुनःकर्तव्यं च तत्कर्म चकार । यथा तत्पश्चात्करणीयं न भवति यथा पुनरकरणीयं तथाकार्षीदित्यर्थः । किं तदिति आह । सूर्यामासा सूर्यचंद्रमसौ मिथः परस्परमहोरात्रयोरुच्चरातः उच्चरत इति यात् तच्चकार ॥ यादिति दीर्घश्छांदसः ॥

अभि श्यावं न कृशनेभिरश्वं नक्षत्रेभिः पितरो द्यामपिंशन् ।
रात्र्यां तमो अदधुर्ज्योतिरह्नन्बृहस्पतिर्भिनदद्रिं विदन्नाः ॥११॥
अभि । श्यावं । न । कृशनेभिः । अश्वं । नक्षत्रेभिः । पितरः । द्यां । अपिंशन् ।
रात्र्यां । तमः।अदधुः।ज्योतिः।अह्नन्।बृहस्पतिः।भिनत्।अद्रिं। विदत्। गाः॥११॥

पितरः पालयितारो देवा द्यां द्युलोकं नक्षत्रेभिराश्विन्यादिभिरभ्यपिंशन् । अभितोऽदीपयन् ॥ पिश अवयवे । अयं दीपनायां वर्तते ॥ तच्च दृष्टांतः । श्यावं न यथा श्यामवर्णमश्वं कृशनेभिः सौवर्णैराभरणैरलंकुर्वंति तद्वत् । तथा रात्र्यां तमो निहितवंतः । किंचाहन्नद्रिं ज्योतिरादित्याख्यमदधुः ॥ अदधुरित्युत्तरवाक्येन संबंधः करणीयः । अन्यथा स्वरो न घटेत । अत्र तु वाक्यभेदादनिघातः ॥ यदा बृहस्पतिरद्रिं वलेनाधिष्ठितं शिलोच्चयं भिनत् अभिनत् विभिद्य च तत्र स्थितान्गाः पशून्विदत् अविदत् अलभत ॥ विदेर्लुङि च्लेश्चिण्वादङ् ॥ तदा देवा एवमकार्षुरित्यर्थः ॥

इदमकर्म नमो अभ्रियाय यः पूर्वीरिन्वानोनवीति ।
बृहस्पतिः स हि गोभिः सो अश्वैः स वीरेभिः स नृभिर्नो वयो धात् ॥१२॥
इदं। अकर्म। नमः। अभ्रियाय। यः। पूर्वीः। अनु। आऽनोनवीति।
बृहस्पतिः।सः। हि। गोभिः। सः। अश्वैः। सः। वीरेभिः। सः। नृऽभिः। नः। वयः।
धात् ॥१२॥

अभियायाभिषु भवायांतरिक्षाय मधमाय बृहस्पतय इदमुक्तं नमः स्रोचमकर्म । वयमकार्ष्म । यो बृहस्पतिः पूर्वीर्बह्वीर्ऋचोऽन्वनुक्रमेणानोनवीति अत्यर्थमाभिमुख्येन ब्रवीति स बृहस्पतिरेव गोभिरश्वैश्च युक्तं वीरैभिः पुत्रैर्नृभिर्भृत्यादिभिश्च सहितं वयोऽन्नं नोऽस्मभ्यं स्रोतृभ्यो धात् । दधातु । प्रयच्छतु । तच्छब्दावृत्तिरादरार्था ॥ ॥१८॥ ॥५॥

षष्ठेऽनुवाके षोडश सूक्तानि । भद्रा इति द्वादशर्चं प्रथमं सूक्तं वध्यश्वपुत्रस्य सुमित्रस्यार्षं । आदितो द्वे जगत्यावथ दश चिष्टुभः । अग्निर्देवता । तथा चानुक्रम्यते । भद्राः सुमित्रो वाध्यश्च आग्नेयं द्विजगत्यादीति ॥ गतो विनियोगः ॥

भद्रा अग्नेर्वध्र्यश्वस्य संदृशो वामी प्रणीतिः सुरणा उपेतयः ।
यदीं सुमित्रा विशो अग्निं इंधते घृतेनाहुतो जरते दविद्युतत् ॥१॥
भद्राः । अग्नेः । वध्रिऽअश्वस्य । संऽदृशः । वामी । प्रऽनीतिः । सुऽरणाः । उपऽइतयः ।
यत् । ईं । सुऽमित्राः । विशः । अग्निं । इंधते । घृतेन । आऽहुतः । जरते । दविद्युतत् ॥१॥

अग्नेर्वक्ष्यमाणगुणस्य संदृशः संदृष्टयो वध्यश्वस्यैतन्नामकस्य मम पितुर्भद्राः कल्याणकारिण्यो भवंतु । यद्वा । वध्यश्वस्य वध्यश्वकुले जातस्याग्नेः संदृष्टयो भजनीया भवंतु । प्रणीतिस्तस्य प्रणयनं वामी कल्याणं च भवतु । तथोपेतयो यज्ञं प्रत्युपगतयः सुरणाः शोभनरमणा भवंतु । सुमित्रा एतन्नामधेया विशोऽमी मनुष्या ईमेनमग्निमग्ने प्रथमं यदीं इंधते हविर्भिर्दीपयंति तदा घृतेनाक्तो हविर्भिश्च दविद्युतद्भृशं द्योतमानः ॥ दाधर्ति दर्धर्तीत्यादिना निपातितः ॥ सोऽग्निर्जरते । अस्माभिः स्तूयते ॥

घृतमग्नेर्वध्र्यश्वस्य वर्धनं घृतमन्नं घृतम्वस्य मेदनं ।
घृतेनाहुत उर्विया वि पप्रथे सूर्य इव रोचते सर्पिरासुतिः ॥२॥
घृतं । अग्नेः । वध्रिऽअश्वस्य । वर्धनं । घृतं । अन्नं । घृतं । ऊं इति । अस्य । मेदनं ।
घृतेन । आऽहुतः । उर्विया । वि । पप्रथे । सूर्यःऽइव । रोचते । सर्पिःऽआसुतिः ॥२॥

वध्र्यश्वस्य संबंधिनोऽग्नेर्घृतं दीयमानं हविर्वर्धनं भवतु । तथा घृतमन्नमदनीयं भवतु । तथास्याग्नेर्घृतमु घृतमेव मेदनं पुष्टिकरं भवतु । येनाग्निः पुष्टो भवति तन्मेदनं । तेन घृतेनाक्तोऽग्निरुर्वियोर्वत्यंतं वि पप्रथे । स्वतेजसा विप्रथितो भवति । तथा सर्पिरासुतिः सर्पिरासूयते यस्मिन्निति सोऽग्निः सूर्य इव रोचते । दीप्यते ॥

यत्ते मनुर्यदनीकं समिद्धः समीधे अग्ने तदिदं नवीयः ।
स रेवच्छोच स गिरो जुषस्व स वाजं दर्षि स इह श्रवो धाः ॥३॥
यत् । ते । मनुः । यत् । अनीकं । सुऽसमिद्धः । संऽईधे । अग्ने । तत् । इदं । नवीयः ।
सः । रेवत् । शोच । सः । गिरः । जुषस्व । सः । वाजं । दर्षि । सः । इह । श्रवः । धाः ॥३॥

हे अग्ने ते त्वदीयं यदनीकं रश्मिसंघं मनुरेतन्नामको यथा समीधे हविर्भिः सम्यग्दीपयति सुसमिद्ध एतन्नामकोऽहं समीधे । सम्यग्दीपयामि ॥ त्रिष्वन्धी दीप्तौ । लिटींधिभवतिभ्यां चेति कित्त्वान्नलोपः ॥ तदिदं सोऽयं रश्मिसंघो नवीयो नवतरो भवतु । स त्वं रेवद्धनयुक्तं यथा भवति तथा शोच । प्रज्वल । स एव त्वं गिरोऽस्मदीयाः सुतीर्जुषस्व । सेवस्व । स त्वं वाजं शत्रुबलं दर्षि । विदारय । तथेह मयि श्रवोऽन्नं धाः । धेहि ॥

यं त्वा पूर्वमीळितो वध्र्यश्वः समीधे अग्ने स इदं जुषस्व ।
स नः स्तिपा उत भवा तनूपा दाचं रक्षस्व यदिदं ते अस्मे ॥४॥
यं । त्वा । पूर्वं । ईळितः । वध्रिऽअश्वः । सं ऽईधे । अग्ने । सः । इदं । जुषस्व ।
सः । नः । स्तिऽपाः । उत । भव । तनूऽपाः । दाचं । रक्षस्व । यत् । इदं । ते ।
अस्मे इति ॥४॥

ईळितः ॥ व्यत्ययेन कर्तरि क्तः ॥ स्तोता वध्र्यश्वो मम पिता पूर्वं पूर्वस्मिन्काले संजातं यं त्वां समीधे हविर्भिः सम्यगदीपयत् स त्वमिदानीं मया क्रियमाणमिदं स्तोत्रं जुषस्व । सेवस्व । यद्वा । वध्र्यश्वस्तस्य पुत्रोऽहं सम्यगदीपितवानस्मि । स त्वं नोऽस्माकं स्तिपाः ॥ पृषोदरादिः ॥ पस्त्यं गृहं । तस्य रक्षको भव । यद्वा । उपस्थिताज्ज्योतिष्टोमादीन्यागान्पालयतीति स्तिपाः । अस्मदीयानां यज्ञानां पालयिता भव । उतापि च तनूपाः स्वांगानां रक्षको भव । किंच दाचं तद्धनं रक्षस्व यदिदं धनं ते तव स्वभूतेष्वस्मे अस्मासु तिष्ठति ॥

भवा द्युम्नी वाध्र्यश्वोत गोपा मा त्वा तारीदभिमातिर्जनानां ।
शूर इव धृष्णुश्च्यवनः सुमित्रः प्र नु वोचं वाध्र्यश्वस्य नाम ॥५॥
भव । द्युम्नी । वाध्रिऽअश्व । उत । गोपाः । मा । त्वा । तारीत् । अभिऽमातिः । जनानां ।
शूरःऽइव । धृष्णुः । च्यवनः । सुऽमित्रः । प्र । नु । वोचं । वाध्रिऽअश्वस्य । नाम ॥५॥

हे वाध्र्यश्व वध्र्यश्वकुले जातापि द्युम्नी । द्युम्नं द्योततेर्यशो वान्नं वा । तद्वान्भव । उतापि च गोपा गोपायिता भव । किंच त्वा त्वां कश्चिदपि मा तारीत् । मा हिनस्तु । यतो जनानां शत्रूणामभिमातिरभिभवनशीलमानयुक्तोऽभिभविता भवसि । किंच शूर इव बलवानिव धृष्णुः शत्रुधर्षणशीलः तस्माच्च्यवनस्तेषां च्यावयिता भवसि । अथ वाध्र्यश्वस्यास्मेत्यस्य नामाग्निर्जातवेदा वैश्वानर इत्यादीनि नामानि नु क्षिप्रं सुमित्रोऽहं प्र वोचं । प्रब्रवीमि । तस्माच्च मेऽन्नादियुक्तो भव ॥

समज्या पर्वत्याऽ३ वसूनि दासा वृचाण्यार्या जिगेथ ।
शूर इव धृष्णुश्च्यवनो जनानां त्वमग्ने पृतनायूँरभि ष्याः ॥६॥
सं । अज्र्या । पर्वत्या । वसूनि । दासा । वृचाणि । आर्या । जिगेथ ।
शूरःऽइव । धृष्णुः । च्यवनः । जनानां । त्वं । अग्ने । पृतनाऽयून् । अभि । स्याः ॥६॥

हे अग्ने अज्र्या । अजंति गच्छंतीत्यज्रयो जनाः । तेभ्यो हितानि पर्वत्या पर्वतभवानि वसूनि गवादिलक्षणानि सं जिगेथ । शत्रुभ्यः संजितवानसि । तथार्या बलवद्भिः कृतान्दासा दासैरसुरैः कृतान्वृत्राण्युपद्रवान्तं जिगेथ । तान्हतवानसीत्यर्थः ॥ जि जये । लिटि रूपं ॥ शूर इव धृष्णुर्जनानां च्यवनस्त्वं पृतनायून्संग्रामकामानभि ष्याः । अभिभव ॥ पृतनायूनित्यत्र लोपाभावश्छांदसः । अश्वाघस्यादित्यात्वं विधीयमानमस्मादपि व्यत्ययेन भवति ॥ ॥१९॥

दीर्घतँतुर्बृहदुक्षायमग्निः सहस्रस्तरीः शतनीथ ऋभ्वा ।
द्युमान् द्युमत्सु नृभिर्मृज्यमानः सुमित्रेषु दीदयो देवयत्सु ॥७॥
दीर्घऽतँतुः । बृहत्ऽउक्षा । अयं । अग्निः । सहस्रऽस्तरीः । शतऽनीथः । ऋभ्वा ।
द्युऽमान् । द्युमत्ऽसु । नृऽभिः । मृज्यमानः । सुऽमित्रेषु । दीदयः । देवयत्ऽसु ॥७॥

दीर्घतंतुः । यैर्यज्ञं संतनोति ते तंतवः स्रोवादयः । प्रभूतसुतिमान्बृहदुषा । उषा सेचको रश्मिः । प्रभूतरश्मियुक्तः सहस्रशरीर्हवीरूपबद्धाच्छादनः शतनीथ आहवनीयादिद्वारेण बहुविधनयन ऋभ्वा महान्युमत्सु दीप्तिमत्सु मध्ये द्युमानतिशयेन दीप्तिमानयमग्निर्नृभिः कर्मनेतृभिर्ऋत्विग्भिर्मृज्यमानोऽलंक्रियमाणो भवति ॥ मृजू शौचालंकारयोः ॥ स त्वं देवयत्सु देवान्कामयमानेषु सुमिचेष्वस्मासु दीदयः । दीप्यस्व । दीदयतिर्दीप्तिकर्मा ॥

त्वे धेनुः सुदुघा जातवेदोऽसश्चतेव समना सबर्धुक् ।
त्वं नृभिर्दक्षिणावद्भिरग्ने सुमिचेभिरिध्यसे देवयद्भिः ॥८॥
त्वे इति । धेनुः । सुऽदुघा । जातऽवेदः । असश्चताऽइव । समना । सबःऽधुक् ।
त्वं । नृऽभिः । दक्षिणावत्ऽभिः । अग्ने । सुऽमिचेभिः । इध्यसे । देवयत्ऽभिः ॥८॥

हे जातवेदो जातप्रज्ञाग्ने त्वे त्वयि सुदुघा सुष्ठु पयसो दोग्ध्री काचिद्धोमसाधनभूता धेनुरस्ति । कीदृशी । असश्चतेव संगवर्जितेनैवैकेन स्त्रित्यभावात्कुचापि न संयुक्तेनादित्येन समना संगता सबर्धुगमृतं दुहाना । गोरूपा माध्यमिका वाग्वैवुत्ते त्वय्स्तीति भावः । तादृशस्त्वं नृभिः कर्मनेतृभिर्दक्षिणावद्भिर्ऋत्विग्भ्यो देयत्वेन तद्वद्भिर्देवयद्भिर्देवकामैः सुमिचेभिरस्माभिरिध्यसे । हविर्भिर्दीप्यसे ॥

देवाश्चित्ते अमृता जातवेदो महिमानं वाध्र्यश्व प्र वोचन् ।
यत्संपृच्छं मानुषीर्विश आयन्त्वं नृभिरजयस्त्वावृधेभिः ॥९॥
देवाः । चित् । ते । अमृताः । जातऽवेदः । महिमानं । वाध्रिऽअश्व । प्र । वोचन् ।
यत् । संऽपृच्छं । मानुषीः । विशः । आयन् । त्वं । नृऽभिः । अजयः । त्वाऽवृधेभिः ॥९॥

हे जातवेदो हे वाध्र्यश्वाग्ने ते तव महिमानममृता देवाश्चिद्देवा अपि प्र वोचन् । प्रब्रुवंति । यद्यदा मानुषीर्मनुष्यसंबंधिन्यो विशः प्रजाः संपृच्छं देवैः सह को वा असुरान्हंतीत्येवमादिकं संप्रश्नमायन् प्राप्नुवंतः तदा त्वं नृभिः सर्वस्य नेतृभिस्त्वावृधेभिस्त्वया वर्धितैर्देवैः सह कर्मविघ्नकारिणस्तानजयः । जितवानसि ॥

पितेव पुत्रमबिभरुपस्थे त्वामग्ने वध्र्यश्वः संपर्यन् ।
जुषाणो अस्य समिधं यविष्ठोत पूर्वो अवनोर्वाधतश्चित् ॥१०॥
पिताऽइव । पुत्रं । अबिभः । उपऽस्थे । त्वां । अग्ने । वध्रिऽअश्वः । सपर्यन् ।
जुषाणः । अस्य । संऽइधं । यविष्ठ । उत । पूर्वान् । अवनोः । वाधतः । चित् ॥१०॥

हे अग्ने त्वामुपस्थे पृथिव्या उपस्थाने उत्तरवेद्यां सपर्यन् परिचर्याकर्मा परिचरन्वध्र्यश्वो मम पिताबिभः । धृतवान् । हविर्भिः पोषितवान्त्वा । कथमिव । पितेव यथा पिता समीपे पुत्रं स्थापयति पोषयति वा ॥ डुभृञ् धारणपोषणयोः । लङि तिपि गुणे कृते हल्ङ्यादिना तिपो लोपः ॥ हे यविष्ठ युवतमाग्ने उतापि चास्य वध्र्यश्वस्य पितुर्वा मम वा समिधं जुषाणः सेवमानः सन् पूर्वान्प्रक्षान्वाधतश्चिद्बाधकानपि शत्रूनवनोः । अवधीः ॥ वनतिर्हिंसायां भौवादिकः । व्यत्ययेनोप्रत्ययः ॥

शश्वदग्निर्वध्र्यश्वस्य शत्रूनभिर्जिगाय सुतसोमवद्भिः ।
समनं चिद्दहश्चिचभानोऽव वाधंतमभिनद्बृधश्चित् ॥११॥

शश्वत्। अग्निः। वध्रिऽअश्वस्य। शचून्। नृऽभिः। जिगाय। सुतसोमवत्ऽभिः।
समनं। चित्। अदहः। चित्रभानो इति चित्रऽभानो। अव। वाधंतं। अभिनत्।
वृधः। चित्॥ ११॥

सोऽग्निर्वध्यश्वस्य सुतसोमवद्भिरभिषुतसोमैः॥ अनुवादको मत्वर्थीयः॥ तैर्नृभिर्ऋत्विग्भिः शश्वत् सर्वदा शचूञ्जिगाय। जितवान्। अथ प्रत्यक्षः। हे चित्रभानो नानातेजस्क चायनीयदीप्तिमन्नग्ने त्वं समनं चित्। समनमिति संग्रामनाम। तमप्यदहः स्वतेजोभिः। अथ तव स्तोता वाध्यश्वो वृधश्चित्स्वयं वृद्धो भवन्वाधंतं वर्धमानं हिंसकं वावाभिनत्। अवाङ्मुखं कृत्वाच्छिनत्। यद्वा। त्वमेव तमवाभिनत्। अवाङ्मुखं कृत्वाभिनः। अच्छिनः॥ प्रथममध्यमयोः समानमेतद्रूपं॥

अयमग्निर्वध्यश्वस्य वृत्रहा सनकात्प्रेद्धो नमसोपवाक्यः।
स नो अजामींरुत वा विजामीनभि तिष्ठ शर्धतो वाध्यश्व॥ १२॥
अयं। अग्निः। वध्रिऽअश्वस्य। वृत्रऽहा। सनकात्। प्रऽइद्धः। नमसा। उपऽवाक्यः।
सः। नः। अजामीन्। उत। वा। विऽजामीन्। अभि। तिष्ठ। शर्धतः। वाध्रिऽअश्व॥ १२॥

वृत्रहा शत्रूणां हंतायमग्निः सनकाच्चिरादारभ्य वध्यश्वस्य हविषा प्रेद्धः प्रकर्षेण दीपितो भवति। तथा तस्य नमसा नमस्कारेण सहोपवाक्य उपस्तोतव्यो भवति। हे वाध्यश्व वध्यश्वकुले मथनेन समुत्पन्नाग्ने स त्वं नोऽस्माकमजामीनज्ञातीञ्शत्रून् उत वापि वा शर्धतो हिंसतो विजामीन्विविधाञ्ज्ञातीनप्यभि तिष्ठ। अभिभव॥ ॥ २०॥

इमां म इत्येकादशर्चं द्वितीयं सूक्तं। वाध्यश्वस्य सुमित्रस्यार्षं त्रैष्टुभं तनूनपादूर्जिताः सनराशंसाः समिदादयः प्रत्यृचं देवताः। तथा चानुक्रांतं। इमां म एकादशाप्रमिति॥ वध्यश्वगोत्राणां पशाविद्मात्रीसूक्तं। सूचितं च। समिद्धो अग्नेति सर्वेषां यथर्षि वा। आ० ३. २.। इति॥

इमां मे अग्ने समिधं जुषस्वेळस्पदे प्रति हर्या घृताचीं।
वर्ष्मन्पृथिव्याः सुदिनत्वे अह्नामूर्ध्वो भव सुक्रतो देवयज्या॥ १॥
इमां। मे। अग्ने। सम्ऽइधं। जुषस्व। इळः। पदे। प्रति। हर्य। घृताचीं।
वर्ष्मन्। पृथिव्याः। सुदिनऽत्वे। अह्नां। ऊर्ध्वः। भव। सुक्रतो इति सुऽक्रतो।
देवऽयज्या॥ १॥

हे अग्ने इळस्पद इळायास्पदे। एतद्वा इळायास्पदं यदुत्तरवेदीनाभिः। ऐ० ब्रा० १. २८.। इति ब्राह्मणं। उत्तरवेद्यामिमां मे मदीयां समिधं जुषस्व। सेवस्व। तथा घृताचीं घृतमंचंतीं स्रुचं प्रति हर्य। प्रतिकामयस्व। किंच हे सुक्रतो सुप्रज्ञ पृथिव्या वर्ष्मन्वर्ष्मणि समुच्छ्रिते पूर्वोक्ते देशेऽह्नां सुदिनत्वे तन्निमित्तं देवयज्या देवयागेन हेतुनोर्ध्वो ज्वालाभिरुन्नतो भव॥

आ देवानामयया वेह यातु नराशंसो विश्वरूपेभिरश्वैः।
ऋतस्य पथा नमसा मियेधो देवेभ्यो देवतमः सुषूदत्॥ २॥
आ। देवानां। अयऽयावा। इह। यातु। नराशंसः। विश्वऽरूपेभिः। अश्वैः।
ऋतस्य। पथा। नमसा। मियेधः। देवेभ्यः। देवऽतमः। सुसूदत्॥ २॥

देवानामयनायाग्ने गंता नरांशंसः ॥ उभे वनस्पत्यादिषु युगपदिति पूर्वोत्तरपदयोर्युगपत्प्राप्तावित्यरत्वं ॥ नरः शंसनीय एतन्नामकोऽग्निर्विश्वरूपैरभिर्गणानाम्भिरुक्थ्यैः सहेहाग्निन्यज्ञ आ यातु । आगत्य च मित्रेधो मेध्यो यज्ञहितः स्तुतियोग्यो वा देवतमो देवानां मुख्यः सोऽग्निर्हविर्वहनयोग्यैर्नर्तस्व यज्ञस्य पथा मार्गेण नमसा स्तोत्रेण सह देवेभ्य इंद्रादिभ्यः सुषूदत् । हविः प्रेरयतु ॥

शश्वत्तममीळते दूत्याय हविष्मंतो मनुष्यासो अग्निं ।
बर्हिष्टरश्वैः सुवृता रथेना देवान्वक्षि नि षदेह होता ॥३॥
शश्वत्ऽतमं । ईळते । दूत्याय । हविष्मंतः । मनुष्यासः । अग्निं ।
बर्हिष्टः । अश्वैः । सुऽवृता । रथेन । आ । देवान् । वक्षि । नि । सद् । इह । होता ॥३॥

शश्वत्तममत्यंतं नित्यमग्निं हविष्मंतः संभृतहविष्का मनुष्यासो मनुष्या यजमाना दूत्याय ॥ दूतस्य भागकर्मणे इति यत्प्रत्ययः ॥ दूतकर्मणे हविर्वहनलक्षणाय तन्निमित्तमीळते । स्तुवंति । स त्वमेवं स्तुतो बर्हिष्टैर्वोढृतमैरश्वैः सुवृता सुवर्तनेन रथेन च सह देवानिंद्रादीना वक्षि । अस्मदीयं यज्ञं प्रत्यावह । प्रापय । ततस्त्वं होता भवन्निहाग्निन्यज्ञे नि सद् । निषीद ॥

वि प्रथतां देवजुष्टं तिरश्चा दीर्घं द्राघ्मा सुरभि भूत्वस्मे ।
अहेळता मनसा देव बर्हिरिंद्रज्येष्ठाँ उशतो यक्षि देवान् ॥४॥
वि । प्रथतां । देवऽजुष्टं । तिरश्चा । दीर्घं । द्राघ्मा । सुरभि । भूतु । अस्मे इति ।
अहेळता । मनसा । देव । बर्हिः । इंद्रऽज्येष्ठान् । उशतः । यक्षि । देवान् ॥४॥

हे बर्हिर्नामकाग्ने देवजुष्टं देवैः सेवितं तिरश्चा तिरश्चीनं तिर्यगंचनमिदं बर्हिर्वि प्रथतां । विशेषेण विस्तृतं भवतु । तथा दीर्घं चेदं द्राघ्मा द्राघिम्ना ॥ दीर्घशब्दस्येमनिचि प्रियस्थिरेत्यादिना द्राघिरादेशः । अकारस्येकारो वर्णव्यापत्त्या । पश्चादलोपः ॥ द्राघिम्ना युक्तं भवतु । अस्मे अस्मदीयं बर्हिः सुरभि सोमादिहविर्निधानेन सुगंधं भूतु । भवतु । हे देव द्योतमान हे बर्हिरेतन्नामकाग्ने अहेळता । हेल इति क्रोधनाम । अक्रुध्यता मनसोशतो हवींषि कामयमानानिंद्रज्येष्ठानिंद्रप्रधानान्देवान्यक्षि । यज । पूजय ॥

दिवो वा सानु स्पृशता वरीयः पृथिव्या वा माचया वि श्रयध्वं ।
उशतीर्द्वारो महिना महद्भिर्देवं रथं रथयुर्धारयध्वं ॥५॥
दिवः । वा । सानु । स्पृशत । वरीयः । पृथिव्या । वा । माचया । वि । श्रयध्वं ।
उशतीः । द्वारः । महिना । महत्ऽभिः । देवं । रथं । रथऽयुः । धारयध्वं ॥५॥

हे द्वार एतन्नामधेया देव्यः यूयं दिवो वा । वाशब्दश्चार्थे । दिवश्च सानु समुच्छ्रितं वरीय उच्चतरं स्थानं स्पृशत । उन्नता भवतेत्यर्थः ॥ चवायोगे प्रथमेति न निघातः ॥ पृथिव्याश्च यावती माचास्ति तावत्या माचया वि श्रयध्वं । विस्तृता भवत । उशतीर्देवाञ्कामयमाना यूयं रथयुः ॥ सुपां सुलुगिति जसः सुः ॥ रथकामाः सत्यो महिना महिम्ना महद्भिर्देवैरधिष्ठितं अत एव देवं द्योतमानं रथं रमणसाधनं धारयध्वं । धारयत ॥ ॥२१॥

देवी दिवो दुहितरा सुशिल्पे उषासानक्ता सदतां नि योनौ ।
आ वां देवास उशती उशंत उरौ सीदंतु सुभगे उपस्थे ॥६॥

देवी इति । दिवः । दुहितरा । सुशिल्पे इति सुऽशिल्पे । उषसानक्ता । सदतां । नि । योनौ ।
आ । वां । देवासः । उशती इति । उशंतः । उरौ । सीदंतु । सुभगे इति सुऽभगे । उपऽस्थे ॥ ६॥

देवी द्योतमाने दिवो द्युलोकस्य दुहितरा दुहितरौ सुशिल्पे शोभनरूपे उषासानक्तोषाश्च नक्तं चाहोरात्रौ योनौ यज्ञस्य स्थाने नि सदतां । निषीदतां । हे उशती उशत्यौ कामयमाने हे सुभगे शोभनधने हे देव्यौ वां युवयोरुरौ विस्तीर्णे उपस्थे समीपस्थे स्थान उशंतो हवींषि कामयमाना देवासो देवा आ सीदंतु । उपविशंतु ॥

ऊर्ध्वो यावा बृहदग्निः समिद्धः प्रिया धामान्यदितेरुपस्थे ।
पुरोहितावृत्विजा यज्ञे अस्मिन् विदुष्टरा द्रविणमा यजेथां ॥ ७॥
ऊर्ध्वः । यावा । बृहत् । अग्निः । संऽइद्धः । प्रिया । धामानि । अदितेः । उपऽस्थे ।
पुरःऽहितौ । ऋत्विजा । यज्ञे । अस्मिन् । विदुःऽतरा । द्रविणं । आ । यजेथां ॥ ७॥

यावा सोमाभिषवाय यदोर्ध्व उन्नतो भवति यदा च बृहन्महानग्निः समिद्धो हविर्भिः सम्यग्दीप्तो भवति तथा प्रियाणि देवानां सोमादिहविष्प्रदानेन प्रीणयितॄणि धामानि हविषां धारकाणि यज्ञपात्राण्यदितेः पृथिव्या उपस्थे यज्ञसदने यदासादितानि भवंति तदानीं हे ऋत्विजौ दैव्यौ पुरोहितौ होतारौ पुरतो निहितौ विदुष्टरा ॥ छांदसं संप्रसारणं ॥ विद्वत्तमौ युवामस्मिन्यज्ञे द्रविणं धनमा यजेथां । यजिर्दानार्थः । अस्मभ्यमाभिमुख्येन प्रयच्छतं ॥

तिस्रो देवीर्बर्हिरिदं वरीय आ सीदत चकृमा वः स्योनं ।
मनुष्वद्यज्ञं सुधिता हवींषीळा देवी घृतपदी जुषंत ॥ ८॥
तिस्रः । देवीः । बर्हिः । इदं । वरीयः । आ । सीदत । चकृम । वः । स्योनं ।
मनुष्वत् । यज्ञं । सुऽधिता । हवींषि । इळा । देवी । घृतऽपदी । जुषंत ॥ ८॥

हे तिस्रो देवीरिळाद्यास्तिस्रो देव्यः वरीय उत्तरमिदं बर्हिरा सीदत ॥ काखाध्वनोरिति द्वितीया ॥ अत्यंतं तस्मिन्निषीदत । कुत एतत् तत्राह । वो युष्मदर्थं स्योनं विस्तीर्णमिदं चक्रम । वयं कृतवंतः ॥ वाक्यभेदादनिघातः ॥ इळैतन्नामिका देवी द्योतमाना सरस्वती घृतपदी दीप्तपदोपेता भारती चैता मनुष्वन्मनोर्यथा हवींष्यसेवंत तद्वदस्मदीयं यज्ञं सुधिता सुष्ठु निहितानि हवींषि च जुषंत । सेवंतां ॥

त्वाष्ट्रस्य पशोर्वपायागस्य देव त्वष्टरिति याज्या । सूचितं च । देव त्वष्टर्यज्ञ चारुत्वमानट् पिशंगरूपः सुभरो वयोधाः । आ० ३. ८. । इति ॥

देव त्वष्टर्यज्ञं चारुत्वमानड्ऋदंगिरसामभवः सचाभूः ।
स देवानां पाथ उप प्र विद्वानुशन्यक्षि द्रविणोदः सुरत्नः ॥ ९॥
देव । त्वष्टः । यत् । हु । चारुऽत्वं । आनट् । यत् । अंगिरसां । अभवः । सचाऽभूः ।
सः । देवानां । पाथः । उप । प्र । विद्वान् । उशन् । यक्षि । द्रविणःऽदः । सुऽरत्नः ॥ ९॥

हे देव त्वष्टरेतन्नामक त्वं यज्ञाहत्वं हविर्भिः यज्ञाणरूपत्वमानट् प्राप्तवान् ॥ अग्नेतिर्लिटि प्रत्ययस्य लुक् ॥ यश्च त्वमंगिरसामस्माकं सचाभूः सहभावी सखाभवः । हे द्रविणोदो धनस्य दातः अत एव सुरत्नः सुधनः स त्वमुग्रम्हवींषि कामयमानः सन् विद्वान् अस्मेदमस्मेदमिति प्रज्ञानन्देवानां पाथोऽन्नमुप यक्षि । उपयज । तेभ्यः प्रयच्छ ॥

वनस्पतिस्तोमे निष्केवल्ये वनस्पते रशनयेत्येषा सूक्तमुखीया । सूचितं च । देवेभ्यो वनस्पते हवींषि वनस्पते रशनया नियूयेति सूक्तमुखीयाः । आ० ९. ५. । इति ॥

वनस्पते रशनया नियूया देवानां पाथ उप वक्षि विद्वान् ।
स्वदाति देवः कृणवद्धवींष्यवतां द्यावापृथिवी हवं मे ॥१०॥
वनस्पते । रशनया । निऽयूय । देवानां । पाथः । उप । वक्षि । विद्वान् ।
स्वदाति । देवः । कृणवत् । हवींषि । अवतां । द्यावापृथिवी इति । हवं । मे ॥१०॥

हे वनस्पते वनस्पतिविकार यूप विद्वाज्ज्ञानानस्त्वं रशनया रज्ज्वा नियूय बद्ध्वा परित्यज्य पाथोऽन्नं देवानामिंद्रादीनामुप वक्षि । उपवह । प्रापय । ततो देवो वनस्पतिः स्वदाति । हविष्प्रापणेन स्वदयतु । तथा हवींष्यस्माभिर्दत्तानि कृणवत् । देवानां करोतु । तथा मे मदीयं हवं देवविषयाङ्गानं द्यावापृथिवी द्यावापृथिव्यावतां । रक्षतां ॥

अग्ने वह वरुणमिष्टये न इंद्रं दिवो मरुतो अंतरिक्षात् ।
सीदंतु बर्हिर्विश्व आ यजत्राः स्वाहा देवा अमृता मादयंतां ॥११॥
आ । अग्ने । वह । वरुणं । इष्टये । नः । इंद्रं । दिवः । मरुतः । अंतरिक्षात् ।
सीदंतु । बर्हिः । विश्वे । आ । यजत्राः । स्वाहा । देवाः । अमृताः । मादयंतां ॥११॥

हे अग्ने त्वं नोऽस्माकमिष्टये यागायेंद्रं वरुणं च मरुतश्च दिवो द्युलोकादंतरिक्षाच्चास्मदीयं यज्ञमा वह । प्रापय । आगतास्ते यजत्रा यष्टव्या विश्वे सर्वे देवा बर्हिरा सीदंतु । तत्रासन्ना भवंतु । ततोऽमृता मरणधर्मरहिता देवाः स्वाहा स्वाहाकारिण दत्तैर्हविर्भिर्मादयंतां । आत्मानं मादयंतु ॥ ॥२२॥

बृहस्पत इत्येकादशर्चं तृतीयं सूक्तं । आंगिरसस्य बृहस्पतेरार्षं नवमी जगती शिष्टा दश त्रिष्टुभः । अनेन सूक्तेनर्षिः परमपुरुषार्थसाधनं परब्रह्मज्ञानं स्तुतवान् । अतस्तद्देवत्यमिदं । उक्तं हि बृहद्देवतायां । सुज्योतिः परमं ब्रह्म यद्योगात्समुपाश्नुते । तज्ज्ञानमभितुष्टाव सूक्तेनाथ बृहस्पतिः । बृ० ७. १०८४. । इति । अनुक्रांतं च । बृहस्पते बृहस्पतिर्ज्ञानं तुष्टाव नवमी जगती ॥ सूक्तविनियोगो गतः ॥ देवसुवां हविःषु बृहस्पतिर्वाचस्पतिरित्यस्य प्रथमानुवाक्या । सूचितं च । बृहस्पते प्रथमं वाचो अग्रं हंसैरिव सखिभिर्वावदद्भिः । आ० ४. ११. । इति ॥

बृहस्पते प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधानाः ।
यदेषां श्रेष्ठं यदरिप्रमासीत्प्रेणा तदेषां निहितं गुहाविः ॥१॥
बृहस्पते । प्रथमं । वाचः । अग्रं । यत् । प्र । ऐरत । नामऽधेयं । दधानाः ।
यत् । एषां । श्रेष्ठं । यत् । अरिप्रं । आसीत् । प्रेणा । तत् । एषां । निऽहितं । गुहा । आविः ॥१॥

बृहस्पतिरनेन सूक्तेन विदितवेदार्थान्स्वात्मान्वृद्ध्या स्तूयमानः स्वात्मानं संबोधयाह । हे बृहस्पतेऽंतरात्मन् प्रथममुत्पन्नत्वनंतरमितरवागुच्चारणात्प्रागेव नामधेयं नाम दधानाः पदार्थेषु निदधाना वाचा यत्प्रैरत

प्रेरितवंतः तद्वाचोऽयं भवति । यत्तत तातेत्यादिकं वाक्यं पूर्वमभिधाय पश्चादन्या वाचो वदिष्यंति खलु तस्माद्वाचोऽयं । अस्यां दशायामवस्थिताम्बालान्पश्य । तथेदानीमेषां श्रेष्ठं प्रशस्तमं यद्यच्चारित्रं पापरहितं वेदार्थज्ञानमासीत् एषां तज्ज्ञानं गुहा गुहायां निहितं गोप्यं तत्प्रेणा ॥ मकारलोपश्छांदसः ॥ प्रेम्णाविर्भवति । वेदाभ्यासकाले सरस्वती स्वार्थमेभ्यः प्रकाशयतीत्यर्थः । एवं विश्वये बृहस्पते प्रथमं वाचो अग्रमित्यादिकमारण्यकमनुसंधेयं । ऐ० आ० १. ३. ६. ॥

सक्तुमिव तितउना पुनंतो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ॥२॥
सक्तुऽइव । तितउना । पुनंतः । यत्र । धीराः । मनसा । वाचं । अक्रत ।
अत्र । सखायः । सख्यानि । जानते । भद्रा । एषां । लक्ष्मीः । निऽहिता । अधि । वाचि ॥२॥

तितउना । परिपूयतेऽनेनेति । यद्वा । तता विस्तृता भृष्टयवा अचेति तितउः ॥ तनोतेर्डउः सन्वच्च । उ० ५. ५२. । इति डउप्रत्ययः । सन्वद्भावादित्वं ॥ उक्तनिर्वचनेन सूर्पेण सक्तुमिव यथा कश्चित्सक्तुं दुर्धावं पुनाति तद्वत् प्रक्षतितः प्रत्ययतश्च शब्दानुत्पुनंतो धीरा धीमंतो विद्वांसो यत्र यस्मिन्काले विद्वत्संघे वा मनसा प्रज्ञायुक्तेन वाचमक्रत अक्षपत कुर्वंति ॥ करोतेर्लुङि रूपं ॥ अत्र तत्र काले सखायः समानख्यानाः शास्त्रादिविषयज्ञानास्ते सख्यानि तेषु भवानि ज्ञानानि जानते । जानंति । यद्वा । सखायो वाचा बद्धसख्यास्ते तस्मात्तस्मा वाचः सख्यानि जानंति । वाक्ययुक्तानभ्युदयाङ्गंभंत इत्यर्थः । तस्मादेषां वाचि भद्रा कल्याणी निहिता लक्ष्मीर्भवति । अधिः सप्तम्यर्थद्योतकः । अर्थज्ञानं वाचि पश्याम इत्यर्थः । तितउ परिपवनं भवति ततवद्वा तुन्नवद्वा तिलमाचतुन्नमिति वा सक्तुमिव तितउनेत्यादि निरुक्तमनुसंधेयं । नि० ४. १०. ॥

वाग्देवत्यपशोर्वपापुरोडाशयोर्यज्ञेन वाच इत्यादिके द्वे क्रमेण याज्ये । सूचितं च । यज्ञेन वाचः पदवीयमायन्निति द्वे देवीं वाचमजनयंत देवाः । आ० ३. ८. । इति ॥

यज्ञेन वाचः पदवीयमायन्तामन्वविंदन्नृषिषु प्रविष्टां ।
तामाभृत्या व्यदधुः पुरुत्रा तां सप्त रेभा अभि सं नवंते ॥३॥
यज्ञेन । वाचः । पदऽवीयं । आयन् । तां । अनु । अविंदन् । ऋषिषु । प्रऽविष्टां ।
तां । आऽभृत्य । वि । अदधुः । पुरुऽत्रा । तां । सप्त । रेभाः । अभि । सं । नवंते ॥३॥

विदितार्था धीराः पदवीयं ॥ वेतेरचो यत् । संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाभावः ॥ पदेन यातव्यः पंथाः पदवीयः । तं वाचो मार्गं यज्ञेनायन् । प्राप्नुवंतः । ऋषिष्वतींद्रियार्थदर्शिषु प्रविष्टां तां वाचमविंदन् । अलभंत । अनंतरं तां वाचमाभृत्याहृत्य पुरुत्रा बहुषु देशेषु व्यदधुः । व्यकार्षुः । सर्वान्मनुष्यानध्यापयामासुरित्यर्थः । एतादृशीं वाचं रेभाः शब्दायमानाः पक्षिणः पक्षिरूपाणि गायत्र्यादीनि सप्त च्छंदांस्यभि सं नवंते । अभितः संगच्छंते ॥

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनां ।
उतो त्वस्मै तन्वं१ वि सस्रे जायेव पत्य उशती सुवासाः ॥४॥
उत । त्वः । पश्यन् । न । ददर्श । वाचं । उत । त्वः । शृण्वन् । न । शृणोति । एनां ।
उतो इति । त्वस्मै । तन्वं । वि । सस्रे । जायाऽइव । पत्ये । उशती । सुऽवासाः ॥४॥

त्वशब्द एकवाची । एकः । उतशब्दोऽप्यर्थे । पश्यन्नपि मनसा पर्यालोचयन्नपि वाचं न ददर्श । दर्शनफलाभावान्न पश्यति । त्व एकः शृण्वन्नपीमां वाचं न शृणोति श्रवणफलाभावात् । इत्यनेनार्धेनाविद्वानभिहितः ।

तृतीयपादेन विदितवेदार्थमाह। सखा एकस्या अपि तन्वमात्मीयं शरीरं वि सस्रे। स्वयं वाग्विविधं गमयति। आत्मानं विवृणुते प्रकाशयतीत्यर्थः। तत्र दृष्टांतः। जायेव यथोशती संभोगं कामयमाना सुवासाः शोभनवसना जाया पत्ये भर्त्रे ऋतुकाले संभोगार्थं स्वयमात्मानं विवृणुते। तद्वदेनां पश्यति शृणोति चेति विदितवेदार्थस्य प्रशंसा। अथैकः पश्यन्न पश्यति वाचमित्यादि निरुक्तमत्र द्रष्टव्यं। नि० १. १९.॥

उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु।
अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पां ॥५॥
उत। त्वं। सख्ये। स्थिरऽपीतं। आहुः। न। एनं। हिन्वन्ति। अपि। वाजिनेषु।
अधेन्वा। चरति। मायया। एषः। वाचं। शुश्रुऽवान्। अफलां। अपुष्पां ॥५॥

त्वमेतेकमपि सख्ये विदुषां संसदि। या सत्कथा सा सखिकर्मत्वात्सख्यमित्युच्यते। सा च वाचा क्रियते। अतो वाक्संबंधाद्वाक्सख्ये स्थिरपीतं मधु यस्य हृदये स्थितं भवति। यद्वा। स्थिरपीतं स्थिरप्राप्तिमाङ्गः। यद्वा। तस्मिञ्ज्ञातार्थमाङ्गः। लोके यथा ज्ञातार्थं पुरुषं पीतार्थमिति वदंति। किंचैनं विज्ञातार्थं पुरुषं वाजिनेषु। वाग्निश्चरा येषां ते वाजिना अर्था वाच आयत्ताः खलु। वाग्नियेष्वर्थेषु नापि हिन्वंति। अपिशब्दोऽन्वर्थे। केचिदपि नानुगच्छंति। अयमेवातिशयेन विद्वानित्यर्थः। यद्वा। वाजिनेषु सारभूतेषु निरूपणीयेष्वर्थेष्वेनं न हिन्वंति। न बहिः कुर्वंति। एनं पुरस्कृत्यैव सर्वे वेदार्थं विचारयंतीत्यर्थः। इत्यर्थशः प्रशस्तः। अनंतरमुत्तरार्धेन केवलपाठको निंद्यते। एषोऽविज्ञातार्थः पुरुषोऽधेन्वा धेनुत्वविवर्जितया कामानामदोग्ध्र्या देवमनुष्यस्थानेषु वाक्प्रतिरूपया मायया चरति। किं कुर्वन्। अफलामपुष्पां। वाचोऽर्थः पुष्पफलं। अर्थवर्जितां। यद्वा। वाचोऽर्थो याज्ञदैवते। यज्ञे भवं ज्ञानं याज्ञं देवतासु भवं ज्ञानं दैवतं। तद्वर्जितां कर्मादिविषयज्ञानवर्जितां वाचं शुश्रुवान्श्रुतवान्। केवलं पाठमात्रेणैव श्रुतवान् स चरति। यथा बंध्या पीना गौः किं द्रोणमाचं क्षीरं दोग्धीति मायामुत्पादयंती चरति यथा बंध्यो वृषोऽकाले पल्लवादियुक्तः सन्पुष्पयति फलतीति भ्रांतिमुत्पादयंस्तिष्ठति तथा पाठं प्रस्रवाणश्चरतीत्यर्थः। अथैकं वाक्सख्ये स्थिरपीतमित्यादि निरुक्तमनुसंधेयं। नि० १. २०.॥ ॥२३॥

यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति।
यदीं शृणोत्यलकं शृणोति नहि प्रवेद सुकृतस्य पंथां ॥६॥
यः। तित्याज। सचिऽविदं। सखायं। न। तस्य। वाचि। अपि। भागः। अस्ति।
यत्। ईं। शृणोति। अलकं। शृणोति। नहि। प्रऽवेद। सुऽकृतस्य। पंथां ॥६॥

सचिविदं। सचिशब्दः सखिवाची। सखिविदं। योऽधेता स वेदस्य सखा संप्रदायोच्छेदनिवारकत्वेन वेदं प्रत्युपकारित्वात्। तादृशमुपकारिणमध्येतारं वेत्तीति सचिवित्। तमभिज्ञं सखायमध्येतॄणां पुरुषाणां स्वार्थबोधनेनोपकारित्वात्सखिभूतं वेदं यः पुमांस्तित्याज परार्थविनियोगेन परित्यजति॥ त्यजतेर्लिट्यपस्मृधिथामादृचुरित्यादिना निपातितः॥ तस्य पुरुषस्य वाचि सर्वस्यां लौकिक्यां शास्त्रीयायां वाच्यपि भागो भजनीयः कश्चिदर्थो नास्ति। ईमयं पुरुषो यद्वेदव्यतिरिक्तं शृणोति तदलकमलीकं व्यर्थमेव शृणोति। हि यस्मात्कारणात्सुकृतस्य पंथां पंथानं न प्रवेद अङ्गाराहित्यादनुष्ठानमार्गं न जानाति। तस्मात्तदीयश्रवणमपि निष्फलमित्यर्थः। द्वितीयचतुर्थपादयोरभिप्राय आरण्यके दर्शितो न तस्यानूक्ते भागोऽस्तीत्यादिना। ऐ० आ० ३.२.४.। तथा तं योऽनूत्सृजत्यभागो वाचि भवत्यभागो नाके तदेषाभ्युक्ता। तै० आ० २.१५.५.। इत्यध्वर्युभिश्च॥

अक्षण्वंतः कर्णवंतः सखायो मनोजवेष्वसमा बभूवुः।
आदघ्नास उपकक्षास उ त्वे हृदा इव स्नात्वा उ त्वे ददृश्रे ॥७॥

अक्षण्वंतः । कर्णवंतः । सखायः । मनोजवेषु । असमाः । बभूवुः ।
आदघ्नासः । उपकक्षासः । ऊं इति । त्वे । हृदाः । इव । स्नात्वाः । ऊं इति । त्वे । ददृश्रे ॥७॥

अक्षण्वंतोऽचिमंतः ॥ छंदस्यपि दृश्यत इत्यचिशब्दादनङ् । अनो नुडिति नुट् ॥ अनेन दृश्यते सर्वमित्यचि । यद्वा । तैजसत्वादन्येभ्योऽक्षेभ्यो व्यक्ततरं । तथा च श्रूयते । तस्मादेते व्यक्ततरे इवेति । तादृशाचियुक्ताः कर्णवंतः । कर्णौ निश्चत्तद्वारः । गर्भावस्थायामेव केनापि निर्मितविल इत्यर्थः । यद्वा । शरीरस्य शिरसो वोर्ध्वं गते उच्चैः स्थिते । कर्णविलक्षणाकाशवंतः । तथा चाम्नायते । ऋच्छंती इव खे उद्गंतामिति । तादृशाः सखायः । समानं ख्यानं ज्ञानं येषामिति सखायः । तेषु वाक्येषु वाग्येष्विंद्रियेषु समानज्ञाना इत्यर्थः । ते मनोजवेषु । मनसा गम्यंते ज्ञायंत इति मनोजवाः प्रज्ञायाः । तेष्वसमा अतुल्या बभूवुः । भवंति । तेषु मध्ये केचिदादघ्नासः ॥ आस्यशब्दस्य पृषोदरादित्वादाकारादेशः ॥ आस्यदघ्ना आस्यप्रमाणोदका हृदा इवेति मध्यमप्रज्ञानाह । अथ त्व एके ॥ सर्वनामत्वाज्जसः शीभावः ॥ उपकक्षासः कक्षसमीपप्रमाणोदका हृदा इव । अल्पोदका इत्यर्थः । अनेनाल्पप्रज्ञानाह । तथा त्व एके स्नात्वाः ॥ स्नातेः क्तत्वार्थे क्त्वाप्रत्ययः । पा० ३. ४. १४. । स चार्हे क्त्वातृचश्च । पा० ३. ३. १६९. । इत्यर्हार्थे च भवति ॥ स्नानार्हा अघोभ्योदका हृदा इव ददृश्रे । दृश्यंते । अनेन महाप्रज्ञानाह । उः पूरणः । अचिमंतः कर्णवंतः सखायोऽचि चष्टेरित्यादिकं निरुक्तमत्र द्रष्टव्यं । नि० १. ९. ॥

हृदा तष्टेषु मनसो जवेषु यद्ब्राह्मणाः संयजंते सखायः ।
अत्राहं त्वं वि जहुर्वेद्याभिरोहब्रह्माणो वि चरंत्यु त्वे ॥८॥
हृदा । तष्टेषु । मनसः । जवेषु । यत् । ब्राह्मणाः । संऽयजंते । सखायः ।
अत्र । अहं । त्वं । वि । जहुः । वेद्याभिः । ओहऽब्रह्माणः । वि । चरंति । ऊं इति । त्वे ॥८॥

सखायः समानख्याना ब्राह्मणा हृदा बुद्धिमतां हृदयेन तष्टेषु निश्चितेषु परिकल्पितेषु मनसो जवेषु गंतव्येषु वेदार्थेषु गुणदोषनिरूपणा यद्यदा संयजंते संगच्छंते । यजिरत्र संगतिकरणवाची । अत्रास्मिन्ब्राह्मणसंघे त्वमविज्ञातार्थमेकं पुरुषं वेद्याभिर्वेदितव्याभिर्विद्याभिः प्रवृत्तिभिर्वा वि जहुः । विशेषेण परित्यजंति । अहेति विनिश्चये । ओहब्रह्माणः । उह्यमानं ब्रह्म विद्याश्रुतिमतिबुद्धिलक्षणं येषां ते तथोक्ताः । तादृशास्त एके विद्वांसो वि चरंति । यथाकामं वेदार्थेषु विनिश्चयार्थं प्रवर्तंते । उः प्रसिद्धौ । हृदा तष्टेषु मनसां प्रजवेष्वित्यादिकं निरुक्तं द्रष्टव्यं । नि० १३. १३. ॥

इमे ये नार्वाङ् परश्चरंति न ब्राह्मणासो न सुतेकरासः ।
त एते वाचमभिपद्य पापया सिरीस्तंत्रं तन्वते अप्रजज्ञयः ॥९॥
इमे । ये । न । अर्वाक् । न । परः । चरंति । न । ब्राह्मणासः । न । सुतेऽकरासः ।
ते । एते । वाचं । अभिऽपद्य । पापया । सिरीः । तंत्रं । तन्वते । अप्रऽजज्ञयः ॥९॥

अनया वेदार्थानभिज्ञा निंद्यंते । इमे येऽविद्वांसोऽर्वागर्वाचीनमधोभावित्वाल्लोके ब्राह्मणैः सह न चरंति ये परः परस्ताद्देवैः सह न चरंति ते ब्राह्मणासो ब्राह्मणा वेदार्थतत्परा न भवंति । तथा सुतेकरासः । सोमं सुतमभिषुतं कुर्वंतीति सुतेकरा ऋत्विजः । तेऽपि न भवंति । अप्रजज्ञयः ॥ जानातेरादृगमहन इति किप्रत्ययः ॥ अविद्वांसस्त एते मनुष्या वाचं लौकिकीमभिपद्य प्राप्य तया पापया पापकारिण्या वाचा युक्ताः सिरीः ॥ छंदसोवनिपाविति ईप्रत्ययः । सुपां सुलुगिति जसः सुः ॥ सीरिणो भूत्वा तंत्रं छान्दिलक्षणं तन्वते । विस्तारयंति । कुर्वंतीत्यर्थः । सर्वथा वेदार्थो ज्ञेय इत्यभिप्रायः ॥

सोमप्रवहणे सर्वे गंदंतीत्येषा । सूचितं च । सोम यास्ते मयोभुव इति तिस्रः सर्वे गंदंति यज्ञसामतेन । आ० ४. ४. । इति ॥

सर्वे नंदंति यशसागतेन सभासाहेन सख्या सखायः ।
किल्बिषस्पृत्पितुषणिर्ह्येषामरं हितो भवति वाजिनाय ॥१०॥
सर्वे । नंदंति । यशसा । आऽगतेन । सभाऽसहेन । सख्या । सखायः ।
किल्बिषऽस्पृत् । पितुऽसनिः । हि । एषां । अरं । हितः । भवति । वाजिनाय ॥१०॥

सखायः समानख्यानाः समानज्ञानाः सर्वे सभा मनुष्याः सभासहेन सभां सोढुं शक्नुवता सख्यर्त्विजां प्रतिभूतेन यज्ञं प्रत्यागतेन यशसा यशस्विना सोमेन हेतुना नंदंति । हृष्टा भवंति । स हि स एव सोम एषां जनानां किल्बिषस्पृत् । यः स्वस्मादन्यः पुरुषः श्रेष्ठतामश्नुते स किल्बिषं भवति बाधत्वेन । यथा पापं सदाचारिर्बाधितव्यं भवति तद्वत् । पापरूपस्य शत्रोर्बाधकः । यद्वा । यज्ञे साध्वनुप्रवचनाकरणेन यत्किल्बिषं येषां संजायते तद्यो बाधते स किल्बिषस्पृत् । तथा त्वं पितुषणिः । पितुरित्यन्ननाम दक्षिणा वा । तमनेन सोमेन सनोति यजमानः संभजत इति तादृशः । तेषामन्नदक्षिणादातेत्यर्थः । किंच हितः पात्रेषु निहितः सोमो वाजिनाय । इंद्रियं वीर्यं वाजिनं । तेषां वीर्याय तत्कर्तुमरमलं पर्याप्तः समर्थो भवति । सर्वे नंदंति यशसागतेनेत्यन्वाह यज्ञो वै सोमो राजेत्यादिकमिंद्रियं वै वीर्यं वाजिनमाजरसं हास्मै वाजिनं नापक्षियत इत्यंतं ब्राह्मणमत्रानुसंधेयं । ऐ० ब्रा० १.१३. ॥

ऋचां त्वः पोषमास्ते पुपुष्वान्गायत्रं त्वो गायति शक्करीषु ।
ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः ॥११॥
ऋचां । त्वः । पोषं । आस्ते । पुपुष्वान् । गायत्रं । त्वः । गायति । शक्करीषु ।
ब्रह्मा । त्वः । वदति । जातऽविद्यां । यज्ञस्य । मात्रां । वि । मिमीते । ऊं इति । त्वः ॥११॥

अनया होत्राद्युत्विक्कर्मणां विनियोगमाचष्टे । त्व एको होतर्त्वा पोषं यथाविधि कर्मणि प्रयोगं पुपुष्वान् । एको धातुरनुवादार्थः । बह्वीर्ऋचः पुष्यन्भृंसन्नास्ते । त्व एक उद्गाता शक्करीषु । शक्कर्य ऋचः । आभिर्ऋग्भिर्वृत्रं हंतुमिंद्रः समर्थोऽभूदिति शक्कर्यः । तासु गायत्रं साम गायति । त्व एको ब्रह्मा च जातविद्यां जाते जाते कर्तव्ये प्रायश्चित्तादौ वेदयित्रीं वाचं वदति । ब्रह्मा हि सर्वं वेदितुं योग्यो भवति खलु ॥ चादिलोपे विभाषेति न निघातः ॥ त्व एकोऽध्वर्युश्च यज्ञस्य मात्रां यज्ञो यया मीयतेऽभिषवग्रहणादिकया क्रियया तां मात्रां यज्ञशरीरं वि मिमीते । अत्यर्थं निर्मिमीते । ऋचामेकः पोषमास्ते पुपुष्वान् होतर्गर्चनी । नि० १. ८. । इत्यादिनिरुक्तानुसारेणार्थोऽभ्यधायि । एवं बृहस्पतिर्विदितवेदार्थं तुष्टाव ॥ ॥२४॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थाश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरसायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्येऽष्टमाष्टके द्वितीयोऽध्यायः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् । निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
प्राप्तः श्रीसायणाचार्यो व्याख्याय चरमेऽष्टके । स्फुटं द्वितीयमध्यायं तृतीयं वक्तुमुद्यतः ॥

तत्र देवानामिति नवर्चमनुवाकापेक्षया चतुर्थं सूक्तं । आनुष्टुभं देवदेवत्यं । लोकनाम्नः पुत्रो बृहस्पतिरांगिरस एव वा बृहस्पतिर्ऋषिः । अथवा दक्षस्य दुहितादितिर्ऋषिः । तथा चानुक्रांतं । देवानां नव लौक्यो वा बृहस्पतिर्दैवाचार्यस्तदितिर्वा दैवमानुष्टुभमिति ॥ गतः सूक्तविनियोगः ॥

देवानां नु वयं जाना प्र वोचाम विपन्यया ।
उक्थेषु शस्यमानेषु यः पश्यादुत्तरे युगे ॥ १॥
देवानां । नु । वयं । जाना । प्र । वोचाम । विपन्यया ।
उक्थेषु । शस्यमानेषु । यः । पश्यात् । उत्ऽतरे । युगे ॥ १॥

अदितिर्दीर्घायत्वनेन सूक्तेन स्वयं यथादित्यानजनयत्तद्ब्रवीति । बृहस्पतृर्षिपत्वे स ऋषिरदितेः सकाशादादित्योत्पत्तिप्रकारमाह । वयं देवानामादित्यानां जाना जन्मानि प्र वोचाम । प्रकथयाम । विपन्यया विशिष्टया वाचा । वयमिति वोचामेति चोभयत्र पूजार्थं बहुवचनं । अथैकवदाह । यो देवानां गणः पूर्वे युग उत्पन्नोऽप्युक्थेषु शस्यमानेषु यागे शस्त्रेष्वनुष्ठीयमानेषूत्तरे युगे वर्तमानं स्तुवंतं स्तोतारं पश्चात् पश्यति । अनेकेष्वपि युगेषु गतेषु कर्मसु स्तूयमानो वर्तत इत्यर्थः ॥

ब्रह्मणस्पतिरेता सं कर्मार इवाधमत् । देवानां पूर्व्ये युगेऽसतः सदजायत ॥ २॥
ब्रह्मणः । पतिः । एता । सं । कर्मारःऽइव । अधमत् । देवानां । पूर्व्ये । युगे । असतः ।
सत् । अजायत ॥ २॥

ब्रह्मणोऽन्नस्य पतिरदितिरेतानि देवानां जन्मानि कर्मार इव स यथा भस्त्रयाग्निमुपधमति प्रज्वलनार्थमेवं समधमत् । उद्पादयदित्यर्थः । देवानां पूर्व्ये युगे । आदिरुष्टावित्यर्थः । तेषामुपादानकारणादसतो नामरूपवर्जितत्वेनासत्समानाद्ब्रह्मणः सकाशात्सन्नामरूपविशिष्टं देवादिकमजायत । प्रादुरभूत् । असद्वा इदमग्र आसीत्ततो वै सदजायत । तै० उ० २. ७. । इति हि श्रुतिः । न सदात्मकस्य प्रपंचस्यासत्कारणत्वं युक्तमिति वाच्यं छंदोगैः कथमसतः सज्जायेतेत्यसत्कारणत्वमाक्षिप्य सत्त्वेव सोम्येदमग्र आसीदित्यवधारितत्वात् । छां० उ० ६. २. २. । तर्ह्यसत्कारणप्रतिपादकवाक्यानां का गतिरिति चेत् तेषामव्याकृतत्वाभिप्रायत्वात् तद्वेदं तर्ह्यव्याकृतमासीत् । शत० १४. ४. २. १५. । इति श्रुतेः । यद्येवं तर्ह्यदितेः सकाशात्कथं देवाद्युत्पत्तिः । वायोरग्निरित्यादिवत् अधिष्ठानसकाशादुत्पत्तेः । यद्वा । देवानां कारणभूतं सदसतो ब्रह्मणः सकाशादुत्पन्नमिति योजनादुक्तन्यायोऽस्मिन्पक्षेऽपि समान एव ॥

देवानां युगे प्रथमेऽसतः सदजायत । तदाशा अन्वजायंत तदुत्तानपदस्परि ॥ ३॥
देवानां । युगे । प्रथमे । असतः । सत् । अजायत । तत् । आशाः । अनु । अजायंत ।
तत् । उत्तानऽपदः । परि ॥ ३॥

पूर्वार्धमुक्तं । तदन्वाशा दिशोऽजायंत । तत्परि । तदन्वित्यर्थः । उत्तानपदः । उत्तानमूर्ध्वतानं पदं यत इत्युत्तानपदो वृक्षाः । तेऽजायंत । प्रादुरभवन् ॥

भूर्जज्ञ उत्तानपदो भुव आशा अजायंत ।
अदितेर्दक्षो अजायत दक्षाद्वदितिः परि ॥ ४॥
भूः । जज्ञे । उत्तानऽपदः । भुवः । आशाः । अजायंत ।
अदितेः । दक्षः । अजायत । दक्षात् । उं इति । अदितिः । परि ॥ ४॥

भूरुत्तानपदो वृक्षाज्जज्ञे । तथा भुवः सकाशादाशा अजायंत । तथादितेर्दक्षोऽजायत । उत्पन्नः । दक्षाद्दक्षादप्यदितिः पर्यजायत । न स्वोत्पन्नं कार्यं स्वस्यैव कारणमपि भवतीति विप्रतिषिद्धमिति वाच्यं ।

यास्काचार्य इदमेव वाक्यमुदाहृत्य विरोधमाशंक्य पर्यहरत्। तथा हि। अदितेर्दक्षो अजायत दक्षाद्वदितिः परीति च तत्कथमुपपद्येत समानजन्मानौ स्यातामित्यपि वा देवधर्मेणेतरेतरजन्मानौ स्यातामितरेतरप्रकृती । नि० ११. २३. । इति ॥

अदितिदेवताके पशावदितिर्ह्यजनिष्टेत्येषा हविषोऽनुवाक्या । सूचितं च । अदितिर्ह्यजनिष्ट सुत्यामाणं पृथिवीं वामनेहसं । आ० ३. ८. । इति ॥

अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव। तां देवा अन्वजायंत भद्रा अमृतबंधवः ॥५॥
अदितिः। हि। अजनिष्ट। दक्ष। या। दुहिता। तव। तां। देवाः। अनु। अजायंत। भद्राः। अमृतऽबंधवः ॥५॥

हे दक्ष तव या दुहिताभूत् सादितिरजनिष्ट हि पुत्रानादित्यान्। तदेवाह। तां देवा अन्वजायंत भद्राः सुत्या भजनीया अमृतबंधवोऽमरणबंधनाः ॥ ॥१॥

यद्देवा अदः सलिले सुसंरब्धा अतिष्ठत।
अत्रा वो नृत्यतामिव तीव्रो रेणुरपायत ॥६॥
यत्। देवाः। अदः। सलिले। सुऽसंरब्धाः। अतिष्ठत।
अत्र। वः। नृत्यतांऽइव। तीव्रः। रेणुः। अप। आयत ॥६॥

अनयोत्तरेण चादित्याः सूयंते। यदादा हे देवाः अदोऽमुष्मिन्सलिले यूयं सुसंरब्धाः सुष्ठु लब्धात्मानोऽतिष्ठत स्थितवंतः। आपो वा इदं सर्वं। तै० आ० १०. २२.। अप एव ससर्जादाविति श्रुतिस्मृती । अत्रास्मिन्सलिले नृत्यतामिव वो युष्माकं संबंधी तीव्रो दुःसहो रेणुरंशभूत एकोऽपायत। अपागच्छत्। दिवं प्रति गत इति सूर्याभिप्रायं। परा मार्तांडमास्यदिति वक्ष्यति ॥

यद्देवा यतयो यथा भुवनान्यपिन्वत। अत्रा समुद्र आ गूळ्हमा सूर्यमजभर्तन ॥७॥
यत्। देवाः। यतयः। यथा। भुवनानि। अपिन्वत। अत्र। समुद्रे। आ। गूळ्हं। आ। सूर्यं। अजभर्तन ॥७॥

यदादा हे देवाः यतयो यथा । वृष्ट्या नियमयंतीति वा वर्षणेन यातयंतीति वा यतयो मेघाः । ते यथोदकैर्भुवनानि लोकं पूरयंति तद्वत्स्वतेजोभिरपिन्वत । पूरितवंतः । अत्र समुद्रेऽप्स्वा गूळ्हं निगूळ्हं सूर्यं प्रातरुदयायाजभर्तन । आहृतवंतः ॥

अष्टौ पुत्रासो अदितेर्ये जातास्तन्वस्परि।
देवाँ उप प्रैत्सप्तभिः परा मार्ताडमास्यत् ॥८॥
अष्टौ। पुत्रासः। अदितेः। ये। जाताः। तन्वः। परि।
देवान्। उप। प्र। ऐत्। सप्तऽभिः। परा। मार्ताडं। आस्यत् ॥८॥

अष्टौ पुत्रासः पुत्रा मित्रादयोऽदितेर्भवंति येऽदितेस्तन्वः परि शरीराज्जाता उत्पन्नाः । अदितेरष्टौ पुत्रा अध्वर्युब्राह्मणे परिगणिताः । तथा हि । तानुक्रमिष्यामो मित्रश्च वरुणश्च धाता चार्यमा चांशश्च भगश्च विवस्वानादित्यश्चेति । तथा तत्रैव प्रदेशांतरेऽदितिं प्रसुत्याम्नातं । तस्या उच्छेषणमददुस्तत्प्राश्नात् सा

रेतोऽधत्त तस्मै चत्वार आदित्या अजायंत सा द्वितीयमपचदित्यष्टानामादित्यानामुत्पत्तिर्वर्णिता । तै० सं० ६. ५. ६. १. । सादितिः सप्तभिः पुत्रैर्देवानुप प्रैत् । उपागच्छत् । अष्टमं पुत्रं मार्तांडं सूर्यं पराऽयत् । उपरि प्राप्तिपदित्यर्थः ॥

सप्तभिः पुत्रैरदितिरुप प्रैत्पूर्व्यं युगं । प्रजायै मृत्यवे त्वत्पुनर्मार्तांडमाभरत् ॥९॥
सप्तऽभिः । पुत्रैः । अदितिः । उप । प्र । ऐत् । पूर्व्यं । युगं । प्रऽजायै । मृत्यवे । त्वत् ।
पुनः । मार्तांडं । आ । अभरत् ॥९॥

पूर्वमंचोक्त एवार्थः पुनरुच्यते । सप्तभिर्मार्तांडव्यतिरिक्तैर्मित्रादिभिरदितिः पूर्व्यं पुराणं युगमुप प्रैत् । उपगता । अथ प्रजायै प्राणिनामुत्पत्तये मृत्यवे तेषां मरणाय मार्तांडं मृताण्डाद्ब्रह्मांडाज्जातं मार्तांडनामानं सूर्यं पुनराभरत् । आहरत् । द्युलोकेऽधारयत् । प्राणिमरणजननादीनां सूर्योदयास्तमयायत्तता स्फुटा । तस्मै वृद्धमांडमजायतेत्यादि ब्राह्मणं । तै० सं० ६. ५. ६. १. ॥ ॥२॥

जनिष्ठा इत्येकादशर्चं पंचमं सूक्तं शक्तिपुत्रस्य गौरिवीतेरार्षं माहतं त्रैष्टुभं । तथा चानुक्रांतं । जनिष्ठा एकादश गौरिवीतिरिति ॥ अग्निष्टोमे महत्वतीयशस्त्र इदं सूक्तं निविद्धानं । सूचितं च । जनिष्ठा उग्र इत्येकभूयसीः शस्त्वा महत्वतीयां निविदं दध्यात् । आ० ५. १४. । इति ॥ सौमिकचातुर्मास्येषु वैश्वदेवेऽप्येतन्महत्वतीयं निविद्धानं । सूचितं च । जनिष्ठा उग्र उग्रो अन्न इति माध्यंदिनः । आ० ९. २. । इति ॥ महाव्रतेऽपि निष्केवल्य एतत्सूक्तं । तथैव पंचमारण्यके सूचितं । जनिष्ठा उग्रः सहसे तुरायेति निविद्धानं । ऐ० आ० ५. १. १. । इति ॥

जनिष्ठा उग्रः सहसे तुराय मंद्र ओजिष्ठो बहुलाभिमानः ।
अवर्धन्निंद्रं मरुतश्चिदत्र माता यद्वीरं दधनद्धनिष्ठा ॥१॥
जनिष्ठाः । उग्रः । सहसे । तुराय । मंद्रः । ओजिष्ठः । बहुलऽअभिमानः ।
अवर्धन् । इंद्रं । मरुतः । चित् । अत्र । माता । यत् । वीरं । दधनत् । धनिष्ठा ॥१॥

हे इंद्र सहसे बलाय तुराय शत्रूणां हिंसनाय त्वमुग्र उद्गूर्णबलो जनिष्ठाः । अजायथाः । कीदृग्यस्त्वं । मंद्रः स्तुत्य ओजिष्ठः । ओजः शरीरबलं । अतिशयेन तद्वान् बहुलाभिमानी भूयिष्ठाभिमानी । ईदृशं महानुभावमिंद्रमत्र वृत्रवधे मरुतश्चिन्मरुतोऽप्यवर्धन् । स्तुत्या साहाय्येन वा वर्धितवंतः । यद्यदा धनिष्ठा धारयित्रींद्रमाता वीरं दधनत् अधारयत् ॥

दुहो निषत्ता पृश्नी चिदेवैः पुरू शंसेन वावृधुष्ट इंद्रं ।
अभीवृतेव ता महापदेन ध्वांतात्प्रपित्वादुदरंत गर्भाः ॥२॥
दुहः । निऽसत्ता । पृश्नी । चित् । एवैः । पुरु । शंसेन । ववृधुः । ते । इंद्रं ।
अभिवृताऽइव । ता । महाऽपदेन । ध्वांतात् । प्रऽपित्वात् । उत् । अरंत । गर्भाः ॥२॥

दुहो द्रोग्धुरिंद्रस्य पृश्नी चित् सेनापि निषत्ता । तत्संनिधौ निषण्णाभूत् । एवैर्गतृभिर्मरद्भिः सहितमिंद्रं निषत्तेति संबंधः । तेऽपि मरुतः पुरु प्रभूतेन शंसेन स्तोत्रेणेंद्रं ववृधुः । अवर्धंत वृत्रं जिघांसंतं । अथ महापदेन महता व्रजेनाभीवृतेव परिवृतानीव गवादीनि तानि यथावरणापगमे निर्गच्छंति तद्वत्तान्युदकानि ध्वांतादंधकाररूपात्प्रपित्वादासन्नात्प्राप्तवृष्टेरभ्रा गर्भभूतान्युदकान्युदरंत । उद्गच्छन् ॥

ऋष्वा ते पादा प्र यजिगास्यवर्धन्वाजा उत ये चिदत्र ।
त्वमिंद्र सालावृकान्त्सहस्रमासन्दधिषे अश्विना ववृत्याः ॥३॥
ऋष्वा । ते । पादा । प्र । यत् । जिगासि । अवर्धन् । वाजाः । उत । ये । चित् । अत्र ।
त्वं । इंद्र । सालावृकान् । सहस्रं । आसन् । दधिषे । अश्विना । आ । ववृत्याः ॥३॥

हे इंद्र ते पादावृष्वा महांतौ । तादृग्रूपं यदा जिगासि गच्छसि तदानीं वाजा ऋभवोऽवर्धन् । अवर्धयन् । उतापि च ये चिद्ये केचिद्देवाः संति तेऽप्यवर्धयन् । हे इंद्र त्वं सहस्रं सालावृकानासन्नास्ये दधिषे । धारयसि । तदानीमश्विनाश्विनावप्या ववृत्याः । आवर्तयेः ॥

समना तूर्णिरुप यासि यज्ञमा नासत्या सख्याय वक्षि ।
वसाव्यामिंद्र धारयः सहस्राश्विना शूर ददतुर्मघानि ॥४॥
समना । तूर्णिः । उप । यासि । यज्ञं । आ । नासत्या । सख्याय । वक्षि ।
वसाव्यां । इंद्र । धारयः । सहस्रा । अश्विना । शूर । ददतुः । मघानि ॥४॥

हे इंद्र समना संग्रामे तूर्णिस्त्वरमाणोऽपि यज्ञमुप यासि । उपगच्छसि । तदानीं नासत्याश्विनौ सख्याय वक्षि । वहसि । हे इंद्र वसाव्यां वसुसमूहं सहस्रा सहस्रां बहुसंख्यां धारयः । धारयस्यस्माकमर्थाय । हे शूर अश्विनाश्विनावपि तवानुचरौ मघानि धनानि ददतुः । अस्मभ्यं प्रयच्छतः ॥

मंदमान ऋतादधि प्रजाये सखिभिरिंद्र इषिरेभिरर्थं ।
आभिर्हि माया उप दस्युमागान्मिहः प्र तस्रा अवपत्तमांसि ॥५॥
मंदमानः । ऋतात् । अधि । प्रऽजायै । सखिऽभिः । इंद्रः । इषिरेभिः । अर्थं ।
आ । आभिः । हि । मायाः । उप । दस्युं । आ । अगात् । मिहः । प्र । तस्राः । अवपत् । तमांसि ॥५॥

इंद्र ऋताद्यज्ञादधीषिरेभिर्गमनशीलैः सखिभिर्मरुद्भिः सह मंदमानो मादयन्प्रजायै यजमानायार्थं धनं प्रयच्छति । स चेंद्र आभिः प्रजाभिर्निमित्तभूताभिर्माया दस्युसंबंधिनीर्विनाशयितुं दस्युमुपागात् । स दस्युस्तस्रा अवर्षणेन ग्लापयित्रीर्मिहो वृष्टीः प्रावपत् । व्यनाशयदित्यर्थः । तमांसि ---॥ ॥३॥

सनामाना चिद्वसयो न्यस्मा अवाहन्निंद्र उषसो यथानः ।
ऋष्वैरगच्छः सखिभिर्निकामैः साकं प्रतिष्ठा हृद्या जघंथ ॥६॥
सऽनामाना । चित् । ध्वसयः । नि । अस्मै । अवं । अहन् । इंद्रः । उषसः । यथा । अनः ।
ऋष्वैः । अगच्छः । सखिऽभिः । निऽकामैः । साकं । प्रतिऽस्था । हृद्या । जघंथ ॥६॥

अयमिंद्रो वृत्रं हंतुं सनामाना चित् समाननामानौ नि ध्वसयः । न्यगमयत् । अथेंद्रस्तं वृत्रमवाहन् । अवहतवान् । यथोषसोऽनः शकटमवनाग्नितवान् तद्वत् । अथ प्रत्यक्षेणोच्यते । हे इंद्र त्वमृष्वैर्दीप्तैर्मरुद्भिर्वा निकामैर्निर्गंतरं वृत्रवधं कामयमानैः सखिभिर्मरुद्भिः साकं वृत्रं हंतुमगच्छः । आगत्य च प्रतिष्ठा प्रतिष्ठानानि शरीराणि हृद्या हृद्यानि रमणीयानि जघंथ । हतवानसि ॥ हंतेर्लङ्युपदेशेऽत्वत इतीट्प्रतिषेधः ॥

त्वं जघंथ नमुचिं मखस्युं दासं कृष्वान ऋषये विमायं ।
त्वं चकर्थ मनवे स्योनान्पथो देवत्रांजसेव यानान् ॥७॥

त्वं । जघंथ । नमुचिं । मखस्युं । दासं । कृष्वानः । ऋषये । विऽमायं ।
त्वं । चकर्थ । मनवे । स्योनान् । पथः । देवऽत्रा । अंजसाऽइव । यानान् ॥ ७ ॥

हे इंद्र त्वं नमुचिमेतत्संज्ञकमसुरं जघंथ । हतवानसि । कीदृशं । मखस्युमृषेर्यज्ञं विधातुमिच्छंतं यद्वा त्वदीयं धनमिच्छंतं । किं कुर्वन् । दासमुपक्षपयितारं नमुचिमसुरमृषये मनवे विमायं विगतमायं कृष्वानः कुर्वन् । किंच देवत्रा देवेषु मध्ये मनव ऋषये सामान्येन मनुष्याय वा पथो मार्गान्स्योनांश्चकर्थ । कृतवानसि । अथवा देवत्रा देवेषु मध्ये गंतव्यान्मार्गानिति वा संबंधः । स्योनांश्चकर्थेत्युक्तमेव विवृणोति । अंजसेव यानानिति । इवेत्येवकारार्थे । अंजसैवाकुटिलेनैव यानान्गंतॄन्मार्गानकरोः । अथवा मार्गेणाकुटिलेनैव गंतॄंश्चकर्थ । यथा लोके शीघ्रं गतो मार्गः कांत्या गतो मार्ग इति मार्गस्य गंतृत्वोपचारः तद्वदत्रापि यातृत्वं द्रष्टव्यं ॥

त्वमेतानि पप्रिषे वि नामेशान इंद्र दधिषे गभस्तौ ।
अनु त्वा देवाः शवसा मदंत्युपरिबुध्नान्वनिनश्चकर्थ ॥ ८ ॥
त्वं । एतानि । पप्रिषे । वि । नाम । ईशानः । इंद्र । दधिषे । गभस्तौ ।
अनु । त्वा । देवाः । शवसा । मदंति । उपरिऽबुध्नान् । वनिनः । चकर्थ ॥ ८ ॥

हे इंद्र त्वमेतानि नाम नामानि नामकान्युदकानि वि पप्रिषे । विपूरयसि । हे इंद्र ईशानः सर्वस्येश्वरस्त्वं गभस्तौ हस्ते दधिषे धारयसि वज्रं धनं वा । किंच त्वा त्वां शवसा बलेनोपेतं देवाः सर्वेऽनु मदंति । अनुष्टुवंति । स त्वं वनिनः उदकवतो मेघान्रश्मीन्वोपरिबुध्नानुपरिमूलानधोमुखांश्चकर्थ । कृतवानसि ॥

चक्रं यदस्याप्स्वा निषत्तमुतो तदस्मै मध्विच्छद्यात् ।
पृथिव्यामतिषितं यदूधः पयो गोष्वदधा ओषधीषु ॥ ९ ॥
चक्रं । यत् । अस्य । अप्ऽसु । आ । निऽसत्तं । उतो इति । तत् । अस्मै । मधु । इत् ।
छद्यात् ।
पृथिव्यां । अतिऽसितं । यत् । ऊधः । पयः । गोषु । अदधाः । ओषधीषु ॥ ९ ॥

अश्वादियायेति यद्वदंत्योजसो जातमुत मन्य एनं ।
मन्योरियाय हर्म्येषु तस्थौ यतः प्रजज्ञ इंद्रो अस्य वेद ॥ १० ॥
अश्वात् । इयाय । इति । यत् । वदंति । ओजसः । जातं । उत । मन्ये । एनं ।
मन्योः । इयाय । हर्म्येषु । तस्थौ । यतः । प्रऽजज्ञे । इंद्रः । अस्य । वेद ॥ १० ॥

इंद्रसामर्थ्यं दृष्ट्वा केचिदेनमश्वादादित्यादियायोदितवानिति वदंति यद्यपि उत तथाप्यहमेनमोजसो बलाज्जातं मन्ये । जानामि । अस्य तेजस्वित्वं दृष्ट्वा सूर्यादुत्पन्न इति तेषां मतिः । अहं त्वोजःपदार्थाज्जात इति मन्ये यतोऽयं वृत्रादीन्हतवानिति । अथवायं मन्योः क्रोधादियाय । उदितवान् । अतो हर्म्येषु शत्रुसंबंधिषु युद्धेषु हर्म्येष्वेव वा तस्थौ । तिष्ठति । यतोऽयं प्रजज्ञ उत्पन्न इतींद्र एवास्य । स्वस्येत्यर्थः । सामर्थ्यं वेद । जानाति । न ह्यन्यो ज्ञातुमीष्टे ॥

वयः सुपर्णा उप सेदुरिंद्रं प्रियमेधा ऋषयो नाधमानाः ।
अप ध्वांतमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान् ॥ ११ ॥

वयः। सुऽपर्णाः। उप। सेदुः। इंद्रं। प्रियऽमेधाः। ऋषयः। नाधमानाः।
अप। ध्वांतं। ऊर्णुहि। पूर्धि। चक्षुः। मुमुग्धि। अस्मान्। निधयाऽइव। बद्धान्॥११॥

वयो गंतारः सुपर्णाः सुपतना आदित्यरश्मय इंद्रमुप सेदुः। उपसन्ना अभवन्। कीदृशाः। प्रियमेधाः प्रिययज्ञा ऋषयो द्रष्टारो नाधमानाः प्रश्नां याचमानाः। याचनप्रकार उच्यते। हे इंद्र ध्वांतमंधकारमपोर्णुहि। परिहर। पूर्धि पूरय च चक्षुर्नेत्रं। मुमुग्धि मोचय चास्मान् निधयेव बद्धान्। निधा पाशा भवति। पाशा पाशसमूहः। पाशसमूहेन बद्धान्यथा मुंचंति तद्वत्। अत्र वयो वेर्बऊवचनमित्यादि निरुक्तं द्रष्टव्यं। नि० ४. ३.॥ ॥४॥

वसूनामिति षड्चं षष्ठं सूक्तं। ऋष्यादयाः पूर्ववत्। वसूनां षष्ठित्यनुक्रांतं॥ गतो विनियोगः॥

वसूनां वा चर्कृषे इयक्षन्धिया वा यज्ञैर्वा रोदस्योः।
अवंतो वा ये रयिमंतः सातौ वनुं वा ये सुश्रुणुं सुश्रुतो धुः॥१॥
वसूनां। वा। चर्कृषे। इयक्षन्। धिया। वा। यज्ञैः। वा। रोदस्योः।
अवंतः। वा। ये। रयिऽमंतः। सातौ। वनुं। वा। ये। सुऽश्रुणुं। सुऽश्रुतः। धुरिति धुः॥१॥

इयक्षन् धनानि दातुमिच्छन्निंद्रो वसूनां धनानां लाभाय वा चर्कृषे। अपकृष्यते। धिया वा। धीः कर्म धार्यमाणत्वात्। युद्धादिकर्मणा वा निमित्तेनाकृष्यते। यज्ञैर्वा निमित्तभूतैः कृष्यते। कैरिति उच्यते। रोदस्योर्द्यावापृथिव्योः संबंधिभिर्देवैर्मनुष्यैश्चेत्यर्थः। सातौ संग्रामे जेतव्ये सति येऽवंतो वा गच्छंतो रयिमंतो भवंति तैरप्याकृष्यते। ये वनुं वा हिंसां वा सुश्रुणुं सुप्रसिद्धामत्यंतदुर्जयविषयां सुश्रुतः सुश्रवसः प्रसिद्धाः कुर्वंति तैरपींद्र आकृष्यत इति॥

हवं एषाममुरो नक्षत द्यां अवस्यता मनसा निंसत क्षां।
चक्षाणा यच्च सुविताय देवा द्यौर्न वारेभिः कृणवंत स्वैः॥२॥
हवं। एषां। असुरः। नक्षत। द्यां। अवस्यता। मनसा। निंसत। क्षां।
चक्षाणाः। यच्च। सुविताय। देवाः। द्यौः। न। वारेभिः। कृणवंत। स्वैः॥२॥

एषामनुष्ठातॄणामंगिरसां हव आह्वानशब्दोऽसुर इंद्रस्य प्रेरको द्यां दिवं नक्षत। व्याप्नोत्। तत्रत्या इंद्रसंबंधिनो देवाः अवस्यतान्नमिच्छता मनसा द्यां पृथिवीं निंसत। प्राप्नवंतः। यच्च यस्यां पृथिव्यां चक्षाणाः पणिभिरपहृता गाः पश्यंतो देवाः सुविताय सुष्ठु हिताय स्वात्मनोऽभ्युदयाय द्यौर्नादित्य इव वारेभिर्वरणीयैः स्वैस्तेजोभिः कृणवंत प्रकाशमकुर्वन्। गवां प्रदानायांधकारमपनेतुमिति शेषः। अथवा। एषां यज्ञिनामपहृतानां गवां हवोऽसुर इंद्रस्य प्रेरयिता सन्नक्षत। इंद्रप्रेरिता अंगिरसः अवस्यतान्नं कीर्तिं वेच्छता मनसा द्यां भूमिं निंसत। अनुष्ठातॄणां गाः प्रदर्शयितुमित्यर्थः। इतरत्समानं॥

इयमेषाममृतानां गीः सर्वताता ये कृपणंत रत्नं।
धियं च यज्ञं च साधंतस्ते नो धांतु वसव्यमसामि॥३॥
इयं। एषां। अमृतानां। गीः। सर्वऽताता। ये। कृपणंत। रत्नं।
धियं। च। यज्ञं। च। साधंतः। ते। नः। धांतु। वसव्यं। असामि॥३॥

इयमेषाममृतानां यष्टव्यानां देवानां गीः स्तुतिः क्रियत इति शेषः। ये देवाः सर्वताता सर्वतातौ यज्ञे कृपणंत प्रयच्छंति याच्यंते वा रत्नं रमणीयं धनं। धियं चास्मदीयां स्तुतिं च यज्ञं च साधंतः साधयंतस्ते नोऽस्मभ्यं वसव्यं वसुसमूहमसाम्यनल्पमसाधारणं वा धांतु। प्रयच्छंतु ॥

आ तत्त इंद्रायवः पनंताभि य ऊर्वं गोमंतं तितृत्सान्।
सकृत्स्वं१ ये पुरुपुचां महीं सहस्रधारां बृहतीं दुदुक्षन् ॥४॥
आ। तत्। ते। इंद्र। आयवः। पनंत। अभि। ये। ऊर्वं। गोऽमंतं। तितृत्सान्।
सकृत्ऽस्वं। ये। पुरुऽपुचां। महीं। सहस्रऽधारां। बृहतीं। दुदुक्षन् ॥४॥

हे इंद्र ते तवायवो मनुष्या अंगिरसस्तत्तदा पनंत। आ सर्वतः पनंत। स्तूयंते। येऽंगिरसो गोमंतमूर्वं संघं पणिभिरपहृतं प्राप्तं तितृत्सान् हिंसितुमैच्छन्॥ तृदेर्हिंसार्थस्य सनंतस्य लेट्याडागमः। यद्योगादनिघातः। अभ्यस्तस्वरः॥ ये चांगिरसः सकृत्स्वं। या सकृत्सूते सा सकृत्सूः। तां सकृत्प्रजातां पुरुपुचां बहूषधिवनस्पतिरूपपुचां सहस्रधारां बहुलकामानामुत्पादयित्रीं बृहतीं विस्तृतां महीं भूमिं। यद्वा। पुरुपुचां बहूषधिवनस्पतिरूपपुचां सहस्रधारां बहुकामवर्षित्रीं महीं महतीं पूज्यां वा बृहतीं परिमाणरहितां दिवं। दुदुक्षन् दुदुक्षुः। ते पनंतेति संबंधः। सकृच्च दीरजायतेत्यादुक्तं। ऋ० ६. ४८. २२.॥

शचीव इंद्रमवसे कृणुध्वमनानतं दमयंतं पृतन्यून्।
ऋभुक्षणं मघवानं सुवृक्तिं भर्ता यो वज्रं नर्यं पुरुक्षुः ॥५॥
शचीऽवः। इंद्रं। अवसे। कृणुध्वं। अनानतं। दमयंतं। पृतन्यून्।
ऋभुक्षणं। मघऽवानं। सुऽवृक्तिं। भर्ता। यः। वज्रं। नर्यं। पुरुऽक्षुः ॥५॥

हे शचीवः कर्मवंतो यजमानाः॥ व्यत्ययेनैकवचनं॥ इंद्रमवसे रक्षणाय कृणुध्वं। कुरुध्वं। कीदृशमिंद्रं। अनानतं कदाचिदपि परेषामनवनतं पृतन्यून्पृतना इच्छतः शत्रून्दमयंतं वशं प्रापयंतं ऋभुक्षणं महांतं मघवानं धनवंतं सुवृक्तिं सुष्टुतिं। यः पुरुशब्दबहुशब्द इंद्रो नर्यं नरेभ्यो हितं। असुरविघातित्वात्। तादृशं वज्रं भर्ता बिभर्ति तमिंद्रमवसे कृणुध्वमिति॥

निष्केवल्ये यद्वावानेत्येषा धाय्या। सूचितं च। यद्वावानेति धाय्या पिबा सुतस्य रसिन इति सामप्रगाथः। आ० ५. १५.। इति॥ महाव्रतेऽप्येषा। तथैव पंचमारण्यके सूचितं च। यद्वावानेति धाय्या सूददोहाः। ऐ० आ० ५. २. २.। इति॥

यद्वावान पुरुतमं पुराषाळा वृचहेंद्रो नामान्यप्राः।
अचेति प्रासहस्पतिस्तुविष्मान्यदीमुश्मसि कर्तवे करत्तत् ॥६॥
यत्। ववानं। पुरुऽतमं। पुराषाट्। आ। वृचऽहा। इंद्रः। नामानि। अप्राः।
अचेति। प्रऽसहः। पतिः। तुविष्मान्। यत्। ईं। उश्मसि। कर्तवे। करत्। तत्॥६॥

यद्यदा पुरुतममत्यंतं प्रवृद्धतमं वृत्रं ववान हंति पुराषाट् शत्रुपुराणामभिभवितेंद्रः तदानीमानंतरमेव वृचहेंद्रो नामान्युदकान्यप्राः। पूरयति॥ व्यत्ययेन मध्यमः॥ सोऽयमिंद्रः प्रासहः शत्रूणां प्रकर्षेणाभिभविता पतिः सर्वस्य स्वामी तुविष्मान्। तुवीति बहुनाम तत्सामर्थ्याज्ञनं परिगृह्यते। बहुधन इत्यर्थः। ईदृशः सन्नचेति। सर्वैः प्रज्ञातः। स महानिंद्रो यदीं यदेतत्कर्मोश्मसि वयं कामयामहे तत्करत्। करोत्येव। इदं

भवत्विदं भवत्विति यत्कामयामहे तत्तदानीमेव करोत्येव नोदास्य इत्यर्थः । सैतदेव प्रत्यपद्यत यद्वावान पुरुतमं पुराणाऽस्तित्वादिकं ब्राह्मणमत्र द्रष्टव्यं । ऐ० ब्रा० ३. २२. ॥ ॥ ५ ॥

प्र सु व इति नवर्चं सप्तमं सूक्तं । प्रियमेधपुत्रस्य सिंधुक्षित आर्षं आगतं नदीदेवताकं । तथा चानुक्रांतं । प्र सु नव सिंधुक्षित्प्रियमेधो नदीस्तुतिर्जागतं त्रिति ॥ गतो विनियोगः ॥

प्र सु वः आपो महिमानमुत्तमं कारुर्वोचाति सदने विवस्वतः ।
प्र सप्तसप्त चेधा हि चक्रमुः प्र सृत्वरीणामति सिंधुरोजसा ॥ १ ॥
प्र । सु । वः । आपः । महिमानं । उत्ऽतमं । कारुः । वोचाति । सदने । विवस्वतः ।
प्र । सप्तऽसप्त । चेधा । हि । चक्रमुः । प्र । सृत्वरीणां । अति । सिंधुः । ओजसा ॥ १ ॥

हे आपः वो युष्माकं महिमानं महत्त्वं स्तोत्रमुत्तममुत्कृष्टतमं कारुः स्तोता सिंधुक्षिद्दं विवस्वतः परिचरणवतो यजमानस्य सदने यज्ञगृहे सु सुष्ठु प्र वोचाति । प्रब्रवीमि । ता नद्यः सप्तसप्त भूत्वा चेधा पृथिव्यामंतरिक्षे दिवि चेति चेधा चिःप्रकारं चक्रमुः । प्रावहन् । सृत्वरीणामासां मध्ये सिंधुरेतन्नामिका नदीओजसा स्वबलेनाति सर्वा अपि नदीरतिक्रम्य प्रवहतीति शेषः ॥

प्र तेऽरदद्वरुणो यातवे पथः सिंधो यद्वाजाँ अभ्यद्रवस्त्वं ।
भूम्या अधि प्रवता यासि सानुना यदेषामग्रं जगतामिरज्यसि ॥ २ ॥
प्र । ते । अरदत् । वरुणः । यातवे । पथः । सिंधो इति । यत् । वाजान् । अभि । अद्रवः । त्वं ।
भूम्याः । अधि । प्रऽवता । यासि । सानुना । यत् । एषां । अग्रं । जगतां । इरज्यसि ॥ २ ॥

हे सिंधो देवि ते तव यातवे गमनाय वरुणो देवः पथो मार्गान्प्रारदत् । प्राचीनं व्यलिखत् । सा हि प्राक् प्रवहति । अथवा प्रकृष्टमितरनदीभ्योऽत्यंतं विसृतं व्यदारयत् । यद्यस्माद्धे सिंधो वाजानन्नान्यभिलक्ष्य त्वमभ्यद्रवः अभ्यगच्छः । किंच त्वं भूम्या अध्युपरि सानुना समुच्छ्रितेन प्रवता मार्गेण यासि । गच्छसि । सिंधुः खलु पर्वतान्विभिद्य गता । यद्येन समुच्छ्रितेन मार्गेण गच्छंती त्वमेषां सर्वेषां जगतां जंगमानां प्राणिनामग्रं प्रत्यक्षमिरज्यसि ईशिषे ॥

दिवि स्वनो यतते भूम्योपर्यनंतं शुष्ममुदियर्ति भानुना ।
अभ्रादिव प्र स्तनयंति वृष्टयः सिंधुर्यदेति वृषभो न रोरुवत् ॥ ३ ॥
दिवि । स्वनः । यतते । भूम्याः । उपरि । अनंतं । शुष्मं । उत् । इयर्ति । भानुना ।
अभ्रात्ऽइव । प्र । स्तनयंति । वृष्टयः । सिंधुः । यत् । एति । वृषभः । न । रोरुवत् ॥ ३ ॥

भूम्योपरि भूमेरुपरि प्रवर्तमानः स्वनो दिवि यतते । गच्छति । दिवं प्राप्नोति । सेयं सिंधुरनंतमपर्यंतं शुष्मं वेगं भानुना दीप्तेनोर्मिणोदियर्ति । उन्नमयति । अभ्रादिवांतरिक्षाद्यथा वृष्टयः प्र स्तनयंति तद्वदस्याः शब्दाः प्रादुर्भवंति । यद्यदा सिंधुरियं रोरुवद्बृशं शब्दयन् वृषभो न वृषभ इवेति गच्छति तदैवं भवति ॥

अभि त्वा सिंधो शिशुमिन्न मातरो वाश्रा अर्षंति पयसेव धेनवः ।
राजेव युध्वा नयसि त्वमित्सिचौ यदासामग्रं प्रवतामिनक्षसि ॥ ४ ॥

अभि॑ । त्वा॒ । सिंधो॒ इति॑ । शिशु॑म् । इत् । न । मात॑रः । वाश्राः॑ । अ॒र्ष॒ति॒ । पय॑सा । इ॒व । धेन॑वः॑ ।
राजा॑ । इ॒व । युध्वा॑ । न॒यसि॑ । त्वं । इत् । सिचौ॑ । यत् । आसा॑म् । अ॒ग्मं । प्र । उ॒वता॑म् । इन॑क्षसि ॥४॥

हे सिंधो त्वा त्वां शिशुमिव मातरः पुत्रमिव वाश्राः शब्दयंत्य इतरा नद्योऽभ्यर्षति । अभिगच्छंति । पयसेव धेनवः पयसा युक्ता नवप्रसूतिका गाव इव । किंच युध्वा युद्धशीलो राजेव त्वमित्त्वमेव सिचौ सिच्यमानौ तटौ नयस्युदकपूरं यद्यदासां प्रवतां त्वया सह गच्छंतीनामयमय इनक्षसि व्याप्नोषि सर्वासां पुरतो गच्छसि ॥

इ॒मं मे॑ गंगे यमुने सरस्वति॒ शुतु॑द्रि॒ स्तोमं॑ सचता॒ परु॑ष्ण्या ।
अ॒सि॒क्न्या म॑रुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया ॥५॥
इ॒मं । मे॒ । गं॒गे॒ । य॒मु॒ने॒ । स॒र॒स्व॒ति॒ । शुतु॑द्रि । स्तोम॑म् । स॒च॒त॒ । परु॑ष्णि । आ ।
अ॒सि॒क्न्या । मरुत्ऽवृधे । वि॒त॒स्त॒या । आर्जीकीये । शृणुहि । आ । सुऽसोमया ॥५॥

अत्र प्रधानभूताः सप्त नद्यस्तद्वयवभूता नद्यस्तिस्रः स्तूयंते । हे गंगे हे यमुने हे सरस्वति हे शुतुद्रि हे परुष्णि । हे असिक्न्यावयवभूतया सहिते मरुद्वृधे हे वितस्तया सुषोमया च सहित आर्जीकीये त्वं च एवं सप्त नद्यः यूयं मे स्तोमं स्तोत्रमस्मदीयमा सचत । आसेवध्वं । शृणुहि । शृणुत । आर्जीकीयाया वितस्तया सुषोमया च साहित्यं निरुक्त उक्तं । वितस्तया चार्जीकीय आ शृणुहि सुषोमया चेति । अत्र गंगा गमनादित्यादि निरुक्तं द्रष्टव्यं । ९. २६. ॥ ॥६॥

तृ॒ष्टाम॑या प्रथ॒मं या॒तवे॒ सज्जूः॑ सु॒सर्त्वा॑ र॒सया॒ श्वेत्या॒ त्या ।
त्वं सिं॑धो कु॒भया॑ गोम॒तीं क्रुमुं॑ मेहत्न्वा स॒रथं॑ याभि॒रीय॑से ॥६॥
तृ॒ष्टऽअ॑मया । प्र॒थ॒मं । या॒तवे॑ । स॒ऽअ॒जूः॑ । सु॒ऽसर्त्वा॑ । र॒सया॑ । श्वेत्या॑ । त्या ।
त्वं । सिं॒धो॒ इति॑ । कु॒भया॑ । गो॒ऽम॒तीं । क्रुमुं॑ । मे॒ह॒त्न्वा॒ । स॒ऽरथं॑ । याभिः॑ । ईय॑से ॥६॥

हे सिंधो त्वं क्रुमुं क्रमणशीलां गोमतीं नदीं यातवे प्रतियातुं पर्वताद्वरूढा प्रथमं तृष्टामया नद्या सजूः संगतासि । पश्चात्सुसर्त्वा रसया श्वेत्या त्या कुभया मेहत्न्वा च सह सजूर्भव याभिस्त्वं सरथं समानं रथमारुह्येयसे । गच्छसि ॥

ऋ॒जी॒त्येनी॒ रुश॑ती महि॒त्वा परि॒ जया॑ꣳसि भरते॒ रजा॑ꣳसि ।
अद॑ब्धा॒ सिंधु॑रपसा॒मप॑स्तमा॒श्वा न चि॒त्रा वपु॑षीव दर्श॒ता ॥७॥
ऋ॒जी॒ती॒ । एनी॑ । रुश॑ती । म॒हि॒ऽत्वा । परि॑ । जया॑ꣳसि । भ॒र॒ते॒ । रजा॑ꣳसि ।
अद॑ब्धा । सिंधुः॑ । अ॒प॒सा॒म् । अ॒पः॒ऽत॒मा । अ॒श्वा । न । चि॒त्रा । वपु॑षीऽइव । दर्श॒ता ॥७॥

ऋजीत्यृजुगामिन्येनी श्वेतवर्णा रुशती दीप्यमाना सिंधुर्जयांसि वेगवंति रजांस्युदकानि परि भरते । प्रभरति । तादृशदब्धाहिंसिता सिंधुरपसां कर्मवतीनां मध्येऽपस्तमा वेगाख्यकर्मवती भवति । अश्वा न वडवेव चित्रा चायनीया वपुषी वपुष्मती योषिदिव दर्शता दर्शनीया भवति ॥

सु॒ऽअश्वा॒ सिंधुः॑ सु॒रथा॑ सु॒वासा॑ हिर॒ण्ययी॒ सुकृ॑ता वा॒जिनी॑वती ।
ऊर्णा॑वती युव॒तिः सी॒लमा॑वत्यु॒ताधि॑ वस्ते सु॒भगा॑ मधु॒वृध॑म् ॥८॥

सुऽअश्वा। सिंधुः। सुऽरथा। सुऽवासाः। हिरण्ययी। सुऽकृता। वाजिनीऽवती।
ऊर्णाऽवती। युवतिः। सीलमाऽवती। उत। अधि। वस्ते। सुऽभगा। मधुऽवृधं॥८॥

सेयं सिंधुः स्वश्वा शोभनाश्वोपेता सुरथा शोभनरथा सुवासाः शोभनवस्त्रोपेता हिरण्ययी हिरण्मयाभरणा सुकृता वाजिनीवत्यन्नवत्यूर्णावती। तस्याः समीपदेशे हि संवूर्णा यासां रोमभिः कंबलाः क्रियंते। युवतिर्नित्यतरुणी सर्वदाहीनोदका सीलमावती। सीराणि यद्यौषध्या रज्जुभूतया बध्यंते सा सीलमेति निगद्यते ऋषीवलेः। तादृगोषधयुपेता। उतापि च सुभगा सिंधुर्मधुवृधं मधुवर्धकं निर्गुंड्यादिकमधि वस्ते। आच्छादयति। तस्यास्तीरे निर्गुंड्यादीनि बहूनि संति॥

सुखं रथं युयुजे सिंधुरश्विनं तेन वाजं सनिषदस्मिन्नाजौ।
महान्ह्यस्य महिमा पनस्यतेऽदब्धस्य स्वयशसो विरप्शिनः॥९॥
सुऽखं। रथं। युयुजे। सिंधुः। अश्विनं। तेन। वाजं। सनिषत्। अस्मिन्। आजौ।
महान्। हि। अस्य। महिमा। पनस्यते। अदब्धस्य। स्वऽयशसः। विऽरप्शिनः॥९॥

सिंधुर्देवता सुखं सुखकरं शोभनद्वारं वाश्विनमश्ववंतं रथं युयुजे। युनक्ति। तेन रथेन वाजमन्नं सनिषत्। प्रयच्छतु। अस्मिन्नाजौ संग्रामे यद्यो वास्य सिंधुरथस्य महिमा महान्हि पनस्यते। स्तूयते। कीदृशस्यास्य। अदब्धस्याहिंसितस्य स्वयशसः स्वायत्तकीर्तेर्विरप्शिनः। महन्नामैतत्। महतः॥ ॥७॥

आ व इत्यष्टर्चमष्टमं सूक्तं। इरावतः पुत्रस्य सर्पजातेर्जरत्कर्णनाम्न आर्षं। आगतं। सोमाभिषवार्थं ये ग्रावाणस्तद्देवत्यं। तथा चानुक्रांतं। आ वोऽष्टौ सर्प ऐरावतो जरत्कर्णो ग्राव्णोऽस्तौदिति॥ ग्रावस्तोष एतत्सूक्तं। सूचितं च। आ व ऋंजसे प्र वो ग्रावाण इति सूक्तयोरंतरोपरिष्टात्पुरस्ताद्वा। आ० ५.१२.। इति॥

आ वं ऋंजस ऊर्जो व्युष्टिष्विंद्रं मरुतो रोदसी अनक्तन।
उभे यथा नो अहनी सचाभुवा सदःसदो वरिवस्यात उद्भिदा॥१॥
आ। वः। ऋंजसे। ऊर्जो। विऽउष्टिषु। इंद्रं। मरुतः। रोदसी इति। अनक्तन।
उभे इति। यथा। नः। अहनी इति। सचाऽभुवा। सदःऽसदः। वरिवस्यातः।
उत्ऽभिदा॥१॥

हे ग्रावाणः वो युष्मानूर्जो सारभूतानामन्नवतीनां वोषसां व्युष्टिषु विभातेषु सत्सु ऋंजसे। आप्रसाधयामि। यूयं सोमेनेंद्रं मरुतो रोदसी द्यावापृथिव्यौ चानक्तन। व्यंजयत। नोऽस्मानुभे सचाभुवा सहोत्पन्ने अहनी द्यावापृथिव्यौ सदःसदः सर्वेषु यागगृहेषु वरिवस्यातः। परिचरतः। उद्भिदोद्भेदकेन धनेन पूरयतामिति॥

तदु श्रेष्ठं सवनं सुनोतनात्यो न हस्तयतो अद्रिः सोतरि।
विदद्यूर्यो अभिभूति पौंस्यं महो राये चित्तरते यदर्वतः॥२॥
तत्। ऊं इति। श्रेष्ठं। सवनं। सुनोतन। अत्यः। न। हस्तऽयतः। अद्रिः। सोतरि।
विदत्। हि। अर्यः। अभिऽभूति। पौंस्यं। महः। राये। चित्। तरते। यत्। अर्वतः॥२॥

हे ग्रावाणः यूयं तदु तमेव श्रेष्ठं प्रशस्यं सवनं सोमं सुनोतन। अभिषुणुत। अथैकवदाह। अद्रिरभिषवग्रावा हस्तयतो हस्ताभ्यां गृहीतः सन्नत्यो न धृतोऽश्व इव भवति सोतर्यभिषवकर्तर्यध्वर्यौ। स यथा

हस्ताभ्यां दृढगृहीतोऽपि बलवान् तद्वत्। अर्यो याज्ञानामभिषवाय प्रेरको यजमानोऽभिभूति शत्रूणामभिभावुकं पौंस्यं बलं विदद्वि। लभते खलु देवेभ्यः। यद्वा। अभिषवायाध्वर्यादेः प्रेरितो ग्रावाभिभूति पौंस्यं विदद्यजमानार्थं। किंच महे महते राये चिद्धनायापि यदो ग्रावार्वतोऽश्वांस्तरुते तनुते प्रयच्छति ॥

तदिद्धास्य सवनं विवेरपो यथा पुरा मनवे गातुमश्रेत्।
गोअर्णसि त्वाष्ट्रे अश्वनिर्णिजि प्रेमध्वरेष्वध्वराँ अशिश्रयुः ॥३॥

तत्। इत्। हि। अस्य। सवनं। विवेः। अपः। यथा। पुरा। मनवे। गातुं। अश्रेत्।
गोऽअर्णसि। त्वाष्ट्रे। अश्वऽनिर्णिजि। प्र। ईं। अध्वरेषु। अध्वरान्। अशिश्रयुः ॥३॥

इदिति पूरणः। अस्य याज्ञास्तत्सवनमभिषवोपेतमस्मदीयं सोमयागाख्यमपः कर्म विवेः। व्याप्नोतु ॥ विपूर्वस्य वेतेर्लङ्यदादित्वाच्छपो लुक्। वेतेर्विपूर्वस्य वा छांदसे स्नौ वापररूपमिति संदेहादनवग्रहः। समासस्वरः ॥ यथा पुरा मनवे राज्ञे गातुं गमनमश्रेत् आजगाम तद्वद्व्याप्नोतु। किंच गोअर्णसि गोरूपेऽपहृतैर्गोभिः परिवृते तथाश्वनिर्णिजि। निर्णिगिति रूपनाम। अश्वरूपे। अपहृतैरश्वैर्वृत इत्यर्थः। ईदृशे त्वाष्ट्रे त्वष्टुः पुत्रे हंतव्ये सतीति शेषः। ईमेतानध्वरानसुरैरहिंस्यानध्वरसाधकान्वोपलानध्वरेष्वशिश्रयुः। आश्रयंति पूर्वे यजमानाः ॥

अप हत रक्षसो भंगुरावतः स्कभायत निर्ऋतिं सेधतामतिं।
आ नो रयिं सर्ववीरं सुनोतन देवाव्यं भरत श्लोकमद्रयः ॥४॥

अप। हत। रक्षसः। भंगुरऽवतः। स्कभायत। निःऽऋतिं। सेधत। अमतिं।
आ। नः। रयिं। सर्वऽवीरं। सुनोतन। देवऽअव्यं। भरत। श्लोकं। अद्रयः ॥४॥

हे अद्रयः यूयमप हत विनाशयत रक्षसो राक्षसान्। कीदृशान्। भंगुरावतो भंजकेन कर्मणा तद्वतः। तथा स्कभायत दूरे परिहरत निर्ऋतिं पापदेवतां। यथामुं यज्ञं नागच्छति तथा। किंच सेधत निषेधतामतिं हिंसामतिं रक्षःप्रभृतिं। किंच नोऽस्माकं सर्ववीरं बहुपुत्राद्युपेतं रयिं धनमा सुनोतन। अभिषवेण पुत्रधनादीनां लाभादेवमुक्तं। किंच देवाव्यं देवप्रीणनं श्लोकं भरत। संपादयत ॥

दिवश्चिदा वोऽमवत्तरेभ्यो विभ्वना चिदाश्वपस्तरेभ्यः।
वायोश्चिदा सोमरभस्तरेभ्योऽग्नेश्चिदर्च पितुकृत्तरेभ्यः ॥५॥

दिवः। चित्। आ। वः। अमवत्ऽतरेभ्यः। विऽभ्वना। चित्। आश्वपःऽतरेभ्यः।
वायोः। चित्। आ। सोमरभःऽतरेभ्यः। अग्नेः। चित्। अर्च। पितुकृत्ऽतरेभ्यः ॥५॥

दिवश्चिदादित्यादप्यमवत्तरेभ्योऽत्यंतं बलवद्भ्यो वो युष्मभ्यमार्च। अस्तौदध्वर्युः। यद्वा। हे अध्वर्यादयः वो यूयमुच्यमानलक्षणेभ्यो ग्रावभ्य आ सर्वतोऽर्च। अर्चतेत्येवं प्रतिवाक्यं योज्यं। विभ्वना चित्। विभ्वा सुधन्वनः पुत्रः। तेनाप्याश्वपस्तरेभ्यः। शीघ्रकर्मभ्य इत्यर्थः। विभ्वादीनां त्रयाणां चमसादिशीघ्रकर्म प्रसिद्धं। वायोश्चिद्वायोरपि सोमरभस्तरेभ्यः सोमाभिषवार्थेनात्यंतेन वेगेन युक्तेभ्यः। वायोरपि ग्रावाणो वेगवंतो भवंति सोमाभिषवार्थं। अग्नेश्चिदग्नेरपि पितुकृत्तरेभ्योऽत्यंतमन्नसाधकेभ्यः। ईदृशेभ्यो ग्रावभ्यः प्रीणनाय यूयमर्चतेति ॥ ॥८॥

भुरंतु नो यशसः सोवंधसो ग्रावाणो वाचा दिविता दिवित्मता।
नरो यत्र दुहते काम्यं मधूधोषयंतो अभितो मिथस्तुरः ॥६॥

भुरंतु । नः । यशसः । सोतु । अंधसः । ग्रावाणः । वाचा । दिविता । दिवित्मता ।
नरः । यत्र । दुहते । काम्यं । मधु । आऽघोषयंतः । अभितः । मिथःऽतुरः ॥ ६ ॥

यशसो यशस्विनो ग्रावाणो नोऽस्मभ्यं सोतु सुतमंधसः सोमस्य रसं भुरंतु । भरंतु । संपादयंतु ॥ उकारश्छांदसः ॥ किंच दिवित्मता दीप्तिमत्या ॥ लिंगव्यत्ययः ॥ वाचा स्तुतिवाचा दिविता दिवितायां दीप्तिमत्तायां वाचामुकुर्वंतु । सोमयागे स्थापयंतित्यर्थः । क्रैषा दीप्तिमत्तेति उच्यते । नरो नेतार ऋत्विजो यत्र यागे काम्यं कमनीयं मधु सोमरसं दुहते । किं कुर्वंतः । आघोषयंतः सर्वतोऽभिषवशब्दं स्तोत्रशस्त्रादिरूपं वा शब्दं कुर्वंतः । अभितः सर्वतो मिथस्तुरस्त्वरमाणाः । सा दीप्तिमत्तेति ॥

सुन्वंति सोमं रथिरासो अद्रयो निरस्य रसं गविषो दुहंति ते ।
दुहंत्यूधरुपसेचनाय कं नरो हव्या न मर्जयंत आसभिः ॥ ७ ॥
सुन्वंति । सोमं । रथिरासः । अद्रयः । निः । अस्य । रसं । गोऽइषः । दुहंति । ते ।
दुहंति । ऊधः । उपऽसेचनाय । कं । नरः । हव्या । न । मर्जयंते । आसऽभिः ॥ ७ ॥

रथिरासो रथवंतो रंहणवंतोऽद्रयो ग्रावाणः सोमं सुन्वंति । ग्रावाणोऽस्य सोमस्य रसं निर्दुहंति । निःशेषेण दुहंति गविषः स्तुतिवाचमिच्छंतः संतः । दुहंत्यूधा रसं सोमसंबंधिनं । किमर्थं । उपसेचनायाग्नेः । कमिति पादपूरणः । नरो नेतारोऽभिषवकर्तार ऋत्विजो हव्या हवींषि चाग्न्युपसेचनानंतरमासभिः स्वास्यैर्मर्जयंते । शोधयंति । शेषभक्षणेन शुद्धीकुर्वंति । यद्वा । अग्नौ होतुर्दंशापवित्रात्पुरासभिरास्योपलक्षितैः स्तोत्रैर्मर्जयंते ॥

एते नरः स्वपसो अभूतन य इंद्राय सुनुथ सोममद्रयः ।
वामंवामं वो दिव्याय धाम्ने वसुंवसु वः पार्थिवाय सुन्वते ॥ ८ ॥
एते । नरः । सुऽअपसः । अभूतन । ये । इंद्राय । सुनुथ । सोमं । अद्रयः ।
वामंऽवामं । वः । दिव्याय । धाम्ने । वसुंऽवसु । वः । पार्थिवाय । सुन्वते ॥ ८ ॥

हे नरो नेतारो हे अद्रयः एते यूयं स्वपसोऽभूतन । शोभनाभिषवकर्माणो भवत । ये यूयमिंद्राय सोमं सुनुथ वो यूयं वामंवामं यद्यद्वननीयं धनमस्ति तत्तद्दिव्याय धाम्ने तेजसे कुरुत । तथा वसुवसु यद्यद्वासयोग्यं धनमस्ति तद्वो यूयं पार्थिवाय सुन्वते यजमानाय कुरुत ॥ ॥ ९ ॥

अभ्रप्रुष इत्यष्टर्चं नवमं सूक्तं भृगुगोत्रस्य स्यूमरश्मेरार्षं मरुद्देवताकं । पंचमी जगती शिष्टाः सप्त त्रिष्टुभः । तथा चानुक्रांतं । अभ्रप्रुषः स्यूमरश्मिर्भार्गवो मारुतं तु पंचमी जगतीति ॥ गतो विनियोगः ॥

अभ्रप्रुषो न वाचा प्रुषा वसु हविष्मंतो न यज्ञा विजानुषः ।
सुमारुतं न ब्रह्माणमर्हसे गणमस्तोषेषां न शोभसे ॥ १ ॥
अभ्रऽप्रुषः । न । वाचा । प्रुष । वसु । हविष्मंतः । न । यज्ञाः । विऽजानुषः ।
सुऽमारुतं । न । ब्रह्माणं । अर्हसे । गणं । अस्तोषि । एषां । न । शोभसे ॥ १ ॥

अभ्रप्रुषो न मेघान्निर्गच्छंत उदकबिंदव इव वाचा स्तुत्या प्रीता मरुतो वसु धनं प्रुष । सिंचंति ॥ व्यत्ययेन बहुवचनं ॥ किंच हविष्मंतो न यज्ञा हविर्भिर्युक्ता यागा इव विजानुषो जगतो विजनयितारो भवंति । अथ समुदायेनाह । तेषामेषां सुमारुतं शोभमानानां मरुतां ब्रह्माणं महांतं गणमर्हसे पूजार्थं नास्तोषि ।

नास्तौषं । न स्तुतवानस्मीतः पूर्वं । तथा शोभसे शोभार्थमपि मारुतं गणं नास्तौषि । अत इदानीं स्तुतेन स्तोत्रेण स्तौमीत्यर्थः ॥

श्रिये मर्यासो अंजीरकृण्वत सुमारुतं न पूर्वीरति क्षपः ।
दिवस्पुचास एता न येतिर आदित्यासस्ते अक्रा न वावृधुः ॥२॥
श्रिये । मर्यासः । अंजीन् । अकृण्वत । सुऽमारुतं । न । पूर्वीः । अति । क्षपः ।
दिवः । पुचासः । एताः । न । येतिरे । आदित्यासः । ते । अक्राः । न । ववृधुः ॥२॥

श्रिये शोभार्थं मर्यासो मारका मनुष्यरूपा वा मरुतः । पूर्वं मनुष्याः संतः पश्चात्सुकृतविशेषेण अमरा आसन् । तेऽंजीनंअकान्याभरणान्यकृण्वत । कुर्वंति । किमर्थं । श्रिये स्वशरीरशोभनार्थं । सुमारुतं शोभमानानां मरुतां गणं पूर्वीर्बह्व्यः क्षपः क्षपयित्र्यः सेना नाति । न पराभावयंतीति शेषः । किंच दिवो द्युदेवताया: पुचासः पुचा एता गंतारो न येतिरे । निर्गच्छंति । ते आदित्यासोऽदितेः पुचा अक्रा आक्रमणशीला मरुतो न वावृधुः । न वर्धंते । यतोऽस्माभिर्न स्तुता अत इति भावः ॥

प्र ये दिवः पृथिव्या न बर्हणा त्मना रिरिच्रे अभ्राञ्च सूर्यः ।
पाजस्वंतो न वीराः पनस्यवो रिशादसो न मर्या अभिद्यवः ॥३॥
प्र । ये । दिवः । पृथिव्याः । न । बर्हणा । त्मना । रिरिच्रे । अभ्रात् । न । सूर्यः ।
पाजस्वंतः । न । वीराः । पनस्यवः । रिशादसः । न । मर्याः । अभिऽद्यवः ॥३॥

ये मरुतो दिवः पृथिव्या न पृथिव्याश्च । नेति चार्थे । बर्हणा महत्त्वेन त्मनात्मनैव रिरिच्रे अतिरिक्ता अभवन्स्वशरीरेण अभ्राद्वाभ्रादिव सूर्यः । किंच पाजस्वंतो न वीरा बलवंतो वीरा इव पनस्यवः स्तुतिकामा भवंति । किंच रिशादसो न मर्या रिशतामसितारो मनुष्या इवाभिद्यवोऽभिगतदीप्तयो भवंति ॥

युष्माकँ बुध्ने अपां न यामनि विथुर्यति न मही अथुर्यति ।
विश्वप्सुर्यज्ञो अवीगयं सु वः प्रयस्वंतो न सचाच आ गत ॥४॥
युष्माकं । बुध्ने । अपां । न । यामनि । विथुर्यति । न । मही । अथुर्यति ।
विश्वऽप्सुः । यज्ञः । अवाक् । अयं । सु । वः । प्रयस्वंतः । न । सचाचः । आ । गत ॥४॥

हे मरुतः युष्माकं बुध्ने परस्परसंघातेऽपां न यामनि प्रवृत्तानामुदकानां गमन इव मही महती भूर्न विथुर्यति । न व्यथते । नापि अथुर्यति । न विशीर्णा भवति । शीघ्रगतयोऽपि यूयमेनां न पीडयध्वमित्यर्थः । विश्वप्सुर्विश्वरूपोऽयं यज्ञो यागसाधनं हविर्वो युष्माकमर्वागभिमुखं सु सुष्ठु गच्छति । प्रयस्वंतो नाम्नवंतः परिष्कर्तार इव सुखप्रदाः संतः सचाचः सहांचना आ गत । आगच्छत । संघाकारेणागच्छतेत्यर्थः । सप्तगणा वै मरुतः । तै० सं० २. २. ५. ७. । इति श्रुतेः ॥

यूयं धूर्षु प्रयुजो न रश्मिभिर्ज्योतिष्मंतो न भासा व्युष्टिषु ।
श्येनासो न स्वयशसो रिशादसः प्रवासो न प्रसितासः परिप्रुषः ॥५॥
यूयं । धूःऽसु । प्रऽयुजः । न । रश्मिऽभिः । ज्योतिष्मंतः । न । भासा । विऽउष्टिषु ।
श्येनासः । न । स्वऽयशसः । रिशादसः । प्रवासः । न । प्रऽसितासः । परिऽप्रुषः ॥५॥

हे मरुतः यूयं धूर्षु रथसंबंधिनीषु रश्मिभिर्योक्त्रैः प्रयुजः प्रयुक्ता बद्धा अश्वा इव परिप्रुषः परितो गंतारः स्थ। तथा ज्योतिष्मंतो न तेजोवंत आदित्यादय इव भासा युक्ता भवथ वृष्टिषूषःसूदितासु। किंच श्येनासो न श्येना इव स्वयशसः स्वायत्तयशसः ते यथा रिशादसो रिशतामसितारस्तद्वद्रिशादसः स्वायत्तयशसश्च। किंच प्रवासो न प्रवासिन इव पथिका इव प्रसितासः प्रसिद्धयानाः। उक्तरूपा मरुतः परिप्रुषः परितो गंतारो भवथ ॥ ॥ १० ॥

प्र यद्वहध्वे मरुतः पराकाद्यूयं महः संवरणस्य वस्वः।
विदानासो वसवो राध्यस्याराच्चिद्द्वेषः सनुतर्युयोत ॥ ६ ॥
प्र। यत्। वहध्वे। मरुतः। पराकात्। यूयं। महः। संऽवरणस्य। वस्वः।
विदानासः। वसवः। राध्यस्य। आरात्। चित्। द्वेषः। सनुतः। युयोत ॥ ६ ॥

हे मरुतः यूयं यदा परोक्षादत्यंतं दूरदेशाद्वहध्वे आगच्छथ तदानीं महो महत्संवरणस्य संवरणीयं राध्यस्य संराधनीयं वस्वो वसु धनं विदानासः प्रयच्छंतो हे वसवः यूयमारात्समीपाद्दूरादेव युयोत। पृथक्कुरुत। कानिति उच्यते। द्वेषो द्वेष्टॄन् सनुतरंतर्हितान्। निगूढानित्यर्थः। सनुतरित्यंतर्हितनाम ॥

य उदृचि यज्ञे अध्वरेष्ठा मरुद्भ्यो न मानुषो ददाशत्।
रेवत्स वयो दधते सुवीरं स देवानामपि गोपीथे अस्तु ॥ ७ ॥
यः। उत्ऽऋचि। यज्ञे। अध्वरेऽस्थाः। मरुत्ऽभ्यः। न। मानुषः। ददाशत्।
रेवत्। सः। वयः। दधते। सुऽवीरं। सः। देवानां। अपि। गोऽपीथे। अस्तु ॥ ७ ॥

अध्वरेष्ठा यागे सीदन्मानुषो यो यजमानो यज्ञ उदृचि सति। ऋक्शब्देन स्तोत्रमुपलक्ष्यते। यज्ञे समाप्तस्तुतिके सति संपूर्णे सति मरुद्भ्यो न मरुद्भ्य इवान्येभ्यो मध्वर्युभ्य ऋत्विगादिभ्यो ददाशत् दद्यात्। यद्वा। यज्ञ उदृच्युपक्रांत इत्यर्थः। तस्मिन्यज्ञे मरुद्भ्य इवान्यस्मा इंद्राय ददाशत् ददाति। स यजमानो रेवद्धनवत्सुवीरं शोभनपुत्रायुपेतं वयोऽन्नं दधते। धारयति ॥ व्यत्ययेनैकवचनं ॥ स देवानामिंद्रादीनामपि गोपीथे सोमपानेऽस्तु। भवतु ॥

ते हि यज्ञेषु यज्ञियास ऊमा आदित्येन नाम्ना शंभविष्ठाः।
ते नोऽवंतु रथतूर्मनीषां महश्च यामन्नध्वरे चकानाः ॥ ८ ॥
ते। हि। यज्ञेषु। यज्ञियासः। ऊमाः। आदित्येन। नाम्ना। शंऽभविष्ठाः।
ते। नः। अवंतु। रथऽतूः। मनीषां। महः। च। यामन्। अध्वरे। चकानाः ॥ ८ ॥

ते हि ते खलु यज्ञेषु यागेषु यज्ञियासो यज्ञार्हा यष्टव्या ऊमा अवितार आदित्येन नाम्नादित्यसंबंधिनोदकेन शंभविष्ठाः सुखस्य भावयितारः। यद्वा। आदित्याख्येन नाम्नादित्यनामकेन देवेन सह शंभविष्ठाः। ते मरुतो नोऽस्मानवंतु। रथतू रथतुरो रथस्य यज्ञगमनसाधनस्य त्वरयितारः संतो मनीषां स्तुतिमवंतु। रक्षंतु। कीदृशास्ते। अध्वरे यामन्यागगमने महो महत्त्वमिच्छकानाः कामयमानाः ॥ ॥ ११ ॥

विप्रास इत्यष्टर्चं दशमं सूक्तं। पंचम्याद्यास्तिस्रो द्वितीया चेति चतस्रो जगत्यः। शिष्टाश्चतस्रस्त्रिष्टुभः। पूर्ववदृषिदेवते। तथा चानुक्रांतं। विप्रासो द्वितीया पंचम्याद्याश्च तिस्रो जगत्य इति ॥ गतो विनियोगः ॥

विप्रासो न मन्मभिः स्वाध्यो देवाव्यो३ न यज्ञैः स्वप्नसः ।
राजानो न चित्राः सुसंदृशः क्षितीनां न मर्या अरेपसः ॥१॥
विप्रासः । न । मन्मऽभिः । सुऽआध्यः । देवऽअव्यः । न । यज्ञैः । सुऽअप्नसः ।
राजानः । न । चित्राः । सुऽसंदृशः । क्षितीनां । न । मर्याः । अरेपसः ॥१॥

विप्रासो न विप्रा ब्राह्मणा इव ते यथा मन्मभिः स्तुतिभिः स्वाध्यः शोभनाध्याना भवंति एवं मरुतोऽप्यस्मदीयैर्मन्मभिर्मननीयैः स्तोत्रैः स्वाध्यः सुमनसो भवंति । अथवा मन्मभिः स्तोत्रैर्युक्ता विप्रासो न मेधाविनः स्तोतार इव स्वाध्यो यज्ञे यजमाने वा सुध्याना इत्यर्थः । तथा यज्ञैर्यागैर्देवाव्यो न देवानां तर्पयितारो ये यजमाना इव स्वप्नसः । अप्न इति कर्मनाम । शोभनकर्माणः । ते यथा कर्मसु व्यापृता भवंति तद्वृष्टिप्रदानादिकर्मसु व्यापृता भवंति । राजानो न मूर्धाभिषिक्ताः क्षितिपतय इव चित्रास्तायनीयाः पूजनीयाः । यद्वा चित्राभरणाः । तथा सुसंदृशः सुष्ठु दर्शनीयाः । तथा क्षितीनां निवासानां स्वामिनो मर्या न मनुष्या इवारेपसोऽपापाः । यथा प्रतियहार्थमन्यत्रागत्वा स्वगृह एवानुतिष्ठंतो निर्दोषा भवंति तादृशा इत्यर्थः । ईदृशाः शोभंत इत्यर्थः ॥

अग्निर्न ये भ्राजसा रुक्मवक्षसो वातासो न स्वयुजः सद्यऊतयः ।
प्रज्ञातारो न ज्येष्ठाः सुनीतयः सुशर्माणो न सोमा ऋतं यते ॥२॥
अग्निः । न । ये । भ्राजसा । रुक्मऽवक्षसः । वातासः । न । स्वऽयुजः । सद्यःऽऊतयः ।
प्रऽज्ञातारः । न । ज्येष्ठाः । सुऽनीतयः । सुऽशर्माणः । न । सोमाः । ऋतं । यते ॥२॥

ये मरुतोऽग्निनाग्निरिव स यथा भ्राजसा तेजसा शोभते तद्वद्भ्राजसा युक्ताः किंच रुक्मवत्सो रुक्माल-ंकृतवत्सका वातासो न प्रत्यक्षवाता इव स्वयुजः स्वयंयुज्यमानाः सद्योऽतयः सद्योगमनाः प्रज्ञातारो न प्रकर्षेण ज्ञातारो ज्ञानिन इव ज्येष्ठाः पूज्याः सुनीतयः सुनयनाः सुशर्माणो न सोमाः सुसुखाः सोमा इव ते यूयमृतं यते यज्ञं गच्छते यजमानाय गच्छतेति ॥

वातासो न ये धुनयो जिगत्नवोऽग्नीनां न जिह्वा विरोकिणः ।
वर्मंण्वंतो न योधाः शिमीवंतः पितॄणां न शंसाः सुरातयः ॥३॥
वातासः । न । ये । धुनयः । जिगत्नवः । अग्नीनां । न । जिह्वाः । विऽरोकिणः ।
वर्मंण्ऽवंतः । न । योधाः । शिमीऽवंतः । पितॄणां । न । शंसाः । सुऽरातयः ॥३॥

ये मरुतो वातासो न वायव इव धुनयः शत्रूणां कंपयितारो जिगत्नवो गमनशीलाः । अत्र मारुते सूक्ते मरुतामेव दृष्टांतकथनं संचरणस्वभाववायुपदार्थतदभिमानिदेवताभेदेनाविरुद्धं । तथाग्नीनां न जिह्वा अग्नीनां ज्वाला इव विरोकिणो विरोचनशीलमुखाः । तथा वर्मण्वंतो न योधाः कवचिनो योद्धार इव शिमीवंतः शौर्यकर्मवंतः । तथा पितॄणां न शंसाः पितॄणां जनकानां शंसा वाच इव सुरातयः सुदानाः । एवंमहानुभावा एते मरुतोऽस्मद्यज्ञमागच्छंतु ॥

रथानां न येऽराः सनाभयो जिगीवांसो न शूरा अभिद्यवः ।
वरेयवो न मर्या घृतप्रुषोऽभिस्वर्तारो अर्कं न सुष्टुभः ॥४॥

रथानां । न । ये । अराः । सऽनाभयः । जिगीवांसः । न । शूराः । अभिऽद्यवः ।
वरेऽयवः । न । मर्याः । घृतऽप्रुषः । अभिऽस्वर्तारः । अर्के । न । सुऽस्तुभः ॥४॥

रथानां न रथचक्राणामिवाराः ते यथा बहवोऽपि सनाभयः समाननाभयो भवंति तद्वे परस्परं सनाभयः समानबंधना एकस्मिन्नेवांतरिक्षे वर्तमानाः । परस्परं बंधुभूता इत्यर्थः । जिगीवांसो न शूरा जयशीलाः शूरा इवाभिद्यवोऽभिगतदीप्तयः किंच वरेयवो न मर्या वृतं वरं परस्मै प्रदातुमिच्छंतो मनुष्या इव घृतप्रुष उदकसेक्तारः । उदकपूर्वं हि वराणि वसूनि दीयंते नियमेन । वृष्युदकप्रदा इत्यर्थः । किंचाभिस्वर्तारोऽर्के नार्कमर्चनीयं स्तोत्रमभिस्वर्तारोऽभितः शब्दयितारो वंदिन इव सुष्टुभः सुशब्दाः ॥

अश्वासो न ये ज्येष्ठास आशवो दिधिषवो न रथ्यः सुदानवः ।
आपो न निम्नैरुदभिर्जिगत्नवो विश्वरूपा अंगिरसो न सामभिः ॥५॥
अश्वासः । न । ये । ज्येष्ठासः । आशवः । दिधिषवः । न । रथ्यः । सुऽदानवः ।
आपः । न । निम्नैः । उदऽभिः । जिगत्नवः । विश्वऽरूपाः । अंगिरसः । न । सामऽभिः ॥५॥

ये मरुतोऽश्वासो नाश्वा इव ज्येष्ठाः प्रशस्यतमा आशवः शीघ्रगमनाः । तथा दिधिषवो न वसूनां धारका इव रथ्यो रथस्वामिनः सुदानवः सुदानाः । तथापो नाप इव निम्नैः प्रवणैरुदभिरुदकैः सह जिगत्नवो गमनशीलाः । तथा विश्वरूपा नानारूपाः सामभिर्युक्ता अंगिरसो नांगिरस इव । सर्वदा सामगा इत्यर्थः ॥ ॥१२॥

यावाणो न सूरयः सिंधुमातर आदर्दिरासो अद्रयो न विश्वहा ।
शिशूला न क्रीळयः सुमातरो महाग्रामो न यामन्नुत त्विषा ॥६॥
यावाणः । न । सूरयः । सिंधुऽमातरः । आऽदर्दिरासः । अद्रयः । न । विश्वहा ।
शिशूलाः । न । क्रीळयः । सुऽमातरः । महाऽग्रामः । न । यामन् । उत । त्विषा ॥६॥

सूरय उदकस्य प्रेरका यावाणो न मेघा इव सिंधुमातरो नदीनिर्मातारः । आदर्दिरास आदरणशीलाव्यद्रयो न वज्रा वायुधानीव विश्वहा सर्वदा शत्रूणां हंतार इत्यर्थः । यद्वा । सर्वदाद्रयो न वज्रा इव शत्रूणामादर्दिरास आदरणशीलाः । सुमातरः शोभनमातृकाः शिशूला न शिशव इव क्रीळयो विहर्तारः । उतापि च महाग्रामो न महाजनसंघ इव यामन्यामनि गमने त्विषा दीप्त्या युक्ता भवंति । तेऽस्मद्यज्ञमागच्छंतु ॥

उषसां न केतवोऽध्वरश्रियः शुभंयवो नांजिभिर्व्यश्वितन् ।
सिंधवो न यय्यो भ्राजदृष्टयः परावतो न योजनानि ममिरे ॥७॥
उषसां । न । केतवः । अध्वरऽश्रियः । शुभंऽयवः । न । अंजिऽभिः । वि । अश्वितन् ।
सिंधवः । न । यय्यः । भ्राजत्ऽऋष्टयः । पराऽवतः । न । योजनानि । ममिरे ॥७॥

ये मरुत उषसां न केतव उषसां रश्मय इवाध्वरश्रियो यज्ञस्याश्रयितारो भवंति । तथा शुभंयवो न कल्याणकामा वरा इवांजिभिराभरणैर्व्यश्वितन् दीप्यंते ॥ श्वित वर्णे । लङि रूपं ॥ तथा सिंधवो न नद्य इव यय्यो गमनशीला भ्राजदृष्टयो दीप्यमानायुधाः परावतो न दूराध्वनीना वडवा इव योजनानि दूरदेशान्ममिरे । परिच्छिंदंति । तेऽस्मद्यज्ञमागच्छंत्विति ॥

सुभागाञ्नो देवाः कृणुता सुरत्नान्त्स्मान्त्स्तोतृन्मरुतो वावृधानाः ।
अधि स्तोचस्य सख्यस्य गात सनाद्धि वो रत्नधेयानि संति ॥ ८॥
सुऽभागान्। नः। देवाः। कृणुत। सुऽरत्नान्। अस्मान्। स्तोतॄन्। मरुतः। ववृधानाः।
अधि। स्तोचस्य। सख्यस्य। गात। सनात्। हि। वः। रत्नऽधेयानि। संति ॥ ८॥

अनया स्तुतिमुपसंहरति। हे मरुतो देवाः ववृधानाः स्तुत्या वर्धमाना यूयं स्तोतॄनोऽस्मान्सुभागान्सुधनान्कृणुत। कुरुत। तथा सुरत्नाञ्शोभनरत्नान्कृणुत। यद्वा। सुरत्नाञ्शोभनरमणीयस्तोत्रानस्मानिति संबंधनीयं। किंच यूयं सख्यस्य स्तोचस्य सखिभूतं स्तोचमधि गात। अधिगच्छत। वो युष्माकं रत्नधेयानि रत्नदानान्यस्मद्विषयाणि सनाद्धि चिरकालादारभ्य खलु संति ॥ ॥ १३॥

अपश्यमिति सप्तर्चमेकादशं सूक्तमापेयं त्रैष्टुभं। सौचीकगुणोऽग्निर्ऋषिर्वैश्वानरगुणो वाथवा सन्निर्नाम वाजंभरपुत्रः। तथा चानुक्रांतं। अपश्यं सप्त सौचीकोऽग्निर्वैश्वानरो वा सन्निर्वा वाजंभर आपेयं त्रिति॥ प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभे छंदसीदमादिके द्वे सूक्ते। सूचितं च। अपश्यमस्य महत इति सूक्ते। आ०४. १३.। इति ॥

अपश्यमस्य महतो महित्वममर्त्यस्य मर्त्यासु विक्षु ।
नाना हनू विभृते सं भरेते असिन्वती बप्सती भूर्यत्तः ॥ १॥
अपश्यं। अस्य। महतः। महिऽत्वं। अमर्त्यस्य। मर्त्यासु। विक्षु।
नाना। हनू इति। विभृते इति विऽभृते। सं। भरेते इति। असिन्वती इति।
बप्सती इति। भूरि। अत्तः ॥ १॥

अस्यापेर्महतो महनीयस्य महित्वं महत्त्वमपश्यं। पश्यामि। कीदृशस्यास्य। मर्त्यासु विक्षु मनुष्यरूपासु प्रजासु तासां हृदयेऽमर्त्यस्यामरणस्वभावस्य वैश्वानररूपेण वर्तमानस्य। यद्वा। मर्त्यासु वित्त्वत्त्विग्यजमानरूपासु प्रजास्वमर्त्यस्य सर्वदा जागरितस्य। अथ दावाग्निरूपोऽग्निरुच्यते। अस्यापेर्हनू ग्निप्रे नाना विभृते विभिन्ने सं भरेते। संभरतो दंतैः। तथा च्छत्वासिन्वती असंखादंत्यौ स्तोतारं बप्सती भक्षयंत्यौ भूरि प्रभूतं काष्ठमरण्ये वर्तमानमत्तः। भक्षयतः ॥

गुहा शिरो निहितमृधग्क्षी असिन्वन्नत्ति जिह्वया वनानि ।
अचाणयस्मै पड्भिः सं भरंत्युत्तानहस्ता नमसाधि विक्षु ॥ २॥
गुहा। शिरः। निऽहितं। ऋधक्। अक्षी इति। असिन्वन्। अत्ति। जिह्वया। वनानि।
अचाणि। अस्मै। पट्ऽभिः। सं। भरंति। उत्तानऽहस्ताः। नमसा। अधि। विक्षु ॥ २॥

अस्यापेः शिरो मूर्धा गुहायां निहितं मनुष्योदरेषु वर्तते। अस्याक्षी अक्षिणी ऋधक् पृथग्निहितं निहिते चंद्रसूर्यात्मना। तावेवाक्षिणी इत्यर्थः। ईदृशो योऽग्निरसिन्वन्नंतैरसंखादज्जिह्वया वनान्यत्ति काष्ठानि भक्षयति दाहभूतः अस्या अग्नेऽध्वर्यवादयः पड्भिः पादैरभिगत्याचाणि सं भरंति। संपादयंति हवींषि। कथंभूताः। उत्तानहस्ताः पात्रधारणार्थमुन्नतकराः नमसा नमस्कारेण युक्ताः। कुत्र। अधि विक्षु प्रजासु-विक्षु मध्ये ॥

प्र मातुः प्रतरं गुह्यमिच्छन्कुमारो न वीरुधः सर्पदुर्वीः ।
ससं न पक्वमविदच्छुचंतं रिरिह्वांसं रिप उपस्थे अंतः ॥३॥
प्र । मातुः । प्रऽतरं । गुह्यं । इच्छन् । कुमारः । न । वीरुधः । सर्पत् । उर्वीः ।
ससं । न । पक्वं । अविदत् । शुचंतं । रिरिह्वांसं । रिपः । उपऽस्थे । अंतरिति ॥३॥

अयमग्निर्मातुः पृथिव्याः संबंधिनीरुर्वीर्बहूर्वीरधो लता इच्छन् तथा प्रतरं प्रकृष्टतरं गुह्यं गोप्यं तासां वीरुधां मूलमपीच्छन्कामयमानः प्र सर्पत् । प्रसर्पति । प्रसरति । किमिव । कुमारो न कुमार इव । स यथा स्तन्यं पातुं जानुभ्यां सर्पति तद्वत् । ससं न पक्वं पक्वमन्नमिव शुचंतं दीप्यमानं नीरसं वृक्षं रिपः पृथिव्या उपस्थेऽन्तरवर्तमानेऽन्तरविदत् । विंदति । पुनः कीदृशं । रिरिह्वांसमाकाशमास्वादयंतं । यद्वा । मूलैर्मातरं पृथिवीं रिरिह्वांसं ॥

तद्वामेषं रोदसी प्र ब्रवीमि जायमानो मातरा गर्भो अत्ति ।
नाहं देवस्य मर्त्यश्चिकेताग्निरंग विचेताः स प्रचेताः ॥४॥
तत् । वां । ऋतं । रोदसी इति । प्र । ब्रवीमि । जायमानः । मातरा । गर्भः । अत्ति ।
न । अहं । देवस्य । मर्त्यः । चिकेत । अग्निः । अंग । विऽचेताः । सः । प्रऽचेताः ॥४॥

हे रोदसी द्यावापृथिव्यौ वां युवां तदृतं सत्यं प्र ब्रवीमि यदरणीभ्यां जायमान उत्पन्नो गर्भो गर्भस्थानीयोऽग्निर्मातरारणी अत्ति भक्षयति । देवस्य द्योतनादिगुणस्याग्नेर्वर्तनं मर्त्यो मनुष्योऽहं न चिकेत । न जानामि । हे अंग वैश्वानर अग्निररणीभ्यामुत्पन्नो विचेता विविधज्ञानवान् स प्रचेताः प्रकृष्टज्ञानः । अतो न जानामीत्यर्थः । अथवांगेत्यात्मानमेव संबोध्य ब्रवीमि । अग्निरेव विचेता बहुधा जानाति स प्रचेताः स एव जानाति । स्वमहिमानं नाहं स्तोतुं प्रभवामीत्यर्थः ॥

यो अस्मा अन्नं तृष्वाऽदधात्याज्यैर्घृतैर्जुहोति पुष्यति ।
तस्मै सहस्रमक्षभिर्वि चक्षेऽग्ने विश्वतः प्रत्यङ्ङसि त्वं ॥५॥
यः । अस्मै । अन्नं । तृषु । आऽदधाति । आज्यैः । घृतैः । जुहोति । पुष्यति ।
तस्मै । सहस्रं । अक्षऽभिः । वि । चक्षे । अग्ने । विश्वतः । प्रत्यङ् । असि । त्वं ॥५॥

यो यजमानोऽस्मा अग्नये तृषु क्षिप्रमन्नमादधाति करोत्याज्यैर्घृतैः चरद्रूपैर्दीप्तैर्वा सोमरसैर्जुहोति पुष्यति पुष्णाति चैनं काष्ठैः तस्मै । तमित्यर्थः । तं सहस्रं सहस्रसंख्याकैरक्षभिरक्षिस्थानीयाभिरपरिमिताभिर्ज्वालाभिर्वि चक्षे । विपश्यति । अथ प्रत्यक्षकृतः । हे अग्ने त्वं विश्वतः सर्वतः प्रत्यङ्ङसि । प्रत्यगंचनो भवसि । अस्मदानुकूल्येन प्रवर्तमानो भवसि ॥

किं देवेषु त्यज एनश्चकर्थाग्ने पृच्छामि नु त्वामविद्वान् ।
अक्रीळन् क्रीळन्हरिरत्तवेऽदन्वि पर्वशश्चकर्त गामिवासिः ॥६॥
किं । देवेषु । त्यजः । एनः । चकर्थ । अग्ने । पृच्छामि । नु । त्वां । अविद्वान् ।
अक्रीळन् । क्रीळन् । हरिः । अत्तवे । अदन् । वि । पर्वऽशः । चकर्त । गांऽइव । असिः ॥६॥

हे अग्ने त्वां नु क्षिप्रं देवेषु किं त्यजः क्रोधमेनः पापं च चकर्थ कृतवानसीत्यविद्वानहं पृच्छामि । खांडवं दहंतमग्निं पृच्छामि । किंवाक्रीळन् क्वचिद्देशेऽविहरन् क्रीळन् क्वचिद्देशे विनोदयन्लीलया दहन्हरिर्हरितवर्णः

सन्नत्वेऽत्यमदन्नन्नकाष्ठादिकं पर्वशः संधौ संधौ वि चकर्थ । विविधं करोषि । गामिवासिः गां यथासिः स्वधितिः पर्वशश्छिनत्ति तद्वत् ॥

विषूचो अश्वान्युयुजे वनेजा ऋजीतिभी रश्नाभिर्गृभीतान् ।
चक्षदे मिचो वसुभिः सुजातः समानृधे पर्वभिर्वावृधानः ॥७॥
विषूचः । अश्वान् । युयुजे । वनेऽजाः । ऋजीतिऽभिः । रश्नाभिः । गृभीतान् ।
चक्षदे । मिचः । वसुऽभिः । सुऽजातः । सं । आनृधे । पर्वऽभिः । ववृधानः ॥७॥

अयमग्निर्विषूचो विष्वगंचनानश्वान्व्याप्तान्महतो वृषान्सर्वतो गंतॄनश्वानेव वा युयुजे युंक्ते वनेजा वने प्रवृद्धः संपन्नः सन् । वीवृशानश्वान् । ऋजीतिभिर्ऋजुगामिनीभी रश्नाभी रश्नाख्यानीयाभिर्वृताभिर्गृभीतान्परिगृहीतान्वेष्टितान् । साक्षादश्वपक्ष ऋजुगतिभिः प्रसिद्धाभी रश्नाभिर्गृभीतान्गृहीतान्स्वकीयानश्वान्शीघ्रदाहाय रथे योजितवानित्यर्थः । तादृशोऽग्निश्चक्षदे चकाद् शकलीकरोति वसूनि मिचोऽस्माकं मित्रभूतो वसुभिर्वासकैरश्मिभिः सुजातः सुष्ठु प्रवृद्धः सन् । किंच समानृधे सम्यग्वर्धते पर्वभिः काष्ठखंडैर्वावृधानो वर्धमानः ॥ ॥१४॥

अग्निः सप्तिमिति सप्तर्चं द्वादशं सूक्तं सौचीकस्य वैश्वानरस्याग्नेरार्षं त्रैष्टुभमाग्नेयं । अग्निः सप्तिमित्यनुक्रांतं । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

अग्निः सप्तिं वाजंभरं ददात्यग्निर्वीरं श्रुत्यं कर्मनिष्ठां ।
अग्नी रोदसी वि चरत्समंजन्नग्निर्नारीं वीरकुक्षिं पुरंधिं ॥१॥
अग्निः । सप्तिं । वाजंऽभरं । ददाति । अग्निः । वीरं । श्रुत्यं । कर्मनिःऽस्थां ।
अग्निः । रोदसी इति । वि । चरत् । सं ऽअंजन् । अग्निः । नारीं । वीरऽकुक्षिं । पुरंऽधिं ॥१॥

अयमग्निः सप्तिं सर्पणस्वभावमश्वं वाजंभरं युद्धे शत्रूञ्जित्वान्नसंपादकं ददाति स्तोतृभ्यः । तथाग्निर्वीरं वीर्यवंतं पुत्रं श्रुत्यं पितृव्यपदेशकं कर्मनिःष्ठां यागेऽन्यचित्तं ददाति । अग्नी रोदसी द्यावापृथिव्यौ समंजन् सम्यगंजयन्वि चरत् । विविधं चरति । अयमग्निर्नारीं योषितं वीरकुक्षिं वीरप्रसवकुक्षिं पुरंधिं च करोति ।

अग्नेरभ्रसः समिदस्तु भद्राग्निर्महो रोदसी आ विवेश ।
अग्निरेकं चोदयत्समत्स्वग्निर्वृत्राणि दयते पुरूणि ॥२॥
अग्नेः । अभ्रसः । सं ऽइत् । अस्तु । भद्रा । अग्निः । महो इति । रोदसी इति । आ । विवेश ।
अग्निः । एकं । चोदयत् । समत्ऽसु । अग्निः । वृत्राणि । दयते । पुरूणि ॥२॥

अभ्रसः कर्मवतोऽग्नेः समिद्भद्रास्तु । अयमग्निर्महो महत्यौ रोदसी द्यावापृथिव्यावा विवेश । आविष्टवान्स्वतेजसा । तथायमग्निरेकमसहायमेव चोदयत् चोदयति प्रेरयति समत्सु संग्रामेषु । युद्धे स्वभक्तं स्वयं सहायः सञ्जयिनं करोतीत्यर्थः । तथाग्निर्वृत्राणि पुरूणि बहून्शत्रून्दयते । हंति ॥

अग्निर्ह त्यं जरितः कर्णमावाग्निरग्नो निरदहज्जरूथं ।
अग्निरचिं धर्मे उरुष्यदंतरग्निर्नृमेधं प्रजयासृजत्सं ॥३॥
अग्निः । ह । त्यं । जरितः । कर्णं । आव । अग्निः । अत्ऽअभ्यः । निः । अदहत् । जरूथं ।
अग्निः । अचिं । धर्मे । उरुष्यत् । अंतः । अग्निः । नृऽमेधं । प्रऽजया । असृजत् । सं ॥३॥

अग्निर्हायमग्निः खलु वै तं प्रसिद्धं भरतः कण्वं भरत्कण्वगोत्रमानमृषिमाह । ररच । तथायमग्निरग्नौ जह्नमेतन्नामानमसुरं निरदहत् । निर्दग्धवान् । तथाग्निरत्रिं महर्षिं घर्मेऽतप्तीवीसेऽवस्थितमुदस्थत् । ररच । तथायमग्निर्गृत्समेधमेतन्नामकमृषिं प्रजया पुत्रादिलक्षणया समरूरुजत् । संयुयोज ॥

अग्निर्दाद्रविणं वीरपेशा अग्निर्ऋषिं यः सहस्रा सनोति ।
अग्निर्दिवि हव्यमा ततानाग्नेर्धामानि विभृता पुरुत्रा ॥४॥
अग्निः । दात् । द्रविणं । वीरऽपेशाः । अग्निः । ऋषिं । यः । सहस्रा । सनोति ।
अग्निः । दिवि । हव्यं । आ । ततान् । अग्नेः । धामानि । विऽभृता । पुरुऽत्रा ॥४॥

अयमग्निर्वीरपेशाः प्रेरकज्वालारूपो द्रविणं धनं दात् । ददाति । तथाग्निर्ऋषिं मंत्रद्रष्टारं पुत्रं प्रयच्छतीति शेषः । ऋषिर्विशेष्यते । य ऋषिः सहस्रा गवां सहस्राणि सनोति भजते दक्षिणात्वेन तमृषिं ददातीति । तथाग्निर्दिवि द्युलोके हव्यं यजमानैरर्पितमा ततान । देवेषु विस्तारयति । तथाग्नेर्धामानि शरीराणि विभृता विभृतानि पुरुत्रा बहुषु स्थानेष्वाहवनीयाधिष्ण्यादिषु चित्यादिषु वा ॥

अग्निमुक्थैर्ऋषयो वि ह्वयंतेऽग्निं नरो यामनि बाधितासः ।
अग्निं वयो अंतरिक्षे पतंतोऽग्निः सहस्रा परि याति गोनाँ ॥५॥
अग्निं । उक्थैः । ऋषयः । वि । ह्वयंते । अग्निं । नरः । यामनि । बाधितासः ।
अग्निं । वयः । अंतरिक्षे । पतंतः । अग्निः । सहस्रा । परि । याति । गोनाँ ॥५॥

अग्निमुक्थैः शस्त्रैर्ऋषयः पूर्वे वि ह्वयंते । विविधमाह्वयंति यज्ञे स्वीये । अग्निं नरो मनुष्या यामनि संग्रामे । यातिर्वधकर्मसु पठितः । बाधितासः शत्रुभ्यो बाधिताः प्राप्नुवंति जयार्थं । तथाग्निं वयः पक्षिणोऽंतरिक्षे पतंतः पश्यंति रात्रिषु । तस्मादिमां वयांसि नक्तं गाधायासते । तै० सं० ५. ६. ४. ४. । इति ब्राह्मणं । यद्वा । दावभूतमग्निमंतरिक्षगा वयः पतंति । तथाग्निर्गोनां सहस्रा सहस्राणि परि परितो याति । गच्छति ॥

अग्निं विशं ईळते मानुषीर्या अग्निं मनुषो नहुषो वि जाताः ।
अग्निर्गांधर्वीं पथ्यामृतस्याग्नेर्गव्यूतिर्घृत आ निषत्ता ॥६॥
अग्निं । विशः । ईळते । मानुषीः । याः । अग्निं । मनुषः । नहुषः । वि । जाताः ।
अग्निः । गांधर्वीं । पथ्यां । ऋतस्य । अग्नेः । गव्यूतिः । घृते । आ । निऽसत्ता ॥६॥

अग्निं विशः प्रजा ऋत्विग्यजमानलक्षणा ईळते । स्तुवंति । या मानुषीर्मानुष्यो मनुष्याज्जाताः ता ईळते । तथाग्निं मनुषो मनुष्या नहुषो राज्ञः सकाशाज्जाताः प्रजा विविधं स्तुवंतीति । अग्निर्गांधर्वी । वाङ्नामैतत् । वाचं शृणोति । कीदृशीं गांधर्वीं । ऋतस्य यज्ञस्य पथ्यां पथि हितां । अग्नेर्महात्मनो गव्यूतिर्मार्गो घृत आज्ये आ निषत्ता सर्वतो निषण्णो भवति ॥

अग्नये ब्रह्म ऋभवस्तक्षुरग्निं महामवोचामा सुवृक्तिं ।
अग्ने प्रावं जरितारं यविष्ठाग्ने महि द्रविणमा यजस्व ॥७॥
अग्नये । ब्रह्म । ऋभवः । ततक्षुः । अग्निं । महां । अवोचाम । सुऽवृक्तिं ।
अग्ने । प्र । अव । जरितारं । यविष्ठ । अग्ने । महि । द्रविणं । आ । यजस्व ॥७॥

अग्नये ब्रह्म स्तोत्रमृभवो मेधाविनस्ततक्षुः। अकुर्वन्। वयं च महां महांतमपिं प्रति सुवृक्तिं स्तुतिमवोचाम। हे यविष्ठ युवतमाग्ने जरितारं स्तोतारं प्राव। प्ररच। हे अग्ने महि महद्धविर्णं धनमा यजस्व। प्रयच्छेत्यर्थः। अत्र प्रतिवाक्यमग्न्यभिधानं तस्य स्तुत्यत्वप्रदर्शनार्थं ॥ ॥ १५ ॥

य इमेति सप्तर्चं चयोदशं सूक्तं भुवनपुत्रस्य विश्वकर्मण आर्षं त्रैष्टुभं विश्वकर्मदेवत्यं। तथा चानुक्रांतं। य इमा विश्वकर्मा भौवनो वैश्वकर्मणं त्रिति॥ गतः सूक्तविनियोगः॥ अत्र वाजसनेयकं। ब्रह्मा वै स्वयंभूस्तपोऽतप्यत। तदैक्षत न वै तपस्यानंत्यमस्ति हंताहं भूतेष्वात्मानं जुहवानि भूतानि चात्मनीति तत्सर्वेषु भूतेष्वात्मानं जुहोत्यादि। शत० १३. ७. १. ॥

य इ॒मा विश्वा॒ भुव॑नानि॒ जुह्व॒दृषि॒र्होता॒ न्यसी॑दत्पि॒ता नः॑।
स आ॒शिषा॒ द्रवि॑णमि॒च्छमा॑नः प्रथम॒च्छद॑वरा॒ँ आ वि॑वेश ॥१॥
यः। इ॒मा। विश्वा॑। भुव॑नानि। जुह्व॑त्। ऋषिः॑। होता॑। नि। अ॒सी॒द॒त्। पि॒ता। नः॒।
सः। आ॒ऽशिषा॑। द्रवि॑णं। इ॒च्छमा॑नः। प्र॒थ॒म॒ऽछ॑त्। अव॑रान्। आ। वि॒वे॒श॒ ॥१॥

अत्र निरुक्तं। विश्वकर्मा सर्वमेधे सर्वाणि भूतानि जुहवांचकार स आत्मानमप्यंततो जुहवांचकार। तदभिवादिन्येषगर्भवति य इमा विश्वा भुवनानि जुह्वदिति। नि० १०. २६.। इति ॥ यो विश्वकर्मैतन्नामक ऋषिर्भुवनपुत्रो होता होमनिष्पादकः सन्विश्वा सर्वाणि भुवनानि जुह्वज्होमं कुर्वन्। प्रथमं सर्वं जगज्जुहोत्यर्थः। पश्चादग्नौ न्यसीदत् पिता जनकः। आत्मकृतेन कर्मणा देहोत्पत्तेः। न चैकस्य जन्यजनकभावो विरुध्यते तपोबलेन शरीरद्वयस्वीकारात्। स एकधा भवति। छां० उ० ७. २६. २। इत्यादिश्रुतेः। स ऋषिराग्निषाग्निप्रतिपादकेन सूक्तवाकादिना द्रविणं धनं स्वर्गाख्यमिच्छमानः कामयमानः प्रथमच्छत्प्रथममग्नेर्भुवनेराच्छादयितावरान्निप्रकृष्टान्भूतान्स्वात्मनाकृतानाविवेश। आविष्टवानग्निमित्युक्तार्थ एव पुनर्विशेषणोक्तः। एवमुत्तरचाधियज्ञपरतया योज्यं॥ अथाध्यात्मप्रसिद्धोच्यते। यो विश्वकर्मा परमेश्वर इमा विश्वा भुवनानि जुह्वत्प्रलयकाले पृथिव्यादीनिमान्सप्त लोकान्स्वात्मन्याकृतिप्रक्षेपवत्संहरन्नृषिरतींद्रियद्रष्टा सर्वज्ञो होता संहाररूपस्य होमस्य कर्ता नोऽस्माकं पिता जनको निषसाद स्वयं स्थितवान्। अयमर्थः। प्रलयकाले प्राप्ते सति सर्वाँल्लोकान्संहृत्यास्माकमपि संहर्ता पुनः सृष्टा च सन् सर्वज्ञो यः परमेश्वरः स्वयमेक एवासीत्। तथा हि श्रुतयः। आत्मा वा इदमेक एवाग्र आसीत्। ऐ० आ० २. ४. १.। सदेव सोम्येदमग्र आसीत्। छां० उ० ६. २. १.। इत्यादिकाः। स तादृशः परमेश्वर आशिषा बहुः स्यां प्रजायेयेत्येवंरूपया पुनःपुनः सिसृक्षया द्रविणमिच्छमानः धनोपलक्षितं जगद्भोगमाकांक्षमाणः प्रथमच्छत्प्रथमं मुख्यं निष्प्रपंचं पारमार्थिकं रूपमावृण्वन्नवरान्स्वसृष्टान्प्राणिहृदयप्रदेशाना विवेश। आविष्टवाञ्जीवरूपेण। तथा च श्रूयते। सोऽकामयत बहुः स्यां प्रजायेयेति स तपोऽतप्यत स तपस्तप्त्वेदं सर्वमसृजत यदिदं किंच तत्सृष्ट्वा तदेवानुप्राविशत्। तै० आ० ८. ६.। इति। एवमन्या अप्युपनिषद उदाहार्याः ॥

वैश्वदेवस्य पशोर्वपाया अनुवाक्या किं स्विदित्येषा। सूचितं च। किं स्विदासीदधिष्ठानं यो नः पिता जनिता। आ० ३. ८.। इति ॥

किं स्वि॒दासी॑दधि॒ष्ठान॑मारंभ॒णं कत॑मत्स्वि॒त्कथा॑सीत्।
यतो॒ भूमिं॑ ज॒नय॑न्वि॒श्वक॑र्मा॒ वि द्यामौर्णो॑न्महि॒ना वि॒श्वच॑क्षाः ॥२॥
किं। स्वि॒त्। आ॒सी॒त्। अधि॑ऽस्थानं। आ॒ऽरं॒भ॒णं। कत॑मत्। स्वि॒त्। कथा॑। आ॒सी॒त्।
यतः॑। भूमिं॑। ज॒नय॑न्। वि॒श्वऽक॑र्मा। वि। द्यां। औ॒र्णो॒त्। म॒हि॒ना। वि॒श्वऽच॑क्षाः॥२॥

पूर्वमंत्रे जगत्प्रलयकाले संहृत्य पश्चात्सिसृक्षायां सर्वं कृत्वा तत्र प्रविष्ट इत्युक्तं। तत्र तस्य द्वितीयस्याधिष्ठानजगदुपादानकारणाद्यसंभवात्सृष्टिरनुपपन्नेत्याक्षिपति। लोके हि घटं चिकीर्षुः कुलाली गृहादिकं किंचि-

त्स्थानमधिष्ठाय मृद्रूपेणारंभद्वारेण चक्रादिरूपैरुपकरणैर्घटं निष्पादयति । तद्वदीश्वरस्य जगदाश्रयद्यावापृथिव्योरुत्पादनवेलायामधिष्ठानं किं स्विदासीत् । किं नामाभूत् । न किंचिदित्यर्थः । तथा तयोरारंभणं कृतमस्ति स्वित् । आरभ्यतेऽनेनेत्यारंभणमुपादानकारणं । तदपि कृतमभूत्किं । तदपि नेत्यर्थः । यद्यपि संभवेदारंभणं कथमासीत् । कथमभूत् । किं स्वयं सदसद्वा भवेदित्यर्थः । उभयमपि नोपपद्यते । सच्चेत् अद्वैतभंगप्रसंगः । असच्चेत् सदात्मकयोर्द्यावापृथिव्योरुपादानानर्हत्वात् । नान्यत्किंचन मिषत् । ऐ० आ० २. ४. १. । इति श्रुतिरेवात्राभिप्रायः । यतो यस्मादधिष्ठानादारंभणाच्च विश्वचक्षाः सर्वद्रष्टा विश्वकर्मा परमेश्वरो भूमिं जनयन्वर्तते तथा द्यां दिवं व्यौर्णोत् व्यवृणोत् स्वदृष्टवान् महिना स्वमहत्त्वेन । किं स्विदासीदिति ॥

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः ॥३॥
विश्वतः । चक्षुः । उत । विश्वतः । मुखः । विश्वतः । बाहुः । उत । विश्वतः । पात् ।
सं । बाहुऽभ्यां । धमति । सं । पतत्रैः । द्यावाभूमी इति । जनयन् । देवः । एकः ॥३॥

अनया सर्वात्मकत्वेन कुलालादिविलक्षणत्वाद्धिष्ठानाद्यभावेऽपि स्रष्टुं शक्नोतीत्याह । विश्वतश्चक्षुः सर्वतो व्याप्तचक्षुः । उतापि च विश्वतोमुखः । तथा विश्वतोबाहुः । उतापि च विश्वतस्पात् । स एवंविधः परमेश्वरः स्वस्मिंस्त्रैलोक्यमुत्पादयतीत्यर्थः । कथमिति उच्यते । बाहुभ्यां द्यां सं धमति । धमतिर्गतिकर्मा । सम्यक् प्रेरयति । तथा पतत्रैर्गमनशीलैः पादैः पृथिवीं सं धमतीति । उभयोरेव ग्रहणं प्राधान्याभिप्रायं । एवं द्यावाभूमी जनयन् दिवं च पृथिवीं चोत्पादयन्देवो द्योतमानः स्वयंप्रकाशः परमेश्वर एकोऽसहाय एव वर्तते ॥

किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ॥४॥
किं । स्वित् । वनं । कः । उं इति । सः । वृक्षः । आस । यतः । द्यावापृथिवी इति ।
निःऽततक्षुः ।
मनीषिणः । मनसा । पृच्छत । इत् । उं इति । तत् । यत् । अधिऽअतिष्ठत् । भुवनानि ।
धारयन् ॥४॥

पूर्वस्यामृचि यद्ब्रह्मैव भूम्यादिकारणमिति । तदेवानया प्रश्नकथनव्याजेनोच्यते । लोके हि प्रौढं प्रासादं निर्मिमाणः कश्चिच्छिल्पी ढे वने कंचिन्महांतं वृक्षं छित्त्वा तक्षणादिना खंभादिकं संपादयति । इह तु परमेश्वरप्रेरिता जगत्स्रष्टारो यतो यस्माद्वनाद्यं वृक्षमादाय द्यावापृथिवी निष्टतक्षुः तक्षणेन द्यावापृथिवी निष्पादितवंतः तद्वनं किं स्वित् किं नाम स्यात् । तथा क उ स वृक्ष आस । कस्माद्वृक्षो महान्वृक्षोऽभूत् । हे मनीषिणो मनस ईश्वराः तदुभयं मनसा जिज्ञासायुक्तेन पृच्छतेदु । पृच्छतैव । किंचेश्वरो भुवनानि धारयन्यत्स्थानमध्यतिष्ठत् तदपि पृच्छत । एतस्य सर्वस्याप्युत्तरं ब्रह्म स वृक्ष आसीदित्यादिकमुत्तरं ॥

साकमेधेषु वैश्वकर्मण एककपालस्य या ते धामानीत्येषा याज्या । सूचितं च । विश्वकर्मन्हविषा वावृधानो या ते धामानि परमाणि यावमा । आ० २. १८. । इति ॥ पूर्वोक्तस्य पशोर्हविष एषैव याज्या । सूचितं च । या ते धामानि परमाणि यावमा य इमे द्यावापृथिवी जनित्री । आ० ३. ८. । इति ॥

या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा ।
शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं वृधानः ॥५॥

या। ते। धामानि। परमाणि। या। अवमा। या। मध्यमा। विश्वऽकर्मन्। उत। इमा।
शिक्ष। सखिऽभ्यः। हविषि। स्वधाऽवः। स्वयं। यजस्व। तन्वं। वृधानः ॥५॥

अनया भौवनो विश्वकर्मा जगत्कारणं विश्वकर्मदेवं स्तौति। हे विश्वकर्मन् या यानि ते तव परमाणि धामानि शरीराणि संति या यानि च मध्यमानि शरीराणि संति उतापि च या यान्यवमावमानि धामानि शरीराणि संति उतापि च तानीमानि सर्वाणि शरीराणि सखिभ्योऽस्मभं यष्टुं हविषि मयि हविर्भूते सति शिक्ष। देहि। हे स्वधावो हविर्लक्षणान्नवन् स्वयमेव त्वं तन्वं स्वकीयं पूर्वोक्तं त्रिविधं शरीरं वृधानो हविषा वर्धमानः सन्। अनेन धामत्रैविध्योपन्यासेनोत्तममूतानि देवादिशरीराणि मध्यममूतानि मनुष्यादिशरीराणि निकृष्टभूतानि कृमिकीटादिशरीराणि च परिगृहीतानि। किं बहुना सर्वं जगदुपात्तं भवति। उक्तव्यतिरेकेण निरवयवस्य परमेश्वरस्य विग्रहाभावात् तदैक्षत बहुः स्यां प्रजायेय। छां० उ० ६. २. ३.। इत्यादिश्रुतिभ्यः परमेश्वरस्यैव देवादिभेदेन बहुभावावगमात् ॥

तस्मिन्नेव वैश्वकर्मणपशौ वपापुरोडाशयोर्विश्वकर्मन्हविषेति क्रमेण द्वे अनुवाक्ये। सूचितं च। विश्वकर्मन्हविषा वावृधान इति द्वे विश्वकर्मा विमना आदित्यहायाः। आ० ३. ८.। इति ॥ साकमेधेषु वैश्वकर्मणस्य विश्वकर्मन्हविषेत्येवानुवाक्या। सूत्रं तु पूर्वमुदाहृतं ॥

विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्यां।
मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु ॥६॥
विश्वऽकर्मन्। हविषा। ववृधानः। स्वयं। यजस्व। पृथिवीं। उत। द्यां।
मुह्यंतु। अन्ये। अभितः। जनासः। इह। अस्माकं। मघऽवा। सूरिः। अस्तु ॥६॥

हे विश्वकर्मन्विश्वविषयकर्मन्नेतन्नामक परमेश्वर हविषा हविर्भूतेन मया विश्वकर्मणा मया दत्तेन वा हविषा ववृधानो वर्धमानः। विश्वकर्मा सर्वाणि भूतानि जुहवांचकार स आत्मानमप्यंततो जुहवांचकारेति हि निरुक्तं पूर्वमुदाहृतं। स्वयमेव पृथिवीमुतापि च द्यां दिवं च स्वसृष्टे द्यावापृथिव्यौ स्वयं प्रवृद्धः सन्यजस्व। पूजय। अन्ये मत्तोऽन्ये जनासो जना अयष्टारोऽस्मायागविरोधिनो वा मुह्यंतु मुग्धा भवंत्वभितः सर्वतः। अथ परोक्षकृतः। इहास्मिन्यागेऽस्माकं मघवास्मत्प्रत्तेन हविर्लक्षणेन धनेन धनवान् स सूरिः स्वर्गादिफलस्य प्रेरकोऽस्तु। भवतु। अत्र विश्वकर्मन्हविषा वर्धमान इत्यादि निरुक्तमनुसंधेयं। १०. २७. ॥

वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम।
स नो विश्वानि हवनानि जोषद्विश्वशंभूरवसे साधुकर्मा ॥७॥
वाचः। पतिं। विश्वऽकर्माणं। ऊतये। मनःऽजुवं। वाजे। अद्य। हुवेम।
सः। नः। विश्वानि। हवनानि। जोषत्। विश्वऽशंभूः। अवसे। साधुऽकर्मा ॥७॥

वाचस्पतिं मंत्रात्मकस्य वचसः स्वामिनं विश्वकर्माणं विश्वकर्तारं मनोजुवं मनोवेगगमनं वाजे यज्ञेऽस्मिन्दिने ऊतये तर्पणाय हुवेम। आह्वयाम। स देवो नोऽस्माकं विश्वानि सर्वाणि हवनानि जोषत्। सेवतां। किमर्थं। अवसेऽस्माकं रक्षणाय। स विशिष्यते। विश्वशंभूर्विश्वस्य सुखस्योत्पादकः साधुकर्मा च ॥ ॥१६॥

चक्षुष इति सप्तर्चं चतुर्दशं सूक्तं। ऋष्यादयाः पूर्ववत्। चक्षुष इत्यनुक्रांतं ॥ गतः सूक्तविनियोगः ॥

चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने।
यदेदंता अदृहंत पूर्व आदिद्द्यावापृथिवी अप्रथेतां ॥१॥

चक्षुषः । पिता । मनसा । हि । धीरः । घृतं । एने इति । अजनत् । नभ्यमाने इति । यदा । इत् । अंतः । अदंदृहंत । पूर्वे । आत् । इत् । द्यावापृथिवी इति । अप्रथेतां ॥ १ ॥

चक्षुषश्चक्षुरुपलक्षितेंद्रियसंघात्मकस्य शरीरस्य पितोत्पादयिता । यदा । चक्षुः ख्यापकं तेजः । तस्योत्पादयिता । मनसा न हि मत्समोऽस्ति कश्चिदिति बुद्धा हि खलु धीरो धृष्टो विश्वकर्मा प्रथमं घृतमुदकमजनत् । अजनयत् । आपो वा इदमग्रे । तै० सं० ७. १. ५. १. । अप एव ससर्जादौ । मनु० १. ८. । इत्यादिश्रुतिस्मृती स्यातां । पश्चादेने द्यावापृथिवी नभ्यमाने तस्मिन्नुदक इतस्ततश्चलंत्यौ योऽजनयत् । अथ यदेषदेवांताः पर्यंतप्रदेशाः पूर्वे पुराणा द्यावापृथिव्योः संबंधिनोऽदृंहंत दृढा अभवन् । विश्वकर्मणा दृढाः संपादिता इत्यर्थः । आदिदनंतरमेव द्यावापृथिवी द्यावापृथिव्यावप्रथेतां । यथाकामं प्रथिते अभूतां ॥

वैश्वकर्मणस्य पञ्चोर्हविष एषानुवाक्या । विश्वकर्मा विमना आदिहायाः किं स्विदासीदधिष्ठानं । आ० ३. ८. । इति सूचितं ॥

विश्वकर्मा विमना आदिहाया धाता विधाता परमोत संदृक् ।
तेषामिष्टानि समिषा मदंति यत्रा सप्तऋषीन्पर एकमाहुः ॥ २ ॥
विश्वऽकर्मा । विऽमनाः । आत् । विऽहायाः । धाता । विऽधाता । परमा । उत । संऽदृक् ।
तेषां । इष्टानि । सं । इषा । मदंति । यत्र । सप्तऽऋषीन् । परः । एकं । आहुः ॥ २ ॥

अयं मंत्रोऽधियज्ञाध्यात्मयोर्भेदेन द्विधा व्याख्येयः । तत्र प्रथमं दैवतमधिकृत्योच्यते । विश्वकर्मा बहुविधप्रकारवृष्टिप्रदानादिकर्मणां कर्तादित्यः स च विमना विभूतमनाः । आदित्यनर्थकः सर्वत इत्यर्थे वा । विहाया विविधमाप्ता । महानित्यर्थः । धाता वृष्ट्यादिकर्ता च विधाता जगतः कर्ता च परमा परमः संदृक् संद्रष्टा च भूतानां । तेषां सप्तर्षीणां । ज्योतिषां रश्मीनामित्यर्थः । परमपदे वक्ष्यमाणत्वात् । इष्टानि स्वानानि शरीराणि वेषोदकेन सं मदंति संमोदंते यत्र यस्मिन्नादित्ये तं देवं सप्तर्षीन् । सप्तर्षिभ्य इत्यर्थः । तेभ्यः परः परस्तादेकमेवादित्यमाहुर्मंत्रविदः ॥ अथाध्यात्मपक्ष उच्यते । विश्वकर्मा यः परमात्मा प्राणप्रकाशाभ्यामुपेतः सन् बहुकर्मा भवति स च विमना विभूतमना विहाया वस्तुतो महान् विशेषेण सुकृतदुष्कृतफलस्याप्ता धाता विधाता च परमोत संदृक् परमस्य संद्रष्टेंद्रियाणां । तेषां सप्तर्षीणां द्रष्टृणामिंद्रियाणामिष्टानि स्वरूपाणीषान्नेन सह सं मदंति संमोदंते यत्र यस्मिन्नात्मनि तमात्मानं सप्तर्षीन्सप्तसंख्याकेभ्यः सर्पणस्वभावेभ्यो वा परः परस्तादुर्तमानमिंद्रियाद्यतीतमेकं परमात्मानमाहुस्तत्त्वविदः ॥ अत्र विश्वकर्मा विभूतमना व्याख्येत्यादि निरुक्तमनुसंधेयं । १०. २६. ॥

पूर्वोक्त एव पञ्चौ पुरोडाशस्य यो नः पितेत्येषा याज्या । सूचितं च । यो नः पिता जनिता यो विधाता या ते धामानि परमाणि यावमा । आ० ३. ८. । इति ॥

यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।
यो देवानां नामधा एक एव तं संप्रश्नं भुवना यंत्यन्या ॥ ३ ॥
यः । नः । पिता । जनिता । यः । विऽधाता । धामानि । वेद । भुवनानि । विश्वा ।
यः । देवानां । नामऽधाः । एकः । एव । तं । संऽप्रश्नं । भुवना । यंति । अन्या ॥ ३ ॥

यो विश्वकर्मा नोऽस्माकं पिता पालयिता । न केवलं पालकः किंतु जनितोत्पादकः । किमनेनास्माकमुत्पादक इति संकोचेन । यो विधाता सर्वस्य जगत उत्पादको यो विश्वकर्मा नोऽस्माकमुत्पन्नानि धामानि देवानां तेजःस्थानानि वेद वेत्ति । किं बहुना । विश्वा विश्वानि भुवना भूतजातानि वेद वेत्ति ।

यश्च देवानामपिवाख्यादीनां नामधा नाम्नां धाता इंद्रादीन्निर्माय तेषामिंद्रादि नाम कृत्वा तत्तद्देवेषु स्थापयिता एक एव। तं देवमन्यान्यानि भुवना भूतजातानि प्रश्नं कः परमेश्वर इति पृच्छां यंति। प्राप्नुवंति॥

त आयजंत द्रविणं समस्मा ऋषयः पूर्वे जरितारो न भूना।
असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ॥४॥
ते। आ। अयजंत। द्रविणं। सं। अस्मै। ऋषयः। पूर्वे। जरितारः। न। भूना।
असूर्ते। सूर्ते। रजसि। नि॒ऽसत्ते। ये। भूतानि। सं॒ऽअकृण्वन्। इमानि॥४॥

ते पूर्व ऋषयोऽस्मै विश्वकर्मणे द्रविणं चरुपुरोडाशादिलक्षणं धनं सं सम्यगायजंत। सर्वतो यजंते। जरितारो न भूना स्तोतारो यथा भूम्ना महता स्तोत्रेण यजंति तद्वत्। ये महर्षयोऽसूर्ते सरणवर्जिते सूर्ते सरणसहिते स्थावरजंगमात्मके रजसि लोके निषत्ते निषण्णे निश्चलमवस्थित इमानि भूतानि भुवनानि। प्राणिन इत्यर्थः। समकृण्वन् सम्यग्धनादिनापूजयन्। अथवायमर्थः। ये स्थावरजंगमात्मके जगति वर्तमानानेतान्प्राणिनस्तेजसा समकृण्वन् ते पूर्व ऋषयो द्रष्टारो रश्मयोऽस्मा आदित्यात्मकाय विश्वकर्मणे द्रविणं तेज आयजंत॥

परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति।
कं स्विन्नर्भं प्रथमं दध्र आपो यत्र देवाः समपश्यंत विश्वे ॥५॥
परः। दिवा। परः। एना। पृथिव्या। परः। देवेभिः। असुरैः। यत्। अस्ति।
कं। स्वित्। गर्भं। प्रथमं। दध्रे। आपः। यत्र। देवाः। सं॒ऽअपश्यंत। विश्वे॥५॥

यदीश्वरतत्त्वं दिवा परो द्युलोकादपि परस्तादवर्तमानं तथैनास्याः पृथिव्याः परः परस्तादवर्तमानं तथा देवेभिर्देवैः परस्तादवर्तमानमसुरैः परस्तादवर्तमानं च यदस्ति तन्नृहायामवस्थितं कं स्विन्नर्भं गर्भवत्सर्वस्य ग्राहकं तत्त्वमापः प्रथमं दध्रे। धृतवत्यः। यत्र यस्मिन्गर्भे देवा इंद्रादयो विश्वे सर्वेऽपि समपश्यंत संगताः परस्परं पश्यंति। एवं जानन्नेव कश्चित्तत्त्ववित्प्रश्नं करोति॥

तमिन्नर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छंत विश्वे।
अजस्य नाभावध्येकमर्पितं यस्मिन्विश्वानि भुवनानि तस्थुः ॥६॥
तं। इत्। गर्भं। प्रथमं। दध्रे। आपः। यत्र। देवाः। सं॒ऽअगच्छंत। विश्वे।
अजस्य। नाभौ। अधि। एकं। अर्पितं। यस्मिन्। विश्वानि। भुवनानि। तस्थुः॥६॥

अनया पूर्वमंत्रोक्तस्य प्रश्नस्योत्तरमभिधीयते। तमित्तमेव विश्वकर्माणं गर्भं गर्भस्थानीयं प्रथममितरदृष्टेः पूर्वमापो दध्रे। धृतवत्यः। यत्र गर्भे विश्वे सर्वे देवा इंद्रादयः समगच्छंत संगता भवंति। तस्याजस्य नाभावधि नाभौ। अधीति सप्तम्यर्थानुवादी। एकमर्पितमित्यंडाभिप्रायेणोक्तं। अंडं हि प्राक्सर्गान्नाभिस्थाने तिष्ठति। यस्मिन्नंडे विश्वानि भुवनानि सर्वाणि भूतजातानि तस्थुः तिष्ठंति। अथवाजस्य जन्मरहितस्य ब्रह्मणः स्वदृष्टे जले शयानस्य नाभौ सर्वजगद्बंधक उदकं एकं ब्रह्मांडमर्पितं स्थापितं। शिष्टं समानं। अथास्मिन्नर्थे स्मृतिः। आप एव ससर्जादौ तासु वीर्यमवाकिरत्। तदंडमभवद्धैमं सूर्यकोटिसमप्रभमिति॥

न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंति ॥७॥

न। तं। विदाथ। यः। इमा। जजान। अन्यत्। युष्माकं। अंतरं। बभूव।
नीहारेण। प्रावृताः। जल्प्या। च। असुऽतृपः। उक्थऽशसः। चरंति ॥ ७॥

हे नराः तं विश्वकर्माणं न विदाथ न जानीथ य इमेमानि भूतानि जजान उत्पादितवान्। देवदत्तोऽहं यज्ञदत्तोऽहमिति वयमात्मानं विश्वकर्माणं जानीम इति यदुच्येत तदसत् न ह्यहंप्रत्ययगम्यं जीवरूपं विश्वकर्मणः परमेश्वरस्य तत्त्वं किंतु युष्माकमहंप्रत्ययगम्यानां जीवानामंतरमन्यदहंप्रत्ययगम्यादतिरिक्तं सर्ववेदांतवेद्यमीश्वरतत्त्वं बभूव । भवति । विद्यते । जीवरूपवत्तदपि कुतो न विद्म इति चेत् श्रूयतां । नीहारेण प्रावृता यूयं नीहारसदृशेनाज्ञानेनाच्छन्नाः। अतो न जानीथ। यथा नीहारो नात्यंतमसदृष्टेरावरकत्वात् नात्यंतं सत्काष्ठपाषाणादिवत्संबोद्धुमयोग्यत्वात् एवमज्ञानमपि नात्यंतमसदीश्वरतत्त्वावरकत्वात् नापि सद्बोधमाचनिवर्त्यत्वात्। ईदृशेनाज्ञानेन सर्वे जीवाः प्रावृताः। न केवलं प्रावृतत्वं किंतु जल्प्या च देवोऽहं मनुष्योऽहमित्याद्यनृतजल्पनेन प्रावृताः। किंचासुतृपः केनाप्युपायेनासून्प्राणांस्तृप्यंतः। उदरंभरा इत्यर्थः। न तु पारमेश्वरं तत्त्वं विचारितवंतः। न केवलमिहलोकभोगमात्रतृप्ता उक्थशासो नानाविधेषु यज्ञेषूक्थं प्रउगनिष्केवल्यादिकं शंसंतश्चरंति । पृथिव्यां वर्तंते । केवलमैहिकामुष्मिकभोगपरा वर्तध्वेऽतो विश्वकर्माणं देवं न जानीथेत्यर्थः॥ ॥१७॥

यस्ते मन्यो इति सप्तर्चं पंचदशं सूक्तं। मन्युर्नाम तपसः पुत्र ऋषिः । आद्या जगती शिष्टास्त्रिष्टुभः । इदमुत्तरं च मन्युर्देवतं। तथा चानुक्रांतं। यस्ते मन्यो मन्युस्तापसो मान्यवं तु जगत्यादीति॥ अजिरनाम्न्यभिचारसाधने यज्ञ एतत्सूक्तं निविद्धानं। सूचितं च। त्वया मन्यो यस्ते मन्यो। आ० ९.७.। इति॥

यस्ते मन्योऽविधद्वज्र सायक सह ओजः पुष्यति विश्वमानुषक्।
साह्याम दासमार्यं त्वया युजा सहस्कृतेन सहसा सहस्वता ॥ १॥
यः। ते। मन्यो इति। अविधत्। वज्र। सायक। सहः। ओजः। पुष्यति। विश्वं। आनुषक्।
सह्याम। दासं। आर्यं। त्वया। युजा। सहःऽकृतेन। सहसा। सहस्वता ॥ १॥

हे मन्यो क्रोधाभिमानिन्देव। मन्युर्मन्यतेर्दीप्तिकर्मणः क्रोधकर्मणो वधकर्मणो वेति निरुक्तं। १०. २९.। यो यजमानस्ते तुभ्यमविधत् परिचरति हे वज्र वज्रवत्सारभूत सायक सायकवच्छत्रूणां हिंसक स मनुष्यः सहो बलं बाह्यमोजः शरीरं बलं चानुषगनुषक्तं पुष्यति त्वदनुग्रहात्संग्रामे। यस्मादेवं तस्माद्वयं दासमुपक्षयकर्तारमार्यमत्तोऽधिकं चोभयविधं शत्रुं साह्याम । अभिभवेम। केन साधनेनेति तदुच्यते। त्वया युजा त्वया सहायेन। सहायो विशेष्यते । सहस्कृतेन बलोत्पादितेन सहसा सहमानेन परान् सहस्वता बलवता । ईदृशेन त्वया सहायेनेत्यर्थः॥

मन्युरिंद्रो मन्युरेवास देवो मन्युर्होता वरुणो जातवेदाः।
मन्युं विश ईळते मानुषीर्याः पाहि नो मन्यो तपसा सजोषाः ॥ २॥
मन्युः। इंद्रः। मन्युः। एव। आस। देवः। मन्युः। होता। वरुणः। जातऽवेदाः।
मन्युं। विशः। ईळते। मानुषीः। याः। पाहि। नः। मन्यो इति। तपसा। सऽजोषाः॥ २॥

अयं मन्युरिंद्रो मन्युरेव देवः सर्वोऽपि मन्युरेवास। अभवत्। मन्युरेव होता होमनिष्पादकोऽपिः। तथा मन्युर्वरुणोऽपि जातवेदा जातप्रज्ञो वरुणश्च। सर्वेष्वपि तेजस्विषु मन्युसद्भावात्। या मानुषीर्मनुषोऽपत्यभूता विशः प्रजाः संति ता मन्युमेव देवमीळते। स्तुवंति। हे मन्यो तपसैतन्नामकेनाख्यात्मिका सजोषाः समानप्रीतिस्त्वं पाहि। रक्ष॥

अभीहि मन्यो तवसस्तवीयान्तपसा युजा वि जहि शचून् ।
अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्या भरा त्वं नः ॥३॥
अभि । इहि । मन्यो इति । तवसः । तवीयान् । तपसा । युजा । वि । जहि । शचून् ।
अमित्रऽहा । वृत्रऽहा । दस्युऽहा । च । विश्वा । वसूनि । आ । भर । त्वं । नः ॥३॥

हे मन्यो त्वमभीहि । अभिगच्छास्मद्यज्ञं । कीदृशस्त्वं । तवसो बलवतोऽपि तवीयानतिशयेन बलवान् । स त्वं तपसास्मत्पित्रा युजा सहायेन शचून्वि जहि । किंचामित्रहामित्राणां हंता । अमित्रोऽस्निग्धः । तथा वृत्रहावरकाणां शचूणां हंता तथा दस्युहा च । दस्युरुपक्षयकारी शत्रुः । तादृश मन्युदेव त्वं विश्वा सर्वाणि वसूनि धनानि नोऽस्मभ्यमा भर । आहर ॥

त्वं हि मन्यो अभिभूत्योजाः स्वयंभूर्भामो अभिमातिषाहः ।
विश्वचर्षणिः सहुरिः सहावानस्मास्वोजः पृतनासु धेहि ॥४॥
त्वं । हि । मन्यो इति । अभिभूतिऽओजाः । स्वयंऽभूः । भामः । अभिमातिऽसहः ।
विश्वऽचर्षणिः । सहुरिः । सहावान् । अस्मासु । ओजः । पृतनासु । धेहि ॥४॥

हे मन्यो त्वमभिभूत्योजाः परेषामभिभावुकबलः स्वयंभूः स्वयमेवोत्पन्नो भामः क्रुद्धोऽभिमातिषाहः । अभितो हिंसंतीत्यभिमातयः शत्रवः । तेषामभिभविता विश्वचर्षणिः सर्वेषां द्रष्टा सहुरिः सहनशीलः सहावान् सहनवान् ईदृशस्त्वमस्मासु पृतनासु संग्रामेष्वोजो बलं धेहि । देहि ॥

अभागः सन्नप परेतो अस्मि तव क्रत्वा तविषस्य प्रचेतः ।
तं त्वा मन्यो अक्रतुर्जिहीळाहं स्वा तनूर्बलदेयाय मेहि ॥५॥
अभागः । सन् । अप । पराऽइतः । अस्मि । तव । क्रत्वा । तविषस्य । प्रचेत इति प्रऽचेतः ।
तं । त्वा । मन्यो इति । अक्रतुः । जिहीळ । अहं । स्वा । तनूः । बलऽदेयाय । मा । आ ।
इहि ॥५॥

हे प्रचेतः प्रकृष्टज्ञान मन्यो तविषस्य महतस्तव क्रत्वा कर्मणाभागो भागरहितः सन् । त्वां यज्ञेऽयाजकः सन्नित्यर्थः । त्वदनुकूलरहितोऽहमप परेतोऽस्मि । युद्धे शत्रुभिरभिभूतः सन्दूरं गतोऽस्मि । तं तादृशं भागरहितं त्वा त्वां हे मन्यो अक्रतुः कर्मरहितोऽहं जिहीळ । क्रुद्धं कृतवानित्यर्थः । यद्वा । अहमेव त्वत्सहायमेव क्रोधितवान् । अथेदानीं स्वा तनूर्मम शरीरभूतस्त्वं बलदेयाय बलदानाय मेहि । मां प्रामुहि ॥

अयं ते अस्म्युप मेह्यर्वाङ् प्रतीचीनः सहुरे विश्वधायः ।
मन्यो वज्रिन्नभि मामा ववृत्स्व हनाव दस्यूँरुत बोध्यापेः ॥६॥
अयं । ते । अस्मि । उप । मा । आ । इहि । अर्वाङ् । प्रतीचीनः । सहुरे । विश्वऽधायः ।
मन्यो इति । वज्रिन् । अभि । मां । आ । ववृत्स्व । हनाव । दस्यून् । उत । बोधि । आपेः ॥६॥

हे सहुरे शत्रूणां सहनशील विश्वधायो विश्वस्य धर्तर्मन्यो अयं जनोऽहं ते तवास्मि कर्मकृत् । यत एवमतः प्रतीचीनः प्रतिगंतार्वाङस्मदभिमुखं मा मामुपेहि । उपागच्छ । हे मन्यो वज्रिन् मामभ्या ववृत्स्व । अभ्यावर्तस्व । किमर्थमभ्यागमनमिति चेत् उच्यते । हनावावां दस्यूञ्शत्रून् । उतापि चापिर्बंधुं बोधि । बुध्यस्व ॥

अभि प्रेहि दक्षिणतो भवा मेऽधा वृत्राणि जंघनाव भूरि ।
जुहोमि ते धरुणं मध्वो अग्रमुभा उपांशु प्रथमा पिबाव ॥७॥
अभि । प्र । इहि । दक्षिणतः । भव । मे । अध । वृत्राणि । जंघनाव । भूरि ।
जुहोमि । ते । धरुणं । मध्वः । अग्रं । उभौ । उपऽअंशु । प्रथमा । पिबाव ॥७॥

हे मन्यो अभि प्रेहि । अभिगच्छ । मम युद्धं गत्वा च मे मम दक्षिणतो भव । अधाथावां वृत्राणि शत्रूम्भूरि प्रभूतं जंघनाव । हनाव । ते तुभ्यमग्रं श्रेष्ठं मध्वो मधु सोमरसं जुहोमि । उभौ त्वं चाहं चोपांश्वप्रकाशं प्रथमा प्रथमौ सन्तौ पिबाव ॥ ॥१८॥

त्वया मन्यो इति सप्तर्चं षोडशं सूक्तं । आदितस्त्रिसप्तस्त्रिष्टुभस्ततश्चतस्रो जगत्यः । पूर्ववदृषिदेवते । तथा चानुक्रांतं । त्वया मन्यो चतुर्जगत्यंतमिति ॥ अजिरनाम्न्येकाह इदं सूक्तं मरुत्वतीयशस्त्रे निविद्धानं । सूचं पूर्वसूक्त एवोदाहृतं ॥ विनुत्त्यभिभूतिषु वज्रेषुष्वेकाहेष्वेते सूक्ते मरुत्वतीयनिष्केवल्ययोः शस्त्रे । सूचितं च । विनुत्त्यभिभूत्योरिषुवज्रयोश्च मन्युसूक्ते । आ० ९. ८. । इति ॥

त्वया मन्यो सरथमारुजंतो हर्षमाणासो धृषिता मरुत्वः ।
तिग्मेषव आयुधा संशिशाना अभि प्र यंतु नरो अग्निरूपाः ॥१॥
त्वया । मन्यो इति । सऽरथं । आऽरुजंतः । हर्षमाणासः । धृषिताः । मरुत्वः ।
तिग्मऽइषवः । आयुधा । संऽशिशानाः । अभि । प्र । यंतु । नरः । अग्निऽरूपाः ॥१॥

हे मन्यो हे मरुत्वः त्वया सरथं समानमेकमेव रथमास्थायेति शेषः । आरुजंतो गच्छंतो हर्षमाणासो हृष्टा धृषिता धृष्टास्तिग्मेषवस्तीक्ष्णबाणा आयुधायुधानि संशिशानाः सम्यग्निशंतो नरो युद्धस्य नेतार इंद्रादयो देवास्त्वदनुचरा वाग्निरूपा अग्निवत्तीक्ष्णदाहादिकर्माणः यद्वा संगताः क्वचिन्नोऽभि प्र यंतु युद्धे सहायार्थं । अत्र त्वया मन्यो सरथमास्थाय रुजंत इत्यादि निरुक्तमनुसंधेयं । १०. ३०. ॥

अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि ।
हत्वाय शत्रून्वि भजस्व वेद ओजो मिमानो वि मृधो नुदस्व ॥२॥
अग्निःऽइव । मन्यो इति । त्विषितः । सहस्व । सेनाऽनीः । नः । सहुरे । हूतः । एधि ।
हत्वाय । शत्रून् । वि । भजस्व । वेदः । ओजः । मिमानः । वि । मृधः । नुदस्व ॥२॥

हे मन्यो अग्निरिव त्विषितो ज्वलितः सहस्व । अभिभव शत्रून् । हे सहुरे सहनशील सेनानीरेधि भव नोऽस्माकं संग्रामे हूतः सन् । किंच हत्वाय हत्वा शत्रून्वि भजस्व प्रयच्छास्माकं वेदो धनं शत्रुसंबंधि । किंचौजो मिमानोऽस्माकं बलं कुर्वन्मृधः शत्रून्वि नुदस्व । घातयेत्यर्थः ॥

सहस्व मन्यो अभिमातिमस्मे रुजन्मृणन्प्रमृणन्प्रेहि शत्रून् ।
उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयस एकज त्वं ॥३॥
सहस्व । मन्यो इति । अभिऽमातिं । अस्मे इति । रुजन् । मृणन् । प्रऽमृणन् । प्र ।
इहि । शत्रून् ।
उग्रं । ते । पाजः । ननु । आ । रुरुध्रे । वशी । वशं । नयसे । एकऽज । त्वं ॥३॥

हे मन्यो अग्ने अस्माकमभिमातिमभिगंतारं शत्रुं सहस्व । अभिभव । हरन् हिंसन् मृणन् प्रमृणन् प्रकर्षेण हिंसन् यथा पुनर्न जीवेत्तथा कुर्वस्त्वं शत्रून्प्रति प्रेहि । ते तव पाजो बलमुग्रमुत्पूर्णं के गत्वा दधे । आदधाति । न तथा संभवति । हे एकज त्वमसहाय वशी त्वं वशं नयसे प्रापयसि शत्रुं ॥

एको बहूनामसि मन्यवीळितो विशंविशं युधये सं शिशाधि ।
अकृत्तरुक्त्वया युजा वयं द्युमंतं घोषं विजयाय कृण्महे ॥४॥
एकः । बहूनां । असि । मन्यो इति । ईळितः । विशंऽविशं । युधये । सं । शिशाधि ।
अकृत्तऽरुक् । त्वया । युजा । वयं । द्युऽमंतं । घोषं । विऽजयाय । कृण्महे ॥४॥

हे मन्यो ईळितः स्तुतस्त्वमेक एवासहाय एव बहूनां शत्रूणामसि । भवसि पर्याप्तो हंतुं । अतो विशं विशं तां तामस्माद्विरोधिनीं प्रजां युधये युद्धाय सं शिशाधि । सम्यक् तीक्ष्णीकुरु । किंच हे अकृत्तरुगच्छिन्नदीप्ते त्वया युजा सहायेन वयं द्युमंतं दीप्तिमंतं घोषं सिंहनादवंतं विजयाय विशिष्टजयार्थं कृण्महे । कुर्मः ॥

विजेषकृदिंद्र इवानवब्रवोऽस्माकं मन्यो अधिपा भवेह ।
प्रियं ते नाम सहुरे गृणीमसि विद्मा तमुत्सं यत आबभूथ ॥५॥
विजेषऽकृत् । इंद्रःऽइव । अनवऽब्रवः । अस्माकं । मन्यो इति । अधिऽपाः । भव । इह ।
प्रियं । ते । नाम । सहुरे । गृणीमसि । विद्म । तं । उत्सं । यतः । आऽबभूथ ॥५॥

हे मन्यो इंद्र इव विजेषकृद्विजयकर्ता तथानवब्रवोऽनिंदितवचनः । अनवब्रवोऽनवच्छिन्नवचन इति यास्कः । नि० ६. २९. । ईदृशस्त्वमस्माकमधिपा अधिकं पाता रक्षिता भवेहास्मिन्यज्ञे । हे सहुरे शत्रूणां सहनशील ते प्रियं नाम स्तोत्रं गृणीमसि । गृणीमः । स्तुमः । यतो नाम्नः स्तोत्रात्त्वमाबभूथ आभवसि प्रवृद्धो भवसि तमुत्सं बलस्योन्नयितारं विद्म । जानीमः ॥

आभूत्या सहजा वज्र सायक सहो बिभर्ष्यभिभूत उत्तरं ।
क्रत्वा नो मन्यो सह मेद्येधि महाधनस्य पुरुहूत संसृजि ॥६॥
आऽभूत्या । सहऽजाः । वज्र । सायक । सहः । बिभर्षि । अभिऽभूते । उत्ऽतरं ।
क्रत्वा । नः । मन्यो इति । सह । मेदी । एधि । महाऽधनस्य । पुरुऽहूत । संऽसृजि ॥६॥

हे वज्र वज्रवत्सारभूत हे सायक शत्रूणामंतकराभिभूते शत्रूणामभिभावुक मन्यो आभूत्या । आभूतिरभिभवः । तेन सहजाः सहैवोत्पन्नस्त्वमुत्तरमुत्कृष्टतरं सहो बलं बिभर्षि । धारयसि । हे मन्यो क्रत्वा कर्मणा सह नोऽस्माकं मेद्येधि । स्निग्धो भव । कुचेति तदुच्यते । महाधनस्य । संग्रामनामैतत् । संग्रामस्य संसृजि सर्गे । हे पुरुहूत बहुभिराहूतेति मन्युसंबोधनं ॥

संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः ।
भियं दधाना हृदयेषु शवंवः पराजितासो अप नि लयंतां ॥७॥
संऽसृष्टं । धनं । उभयं । संऽआकृतं । अस्मभ्यं । दत्तां । वरुणः । च । मन्युः ।
भियं । दधानाः । हृदयेषु । शवंवः । पराऽजितासः । अप । नि । लयंतां ॥७॥

संकृष्टमविभागमापन्नमुभयमुभयविधं धनं समाक्तं सम्यगानीतमस्मभ्यं दत्तां। कः। वरुणश्च देवो मन्युश्च। भियं भयं हृदये दधानाः शुचयोऽस्मद्विरोधिनः पराजितासः पराजिता अप नि लयंतां। अपनिलीना भवंतु ॥ ॥१९॥ ॥६॥

सप्तमेऽनुवाके षट् सूक्तानि। तत्र सत्येनेति सप्तचत्वारिंशदृचं प्रथमं सूक्तं सवितृसुतायाः सूर्याया आर्षं। नवोनव इति तिस्रोऽनुष्टुभ इति द्वे गृभ्णामीति द्वे यदश्विना पृच्छमानाविति षोडशी पूषा त्वेतो नयत्विति चैकाधोरचतुरिति चैवमेता द्वाविंशतिस्त्रिष्टुभः। तृष्टमेतदिति षोडशी बृहत्यष्टकद्वादशद्व्यष्टकवती। पूर्वापरं चरत इह प्रियं प्रजाया नः प्रजां जनयत्विति तिस्रो जगत्यः। शिष्टास्त्रयस्त्रिंशदनुष्टुभः। आदितः पंचानामृचां सोमो देवता। तत एकादशभिः सूर्या त्वद्विवाहं स्तुतवती। अतस्तत्र योऽर्थः प्रतिपाद्यते स एव देवतात्वेन विज्ञेयः। या तेनोच्यते सा देवतेति न्यायात्। सप्तदशा देवा देवता। अष्टादशाः सोमार्की। एकोनविंशाश्चंद्रमाः। सुकिंशुकमित्याद्या नवर्ची विवाहमंत्रा ऋषिः प्रतिपादकाः। अतस्तत्र तत्र प्रतिपाद्योऽर्थो देवता। परा देह्यशीरा तनूरिति द्वे वध्वा विवाहकाले परिहितस्य वाससः संस्पर्शनिंदयित्र्यौ। ये वध्वश्चंद्रमिति दंपत्योः क्षयरोगस्य नाशिनी। अतस्तद्देवताका। परिशिष्टानां षोडशानां सूर्या देवता। तथा चानुक्रांतं। सत्येन सप्तचत्वारिंशत् सर्वमनुक्रांतं ॥ सूक्तविनियोगो लैंगिकः ॥

सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः।
ऋतेनादित्यास्तिष्ठंति दिवि सोमो अधि श्रितः ॥१॥
सत्येन। उत्तभिता। भूमिः। सूर्येण। उत्तभिता। द्यौः।
ऋतेन। आदित्याः। तिष्ठंति। दिवि। सोमः। अधि। श्रितः ॥१॥

सत्येन ब्रह्मणानंतात्मना। ब्रह्मा खलु देवानां मध्ये सत्यभूतः। तेनाधःस्थितेन भूमिरुत्तभिता। उपरि स्तंभिता। यथाधो न पतेत्तथा कृता। यद्वा। सत्येनानृतप्रतियोगिना धर्मेण भूमिरुत्तभितोद्भूता फलिता भवतीत्यर्थः। असति सत्ये भूम्यां सस्यादयो न फलंति। तथा सूर्येण देवेन द्यौरुत्तभिता। सूर्यो हि वृष्त्यानत्वाद्दिवं दधार। ऋतेन यज्ञेनादित्या अदितेः पुत्रा देवास्तिष्ठंति। यज्ञेन यजमानदत्तेन खल्वाऋत्या देवा उपजीवंति। दिवि द्युलोके सोमो देवानामाप्यायनकारी वल्लीरूपो देवतारूपश्चाधि श्रितः। अधितिष्ठति। इति स्वपतिं सोमं सूर्या स्तौति ॥

सोमेनादित्या बलिनः सोमेन पृथिवी मही।
अथो नक्षत्राणामेषामुपस्थे सोम आहितः ॥२॥
सोमेन। आदित्याः। बलिनः। सोमेन। पृथिवी। मही।
अथो इति। नक्षत्राणां। एषां। उपऽस्थे। सोमः। आऽहितः ॥२॥

सोमेनादित्या अदितेः पुत्रा इंद्रादयो बलिनो भवंति। ऐंद्रवायवादिग्रहपरिग्रहादिति भावः। तथा सोमेनाक्त्वात्मनाग्नी क्तेन पृथिवी भूमिर्मही महती भवति। आक्त्वा वृष्टिद्वारेण सस्यादिसंपत्तेः। अथो अपि चायं सोमो नक्षत्राणामेषां। न चं चायंत इति नक्षत्रा ग्रहचमसादयः। तेषामेषामुपस्थे सोमो रसात्मक आहितः। यद्वा। सिद्धानामेव नक्षत्राणामुपस्थ उपस्थाने द्युलोके सोम आहितः। तृतीयस्थामितो दिवि सोम आसीत्तं गायत्र्याहरत्। तै० ब्रा० ३. २.१.१.। इत्यादिश्रुतेः ॥ देवतारूपसोमपक्षे। सोमेनादित्या देवा बलिनो बलवंतो भवंति तल्लैकैककलास्वादनात्। प्रथमां पिबते वह्निर्द्वितीयां पिबते रविरित्यादिस्मृतेः। सोमेन पृथिवी मही। अमृतसेकेनौषध्याद्यभिवृद्ध्या पृथिव्या बलवत्त्वं। चंद्रस्य नक्षत्राणामुपस्थे स्थितिः प्रसिद्धा ॥

सोमं मन्यते पपिवान्यत्संपिंषंत्योषधिं।
सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन ॥३॥

हे मन्यो अग्ने अस्माकमभिमातिमभिगंतारं शत्रुं सहस्व । अभिभव । घ्नन् हिंसन् मृणन् प्रमृणन् प्रकर्षेण हिंसन् यथा पुनर्न जीवेत्तथा कुर्वस्त्वं शत्रून्प्रति प्रेहि । ते तव पाजो बलमुग्रमसूर्णं के नन्वा रुरुध्रे । आरुंधंति । न तथा संभवति । हे एकज त्वमसहाय वशी त्वं वशं नयसे प्रापयसि शत्रुं ॥

एको बहूनामसि मन्यवीळितो विशंविशं युधये सं शिशाधि ।
अकृत्तरुक्त्वया युजा वयं द्युमंतं घोषं विजयाय कृण्महे ॥४॥
एकः । बहूनां । असि । मन्यो इति । ईळितः । विशंऽविशं । युधये । सं । शिशाधि ।
अकृत्तऽरुक् । त्वया । युजा । वयं । द्युऽमंतं । घोषं । विऽजयाय । कृण्महे ॥४॥

हे मन्यो ईळितः स्तुतस्त्वमेक एवासहाय एव बहूनां शत्रूणामसि । भवसि पर्याप्तो हंतुं । अतो विशं विशं तां तामस्मद्विरोधिनीं प्रजां युधये युद्धाय सं शिशाधि । सम्यक् तीक्ष्णीकुरु । किंच हे अकृत्तरुगच्छिन्नदीप्ते त्वया युजा सहायेन वयं द्युमंतं दीप्तिमंतं घोषं सिंहनादवंतं विजयाय विशिष्टजयार्थं कृण्महे । कुर्मः ॥

विजेषकृदिंद्र इवानवब्रवोऽस्माकं मन्यो अधिपा भवेह ।
प्रियं ते नाम सहुरे गृणीमसि विद्मा तमुत्सं यत आबभूथ ॥५॥
विजेषऽकृत् । इंद्रःऽइव । अनवऽब्रवः । अस्माकं । मन्यो इति । अधिऽपाः । भव । इह ।
प्रियं । ते । नाम । सहुरे । गृणीमसि । विद्म । तं । उत्सं । यतः । आऽबभूथ ॥५॥

हे मन्यो इंद्र इव विजेषकृद्विजयकर्ता तथानवब्रवोऽनिंदितवचनः । अनवब्रवोऽनवच्छिन्नवचन इति यास्कः । नि० ६. २९. । ईदृशस्त्वमस्माकमधिपा अधिकं पाता रक्षिता भवेहास्मिन्यज्ञे । हे सहुरे शत्रूणां सहनशील ते प्रियं नाम स्तोत्रं गृणीमसि । गृणीमः । स्तुमः । यतो नाम्नः स्तोत्रात्त्वमाबभूथ आभवसि प्रवृद्धो भवसि तमुत्सं बलस्योन्नयितारं विद्म । जानीमः ॥

आभूत्या सहजा वज्र सायक सहो बिभर्ष्यभिभूत उत्तरं ।
क्रत्वा नो मन्यो सह मेद्येधि महाधनस्य पुरुहूत संसृजि ॥६॥
आऽभूत्या । सहऽजाः । वज्र । सायक । सहः । बिभर्षि । अभिऽभूते । उत्ऽतरं ।
क्रत्वा । नः । मन्यो इति । सह । मेदी । एधि । महाऽधनस्य । पुरुऽहूत । संऽसृजि ॥६॥

हे वज्र वज्रवत्सारभूत हे सायक शत्रूणामंतकराभिभूते शत्रूणामभिभावुक मन्यो आभूत्या । आभूतिरभिभवः । तेन सहजाः सहैवोत्पन्नस्त्वमुत्तरमुत्कृष्टतरं सहो बलं बिभर्षि । धारयसि । हे मन्यो क्रत्वा कर्मणा सह नोऽस्माकं मेद्येधि । स्निग्धो भव । कुचेति तदुच्यते । महाधनस्य । संग्राममात्रमेतत् । संग्रामस्य संसृजि सर्गे । हे पुरुहूत बहुभिराहूतेति मन्युसंबोधनं ॥

संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः ।
भियं दधाना हृदयेषु शत्रवः पराजितासो अप नि लयंतां ॥७॥
संऽसृष्टं । धनं । उभयं । संऽआकृतं । अस्मभ्यं । दत्तां । वरुणः । च । मन्युः ।
भियं । दधानाः । हृदयेषु । शत्रवः । पराऽजितासः । अप । नि । लयंतां ॥७॥

संरब्धमविभागमापन्नमुभयमुभयविधं धनं समाहृतं सम्यगागीतमस्माभ्यं दत्तां । कः । वरुणश्च देवो मन्युश्च । भियं भयं हृदये दधानाः गृध्नवोऽस्मद्विरोधिनः पराजितासः पराजिता अप नि लयंतां । अपनिलीना भवंतु ॥ ॥१९॥ ॥६॥

सप्तमेऽनुवाके षट् सूक्तानि । तत्र सत्येनेति सप्तचत्वारिंशदृचं प्रथमं सूक्तं सवितृसुतायाः सूर्याया आर्षं । नवोनव इति तिस्रोऽनुष्टुभ इति द्वे गृभ्णामीति द्वे यदश्विना पृच्छमानाविति षट् पूषा त्वितो नयत्विति चैकाधोरचतुरिति चैवमेता दशर्चस्त्रिष्टुभः । तृष्टमेतदिति षोडशर्चो बृहत्यष्टकद्वादशगुद्व्यष्टकवती । पूर्वापरं चरत इह प्रियं प्रजाया नः प्रजां जनयत्विति तिस्रो जगत्यः । शिष्टास्त्रयस्त्रिंशदनुष्टुभः । आदितः पंचानामृचां सोमो देवता । तत एकादशभिः सूर्या स्वविवाहं स्तुतवती । अतस्तत्र योऽर्थः प्रतिपाद्यते स एव देवतात्वेन विज्ञेयः । या तेनोच्यते सा देवतेति न्यायात् । सप्तदश्या देवा देवता । अष्टादश्याः सोमार्कौ । एकोनविंश्याश्चंद्रमाः । सुकिंशुकमित्याद्या नवर्चो विवाहमंत्रा आश्विनः प्रतिपादकाः । अतस्तत्र तत्र प्रतिपाद्योऽर्थो देवता । परा देह्यशीरा तनूरिति द्वे वध्वा विवाहकाले परिहितस्य वाससः संस्पर्शनिंदयित्र्यौ । ये वध्वश्चंद्रमिति दंपत्योः क्षयरोगस्य नाशिनी । अतस्तद्देवताका । परिशिष्टानां षोडशानां सूर्या देवता । तथा चानुक्रांतं । सत्येन सप्तचत्वारिंशत् सर्वमनुक्रांतं ॥ सूक्तविनियोगो लैंगिकः ॥

सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः ।
ऋतेनादित्यास्तिष्ठंति दिवि सोमो अधि श्रितः ॥१॥
सत्येन । उत्तभिता । भूमिः । सूर्येण । उत्तभिता । द्यौः ।
ऋतेन । आदित्याः । तिष्ठंति । दिवि । सोमः । अधि । श्रितः ॥१॥

सत्येन ब्रह्मणानंतात्मना । ब्रह्मा खलु देवानां मध्ये सत्यभूतः । तेनाधःस्थितेन भूमिरुत्तभिता । उपरि स्तंभिता । यथाधो न पतेत्तथा कृता । यद्वा । सत्येनानृतप्रतियोगिना धर्मेण भूमिरुत्तभितोद्धृता फलिता भवतीत्यर्थः । असति सत्ये भूम्यां सस्यादयो न फलंति । तथा सूर्येण देवेन द्यौरुत्तभिता । सूर्यो हि द्युस्थानत्वाद्दिवं दधार । ऋतेन यज्ञेनादित्या अदितेः पुत्रा देवास्तिष्ठंति । यज्ञेन यजमानदत्तेन खल्वाहुत्या देवा उपजीवंति । दिवि द्युलोके सोमो देवानामाप्यायनकारी वल्लीरूपो देवतारूपश्चाधि श्रितः । अधितिष्ठति । इति स्वपतिं सोमं सूर्या स्तौति ॥

सोमेनादित्या बलिनः सोमेन पृथिवी मही ।
अथो नक्षत्राणामेषामुपस्थे सोम आहितः ॥२॥
सोमेन । आदित्याः । बलिनः । सोमेन । पृथिवी । मही ।
अथो इति । नक्षत्राणां । एषां । उपऽस्थे । सोमः । आऽहितः ॥२॥

सोमेनादित्या अदितेः पुत्रा इंद्रादयो बलिनो भवंति । ऐंद्रवायवादिग्रहपरिग्रहादिति भावः । तथा सोमेनाहुत्यात्मनापो हुतेन पृथिवी भूमिर्मही महती भवति । आहुत्या वृष्टिद्वारेण सस्यादिसंपत्तेः । अथो अपि चायं सोमो नक्षत्राणामेषां । न चं चायंत इति नक्षत्रा ग्रहचमसादयः । तेषामेषामुपस्थे सोमो रसात्मक आहितः । यद्वा । सिद्धानामेव नक्षत्राणामुपस्थ उपस्थाने द्युलोके सोम आहितः । तृतीयस्थामितो दिवि सोम आसीत्तं गायत्र्याहरत् । तै० ब्रा० ३. २. १. १. । इत्यादिश्रुतेः ॥ देवतारूपसोमपक्षे । सोमेनादित्या देवा बलिनो बलवंतो भवंति तस्यैकैककलास्वादनात् । प्रथमां पिबते वह्निर्द्वितीयां पिबते रविरित्यादिस्मृतेः । सोमेन पृथिवी मही । अमृतसेकेनौषध्याद्यभिवृद्ध्या पृथिव्या बलवत्त्वं । चंद्रस्य नक्षत्राणामुपस्थे स्थितिः प्रसिद्धा ॥

सोमं मन्यते पपिवान्यत्संपिंषंत्योषधिं ।
सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन ॥३॥

सोमं । मन्यते । पपिऽवान् । यत् । संऽपिंषंति । ओषधिं ।
सोमं । यं । ब्रह्माणः । विदुः । न । तस्य । अश्नाति । कः । चन ॥३॥

सोमं मन्यते । कः । यः पपिवान् । मैथुनकामार्थं चिकित्सार्थं पीतः सोमो येन । यद्यमित्यर्थः । यं सोममोषधिं वल्लीरूपं संपिंषंति । सामर्थ्याद्रासायनिकाः । न च स साक्षात्सोमः । तर्हि कः । उच्यते । सोमं हि तं मन्यते यं ब्रह्माणः । यद्ब्रह्मशब्दो ब्राह्मणशब्दपर्यायोऽस्ति कुतो नु चरसि ब्रह्मन् तत्रो मा ब्रूया निधिपाय ब्रह्मन्नित्यादिप्रयोगात् । ब्राह्मणा इत्यर्थः । ते चर्त्विजो यजमानस्य यागसाधनभूतं संस्कर्तुं विदुः जानंति तस्मांशुं । यद्वा । कर्मणि षष्ठी । तं सोमं कश्चन नाश्नाति । कश्चिदप्ययज्वेति शेषः । यज्वैनं भक्षयितुमर्हति नान्य इत्यर्थः । एवमोषधिपक्षे ॥ अथ चंद्रपक्ष उच्यते । तं सोमं मन्यते पपिवान् पीतवान्यजमानो यद्यमोषधिरूपं संपिंषंत्यभिषवग्रावभिरध्वर्यादयो यजमानस्य । न च स सोमः । कस्तर्हि । यं ब्रह्माणो ब्राह्मणा अभिज्ञा देवज्ञा विदुः कथयंति चंद्रमसं न तस्याश्नाति कश्चनादेवो देवेभ्योऽन्यो मनुष्यादिः । देवा अग्न्यादयो रश्मयो वा । यश्चार्हसोमस्यासोमत्वं न निंदायै अपि त्वितरस्य स्तुत्या इति मंतव्यं । अपशवोऽन्ये गोअश्वेभ्य इत्यादिवत् ॥ एवमत्र सोम्या उभयथा योज्याः ॥

आऽच्छद्विधानैर्गुपितो बार्हतैः सोम रक्षितः ।
ग्राव्णामिच्छृण्वन्तिष्ठसि न ते अश्नाति पार्थिवः ॥४॥
आऽच्छत्ऽविधानैः । गुपितः । बार्हतैः । सोम । रक्षितः ।
ग्राव्णां । इत् । शृण्वन् । तिष्ठसि । न । ते । अश्नाति । पार्थिवः ॥४॥

हे सोम आच्छद्विधानैः । आच्छादयंति विधानानि येषां विद्यंते त आच्छद्विधानाः । तैर्गुपितः । तथा बार्हतैर्गुपितः । स्वानभ्राजांघार्यादिभिः सप्तभिः सोमपालै रक्षितस्त्वं । एते वा अमुष्मिँल्लोके सोममरक्षन् । तै० सं० ६. १. १०. ५. । इति ब्राह्मणं । ग्राव्णामिच्छृण्वन्नभिषवग्राव्णां ध्वनिं शृण्वन्नेव तिष्ठसि । ते त्वां पार्थिवः पार्थिवो जनो नाश्नाति । न हि द्युस्थचंद्ररूपोऽचक्षैः पानयोग्यो भवति । चंद्रमा वै सोमो देवानामन्नं तं पौर्णमास्यायामभिषुण्वंतीति वाजसनेयकं ॥

यत्त्वा देव प्रपिबंति तत आ प्यायसे पुनः ।
वायुः सोमस्य रक्षिता समानां मास आकृतिः ॥५॥
यत् । त्वा । देव । प्रऽपिबंति । ततः । आ । प्यायसे । पुनरिति ।
वायुः । सोमस्य । रक्षिता । समानां । मासः । आऽकृतिः ॥५॥

हे देव सोम यद्यदा त्वा त्वां प्रपिबंत्योषधिरूपं त्रिष्वपि सवनेषु ततोऽनंतरमेव पुनरा प्यायसे । आ प्यायस्व सं । ऋ० १. ९१. १६. । इति प्रातःसवने सं ते पयांसि । ऋ० १. ९१. १८. । इत्युत्तरयोः सवनयोराप्यायसे । किंच वायुस्त्वं सोमस्य रक्षिता । यथा न शुष्यति तथा । वायुः शोषकः प्रसिद्धो लोके । किंच मासः । परिमीयत इति मासः सोमः । स च समानां संवत्सराणामाक्षतिराकर्ता व्यवच्छेदको भवति । संवत्सरे संवत्सरे वसंतादिकालेष्वनुष्ठीयमानत्वाद्वसंते वसंते ज्योतिषा यजेतेति श्रुतेः । यद्वा । सोमाधारवनस्पतिविकारग्रहद्वारेण वायुः सोमरसस्य रक्षिता भवति । वायुगोपा वनस्पतय इति श्रुतेः । एवं वल्लीरूपसोमपक्षे योजना ॥ चंद्रपक्षे तु हे देव सोम यद्यदा त्वा त्वां प्रपिबंति रश्मयोऽपरपक्षे ततोऽनंतरमेव पूर्वपक्षे पुनरा प्यायसे । वायुश्च सोमस्य तव रक्षिता । वाय्वधीनत्वाच्चंद्रगतेः । किंच समानां संवत्सराणां मासः ॥ षष्ठ्येकवचनमेतत् ॥ मासस्याकृतिश्च कर्ता त्वं चासि । एकैककलाक्षयसंवृद्धिभ्यां हि मासः पूर्यते तैः संवत्सर इति ॥ ॥२०॥

रैभ्यासीदनुदेयी नाराशंसी न्योचनी। सूर्यायै भद्रमिद्वासो गाथयेति परिष्कृतं ॥६॥
रैभी। आसीत्। अनुऽदेयी। नाराशंसी। निऽओचनी। सूर्यायाः। भद्रं। इत्। वासः। गाथया। एति। परिऽकृतं ॥६॥

आभिः सूर्या स्वविवाहमसौदित्युक्तं। सूर्या सावित्री ब्रूते। रैभी। रैभ्यः कावषेयः। रैभीः शंसति रैभंतो वै देवाश्चषयश्च स्वर्गं लोकमायन्नित्यादिब्राह्मणविहिता रैभ्यः। ऐ० ब्रा० ६. ३२.। सा रैभ्यनुदेय्यासीत्। दीयमानवधूविनोदनायानुदीयमाना वयस्यासीत्। तथा नाराशंसी। प्राता रत्नं। ऋ० १. १२५. १.। इत्यादिका मनुष्याणां स्तुतयो नाराशंस्यः। सा नाराशंसी न्योचनी। उचतिः सेवाकर्मा। सा वधूपशूषार्थं दीयमाना दास्यभवत्। सूर्यायाः मम भद्रं वासो विचित्रं दुकूलादिकमाच्छादनयोग्यं वस्त्रं गाथया परिष्कृतमलंकृतमेति। गाथा गीयत इत्यादिब्राह्मणोक्ता गाथा। तया गाथया यत्परिष्कृतमस्ति तद्वासोऽभवदिति॥

चित्तिरा उपबर्हणं चक्षुरा अभ्यंजनं। द्यौर्भूमिः कोश आसीद्यदयात्सूर्या पतिं ॥७॥
चित्तिः। आः। उपऽबर्हणं। चक्षुः। आः। अभिऽअंजनं। द्यौः। भूमिः। कोशः। आसीत्। यत्। अयात्। सूर्या। पतिं ॥७॥

चित्तिर्देवतोपबर्हणमाः। आसीत्। चक्षुरभ्यंजनमाः। आसीत्। तथा हि। वृचस्य कनीनिका परापतत्त्रिककुन्नामपर्वते। तेन चैककुदेनांजनसजातीयेन चक्षुषी आंजते। तच्चक्षुरेवांजनमासीदिति। द्यौश्च भूमिश्च कोश आसीत्। कोशस्थानीये अभूतां। यदादा सूर्या पतिं स्वकीयं नवभर्तारं सोममयात् अगच्छत् तदैवमुपकरणान्यासन्॥

सोमा आसन्प्रतिधयः कुरीरं छंद ओपशः।
सूर्यायै अश्विना वराग्निरासीत्पुरोगवः ॥८॥
सोमाः। आसन्। प्रतिऽधयः। कुरीरं। छंदः। ओपशः।
सूर्यायाः। अश्विना। वरा। अग्निः। आसीत्। पुरःऽगवः ॥८॥

सूर्याया रथस्य सोमास्त्विषादयः प्रतिधय आसन्। प्रतिधीयंत इति प्रतिधय ईषातिर्यगायतकाष्ठादयः। तथा कुरीरं छंदः कुरीरनामकं छंदोऽनस ओपशोऽभवत्। येनोपशेरते स ओपशः। तादृशायाः सूर्याया अश्विनाश्विनौ वरा वरावास्तामिति शेषः। तस्या विवाहे पुरोगवः पुरोगंता पुरतो गंता यः पूर्वमेव प्रस्तावार्थं गच्छति तत्स्थानीयोऽग्निरासीत्॥ प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत्सूर्यां सावित्रीं तस्यै सर्वे देवा वरा आगच्छन्नित्यादि हि ब्राह्मणं। ऐ० ब्रा० ४. ७.। अचायमभिप्रायः। प्रजापतिः सविता स्वदुहितरं सोमाय प्रायच्छत्। सोमाय दास्यामीति मनीषामकरोत्। तस्मिन्समये पुत्र्या उपचारार्थं प्रदानान्युक्तान्यभवन्। तथा च सत्यश्विनौ प्रबलौ संतावाजिं पुरतो गत्वा तामलभेतामिति। उत्तरत्रापि सोमो वधूयुरभवदित्यादिनायमेवार्थः स्पष्टो भविष्यति। घोषावृणीत जेन्येत्यादिकमुक्तं। ऋ० १. ११९. ५.॥

सोमो वधूयुरभवदश्विनास्तामुभा वरा। सूर्यां यत्पत्ये शंसंतीं मनसा सवितादात् ॥९॥
सोमः। वधूऽयुः। अभवत्। अश्विना। आस्तां। उभा। वरा। सूर्यां। यत्। पत्ये। शंसंतीं। मनसा। सविता। अदात् ॥९॥

सोमो वधूयुर्वधूकामो वरोऽभवत्। तस्मिन्समयेऽश्विनाश्विनावुभौभौ वरा वरावास्तां। अभूतां। यदादा सूर्यां पत्ये शंसंतीं पतिं कामयमानां। पर्याप्तयौवनामित्यर्थः। सूर्यां मनसा सहिताय सोमाय वराय सविता तत्पितादात् प्रादात् दित्सां चकार॥

मनो॑ अस्या॒ अन॑ आसी॒द्द्यौरा॑सीदु॒त छ॒दिः ।
शु॒क्रावन॑ड्वाहा॒वास्तां॒ यदया॑त्सू॒र्या गृ॒हं ॥१०॥
मनः॑ । अ॒स्याः॒ । अन॑ः । आ॒सी॒त् । द्यौः । आ॒सी॒त् । उ॒त । छ॒दिः॑ ।
शु॒क्रौ । अ॒न॒ड्वाहौ॑ । आ॒स्ता॒म् । यत् । अया॑त् । सू॒र्या॑ । गृ॒हं ॥१०॥

अस्याः सूर्यायाः पत्युर्गृहं गच्छंत्या अनो रथो मन आसीत् । या पतिगृहं त्वया गच्छामीति मतिरासीत् सान आसीत् । उतापि च तस्या अनसो द्यौर्द्युलोकश्छदिरुपर्यपिधानमासीत् । शुक्रौ दीप्तौ सूर्याचंद्रमसावनड्वाहौ रथस्य वोढारावास्तां । अभवतां । यदा यदा सूर्या गृहं सोममयात् अगात् ॥ ॥२१॥

ऋक्सा॒माभ्या॒मभि॑हितौ॒ गावौ॑ ते साम॒नावि॑तः ।
श्रोत्रं॑ ते चक्रे आस्तां दि॒वि पंथा॑श्चराच॒रः ॥११॥
ऋक्ऽसा॒माभ्या॑ं । अभि॑ऽहितौ । गावौ॑ । ते॒ । सा॒म॒नौ । इ॒तः॑ ।
श्रोत्रं॑ । ते॒ । च॒क्रे इति॑ । आ॒स्ता॒म् । दि॒वि । पंथा॑ः । च॒रा॒च॒रः ॥११॥

हे सूर्ये देवि ते तवर्क्सामाभ्यामभिधानीस्थानाभ्यामभिहितौ गावौ गोस्थानीयौ सूर्याचंद्रमसौ सामनौ सामानौ संतावितः । गच्छतः । अनोवाहौ पत्युर्गृहं प्रति गच्छतः । ते तव श्रोत्रं । श्रोत्रे इत्यर्थः । वरस्य गुणग्राहिणी श्रोत्रे एव चक्रे आस्तां । मनोरूपस्य रथस्य श्रोत्रे चक्रे अभवतामित्यर्थः । दिवि पंथाश्चराचरश्चलाचलोऽत्यंतं गमनसाधनभूतो मार्गोऽभूत् । रथसंचारप्रदेशो द्युलोक आसीत् ॥

शु॒चीं ते॑ चक्रे या॒त्या व्या॒नो अक्ष॒ आह॑तः ।
अनो॑ मन॒स्मयं॑ सू॒र्यारो॑हत्प्रय॒ती पति॑ं ॥१२॥
शु॒ची इति॑ । ते॒ । च॒क्रे इति॑ । या॒त्याः । वि॒ऽआ॒नः । अक्ष॑ः । आऽह॑तः ।
अन॑ः । म॒न॒स्मय॑ं । सू॒र्या॑ । आ । अ॒रो॒ह॒त् । प्र॒ऽय॒ती । पति॑ं ॥१२॥

यात्या गच्छंत्यास्ते तवानसश्चक्रे चंक्रमणशीले रथांगे शुची श्रोत्रे आस्तां । व्यानस्तव व्यानो वायुरक्षः । उभयरथचक्रच्छिद्रगामिनी या काष्ठा सा च रथस्य सर्वं भारं वहति । सोऽक्षो व्यानोऽभूत् । मनस्मयं मनोमयमनः शकटं सूर्या पतिं सोमं प्रति प्रयती प्रकर्षेण गच्छंत्यारोहत् । आरूढवती । पतिं प्रति जिगमिषोर्मनोरूपस्य रथस्य पत्युर्गुणआविणी श्रोत्रे एव चक्रे अभूतां व्यानो धारको वायुश्रेष्ठकोऽक्षोऽभूदित्यर्थः ॥

सू॒र्यायां॑ वहतुः प्रागा॑त्सवि॒ता यम॑वासृजत् ।
अघा॑सु॒ हन्य॑ंते गावोऽर्जु॒न्योः॑ पर्यु॑ह्यते ॥१३॥
सू॒र्यायाः॑ । व॒ह॒तुः॑ । प्र । अ॒गा॒त् । स॒वि॒ता । यं । अव॑ऽअसृजत् ।
अघा॑सु । हन्य॑ंते । गावः॑ । अ॒र्जु॒न्योः॑ । परि॑ । उ॒ह्य॒ते॒ ॥१३॥

सोमाय प्रदित्सितायाः सूर्यायाः वहतुः । कन्याप्रियार्थं दातव्यो गवादिपदार्थो वहतुः । स च प्रागात् । तस्या अपि पूर्वमगच्छत् । यं वहतुं सवितास्याः पितावासृजत् अवसृष्टवान् । प्रादादित्यर्थः । कदा सागच्छत् कदा वहतुरित्युभयोः काल उच्यते । अघासु । मघास्वित्यर्थः । मघानश्चेषु गावः सवित्रा दत्ता गावः सोमगृहं प्रति हन्यंते । दंडैस्ताड्यंते प्रेरणार्थं । अर्जुन्योः । फल्गुन्योरित्यर्थः । तयोर्नक्षत्रयोः सवितुः सकाशात् परि सोमगृहं प्रत्युह्यते । नीयते रथेन ॥

यदश्विना पृच्छमानावयातं त्रिचक्रेण वहतुं सूर्यायाः ।
विश्वे देवा अनु तद्वामजानन्पुत्रः पितरावृणीत पूषा ॥१४॥
यत् । अश्विना । पृच्छमानौ । अयातं । त्रिऽचक्रेण । वहतुं । सूर्यायाः ।
विश्वे । देवाः । अनु । तत् । वां । अजानन् । पुत्रः । पितरौ । अवृणीत । पूषा ॥१४॥

हे अश्विनाश्विनौ यद्यदा पृच्छमानौ सवितारं प्रष्टुमयातं अगच्छतं । केन साधनेनायातं तदुच्यते । त्रिचक्रेण चक्रत्रययुक्तेन रथेन । किं पृच्छमानौ । सूर्यायाः वहतुं । विवाहमित्यर्थः । तत्तदानीं वां युवां सवितारं प्रति गच्छंतौ विश्वे सर्वे देवा अन्वजानन् । अनुज्ञातवंतः । तथा पितरौ पुत्रोऽश्विनोः पुत्रः पूषावृणीत । वृतवान् ॥

यदयातं शुभस्पती वरेयं सूर्यामुप । कृधी चक्रं वामासीत्कृधी देष्ट्राय तस्थथुः ॥१५॥
यत् । अयातं । शुभः । पती इति । वरेऽयं । सूर्या । उप । कृ । एकं । चक्रं । वां ।
आसीत् । कृ । देष्ट्राय । तस्थथुः ॥१५॥

हे शुभस्पती उदकस्य स्वामिनौ यद्यावयातं अगच्छतं । कं प्रति । वरेयं वरणीयायाः सूर्यायाः संबंधिनं वरैर्याचितव्यं वा । सवितारमित्यर्थः । किमर्थं । सूर्यामुप गंतुं । वां भवतोः संप्रति दृश्यमानमिदमेकं चक्रं क्रासीत्पुरा । कृ वां युवां देष्ट्राय दानाय प्रवृत्तौ तस्थथुरित्यश्विनोर्निवासं पृच्छति ॥ ॥२२॥

द्वे ते चक्रे सूर्ये ब्रह्माण ऋतुथा विदुः । अथैकं चक्रं यद्गुहा तदद्धातय इद्विदुः ॥१६॥
द्वे इति । ते । चक्रे इति । सूर्ये । ब्रह्माणः । ऋतुऽथा । विदुः । अथ । एकं । चक्रं ।
यत् । गुहा । तत् । अद्धातयः । इत् । विदुः ॥१६॥

अथ स्वयमेव स्वात्मानं प्रति सूर्या वदति । हे सूर्ये ते तव द्वे चक्रे प्रज्ञाते पुरा दृष्टे द्वे एव चंद्रसूर्यात्मके ऋतुथर्तुषु विनिर्दिष्टे चक्रे ब्रह्माणो ब्राह्मणा विदुः । अथैकं चक्रं तृतीयं संवत्सरात्मकं गुहा गुहायां निहितं यदस्ति तदद्धातय इत् । एतन्मेधाविनामसु पठितं । मेधाविन एव विदुः । जानंति ॥

सूर्यायै देवेभ्यो मित्राय वरुणाय च । ये भूतस्य प्रचेतस इदं तेभ्योऽकरं नमः ॥१७॥
सूर्यायै । देवेभ्यः । मित्राय । वरुणाय । च । ये । भूतस्य । प्रऽचेतसः । इदं । तेभ्यः ।
अकरं । नमः ॥१७॥

सूर्यायै सूर्यस्य पत्न्यै देवेभ्योऽग्न्यादिभ्यो मित्राय वरुणाय च ये च भूतस्य भूतजातस्य प्रचेतसः सुमतयो ऽभिमतप्रदा भवंति तेभ्यः सर्वेभ्य इदं नमो नमस्कारमकरं । करोमि ॥

पूर्वापरं चरतो माययैतौ शिशू क्रीळंतौ परि यातो अध्वरं ।
विश्वान्यन्यो भुवनाभिचष्टे ऋतूँरन्यो विदधज्जायते पुनः ॥१८॥
पूर्वऽअपरं । चरतः । मायया । एतौ । शिशू इति । क्रीळंतौ । परि । यातः । अध्वरं ।
विश्वानि । अन्यः । भुवना । अभिऽचष्टे । ऋतून् । अन्यः । विऽदधत् । जायते ।
पुनरिति ॥१८॥

कश्चित्पूर्वं गच्छति सूर्यः । अन्यस्तमनुचरति चंद्रमाः । एवं पूर्वापरं पौर्वापर्येण मायया स्वप्रज्ञानेनेतावादित्यचंद्रौ चरतः । गच्छतो दिवि । तौ शिशू । शिशुवन्नमणाज्जायमानत्वाद्वा शिशू इत्युच्येते । शिशू संतौ क्रोळंतावंतरिक्षे विहरंतावध्वरं परि यातः । यज्ञं प्रतिगच्छतः । तयोरन्य आदित्यो विश्वानि भुवनान्यभिचष्टे । अभिपश्यति । ऋतून्वसंतादीनन्यश्चंद्रमा विदधत्कुर्वन्मासानर्धमासांश्च कुर्वन्पुनर्जायते । यद्युभयोरपि पुनर्जातिरस्ति तथापि सूर्यस्य सर्वदा प्रवृत्तेरुदयो नाभिप्रेतः । चंद्रस्य तु ह्रासवृद्धिसन्न्यावात्पुनःपुनर्जायत इत्युक्तिर्युक्ता । चंद्रमा वै जायते पुनः । तै० ब्रा० ३ ९. ५. ४. । इत्यादिश्रुतेः ॥

अतिमूर्तिनाम्न्येकाहे शुक्लपक्षे चांद्रमसीष्टिः । तत्र नवोनव इत्येषा याज्या । सूचितं च । नवोनवो भवति जायमानस्तरणिर्विश्वदर्शतः । आ० ९. ८. । इति ॥

नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रं ।
भागं देवेभ्यो वि दधात्यायन्प्र चंद्रमास्तिरते दीर्घमायुः ॥ १९॥
नवःऽनवः । भवति । जायमानः । अह्नां । केतुः । उषसां । एति । अग्रं ।
भागं । देवेभ्यः । वि । दधाति । आऽयन् । प्र । चंद्रमाः । तिरते । दीर्घं । आयुः ॥ १९॥

अयं चंद्रमा जायमानः प्रतिदिनं जायमान एकैककलाधिक्येनोत्पद्यमानः सन्नवोनवो भवति । प्रतिदिनं नूतन एव भवति । एतत्पूर्वपक्षाद्यभिप्रायं । तथाह्नां दिवसानां केतुः प्रज्ञापकः प्रतिपदादीनां तिथीनां चंद्रकलाह्रासवृद्ध्यधीनत्वात् । तादृशश्चंद्रमा उषसां प्रभातीनामग्रमेति । एतत्कृष्णपक्षांताभिप्रायं । केचनैतं पादमादित्यदैवत्यमाहुः । तस्मिन्पक्षेऽह्नां केतुत्वमुषसामग्रगतिश्च प्रसिद्धे । देवेभ्यो भागं हविर्भागं वि दधाति । करोति । उभयपक्षांते । किं कुर्वन् । आयन् प्रतिदिनं ह्रासवृद्ध्या पक्षांतमभिगच्छन् । एतदर्धमासाभिप्रायं । चंद्रमा उक्तलक्षणो देवो दीर्घमायुस्तिरते । वर्धयति ॥

सुकिंशुकं शल्मलिं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रं ।
आ रोह सूर्ये अमृतस्य लोकं स्योनं पत्ये वहतुं कृणुष्व ॥ २०॥
सुऽकिंशुकं । शल्मलिं । विश्वऽरूपं । हिरण्यऽवर्णं । सुऽवृतं । सुऽचक्रं ।
आ । रोह । सूर्ये । अमृतस्य । लोकं । स्योनं । पत्ये । वहतुं । कृणुष्व ॥ २०॥

सुकिंशुकं शोभनकिंशुकवृक्षनिर्मितं तथा शल्मलिं शल्मलिवृक्षनिर्मितं विश्वरूपं नानारूपं हिरण्यवर्णं हितरमणीयवर्णं हिरण्यालंकारयुक्तं वा सुवृतं सुष्ठुवर्तनं सुचक्रं शोभनचक्रोपेतं रथं हे सूर्य आ रोह । अमृतस्य लोकं स्थानं स्योनं सुखकरं पत्ये सोमाय वहतुं वहनमात्मनः प्रापणं कृणुष्व । कुरुष्व । अत्र निरुक्तं । १२. ८. । द्रष्टव्यं ॥ ॥ २३॥

उदीर्ष्वातः पतिवती ह्येषा विश्वावसुं नमसा गीर्भिरीळे ।
अन्यामिच्छ पितृषदं व्यक्तां स ते भागो जनुषा तस्य विद्धि ॥ २१॥
उत् । ईर्ष्व । अतः । पतिऽवती । हि । एषा । विश्वऽवसुं । नमसा । गीःऽभिः । ईळे ।
अन्यां । इच्छ । पितृऽसदं । विऽअक्तां । सः । ते । भागः । जनुषा । तस्य । विद्धि ॥ २१॥

आभिर्गृणां विवाहः सूयते । हे विश्वावसो अतः स्थानात्कन्यासमीपादुदीर्ष्व । उत्तिष्ठ । एषा कन्या पतिवती हि संजाता । अत उदीर्ष्वेति वातःशब्दो योज्यः । विश्वावसुमेतन्नामानं गंधर्वं नमसा नमस्कारेण गीर्भिः स्तुतिभिरीळे । स्तौमि । तर्ह्येनां विहाय कां स्वीकरोमीति यदि ब्रूषे तर्ह्यन्यां पितृषदं पितृकुले स्थितां

अक्लामनूढेति परिस्फुटां विगतांजनां वा । स्वनोन्नमादिराहित्येनाप्रौढामित्यर्थः । स तादृशः पदार्थस्ते तव भागः कल्पितः । तस्य तं भागं विद्धि जानीहि जनुषा जन्मना । लभस्वेत्यर्थः ॥

उदीर्ष्वातो विश्वावसो नमसेळामहे त्वा ।
अन्यामिच्छ प्रफर्व्यं१ सं जायां पत्या सृज ॥२२॥
उत् । ईर्ष्व । अतः । विश्वावसो इति विश्वऽवसो । नमसा । ईळामहे । त्वा ।
अन्यां । इच्छ । प्रऽफर्व्यं । सं । जायां । पत्या । सृज ॥२२॥

अतोऽस्माच्छयनाद्धे विश्वावसो कन्यास्वामिन्गंधर्व उदीर्ष्व । उन्नच्छ ॥ ईर गतौ आदादिकः । अनुदात्तेत् । तस्य लोटि रूपं ॥ विश्वावसुर्नाम गंधर्वः कन्यानामधिपतिर्यतः । लभामि तेन कन्यामिति हि मंत्रः । स तादृश देव त्वां नमसा नमस्कारेणेळामहे । स्तुमः । स त्वमन्यां प्रफर्व्यं बृहन्नितंबां कन्यामिच्छ । जायां मां पत्या सह पुनः सं सृज ॥

अनृक्षरा ऋजवः संतु पंथा येभिः सखायो यंति नो वरेयं ।
समर्यमा सं भगो नो निनीयात्सं जास्पत्यं सुयममस्तु देवाः ॥२३॥
अनृक्षराः । ऋजवः । संतु । पंथाः । येभिः । सखायः । यंति । नः । वरेऽयं ।
सं । अर्यमा । सं । भगः । नः । निनीयात् । सं । जाःपत्यं । सुऽयमं । अस्तु । देवाः ॥२३॥

हे देवाः पंथाः पंथानो मार्गा अनृक्षराः । ऋक्षरः कंटक उच्यते । कंटकरहिता ऋजवोऽकुटिलाश्च संतु येभिर्यैः पथिभिर्नोऽस्माकं सखायो वरप्रेषिता वरेयं वरैर्याचितव्यं पितरं प्रति यंति गच्छंति ते पंथा इति । किंचार्यमा देवो नोऽस्मान् सं निनीयात् । सम्यक् प्रापयेत् । तथा भगो देवः सं निनीयात् । हे देवाः आसंगतमस्तु पतिकुलमिति शेषः । तथेदं जास्पत्यं जायापत्योर्युगलं सुयममस्तु । सुमिथुनमस्तु ॥

पत्न्या योक्त्रविमोचने प्र त्वा मुंचामीत्येषा । सूचितं च । अथास्या योक्त्रं विचृतेत्प्र त्वा मुंचामि वरुणस्य पाशात् । आ० १. ११. । इति ॥

प्र त्वा मुंचामि वरुणस्य पाशाद्येन त्वाबध्नात्सविता सुशेवः ।
ऋतस्य योनौ सुकृतस्य लोकेऽरिष्टां त्वा सह पत्या दधामि ॥२४॥
प्र । त्वा । मुंचामि । वरुणस्य । पाशात् । येन । त्वा । अबध्नात् । सविता । सुऽशेवः ।
ऋतस्य । योनौ । सुऽकृतस्य । लोके । अरिष्टां । त्वा । सह । पत्या । दधामि ॥२४॥

जातं प्राणिनं सविचा प्रेरितो वरुण आत्मपाशैर्बध्नाति । तस्माद्वरुणस्य पाशात् हे वधु त्वा त्वां प्र मुंचामि येन त्वा त्वां सविता वरुणस्य प्रेरकः सुशेवः सुखोऽबध्नात् बंधनं कृतवान् । यज्ञांगपत्नीं योक्त्रेण बध्नाति । बंधनस्य वरुणोऽभिमानी । अतो वरुणपाशाद्योक्त्रात्प्र मुंचामि येन योक्त्रेण सविता कर्मणामनुज्ञाता देव ऋत्विक्पाशेनाबध्नात् । तं मोचयित्वा चर्तस्य यज्ञस्य योनौ स्थाने यागभूमौ सुकृतस्य लोके कर्मक्षेत्रे भूलोके चारिष्टामहिंसितां त्वां पुत्रार्थं पत्या सह दधामि । स्थापयामि ॥

प्रेतो मुंचामि नामुतः सुबद्धाममुतस्करं । यथेयमिंद्र मीढ्वः सुपुत्रा सुभगासति ॥२५॥
प्र । इतः । मुंचामि । न । अमुतः । सुऽबद्धां । अमुतः । करं । यथा । इयं । इंद्र । मीढ्वः ।
सुऽपुत्रा । सुऽभगा । असति ॥२५॥

इतः पितृकुलात्त्वा मुंचामि त्वां नामुतो भर्तृगृहात्त्वामुंचामि । अमुतो भर्तृगृहे सुबद्धां करं । यथेयं कन्या हे इंद्र भीढ्वः सेक्तः सुपुत्रा सुभगा सुष्ठु भाग्या वासति भवति तथा कुरु ॥ ॥२४॥

विवाहानंतरभाविनि प्रयाणे पूषा त्वेतो नयत्वित्यनया रथादियानमारोहयेत् । सूचितं च । पूषा त्वेतो नयतु हस्तगृह्येति यानमारोहयेत् । आ० गृ० १. ८. १. ॥

पूषा त्वेतो नयतु हस्तगृह्याश्विना त्वा प्र वहतां रथेन ।
गृहान्गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासि ॥२६॥
पूषा । त्वा । इतः । नयतु । हस्तऽगृह्य । अश्विना । त्वा । प्र । वहतां । रथेन ।
गृहान् । गच्छ । गृहऽपत्नी । यथा । असः । वशिनी । त्वं । विदथं । आ । वदासि ॥२६॥

हस्तगृह्य गाह्यहस्तः पूषा त्वा त्वामितो नयतु । प्रापयतु । अश्विनाश्विनौ त्वा त्वां रथेन प्र वहतां । प्रगमयतां । गृहान् भर्तृसंबंधिनो गच्छ त्वं गृहपत्नी यथासः भवसि स्वगृहस्वामिनी भवसि । वशिनी सर्वेषां गृहगतानां वशं प्रापयित्री पत्युर्वशे वर्तमाना वा विदथं पतिगृहमा वदासि । आवदसि । गृहस्थितं भृत्यादिजनमावद ॥

इह प्रियमित्येषा वध्वा गृहप्रवेशनी । सूचितं च । इह प्रियं प्रजया ते समृध्यतामिति गृहं प्रवेशयेत् । आ० गृ० १. ८. ८. । इति ॥

इह प्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि ।
एना पत्या तन्वं१ सं सृजस्वाधा जिव्री विदथमा वदाथः ॥२७॥
इह । प्रियं । प्रऽजया । ते । सं । ऋध्यतां । अस्मिन् । गृहे । गार्हऽपत्याय । जागृहि ।
एना । पत्या । तन्वं । सं । सृजस्व । अध । जिव्री इति । विदथं । आ । वदाथः ॥२७॥

हे वधु ते तवेहास्मिन्पतिकुले प्रियं प्रजया सह समृध्यतां । अस्मिन्गृहे गार्हपत्याय गृहपतित्वाय जागृहि । बुध्यस्व । एनानेन पत्या सह तन्वं स्वीयं शरीरं सं सृजस्व । संसृष्टा भव । अधाथ जिव्री जीर्णौ जायापती युवां विदथं गृहमा वदाथः । आभिमुख्येन वदतं ॥

नीललोहितं भवति कृत्यासक्तिर्व्यज्यते । एधंते अस्या ज्ञातयः पतिर्बंधेषु बध्यते ॥२८॥
नीलऽलोहितं । भवति । कृत्या । आसक्तिः । वि । अज्यते । एधंते । अस्याः । ज्ञातयः ।
पतिः । बंधेषु । बध्यते ॥२८॥

कृत्याभिचाराभिमानिनी देवता नीललोहितं भवति । नीलं च लोहितं च तस्या रूपं भवतीत्यर्थः । सा कृत्यासक्तिरासक्ताऽस्यां संबद्धा व्यज्यते । त्यज्यत इत्यर्थः । तस्यां कृत्यायामपगतायामस्या वध्वा ज्ञातय एधंते । वर्धंते । पतिर्बंधेषु सांसारिकेषु बध्यते ॥

परा देहि शामुल्यं ब्रह्मभ्यो वि भजा वसु ।
कृत्यैषा पद्वती भूत्या जाया विशते पतिं ॥२९॥
परा । देहि । शामुल्यं । ब्रह्मऽभ्यः । वि । भज । वसु ।
कृत्या । एषा । पत्ऽवती । भूत्वी । आ । जाया । विशते । पतिं ॥२९॥

श्यामुखं । श्यामलमित्यर्थः । श्यमलं शरीरं मलं । शरीरावच्छिन्नस्य मलस्य धारकं वस्त्रं परा देहि । परात्यज । धृतप्रायश्चित्तार्थं ब्रह्मभ्यो ब्राह्मणेभ्यो वसु धनं वि भज । प्रयच्छेत्यर्थः । किमर्थं वधूवासःपरित्याग इति चेत् उच्यते । एषा क्लत्या पद्वती पादवती सती जाया भूत्वी भूत्वा पतिं विशते । क्लत्यारूपवासःप्रवेशात् क्लत्या जाया भूत्वा विशत इत्युपचर्यते । अतस्तत्परित्यागे क्लत्यैव त्यक्ता भवतीत्यर्थः । यदि वधूवासः स्वयं निधत्ते तदैवं भवतीति वधूवास.संस्पर्शनं निंदायुक्तं ॥

अश्रीरा तनूर्भवति रुशती पापयामुया ।
पतिर्यद्ध्वो३ वाससा स्वमंगमभिधित्सते ॥३०॥
अश्रीरा । तनूः । भवति । रुशती । पापया । अमुया ।
पतिः । यत् । वध्वः । वाससा । स्वं । अंगं । अभिऽधित्सते ॥३०॥

अत्रापि वधूवासःसंस्पर्शनिंदोच्यते । तनूर्वरस्य संबंधिन्यश्रीराश्रीका भवति । कथं स्यादिति उच्यते । रुशती । रुशदिति वर्णनाम । दीप्तयामुयानया पापरूपया क्लत्यया युक्ता चेत्तनूः । तदेवाह । पतिर्यद्यदि वध्वो वाससा स्वमंगमभिधित्सते परिधातुमिच्छति ॥ ॥२५॥

ये वध्वश्चंद्रं वहतुं यक्ष्मा यंति जनादनु ।
पुनस्तान्यज्ञिया देवा नयंतु यत आगताः ॥३१॥
ये । वध्वः । चंद्रं । वहतुं । यक्ष्माः । यंति । जनात् । अनु ।
पुनरिति । तान् । यज्ञियाः । देवाः । नयंतु । यतः । आऽगताः ॥३१॥

वध्वश्चंद्रं हिरण्यरूपं वहतुं ये यक्ष्मा व्याधयोऽनु यंति प्राप्नुवंति जनादक्ष्मद्विरोधिनः सकाशात् । यद्वा । जनाद्यमाख्यात् । तान्पुनर्नयंतु प्रापयंतु यज्ञिया यज्ञार्हा देवा इंद्रादयः । यत आगता यस्मात्ते यक्ष्मा आगताः तत्र तान्नयंतु ॥

वध्वाः प्रयाणे मा विदन्निति षोडशर्चस्य सूक्तस्य । सूचितं च । कल्याणेषु देशवृक्षचतुष्पथेषु मा विदन्परिपंथिन इति जपेत् । आ० गृ० १. ८. ६. । इति ॥

मा विदन्परिपंथिनो य आसीदंति दंपती । सुगेभिर्दुर्गमतीतामपद्रांतारातयः ॥३२॥
मा । विदन् । परिऽपंथिनः । ये । आऽसीदंति । दंपती इति दंऽपती । सुऽगेभिः ।
दुःऽगं । अति । इतां । अप । द्रांतु । अरातयः ॥३२॥

परिपंथिनः पथिवस्थातारः शत्रवो मा विदन् मा प्रापयन् ये परिपंथिनो दंपती आसीदंति अभिगच्छंति । सुगेभिः सुगैर्मार्गैर्दुर्गं दुःखेन गंतुं शक्यं दुर्गमं देशमतीतां । अतिगच्छतां । अरातयोऽदातारः शत्रवोऽप द्रांतु । अपगच्छंतु ॥

सुमंगलीरियं वधूरिमां समेत पश्यत । सौभाग्यमस्यै दत्त्वायाथास्तं वि परेतन ॥३३॥
सुऽमंगलीः । इयं । वधूः । इमां । सं । एत । पश्यत । सौभाग्यं । अस्यै । दत्त्वाय ।
अथ । अस्तं । वि । परा । इतन ॥३३॥

इयं वधूः सुमंगलीः शोभनमंगला । अत इमां सर्वे आशीःकर्तारः समेत । संगच्छत । तां पश्यत च । तां

संगतास्च वृद्धास्त्वा ऊढायै सौभाग्यं दत्त्वाय दत्त्वायास्यं । गृहानमेतत् । स्वसंबंधिनं वि परेतन । विविधं परागच्छत ॥

तृष्टमेतत्कटुकमेतदप्राष्टवद्विषवन्नैतदत्तवे ।
सूर्यां यो ब्रह्मा विद्यात्स इद्वाधूयमर्हति ॥३४॥
तृष्टं । एतत् । कटुकं । एतत् । अपाष्टऽवत् । विषऽवत् । न । एतत् । अत्तवे ।
सूर्यां । यः । ब्रह्मा । विद्यात् । सः । इत् । वाधूऽयं । अर्हति ॥३४॥

अनयापि वधूवस्त्रपरित्यागः प्रतिपाद्यते । एतद्वस्त्रं तृष्टं दाहजनकं । तथैतत्कटुकं । तथाप्राष्टवत् । अपाष्टम-पक्षितमृजीषं । तद्वत् । तथा विषवत् । नैतद्वस्त्रमत्तवे । अत्तव्यं । अनुपयोग्यं । यो ब्रह्मा ब्राह्मणः सूर्यामिदानीं प्रस्तुतां देवीं विद्यात् सम्यग्जानीयात् स इत्स एव वाधूयं वधूवस्त्रमर्हति ॥

आशसनं विशसनमथो अधिविकर्तनं ।
सूर्यायाः पश्य रूपाणि तानि ब्रह्मा तु शुंधति ॥३५॥
आऽशसनं । विऽशसनं । अथो इति । अधिऽविकर्तनं ।
सूर्यायाः । पश्य । रूपाणि । तानि । ब्रह्मा । तु । शुंधति ॥३५॥

आशसनं तूषाधानं । तच्चान्यवर्णं भवति । विशसनं शिरसि निधीयमानं । तादृशं दृश्यते निधीयमान-मधिविकर्तनं यत्त्रिधा वासो विकृंतंति । तान्याशसनादीनि वासांस्यवस्थितानि सूर्याया रूपाणि भवंति । तानि पश्य । एवंभूतान्याशसनादीनि पुरा सूर्यास्वशरीरे स्थितान्यमंगलानि वासांसि विधत्ते । तानि रूपाणि सूर्याविद्ब्रह्मा तु ब्राह्मण एव तस्माद्वाससः सकाशाच्छुंधति । अपनयति ॥ ॥२६॥

विवाहे कन्याहस्तग्रहणे गृभ्णामीत्येषा । सूचितं च । गृभ्णामि ते सौभगत्वाय हस्तमित्यंगुष्ठमेव गृह्णीयात् । आ० गृ० १. ७. ३. । इति ॥

गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः ।
भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥३६॥
गृभ्णामि । ते । सौभगऽत्वाय । हस्तं । मया । पत्या । जरत्ऽअष्टिः । यथा । असः ।
भगः । अर्यमा । सविता । पुरंऽधिः । मह्यं । त्वा । अदुः । गार्हऽपत्याय । देवाः ॥३६॥

हे वधु ते तव हस्तमहं गृभ्णामि । गृह्णामि । किमर्थं । सौभगत्वाय सौभाग्याय । मया पत्या त्वं यथा जरदष्टिः प्राप्तवार्धक्यासः भवसि । भगोऽर्यमा सविता पुरंधिः पूषा एते देवास्त्वा त्वां मह्यमदुः । दत्तवंतः । किमर्थं । गार्हपत्याय । यथाहं गृहपतिः स्यामिति ॥

तां पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या३ वपंति ।
या नः ऊरू उशती विश्रयाते यस्यामुशंतः प्रहराम शेपं ॥३७॥
तां । पूषन् । शिवऽतमां । आ । ईरयस्व । यस्यां । बीजं । मनुष्याः । वपंति ।
या । नः । ऊरू इति । उशती । विऽश्रयाते । यस्यां । उशंतः । प्रऽहराम । शेपं ॥३७॥

हे पूषन्नोषधीतन्नामक देव शिवतमामत्यंतमंगलभूतां तामेरयस्व । आ ईरय । सर्वतः प्रेरय । यस्यामूरौ बीजं रेतोलक्षणं मनुष्या वपंति आदधते । या नोऽस्माकमूरू उशती कामयमाना विश्रयाते । यस्यामूरावुशंतः कामयमाना वयं शेपं स्वर्शनयोग्यं पुंस्त्वजननं प्रहराम । ऊरौ व्यंजनसंबंधं करवामेत्यर्थः ॥

तुभ्यमग्ने पर्यवहन्त्सूर्या वहतुना सह । पुनः पतिभ्यो जायां दा अग्ने प्रजया सह ॥३८॥
तुभ्यं । अग्ने । परि । अवहन् । सूर्या । वहतुना । सह । पुनरिति । पतिऽभ्यः । जायां ।
दाः । अग्ने । प्रऽजया । सह ॥३८॥

गंधर्वा हे अग्ने तुभ्यमग्ने पर्यवहन् । प्रायच्छन्नित्यर्थः । कां । सूर्यां । केन सह । वहतुना सह । त्वं च तां सूर्यां वहतुना सह सोमाय प्रायच्छः । तद्वदिदानीमपि हे अग्ने पुनः पतिभ्योऽस्मभ्यं जायां प्रजया सह दाः । देहि ॥

पुनः पत्नीमग्निरदादायुषा सह वर्चसा ।
दीर्घायुरस्या यः पतिर्जीवाति शरदः शतं ॥३९॥
पुनरिति । पत्नीं । अग्निः । अदात् । आयुषा । सह । वर्चसा ।
दीर्घऽआयुः । अस्याः । यः । पतिः । जीवाति । शरदः । शतं ॥३९॥

पुनः स्वगृहीतां पत्नीमग्निरायुषा सह वर्चसा सहादात् । प्रायच्छत् । अस्या अग्निदत्ताया यः पतिः पुमान् स दीर्घायुः सञ्शरदः शतं शतसंवत्सरं जीवाति । जीवतु ॥

सोमः प्रथमो विविदे गंधर्वो विविद उत्तरः ।
तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥४०॥
सोमः । प्रथमः । विविदे । गंधर्वः । विविदे । उत्ऽतरः ।
तृतीयः । अग्निः । ते । पतिः । तुरीयः । ते । मनुष्यऽजाः ॥४०॥

जातां कन्यां सोमः प्रथमभावी सन् विविदे । लब्धवान् । गंधर्व उत्तरः सन् विविदे । लब्धवान् । अग्नितृतीयः पतिस्ते तव । पश्चान्मनुष्यजाः पतिस्तुरीयश्चतुर्थः ॥ ॥२७॥

सोमो ददद्गंधर्वाय गंधर्वो दददग्नये । रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमां ॥४१॥
सोमः । ददत् । गंधर्वाय । गंधर्वः । ददत् । अग्नये । रयिं । च । पुत्रान् । च । अदात् ।
अग्निः । मह्यं । अथो इति । इमां ॥४१॥

सोमो गंधर्वाय प्रथमं ददत् । प्रादात् । गंधर्वोऽग्नये प्रादात् । अथो अपि चाग्निरिमां कन्यां रयिं धनं पुत्रांश्च मह्यमदात् ॥

इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतं । क्रीळंतौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे ॥४२॥
इह । एव । स्तं । मा । वि । यौष्टं । विश्वं । आयुः । वि । अश्नुतं । क्रीळंतौ । पुत्रैः ।
नप्तृऽभिः । मोदमानौ । स्वे । गृहे ॥४२॥

इहैव स्तं । इहैवास्मिँल्लोके स्तं । भवतं । मा वि यौष्टं । मा पृथग्भूतं । विश्वमायुर्व्यश्नुतं । प्राप्नुतं । किंच पुत्रैर्नप्तृभिः पौत्रैः सह स्वे गृहे मोदमानौ भवतमिति शेषः ॥

गृहप्रवेश आ नः प्रजां जनयत्वित्याद्याश्चतस्रो होमार्थाः। सूचितं च। आ नः प्रजां जनयतु प्रजापतिरिति चतसृभिः प्रत्यृचं कृत्वा। आ० गृ० १. ८. ९.। इति ॥

आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा।
अदुर्मंगलीः पतिलोकमा विश शं नो भव द्विपदे शं चतुष्पदे ॥४३॥
आ। नः। प्रऽजां। जनयतु। प्रजाऽपतिः। आऽजरसाय। सं। अनक्तु। अर्यमा।
अदुःऽमंगलीः। पतिऽलोकं। आ। विश। शं। नः। भव। द्विऽपदे। शं। चतुःऽपदे॥४३॥

प्रजापतिर्देवो नोऽस्माकं प्रजामा जनयतु। अर्यमा चाजरसाय जरापर्यंतं जीवनाय समनक्तु। संगमयतु। सा त्वमदुर्मंगलीर्दुर्मंगलरहिता सुमंगली। यद्वा। या मंगलाचारान्दूषयति सा दुर्मंगली। ततोऽन्यादुर्मंगली। तादृशी सती पतिलोकं पतिसमीपमा विश। प्राप्नुहि। नोऽस्माकं द्विपदे शं भव। तथा च शं चतुष्पदे भव॥

अघोरचक्षुरपतिघ्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः।
वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥४४॥
अघोरऽचक्षुः। अपतिऽघ्नी। एधि। शिवा। पशुऽभ्यः। सुऽमनाः। सुऽवर्चाः।
वीरऽसूः। देवऽकामा। स्योना। शं। नः। भव। द्विऽपदे। शं। चतुःऽपदे॥४४॥

हे वधु त्वमघोरचक्षुः क्रोधादभयंकरचक्षुरेधि। भव। तथापतिघ्नी भव। तथा पशुभ्यः शिवा हितकरी भव सुमनाः सुवर्चाश्च भव। वीरसूः पुत्राणामेव प्रसवित्री देवकामा स्योना सुखकरा च भव॥

इमां त्वमिंद्र मीढ्वः सुपुत्रां सुभगां कृणु।
दशास्यां पुत्राना धेहि पतिमेकादशं कृधि ॥४५॥
इमां। त्वं। इंद्र। मीढ्वः। सुऽपुत्रां। सुऽभगां। कृणु।
दश। अस्यां। पुत्रान्। आ। धेहि। पतिं। एकादशं। कृधि॥४५॥

हे इंद्र त्वमिमां वधूं सुपुत्रां सुभगां च कृणु। कृधि। अस्यां वध्वां दश पुत्राना धेहि। पतिमेकादशं कृधि। दश पुत्राः पतिरेकादशो यथा स्यात्तथा कृधि। कृणु॥

सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्वां भव।
ननांदरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥४६॥
संऽराज्ञी। श्वशुरे। भव। संऽराज्ञी। श्वश्वां। भव।
ननांदरि। संऽराज्ञी। भव। संऽराज्ञी। अधि। देवृषु॥४६॥

हे वधु श्वशुरादिषु त्वं सम्राज्ञी भव। देवृषु। देवरेष्वित्यर्थः॥

समंजंत्विति वरस्य दधिप्राशने वधूवरयोर्हृदयसंज्ञने वा विनियुक्ता। तथा च सूचितं। समंजंतु विश्वे देवा इति दध्नः प्राश्य प्रतिप्रयच्छेदाज्यशेषेण वानक्ति हृदये। आ० गृ० १. ८. ९.। इति ॥

समंजंतु विश्वे देवाः समापो हृदयानि नौ।
सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ ॥४७॥

सं । अंजंतु । विश्वे । देवाः । सं । आपः । हृदयानि । नौ ।
सं । मातरिश्वा । सं । धाता । सं । उ इति । देष्ट्री । दधातु । नौ ॥४७॥

विश्वे देवाः सर्वे देवा नौ हृदयानि मानसानि समंजंतु । सम्यगंजंतु । अपगतदुःखादिक्लेशानि कृत्वा लौकिकवैदिकविषयेषु प्रकाशयुक्तानि कुर्वंत्वित्यर्थः । आपश्च समंजंतु । तथा मातरिश्वा नौ हृदयानि सं दधातु । आवयोर्बुद्धीः परस्परानुकूलाः करोत्वित्यर्थः । धाता च सं दधातु । देष्ट्री दात्री फलानां । सरस्वतीत्यर्थः । सा च सं दधातु । संधानं करोतु ॥ ॥२८॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरसायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्येऽष्टमाष्टके तृतीयोऽध्यायः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

अष्टमाष्टकस्य चतुर्थोऽध्याय आरभ्यते । तत्र वि हीति चयोविंशत्यृचं द्वितीयं सूक्तं । वृषाकपिर्नामेंद्रस्य पुत्रः । स चेंद्राणींद्रश्चैते चयः संहताः संविवादं कृतवंतः । तत्र वि हि सोतोरस्कृत किं सुबाहो स्वंगुर इंद्राणीमासु नारिष्विति द्वे उरुणो हि मेऽयमेमीति चतस्र इत्येता नवर्च इंद्रवाक्यानि । अतस्तासामिंद्र ऋषिः । परा हींद्रेति पंचावीरामिति द्वे वृषभो न तिग्मशृंग इत्याद्यास्तस्र इत्येकादशर्च इंद्राण्या वाक्यानि । अतस्तासामिंद्राण्यृषिः । उवे अंब वृषाकपायि रेवति पर्शुर्ह नामेति तिस्रो वृषाकपेर्वाक्यानि । अतस्तासां वृषाकपिर्ऋषिः । सर्वे सूक्तमिंद्रं पंचपदापंक्तिरुक्थदस्कं । तथा चानुक्रांतं । वि हि त्र्यधिकेंद्रो वृषाकपिरिंद्राणींद्रश्च समूदिरे पांक्तमिति ॥ षष्ठेऽहनि ब्राह्मणाच्छंसिन उक्थ्यशस्त्र एतत्सूक्तं । सूचितं च । अथ वृषाकपिं शंसेद्यथा होताज्यायां चतुर्थे । आ० ८. ३. । इति ॥ यदि षष्ठेऽहन्युक्थ्यस्तोत्राणि द्विपदासु न स्तुवीरन्सामगा यदि वेदमहरग्निष्टोमः स्यात्तदानीं ब्राह्मणाच्छंसी माध्यंदिने सवन आरंभणीयाभ्य ऊर्ध्वमेतत्सूक्तं शंसेदित्यजित्यपि । तथा च सूचितं । सुकीर्तिं ब्राह्मणाच्छंसी वृषाकपिं च पंक्तिशंसं । आ० ८. ४. । इति ॥

वि हि सोतोरसृक्षत नेंद्रं देवममंसत ।
यत्रामदद्वृषाकपिरर्यः पुष्टेषु मत्सखा विश्वस्मादिंद्र उत्तरः ॥१॥
वि । हि । सोतोः । असृक्षत । न । इंद्रं । देवं । अमंसत ।
यत्र । अमदत् । वृषाकपिः । अर्यः । पुष्टेषु । मत्ऽसखा । विश्वस्मात् । इंद्रः । उत्ऽतरः ॥१॥

सोतोः सोमाभिषवं कर्तुं व्यस्कृत । यागं प्रति मया विसृष्टा अनुज्ञाताः स्तोतारो वृषाकपेर्यष्टारः । हीति पूरणः । तत्र देवं द्योतमानमिंद्रं मां नामंसत । मया प्रेरिताः संतोऽपि ते स्तोतारो न स्तुतवंतः । किंतु मम पुत्रं वृषाकपिमेव स्तुतवंतः । यत्र येषु पुष्टेषु सोमेन प्रवृद्धेषु यागेष्वर्यः स्वामी वृषाकपिर्मम पुत्रो मत्सखा मम सखिभूतः सन्नमदत् सोमपानेन हृष्टोऽभूत् । यद्यप्येवं तथापींद्रोऽहं विश्वस्मात्सर्वस्माज्जगत उत्तरः । उत्कृष्टतरः ॥ माधवभट्टास्तु वि हि सोतोरित्येषर्गिंद्राण्या वाक्यमिति मन्यंते । तथा च तद्वचनं । इंद्राणी वाव्यितं हविः वाश्यिमृगोऽडुदुषदिंद्रपुत्रस्य वृषाकपेर्विषये वर्तमानः । तमेंद्रमिंद्राणी वदति । तस्मिन्पक्षे त्वस्या ऋचोऽयमर्थः । सोतोः सोमाभिषवं कर्तुं वि ह्यस्कृत । उपरतसोमाभिषवा आसन्यज्ञमागा

रत्वर्थः । किंच मम पतिमिंद्रं देवं नामंसत । स्तोतारो न स्तुवंति । कुवेति अथाह । यच यस्मिन्नेव पुष्टेषु प्रवृद्धेषु धनेष्वर्यः स्वामी वृषाकपिरमदत् । मत्सखा मत्प्रियश्चेंद्रो विश्वस्मात्सर्वस्माज्जगत उत्तरः । उत्कृष्टतरः ॥

परा हींद्र धावंसि वृषाकपेरति व्यथिः ।
नो अह प्र विंदस्यन्यच सोमपीतये विश्वस्मादिंद्र उत्तरः ॥२॥
परा । हि । इंद्र । धावंसि । वृषाकपेः । अति । व्यथिः ।
नो इति । अह । प्र । विंदसि । अन्यच । सोमऽपीतये । विश्वस्मात् । इंद्रः । उत्ऽतरः ॥२॥

हे इंद्र त्वमत्यंतं व्यथिश्चलितो वृषाकपेर्वृषाकपिं परा धावसि । प्रतिगच्छसि । अन्यच सोमपीतये सोमपानाय नो अह नैव च प्र विंदसि । प्रगच्छसीत्यर्थः । सोऽयमिंद्रो विश्वस्मादुत्तरः ॥

किमयं त्वां वृषाकपिश्चकार हरितो मृगः ।
यस्मा इदस्यसीदु न्वर्यो वा पुष्टिमद्वसु विश्वस्मादिंद्र उत्तरः ॥३॥
किं । अयं । त्वां । वृषाकपिः । चकार । हरितः । मृगः ।
यस्मै । इदस्यसि । इत् । ऊं इति । नु । अर्यः । वा । पुष्टिऽमत् । वसु । विश्वस्मात् । इंद्रः ।
उत्ऽतरः ॥३॥

हे इंद्र त्वां प्रति हरितो हरितवर्णो मृगो मृगभूतोऽयं वृषाकपिः । मृगजातिर्हि वृषाकपिः । किं प्रियं चकार । अकार्षीत् । यस्मै वृषाकपये पुष्टिमत्पोषयुक्तं वसु धनमर्यो वोदार इव स त्वं नु क्षिप्रमिदस्यसीत् प्रयच्छस्येव । य इंद्रो विश्वस्मादुत्तरः ॥

यमिमं त्वं वृषाकपिं प्रियमिंद्राभिरक्षसि ।
श्वा न्वस्य जंभिषदपि कर्णे वराहयुर्विश्वस्मादिंद्र उत्तरः ॥४॥
यं । इमं । त्वं । वृषाकपिं । प्रियं । इंद्र । अभिऽरक्षसि ।
श्वा । नु । अस्य । जंभिषत् । अपि । कर्णे । वराहऽयुः । विश्वस्मात् । इंद्रः । उत्ऽतरः ॥४॥

हे इंद्र त्वं प्रियमिष्टं पुत्रं यमिमं वृषाकपिमभिरक्षसि परिपालयसि अस्यैनं वृषाकपिं । द्वितीयार्थे षष्ठी । वराहयुर्वराहमिच्छञ्श्वा नु क्षिप्रं जंभिषत् । भक्षयतु । अपि च कर्णे गृह्णात्विति शेषः । श्वानो हि वराहमिच्छंति । सिद्धमन्यत् ॥

प्रिया तष्टानि मे कपिर्व्यक्ता व्यदूदुषत् ।
शिरो न्वस्य राविषं न सुगं दुष्कृते भुवं विश्वस्मादिंद्र उत्तरः ॥५॥
प्रिया । तष्टानि । मे । कपिः । विऽअक्ता । वि । अदूदुषत् ।
शिरः । नु । अस्य । राविषं । न । सुऽगं । दुःऽकृते । भुवं । विश्वस्मात् । इंद्रः । उत्ऽतरः ॥५॥

मे मह्यमिंद्राग्नी तष्टानि यजमानैः कल्पितानि प्रिया प्रियाणि व्यक्ता व्यक्तान्यावीर्विशेषेणाक्तानि हवींषि कश्चिद्वृषाकपेर्वर्षये वर्तमानः कपिर्व्यदूदुषत् । दूषयामास । ततोऽहमस्य तत्कपिस्वामिनो वृषाकपेः शिरो नु क्षिप्रं राविषं । लुनीयां । दुष्कृते दुष्टस्य कर्मणः कर्त्रे वृषाकपयेऽस्मै सुगं सुखं न सुवं । अहं न भवेयं । अस्मै सुखप्रदात्री न भवामीत्यर्थः । अस्मा मम पतिरिंद्रो विश्वस्मादुत्तरः ॥ ॥१॥

न मत्स्त्री सुभसत्तरा न सुयाशुतरा भुवत् ।
न मत्प्रतिच्यवीयसी न सक्थ्युद्यमीयसी विश्वस्मादिंद्र उत्तरः ॥६॥
न । मत् । स्त्री । सुभसत्ऽतरा । न । सुयाशुऽतरा । भुवत् ।
न । मत् । प्रतिऽच्यवीयसी । न । सक्थ्यं । उत्ऽयमीयसी । विश्वस्मात् । इंद्रः ।
उत्ऽतरः ॥६॥

मन्मत्तोऽन्या स्त्री नारी सुभसत्तरातिशयेन सुभगा न भुवत् । न भवति । नासीत्यर्थः । किंच मत्तोऽन्या स्त्री सुयाशुतरातिशयेन सुसुखातिशयेन सुपुत्रा वा न भवति । तथा च मंत्रांतरं । ददाति मह्यं यादुरी याशूनां भोज्या शता । ऋ० १.१२६.६. । इति । किंच मन्मत्तोऽन्या प्रतिच्यवीयसी पुमांसं प्रति शरीरस्थात्यंतं च्यावयित्री नास्ति । किंच मत्तोऽन्या स्त्री सक्थ्युद्यमीयसी संभोगेऽत्यंतमुत्सेधिनी नास्ति । न मत्तोऽन्या काचिदपि नारी मैथुनेऽनुगुणं सक्थ्युद्यच्छतीत्यर्थः । मम पतिरिंद्रो विश्वस्मादुत्तरः । उत्कृष्टः ॥

उवे अंब सुलाभिके यथैवांग भविष्यति ।
भसन्मे अंब सक्थं मे शिरो मे वीव हृष्यति विश्वस्मादिंद्र उत्तरः ॥७॥
उवे । अंब । सुलाभिके । यथाऽइव । अंग । भविष्यति ।
भसत् । मे । अंब । सक्थं । मे । शिरः । मे । विऽइव । हृष्यति । विश्वस्मात् । इंद्रः ।
उत्ऽतरः ॥७॥

एवमिंद्राख्या शुनो वृषाकपिर्ब्रवीति । उवे इति संबोधनार्थो निपातः । हे अंब मातः सुलाभिके शोभनलाभे त्वया यथैव येन प्रकारेणोक्तं तथैव तदंग क्षिप्रं भविष्यति । भवतु । किमनेन त्वदनुप्रीतिकारिणा ग्रहेण मम प्रयोजनं । किंच मे मम पितुस्त्वदीयो भसद्भग उपयुज्यतां । किंच मम पितुस्त्वदीयं सक्थि चोपयुज्यतां । किंच मे मम पितरमिंद्रं त्वदीयं शिरश्च प्रियालापेन वीव यथा कोकिलादिः पक्षी तद्वद्धृष्यति । हर्षयतु । मम पितेंद्रो विश्वस्मादुत्तरः ॥

किं सुबाहो स्वंगुरे पृथुष्टो पृथुजाघने ।
किं शूरपत्नि नस्त्वमभ्यमीषि वृषाकपिं विश्वस्मादिंद्र उत्तरः ॥८॥
किं । सुबाहो इति सुऽबाहो । सुऽअंगुरे । पृथुस्तो इति पृथुऽस्तो । पृथुऽजघने ।
किं । शूरऽपत्नि । नः । त्वं । अभि । अमीषि । वृषाकपिं । विश्वस्मात् । इंद्रः । उत्ऽतरः ॥८॥

कुद्यामिंद्र उपशमयति । हे सुबाहो हे शोभनबाहो स्वंगुरे शोभनांगुलिके पृथुष्टो पृथुकेशसंघाते पृथुजघने विस्तीर्णजघने शूरपत्नि वीरभार्ये हे इंद्राणि त्वं नोऽस्मदीयं वृषाकपिं किमर्थमभ्यमीषि । अभिक्रुध्यसि । एकः किंशब्दः । यस्य पितेंद्रोऽहं विश्वस्मादुत्तरः ॥

अवीरामिव मामयं शरारुरभि मन्यते ।
उताहमस्मि वीरिणींद्रपत्नी मरुत्सखा विश्वस्मादिंद्र उत्तरः ॥९॥
अवीराऽइव । मां । अयं । शरारुः । अभि । मन्यते ।
उत । अहं । अस्मि । वीरिणी । इंद्रऽपत्नी । मरुत्ऽसखा । विश्वस्मात् । इंद्रः । उत्ऽतरः ॥९॥

पुनरिंद्रमिंद्राणी ब्रवीति। शरारुर्धातुको मृगोऽयं वृषाकपिर्मामिंद्राणीमवीरामिवाभि मन्यते। विजानाति। उतापि चेंद्रपत्नींद्रस्य भार्याहमिंद्राणी वीरिणी पुत्रवती मरुत्सखा मरुद्भिर्युक्ता चास्मि। भवामि। यस्या मम पतिरिंद्रो विश्वस्मादुत्तरः॥

संहोत्रं स्म पुरा नारी समनं वावं गच्छति।
वेधा ऋतस्य वीरिणींद्रपत्नी महीयते विश्वस्मादिंद्र उत्तरः ॥१०॥
संऽहोत्रं। स्म। पुरा। नारी। समनं। वा। अवं। गच्छति।
वेधाः। ऋतस्य। वीरिणी। इंद्रऽपत्नी। महीयते। विश्वस्मात्। इंद्रः। उत्ऽतरः॥१०॥

नारी स्त्यृतस्य सत्यस्य वेधा विधात्री वीरिणी पुत्रवतींद्रपत्नींद्रस्य भार्येंद्राणी संहोत्रं स्म समीचीनं यज्ञं खलु समनं वा संग्रामं। समनमिति संग्रामनामसु पाठात्। अव प्रति पुरा गच्छति। महीयते। स्तोतृभिः स्तूयते च। तस्या मम पतिरिंद्रो विश्वस्मादुत्तरः॥ ॥२॥

इंद्राणीमासु नारिषु सुभगामहमश्रवं।
नह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिंद्र उत्तरः ॥११॥
इंद्राणीं। आसु। नारिषु। सुऽभगां। अहं। अश्रवं।
नहि। अस्याः। अपरं। चन। जरसा। मरते। पतिः। विश्वस्मात्। इंद्रः। उत्ऽतरः॥११॥

अथेंद्राणीमिंद्रः स्तौति। आसु सौभाग्यवत्तया प्रसिद्धासु नारिषु स्त्रीषु स्त्रीणां मध्य इंद्राणीं सुभगां सौभाग्यवतीमहमिंद्रोऽश्रवं। अश्रौषं। किंचास्या इंद्राण्याः पतिः पालको विश्वस्मादुत्तर उत्कृष्टतर इंद्रोऽपरं चनान्यद्भूतजातमिव जरसा वयोहान्या न हि मरते। न खलु म्रियते। यद्वा। इदं वृषाकपेर्वाक्यं। तस्मिन्पक्षे त्वहमिति शब्दो वृषाकपिपरतया योज्यः। अन्यत्समानं॥

नाहमिंद्राणि रारण सख्युर्वृषाकपेर्ऋते।
यस्येदमप्यं हविः प्रियं देवेषु गच्छति विश्वस्मादिंद्र उत्तरः ॥१२॥
न। अहं। इंद्राणि। रारण। सख्युः। वृषाकपेः। ऋते।
यस्य। इदं। अप्यं। हविः। प्रियं। देवेषु। गच्छति। विश्वस्मात्। इंद्रः। उत्ऽतरः॥१२॥

हे इंद्राणि अहमिंद्रः सख्युर्मम सखिभूतादृषाकपेर्ऋते प्रियं वृषाकपिं विना न रारण। न रमे। अप्यमप्सु भवमन्निर्वा सुसंस्कृतं प्रियं प्रीतिकरमिदमुपस्थितं हविर्देवेषु देवानां मध्ये यस्य ममेंद्रस्य सकाशं गच्छति। यश्चाहमिंद्रः सर्वस्मादुत्तरः। यद्वा। अयमर्थः। हे इंद्राणि वृषाकपेः सख्युरिंद्रादृतेऽहं वृषाकपिं रारण। न रमे। अन्यत्समानं॥

वृषाकपायि रेवति सुपुत्र आदु सुस्नुषे।
घसत्त इंद्र उक्षणः प्रियं काचित्करं हविर्विश्वस्मादिंद्र उत्तरः ॥१३॥
वृषाकपायि। रेवति। सुऽपुत्रे। आत्। ऊं इति। सुऽस्नुषे।
घसत्। ते। इंद्रः। उक्षणः। प्रियं। काचित्ऽकरं। हविः। विश्वस्मात्। इंद्रः। उत्ऽतरः॥१३॥

हे वृषाकपायि। कामानां वर्षकत्वादभीष्टदेशग नाद्वींद्रो वृषाकपिः। तस्य पत्नि। यद्वा। वृषाकपेर्मम

मातरित्यर्थः। रेवति धनवति सुपुत्रे शोभनपुत्रे सुस्नुषे शोभनस्नुषे हे इंद्राणि ते तवायमिंद्र उक्षणः सेचनसमर्थानाद्वनंतरमेव। शीघ्रमेवेत्यर्थः। पप्रुम्यसत्। प्राप्नातु। किंच काचित्करं। कं सुखं। तस्माचित् संघः। तत्करं हविः प्रियमिष्टं कुर्वितीति शेषः। किंच ते पतिरिंद्रो विश्वस्मादुत्तरः। तथा च यास्कः। वृषाकपायि रेवति सुपुत्रे मध्यमेन सुस्नुषे माध्यमिकया वाचा। स्नुषा साधुसादिनीति वा साधुसानिनीति वा। प्रियं कुरुष्व सुखाचयकरं हविः सर्वस्माद्य इंद्र उत्तरः। नि० १२. ९.। इति ॥

उक्षणो हि मे पंचदश साकं पचंति विंशतिं।
उताहमद्मि पीव इदुभा कुक्षी पृणंति मे विश्वस्मादिंद्र उत्तरः ॥१४॥
उक्षणः। हि। मे। पंचऽदश। साकं। पचंति। विंशतिं।
उत। अहं। अद्मि। पीवः। इत्। उभा। कुक्षी इति। पृणंति। मे। विश्वस्मात्।
इंद्रः। उत्ऽतरः ॥१४॥

अथेंद्रो ब्रवीति। मे मदर्थं पंचदश पंचदशसंख्याकान् विंशतिं विंशतिसंख्याकांश्चोक्षणो वृषभान् साकं सह मम भार्ययेंद्राण्या प्रेरिता यष्टारः पचंति। उतापि चाहमद्मि। तान्भक्षयामि। अत्त्वा चाहं पीव इत् स्थूल एव भवामीति शेषः। किंच मे ममोभौभौ कुक्षी पृणंति। सोमेन पूरयंति यष्टारः। सोऽहमिंद्रः सर्वस्मादुत्तरः ॥

वृषभो न तिग्मशृंगोऽन्तर्यूथेषु रोरुवत्।
मंथस्त इंद्र शं हृदे यं ते सुनोति भावयुर्विश्वस्मादिंद्र उत्तरः ॥१५॥
वृषभः। न। तिग्मऽशृंगः। अंतः। यूथेषु। रोरुवत्।
मंथः। ते। इंद्र। शं। हृदे। यं। ते। सुनोति। भावयुः। विश्वस्मात्। इंद्रः। उत्ऽतरः ॥१५॥

अथेंद्राणी ब्रवीति। तिग्मशृंगस्तीक्ष्णशृंगो वृषभो न यथा वृषभो यूथेषु गोसंघेष्वंतर्मध्ये रोरुवच्छब्दं कुर्वन् गा अभिरमयति तथा हे इंद्र त्वं मामभिरमयेति शेषः। किंच हे इंद्र ते तव हृदे हृदयाय मंथो दध्नो मथनवेलायां शब्दं कुर्वञ्शं शंकरो भवत्विति शेषः। किंच ते तुभ्यं यं सोमं भावयुर्भावमिच्छंतींद्राणी सुनोति अभिषुणोति सोऽपि शंकरो भवत्वित्यर्थः। मम पतिरिंद्रो विश्वस्मादुत्तरः ॥ ॥३॥

न सेशे यस्य रंबतेऽंतरा सक्थ्या३ कपृत्।
सेदीशे यस्य रोमशं निषेदुषो विजृंभते विश्वस्मादिंद्र उत्तरः ॥१६॥
न। सः। ईशे। यस्य। रंबते। अंतरा। सक्थ्या। कपृत्।
सः। इत्। ईशे। यस्य। रोमशं। निऽसेदुषः। विऽजृंभते। विश्वस्मात्। इंद्रः। उत्ऽतरः ॥१६॥

हे इंद्र स जनो नेशे मैथुनं कर्तुं नेष्टे न शक्नोति यस्य जनस्य कपृच्छेपः सक्थ्या सक्थिनी अंतरा रंबते लंबते। सेत् स एव स्त्रीजन ईशे मैथुनं कर्तुं शक्नोति यस्य जनस्य निषेदुषः शयानस्य रोमशमुपस्थं विजृंभते विवृतं भवति। यस्य च पतिरिंद्रो विश्वस्मादुत्तरः ॥

न सेशे यस्य रोमशं निषेदुषो विजृंभते।
सेदीशे यस्य रंबतेऽंतरा सक्थ्या३ कपृद्विश्वस्मादिंद्र उत्तरः ॥१७॥

न । सः । ईशे । यस्य । रोमशं । निऽसेदुषः । विऽजृंभते ।
सः । इत् । ईशे । यस्य । रंबते । अंतरा । सक्थ्या । कपृत् । विश्वस्मात् । इंद्रः । उत्ऽतरः ॥१७॥

स जनो नेशे मैथुनं कर्तुं नेष्टे यस्य जनस्य निषेदुषः शयानस्य रोमशमुपस्थं विजृंभते विवृतं भवति । सेत् स एव जन ईशे मैथुनं कर्तुं शक्नोति यस्य जनस्य कपृत् प्रजननं सक्थ्या सक्थिनी अंतरा रंबते लंबते । सिद्धमन्यत् । पूर्वोक्तव्यतिरेकोऽत्र द्रष्टव्यः । पूर्वस्यामृचि यियक्षुरिंद्राणींद्रं वदति अत्र त्वयियक्षुरिंद्र इंद्राणीं वदतीत्यविरोधः ॥

अयमिंद्र वृषाकपिः परस्वंतं हतं विंदत् ।
असिं सूनां नवं चरुमादेधस्यान् आचितं विश्वस्मादिंद्र उत्तरः ॥१८॥
अयं । इंद्र । वृषाकपिः । परस्वंतं । हतं । विंदत् ।
असिं । सूनां । नवं । चरुं । आत् । एधस्य । अनः । आऽचितं । विश्वस्मात् । इंद्रः । उत्ऽतरः ॥१८॥

हे इंद्र अयं वृषाकपिः परस्वंतं परस्वमात्मनो विषयेऽवर्तमानं हतं हिंसितं विदत् । विंदतु । तथा हतस्य विशसनायासिं शस्त्रं सूनामुद्यानं पाकार्थं नवं प्रत्यग्रं चरुं भांडमादनंतरमेधस्य काष्ठस्याचितं पूर्णमनः शकटं च विंदतु । मम पतिरिंद्रो विश्वस्मादुत्तरः ॥

अयमेमि विचाकशद्विचिन्वन्दासमार्यं ।
पिबामि पाकसुत्वनोऽभि धीरमचाकशं विश्वस्मादिंद्र उत्तरः ॥१९॥
अयं । एमि । विऽचाकशत् । विऽचिन्वन् । दासं । आर्यं ।
पिबामि । पाकऽसुत्वनः । अभि । धीरं । अचाकशं । विश्वस्मात् । इंद्रः । उत्ऽतरः ॥१९॥

अथेंद्रो ब्रवीति । विचाकशत् पश्यन्यजमानान् दासमुपक्षपयितारमसुरमार्यमपि च विचिन्वन् पृथक्कुर्वन्नयमहमिंद्र एमि । यज्ञं प्रति गच्छामि । यज्ञं गत्वा च पाकसुत्वनः । पचतीति पाकः । सुनोतीति सुत्वा । हविषां पक्तुः सोमस्याभिषोतुर्यजमानस्य पाकेन विपक्वेन मनसा सोमस्याभिषोतुर्वा यजमानस्य संबंधिनं सोमं पिबामि । तथा धीरं धीमंतं यजमानमभ्यचाकशं । अभिपश्यामि । योऽहमिंद्रो विश्वस्मादुत्तरः ॥

धन्व च यत्कृंतत्रं च कति स्वित्ता वि योजना ।
नेदीयसो वृषाकपेऽस्तमेहि गृहाँ उप विश्वस्मादिंद्र उत्तरः ॥२०॥
धन्व । च । यत् । कृंतत्रं । च । कति । स्वित् । ता । वि । योजना ।
नेदीयसः । वृषाकपे । अस्तं । आ । इहि । गृहान् । उप । विश्वस्मात् । इंद्रः । उत्ऽतरः ॥२०॥

धन्व निरुदकोऽरण्यरहितो देशः । कृंतत्रं कर्तनीयमरण्यं । यद्यत्र धन्व च कृंतत्रं च भवति । मृगोद्वासमरण्यमेवंविधं भवति न त्वत्यंतविपिनं । तस्य शुनासीरीयस्यात्मदीयगृहस्य च मध्ये कति स्वित्ता तानि योजना योजनानि स्थितानि । नात्यंतदूरे तत्त्रवतीत्यर्थः । अतो नेदीयसोऽतिशयेन समीपस्थाच्छुनासीरीयात् हे वृषाकपे त्वमस्तमस्माकं गृहं त्रेहि । विशेषेणागच्छ । आगत्य च गृहान्यज्ञगृहानुपगच्छ । यतोऽहमिंद्रः सर्वस्मादुत्कृष्टः ॥

पुनरेहि वृषाकपे सुविता कल्पयावहै ।
य एष स्वप्ननंशनोऽस्तमेषि पथा पुनर्विश्वस्मादिंद्र उत्तरः ॥२१॥
पुनः । आ । इहि । वृषाकपे । सुविता । कल्पयावहै ।
यः । एषः । स्वप्नऽनंशनः । अस्तं । एषि । पथा । पुनः । विश्वस्मात् । इंद्रः । उत्ऽतरः ॥२१॥

आगत्य प्रतिगतं वृषाकपिमिंद्रो ब्रवीति । हे वृषाकपे त्वं पुनरेहि । अस्मान्प्रत्यागच्छ । आगते च त्वयि सुविता सुवितानि कल्याणानि स्वस्मिन्प्रीतिकराणि कर्माणि कल्पयावहै । इंद्राण्यहं चावामुभौ पर्यालोच्य कुर्याव । किंच यः स्वप्ननंशन उदयेन सर्वस्य प्राणिनः स्वप्नानां नाशयितादित्यः स एष त्वं पथा मार्गेणास्तमात्मीयमावासं पुनरेषि । गच्छसि । यतोऽहमिंद्रो विश्वस्मादुत्तरः । तथा च यास्कः । सुप्रसूतानि वः कर्माणि कल्पयावहै य एष स्वप्ननंशनः स्वप्नान्नाशयत्यादित्य उदयेन सोऽस्तमेषि पथा पुनः । नि० १२.२८. । इति ॥

यदुदंचो वृषाकपे गृहमिंद्राजगंतन ।
क्व१ स्य पुल्वघो मृगः कमगन्नयोपनो विश्वस्मादिंद्र उत्तरः ॥२२॥
यत् । उदंचः । वृषाकपे । गृहं । इंद्र । अजगंतन ।
क्व । स्यः । पुल्वघः । मृगः । कं । अगन् । जनऽयोपनः । विश्वस्मात् । इंद्रः । उत्ऽतरः ॥२२॥

गत्वा पुनरागतं वृषाकपिमिंद्रः पृच्छति । हे इंद्र परमैश्वर्यवन् हे वृषाकपे यूयमुदंच उन्नामिनः संतो मद्गृहमजगंतन । आगच्छ । एकस्यापि बहुवचनं पूजार्थं । तच्च भवतः संबंधी पुल्वघो बह्वनां भीमरसानामत्ता स स मृगः क्वाभूत् । जनयोपनो जगानां मोदयिता मृगः कं वा देशमगन् । अगच्छत् । सोऽहमिंद्रो विश्वस्मादुत्तरः ॥ यद्वा । इंद्राणीवाक्यमिदं । अत्र यास्कः । यदुदंचो वृषाकपे गृहमिंद्राजगमत क्व स्य पुल्वघो मृगः क्व स बह्वादी मृगः । मृगो मार्ष्टेर्गतिकर्मणः । कमगमहेर्गं जनयोपनः । नि० १३.३. । इति ॥

पर्शुर्ह नाम मानवी साकं ससूव विंशतिं ।
भद्रं भल त्यस्या अभूद्यस्या उदरमामयद्विश्वस्मादिंद्र उत्तरः ॥२३॥
पर्शुः । ह । नाम । मानवी । साकं । ससूव । विंशतिं ।
भद्रं । भल । त्यस्यै । अभूत् । यस्याः । उदरं । आमयत् । विश्वस्मात् । इंद्रः । उत्ऽतरः ॥२३॥

इंद्रविरच्यमानमनेन मंत्रेण वृषाकपिराशास्ते । हे भलेंद्रेण विरच्यमान शूर । भलतिर्भेदनकर्मा । पर्शुर्नाम मृगी । हेति पूरणः । मानवी मनोर्दुहितेयं विंशतिं विंशतिसंख्याकान्पुत्रान् साकं सह ससूव । अजीजनत् । त्यस्यै तस्यै भद्रं भजनीयं कल्याणमभूत् । भवतु ॥ लोडर्थे लुङ् ॥ यस्या उदरमामयत् गर्भस्थैर्विंशतिभिः पुत्रैः पुष्टमासीत् । मम पित्रिंद्रो विश्वस्मादुत्तरः ॥ ॥४॥

रक्षोहणमिति पंचविंशत्यृचं तृतीयं सूक्तं । पायुर्नाम भारद्वाज ऋषिः । द्वाविंशाद्यास्तस्योऽनुष्टुभः । शिष्टा एकविंशतिस्त्रिष्टुभः । रक्षोहाग्निर्देवता । तथा चानुक्रांतं । रक्षोहणं पंचाधिका पायुराग्नेयं राक्षोघ्नं चतुरनुष्टुबंतमिति ॥ गतः सूक्तविनियोगः ॥ अंगाराभिविहरणे परि त्वाग्न इत्येषा जपा । सूचितं च । धिष्ण्यावतामित्यादिना परि त्वाग्ने पुरं वयमित्यंतेन । आ० ५.१३. ॥

रक्षोहणं वाजिनमा जिघर्मि मित्रं प्रथिष्टमुप यामि शर्म ।
शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तं ॥१॥

रक्षोऽहनं । वाजिनं । आ । जिघर्मि । मित्रं । प्रथिष्टं । उप । यामि । शर्मं ।
शिशानः । अग्निः । क्रतुऽभिः । समिद्धः । सः । नः । दिवा । सः । रिषः । पातु । नक्तं ॥१॥

रक्षोहणं रक्षसां हंतारं वाजिनं बलवंतमन्नवंतं वाग्निमा जिघर्मि । घृतेनाजुहोमि । किंच मित्रं यजमानानां सखायं प्रथिष्ठं पृथुतमं शर्म गृहमुप यामि । उपगच्छामि । सोऽयमग्निः शिशानो ज्वालास्तीक्ष्णीकुर्वन् क्रतुभिः कर्मपरैः पुरुषैः समिद्धः प्रज्वालितो भवति । किंच सोऽग्निर्नोऽस्मान्दिवाहनि रिषो हिंसकाद्रक्षसः पातु । रक्षतु । सोऽग्निर्नक्तं रात्रौ चास्मान्रक्षसः पातु ॥

अयोदंष्ट्रो अर्चिषा यातुधानानुप स्पृश जातवेदः समिद्धः ।
आ जिह्वया मूरदेवान्रभस्व क्रव्यादो वृक्व्यपि धत्स्वासन् ॥२॥
अयःऽदंष्ट्रः । अर्चिषा । यातुऽधानान् । उप । स्पृश । जातऽवेदः । सम्ऽइद्धः ।
आ । जिह्वया । मूरऽदेवान् । रभस्व । क्रव्यऽअदः । वृक्वी । अपि । धत्स्व । आसन् ॥२॥

हे जातवेदो जातधन जातप्रज्ञ वा त्वं समिद्धः सम्यग्दीप्तोऽयोदंष्ट्रोऽयोमयदंष्ट्रः । तीक्ष्णदंष्ट्रः सन्नित्यर्थः । यातुधानान्रक्षसानर्चिषा ज्वालयोप स्पृश । संदहेत्यर्थः । किंच त्वं मूरदेवान् मूढदेवान्मारकव्यापारान्रक्षसाञ्जिह्वया ज्वालया रभस्व । मारयेत्यर्थः । मारयित्वा च क्रव्यादो मांसभक्षकान्रक्षसान्वृक्वी छित्त्वासन्नास्येऽपि धत्स्व । अपिधेहि । आच्छादयेत्यर्थः ॥

उभोभयाविन्नुप धेहि दंष्ट्रा हिंस्रः शिशानोऽवरं परं च ।
उतांतरिक्षे परि याहि राजञ्जंभैः सं धेह्यभि यातुधानान् ॥३॥
उभा । उभयाविन् । उप । धेहि । दंष्ट्रा । हिंस्रः । शिशानः । अवरं । परं । च ।
उत । अंतरिक्षे । परि । याहि । राजन् । जंभैः । सं । धेहि । अभि । यातुऽधानान् ॥३॥

हे उभयाविन्नुभाभ्यां दंष्ट्राभ्यां युक्तोऽपि त्वं हिंस्रो रात्रसानां हिंसकस्त्वमुभाभ्यां दंष्ट्राभ्यां शिशानस्तीक्ष्णीकुर्वन्नुप धेहि । वधार्हेषु रात्रसेषु प्रतिष्ठापय । किंचावरं परं च जगद्रक्ष । उतापि च हे राजन् दीप्तोऽपि त्वमंतरिक्षे स्थितान्रात्रसान्परि याहि । परिगच्छ । परिगत्य च तान्यातुधानान्रात्रसाञ्जंभैर्भक्षणसाधनभूताभिर्दंष्ट्राभिरभि सं धेहि । संयोजय । भक्षयेत्यर्थः ॥

यज्ञैरिषूः संनममानो अग्ने वाचा शल्याँ अशनिभिर्दिहानः ।
ताभिर्विध्य हृदये यातुधानान्प्रतीचो बाहून्प्रति भङ्ध्येषां ॥४॥
यज्ञैः । इषूः । सम्ऽनममानः । अग्ने । वाचा । शल्यान् । अशनिऽभिः । दिहानः ।
ताभिः । विध्य । हृदये । यातुऽधानान् । प्रतीचः । बाहून् । प्रति । भङ्धि । एषां ॥४॥

हे अग्ने त्वं यज्ञैरस्मदीयैर्बलकरैर्यागैर्वाचास्मदीयया स्तुत्या चेषूर्वक्राम्बाणान् संनममानः संनमयन् शल्यांस्तासां शल्यानग्निभिर्दीप्तिभिर्दिहानस्तीक्ष्णीकुर्वन् ताभिरिषुभिर्यातुधानान्रात्रसान्हृदये विध्य । तत एषां यातुधानानां संबंधिनः प्रतीचो युद्धाय त्वां प्रतिगताम्बाहून्प्रति भङ्धि । प्रत्यामर्दय ॥

अग्ने त्वचं यातुधानस्य भिंधि हिंस्राशनिर्हरसा हंत्वेनं ।
प्र पर्वाणि जातवेदः शृणीहि क्रव्यात्क्रविष्णुर्वि चिनोतु वृक्णं ॥५॥

अग्ने । त्वचं । यातुऽधानस्य । भिंधि । हिंस्राः । अशनिः । हरसा । हंतु । एनं ।
प्र । पर्वाणि । जातऽवेदः । शृणीहि । क्रव्यऽअत् । क्रविष्णुः । वि । चिनोतु । वृक्णं ॥५॥

हे जातवेदो जातधन जातपक्ष वाग्ने त्वं यातुधानस्य राक्षसस्य त्वचं भिंधि । दारय । एनं भिन्नत्वचं यातुधानं हिंस्रा हिंसनशीलं तवाग्निर्वज्रं हरसा तापेन हंतु । हिनस्तु । हतस्य राक्षसस्य पर्वाणि शरीरपर्वाणि च प्र शृणीहि । छिंद्धीत्यर्थः । छिन्नेषु च शरीरसंबंधिषु सत्सु वृक्णं छिन्नसंधिमेनं यातुधानं क्रविष्णुर्मांसमिच्छन् क्रव्यान्मांसभक्षको वृकादिर्वि चिनोतु । भक्षयत्वित्यर्थः ॥ ॥५॥

यच्चेदानीं पश्यसि जातवेदस्तिष्ठंतमग्न उत वा चरंतं ।
यद्वांतरिक्षे पथिभिः पतंतं तमस्ता विध्य शर्वा शिशानः ॥६॥
यत् । चं । इदानीं । पश्यसि । जातऽवेदः । तिष्ठंतं । अग्ने । उत । वा । चरंतं ।
यत् । वा । अंतरिक्षे । पथिऽभिः । पतंतं । तं । अस्ता । विध्य । शर्वा । शिशानः ॥६॥

हे जातवेद उत्पन्नप्रज्ञाग्ने त्वं यच्च पृथिव्यां तिष्ठंतमुतापि च चरंतं यद्वांतरिक्षे पथिभिराकाशमार्गैः पतंतं गच्छंतं यातुधानमिदानीं संप्रति पश्यसि तं यातुधानमस्ता शराणां क्षेप्ता त्वं शिशानः शरांस्तीक्ष्णीकुर्वञ्शर्वा शरेण विध्य ॥

उतालब्धं स्मृणुहि जातवेद आलेभानादृष्टिभिर्यातुधानात् ।
अग्ने पूर्वो नि जहि शोशुचान आमादः क्ष्विंकास्तमदंत्वेनीः ॥७॥
उत । आऽलब्धं । स्मृणुहि । जातऽवेदः । आऽलेभानात् । ऋष्टिऽभिः । यातुऽधानात् ।
अग्ने । पूर्वः । नि । जहि । शोशुचानः । आमऽअदः । क्ष्विंकाः । तं । अदंतु । एनीः ॥७॥

उतापि च हे जातवेदोऽग्ने त्वमालब्धं हंतुं हस्ताभ्यामारब्धं साधुं मां स्तोतारं यष्टारं वालेभानादालभमानाद्यातुधानाद्राक्षसादृष्टिभिरात्मीयैरायुधविशेषैः स्मृणुहि । पारय । रक्षेत्यर्थः । किंच पूर्वो मुख्यस्त्वं शोशुचानः प्रज्वलन्नि जहि । मां हंतुमुद्युक्तं यातुधानं मारय । किंच तं यातुधानमामादोऽपक्वस्य मांसस्य भक्षकाः क्ष्विंकाः शब्दकारिणः ॥ टुक्षु शब्दे ॥ यद्वा । क्ष्विंका नाम पक्षिविशेषाः । एनीर्गंत्र्योऽदंतु । भक्षयंतु ॥

इह प्र ब्रूहि यतमः सो अग्ने यो यातुधानो य इदं कृणोति ।
तमा रभस्व समिधा यविष्ठ नृचक्षसश्चक्षुषे रंधयैनं ॥८॥
इह । प्र । ब्रूहि । यतमः । सः । अग्ने । यः । यातुऽधानः । यः । इदं । कृणोति ।
तं । आ । रभस्व । संऽइधा । यविष्ठ । नृऽचक्षसः । चक्षुषे । रंधय । एनं ॥८॥

हे यविष्ठ युवतमाग्ने यो यातुधानो राक्षसोऽस्मद्यज्ञविघ्नकारी यश्चान्योऽपि पिशाचादिरिदं यज्ञदूषणादि करोति स यतमः ॥ तमबवधारणार्थं ॥ इहास्मिंस्त्वद्विषययागकर्मणि वर्तमानाय मह्यं प्र ब्रूहि । तं पापकारिणं समिधा स्वकीयेन तेजसा रभस्व । हंतुं प्रारभस्व । तत एनं पापिष्ठं नृचक्षसो नृणां द्रष्टुस्तव चक्षुषे तेजसे रंधय । वशं नय । तेजसा संदहेत्यर्थः ॥

तीक्ष्णेनाग्ने चक्षुषा रक्ष यज्ञं प्राचं वसुभ्यः प्र णय प्रचेतः ।
हिंस्रं रक्षांस्यभि शोशुचानं मा त्वा दभन्यातुधाना नृचक्षः ॥९॥

तीक्ष्णेन॑। अग्ने॑। चक्षु॑षा। र॒क्ष॒। यज्ञ॑। प्राच॑। वसु॑ऽभ्यः। प्र। न॒य॒। प्रऽचे॑तः। इति॑ प्रऽचेतः।
हिंस्र॑। रक्षां॑सि। अ॒भि। शोशु॑चानं। मा। त्वा॒। दभ॑न्। यातु॑ऽधानाः। नृऽच॑क्षः॥९॥

हे अग्ने त्वं तीक्ष्णेन तिग्मेन चक्षुषा तेजसा यज्ञमस्मदीयं यागं रक्ष। पालय। किंच हे प्रचेतः प्रकृष्टज्ञानापे प्राचं प्राचितारं यज्ञं वसुभ्यो वसूनामर्थाय प्र णय। प्रकर्षेण नय। किंच हे नृचक्षो नृणां द्रष्टरग्ने रक्षांसि हिंस्रं हिंसनशीलमभि शोशुचानमभिप्रदीप्तं त्वा त्वां यातुधाना राक्षसा मा दभन्। मा हिंसिषुः॥

नृऽच॑क्षा रक्षः॑ परि॑ पश्य विक्षु॒ तस्य॒ चीर्णि॒ प्रति॑ शृणीह्यर्या॑।
तस्या॑ग्ने पृ॒ष्टीर्हर॑सा शृणीहि॒ चेधा॑ मूल॑ं यातुधान॑स्य वृश्च॥१०॥
नृऽच॑क्षाः। रक्षः॑। परि॑। प॒श्य॒। वि॒क्षु। तस्य॑। चीर्णि॑। प्रति॑। शृ॒णी॒हि॒। अर्या॑।
तस्य॑। अ॒ग्ने॒। पृ॒ष्टीः। हर॑सा। शृ॒णी॒हि॒। चेधा॑। मूल॑ं। यातु॑ऽधान॑स्य। वृ॒श्च॒॥१०॥

हे अग्ने नृचक्षा नृणां द्रष्टा त्वं विक्षु मनुष्येषु हिंसकत्वेन वर्तमानं रक्षो राक्षसं परि पश्य। सर्वतोऽवलोकय। अवलोक्य च तस्य रक्षसस्त्रीण्यङ्गानि शिरांसि प्रति शृणीहि। छिन्धीत्यर्थः। ततस्तस्य रक्षसः पृष्टीः पार्श्वस्थान्राक्षसानपि हरसा स्वकीयेन तेजसा शृणीहि। मारय। एवं चेधा यातुधानस्य तस्य राक्षसस्य मूलं पादं वृश्च। छिन्द्धि॥ ॥६॥

चिर्या॑तुधान॒ः प्रसि॑तिं त एत्वृतं यो अ॑ग्ने अनृ॒तेन॒ हंति॑।
तमर्चिषा॑ स्फूर्ज॒यञ्जा॑तवेदः समक्ष॒मेन॑ं गृणते नि वृ॑ङ्धि॥११॥
चिः। या॒तु॒ऽधा॒न॒ः। प्रऽसि॑तिं। ते॒। एतु॑। ऋ॒तं। यः। अ॒ग्ने॒। अ॒नृ॒तेन॑। हंति॑।
तं। अर्चि॑षा। स्फूर्ज॑यन्। जा॒त॒ऽवे॒दः॒। सं॒ऽअक्ष॑। एन॑ं। गृ॒ण॒ते॒। नि। वृ॒ङ्धि॒॥११॥

हे जातवेदो जातप्रज्ञाग्ने ते त्वदीयं प्रसितिं ज्वालाप्रबंधनं यातुधानो राक्षसस्त्रिस्त्रीन्वारानेतु। गच्छतु। त्रिर्वह्निं यत्तत्सुबद्धं भवति हि। किंच यो यातुधानो राक्षस ऋतं सत्यमनृतेनासत्येन हंति हिनस्ति तं यातुधानमर्चिषा स्वकीयेन तेजसा स्फूर्जयन्निष्पिषन्। स्फूर्जतिरत्र निष्पेषणकर्मा। एनं यातुधानं गृणते स्तोत्रं कुर्वते मह्यं समक्षं प्रत्यक्षं नि वृङ्धि। निवृह्य वर्जय वृकेण॥

तद॑ग्ने॒ चक्षु॒ः प्रति॑ धेहि रे॒भे श॒फारु॑जं॒ येन॒ पश्य॑सि यातुधा॒न॑ं।
अथ॑र्ववज्ज्योति॒षा दैव्ये॑न स॒त्यं धू॒र्वंत॑मचितं॒ न्योष॥१२॥
तत्। अ॒ग्ने॒। चक्षुः॑। प्रति॑। धे॒हि॒। रे॒भे। श॒फऽआ॑रुज॑ं। येन॑। पश्य॑सि। या॒तु॒ऽधा॒न॑ं।
अथ॑र्वऽवत्। ज्योति॑षा। दैव्ये॑न। स॒त्यं। धू॒र्वंत॑ं। अ॒चित॑ं। नि। ओ॒ष॒॥१२॥

हे अग्ने त्वं रेभे शब्दायमाने राक्षसे तच्चक्षुस्तेजः प्रति धेहि प्रक्षिप येन चक्षुषा शफाभ्यामारुजंतं शफसदृशैर्नखैः साधूनामाभिमुख्येन भंजकं यातुधानं राक्षसं पश्यसि। किंच सत्यं धूर्वंतमसत्येन हिंसंतमचितमज्ञानं दैव्येन दिवि भवेन ज्योतिषा तेजसाथर्ववन्न्योष। नितरां दह। दध्यङ्ङथर्वा रक्षसां हंतेति प्रागुक्तं॥

यद॑ग्ने अ॒द्य मि॑थु॒ना श॒पातो॒ यद्वा॒चस्तृ॑ष्टं॒ जन॑यंत रे॒भाः।
मन्यो॑र्मनसः॒ शर॒व्या॒३॒॑ जाय॑ते॒ या तया॑ विध्य हृ॒दये॑ यातुधा॒नान्॥१३॥

यत्। अग्ने। अद्य। मिथुना। शपातः। यत्। वाचः। तृष्टं। जनयंत। रेभाः।
मन्योः। मनसः। शरव्या। जायते। या। तया। विध्य। हृदये। यातुऽधानान् ॥१३॥

हे अग्ने यद्यदाद्याक्षिन्नहनि मिथुना स्त्रीपुंसौ शपातः परस्परमाक्रोशतः। यद्यदा रेभाः स्तोतारो वाचः संबंधि तृष्टं कटुकं परस्पराक्रोशलक्षणमधरं वा जनयंत। परस्परमाक्रोशंतीत्यर्थः। तदा मन्योर्दीप्तस्य क्रुद्धस्य वा तव। तथा च यास्कः। मन्युर्मन्यतेर्दीप्तिकर्मणः क्रोधकर्मणो वधकर्मणो वा। नि० १०. २९.। इति। मनसः सकाशाद्या शरव्येषुर्जायते तया शरव्यया यातुधानान्राक्षसान्हृदये विध्य। ताडय। मारयेत्यर्थः ॥

परा मृणीहि तपसा यातुधानान्पराग्ने रक्षो हरसा मृणीहि।
परार्चिषा मूरदेवाञ्छृणीहि परासुतृपो अभि शोशुचानः ॥१४॥
परा। मृणीहि। तपसा। यातुऽधानान्। परा। अग्ने। रक्षः। हरसा। मृणीहि।
परा। अर्चिषा। मूरऽदेवान्। मृणीहि। परा। असुऽतृपः। अभि। शोशुचानः ॥१४॥

हे अग्ने यातुधानांस्तपसा तापेन परा मृणीहि। मारय। किंच रक्षो हरसा त्वदीयेनौष्ण्येन परा मृणीहि। किंच मूरदेवान्मारव्यापारान्राक्षसानर्चिषा स्वकीयेन तेजसा परा मृणीहि। अपि चासुतृपो मनुष्याणामसुभिस्तृप्ता ये तानपि परा मृणीहीत्यर्थः ॥

परा द्य देवा वृजिनं मृणंतु प्रत्यगेनं शपथा यंतु तृष्टाः।
वाचास्तेनं शरव ऋच्छंतु मर्मन्विश्वस्यैतु प्रसितिं यातुधानः ॥१५॥
परा। अद्य। देवाः। वृजिनं। मृणंतु। प्रत्यक्। एनं। शपथाः। यंतु। तृष्टाः।
वाचाऽस्तेनं। शरवः। ऋच्छंतु। मर्मन्। विश्वस्य। एतु। प्रऽसितिं। यातुऽधानः ॥१५॥

अद्याक्षिन्नहनि देवा अग्निपुरोगाः सर्वे देवा वृजिनं प्राणिनां प्राणैर्वर्जितारं यातुधानं परा मृणंतु। अथैनमायांतं राक्षसं तृष्टाः कटुका अस्माभिरुक्ताः शपथाः प्रत्यग्यंतु। किंच वाचास्तेनमनृतवचनमेनं यातुधानं शरवः शरा मर्मन् मर्मण्यृच्छंतु। गच्छंतु। विश्वस्य व्याप्तस्यापेः प्रसितिं जालं। तथा च यास्कः। प्रसितिः प्रसयनात्तंतुर्वा जालं वा। नि० ६. १२.। इति। जालं यातुधानो राक्षस एतु। गच्छतु ॥ ॥७॥

यः पौरुषेयेण क्रविषा समंक्ते यो अश्व्येन पशुना यातुधानः।
यो अघ्न्याया भरति क्षीरमग्ने तेषां शीर्षाणि हरसापि वृश्च ॥१६॥
यः। पौरुषेयेण। क्रविषा। सं ऽअंक्ते। यः। अश्व्येन। पशुना। यातुऽधानः।
यः। अघ्न्यायाः। भरति। क्षीरं। अग्ने। तेषां। शीर्षाणि। हरसा। अपि। वृश्च ॥१६॥

यो यातुधानो राक्षसः पौरुषेयेण पुरुषसंबंधिना क्रविषा मांसेन समंक्ते आत्मानं संगमयति। यश्चाश्वेनाश्वसमूहेन। तदीयेन मांसेनेत्यर्थः। आत्मानं संगमयति। यो वा यातुधानोऽन्येन पशुनात्मानं संगमयति। यो वा यातुधानोऽघ्न्याया गोः क्षीरं भरति हरति। हे अग्ने त्वं तेषां सर्वेषामपि राक्षसानां शीर्षाणि शिरांसि हरसा त्वदीयेन तेजसा वृश्च। छिंद्धि ॥

संवत्सरीणं पय उस्रियायास्तस्य माशीद्यातुधानो नृचक्षः।
पीयूषमग्ने यतमस्तितृप्सात्तं प्रत्यंचमर्चिषा विध्य मर्मन् ॥१७॥

संवत्सरीणं। पयः। उस्रियायाः। तस्य। मा। अशीत्। यातुऽधानः। नृऽचक्षः।
पीयूषं। अग्ने। यतमः। तितृप्सात्। तं। प्रत्यंचं। अर्चिषा। विध्य। मर्मन् ॥१७॥

हे नृचक्षो नृणां द्रष्टरग्ने उस्रियाया गोः। उस्रियाहीति गोनामसु पाठात्। संवत्सरीणं संवत्सरेण भवं यत्पयोऽस्ति यातुधानो राक्षसस्तस्य माशीत्। तत्पयो मा भक्षयतु। किंच यतमो यो राक्षसः पीयूषं पीयूषेण ॥ विभक्तिव्यत्ययः ॥ अस्मदीयाया गोः पयसा तितृप्सात् आत्मानं तर्पयितुमिच्छति तं प्रत्यंचं युद्धायात्मानं प्रतिगतं राक्षसं मर्मन् मर्मणि प्राणवियोगस्थानेऽर्चिषा स्वकीयेन तेजसा विध्य। ताडय। मारयेत्यर्थः ॥

विषं गवां यातुधानाः पिबंत्वा वृश्चंतामदितये दुरेवाः।
परैनान्देवः सविता ददातु परा भागमोषधीनां जयंतां ॥१८॥
विषं। गवां। यातुऽधानाः। पिबंतु। आ। वृश्चंतां। अदितये। दुःऽएवाः।
परा। एनान्। देवः। सविता। ददातु। परा। भागं। ओषधीनां। जयंतां ॥१८॥

हे अग्ने यातुधाना राक्षसा गवां पशूनां गृहे स्थितं विषं पिबंतु। किंचादितयेऽदित्यर्थं दुरेवा दुष्टरा यातुधाना आ वृश्चंतां। त्वदीयैरायुधैराच्छिद्यंतां। किंच सविता देव एनान्राक्षसान्परा ददातु। सिंहेभ्यः प्रयच्छतु। अपि च तेऽमी राक्षसा ओषधीनां स्वभूतं भागं भक्षणीयमन्नं परा जयंतां। लभंतामित्यर्थः ॥

सनादग्ने मृणसि यातुधानान्न त्वा रक्षांसि पृतनासु जिग्युः।
अनु दह सहमूरान्क्रव्यादो मा ते हेत्या मुक्षत दैव्यायाः ॥१९॥
सनात्। अग्ने। मृणसि। यातुऽधानान्। न। त्वा। रक्षांसि। पृतनासु। जिग्युः।
अनु। दह। सहऽमूरान्। क्रव्यऽअदः। मा। ते। हेत्याः। मुक्षत। दैव्यायाः ॥१९॥

हे अग्ने त्वं सनाच्चिरादेवारभ्य यातुधानान्राक्षसान्मृणसि। बाधसे। तथापि त्वा त्वां पृतनासु संग्रामेषु रक्षांसि राक्षसा न जिग्युः। नाजयन्। किंच स त्वमधुनान्वनुक्रमेण सहमूरान् मूलेन सहितान् मारकव्यापरिणा युक्तान् क्रव्यादो मांसभक्षकान्राक्षसान्दह। तेजसा भस्मीकुरु। किंच तव संबंधिनो दैव्याया दैव्याद्धेत्या आयुधात्ते यातुधाना मा मुक्षत। मुक्ता मा भूवन्॥

त्वं नो अग्ने अधरादुदक्तात्त्वं पश्चादुत रक्षा पुरस्तात्।
प्रति ते ते अजरासस्तपिष्ठा अघशंसं शोशुचतो दहंतु ॥२०॥
त्वं। नः। अग्ने। अधरात्। उदक्तात्। त्वं। पश्चात्। उत। रक्ष। पुरस्तात्।
प्रति। ते। ते। अजरासः। तपिष्ठाः। अघऽशंसं। शोशुचतः। दहंतु ॥२०॥

हे अग्ने त्वं नोऽस्मानधराद्दक्षिणतः। उत्तरादिदिक्समभिव्याहारादधरशब्दोऽत्र दक्षिणदिक्पर इति विज्ञायते। उदक्तादुत्तरतश्च रक्ष। पाहि। उतापि च हे अग्ने त्वं पश्चात्पश्चिमतः पुरस्तात्पूर्वतश्च नोऽस्मान्रक्ष। चतसृषु दिक्ष्ववस्थितेभ्यो राक्षसेभ्योऽस्मान्पाहीत्यर्थः। किंच ते तव संबंधिनस्ते तपिष्ठा अतिशयेन तप्यमाना अजरासो जरावर्जिताः शोशुचतो ज्वलंतः संतो रश्मयोऽघशंसं पापशंसकं राक्षसं प्रति दहंतु। भस्मीकुर्वंतु॥ ॥८॥

पश्चात्पुरस्तादधरादुदक्तात्कविः काव्येन परि पाहि राजन् ।
सखे सखायमजरो जरिम्णेऽग्ने मर्ताँ अमर्त्यस्त्वं नः ॥२१॥
पश्चात् । पुरस्तात् । अधरात् । उदक्तात् । कविः । काव्येन । परि । पाहि । राजन् ।
सखे । सखायं । अजरः । जरिम्णे । अग्ने । मर्तान् । अमर्त्यः । त्वं । नः ॥२१॥

हे राजन्दीप्तेऽग्ने कविः क्रांतदर्शनस्त्वं काव्येन कविकर्मणा पश्चात् पश्चिमतः पुरस्तात्पूर्वतोऽधराद्दक्षिणतश्चोदक्तादुत्तरतश्चास्मान्परि पाहि । परितो रक्ष । किंच हे सखे मित्रभूताग्ने अजरो जरारहितस्त्वं मां सखायं जरिम्णे जरायै कुरु । त्वत्प्रसादादहं चिरं जीवामीत्यर्थः । एतदेव दर्शयति । हे अग्ने अमर्त्यो मरणधर्मरहितस्त्वं मर्तान्मरणधर्मवतो नोऽस्माञ्जरिम्णे जरायै कुर्विति शेषः ॥

परि त्वाग्ने पुरं वयं विप्रं सहस्य धीमहि । धृषद्वर्णं दिवेदिवे हंतारं भंगुरावतां ॥२२॥
परि । त्वा । अग्ने । पुरं । वयं । विप्रं । सहस्य । धीमहि । धृषत्ऽवर्णं । दिवेऽदिवे ।
हंतारं । भंगुरऽवतां ॥२२॥

हे सहस्य सहसे हित सहसो जात वाग्ने पुरं पूरकं विप्रं मेधाविनं धृषद्वर्णं धर्षकरूपं भंगुरावतां भंगुरकर्मयुक्तानां रक्षसां दिवेदिवे प्रत्यहं हंतारं हिंसितारं त्वा त्वां वयं पायुनामधेया भारद्वाजा रक्षसां हननाय परि धीमहि ॥

विषेण भंगुरावतः प्रति ष्म रक्षसो दह ।
अग्ने तिग्मेन शोचिषा तपुरग्राभिर्ऋष्टिभिः ॥२३॥
विषेण । भंगुरऽवतः । प्रति । स्म । रक्षसः । दह ।
अग्ने । तिग्मेन । शोचिषा । तपुःऽअग्राभिः । ऋष्टिऽभिः ॥२३॥

हे अग्ने त्वं भंगुरावतो भंजनकर्मयुक्तान्रक्षसो राक्षसान्विषेण व्याप्तेन तिग्मेन तीक्ष्णेन शोचिषा तेजसा प्रति दह । भस्मीकुरु । तथा तपुरग्राभिस्तपनशीलाग्राभिर्ऋष्टिभिः । ऋष्टय आयुधविशेषाः । ताभिरपि प्रति दह ॥

प्रत्यग्ने मिथुना दह यातुधानाँ किमीदिनाँ ।
सं त्वा शिशामि जागृह्यदब्धं विप्र मन्मभिः ॥२४॥
प्रति । अग्ने । मिथुना । दह । यातुऽधानान् । किमीदिनान् ।
सं । त्वा । शिशामि । जागृहि । अदब्धं । विप्र । मन्मऽभिः ॥२४॥

हे अग्ने त्वं मिथुना मिथुनभूतानि किमीदिना । किमिदानीमिति ये चरंति ते किमीदिनः । तान् । तथा च यास्कः । किमीदिने किमिदानीमिति चरते किमिदं किमिदमिति वा । नि० ६. ११. । इति । यातुधानान् यातुधानान्राक्षसान्प्रति दह । किंच हे विप्र मेधाविन्नग्ने अदब्धं केनाप्यहिंसितं त्वा त्वां मन्मभिः स्तुतिभिरहं सं शिशामि । स्तौमीत्यर्थः । अतस्त्वं जागृहि । निद्रां मा कुरु । बुध्यस्वेत्यर्थः ॥

प्रत्यग्ने हरसा हरः शृणीहि विश्वतः प्रति ।
यातुधानस्य रक्षसो बलं वि रुज वीर्यं ॥२५॥

प्रति । अग्ने । हरसा । हरः । शृणीहि । विश्वतः । प्रति ।
यातुऽधानस्य । रक्षसः । बलं । वि । रुज । वीर्यं ॥ २५॥

हे अग्ने हरसा त्वदीयेन तेजसा । तथा च यास्कः । हरो हरतेर्ज्योतिर्हर उच्यते । नि० ४. १९. । इति । यातुधानस्य राक्षसस्य हरो हरणशीलं बलं प्रति शृणीहि । नाशयेत्यर्थः । तथा रक्षसो राक्षसस्य वीर्यं च वि रुज । भंजय ॥ ॥ ९ ॥

हविष्मांतमित्येकोनविंशत्यृचं सूक्तं चतुर्थं वैष्टुभं । मूर्धन्वानृषिः । स चांगिरसो वामदेव्यो वा । सूर्यो वैश्वानरगुणकोऽग्निश्च समुदितो देवता । तथा चानुक्रांतं । हविरेकोनांगिरसो मूर्धन्वान्वामदेव्यो वा सौर्यवैश्वानरीयमिति ॥ द्यूढस्य दशराचस्य पंचमेऽहन्याग्निमारुत एतद्वैश्वानरीयनिविद्धानं । सूचितं च । हविष्मांतमग्निर्होता गृहपतिः स राजा । आ० ८. ८. । इति ॥

हविष्मांतमजरं स्वर्विदं दिविस्पृश्याहुतं जुष्टमग्नौ ।
तस्य भर्मणे भुवनाय देवा धर्मणे कं स्वधया पप्रथंत ॥ १॥
हविः । मांतं । अजरं । स्वःऽविदं । दिविऽस्पृशं । आऽहुतं । जुष्टं । अग्नौ ।
तस्य । भर्मणे । भुवनाय । देवाः । धर्मणे । कं । स्वधया । पप्रथंत ॥ १॥

मांतं मानीयं सोमात्मकमजरं जरारहितं जुष्टं देवानां प्रियं यज्ञविः स्वर्विदं सूर्यस्य वेदितरि दिविस्पृशि दिवि स्प्रष्टर्यग्नावाहुतमभिहुतं तस्य सोमात्मकस्य हविषो भर्मणे भरणाय भुवनाय भावनाय च धर्मणे धारणाय च कं सर्वस्य सुखकरमिममग्निं देवाः स्वधयान्नेन पप्रथंत । प्रथयंति । तथा च यास्कः । हविर्यत्यानीयमजरं सूर्यविदि दिविस्पृश्यभिहुतं जुष्टमग्नौ तस्य भरणाय च भावनाय च धारणाय चैतेभ्यः सर्वेभ्यः कर्मभ्यो देवा इममग्निमन्नेनापप्रथंत । नि० ७. २५. । इति ॥

गीर्णं भुवनं तमसापगूळ्हमाविः स्वरभवज्जाते अग्नौ ।
तस्य देवाः पृथिवी द्यौरुतापोऽरण्यन्नोषधीः सख्ये अस्य ॥ २॥
गीर्णं । भुवनं । तमसा । अपऽगूळ्हं । आविः । स्वः । अभवत् । जाते । अग्नौ ।
तस्य । देवाः । पृथिवी । द्यौः । उत । आपः । अरण्यन् । ओषधीः । सख्ये । अस्य ॥ २॥

गीर्णं पूर्वं निगीर्णं तमसांधकारेणापगूढमाच्छादितं स्वः सर्वं भुवनमग्नौ यस्मिन्वैश्वानरे जात उत्पन्ने सत्याविरभवत् आविर्भवति तस्मात्स वैश्वानरस्याग्निः सख्ये सखिकर्मणि देवा इंद्रादयः पृथिवी भूमिश्च द्यौश्चापोऽंतरिक्षं चोदकानि वौषधीरोषधश्चारण्यन् । अरमंत । प्रीतिं कृतवंत इत्यर्थः ॥

देवेभिर्विषितो यज्ञियेभिरग्निं स्तोषाण्यजरं बृहंतं ।
यो भानुना पृथिवीं द्यामुतेमामाततान रोदसी अंतरिक्षं ॥ ३॥
देवेभिः । नु । इषितः । यज्ञियेभिः । अग्निं । स्तोषाणि । अजरं । बृहंतं ।
यः । भानुना । पृथिवीं । द्यां । उत । इमां । आऽततान । रोदसी इति । अंतरिक्षं ॥ ३॥

यज्ञियेभिर्यज्ञार्हैर्देवेभिर्देवैरिंद्रादिभिर्नु क्षिप्रमिषितोऽहमजरं जरारहितं बृहंतं महांतमग्निं तं वैश्वानराग्निं स्तोषाणि । स्तोषामि । यो वैश्वानराग्निर्भानुना तेजसा पृथिवीं भूमिमुतापि चेमां द्यां दिवं चाततान आतनोति । तदेव दर्शयति । रोदसी द्यावापृथिव्यौ चाततान आतनोति । विस्तारयतीत्यर्थः ॥

यो होतासीत्प्रथमो देवजुष्टो यं समांजन्नाज्येना वृणानाः ।
स पतत्रीत्वरं स्था जगद्यच्छ्वाचमग्निरकृणोज्जातवेदाः ॥४॥
यः । होता । आसीत् । प्रथमः । देवऽजुष्टः । यं । सं ऽआंजन् । आज्येन । वृणानाः ।
सः । पतत्रि । इत्वरं । स्थाः । जगत् । यत् । श्वाचं । अग्निः । अकृणोत् । जातऽवेदाः ॥४॥

यो वैश्वानरोऽग्निर्देवजुष्टो देवैः सेवितः प्रथमो मुख्यो होतासीत् अभूत् यं च वैश्वानराग्निं यजमाना वृणाना आज्येन समांजन् समंजति जातवेदा जातप्रज्ञो जातधनो वा वैश्वानरोऽग्निः पतत्रि पतनशीलं पक्षिजातमित्वरं गमनशीलं सरीसृपादिकं स्थाः स्थावरं वृक्षादिरूपं च जगत् । स्थावरं जंगमं च यज्जगदित्यर्थः । श्वाचं क्षिप्रमेवाकृणोत् । अजनयत् । तथा च यास्कः । स पतत्रि चेत्वरं स्थावरं जंगमं च यत्तत्क्षिप्रमग्निरकरोज्जातवेदाः । नि० ५. ३. । इति ॥

यज्जातवेदो भुवनस्य मूर्धन्नतिष्ठो अग्ने सह रोचनेन ।
तं त्वाहेम मतिभिर्गीर्भिरुक्थैः स यज्ञियो अभवो रोदसिप्राः ॥५॥
यत् । जातऽवेदः । भुवनस्य । मूर्धन् । अतिष्ठः । अग्ने । सह । रोचनेन ।
तं । त्वा । अहेम । मतिऽभिः । गीःऽभिः । उक्थैः । सः । यज्ञियः । अभवः ।
रोदसिऽप्राः ॥५॥

हे जातवेदो जातप्रज्ञाग्ने यद्यस्त्वं भुवनस्य त्रैलोक्यस्य मूर्धन् मूर्धनि रोचनेनादित्येन सहातिष्ठः स्थितवानसि तं वैश्वानराग्निं त्वा त्वां मतिभिरर्चनीयाभिर्गीर्भिः स्तुतिभिरुक्थैः शस्त्रैश्चाहेम । प्रपद्यामहे ॥ हि गताविति धातुः ॥ स वैश्वानरस्त्वं रोदसिप्रा द्यावापृथिव्योः पूरयिता यज्ञियो यज्ञार्हश्चाभवः । भवसि ॥ ॥१०॥

मूर्धा भुवो भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन् ।
मायामू तु यज्ञियानामेतामपो यत्तूर्णिश्चरति प्रजानन् ॥६॥
मूर्धा । भुवः । भवति । नक्तं । अग्निः । ततः । सूर्यः । जायते । प्रातः । उत्ऽयन् ।
मायां । ऊं इति । तु । यज्ञियानां । एतां । अपः । यत् । तूर्णिः । चरति । प्रऽजानन् ॥६॥

अग्निर्वैश्वानरोऽग्निर्नक्तं रात्रौ भुवो भूतजातस्य मूर्धा शिरोवत्प्रधानभूतो भवति । रात्रौ सर्वप्राणिनामालोकस्य तदधीनत्वात् । ततो रात्रेरनंतरं प्रातरुद्यन् सूर्यो जायते । अहनि स एव वैश्वानरोऽग्निः सूर्यो भवतीत्यर्थः । किंच यज्ञियानां यज्ञसंपादिनां देवानां मायामु प्रज्ञामेवैतां मन्यंते कवय इति शेषः । यत्प्रजानन् प्रज्ञायमानः सूर्यस्तूर्णिस्त्वरमाणः सन्नपोऽंतरिक्षं कर्म वा चरति । तथा च यास्कः । मूर्धा मूर्तमस्मिन्धीयते मूर्धा यः सर्वेषां भूतानां भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यंत्स एव प्रज्ञां चैतां मन्यंते यज्ञियानां देवानां यज्ञसंपादिनामपो यत्कर्म चरति प्रजानंत्सर्वाणि स्थानान्यनुसंचरति त्वरमाणः । नि० ७. २७. । इति ॥

दृशेन्यो यो महिना समिद्धोऽरोचत दिवियोनिर्विभावा ।
तस्मिन्नग्नौ सूक्तवाकेन देवा हविर्विश्व आजुहवुस्तनूपाः ॥७॥
दृशेन्यः । यः । महिना । सं ऽइद्धः । अरोचत । दिविऽयोनिः । विभाऽवा ।
तस्मिन् । अग्नौ । सूक्तऽवाकेन । देवाः । हविः । विश्वे । आ । अजुहवुः । तनूऽपाः ॥७॥

यो वैश्वानरोऽग्निर्महिना महत्त्वेन वृष्टेन्यः सर्वदर्शनीयः समिद्धः सम्यग्दीप्तो दिविषोनिर्द्युस्थानो विभावा दीप्तिमांश्च सन्नरोचत दीप्यते तस्मिन्वैश्वानरेऽग्नौ तनूपाः शरीराणां रक्षका विश्वे सर्वे देवाः सूक्तवाकेनेदं द्यावापृथिवी इत्यादिवाक्येन स्तोत्राणां वचनेन वा हविराजुहवुः। आभिमुख्येन जुह्वुः ॥

सूक्तवाकं प्रथममादिदग्निमादिद्धविरजनयंत देवाः ।
स एषां यज्ञो अभवत्तनूपास्तं द्यौर्वेद तं पृथिवी तमापः ॥ ८॥
सूक्तऽवाकं। प्रथमं। आत्। इत्। अग्निं। आत्। इत्। हविः। अजनयंत। देवाः।
सः। एषां। यज्ञः। अभवत्। तनूऽपाः। तं। द्यौः। वेद। तं। पृथिवी। तं। आपः॥ ८॥

प्रथमं पूर्वं सूक्तवाकमिदं द्यावापृथिवी इत्यादि वाक्यं मनसा निरूपयंति। आदिदनंतरमेवाग्निं मथनेनोत्पादयंति। आदिदनंतरमेव देवा हविरजनयंत। स वैश्वानरोऽग्निरेषां देवानां यज्ञो यष्टव्योऽभवत्। भवति। स तनूपाः शरीराणां रक्षिता च भवति। तमग्निं द्यौर्द्युलोको वेद। जानाति। तमग्निं पृथिवी भूमिरपि च जानाति। तमग्निमापोऽंतरिक्षं च जानाति ॥

यं देवासोऽजनयंताग्निं यस्मिन्नाजुहवुर्भुवनानि विश्वा ।
सो अर्चिषा पृथिवीं द्यामुतेमामृजूयमानो अतपन्महित्वा ॥ ९॥
यं। देवासः। अजनयंत। अग्निं। यस्मिन्। आ। अजुहवुः। भुवनानि। विश्वा।
सः। अर्चिषा। पृथिवीं। द्यां। उत। इमां। ऋजुऽयमानः। अतपत्। महिऽत्वा॥ ९॥

यं वैश्वानरमग्निं देवासो देवा अजनयंत उत्पादितवंतः यस्मिंश्चोत्पन्ने वैश्वानरेऽग्नौ विश्वा विश्वानि भुवनानि भूतान्याजुहवुः आभिमुख्येन जुह्वुः सर्वमेधे स वैश्वानरोऽग्निरर्चिषा तेजसा पृथिवीमंतरिक्षं। आपः पृथिवीत्यंतरिक्षनामसु पाठात्। द्यां दिवं चोतापि चेमां भूमिं चर्जूयमान ऋजुगमनो महित्वा महत्त्वेनातपत्। सर्वं तपति ॥

स्तोमेन हि दिवि देवासो अग्निमजीजनञ्छक्तिभी रोदसिप्रां ।
तमू अकृण्वन् चेधा भुवे कं स ओषधीः पचति विश्वरूपाः ॥ १०॥
स्तोमेन। हि। दिवि। देवासः। अग्निं। अजीजनन्। शक्तिऽभिः। रोदसिऽप्रां।
तं। ऊं इति। अकृण्वन्। चेधा। भुवे। कं। सः। ओषधीः। पचति। विश्वऽरूपाः॥ १०॥

देवासो देवाः शक्तिभिः कर्मभी रोदसिप्रां द्यावापृथिव्योरापूरयितारमग्निं सूर्यात्मकं दिवि द्युलोके स्तोमेन हि स्तुत्या खल्वजीजनन्। उत्पादितवंतः। अपि च तमु तमेव कं सुखकरमग्निं यज्ञे चेधा भुवे चेधाभावायाकृण्वन्। कुर्वंति। स पृथिव्यां वर्तमानो विश्वरूपाः सर्वरूपा ओषधीर्व्रीह्याद्यात्मिकास्तेनोपकरिणा पचति। अत्र यास्कः। स्तोमेन यं हि दिवि देवासोऽग्निमजनयञ्छक्तिभिः कर्मभिर्द्यावापृथिव्योः पूरणं तमकुर्वंस्त्रेधाभावाय पृथिव्यामंतरिक्षे दिवीति शाकपूणिः। यदस्य दिवि तृतीयं तदसावादित्य इति हि ब्राह्मणं। नि० ७. २८.। इति ॥ ॥ ११॥

यदेदेनमदधुर्यज्ञियासो दिवि देवाः सूर्यमादितेयं ।
यदा चरिष्णू मिथुनावभूतामादित्प्रापश्यन्भुवनानि विश्वा ॥ ११॥

यदा । इत् । एनं । अदधुः । यज्ञियासः । दिवि । देवाः । सूर्यं । आदितेयं ।
यदा । चरिष्णू इति । मिथुनौ । अभूतां । आत् । इत् । प्र । अपश्यन् । भुवनानि ।
विश्वा ॥ ११ ॥

यदेवदेव प्रातरादितेयमदितेः पुत्रं सूर्यमेनमग्निं च यज्ञियासो यज्ञार्हा देवा दिवि द्युलोकेऽदधुः धृतवंतः । यदा चेमौ चरिष्णू चरणशीलौ सूर्यवैश्वानरौ मिथुनावभूतां प्रादुरभूतां । आदिदनंतरमेव विश्वा विश्वानि भुवनानि भूतजातानि प्रापश्यन् । तौ पश्यंति ॥ अत्र यास्कः । यदैनमदधुर्यज्ञियाः सर्वे दिवि देवाः सूर्यमदितेः पुत्रं यदा चरिष्णू मिथुनौ प्रादुरभूतां सर्वदा सहचारिणावुषाश्चादित्यश्च । मिथुनौ कस्मान्मिनोतेः श्रयतिकर्मा शु इति नामकरणस्यकारो वा नयतेः परो वनिर्वा समाश्रितावन्योन्यं नयतो वनुतो वा । मनुष्यमिथुनावपीतस्मादेव मेथंतावन्योन्यं वनुत इति वा । नि० ७. २९. । इति ॥

विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन् ।
आ यस्ततानोषसो विभातीरपो ऊर्णोति तमो अर्चिषा यन् ॥ १२ ॥
विश्वस्मै । अग्निं । भुवनाय । देवाः । वैश्वानरं । केतुं । अह्नां । अकृण्वन् ।
आ । यः । ततान । उषसः । विऽभातीः । अपो इति । ऊर्णोति । तमः । अर्चिषा । यन् ॥ १२ ॥

देवा इंद्रादयो विश्वस्मै भुवनाय वैश्वानरं विश्वनरहितमग्निमह्नां दिवसानां केतुं प्रज्ञापकमकृण्वन् । अकुर्वन् । यो वैश्वानरोऽग्निरुषसो विभातीर्विविधं दीप्यमाना आ ततान विस्तारयति । किंच सोऽयं यन्गच्छंस्तमोऽंधकारमर्चिषा तेजसापो ऊर्णोति । अपगमयति ॥

वैश्वानरं कवयो यज्ञियासोऽग्निं देवा अजनयन्नजुर्यं ।
नक्षत्रं प्रत्नममिनच्चरिष्णु यक्षस्याध्यक्षं तविषं बृहंतं ॥ १३ ॥
वैश्वानरं । कवयः । यज्ञियासः । अग्निं । देवाः । अजनयन् । अजुर्यं ।
नक्षत्रं । प्रत्नं । अमिनत् । चरिष्णु । यक्षस्य । अधिऽअक्षं । तविषं । बृहंतं ॥ १३ ॥

कवयो मेधाविनो यज्ञियासो यज्ञार्हा यज्ञसंपादिनो वा देवा अजुर्यं जरावर्जितमहिंस्रं वा वैश्वानरं विश्वनरहितं सूर्यात्मकमग्निमजनयन् । उत्पादितवंतः । स च देवैरुत्पादितोऽग्निर्नक्षत्रं क्षत्तिकादि प्रत्नं पुराणं चरिष्णु चरणशीलं यक्षस्य । यक्षतिः पूजार्थः । प्रयक्षमित्यादौ दर्शनात् । ऋ० २. ५. १. । यक्षस्य पूज्यस्य देवस्याध्यक्षं प्रत्यक्षं स्वामिनं वा तविषं वृद्धं बृहंतं महांतममिनत् । हिंसितवान् । तेजसाभिभूतवानित्यर्थः ॥

वैश्वानरं विश्वहा दीदिवांसं मंचैरग्निं कविमच्छा वदामः ।
यो महिम्ना परिबभूवोर्वी उतावस्तादुत देवः परस्तात् ॥ १४ ॥
वैश्वानरं । विश्वहा । दीदिऽवांसं । मंचैः । अग्निं । कविं । अच्छ । वदामः ।
यः । महिम्ना । परिऽबभूव । उर्वी इति । उत । अवस्तात् । उत । देवः । परस्तात् ॥ १४ ॥

विश्वहा सर्वदा दीदिवांसं दीप्तं कविं क्रांतप्रज्ञं वैश्वानरमग्निं मंचैरच्छा वदामः । अभिष्टुमः । यो वैश्वानरोऽग्निर्महिम्ना महत्त्वेनोर्वीं द्यावापृथिव्यौ परिबभूव परिभवति । उतापि चायमवस्तादधस्तात्तपति । उतापि चायं सूर्यात्मको देवः परस्तादुपरिष्टाच्च तपतीत्यर्थः ॥

द्वे सृती अशृणवं पितॄणामहं देवानामुत मर्त्यानां ।
ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं च ॥१५॥
द्वे इति । सृती इति । अशृणवं । पितॄणां । अहं । देवानां । उत । मर्त्यानां ।
ताभ्यां । इदं । विश्वं । एजत् । सं । एति । यत् । अंतरा । पितरं । मातरं । च ॥१५॥

पितॄणां देवानां चोतापि मर्त्यानां मनुष्याणां च द्वे सृती द्वौ मार्गौ देवयानपितृयाणाख्यावहमशृणवं । अश्रौषं । यद्विश्वं पितरं पालकत्वेन पितृभूतां द्यां मातरं च धारकत्वेन मातृभूतां पृथिवीं चांतरा द्यावापृथिवीमध्ये भवति तदिदं विश्वमग्निना संस्कृतं सदेवह्रदेवलोकं पितृलोकं च गच्छत् ताभ्यां देवयानपितृयाणाख्याभ्यां मार्गाभ्यां समेति । गच्छति । तौ च मार्गौ भगवता दर्शितौ । भ० गी० ८. २४–२६ ।

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं । तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जनाः ॥
धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनं । तत्र चांद्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥
शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते । एकया यात्यनावृत्तिमन्यया वर्तते पुनः ॥
नैते सृती पार्थ जानन्योगी मुह्यति कश्चनेति ॥ ॥१२॥

द्वे समीची बिभृतश्चरंतं शीर्षतो जातं मनसा विमृष्टं ।
स प्रत्यङ्विश्वा भुवनानि तस्थावप्रयुच्छन्तरणिर्भ्राजमानः ॥१६॥
द्वे इति । समीची इति संऽईची । बिभृतः । चरंतं । शीर्षतः । जातं । मनसा । विऽमृष्टं ।
सः । प्रत्यङ् । विश्वा । भुवनानि । तस्थौ । अप्रऽयुच्छन् । तरणिः । भ्राजमानः ॥१६॥

समीची संगते द्वे द्यावापृथिव्यौ चरंतं गच्छंतं शीर्षतः शिरसो जातमुत्पन्नं । तथा च निगमांतरं । उत मन्येऽहमेनमनयोर्हि शिरस्तोऽयं प्रातर्जायत इति । यद्वा । सर्वशिरोभूतादादित्याज्जातमित्यर्थः । मनसा । मन्यतिरर्चतिकर्मा । अर्चनीयया स्तुत्या विमृष्टं शोधितं संस्कृतमग्निं बिभृतः । धारयतः । सोऽप्रयुच्छन्नप्रमाद्यन्तरणिः त्रिप्रकारो भ्राजमानो दीप्यमानोऽग्निर्विश्वानि भुवनानि प्रत्यङ्भिमुखस्तस्थौ । तिष्ठति । तथा च श्रूयते । तस्मात्सर्व एव मन्यंते मां प्रत्युदगादिति ॥

यत्रा वदेते अवरः परश्च यज्ञन्योः कतरो नौ वि वेद ।
आ शेकुरित्सधमादं सखायो नक्षंत यज्ञं क इदं वि वोचत् ॥१७॥
यत्र । वदेते इति । अवरः । परः । च । यज्ञऽन्योः । कतरः । नौ । वि । वेद ।
आ । शेकुः । इत् । सधऽमादं । सखायः । नक्षंत । यज्ञं । कः । इदं । वि । वोचत् ॥१७॥

यत्र यस्मिन्काले ऽवरः पार्थिवोऽग्निर्देव्यो होता परश्च मध्यमो वायुश्चोभौ वदेते विवादं कुर्वाते यज्ञन्योर्यज्ञस्य नेचोर्गावावयोर्मध्ये कतरो भूयिष्ठं यज्ञं वि वेद वेत्ति तत्र सखायः समानख्याना ऋत्विजः सधमादं यज्ञमा शेकुः । कर्तुं शक्नुवंति । तथा यज्ञं नक्षंत अश्नुवतेऽनुतिष्ठंति च ये तेषां विदुषां यज्ञमश्नुवानानां मध्ये को विद्वाननुष्ठाता वेदमस्य विवादस्य निर्णयरूपं वाक्यं वि वोचत् । ब्रवीति । माध्यमिकमिममग्निं ब्रवीति ॥ तथा च यास्कः । यत्र विवदेते दैव्यौ होतारावयं चामिरसौ च मध्यमः कतरो नौ यज्ञे भूयो वेदेत्याशृणुवंति तत्सहमदनं समानख्याना ऋत्विजस्तेषां यज्ञं समश्नुवानानां को न इदं विवक्षति । नि० ७. ३०. । इति ॥

कत्यग्नयः कति सूर्यासः कत्युषासः कत्वु स्विदापः ।
नोपस्पिजं वः पितरो वदामि पृच्छामि वः कवयो विद्मने कं ॥१८॥

कति । अग्नयः । कति । सूर्यासः । कति । उषसः । कति । ऊं इति । स्वित् । आपः ।
न । उप ऽस्मिजँ । वः । पितरः । वदामि । पृच्छामि । वः । कवयः । विद्मने । कं ॥१८॥

एवं विवदमानावग्निवायू पितृन्प्रश्नमेयतुः । तत्र मध्यमस्तान्पृच्छति । कत्यग्नयः । अग्नयः कति कतिसंख्याकाः । सूर्यासः सूर्याश्च कतिसंख्याकाः । उषास उषसश्च कतिसंख्याकाः । आपश्च कति । उ इति पूरणः । स्वित्छब्दोऽपि विचारणार्थः । हे पितरः वो युष्माकमुपस्मिन्नं । उपस्मिन्नमिति स्पर्धायुक्तं वचनमुच्यते । पूर्वोक्तं प्रश्नवचनमेतन्न वदामि किंतर्ह्यहमजानन् हे कवयो मेधाविनः युष्मान्विद्मने विज्ञानाय कं सुखं स्वरूपपर्यालोचनक्लेशमंतरेण पृच्छामि । अथोत्तराणि बालखिल्यसंहितायां दर्शितानि । एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनु प्रभूतः । एकैवोषाः सर्वमिदं वि भात्येकं वा इदं वि बभूव सर्वं । ऋ० ८. ५८. २. । इति ॥

यावन्माचमुषसो न प्रतीकं सुपर्ण्यो३ वसते मातरिश्वः ।
तावद्दधात्युप यज्ञमायन्ब्राह्मणो होतुरवरो निषीदन् ॥१९॥
यावत्ऽमाचं । उषसः । न । प्रतीकं । सुऽपर्ण्यः । वसते । मातरिश्वः ।
तावत् । दधाति । उप । यज्ञं । आऽयन् । ब्राह्मणः । होतुः । अवरः । निऽसीदन् ॥१९॥

प्रकृतस्य वैश्वानरस्य विषये यः प्रश्नस्तस्य निर्णयमनया वदंति । हे मातरिश्वो मातर्यंतरिक्षे श्वसन् माध्यमिक वायो यावन्माचं यावदेव सुपर्ण्यः सुपतना राचय उषसः प्रतीकं मुखं प्रकाशाख्यं दर्शनं वा । नेति पूरणः । वसते आच्छादयंति तावदेव ब्राह्मणो होतावरो निकृष्टो होतुरस्माभिर्वैश्वानरस्य दैव्यस्य होतुर्निषीदन् हौत्रं कर्म कर्तुमुपविशन् यज्ञमायज्ञमुपगच्छन्नुप दधाति । होतृकर्म स्वबुद्धौ धारयति । तथा च यास्कः । यावन्माचमुषसः प्रत्यक्षं भवति प्रतिदर्शनमिति वास्त्युपमानस्य संप्रत्यर्थे प्रयोग इहैव निधेहीति यथा सुपर्ण्यः सुपतना एता राचयो वसते मातरिश्वञ्ज्योतिर्वर्णस्य तावदुपदधाति यज्ञमागच्छन्ब्राह्मणो होतास्माभिर्होतुरवरो निषीदन् होतृजपस्त्वनग्निर्वैश्वानरीयो भवति । नि० ७. ३१. । इति ॥ ॥१३॥

इंद्रं स्तवेत्यष्टादशर्चं पंचमं सूक्तं वैश्वामित्रस्य रेणोरार्षं चैष्टुभमैंद्रं । अनुक्रांतं च । इंद्रं स्तव द्यूना रेणुरिति ॥ सूर्यसुताभ्येकाह इदं सूक्तं निष्केवल्यनिविद्धानं । सूचितं च । सूर्यसुता यज्ञकामः पिबा सोममभींद्रं स्तवेति मध्यंदिनः । आ० ९. ८. । इति ॥

इंद्रं स्तवा नृतमं यस्य महा विबबाधे रोचना वि ज्मो अंतान् ।
आ यः पप्रौ चर्षणीधृद्वरोभिः प्र सिंधुभ्यो रिरिचानो महित्वा ॥१॥
इंद्रं । स्तव । नृऽतमं । यस्य । महा । विऽबबाधे । रोचना । वि । ज्मः । अंतान् ।
आ । यः । पप्रौ । चर्षणिऽधृत् । वरःऽभिः । प्र । सिंधुऽभ्यः । रिरिचानः । महिऽत्वा ॥१॥

हे स्तोतः त्वं नृतमं नेतृतममिंद्रं स्तव । स्तुहि । यस्येंद्रस्य महा महत्त्वं ॥ विभक्तिव्यत्ययः ॥ रोचना परेषां तेजांसि विबबाधे विबाधते । अभिभवतीत्यर्थः । वि ज्मः पृथिव्यास्यांतान्पर्यंतानभिभवति । यस्येंद्रश्चर्षणीधृच्चर्षणयो धर्ता सिंधुभ्यः समुद्रेभ्योऽपि महित्वा महत्त्वेन प्र रिरिचानः प्रवर्धमानश्च सन् वरोभिस्तमसां वरकैस्तेजोभिरा पप्रौ द्यावापृथिव्यावापूरयति ॥

स सूर्यः पर्युरू वरांस्येंद्रो ववृत्यादृष्येव चक्रा ।
अतिष्ठंतमपस्यं न सर्गं कृष्णा तमांसि त्विषा जघान ॥२॥

सः । सूर्यः । परि । उरु । वरांसि । आ । इंद्रः । ववृत्यात् । रथ्याऽइव । चक्रा ।
अतिष्ठंतं । अपस्यं । न । सर्गं । कृष्णा । तमांसि । त्विषा । जघान ॥२॥

सूर्यः सुवीर्यः स प्रसिद्ध इंद्र उरु बहूनि वरांसि तेजांसि पर्या ववृत्यात् । पर्यावर्तयति । तत्र दृष्टांतः । रथ्येव यथा सारथी रथसंबंधीनि चक्रा चक्राण्यावर्तयति तद्वदित्यर्थः । किंच सोऽयमतिष्ठंतं शीघ्रं गच्छंतमपस्यं न कर्मण्यमिव सर्गं । सृज्यत इति सर्गोऽश्वः । कृष्णानि तमांसि त्विषा दीप्त्या जघान । हंति ॥

समानमस्मा अनपावृदर्चे क्षया दिवो असमं ब्रह्म नव्यं ।
वि यः पृष्ठेव जनिमान्यर्य इंद्रश्चिकाय न सखायमीषे ॥३॥

समानं । अस्मै । अनपऽवृत् । अर्च । क्षया । दिवः । असमं । ब्रह्म । नव्यं ।
वि । यः । पृष्ठाऽइव । जनिमानि । अर्यः । इंद्रः । चिकाय । न । सखायं । ईषे ॥३॥

हे स्तोतः त्वं समानं मया सहानपावृदपगतिरहितं क्षया दिवो दिवः पृथिव्याश्चासममत्यंतमतिरिक्तं । महदित्यर्थः । नव्यं नवतरमन्यैरकृतपूर्वं ब्रह्म स्तोत्रमस्मा इंद्रायार्च । उच्चारय । य इंद्रो जनिमानि यज्ञे यज्ञे जातानि पृष्ठेव पृष्ठसंज्ञकानि स्तोत्राणीवार्योऽरीञ्शत्रून्वि चिकाय विचिनोति सखायं च नेषे नेच्छति ॥

इंद्राय गिरो अनिशितसर्गा अपः प्रेरयं सगरस्य बुध्नात् ।
यो अक्षेणेव चक्रिया शचीभिर्विष्वक्तस्तंभ पृथिवीमुत द्यां ॥४॥

इंद्राय । गिरः । अनिशितऽसर्गाः । अपः । प्र । ईरयं । सगरस्य । बुध्नात् ।
यः । अक्षेणऽइव । चक्रिया । शचीभिः । विष्वक् । तस्तंभ । पृथिवीं । उत । द्यां ॥४॥

इंद्रायेंद्रार्थमनिशितसर्गा अतनूछृतविसर्गा उपर्युपरि वर्तमाना या गिरः स्तुतयस्ताभिर्गीर्भिः सगरस्यांतरिक्षस्य । सगरं समुद्र इत्यंतरिक्षनामसु पाठात् । बुध्नात्प्रदेशादप उदकानि प्रेरयं । प्रेरयानि । य इंद्रः शचीभिः कर्मभिः पृथिवीमुतापि च द्यां दिवं चक्रिया रथचक्राण्यक्षेणेव यथा रथाक्षेण तद्वद्विष्वक् सर्वतस्तस्तंभ अस्तभ्नात् ॥

आपांतमन्युस्तृपलप्रभर्मा धुनिः शिमीवाञ्छरुमाँ ऋजीषी ।
सोमो विश्वान्यतसा वनानि नार्वागिंद्रं प्रतिमानानि देभुः ॥५॥

आपांतऽमन्युः । तृपलऽप्रभर्मा । धुनिः । शिमीऽवान् । शरुऽमान् । ऋजीषी ।
सोमः । विश्वानि । अतसा । वनानि । न । अर्वाक् । इंद्रं । प्रतिऽमानानि । देभुः ॥५॥

आपांतमन्युरापातितमन्युस्तृपलप्रभर्मा यावादिभिः क्षिप्रप्रहारी धुनिः शत्रूणां कंपयिता शिमीवान् कर्मवाञ्शरुमानायुधवानृजीषृजीषवान् सोमो विश्वानि सर्वाण्यतसातसमयानि वनान्यरण्यानि वर्धयतीति शेषः । प्रतिमानानि प्रतिमानभूतानि । समानानि द्रव्याणीत्यर्थः । इंद्रमर्वाग्र देभुः । दभ्नोतिरत्राकर्षणकर्मा । तुलया मीयमानान्यात्माभिमुखतया नाकर्षयंति । लघूनि भवंतीत्यर्थः । अन्यच प्रतिनिधीयमानानि पुरूणि तान्यात्माभिमुखमाकर्षति नैवमिंद्रं कुर्वंतीति । सर्वेभ्यो महानिंद्र इत्यर्थः । त्रयः पादाः सौम्यास्तुरीयस्त्वैंद्रः । तथा च यास्कः । आपातितमन्युस्तृप्रप्रहारी क्षिप्रप्रहारी सोमो वेंद्रो वा धुनिर्धूनोतेः शिमीति कर्मनाम शमयतेर्वा शक्नोतेर्वर्जीषी सोमो यत्सोमस्य पूयमानस्यातिरिच्यते तदृजीषमपार्जितं भवति तेनर्जीषी सोमोऽथेंद्रो निगमो भवत्यृजीषी वज्रीति । सोमः सर्वाण्यतसानि वनानि नार्वागिंद्रं प्रतिमानानि दभ्नुवंति दैरेनं प्रतिमिमते नैनं तानि दभ्नुवंति । नि० ५. १२. । इति ॥ ॥ १४ ॥

न यस्य द्यावापृथिवी न धन्व नांतरिक्षं नाद्रयः सोमो अक्षाः ।
यदस्य मन्युरधिनीयमानः शृणाति वीळु रुजति स्थिराणि ॥६॥
न।यस्य।द्यावापृथिवी इति।न।धन्व।न।अंतरिक्षं।न।अद्रयः।सोमः।अक्षाःरिति।
यत्।अस्य।मन्युः।अधिऽनीयमानः।शृणाति।वीळु।रुजति।स्थिराणि॥६॥

द्यावापृथिवी द्यावापृथिव्यौ यस्येंद्रस्य प्रतिमानभूते न भवतः । न धन्व । उदकमपि प्रतिमानभूतं न भवति । नांतरिक्षं । अंतरिक्षमपि प्रतिमानभूतं न भवति । नाद्रयः । पर्वताश्च प्रतिमानभूता न भवंति । तस्येंद्रस्य सोमोऽक्षाः । अश्नाति । किंच यद्यदास्येंद्रस्य मन्युः क्रोधोऽधिनीयमानः शत्रूणामुपरि प्राप्यमाणो भवति तदानीमयमिंद्रो वीळु दृढं शृणाति । हिनस्ति । स्थिराणि रुजति । भिनत्ति च ॥

जघान वृत्रं स्वधितिर्वनेव रुरोज पुरो अरदन्न सिंधून् ।
बिभेद गिरिं नवमिन्न कुंभमा गा इंद्रो अकृणुत स्वयुग्भिः ॥७॥
जघान।वृत्रं।स्वऽधितिः।वनाऽइव।रुरोज।पुरः।अरदत्।न।सिंधून्।
बिभेद।गिरिं।नवं।इत्।न।कुंभं।आ।गाः।इंद्रः।अकृणुत।स्वयुक्ऽभिः॥७॥

इंद्रो वृत्रमसुरं जघान । हतवान् । अपि च स्वधितिः परशुर्वनेव वनानीव पुरः शत्रुनगरी रुरोज । रुजति । भिनत्ति । शत्रुनगरीर्भित्त्वा च सिंधूनदीररदत् । वृथ्युदकेनालिखत् । नेति संप्रत्यर्थे । किंच गिरिं मेघं नवं न नवमिव कुंभं कलशं बिभेदेत् । भिनत्त्येव । किंचेंद्रः स्वयुग्भिः स्वयं युज्यमानैर्मरुद्भिर्गा उदकान्याकृणुत । अस्मदभिमुखं करोति ॥

त्वं ह त्यदृणया इंद्र धीरोऽसिन्न पर्व वृजिना शृणासि ।
प्र ये मित्रस्य वरुणस्य धाम युजं न जना मिनंति मित्रं ॥८॥
त्वं।ह।त्यत्।ऋणऽयाः।इंद्र।धीरः।असिः।न।पर्व।वृजिना।शृणासि।
प्र।ये।मित्रस्य।वरुणस्य।धाम।युजं।न।जनाः।मिनंति।मित्रं॥८॥

इंद्र धीरः प्राज्ञस्त्वं ह त्वं खलु त्वत्तदृणयाः स्तोतृविषयाणामृणानां प्रापयितासि । किंच त्वमसिर्न शस्त्रमिव पर्व पशूनां पर्वाणि वृजिना वृजिनानि स्तोतृणामुपद्रवाणि शृणासि । हंसि । किंच मित्रस्य वरुणस्य मित्रावरुणयोर्धाम धारकं कर्म युजं न युक्तमिव मित्रं येऽज्ञा शृंसा जनाः प्र मिनंति प्रकर्षेण हिंसंति तानपि शृणासीत्यर्थः ॥

प्र ये मित्रं प्रार्यमणं दुरेवाः प्र संगिरः प्र वरुणं मिनंति ।
न्य१मित्रेषु वधमिंद्र तुम्रं वृषन्वृषाणमरुषं शिशीहि ॥९॥
प्र।ये।मित्रं।प्र।अर्यमणं।दुःऽएवाः।प्र।संऽगिरः।प्र।वरुणं।मिनंति।
नि।अमित्रेषु।वधं।इंद्र।तुम्रं।वृषन्।वृषाणं।अरुषं।शिशीहि॥९॥

ये दुरेवा दुष्टगमना जना मित्रं देवं प्र मिनंति प्रहिंसंति अर्यमणं च देवं प्र मिनंति संगिरः समीचीनस्तुतिमतो मरुतश्च प्र मिनंति वरुणं च देवं प्र मिनंति तेष्वमित्रेषु शत्रुषु । तानुहिंस्येत्यर्थः । हे वृषन् कामानां वर्षकेंद्र त्वं तुम्रं गमनशीलं वृषाणं कामानां वर्षकमरुषमारोचमानं वधं वज्रं । वधो वज्र इति वज्रनामसु पाठात् । नि शिशीहि । तीक्ष्णीकुरु ॥

इंद्रो दिव इंद्र ईशे पृथिव्या इंद्रो अपामिंद्र इत्पर्वतानां ।
इंद्रो वृधामिंद्र इन्मेधिराणामिंद्रः क्षेमे योगे हव्य इंद्रः ॥१०॥
इंद्रः । दिवः । इंद्रः । ईशे । पृथिव्याः । इंद्रः । अपां । इंद्रः । इत् । पर्वतानां ।
इंद्रः । वृधां । इंद्रः । इत् । मेधिराणां । इंद्रः । क्षेमे । योगे । हव्यः । इंद्रः ॥१०॥

दिवो द्युलोकस्येंद्र ईशे । ईष्टे । पृथिव्या भूमेरपींद्र ईशे । ईश्वरो भवति । अपामुदकानामपींद्र ईश्वरो भवति । पर्वतानां मेघानामपींद्र ईश्वरो भवति । वृधां वृद्धानामपींद्र एवेश्वरः । मेधिराणां प्राज्ञानामपींद्र एवेश्वरो भवति । किंचेंद्रः क्षेमे लब्धस्य धनस्य परिपालने हव्यो ह्वातव्यो योगेऽलब्धस्य धनस्य लाभेऽपींद्र एव ह्वातव्यो भवति ॥ ॥१५॥

प्राक्तुभ्य इंद्रः प्र वृधो अहंभ्यः प्रांतरिक्षात्प्र समुद्रस्य धासेः ।
प्र वातस्य प्रथसः प्र ज्मो अंतात्प्र सिंधुभ्यो रिरिचे प्र क्षितिभ्यः ॥११॥
प्र । अक्तुऽभ्यः । इंद्रः । प्र । वृधः । अहंऽभ्यः । प्र । अंतरिक्षात् । प्र । समुद्रस्य । धासेः ।
प्र । वातस्य । प्रथसः । प्र । ज्मः । अंतात् । प्र । सिंधुऽभ्यः । रिरिचे । प्र । क्षितिऽभ्यः ॥११॥

इंद्रोऽक्तुभ्यो रात्रिभ्यः प्र वृधः । प्रवृद्धः । अहभ्यो दिवसेभ्योऽपि प्र वृधः । अधिकः । अंतरिक्षादपि प्रवृद्धः । समुद्रस्याब्धेर्धासेर्धारकात्स्थानादपि प्रवृद्धः । वातस्य वायोः प्रथसः प्रथिम्नोऽपि प्रवृद्धः । ज्मः पृथिव्या अंतात्पर्यंतादपि प्रवृद्धः । सिंधुभ्यो नदीभ्यश्च प्र रिरिचे । अतिरिच्यते । महान्भवतीत्यर्थः । क्षितिभ्यो मनुष्येभ्योऽपि प्र रिरिचे ॥

प्र शोशुचत्या उषसो न केतुरस्मिन्वा ते वर्ततामिंद्र हेतिः ।
अश्मेव विध्य दिव आ सृजानस्तपिष्ठेन हेषसा द्रोघमित्रान् ॥१२॥
प्र । शोशुचत्याः । उषसः । न । केतुः । अस्मिन्वा । ते । वर्ततां । इंद्र । हेतिः ।
अश्माऽइव । विध्य । दिवः । आ । सृजानः । तपिष्ठेन । हेषसा । द्रोघऽमित्रान् ॥१२॥

हे इंद्र ते तवास्मिन्वा भेदनरहितं हेतिर्वज्राख्यमायुधं शोशुचत्या ज्वलंत्या उषसो न यथोषसः केतुः पताकास्थानीयो रश्मिस्तद्वच्छत्रुषु प्र वर्ततां । किंच तपिष्ठेनातिशयेन शत्रूणां तापयित्र्या हेषसा शब्दकारिण्या हेत्या द्रोघमित्रान् द्रुग्धानि मित्राणि येषां ते द्रोघमित्राः । तान्शत्रून्विध्य । ताडय । तत्र दृष्टांतः । दिव आ सृजानः सृज्यमानोऽश्मेव । यथाशनिर्वृक्षान्विध्यति तद्वदित्यर्थः ॥

अन्वह मासा अन्विद्वनान्यन्वोषधीरनु पर्वतासः ।
अन्विंद्रं रोदसी वावशाने अन्वापो अजिहत जायमानं ॥१३॥
अनु । अह । मासाः । अनु । इत् । वनानि । अनु । ओषधीः । अनु । पर्वतासः ।
अनु । इंद्रं । रोदसी इति । वावशाने इति । अनु । आपः । अजिहत । जायमानं ॥१३॥

जायमानं प्रादुर्भवंतमिंद्रं मासाश्चादयोऽन्वजिहत । अनुगच्छंति । अहेति पूरणः । वनान्यरण्यान्यपींद्रमन्वजिहत । इदिति पूरणः । ओषधीरोषध्योऽपींद्रमनुगच्छंति । पर्वतासः पर्वता अपींद्रमनुगच्छंति । वावशाने कामयमाने रोदसी द्यावापृथिव्यावपींद्रमनुगच्छतः । आप उदकान्यपींद्रमनुगच्छंति । मासाद्यधिष्ठातृदेवताः प्रादुर्भवंतमिंद्रमनुगच्छंतीत्यर्थः ॥

कर्हि स्वित्सा त इंद्र चेत्यासद्दघस्य यन्निनदो रक्ष एषत् ।
मित्रक्रुवो यच्छसने न गावः पृथिव्या आपृगमुया शयंते ॥१४॥
कर्हि । स्वित् । सा । ते । इंद्र । चेत्या । असत् । अघस्य । यत् । भिनदः । रक्षः । आऽईषत् ।
मित्रऽक्रुवः । यत् । शसने । न । गावः । पृथिव्याः । आऽपृक् । अमुया । शयंते ॥१४॥

हे इंद्र ते तव सा हेतिरिषुर्वा चेत्या चेतयितव्या शत्रुषु चेप्तव्या कर्हि स्वित् कदा वासत् । भविष्यति । यद्यदा हेत्या त्वमघस्य । द्वितीयार्थे षष्ठी । अहतमेघदुद्वार्थमागच्छद्रक्षो भिनदः अभिनत् । यद्यदा च शत्रव्या मित्रक्रुवो मित्राणां क्रूरस्य कर्मणः कर्तारो जनाः पृथिव्याः संबंधिनि शसने विशसनस्थाने गावो न पशव इवापृगापर्चनाहताः संतोऽमुयानया पृथिव्या संगता युद्धे शयंते शेरते ॥

शत्रूयंतो अभि ये नस्ततस्रे महि व्राधंत ओगणासः इंद्र ।
अंधेनामित्रास्तमसा सचंतां सुज्योतिषो अक्तवस्ताँ अभि ष्युः ॥१५॥
शत्रुऽयंतः । अभि । ये । नः । ततस्रे । महि । व्राधंतः । ओगणासः । इंद्र ।
अंधेन । अमित्राः । तमसा । सचंतां । सुऽज्योतिषः । अक्तवः । तान् । अभि ।
स्युरिति स्युः ॥१५॥

हे इंद्र शत्रूयंतो मह्यत्यंतं व्राधंतोऽस्माभ्याधमाना ओगणासः संघीभूता ये शत्रवो नोऽस्मानभि ततस्रे निक्षिपंति तेऽमित्राः शत्रवोऽंधेन तमसा महतांधकारेण सचंतां । संगच्छंतां । किंच तानमित्रान् सुज्योतिषो दिवसा अक्तवो रात्रयश्चाभि ष्युः । अभिभवंतु ॥

पुरूणि हि त्वा सवना जनानां ब्रह्माणि मंदन्गृणतामृषीणां ।
इमामाघोषन्नवसा सहूतिं तिरो विश्वाँ अर्चतो याह्यर्वाङ् ॥१६॥
पुरूणि । हि । त्वा । सवना । जनानां । ब्रह्माणि । मंदन् । गृणतां । ऋषीणां ।
इमां । आऽघोषन् । अवसा । सऽहूतिं । तिरः । विश्वान् । अर्चतः । याहि । अर्वाङ् ॥१६॥

हे इंद्र त्वा त्वां जनानां संबंधीनि पुरूणि बहूनि सवना सवनानि ब्रह्माणि स्तोत्राणि च मंदन् । स्तुवंति मोदयंति वा । गृणतां स्तुवतामृषीणामिमां सहूतिं स्तुतिं त्वमाघोषन् महती शब्दवती चेयं स्तुतिरिति वदन्नर्चतः स्तुवतोऽस्मान्विश्वान्सर्वानपि तिरस्तिरस्कृत्यावसा रक्षणेन सहार्वाङस्मदभिमुखं याहि । गच्छ ॥

एवा ते वयमिंद्र भुंजतीनां विद्याम सुमतीनां नवानां ।
विद्याम वस्तोरवसा गृणंतो विश्वामित्रा उत त इंद्र नूनं ॥१७॥
एव । ते । वयं । इंद्र । भुंजतीनां । विद्याम । सुऽमतीनां । नवानां ।
विद्याम । वस्तोः । अवसा । गृणंतः । विश्वामित्राः । उत । ते । इंद्र । नूनं ॥१७॥

हे इंद्र ते तवैव भुंजतीनां रक्षंतीः प्रिया वयं विश्वामित्रपुत्रा रेणवो विद्याम । लभेमहि । उतापि च हे इंद्र ते तव नवानां भूतनाः सुमतीनामनुग्रहबुद्धीर्वस्तोरहन्यवसा रक्षणार्थं गृणंतो नूनं त्वां स्तुवंत एव विश्वामित्रा विश्वामित्रपुत्रा वयं विद्याम । लभेम ॥

शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां ॥१८॥
शुनं । हुवेम । मघऽवानं । इंद्रं । अस्मिन् । भरे । नृऽतमं । वाजऽसातौ ।
शृण्वंतं । उग्रं । ऊतये । समत्ऽसु । घ्नंतं । वृत्राणि । संऽजितं । धनानां ॥१८॥

अस्मिन्भरे संग्रामे शुनं वृद्धं मघवानं धनवंतं शृण्वंतमस्मदीयस्याह्वानस्य श्रोतारमुग्रमुद्भूर्णं समत्सु संग्रामेषु वृत्राणि शत्रून्घ्नंतं मारयंतं धनानां शत्रुधनानां संजितं सम्यगेव जेतारमिंद्रं वाजसातावन्नस्य लाभायोतये रक्षणाय च हुवेम । आह्वयेम ॥ ॥१६॥

सहस्रशीर्षेति षोडशर्चं षष्ठं सूक्तं । नारायणो नामर्षिरंत्या त्रिष्टुप् शिष्टा अनुष्टुभः । अव्यक्तमहदादिविलक्षणश्चेतनो यः पुरुषः । वेदा० १. ४. १. । पुरुषान्न परं किंचित् । क० उ० ३. ११. । इत्यादिश्रुतिषु प्रसिद्धः स देवता । तथा चानुक्रांतं । सहस्रशीर्षा षोळश नारायणः पौरुषमानुष्टुभं त्रिष्टुबंतं त्विति ॥ गतो विनियोगः ॥

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलं ॥१॥
सहस्रऽशीर्षा । पुरुषः । सहस्रऽअक्षः । सहस्रऽपात् । सः । भूमिं । विश्वतः । वृत्वा ।
अति । अतिष्ठत् । दशऽअंगुलं ॥१॥

सर्वप्राणिसमष्टिरूपो ब्रह्मांडदेहो विराडाख्यो यः पुरुषः सोऽयं सहस्रशीर्षा । सहस्रशब्दस्योपलक्षणत्वादनंतैः शिरोभिर्युक्त इत्यर्थः । यानि सर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहांतःपातित्वात्तदीयान्येवेति सहस्रशीर्षत्वं । एवं सहस्राक्षित्वं सहस्रपादत्वं च । स पुरुषो भूमिं ब्रह्मांडगोलकरूपां विश्वतः सर्वतो वृत्वा परिवेष्य दशांगुलं दशांगुलपरिमितं देशमत्यतिष्ठत् । अतिक्रम्य व्यवस्थितः । दशांगुलमित्युपलक्षणं । ब्रह्मांडाद्बहिरपि सर्वतो व्याप्यावस्थित इत्यर्थः ॥

पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यं । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥२॥
पुरुषः । एव । इदं । सर्वं । यत् । भूतं । यत् । च । भव्यं । उत । अमृतऽत्वस्य । ईशानः ।
यत् । अन्नेन । अतिऽरोहति ॥२॥

यदिदं वर्तमानं जगत्तत्सर्वं पुरुष एव । यच्च भूतमतीतं जगद्यच्च भव्यं भविष्यज्जगत् तदपि पुरुष एव । यथास्मिन्कल्पे वर्तमानाः प्राणिदेहाः सर्वेऽपि विराट्पुरुषस्यावयवाः तथैवातीतागामिनोरपि कल्पयोर्द्रष्टव्यमित्यभिप्रायः । उतापि चामृतत्वस्य देवत्वस्यायमीशानः स्वामी । यद्यस्मात्कारणादन्नेन प्राणिनां भोग्येनान्नेन निमित्तभूतेनातिरोहति स्वकीयां कारणावस्थामतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति तस्मात्प्राणिनां कर्मफलभोगाय जगदवस्थास्वीकारान्नेदं तस्य वस्तुत्वमित्यर्थः ॥

एतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥३॥
एतावान् । अस्य । महिमा । अतः । ज्यायान् । च । पुरुषः ।
पादः । अस्य । विश्वा । भूतानि । त्रिऽपात् । अस्य । अमृतं । दिवि ॥३॥

अतीतानागतवर्तमानरूपं जगद्यावदस्ति एतावान्सर्वोऽप्यस्य पुरुषस्य महिमा । स्वकीयसामर्थ्यविशेषः । न तु तस्य वास्तवस्वरूपं । वास्तवस्तु पुरुषोऽतो महिम्नोऽपि ज्यायान् । अतिशयेनाधिकः । एतद्भोग्यं सृष्टी-

क्रियते । अस्य पुरुषस्य विश्वा सर्वाणि भूतानि कालत्रयवर्तीनि प्राणिजातानि पादः । चतुर्थोऽंशः । अस्य पुरुषस्यावशिष्टं त्रिपात्स्वरूपममृतं विनाशरहितं सद्दिवि द्योतनात्मके स्वप्रकाशस्वरूपे व्यवतिष्ठत इति शेषः । यद्यपि सत्यं ज्ञानमनंतं ब्रह्म । तै० आ० ८. १. उ० २. १. । इत्यात्मातस्य परब्रह्मण इयत्ताभावात्पादचतुष्टयं निरूपयितुमशक्यं तथापि जगदिदं ब्रह्मस्वरूपापेक्षयाल्पमिति विवक्षितत्वात्पादत्वोपन्यासः ॥

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ्व्यक्रामत्साशनानशने अभि ॥४॥

त्रिऽपात् । ऊर्ध्वः । उत् । ऐत् । पुरुषः । पादः । अस्य । इह । अभवत् । पुनरिति । ततः । विष्वङ् । वि । अक्रामत् । साशनानशने इति । अभि ॥४॥

योऽयं त्रिपात्पुरुषः संसाररहितो ब्रह्मस्वरूपः सोऽयमूर्ध्व उदैत् । अस्मादज्ञानकार्यात्संसाराद्बहिर्भूतोऽत्यैर्गुणदोषैरस्पृष्ट उत्कर्षेण स्थितवान् । तस्यास्य सोऽयं पादो लेशः सोऽयमिह मायायां पुनरभवत् । सृष्टिसंहाराभ्यां पुनःपुनरागच्छति । अस्य सर्वस्य जगतः परमात्मलेशत्वं भगवताप्युक्तं । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् । भ० गी० १०. ४२. । इति । ततो मायायामागत्यनंतरं विष्वङ् देवमनुष्यतिर्यगादिरूपेण विविधः सन् व्यक्रामत् । व्याप्तवान् । किं कृत्वा । साशनानशने अभिलक्ष्य । साशनं भोजनादिव्यवहारोपेतं चेतनं प्राणिजातं अनशनं तद्रहितमचेतनं गिरिनद्यादिकं । तदुभयं यथा स्यात्तथा स्वयमेव विविधो भूत्वा व्याप्तवानित्यर्थः ॥

तस्माद्विराळजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥५॥

तस्मात् । विऽराट् । अजायत । विऽराजः । अधि । पुरुषः ।
सः । जातः । अति । अरिच्यत । पश्चात् । भूमिं । अथो इति । पुरः ॥५॥

विष्वङ् व्यक्रामदिति यदुक्तं तदेवाच प्रपंचयते । तस्मादादिपुरुषाद्विराड्ब्रह्मांडदेहोऽजायत । उत्पन्नः । विविधानि राजंते वस्तून्यत्रेति विराट् । विराजोऽधि विराड्देहस्योपरि तमेव देहमधिकरणं कृत्वा पुरुषस्तद्देहाभिमानी कश्चित्पुमानजायत । सोऽयं सर्ववेदांतवेद्यः परमात्मा स्वयमेव स्वकीयया मायया विराड्देहं ब्रह्मांडरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्मांडाभिमानी देवतात्मा जीवोऽभवत् । एतच्चार्थवर्णिका उत्तरतापनीये विस्पष्टमामनंति । स वा एष भूतानींद्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते माययैव । नृ० ता० २. १. ९. । इति । स जातो विराट् पुरुषोऽत्यरिच्यत । अतिरिक्तोऽभूत् । विराड्व्यतिरिक्तो देवतिर्यङ्मनुष्यादिरूपोऽभूत् । पश्चाद्देवादिजीवभावादूर्ध्वं भूमिं ससर्जेति शेषः । अथो भूमिसृष्टेरनंतरं तेषां जीवानां पुरः ससर्ज । पूर्यंते सप्तभिर्धातुभिरिति पुरः शरीराणि ॥ ॥१७॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसंतो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥६॥

यत् । पुरुषेण । हविषा । देवाः । यज्ञं । अतन्वत ।
वसंतः । अस्य । आसीत् । आज्यं । ग्रीष्मः । इध्मः । शरत् । हविः ॥६॥

यदादौ पूर्वोक्तक्रमेणैव शरीरेषूत्पन्नेषु सत्सु देवा उत्तरसृष्टिसिद्ध्यर्थं वाह्यद्रव्यस्यानुत्पन्नत्वेन हविरंतरासंभवात्पुरुषस्वरूपमेव मनसा हविष्ट्वेन संकल्प्य पुरुषेण पुरुषाख्येन हविषा मानसं यज्ञमतन्वत अन्वतिष्ठन् तदानीमस्य यज्ञस्य वसंतो वसंतर्तुरेवाज्यमासीत् । अभूत् । तमेवाज्यत्वेन संकल्पितवंत इत्यर्थः । एवं ग्रीष्म

इध्म आसीत् । तमेवेध्मत्वेन संकल्पितवंत इत्यर्थः । तथा शरद्धविरासीत् । तामेव पुरोडाश्यादिहविष्ट्वेन संकल्पितवंत इत्यर्थः । पूर्वं पुरुषस्य हविःसामान्यरूपत्वेन संकल्पः । अनंतरं वसंतादीनामाज्यादिविशेषरूपत्वेन संकल्प इति द्रष्टव्यं ॥

तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः । तेन देवा अयजंत साध्या ऋषयश्च ये ॥७॥
तं । यज्ञं । बर्हिषि । प्र । औक्षन् । पुरुषं । जातं । अग्रतः । तेन । देवाः । अयजंत ।
साध्याः । ऋषयः । च । ये ॥७॥

यज्ञं यज्ञसाधनभूतं तं पुरुषं पशुत्वभावनया यूपे बद्धं बर्हिषि मानसे यज्ञे प्रौक्षन् । प्रोक्षितवंतः । कीदृशमित्यत्राह । अग्रतः सर्वसृष्टेः पूर्वं पुरुषं जातं पुरुषत्वेनोत्पन्नं । एतच्च प्रागेवोक्तं तस्माद्विराळजायत विराजो अधि पूरुष इति । तेन पुरुषरूपेण पशुना देवा अयजंत । मानसयागं निष्पादितवंत इत्यर्थः । के ते देवा इत्यत्राह । साध्याः सृष्टिसाधनयोग्याः प्रजापतिप्रभृतयः तदनुकूला ऋषयो मंत्रद्रष्टारश्च ये संति । ते सर्वे ऽप्ययजंतेत्यर्थः ॥

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं ।
पशूंस्तांश्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये ॥८॥
तस्मात् । यज्ञात् । सर्वऽहुतः । संऽभृतं । पृषत्ऽआज्यं ।
पशून् । तान् । चक्रे । वायव्यान् । आरण्यान् । ग्राम्याः । च । ये ॥८॥

सर्वहुतः । सर्वात्मकः पुरुषो यस्मिन्यज्ञे हूयते सोऽयं सर्वहुत् । तादृशात्तस्मात्पूर्वोक्तात्मानसाद्यज्ञात्पृषदाज्यं दधिमिश्रमाज्यं संभृतं । संपादितं । दधि चाज्यं चेत्येवमादिभोग्यजातं सर्वं संपादितमित्यर्थः । तथा वायव्यान्वायुदेवताकाँल्लोकप्रसिद्धानारण्यान्पशूंश्चक्रे । उत्पादितवान् । आरण्या हरिणादयः । तथा ये च ग्राम्या गवाश्वादयः तानपि चक्रे । पशूनामंतरिक्षद्वारा वायुदेवत्यत्वं यजुर्ब्राह्मणे समाम्नायते । वायवः स्थेत्याह वायुर्वा अंतरिक्षस्याध्यक्षः । अंतरिक्षदेवत्याः खलु वै पशवः । वायव एवैनान्परिददाति । तै० ब्रा० ३. २. १. ३. । इति ॥

तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ।
छंदांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥९॥
तस्मात् । यज्ञात् । सर्वऽहुतः । ऋचः । सामानि । जज्ञिरे ।
छंदांसि । जज्ञिरे । तस्मात् । यजुः । तस्मात् । अजायत ॥९॥

सर्वहुतस्तस्मात्पूर्वोक्ताद्यज्ञादृचः सामानि जज्ञिरे । उत्पन्नाः । तस्माद्यज्ञाच्छंदांसि गायत्र्यादीनि जज्ञिरे । तस्माद्यज्ञाद्यजुरप्यजायत ॥

तस्मादश्वा अजायंत ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥१०॥
तस्मात् । अश्वाः । अजायंत । ये । के । च । उभयादतः ।
गावः । ह । जज्ञिरे । तस्मात् । तस्मात् । जाताः । अजावयः ॥१०॥

तस्मात्पूर्वोक्तायज्ञात्सर्वा ऋचायंत । उत्पन्नाः । तथा ये के चाश्वव्यतिरिक्ता गर्दभा अश्वतराश्चोभयादत ऊर्ध्वाधोभागयोरुभयोर्दंतयुक्ताः संति तेऽप्यजायंत । तथा तस्मादयज्ञात्रावश्च अजिरे । किंच तस्मादयज्ञादजावयश्च जाताः ॥ ॥ १८॥

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते ॥११॥
यत् । पुरुषं । वि । अदधुः । कतिधा । वि । अकल्पयन् ।
मुखं । किं । अस्य । कौ । बाहू इति । कौ । ऊरू इति । पादौ । उच्येते इति ॥११॥

प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुं ब्रह्मवादिनां प्रश्ना उच्यंते । प्रजापतेः प्राणरूपा देवा यदा पुरुषं विराड्रूपं व्यदधुः संकल्पेनोत्पादितवंतः तदानीं कतिधा कतिभिः प्रकारैर्व्यकल्पयन् । विविधं कल्पितवंतः । अस्य पुरुषस्य मुखं किमासीत् । कौ बाहू अभूतां । का ऊरू । कौ च पादावुच्येते । प्रथमं सामान्यरूपः प्रश्नः पश्चान्मुखं किमित्यादिना विशेषविषयाः प्रश्नाः ॥

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥१२॥
ब्राह्मणः । अस्य । मुखं । आसीत् । बाहू इति । राजन्यः । कृतः ।
ऊरू इति । तत् । अस्य । यत् । वैश्यः । पत्ऽभ्यां । शूद्रः । अजायत ॥१२॥

इदानीं पूर्वोक्तानां प्रश्नानामुत्तराणि दर्शयति । अस्य प्रजापतेर्ब्राह्मणो ब्राह्मणत्वजातिविशिष्टः पुरुषो मुखमासीत् । मुखादुत्पन्न इत्यर्थः । योऽयं राजन्यः क्षत्रियत्वजातिमान्पुरुषः स बाहू कृतः । बाहुत्वेन निष्पादितः । बाहुभ्यामुत्पादित इत्यर्थः । तत्तदानीमस्य प्रजापतेर्यदूरू तद्रूपो वैश्यः संपन्नः । ऊरुभ्यामुत्पन्न इत्यर्थः । तथास्य पद्भ्यां पादाभ्यां शूद्रः शूद्रत्वजातिमान्पुरुषोऽजायत । इयं च मुखादिभ्यो ब्राह्मणादीनामुत्पत्तिर्यजुःसंहितायां सप्तमकांडे स मुखतस्त्रिवृतं निरमिमीत । तै० सं० ७. १. १. ४. । इत्यादौ विस्पष्टमाम्नाता । अतः प्रश्नोत्तरे उभे अपि तत्परतयैव योजनीये ॥

चंद्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
मुखादिंद्रश्चाग्निश्च प्राणाद्वायुरजायत ॥१३॥
चंद्रमाः । मनसः । जातः । चक्षोः । सूर्यः । अजायत ।
मुखात् । इंद्रः । च । अग्निः । च । प्राणात् । वायुः । अजायत ॥१३॥

यथा दध्याज्यादिद्रव्याणि गवादयः पशव ऋगादिवेदा ब्राह्मणादयो मनुष्याश्च तस्मादुत्पन्ना एवं चंद्रादयो देवा अपि तस्मादेवोत्पन्ना इत्याह । प्रजापतेर्मनसः सकाशाच्चंद्रमा जातः । चक्षोश्च चक्षुषः सूर्योऽप्यजायत । अस्य मुखादिंद्रश्चाग्निश्च देवावुत्पन्नौ । अस्य प्राणाद्वायुरजायत ॥

नाभ्या आसीदंतरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् ॥१४॥
नाभ्याः । आसीत् । अंतरिक्षं । शीर्ष्णः । द्यौः । सं । अवर्तत ।
पत्ऽभ्यां । भूमिः । दिशः । श्रोत्रात् । तथा । लोकान् । अकल्पयन् ॥१४॥

यथा चंद्रादीन्प्रजापतेर्मनःप्रभृतिभ्योऽकल्पयन् तथांतरिक्षादीँल्लोकान्प्रजापतेर्नाभ्यादिभ्यो देवा अकल्पयन् । उत्पादितवंतः । एतदेव दर्शयति । नाभ्याः प्रजापतेर्नाभेरंतरिक्षमासीत् । शीर्ष्णः शिरसो द्यौः समवर्तत । उत्पन्ना । अस्य पद्भ्यां पादाभ्यां भूमिरुत्पन्ना । अस्य श्रोत्राद्दिश उत्पन्नाः ॥

सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुं ॥१५॥
सप्त । अस्य । आसन् । परिऽधयः । त्रिः । सप्त । सम्ऽइधः । कृताः ।
देवाः । यत् । यज्ञं । तन्वानाः । अबध्नन् । पुरुषं । पशुं ॥१५॥

अस्य सांकल्पिकयज्ञस्य गायत्र्यादीनि सप्त च्छंदांसि परिधय आसन्। ऐष्टिकस्याहवनीयस्य त्रयः परिधय उत्तरवेदिकास्त्रय आदित्यस्य सप्तमः परिधिप्रतिनिधिरूपः । अत एवाम्नायते । न पुरस्तात्परिदध्यादित्यादित्यो ह्येवोद्यन्पुरस्ताद्रक्षांस्यपहंतीति । तत एत आदित्यसहिताः सप्त परिधयोऽत्र सप्त च्छंदोरूपाः । तथा समिधस्त्रिः सप्त त्रिगुणीकृतसप्तसंख्याका एकविंशतिः कृताः । द्वादश मासाः पंचर्तवस्त्रय इमे लोका असावादित्य एकविंशः । तै० सं० ५. १. १०. ३. । इति श्रुताः पदार्था एकविंशतिदारुयुक्तेंधनत्वेन भाविताः । यदः पुरुषो वैराजोऽस्ति तं पुरुषं देवाः प्रजापतिप्राणेंद्रियरूपा यज्ञं तन्वाना मानसं यज्ञं तन्वानाः कुर्वाणाः पशुमबध्नन् । विराट्पुरुषमेव पशुत्वेन भावितवंतः । एतदेवाभिप्रेत्य पूर्वत्र यत्पुरुषेण हविषेत्युक्तं ॥

यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति देवाः ॥१६॥
यज्ञेन । यज्ञं । अयजंत । देवाः । तानि । धर्माणि । प्रथमानि । आसन् ।
ते । ह । नाकं । महिमानः । सचंत । यत्र । पूर्वे । साध्याः । संति । देवाः ॥१६॥

पूर्वं प्रपंचेनोक्तमर्थं संक्षिप्याह दर्शयति । देवाः प्रजापतिप्राणरूपा यज्ञेन यथोक्तेन मानसेन संकल्पेन यज्ञं यथोक्तयज्ञस्वरूपं प्रजापतिमयजंत । पूजितवंतः । तस्मात्पूजनात्तानि प्रसिद्धानि धर्माणि जगद्रूपविकाराणां धारकाणि प्रथमानि मुख्यान्यासन् । एतावता सृष्टिप्रतिपादकसूक्तभागार्थः संगृहीतः । अथोपासनतत्फलानुवादकभागार्थः संगृह्यते । यत्र यस्मिन्विराट्प्राप्तिरूपे नाके पूर्वे साध्याः पुरातना विराडुपासिसाधका देवाः संति तिष्ठंति तन्नाकं विराट्प्राप्तिरूपं स्वर्गं ते महिमानस्तदुपासका महात्मानः सचंत । समवयंति । प्राप्नुवंति ॥ ॥१९॥ ॥७॥

अष्टमेऽनुवाके नव सूक्तानि । सं जागृवद्भिरिति पंचदशर्चं प्रथमं सूक्तं वीतहव्यपुत्रस्यारुणस्यान्त्र आर्षमग्निदैवत्यं । अंत्या त्रिष्टुप् शिष्टा जगत्यः । तथा चानुक्रांतं । सं जागृवद्भिः पंचोनारुणो वैतहव्य आग्नेयमिति ॥ प्रातरनुवाकाश्विनशस्त्रयोर्जागते छंदसीदं सूक्तं । सूचितं च । सं जागृवद्भिश्चित इच्छिशोर्वसुं न चित्रमहसमिति जागतं । आ० ४. १३. । इति ॥

सं जागृवद्भिर्जरमाण इध्यते दमे दमूना इषयन्निळस्पदे ।
विश्वस्य होता हविषो वरेण्यो विभुर्विभावा सुषखा सखीयते ॥१॥
सं । जागृवत्ऽभिः । जरमाणः । इध्यते । दमे । दमूनाः । इषयन् । इळः । पदे ।
विश्वस्य । होता । हविषः । वरेण्यः । विऽभुः । विभाऽवा । सुऽसखा । सखिऽयते ॥१॥

हे अग्ने जागृवद्भिर्जागरणशीलैः स्तोतृभिर्जरमाणः स्तूयमानो दमूना दममना दानमना दांतमना वेळ

इळायास्पदे स्थाने उत्तरवेद्यामिषयन्नन्नमिच्छन् विश्वस्य सर्वस्य हविषो होता वरेण्यो वरणीयो विभुर्व्याप्तो विभावा दीप्तिमान् सुषखा शोभनसखा भवान् सखीयते सखित्वमिच्छते यजमानाय समिध्यते। सम्यगद्दीप्यते॥

स दर्शतश्रीरतिथिर्गृहेगृहे वनेवने शिश्रिये तक्ववीरिव।
जनँजनं जन्यो नाति मन्यते विश आ क्षेति विश्यो३ विशंविशं ॥२॥
सः। दर्शतऽश्रीः। अतिथिः। गृहेऽगृहे। वनेऽवने। शिश्रिये। तक्ववीःऽइव।
जनँऽजनं। जन्यः। न। अति। मन्यते। विशः। आ। क्षेति। विश्यः। विशंऽविशं॥२॥

दर्शतश्रीर्दर्शनीयविभूतिरतिथिरतिथिभूतः सोऽग्निर्गृहेगृहे यजमानानां गृहेषु वनेवने सर्वेषु वनेषु च शिश्रिये। श्रयति। किंच जन्यो जनहितः सोऽग्निर्जनंजनं सर्वं जनं तक्ववीरिव गच्छन्निव नाति मन्यते। न विलङ्घ्य गच्छतीत्यर्थः। तदेव दर्शयति। विशो विड्भ्यो हितः सोऽग्निर्विश्यो मनुष्याणा क्षेति। किंच विशंविशं सर्वा विशः प्रजा अधितिष्ठतीति शेषः॥

सुदक्षो दक्षैः क्रतुनासि सुक्रतुरग्ने कविः काव्येनासि विश्ववित्।
वसुर्वसूनां क्षयसि त्वमेक इद्द्यावा च यानि पृथिवी च पुष्यतः ॥३॥
सुऽदक्षः। दक्षैः। क्रतुना। असि। सुऽक्रतुः। अग्ने। कविः। काव्येन। असि। विश्वऽवित्।
वसुः। वसूनां। क्षयसि। त्वं। एकः। इत्। द्यावा। च। यानि। पृथिवी इति। च। पुष्यतः॥३॥

हे अग्ने त्वं दक्षैर्बलैः सुदक्षः सुबलोऽसि। भवसि। किंच क्रतुना कर्मणा सुक्रतुः शोभनकर्मासि। किंच काव्येन मेधाविकर्मणा कविर्मेधाव्यसि। किंच विश्ववित्सर्वज्ञोऽसि। किंच वसूनां धनानां वसुर्वासयितासि। किंच हे अग्ने त्वमेक इदेक एव क्षयसि। निवससि। किंच द्यावा च पृथिवी च द्यावाभूमी यानि वसूनि पुष्यतः संवर्धयतः तेषां दिव्यानां पार्थिवानां च धनानामीशिष इत्यर्थः॥

प्रजानन्नग्ने तव योनिमृत्वियमिळायास्पदे घृतवन्तमासदः।
आ ते चिकित्र उषसामिवेतयोऽरेपसः सूर्यस्येव रश्मयः ॥४॥
प्रऽजानन्। अग्ने। तव। योनिं। ऋत्वियं। इळायाः। पदे। घृतऽवन्तं। आ। असदः।
आ। ते। चिकित्रे। उषसांऽइव। एतयः। अरेपसः। सूर्यस्यऽइव। रश्मयः॥४॥

हे अग्ने तवर्त्विधमृतौ भवं घृतवंतं घृतेन सहितं योनिं निवासस्थानमिळायास्पद उत्तरवेद्यां प्रजानंस्वमासदः। आसीदसि। किंच ते तव रश्मय उषसामिव यथोषसामेतयः प्रज्ञाः प्रकाशलक्षणा आगतयो वा। सूर्यस्येव---॥

तव श्रियो वर्षयस्येव विद्युतश्चिचाश्चिकित्र उषसां न केतवः।
यदोषधीरभिसृष्टो वनानि च परि स्वयं चिनुषे अन्नमास्ये ॥५॥
तव। श्रियः। वर्षयस्यऽइव। विऽद्युतः। चिचाः। चिकित्रे। उषसां। न। केतवः।
यत्। ओषधीः। अभिऽसृष्टः। वनानि। च। परि। स्वयं। चिनुषे। अन्नं। आस्ये॥५॥

---यथा वर्षितुर्मेघस्य संबंधिन्यो विद्युत उषसां न यथा चोषसां केतवः प्रज्ञानात्मकाः प्रकाशाः

प्रज्ञायंते तद्वदित्यर्थः। कदेत्यत्राह। यदा यदा त्वमोषधीर्व्रीह्याद्या वनान्यरण्यानि चाभिलक्ष्यः लक्ष्यो द्रष्टुं विलक्ष्यः सन् स्वयमात्मनास्मे मुखेऽन्नमदनीयं स्थावरलक्षणं परि चिनुषे। परिचिपसीत्यर्थः॥ ॥२०॥

तमोषधीर्दधिरे गर्भमृत्वियं तमापो अग्निं जनयंत मातरः।
तमित्समानं वनिनश्च वीरुधोऽन्तर्वतीश्च सुवते च विश्वहा ॥६॥
तं। ओषधीः। दधिरे। गर्भं। ऋत्वियं। तं। आपः। अग्निं। जनयंत। मातरः।
तं। इत्। समानं। वनिनः। च। वीरुधः। अंतःऽवतीः। च। सुवते। च। विश्वहा ॥६॥

ऋत्वियमृतौ प्राप्तं गर्भं गर्भभूतं तं प्रकृतमग्निमोषधीरोषध्यो दधिरे। धारयंति। तमेवाग्निं मातरो धारकत्वेन मातृस्थानीया आपश्च जनयंत। जनयंति। किंच वनिनो वनस्पतयश्च समानं गर्भभावेन प्रवेशात्स्वतुल्यं तमित्तमेवाग्निं जनयंति। किंच तमेवाग्निमंतर्वतीर्गर्भवत्यो वीरुध ओषधयश्च विश्वहा सर्वदा सुवते। जनयंति॥

वातोपधूत इषितो वशाँ अनु तृषु यदन्ना वेविषद्वितिष्ठसे।
आ ते यतंते रथ्यो३ यथा पृथक्छर्धांस्यग्ने अजराणि धक्षतः ॥७॥
वातऽउपधूतः। इषितः। वशान्। अनु। तृषु। यत्। अन्ना। वेविषत्। विऽतिष्ठसे।
आ। ते। यतंते। रथ्यः। यथा। पृथक्। शर्धांसि। अग्ने। अजराणि। धक्षतः ॥७॥

हे अग्ने यदा यदा त्वं वातोपधूतो वायुना कंपितो वशान्कांतान्वनस्पतीननु प्रति तृषु क्षिप्रमिषितः प्रेरितश्च सन्नन्नान्यदनीयानि वनस्पत्यादीनि स्थावराणि वेविषद्व्याप्नुवन्वितिष्ठसे इतस्ततो गच्छसि तदानीं धक्षतः काननानि दहतस्ते तवाजराणि जरारहितानि शर्धांसि तेजांसि यथा रथ्यो रथिनस्तद्वत्पृथगा यतंते। गच्छंति॥

मेधाकारं विदथस्य प्रसाधनमग्निं होतारं परिभूतमं मतिं।
तमिद्भे हविषा समानमित्तमिन्महे वृणते नान्यं त्वत् ॥८॥
मेधाऽकारं। विदथस्य। प्रऽसाधनं। अग्निं। होतारं। परिऽभूतमं। मतिं।
तं। इत्। अभे। हविषि। आ। समानं। इत्। तं। इत्। महे। वृणते। न। अन्यं। त्वत् ॥८॥

मेधाकारं प्रज्ञायाः कर्तारं विदथस्य यज्ञस्य प्रसाधनं प्रकर्षेण साधकं होतारं देवानामाह्वातारं परिभूतममतिशयेन शत्रूणां परिभवितारं मतिं मंतारं यं त्वामग्निं वृणीमह इति शेषः। तमित्तमेवाग्निमभेऽस्मे हविषि च पुरोडाशादिके हविषि समानमित्सदैवर्त्विज आ वृणते। प्रार्थयंते। महे महति सोमात्मके हविष्यपि तमित्तमेवाग्निं वृणते। त्वत्त्वत्तोऽन्यमतिरिक्तं देवं न वृणते॥

त्वामिद्धे वृणते त्वायवो होतारमग्ने विदथेषु वेधसः।
यद्देवयंतो दधति प्रयांसि ते हविष्मंतो मनवो वृक्तबर्हिषः ॥९॥
त्वां। इत्। अभे। वृणते। त्वाऽयवः। होतारं। अग्ने। विदथेषु। वेधसः।
यत्। देवऽयंतः। दधति। प्रयांसि। ते। हविष्मंतः। मनवः। वृक्तऽबर्हिषः ॥९॥

हे अग्ने होतारं देवानां ह्वातारमग्निं त्वामित्त्वामेव त्वायवस्त्वत्कामा वेधसः कर्मणां कर्तार ऋत्विजो

ऽत्राग्निर्लोके विद्वत्सु यज्ञेषु वृणते। प्रार्थयंते। कदेत्यत्राह। यदा देवयंतो देवान्यष्टुं स्तोतुं वेच्छंतो वृक्तबर्हिषश्छिन्नबर्हिषो हविष्मंतः संस्कृतहविष्का मनवो मनुष्या ऋत्विजस्ते तुभ्यं प्रयांसि हवींषि दधति धारयंति। प्रयच्छंतीत्यर्थः॥

तवाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः।
तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे ॥१०॥
तव। अग्ने। होत्रं। तव। पोत्रं। ऋत्वियं। तव। नेष्ट्रं। त्वं। अग्नित्। ऋतऽयतः।
तव। प्रऽशास्त्रं। त्वं। अध्वरिऽयसि। ब्रह्मा। च। असि। गृहऽपतिः। च। नः। दमे॥१०॥

हे अग्ने तव होत्रं होतृकर्म त्वया विना तस्याभावात्। किंच तवैवर्त्वियमृतौ भवं प्राप्तानुष्ठानकालं पोत्रं पोतृकर्म त्वया विना तस्याप्यभावात्। किंच तवैव नेष्ट्रं नेष्टृकर्म। किंचतायत ऋतं यज्ञं कर्तुमिच्छतो यजमानस्य त्वमेवाग्निन्नान्यः कश्चित्। किंच तवैव प्रशास्त्रं प्रशास्तृकर्म। किंच हे अग्ने त्वमेवाध्वरीयसि। अध्वरं यज्ञं कर्तुमिच्छसि। तव हेतुत्वात्त्वत्कर्तृत्वं। किंच त्वमेव ब्रह्मासि त्वया विना तस्याभावात्। किंच नोऽस्माकं दमे गृहे गृहपतिर्यजमानोऽसि त्वया विनास्माकं यजमानत्वाभावात्॥ ॥२१॥

यस्तुभ्यमग्ने अमृताय मर्त्यः समिधा दाशदुत वा हविष्कृति।
तस्य होता भवसि यासि दूत्यमुप ब्रूषे यजस्यध्वरीयसि ॥११॥
यः। तुभ्यं। अग्ने। अमृताय। मर्त्यः। सं ऽइधा। दाशत्। उत। वा। हविःऽकृति।
तस्य। होता। भवसि। यासि। दूत्यं। उप। ब्रूषे। यजसि। अध्वरिऽयसि॥११॥

हे अग्ने अमृताय मरणधर्मवर्जिताय तुभ्यं यो मर्त्यो मनुष्यः समिधा समिधं॥ द्वितीयायाः सुपां सुलुगित्याकारः॥ दाशत् ददाति प्रयच्छति उत वापि वा हविष्कृति। हविषां कृत् करणं यस्मिन् स हविष्कृत्। तस्मिन्यज्ञे हवींषि ददातीति शेषः। तस्य मनुष्यस्य होता देवानामाह्वाता भवसि। किंच त्वं दूत्यं देवान्प्रति दूतकर्म कर्तुं यासि। गच्छसि। किंच त्वं ब्रह्मा भूत्वास्मिन्कर्मणि युष्मभ्यमिमानि हवींषि यजमानेन प्रहितानीत्युप ब्रूषे। उपक्रम्य ब्रवीषि। किंच त्वं यजसि। यजमानो भूत्वा देवेभ्यो हवींषि ददासि। किंच त्वं तथा पूर्वोक्तप्रकारेणाध्वरीयसि। अध्वर्युरिवाचरसि। अथवान्यं यज्ञं कर्तुमिच्छसि॥

इमा अस्मै मतयो वाचो अस्मदाँ ऋचो गिरः सुष्टुतयः समग्मत।
वसूयवो वसवे जातवेदसे वृद्धासु चिद्वर्धनो यासु चाकनत् ॥१२॥
इमाः। अस्मै। मतयः। वाचः। अस्मत्। आ। ऋचः। गिरः। सुऽस्तुतयः। सं। अग्मत।
वसुऽयवः। वसवे। जातऽवेदसे। वृद्धासु। चित्। वर्धनः। यासु। चाकनत्॥१२॥

जातवेदसे जातप्रज्ञाय वसवे वासयित्रेऽस्मा अग्नये मतयः पूजयित्र्य इमा वाचो वसूयवोऽस्मदर्थं धनकामाः सत्योऽस्मदस्मत्तो निर्गत्या समग्मत। आभिमुख्येन संगच्छंते। तमिममग्निं प्रीणयंतित्यर्थः। काः पुनस्ताः। सुष्टुतयः शोभनस्तुतिरूपा ऋच ऋगात्मिका गिरो वाचः। तथा यासु वृद्धासु चित् स्वत एव वृद्धास्वपि वर्धनः पुनरपि वर्धयिता सन्नग्निश्चाकनत् स्तोतुम्कामयते। इमा मतय इत्यन्वयः॥

इमां मह्यं सुष्टुतिं नवीयसीं वोचेयमस्मा उशते शृणोतु नः।
भूया अंतरा हृद्यस्य निस्पृशे जायेव पत्य उशती सुवासाः ॥१३॥

इमां । प्रत्नाय । सुऽस्तुतिं । नवीयसीं । वोचेयं । अस्मै । उशते । शृणोतु । नः ।
भूयाः । अंतरा । हृदि । अस्य । निऽस्पृशे । जायाऽइव । पत्ये । उशती । सुऽवासाः ॥१३॥

प्रत्नाय पुराणायोशते स्तोचं कामयमानायाग्ना अग्नये नवीयसीं नवतरामन्यैरकृतपूर्वां सुष्टुतिं शोभनस्तुतिं वोचेयं । अहं वक्ष्यामि । सोऽग्निरस्मदीयां स्तुतिं शृणोतु । किंचाहमस्यापेर्हृदि हृदये तचाभ्यंतरा मध्ये निस्पृशे संस्पर्शनाय । गुणैरनुरंजनायेत्यर्थः । भूयाः । भूयासं ॥ व्यत्ययेन मध्यमः ॥ अपेर्हृदिस्पृगहं स्यामित्यर्थः । अथवा मम सुष्टुतेरनुप्रवेष्टा भवेति योज्यं । समानमन्यत् । तत्र दृष्टांतः । पत्ये पत्युर्हृदयस्य मध्ये सुवासाः शोभनवस्त्रादिना मंडिता जायोशती कामयमाना यथेष्टतमा भवति तद्वदित्यर्थः ॥

यस्मिन्नश्वास ऋषभास उक्षणो वशा मेषा अवसृष्टास आहुताः ।
कीलालपे सोमपृष्ठाय वेधसे हृदा मतिं जनये चारुमग्नये ॥१४॥
यस्मिन् । अश्वासः । ऋषभासः । उक्षणः । वशाः । मेषाः । अवऽसृष्टासः । आऽहुताः ।
कीलालऽपे । सोमऽपृष्ठाय । वेधसे । हृदा । मतिं । जनये । चारुं । अग्नये ॥१४॥

यस्मिन्नग्नावुक्षणः ॥ वा षपूर्वस्य निगम इति दीर्घविकल्पः ॥ सेचनसमर्था अश्वासोऽश्वा ऋषभासो वृषभाश्च वशाः स्वभाववंध्याश्च मेषाश्चावरुष्टासो देवतार्थमवरुष्टाः परित्यक्ताः संतोऽश्वमेध आक्रता आभिमुख्येन क्रता भवंति कीलालपे सौत्रामण्यां सुरां पिबते । कीलालमित्युदकनामसु पाठात् । उदकं पिबते सोमपृष्ठाय सोमयुक्तः पृष्ठ उपरिभागो यस्य तस्मै सोमपृष्ठाय वेधसे विधात्रे तस्मा अग्नये हृदा हृदयेन चारुं कल्याणीं मतिं स्तुतिं जनये । जनयामि । उत्पादयामि ॥

अहाव्यग्ने हविरास्ये ते स्रुचीव घृतं चम्वीव सोमः ।
वाजसनिं रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहंतं ॥१५॥
अहावि । अग्ने । हविः । आस्ये । ते । स्रुचिऽइव । घृतं । चम्विऽइव । सोमः ।
वाजऽसनिं । रयिं । अस्मे इति । सुऽवीरं । प्रऽशस्तं । धेहि । यशसं । बृहंतं ॥१५॥

हे अग्ने ते तवास्ये मुखे हविः पुरोडाशादि हविरस्माभिरहावि । सततं प्रक्षिप्यते । तत्र दृष्टांतौ । घृतमाज्यं स्रुचीव यथा स्रुचि । चम्वीव सोमः यथा चमसे सोमः । तद्वदित्यर्थः । तथा त्वं वाजसनिमन्नस्य दातारं सुवीरं शोभनपुत्रोपेतं प्रशस्तं सुवर्णादिकं यशसं यशस्विनं कीर्तिमंतं बृहंतमपरिमितं महांतं वा रयिं रमणीयं धनमस्मे अस्मभ्यं धेहि । देहि ॥ ॥२२॥

यज्ञस्येति पंचदशर्चं द्वितीयं सूक्तं मनोः पुत्रस्य शार्यातस्यार्षं जागतं वज्रदेवताकं । तथा चानुक्रांतं । यज्ञस्य शार्यातो मानवो वैश्वदेवं तु जागतमिति ॥ चातुर्विंशिक आरंभणीयेऽहनि वैश्वदेवशस्त्र इदं सूक्तं वैश्वदेवनिविद्धानं । सूचितं च । ते हि द्यावापृथिवी यज्ञस्य वो रथ्यं । आ० ७. ४. इति ॥ पृष्ठ्याभिप्लवषडहयोर्द्वितीयेऽहन्यपीदं वैश्वदेवनिविद्धानं चातुर्विंशिकेन तृतीयसवनमिति सूचकतातिदिष्टत्वात् ॥

यज्ञस्य वो रथ्यं विश्पतिं विशां होतारमक्तोरतिथिं विभावसुं ।
शोचञ्छुष्कासु हरिणीषु जर्भुरद्वृषा केतुर्यजतो द्यामशायत ॥१॥
यज्ञस्य । वः । रथ्यं । विश्पतिं । विशां । होतारं । अक्तोः । अतिथिं । विभाऽवसुं ।
शोचन् । शुष्कासु । हरिणीषु । जर्भुरत् । वृषा । केतुः । यजतः । द्यां । अशायत ॥१॥

हे देवाः यो यूयं यज्ञस्य रथं नेतारं विश्पतिं मनुष्याणां पालकं स्वामिनं वा विशां देवानां होतारमाहूतारमग्नो रात्रेरतिथिमतिथिभूतं विभावसुं विविधदीप्तधनं तमग्निं परिचरतेति शेषः। शुष्कासु शुष्कभूतास्वोषधीषु शोचज्वलन् हरिणीषु हरितवर्णास्वार्द्रास्वोषधीषु गर्भुरन्नचयन् कुटिलं गच्छन्वा वृषा कामानां वर्षिता केतुः प्रज्ञापको यजतो यष्टव्योऽग्निर्यो दिवमशायत। प्रतिशेते ॥

इममँजस्पामुभये अकृण्वत धर्माणमग्निं विदथस्य साधनं।
अक्तुं न यह्वमुषसः पुरोहितं ततूनपातमरुषस्य निंसते ॥२॥
इमं। अंजःऽपां। उभये। अकृण्वत। धर्माणं। अग्निं। विदथस्य। साधनं।
अक्तुं। न। यह्वं। उषसः। पुरःऽहितं। ततू३ऽनपातं। अरुषस्य। निंसते ॥२॥

उभये देवमनुष्या अंजस्पामंजसा रथं धर्माणं धारकमिममग्निं विदथस्य यज्ञस्य साधनं साधयितारमकृण्वत। अकुर्वत। किंचाद्यस्यारोचमानस्य वायोस्तनूनपातं पुत्रं यह्वं महांतं पुरोहितमुषसोऽक्तुं न स्वरश्मिभिरंजकमादित्यमिव निंसते। चुंबयंति। आश्रयंत इत्यर्थः ॥

बळस्य नीथा वि पणेश्च मन्महे वया अस्य प्रहुता आसुरन्नवे।
यदा घोरासो अमृतत्वमाशतादिज्जनस्य दैव्यस्य चर्किरन् ॥३॥
बट्। अस्य। नीथा। वि। पणेः। च। मन्महे। वयाः। अस्य। प्रऽहुताः। आसुः। अन्नवे।
यदा। घोरासः। अमृतऽत्वं। आशत। आत्। इत्। जनस्य। दैव्यस्य। चर्किरन् ॥३॥

वि पणेरस्माभिर्विविधं पणितव्यस्य स्तुत्यस्याग्नेर्नीथा नीथान्यस्मत्संबंधीनि प्रज्ञानानि बट् सत्यानि स्युरिति मन्महे। वयं कामयामहे। किंचास्याग्नेर्वया अस्मदीया अन्नाकृतयोऽन्नवे भक्षणाय प्रकृता आसुर्भवेयुरिति कामयामहे। किंच यदा यस्मिन्काले घोरासो घोरा अग्नेर्ज्वाला अमृतत्वमविनाशित्वमाशत प्राप्नुवंति आदिदनंतरमेवास्माकमृत्विजो दैव्यस्य देवेषु भवस्य जनस्याग्नेरर्थाय चर्किरन्। किरेयुः। अग्नौ हवींषि प्रक्षिपेयुरित्यर्थः ॥

ऋतस्य हि प्रसितिर्द्यौरुरु व्यचो नमो मह्यरमतिः पनीयसी।
इंद्रो मित्रो वरुणः सं चिकित्रिरेऽथो भगः सविता पूतदक्षसः ॥४॥
ऋतस्य। हि। प्रऽसितिः। द्यौः। उरु। व्यचः। नमः। मही। अरमतिः। पनीयसी।
इंद्रः। मित्रः। वरुणः। सं। चिकित्रिरे। अथो इति। भगः। सविता। पूतऽदक्षसः ॥४॥

ऋतस्य यज्ञस्य संबंधिनमग्निं प्रति प्रसितिर्विसृता द्यौरुरु विस्तीर्णं व्यचो व्याप्तमंतरिक्षं च पनीयसी स्तुत्यतमारमतिः पर्याप्तरहिता मही पृथिवी च नमो नमनं कुर्वतीति शेषः। अथो अपि चैनमग्निमिंद्रो मित्रश्च वरुणश्च भगश्च सविता पूतदक्षसः शुद्धबला एते देवा एनमग्निं सं चिकित्रिरे। ज्ञेष्याय संजानते ॥

प्र रुद्रेण ययिना यंति सिंधवस्तिरो महीमरमतिं दधन्विरे।
येभिः परिज्मा परियन्नुरु ज्रयो वि रोरुवज्जठरे विश्वमुक्षते ॥५॥
प्र। रुद्रेण। ययिना। यंति। सिंधवः। तिरः। महीं। अरमतिं। दधन्विरे।
येभिः। परिऽज्मा। परिऽयन्। उरु। ज्रयः। वि। रोरुवत्। जठरे। विश्वं। उक्षते ॥५॥

सिंधवः स्यंदनशीला आपो यथिना गमनशीलेन रुद्रेण रुद्रपुत्रेण मरुद्गणेन सह प्र यंति। अथ वज्रवदाह। तेऽमी मरुतोऽरमतिं। रमतिर्विरामोऽवसानं। तद्रहितामपर्यंतां महीं पृथिवीं तिरो दधन्विरे। तिरस्कुर्वंतीत्यर्थः। परिज्मा परितो गंतेंद्रः परियन् परितो गच्छन् येभिर्येर्मरुद्गणैः सहोद्य अथो वज्रवेगं करोतीति शेषः। किंच अठरेऽंतरिक्षे रोदयच्छब्दं कुर्वन्पर्जन्यो यैर्मरुद्गणैः सह विश्वं भुवनमुचते सिंचते॥ ॥२३॥

क्राणा रुद्रा मरुतो विश्वकृष्टयो दिवः श्येनासो असुरस्य नीळयः।
तेभिश्वष्टे वरुणो मित्रो अर्यमेंद्रो देवेभिरर्वशेभिरर्वशः ॥६॥
क्राणाः। रुद्राः। मरुतः। विश्वऽकृष्टयः। दिवः। श्येनासः। असुरस्य। नीळयः।
तेभिः। चष्टे। वरुणः। मित्रः। अर्यमा। इंद्रः। देवेभिः। अर्वशेभिः। अर्वशः ॥६॥

असुरस्य मेघस्य नीळय आवासभूता दिवोऽंतरिक्षसंबंधिनः श्येनासः श्येनाः शंसनीयगतयो विश्वकृष्टयो व्याप्तमनुष्या रुद्रा रुद्रपुत्रा ये मरुतः क्राणाः स्वाधिकारकर्माणि कुर्वाणा आसत इति शेषः। तेभिस्तैरर्वशेभिरश्ववद्भिः सोमवद्भिर्वा देवेभिर्दैवैः सहार्वशोऽश्ववान् सोमवानिंद्रश्चष्टे। पश्यति। वरुणश्च मित्रश्चार्यमा च सोमवद्भिर्मरुद्भिः सह पश्यंति॥

इंद्रे भुजं शशमानास आशत सूरो दृशीके वृषणश्च पौंस्ये।
प्र ये न्वस्यार्हणा ततक्षिरे युजं वज्रं नृषदनेषु कारवः ॥७॥
इंद्रे। भुजं। शशमानासः। आशत। सूरः। दृशीके। वृषणः। च। पौंस्ये।
प्र। ये। नु। अस्य। अर्हणा। ततक्षिरे। युजं। वज्रं। नृऽसदनेषु। कारवः ॥७॥

ये शशमानासः शशमानाः स्तोतार इंद्रे स्तुते सति भुजं पालनमाशत प्राप्नुवंति। सूरः सूर्ये स्तुते सति दृशीके दर्शनं सर्ववस्तुविषयं प्राप्नुवंति। वृषणो वर्धितरींद्रे स्तुते पौंस्यं बलं च प्राप्नुवंति। किंच ये कारवः स्तोतारोऽस्येंद्रस्यार्हणा पूजनानि नु क्षिप्रं ततक्षिरे प्रकृष्टानि कुर्वंति ते स्तोतारो नृषदनेषु नरः कर्तृत्वेन येषु सीदंति तिष्ठंति तेषु यज्ञेषु युजं सहायमिंद्रस्य वज्रं प्राप्नुवंति॥

सूरश्चिदा हरितो अस्य रीरमदिंद्रादा कश्चिद्भयते तवीयसः।
भीमस्य वृष्णो जठरादभिश्वसो दिवेदिवे सहुरिः स्तन्नबाधितः ॥८॥
सूरः। चित्। आ। हरितः। अस्य। रीरमत्। इंद्रात्। आ। कः। चित्। भयते। तवीयसः।
भीमस्य। वृष्णः। जठरात्। अभिऽश्वसः। दिवेऽदिवे। सहुरिः। स्तन्। अबाधितः॥८॥

सूरः सूर्योऽप्यस्येंद्रस्य परमेश्वरस्य परमात्मन आज्ञां परिपालयितुं मन्वानो हरितोऽश्वान्रेरयतीति शेषः। प्रेरयन्नध्वन्या रीरमत्। आभिमुख्येन रमयति। यः कश्चिद्देवोऽपि स्रष्टा भयते बिभेति स देवस्तवीयसः प्रवृद्धादिंद्रात्परमात्मनो भयादेव बिभेति। तथा च तैत्तिरीये पठितं। भीषास्माद्वातः पवते। तै० उ० २. ८.। इत्यादिना। किंच वृष्णः कामानां वर्षितुर्भीमस्य सर्वभयंकरस्य परमात्मनः परमेश्वरस्य दिवेदिवेऽन्वहमभिश्वसः आभिमुख्येन श्वसतो जठरादुदरादंतरिक्षात्सहुरिः सहनशीलोऽबाधितो बाधरहितः सन्। स्तनयति। शब्दं करोति॥

स्तोमं वो अद्य रुद्राय शिक्वसे क्षयद्वीराय नमसा दिदिष्टन।
येभिः शिवः स्ववाँ एवयावभिर्दिवः सिषक्ति स्वयशा निकामभिः ॥९॥

स्तोमं॑। वः। अ॒द्य। रु॒द्राय॑। शि॒क्व॒से॒। क्षय॑त्ऽवीराय। नम॑सा। दि॒दि॒ष्ट॒न॒।
येभिः॑। शि॒वः। स्वऽवा॑न्। ए॒व॒याव॑ऽभिः। दि॒वः। सिस॑क्ति। स्वऽय॑शाः।
नि॒काम॑ऽभिः ॥९॥

एवयावभिरश्वैरागच्छद्भिर्येभिर्मरुद्भिः सह स्ववान्भ्रातिमान् स्वयशाः स्वभूतकीर्तिः शिवः सुखकरः परमेश्वरो दिवो द्युलोकाद्यजमानान्सिषक्ति सेवते हे ऋत्विजः यूयमद्यास्मिन्यागे निकामभिर्नियताभिलाषैर्मरुद्भिः सहिताय क्षयद्वीराय चितशुचये शिक्वसे शरणे शत्रूणां रुद्राय नमसान्नेन नमस्कारेण वा सह स्तोमं स्तोत्रं दिदिष्टन। दिशत। खलत। गमयतेत्यर्थः ॥

ते हि प्र॒जाया॒ अभ॑रंत॒ वि श्रवो॒ बृह॒स्पति॑र्वृष॒भः सोम॑जामयः।
य॒ज्ञैरथ॑र्वा प्रथ॒मो वि धा॑रय॒द्वेदा॒ दक्षै॑र्भृ॒गव॒: सं चि॑किरे ॥१०॥
ते। हि। प्र॒ऽजाया॑। अभ॑रंत। वि। श्रवः॑। बृह॒स्पतिः॑। वृ॒ष॒भः। सोम॑ऽजामयः।
य॒ज्ञैः। अथ॑र्वा। प्र॒थ॒मः। वि। धा॒र॒य॒त्। वेदाः॑। दक्षैः॑। भृ॒गवः॑। सं। चि॒कि॒रि॒रे॒ ॥१०॥

हि यस्मात्कारणाद्वृषभः कामानां वर्षिता बृहस्पतिः सोमजामयोऽन्ये सोमबंधवश्च विश्वे देवाः प्रजाया अर्थाय श्रवोऽन्नं व्यभरंत विभरंति वृष्टिद्वारेण पोषयंति तस्मात्कारणात्तासां प्रजानां मध्येऽथर्वा नामर्षिः प्रथमः प्रथममेव क्रियमाणोयज्ञैर्विं धारयत्। देवान्कर्मयोग्यान्विधृतानकरोत्। अत्र निगमः। यज्ञैरथर्वा प्रथमः प्रथस्तते। ऋ० १. ८३. ५.। इति। अथ दक्षैर्बलैः सह देवा विश्वे भृगव ऋषयश्च सं चिकिरिरे। अथर्वणा कृतं यज्ञं गत्वा पशून्संज्ञातवंतः ॥ ॥२४॥

ते हि द्यावा॑पृथि॒वी भू॒रिरे॑तसा॒ नरा॒शंस॒श्चतु॑रंगो य॒मोऽदि॑तिः।
देव॒स्त्वष्टा॒ द्रवि॑णो॒दा ऋ॑भु॒क्षण॒: प्र रो॑द॒सी म॒रुतो॒ विष्णु॑र॒र्हिरे ॥११॥
ते इति॑। हि। द्यावा॑पृथि॒वी इति॑। भू॒रिऽरे॑तसा। नरा॒शंसः॑। चतुः॑ऽअंगः। य॒मः। अदि॑तिः।
देवः॑। त्वष्टा॑। द्रवि॑णः॒ऽदाः॑। ऋ॒भु॒क्षणः॑। प्र। रो॒द॒सी इति॑। म॒रुतः॑। विष्णुः॑। अ॒र्हि॒रे॒ ॥११॥

भूरिरेतसा बहुदेवे द्यावापृथिवी द्यावापृथिव्यौ यमो देवोऽदितिश्च त्वष्टा देवश्च द्रविणोदा अग्निश्च ऋभुक्षण ऋभवश्च रोदसी रुद्रस्य पत्नी च मरुतो देवाश्च विष्णुश्च एते विश्वे देवाश्चतुरंगश्चतुर्भिरग्निभिर्युक्तश्चतुरश्रो नराशंसो नराशंसनामधेये यज्ञे प्रार्हिरे। अस्माभिः स्तोतृभिः पूज्यंते ॥

उ॒त स्य नः॑ उ॒शिजा॑मुर्वि॒या क॒विर॒हिः शृ॑णोतु बु॒ध्यो॒३॒॑ हवी॑मनि।
सूर्या॑मासा॒ वि॒चर॑ंता दिवि॒क्षिता॑ धि॒या श॒मीन॑हुषी अ॒स्य बो॑धतं ॥१२॥
उ॒त। स्यः। नः॒। उ॒शिजा॑। उ॒र्वि॒या। क॒विः। अ॒हिः। शृ॒णो॒तु॒। बु॒ध्यः॑। हवी॑मनि।
सूर्या॑मासा। वि॒ऽचर॑ंता। दि॒वि॒ऽक्षिता॑। धि॒या। श॒मीन॑हुषी॒ इति॑। अ॒स्य। बो॒ध॒त॒म् ॥१२॥

उतापि च नोऽस्माकमुशिजां कामयमानानामृत्विजामुर्वियोर्वीं बहुलां स्तुतिं कविर्मेधावी बुध्यो बुध्नेतरिक्षे भवः सोऽहिर्देवो हवीमनि ह्रियंते यत्र देवेभ्यो हवींषि तस्मिन्यज्ञे शृणोतु। दिविक्षिता दिवि वसंती वैचरंता विशेषेण चरंती सूर्यामासा सूर्यचंद्रमसौ धिया बुद्ध्यास्मत्स्तोत्रमिदं बोधतं। बुध्येतां। शमी कर्मवती शमीति कर्मनामसु पाठात्। नहुषी द्यौः। अत्र वाजसनेयकं। द्यौर्नहुषीयं वै शमी तस्या एष गर्भ इति। हे द्यावापृथिव्यौ युवां स्तोत्रं धिया स्वीयया प्रज्ञया बुध्येतं। अवगच्छतमित्यर्थः ॥

प्र नः पूषा चरथं विश्वदेव्योऽपां नपादवतु वायुरिष्टये ।
आत्मानं वस्यो अभि वातमर्चत तदश्विना सुहवा यामनि श्रुतं ॥१३॥
प्र । नः । पूषा । चरथं । विश्वऽदेव्यः । अपां । नपात् । अवतु । वायुः । इष्टये ।
आत्मानं । वस्यः । अभि । वातं । अर्चत । तत् । अश्विना । सुऽहवा । यामनि । श्रुतं ॥१३॥

पूषा देवो नोऽस्माकं संबंधि चरथं अंगमं प्रावतु । प्रकर्षेण रक्षतु । किंच विश्वदेव्यो विश्वदेवहितोऽपां नपाद्वायुरिष्टये यज्ञस्य निष्कृत्यर्थं प्रावतु । किंचात्मानं सर्वेषामात्मभूतं वातं वायुं वस्यो वसीयः प्रशस्ततरमन्नं प्राप्तुं । अस्मभ्यमन्नं कामयमानमिति शेषः । हे अश्विनाश्विनौ सुहवा स्वाह्वानौ युवां यामनि गमने तदिदं स्तोत्रं श्रुतं । शृणुतं ॥

विशामासामभयानामधिक्षितं गीर्भिरु स्वयशसं गृणीमसि ।
ग्राभिर्विश्वाभिरदितिमनर्वणमक्तोर्युवानं नृमणा अधा पतिं ॥१४॥
विशां । आसां । अभयानां । अधिऽक्षितं । गीःऽभिः । ऊं इति । स्वऽयशसं । गृणीमसि ।
ग्राभिः । विश्वाभिः । अदितिं । अनर्वणं । अक्तोः । युवानं । नृऽमनाः । अध । पतिं ॥१४॥

अभयानां संसारभयरहितानामासां विशां मनुष्याणामधिचितमंतर्गतं वसंतं स्वयशसमुपार्जितकीर्तिमेनमग्निं गीर्भिः स्तुतिभिर्गृणीमसि । वयं स्तुमः । किंचानर्वणमप्रवृतां पत्युरपत्यांतरेणाप्रतिगतामदितिमदीनां देवमातरं विश्वाभिः सर्वाभिर्मार्गाभिर्देवपत्नीभिः सह स्तुमः । किंचाक्तोः रात्रेर्युवानं स्वतेजसा मिश्रयितारं चंद्रमसं स्तुमः । किंच नृमणाः नृषु मनुष्येष्वनुग्राहकमना यः तमादित्यं स्तुमः । अधाथ पतिं सर्वस्य पालकमिंद्रं स्तुमः ॥

रेभदत्र जनुषा पूर्वो अंगिरा यावाण ऊर्ध्वा अभि चक्षुरध्वरं ।
येभिर्विहाया अभवद्विचक्षणः पाथः सुमेकं स्वधितिर्वनन्वति ॥१५॥
रेभत् । अत्र । जनुषा । पूर्वः । अंगिराः । यावाणः । ऊर्ध्वाः । अभि । चक्षुः । अध्वरं ।
येभिः । विऽहायाः । अभवत् । विऽचक्षणः । पाथः । सुऽमेकं । स्वऽधितिः ।
वनन्ऽवति ॥१५॥

अंगिरा नामर्षिरार्त्विज्येन वृतः स देवान्स्तौति । अत्राग्निमन्ये जनुषा जन्मना पूर्वः प्रत्नोऽंगिरा नामर्षी रेभत् । देवान्स्तौति । यावाणस्तोर्ध्वा उद्यताः संतोऽध्वरं यज्ञसाधनं सोममभि चक्षुः । अभिपश्यंति । विचक्षणो विद्रष्टेंद्रो येभिर्यैर्यावभिरभिषवसंबंधिभिः ग्रावभिर्विहाया महानभवत् । हृष्टोऽभूदित्यर्थः । अग्नींद्रस्य स्वधितिर्वज्रो वनन्वत्युदकवति मार्गे पाथोऽन्नसाधनं सुमेकं शोभनमुदकं निरगमयदिति शेषः ॥ ॥२५॥

महीति पंचदशर्चं तृतीयं सूक्तं । तान्वो नाम पृथोः पुत्र ऋषिः । द्वितीयातृतीये चयोदशी चेति तिस्रोऽनुष्टुभः । नवम्यश्चरसंख्यया पंक्तिर्न पादैः । एकादशी त्र्यंकुसारिण्यष्टकद्वादशकाद्यष्टकवती । पंचदशी पुरस्ताद्बृहत्याद्यद्वादशकाद्यष्टका । शिष्टा नव प्रस्तारपंक्तिच्छंदस्काः । आद्यौ जागतौ द्वौ गायत्यौ सा प्रस्तारपंक्तिः । विश्वे देवा देवता । तथा चानुक्रांतं । महि तान्वः पार्थः प्रस्तारपंक्तं पुरस्ताद्बृहत्यंतं चयोदश्युपरिष्टाच्चानुष्टुभो नवम्यश्चरैः पंक्तिरेकादशी त्र्यंकुसारिणीति ॥ गतो विनियोगः ॥

महि द्यावापृथिवी भूतमुर्वी नारी यह्वी न रोदसी सदं नः ।
तेभिर्नः पातं सह्यस एभिर्नः पातं शूषणि ॥१॥

महि । द्यावापृथिवी इति । भूतं । उर्वी इति । नारी इति । यह्वी इति । न ।
रोदसी इति । सदं । नः ।
तेभिः । नः । पातं । सह्यसः । एभिः । नः । पातं । शूषणि ॥१॥

हे द्यावापृथिवी द्यावापृथिव्यौ युवां महत्यंतं यथा भवति तथोर्वी विस्तीर्णे भूतं । भवतं । किंच यह्वी महत्यौ रोदसी द्यावापृथिव्यौ नारी न स्त्रियाविव नोऽस्माकं सदं सदा भवतं । किंच युवां शूषणि नोऽस्माकं शत्रुबले युष्मदीयैरेभिः पालनैः पातं । रक्षतं । किंच युष्मदीयैरेभिः तैः पालनैर्नोऽस्माकं सह्यसोऽतिशयेनास्मानभिभवितुः शत्रोरपि पातं । रक्षतं ॥

यज्ञेयज्ञे स मर्त्यो देवान्त्संपर्यति । यः सुत्रैर्दीर्घश्रुत्तम आविवासात्येनान् ॥२॥
यज्ञेऽयज्ञे । सः । मर्त्यः । देवान् । सपर्यति । यः । सुत्रैः । दीर्घश्रुत्ऽतमः । आ
ऽविवासाति । एनान् ॥२॥

स मर्त्यो मनुष्यो यज्ञेयज्ञे सर्वेषु यज्ञेषु देवान्सर्वान्सपर्यति परिचरति यो दीर्घश्रुत्तमोऽतिशयेन दीर्घस्य बहोः शास्त्रस्य श्रोता यो मनुष्यः सुत्रैः सुखकरैर्हविर्भिरेनान्देवानाविवासाति परिचरति । असुखकरैर्हविर्भिः कृतमपि कर्म समर्थं न भवतीत्यर्थः ॥

विश्वेषामिरज्यवो देवानां वार्महः । विश्वे हि विश्वमहसो विश्वे यज्ञेषु यज्ञियाः ॥३॥
विश्वेषां । इरज्यवः । देवानां । वाः । महः । विश्वे । हि । विश्वऽमहसः । विश्वे । यज्ञेषु ।
यज्ञियाः ॥३॥

हे विश्वेषामिरज्यवो भुवनानामीश्वराः देवानां द्योतमानादिगुणयुक्तानां भवतां महो महद्वार्वरणीयं धनं विद्यत इति शेषः । तदस्मभ्यं दत्तेति भावः । किंच विश्वे सर्वे यूयं विश्वमहसो व्याप्ततेजस्काः । किंच विश्वे यूयं यज्ञेषु यज्ञिया यष्टव्याः ॥

ते घा राजानो अमृतस्य मंद्रा अर्यमा मित्रा वरुणः परिज्मा ।
कदुद्रो नृणां स्तुतो मरुतः पूषणो भगः ॥४॥
ते । घ । राजानः । अमृतस्य । मंद्राः । अर्यमा । मित्रः । वरुणः । परिऽज्मा ।
कत् । रुद्रः । नृणां । स्तुतः । मरुतः । पूषणः । भगः ॥४॥

अर्यमा देवो मित्रश्च परिज्मा सर्वतो गामी सर्वत्राप्रतिहतगतिर्वरुणोऽन्यो देवजनस्तुत्यैर्लिंगैः स्तुतो रुद्रश्च पूषणः सर्वस्य पोषयितारो मरुतश्च भगश्च एते देवा मंद्राः सर्वैः स्तुत्याः संतो नृणां मनुष्याणां कत् सुखं प्रयच्छन्तीति शेषः । ते सर्वेऽमृतस्यामृतसदृशस्य हविषो राजानो घ । ईश्वराः खलु ॥

उत नो नक्तमपां वृषण्वसू सूर्यामासा सदनाय सध्न्या ।
सचा यत्सादेषामहिर्बुध्नेषु बुध्यः ॥५॥
उत । नः । नक्तं । अपां । वृषण्वसू इति वृषण्ऽवसू । सूर्यामासा । सदनाय । सऽध्न्या ।
सचा । यत् । सादि । एषां । अहिः । बुध्नेषु । बुध्यः ॥५॥

उतापि च हे वृषण्वसू वर्षणधनावश्विनौ युवामपामुदकानां संबंधिनौ सधन्या सधन्यौ समानधनं सूर्यामासा सूर्याचंद्रमसौ द्युभ्वंतरिक्षेषु निवासस्थानेषु मेघेषु यद्योऽहिर्बुध्नो देवो सादि सीदति तिष्ठति एषामेभिः सचा सह युवां गन्तं राचावहनि चोदयतमिति वक्ष्यमाणेन संबंधः ॥ ॥२६॥

उत नो देवावश्विना शुभस्पती धामभिर्मित्रावरुणा उरुष्यतां ।
महः स राय एषतेऽति धन्वेव दुरिता ॥ ६॥
उत । नः । देवौ । अश्विना । शुभः । पती इति । धामऽभिः । मित्रावरुणौ । उरुष्यतां ।
महः । सः । रायः । आ । ईषते । अति । धन्वऽइव । दुःऽइता ॥ ६॥

उतापि च शुभस्पती शुभस्योदकस्य पती अश्विनाश्विनौ देवौ नोऽस्मान्धामभिरात्मीयैः शरीरैरुरुष्यतां रक्षतां । किंच मित्रावरुणावात्मीयैः शरीरैरुरुष्यतां । रक्षेतां । यं यजमानं पुरुषममी देवा रक्षंति स महे महांति रायो धनान्येषते । आभिमुख्येन प्राप्नोति । गच्छति । किंच दुरिता दुरितानि शीघ्रमत्यतिगंतातिक्रांत च भवति । तत्र दृष्टांतः । धन्वेव यथा पथिको निरुदकान्देशानतिक्रामति तद्वदित्यर्थः ॥

उत नो रुद्रा चिन्मृळतामश्विना विश्वे देवासो रथस्पतिर्भगः ।
ऋभुर्वाजः ऋभुक्षणः परिज्मा विश्ववेदसः ॥ ७॥
उत । नः । रुद्रा । चित् । मृळतां । अश्विना । विश्वे । देवासः । रथःपतिः । भगः ।
ऋभुः । वाजः । ऋभुक्षणः । परिऽज्मा । विश्वऽवेदसः ॥ ७॥

उत चिदपि च रुद्रा रुद्रपुत्रावश्विनाश्विनौ नोऽस्मान्मृळतां । सुखयतां । किंच रथस्पती रथस्य पतिः पूषर्भुर्वाजोऽन्नवाभगश्च परिज्मा परितो गंता वायुश्चेति विश्वे सर्वे देवासो देवाः सुखयंतु । हे विश्ववेदसो विश्ववेदाः सर्वप्रज्ञाः सर्वधना वा हे ऋभुक्षणो महांतो ब्रह्मादयो देवाः यूयं सुखयत ॥

ऋभुर्ऋभुक्षा ऋभुर्विधतो मद आ ते हरी जूजुवानस्य वाजिना ।
दुष्टरं यस्य साम चिदृधग्यज्ञो न मानुषः ॥ ८॥
ऋभुः । ऋभुक्षाः । ऋभुः । विधतः । मदः । आ । ते । हरी इति । जूजुवानस्य । वाजिना ।
दुस्तरं । यस्य । साम । चित् । ऋधक् । यज्ञः । न । मानुषः ॥ ८॥

ऋभुक्षा महानिंद्र ऋभुर्यज्ञेन भाति । किंच विधतस्त्वां परिचरतो यजमानस्य मदो हर्षोऽप्यृभुर्यज्ञेन भाति । हे इंद्र आ जूजुवानस्यातिशीघ्रमागच्छतस्ते तव हरी अश्वावपि वाजिना वाजिनौ बलवंतौ । किंच यस्येंद्रस्य संबंधि साम चिन्नीयमानं सामापि दुष्टरं रक्षोभिरप्रापणीयं । एष यज्ञो मानुषो मनुष्यसाधारणो न किंचर्धक् पृथक् । दिव्य इत्यर्थः ॥

कृधी नो अह्रयो देव सवितः स चं स्तुषे मघोनां ।
सहो न इंद्रो वह्निभिर्नेषां चर्षणीनां चक्रं रश्मिं न योयुवे ॥ ९॥
कृधि । नः । अह्रयः । देव । सवितरिति । सः । च । स्तुषे । मघोनां ।
सहो इति । नः । इंद्रः । वह्निऽभिः । नि । एषां । चर्षणीनां । चक्रं । रश्मिं । न । योयुवे ॥ ९

हे सवितः प्रेरक योऽस्मानह्रयोऽगवनतवदनानलज्जिताम्बधि । कृध । किंच स त्वं मघोनां धनवत

यजमानानां संबंधिभिर्ऋत्विग्भिः सुवे । सूयसे । इंद्रो वह्निभिर्वीरुभिर्मरुद्भिः सह सहो बलं वर्षणीनां मनुष्याणां नोऽस्माकं नि योयुवे । भृशं मिमिश्रयतु । तत्र दृष्टांतः । चक्रं रथस्य चक्रं रश्मिं न । यथा चक्रादिकं तद्वदित्यर्थः ॥

एषु द्यावापृथिवी धातं महदस्मे वीरेषु विश्वचर्षणि श्रवः ।
पृक्षं वाजस्य सातये पृक्षं रायोत तुर्वणे ॥ १० ॥
आ । एषु । द्यावापृथिवी इति । धातं । महत् । अस्मे इति । वीरेषु । विश्वऽचर्षणि । श्रवः ।
पृक्षं । वाजस्य । सातये । पृक्षं । राया । उत । तुर्वणे ॥ १० ॥

हे द्यावापृथिवी द्यावापृथिव्यौ युवामस्मे अस्माकं संबंधिष्वेषु वीरेषु पुत्रेषु विश्वचर्षणि सर्वमनुष्योपेतं महच्छ्रवो यज्ञ आ धातं । आधत्तं । दत्तं । किंच वाजस्य बलस्य सातये संभजनाय पृषं पालकमन्नं दत्तं । उतापि च तुर्वणे शत्रूणां तरणाय राया धनेन सह पृषमन्नं दत्तं ॥ ॥ २७ ॥

एतं शंसमिंद्रास्मयुष्टवे कूचित्संतं सहसावन्नभिष्टये सदा पाह्यभिष्टये ।
मेदतां वेदता वसो ॥ ११ ॥
एतं । शंसं । इंद्र । अस्मऽयुः । त्वं । कूऽचित् । संतं । सहसाऽवन् । अभिष्टये । सदा ।
पाहि । अभिष्टये ।
मेदतां । वेदता । वसो इति ॥ ११ ॥

हे वसो वासयितः सहसावन् बलवन्निंद्र अस्मयुरस्मान्कामयमानस्त्वं कूचित् क्वचिदपि संतं स्थितमेतमिमं शंसं स्तोतारमभिष्टयेऽभिलषितसिद्ध्यर्थमपि चाभिष्टये यागार्थं सदा सर्वदा पाहि । रक्ष । किंच वेदता त्वदीयेन प्रज्ञानेन स्तोतारं मां मेदतां । बुध्यस्व ॥

एतं मे स्तोमं तना न सूर्यं द्युतद्यामानं वावृधंत नृणां ।
संवननं नाश्वं तष्टेवानपच्युतं ॥ १२ ॥
एतं । मे । स्तोमं । तना । न । सूर्यं । द्युतत्ऽयामानं । ववृधंत । नृणां ।
संऽवननं । न । अश्वं । तष्टाऽइव । अनपऽच्युतं ॥ १२ ॥

नृणां नेतॄणां देवशत्रूणां संवननं न संभजनं सम्यग्विहंसनमिवावस्थितं मे मदीयमेतमिदं स्तोमं स्तोत्रं ववृधंत । ऋत्विजो वर्धयंतु । तत्र दृष्टांतः । सूर्यं द्युतद्यामानं दीप्तगमनं तना न विस्तृताध्वरमीन्वर्धयंति तद्वदित्यर्थः । अनपच्युतं च्युतिरहितमश्वमश्वार्हं रथं तष्टेव यथा वर्धकी रथिभ्यागतेषु संस्कृतं रथं संस्कारस्थानात्प्रेरयति तद्वदित्यर्थः ॥

वावर्तु येषां राया युक्ष्वा हिरण्ययी । नेमधिता न पौंस्या वृथेव विष्टांता ॥ १३ ॥
ववर्तं । येषां । राया । युक्ष्व । एषां । हिरण्ययी । नेमऽधिता । न । पौंस्या ।
वृथाऽइव । विष्टऽअंता ॥ १३ ॥

येषां देवानां स्वभूतेन रायास्माभिर्दातव्येन धनेन युक्ष्व स्तुतिरावर्तं तेषामेषामर्थाय हिरण्मयी हिरण्मयी

हिरण्यालंकारवत्प्रीतिकरात्सामसुखात्पुनःपुनरावर्तत इत्यर्थः । तत्र दृष्टांतः । पौंस्या पौंस्यानि बलानि नेमधिता न नेमधितौ संग्रामे । विष्टांता व्याप्तावसाना वृधेव यथा घटिकायंत्रमाला तद्वदित्यर्थः ॥

प्र तद्दुःशीमे पृथवाने वेने प्र रामे वोचमसुरे मघवत्सु ।
ये युक्ष्वाय पंच शतास्मयु पथा विश्राव्येषां ॥१४॥
प्र । तत् । दुःऽशीमे । पृथवाने । वेने । प्र । रामे । वोचं । असुरे । मघवत्ऽसु ।
ये । युक्ष्वाय । पंच । शता । अस्मऽयु । पथा । विऽश्रावि । एषां ॥१४॥

ये देवाः पंच शता शतानि रथान्युत्कायाश्चैर्युत्कास्याख्यस्वत्कामाः संतः पथा यज्ञमार्गेण गच्छंति तेषामेषां देवानां विश्रावि देवानां लोके नानाविशेषेण श्रावकगुणयुक्तं तत्स्तोत्रं दुःशीमे दुःशीमनाम्नि पृथवाने । पृथवानः पृथिः । तस्मिन् वेने चासुरे बलवति रामे चैतेषु राजसु प्र वोचं । प्रब्रवीमि । प्रख्यापयामीत्यर्थः । मघवत्स्वन्येषु धनवत्सु च प्रख्यापयामीत्यर्थः ॥

अधीन्वचं सप्नतिं च सप्न च ।
सद्यो दिदिष्ट तान्वः सद्यो दिदिष्ट पार्ष्यः सद्यो दिदिष्ट मायवः ॥१५॥
अधि । इत् । नु । अचं । सप्नतिं । च । सप्न । च ।
सद्यः । दिदिष्ट । तान्वः । सद्यः । दिदिष्ट । पार्ष्यः । सद्यः । दिदिष्ट । मायवः ॥१५॥

अचेषु राजसु तान्वो नामर्षिर्गवां सप्न च सप्नतिं च नु क्षिप्रं सद्य इत् सद्य एवाधि दिदिष्ट । अधिपूर्वो दिशिर्याचनार्थः । ययाचे । किंच पार्ष्यो नाम युवनाश्वनामकस्य कुले पृथोः पुत्रः कश्चित्सद्य एव गवां सप्तसप्नतिमधि दिदिष्ट । किंच मायवोऽपि सद्य एवाधि दिदिष्ट ॥ ॥२८॥

प्रेत इति चतुर्दशर्चं चतुर्थं सूक्तं । कद्रूः पुत्रस्य सर्पस्यार्बुदस्यार्षं पंचमी सप्तमी चतुर्दशी त्रिष्टुभः शिष्टा एकादश जगत्यः । सोमाभिषवार्था ग्रावाणोऽत्र देवता । तथा चानुक्रांतं । प्रेते षळूना सर्पोऽर्बुदः काद्रवेयो ग्राव्णोऽस्तौत्पंचम्यंत्ये त्रिष्टुभौ सप्तमी चेति ॥ ग्रावस्तोत्र एतत्सूक्तं । सूचितं च । प्रेते वदंत्यित्यर्बुदं प्रागुक्तमाया आ व ऋंजसे प्र वो ग्रावाण इति सूक्तयोः । आ० ५. १२. । इति । यद्वा । इदमेकमेव सूक्तं ग्रावस्तोत्रं । सूचितं च । अर्बुदमेवेत्येके प्र वो ग्रावाण इत्येके । आ० ५. १२. । इति ॥

प्रेते वदंतु प्र वयं वदाम ग्रावभ्यो वाचं वदता वदद्भ्यः ।
यदद्रयः पर्वताः साकमाशवः श्लोकं घोषं भरथेंद्राय सोमिनः ॥१॥
प्र । एते । वदंतु । प्र । वयं । वदाम । ग्रावऽभ्यः । वाचं । वदत । वदत्ऽभ्यः ।
यत् । अद्रयः । पर्वताः । साकं । आशवः । श्लोकं । घोषं । भरथ । इंद्राय । सोमिनः ॥१॥

एते ग्रावाण उपलाः प्र वदंतु । अभिषवशब्दं कुर्वंतु । वयं यजमाना वदद्भ्योऽभिषवशब्दं कुर्वद्भ्यो ग्रावभ्यो ग्राव्णामर्थाय वाचं प्र वदाम । किंच हे ऋत्विजः यूयमपि स्तुतिलक्षणां वाचं वदत । पठत । यद्यदाद्रय आदरणीया दृढा आशवः सोमाभिषवार्थं क्षिप्रकारिणः पर्वता ग्रावाणः सर्वे यूयं साकं सहेंद्रायेंद्रार्थं श्लोकं श्रोतव्यं घोषमभिषवशब्दं भरथ पोषयथ तदानीं सोमिनः सोमवंतः सोमेन तृप्ता भवथ ॥

एते वदंति शतवत्सहस्रवदभि क्रंदंति हरितेभिरासभिः ।
विष्ट्वी ग्रावाणः सुकृतः सुकृत्यया होतुश्चित्पूर्वे हविरद्यमाशत ॥२॥

एते । वदंति । शतऽवत् । सहस्रऽवत् । अभि । क्रंदंति । हरितेभिः । आसऽभिः ।
विष्ठ्वी । यावाणः । सुऽकृतः । सुऽकृत्यया । होतुः । चित् । पूर्वे । हविःऽअद्यै । आशत ॥२॥

शतवत्सहस्रवत् यथा शतं मनुष्याः सहस्रवदपरिमिता मनुष्याश्च वदंति तद्वदेते यावाणो वदंति । शब्दं कुर्वंति । किंच हरितेभिः सोमसंसर्गाद्धरितवर्णैरासभिराशीरभि क्रंदंति । सोममभिलक्ष्य देवानाह्वयंतीत्यर्थः । किंच सुकृतः शोभनकर्माणो यावाणो विष्ठी यज्ञं प्राप्य होतुर्देवानामाह्वातुरग्नेः पूर्वे चित् पूर्वमेवाद्यं भक्षणीयं हविराशत । प्राप्नुवंति ॥

एते वदंत्यविदन्नना मधु न्यूँखयंते अधि पक्व आमिषि ।
वृक्षस्य शाखामरुणस्य बप्सतस्ते सूभर्वः वृषभाः प्रेमरावीषुः ॥३॥
एते । वदंति । अविदन् । अना । मधु । नि । ऊंखयंते । अधि । पक्वे । आमिषि ।
वृक्षस्य । शाखां । अरुणस्य । बप्सतः । ते । सूभर्वः । वृषभाः । प्र । ईं । अरावीषुः ॥३॥

अरुणस्यारुणवर्णस्य वृक्षस्य शाखां बप्सतो भक्षयंतस्ते सूभर्वः शोभनभर्त्रा वृषभाः प्रेमरावीषुः । प्रवदंति । यथा पक्व आमिष्यध्यामिषे क्रव्यादो मांसभक्षकास्त्र मांसविषये यथा न्यूंखयंते शब्दविशेषं कुर्वंति तद्वदेते यावाणो वदंति । शब्दं कुर्वंति । किंच मधु मदकरं सोममनाख्येनाविदन् । लभंते ॥

बृहद्वदंति मदिरेण मंदिनेंद्रं क्रोशंतोऽविदन्नना मधु ।
संरभ्या धीराः स्वसृभिरनर्तिषुराघोषयंतः पृथिवीमुपब्दिभिः ॥४॥
बृहत् । वदंति । मदिरेण । मंदिना । इंद्रं । क्रोशंतः । अविदन् । अना । मधु ।
संऽरभ्य । धीराः । स्वसृऽभिः । अनर्तिषुः । आऽघोषयंतः । पृथिवीं । उपब्दिऽभिः ॥४॥

मदिरेण मदकरेण मंदिनाभिषूयमाणेन सोमेनेंद्रं क्रोशंत आह्वयंत एते यावाणो बृहदत्यंतं वदंति । शब्दं कुर्वंति । किंचानाख्येन मधु मदकरं सोममविदन् । अलभंत । किंच संरभ्य संरभ्या भूत्वा धीरा धृष्टाः संत उपब्दिभिः शब्दैः पृथिवीमाघोषयंतः पूरयंतः स्वकीयैरंगुलिभिः सहानर्तिषुः । नृत्यंति ॥

सुपर्णा वाचमक्रतोप द्यव्याखरे कृष्णा इषिरा अनर्तिषुः ।
न्यङ्ङि यंत्युपरस्य निष्कृतं पुरू रेतो दधिरे सूर्यश्वितः ॥५॥
सुऽपर्णाः । वाचं । अक्रत । उप । द्यवि । आऽखरे । कृष्णाः । इषिराः । अनर्तिषुः ।
न्यक् । नि । यंति । उपरस्य । निःऽकृतं । पुरु । रेतः । दधिरे । सूर्यऽश्वितः ॥५॥

सुपर्णाः सुपतना यावाण उपोपलक्ष्य समीपे द्यव्यंतरिक्षे वाचमभिषवशब्दमक्रत । कुर्वंति । किंचाखरे । मृगाणां व्रज आखरः । तस्मिन्निषिरा गमनशीलाः कृष्णाः कृष्णमृगा इव सूर्यश्वितः सूर्यवच्छ्वेतवर्णा द्रप्सा अनर्तिषुः । नृत्यंति । निष्कृतं यावभिः पीडितं सदुपरस्योपलस्य न्यगधोमुखं सोमं नि यंति । निगमयंति । किंच पुरु बहु रेतः सोमलक्षणमुदकं दधिरे । धारयंति ॥ ॥२९॥

उग्रा इव प्रवहंतः समायमुः साकं युक्ता वृषणो बिभ्रतो धुरः ।
यच्छ्वसंतो जग्मसाना अरावीषुः शृण्व एषां प्रोथथो अवेतामिव ॥६॥

उ॒ग्राःऽइ॑व । प्र॒ऽवहं॑तः । सं॒ऽआय॑मुः । सा॒कं । यु॒क्ताः । वृष॑णः । बिभ्र॑तः । धुरः॑ ।
यत् । श्वस॑तः । ज॒य॒सा॒नाः । अरा॑विषुः । मृ॒खे । ए॒षां॒ । प्रो॒थ॒थः॒ । अ॒र्व॒ता॑ंऽइव ॥ ६॥

वृषणः । फलं वर्षतीति वृषा यज्ञः । तस्य धुरो धुरं भारं बिभ्रतो धारयंत एते याचाणः साकं सोमेन सह युक्ताः संतः प्रवहंतो रथं प्रकर्षेण वोढार उग्रा उन्नूर्णा अश्वा इव समायमुः । समाययुरिति । आयता भवंतीत्यर्थः । यद्यदा श्वसंतोऽभिषवसमय उत्पतननिपतनव्यापारजनितेन वायुना श्वसंत इव स्थिता याचाणो जयसानाः सोमं यसमाना अराविषुः शब्दायंते तदानीमेषां याच्णां संबंधी प्रोथथो मुखाच्छब्दः मृखे । श्रूयते । तत्र दृष्टांतः । अर्वतामिवाश्वानां संबंधिनो मुखाच्छेषाशब्दो यथा तद्वदित्यर्थः ॥

दश॑ावनिभ्यो॒ दश॑कक्ष्येभ्यो॒ दश॑योक्त्रेभ्यो॒ दश॑योजनेभ्यः ।
दश॑ाभीशु॒भ्यो अ॑र्चता॒जरे॑भ्यो॒ दश॒ धुरो॒ दश॑ यु॒क्ता व॑हध्व॒यः ॥ ७॥
दश॑ावनिऽभ्यः । दश॑ऽकक्ष्येभ्यः । दश॑ऽयोक्त्रेभ्यः । दश॑ऽयोजनेभ्यः ।
दश॑ाभीशु॒ऽभ्यः । अ॒र्च॒त॒ । अ॒जरे॑भ्यः । दश॑ । धुरः॑ । दश॑ । यु॒क्ताः । वह॑त्ऽभ्यः ॥ ७॥

दशावनिभ्यः । कर्माण्यवंति गच्छंतीत्यवनयः । दशावनयोऽंगुलयो येषां याहकत्वेन संबंधिनस्ते दशावनयः । ताभ्याच्णः । द्वितीयार्थे चतुर्थी । दशकक्ष्येभ्यः । कक्ष्याः प्रकाशका अंगुलयो येषां ते दशकक्ष्याः । तान् । दशयोक्त्रेभ्यः । योक्त्रवद्बंधने साधनभूता दशांगुलयो येषां तान् । दशयोजनेभ्यः । सोमेन सह योजने साधनभूता दशांगुलयो येषां तान् । दशाभीशुभ्यः । कर्माण्यभितो व्याप्नुवंतीत्यभीशवोऽंगुलयो दश येषां तान् । अजरेभ्यो जराविवर्जितान्दश दशभिर्धुरो धूर्भिर्हिंसितृभिः । तृतीयार्थे प्रथमा । युक्ता युक्तान् । द्वितीयार्थे प्रथमा । वहध्वो वहतोऽभिषवाख्ये कर्मणि व्याप्रियमाणानर्चत । स्तुत । हे ऋत्विज इति शेषः॥ अत्र यास्कः । अवनयोऽंगुलयो भवंत्यवंति कर्माणि कक्ष्याः प्रकाशयंति कर्माणि योक्त्राणि योजनानीति व्याख्यातमभीशवोऽभ्यश्नुवते कर्माणि दश धुरो दश युक्ता वहध्वः । धूर्धूर्वतेर्वधकर्मण इयमपीतरा धूरतस्मादेव विहंति वहं धारयतेर्वा । नि० ३. ९. । इति ॥

ते अ॒द्रयो॒ दश॑यंचास आ॒शव॒स्तेषा॑मा॒धानं॒ पर्ये॑ति हर्य॒तं ।
त ऊं॒ सुत॑स्य सो॒म्यस्यां॑धसो॒ऽशोः पी॒यूष॑ं प्रथ॒मस्य॑ भेजिरे ॥ ८॥
ते । अ॒द्र॒यः॑ । दश॑ऽयंचासः । आ॒शव॑ः । तेषा॑ं । आ॒ऽधान॑ं । परि॑ । ए॒ति॒ । ह॒र्य॒तं ।
ते । ऊं॒ इति॑ । सुत॑स्य । सो॒म्यस्य॑ । अंध॑सः । अं॒शोः॑ । पी॒यूष॑ं । प्र॒थ॒मस्य॑ । भे॒जि॒रे॒ ॥ ८॥

अद्रय आदरणीया आशवः क्षिप्रकारिणस्त एते प्रकृता याचाणो दशयंचासो दशयंचाः । तेषामेषां याच्णां संबंधि यदाधानं प्रक्षेपणमभिषवकर्म हर्यतं स्पृहणीयं पर्येति । परितो गच्छति । त एते याचाण एव सुतस्याभिषुतस्य सोम्यस्य सोमस्य संबंधिनोऽंशोः खंडस्वरूपस्यांधसोऽन्नस्य पीयूषममृतं प्रथमं भेजिरे ॥

ते सो॒मादो॒ हरी॒ इंद्र॑स्य निंसते॒ऽप्शु दु॒हंतो॒ अ॒धि॒आ॑सते॒ गवि॑ ।
तेभि॑र्दु॒ग्धं प॑पि॒वान्सो॒म्यं मधि॑ंद्रो॒ वर्ध॑ते॒ प्रथ॑ते॒ वृषा॑यते ॥ ९॥
ते । सो॒म॒ऽअ॑दः॑ । हरी॒ इति॑ । इंद्र॑स्य । निंस॑ते । अ॒प्शु । दु॒हंतः॑ । अधि॑ । आ॒स॒ते॒ । गवि॑ ।
तेभिः॑ । दु॒ग्धं । प॒पि॒ऽवान् । सो॒म्यं । मधु॑ । इंद्रः॑ । वर्ध॑ते । प्रथ॑ते । वृष॑ऽयते ॥ ९॥

ते सोमादः सोमस्यात्तारस्त एते प्रकृता याचाण इंद्रस्य हरी अश्वौ निंसते । निर्चति । चुंबंति । प्राप्नुवं-

तीत्यर्थः । किंच गव्यधिषवणचर्मण्यंशुं सोमं दुहंत आसते । किंचेंद्रस्येमिन्दुंग्धं सोम्यं सोममयं मध्वमृतं पपिवान्पीतवान्वर्धते । वृद्धशरीरो भवति । प्रथते । विस्तीर्णशरीरश्च भवति । वृषायते । वृषेवाचरति ॥

वृषा वो अंशुर्न किला रिषाथनेळावंतः सदमित्स्यनाशिताः ।
रैवत्येव महसा चारवः स्थन यस्य यावाणो अजुषध्वमध्वरं ॥१०॥
वृषा । वः । अंशुः । न । किल । रिषाथन । इळाऽवंतः । सदा । इत् । स्थन । आशिताः ।
रैवत्याऽइव । महसा । चारवः । स्थन । यस्य । यावाणः । अजुषध्वं । अध्वरं ॥१०॥

अंशुः सोमो वो युष्माकं वृषा यष्टा वर्षिता भविष्यति। यूयमपि न रिषाथन किल। न रिष्यथ। न शीर्णा भवथ किल। किंचेळावंतोऽन्नवंत इव यूयं सदमित् सदैवाशिता भोजिताः स्थन । भवथ । किंच रैवत्येव यथा रेवंतस्तेजसा युक्ता भवंति तद्वन्महसा तेजसा युक्ताश्चारवः कल्याणाः स्थन । भवथ । हे यावाणः यूयं यस्य यजमानस्याध्वरं यज्ञमजुषध्वं । असेवध्वं ॥ ॥३०॥

तृदिला अतृदिलासो अद्रयोऽश्रमणा अश्रृथिता अमृत्यवः ।
अनातुरा अजराः स्थामविष्णवः सुपीवसो अतृषिता अतृष्णजः ॥११॥
तृदिलाः । अतृदिलासः । अद्रयः । अश्रमणाः । अश्रृथिताः । अमृत्यवः ।
अनातुराः । अजराः । स्थ । अमविष्णवः । सुऽपीवसः । अतृषिताः । अतृष्णऽजः ॥११॥

अश्रमणाः श्रमणवर्जिता अश्रृथिता अन्यैरशिथिलीकृता अमृत्यवोऽमारिता अनातुरा अरोगा अजरा जरारहिताः स्थ । भवथ । किंचामविष्णव उत्क्षेपणावक्षेपणगत्युपेता हे यावाणः तृदिला अन्येषां भेदका अतृदिलासः स्वयमन्येनाभिन्नाः सुपीवसः सुबला अतृषितास्तृष्णारहिता अतृष्णजो निःस्पृहा भवथ ॥

ध्रुवा एव वः पितरो युगेयुगे क्षेमकामासः सदसो न युंजते ।
अजुर्यासो हरिषाचो हरिद्रव आ द्यां रवेण पृथिवीमशुश्रवुः ॥१२॥
ध्रुवाः । एव । वः । पितरः । युगेऽयुगे । क्षेमऽकामासः । सदसः । न । युंजते ।
अजुर्यासः । हरिऽसाचः । हरिद्रवः । आ । द्यां । रवेण । पृथिवीं । अशुश्रवुः ॥१२॥

हे यावाणः युगेयुगे सर्वेषु युगेषु ध्रुवा एव निश्चला एव वो युष्माकं पितरः पितृभूताः पर्वताः क्षेमकामासः क्षेमकामाः सदसो न युंजते। सदांस्थात्मना न संयोजयंति। अजुर्यासो जरारहिता हरिषाचः सोमस्य संभक्तारो हरिद्रवः सोमसंसर्गाद्धरितवर्णा द्यां दिवं पृथिवीं च रवेणाभिषवशब्देनाशुश्रवुः । श्रावयंति ॥

तदिद्वदंत्यद्रयो विमोचने यामन्नंजस्पा इव घेदुपब्दिभिः ।
वपंतो बीजमिव धान्याकृतः पृंचंति सोमं न मिनंति बप्सतः ॥१३॥
तत् । इत् । वदंति । अद्रयः । विऽमोचने । यामन् । अंजःपाःऽइव । घ । इत् । उपब्दिऽभिः ।
वपंतः । बीजंऽइव । धान्यऽकृतः । पृंचंति । सोमं । न । मिनंति । बप्सतः ॥१३॥

अद्रय आदरणीया यावाणो यामन् यामनि गमनेऽंजस्पाः । अंजसा पांति रक्षंतीत्यंजस्पाः । तेषां रथानामिवोपब्दिभिरुदित्तदेवानिषवकर्म विमोचने चेत् तत्सोमरसविमोचनवेलायामपि वदंति । प्रकाश-

यंति । किंच वप्यतः सोमं भक्षयंतो ग्रावाणो वपंतो धान्याक्तः क्षणीवका बीजमिव यथा पुंचंति तद्वत्सोमं पुंचंति । संपर्चयंतीत्यर्थः । नैनं मिनंति । न हिंसंतीत्यर्थः ॥

सुते अध्वरे अधि वाचमक्रता क्रीळयो न मातरं तुदंतः ।
वि षू मुंचा सुषुवुषो मनीषां वि वर्तंतामद्रयश्चायमानाः ॥१४॥
सुते । अध्वरे । अधि । वाचं । अक्रत । आ । क्रीळयः । न । मातरं । तुदंतः ।
वि । सु । मुंच । सुषुऽवुषः । मनीषां । वि । वर्तंतां । अद्रयः । चायमानाः ॥१४॥

चायमानाः पूज्यमाना अद्रय आदरणीया ग्रावाणोऽध्वरेऽधि यज्ञे सुते सोमेऽभिषुते मातरं तुदंतो हस्तेन ताडयंत आ क्रीळयो नाक्रीडकाः कुमाराः शब्दं यथा कुर्वंति तथा वाचं शब्दमक्रत । क्षणंति । सुषुवुषः सोममभिषुतवतो ग्राव्णो मनीषां स्तुतिं वि मुंच । विशेषेण मुंच । किंचाद्रयो वि वर्तंतां । अभिषवशब्दं विमुंचंतु ॥ ॥ ३१ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थाश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्येऽष्टमाष्टके चतुर्थोऽध्यायः समाप्तः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् । निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
अथाष्टमाष्टकेऽध्यायश्चतुर्थः संप्रदर्शितः । धीमता सायणार्येण पंचमोऽथ प्रदर्श्यते ॥

तच हये जाय इत्यष्टादृचं पंचमं सूक्तं वैष्टुभं । अथानुक्रमणिका । हये द्यूनोर्वशीमैळः पुरूरवाः पूर्वोर्वशीतात्कामात्पुनरासाद्यावरोद्युमैच्छत्सा तमनिच्छंती प्रत्याचष्टे हय इषुर्या कदा सुदेवोऽतरिक्षप्रां सचेति तिस्रश्चैळवाक्यं शिष्टा उर्वश्या इति । हये जाय इषुर्न श्रिये या सुजूर्णिः कदा सूनुः सुदेवो अयांतरिक्षप्रां सचा यदासु जहतीष्वित्यादयास्तिस्रश्चेति नवर्चं ऐळस्य पुरूरवसो वाक्यानि । अतस्तासां स ऋषिः । शिष्टा नवोर्वश्या वाक्यानि । अतस्तासु सर्षिका । उभयोर्वाक्येषु योऽर्थः प्रतिपाद्यते सा देवता ॥ गतो विनियोगः ॥

ऐळोर्वशीतिहासोऽय वैश्वयाय प्रवर्ण्यते । मित्रश्च वरुणश्चोभौ दीक्षितौ प्रेक्ष्य चोर्वशीं ॥ १ ॥
रेतः सिषिचतुः सद्यस्तत्कुंभे न्यधुस्तदा । तां शप्तवंतौ मनुजभोग्या भूम्यां भवेति तौ ॥ २ ॥
अथांतर इळो राजा मनोः पुत्रश्च संयुतः । मृगयां संचरन् साश्वो देवीक्रीडं विवेश ह ॥ ३ ॥
यत्र देवं गिरिसुता सर्वैर्भावैरतोषयत् । अथाविशन्पुमाञ्स्त्री स्यादित्युक्ता तत्र चाविशत् ॥ ४ ॥
स्त्रीभूत्वा व्रीडितः सोऽगाच्छरणं शिवमंजसा । इयं प्रसाद्यतां राजन्नित्युक्तः शंभुना नृपः ॥ ५ ॥
अगाम शरणं देवीमात्मनः पुंस्त्वसिद्धये । अकरोत्सा नृपं देवी षण्मासात्प्राप्तपुंस्त्वकं ॥ ६ ॥
ततः कदाचित्स्त्रीकाले बुधः सौंदर्यमोहितः । अप्सरोभ्यो विशिष्टां तामिळां संगतवान्मुदा ॥ ७ ॥
तदेळायां सोमसुताज्जातो राजा पुरूरवाः । तमुर्वशी तु चकमे प्रतिष्ठानपुरे स्थितं ॥ ८ ॥
तस्मादन्यत्र गमं त्वां दृष्ट्वा यामि यथागतं । सुता उरणकौ त्वं च समीपं कुरु मे द्रुतं ॥ ९ ॥
इति सा समयं कृत्वा रमयामास तं नृपं । चतुरब्दे गते राजौ देवैरुरणकद्वयं ॥ १० ॥
हृतं तस्य ध्वनिं श्रुत्वा गम एव स भूपतिः । उत्थाय जित्वा तावागच्छेत्येवं जल्पकोऽन्यतः ॥ ११ ॥
विद्युता दर्शितोऽस्त्री स गम एव पुरूरवाः । अथ साकृष्टसमया ह्युर्वशी तु दिवं ययौ ॥ १२ ॥
तत उन्मत्तवद्राजा दिदृक्षुस्तामितस्ततः । कुर्वन्नन्वेषणं तीरे सरसो मानसस्य तां ॥ १३ ॥
विहरंतीमप्सरोभिः सहापश्यत्पुरूरवाः । पुनः स चकमे भोक्तुमुर्वशीं च पुरूरवाः ॥ १४ ॥
सात्रं सापश्यदुक्ता च प्रत्याचष्टे व्रजेति तं । इत्युर्वशीऐळसंवादमिममेधोऽध्यसूचयदिति ॥ १५ ॥

अथ वाजसनेयकं । उर्वशी हाप्सराः पुरूरवसमैळं चकमे तँ ह विंदमानोवाच घिः स्म मार्ह्रो वेतसेन दंडेन हतादकामाँ स्म मा निपद्यासै मो स्म त्वा नग्नं दर्शमेष वै न स्त्रीणामुपचार इति सा हाग्निञ्ज्योगुवासापि हाग्नाग्नर्भिक्षास तावञ्ज्योगघाग्निमुवास । ततो ह गंधर्वाः समूदिरे ज्योग्वा इयमुर्वशी मनुष्येष्ववात्सीदुपजानीत यथेयं पुनरागच्छेदिति तस्यै हाविर्ह्रुरणा ग्रयन उपवज्ञास ततो ह गंधर्वा अन्यतरमुरणं प्रमेषुः । सा होवाचावीर इव वत मेऽजन इव पुमाँ हरंतीति द्वितीयं प्रमेषुः सा ह तथैवोवाचाथ हायमीचां चक्रे कथं नु तदवीरं कथमजनँ स्यादचाहँ स्यामिति स नग्न एवागूत्पपात चिरं तस्मेने यद्वासः पर्यधास्यत ततो ह गंधर्वा विद्युतं जनयां चकुस्तं यथा दिवैवं नग्नं ददर्श ततो हैवेयं तिरोबभूव पुनरेमीत्येत्तिरोभूताँ स आध्या जल्पन्कुरुक्षेत्रँ समया चचारान्यतःज्ञचेति विसवती तस्यै हाधंतेन वन्नाज तत्र ता अप्सरस आतयो भूत्वा परिप्लुविरे तँ हेयं ज्ञात्वोवाच अयं वै स मनुष्यो यस्मिन्नहमवात्समिति ता होचुस्तस्यै वा आविरसामेति तथेति तस्यै हाविरासुस्ताँ हायं ज्ञात्वाभिपरोवाद हये जाये मनसेत्यादि । शत० ११. ५. १. ॥

हये जाये मनसा तिष्ठ घोरे वचाँसि मिश्रा कृणवावहै नु ।
न नौ मंत्रा अनुदितास एते मयस्करन्परतरे चनाहन् ॥१॥
हये । जाये । मनसा । तिष्ठ । घोरे । वचाँसि । मिश्रा । कृणवावहै । नु ।
न । नौ । मंत्राः । अनुदितासः । एते । मयः । करन् । परऽतरे । चन । अहन् ॥१॥

पुरूरवसो वाक्यं । जायां पश्यन्वदति । हये हे घोरे । अस्माकं दुःखजनकत्वात् । घोरकारिणि जाये मनसाऽस्मदुपर्यनुरागवता मनसा युक्ता सती तिष्ठ । क्षणमावं संनिधावेव निवस ॥ हय इत्यस्य निघाताभावश्छांदसः ॥ किमर्थं संस्थानमिति तत्राह । वचांसि वाक्यानि मिश्राण्युक्तिप्रत्युक्तिरूपाणि त्वय चिरं वा कृणवावहै । करवावहै ॥ कृवि हिंसाकरणयोः । धिन्विकृण्व्योरुत्तुप्रत्ययः ॥ किमर्थं वचसः करणमिति चेत् उच्यते । नावावयोर्मंत्रा रहस्यार्था एते विवक्षिता अनुदितासोऽव्याहियमाणाः परस्परमसंभाष्यमाणा गुंफिताः संतः परतरे चनाहन् । चनेति निपातसमुदायस्यार्थे । अनेकेषु दिवसेषु चरमेऽप्यहनि मयः । सुखनामैतत् । सुखं न करन् । कुर्वंति । अतः कृणवावहा इति ॥

किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव ।
पुरूरवः पुनरस्तं परेहि दुरापना वात इवाहमस्मि ॥२॥
किं । एता । वाचा । कृणव । तव । अहं । प्र । अक्रमिषं । उषसां । अग्रियाऽइव ।
पुरूरवः । पुनः । अस्तं । परा । इहि । दुःऽआपना । वातःऽइव । अहं । अस्मि ॥२॥

अनया तमुर्वशी प्रत्युवाच । एतितया वाचा केवलया पुनःसंभोगरहितया किं कृणव । किं करवाव । अहं त्विदानीं त्वत्सकाशात्प्राक्रमिषं । अतिक्रांतवत्यस्मि । अतिक्रमे दृष्टांतः । उषसामग्रियेव । बर्हीनामुषसां मध्ये ऽग्र्याये भवा पूर्वोषाः प्राक्रमीद्यथाहमपीति । यस्मादेवं तस्मात्ते पुरूरवः त्वं पुनरस्मत्सकाशादस्तं गृहं परेहि । परागच्छ । मा ममाभिलाषं कार्षीः । तस्या दुर्ग्रहत्वमाह । अहं वात इव वायुरिव दुरापना दुष्प्रापा दुरापा वास्मि । दुरापा वा अहं त्वयैतर्ह्यस्मि पुनर्गृहानिहीति हैवैनं तदुवाचेति वाजसनेयकं । शत० ११. ५. १. ७. ॥

इषुर्न श्रिय इषुधेरसना गोषाः शतसा न रंहिः ।
अवीरे क्रतौ वि दविद्युतन्नोरा न मायुं चितयंत धुनयः ॥३॥
इषुः । न । श्रिये । इषुऽधेः । असना । गोऽसाः । शतऽसाः । न । रंहिः ।
अवीरे । क्रतौ । वि । दविद्युतत् । न । उरा । न । मायुं । चितयंत । धुनयः ॥३॥

अनया पुरूरवाः स्वस्य विरहजनितं वैक्लव्यं तां प्रति ब्रूते । द्रुघुधिः । द्रुघवो धीयंतेऽनेनेति द्रुधिर्निर्धनः । ततः सकाशादिषुरसनासनाय प्रक्षेप्तुं न भवति श्रिये विजयार्थं । स्वद्विरहाद्युद्धस्य बुद्धावप्यनिधानात् । तथा रंहिर्वेगवानहं शत्रुसकाशान्नोषासिषं शत्रूणां गवां संभक्ता नाभवं । तथा शतसाः शतानामपरिमितानां शत्रुधनानां संभक्ता नाभवं । किंचावीरे वीरवर्जिते क्रतौ राजकर्मणि सति न वि दविद्युतत् । न विद्योतते । न मत्सामर्थ्यं । किंच धुनयः कंपयितारोऽस्मदीया नरा उरोरौ ॥ सुपां सुलुगिति सप्तम्या डादेशः ॥ विस्रीर्षे संग्रामे मायुं । मीयते प्रक्षिप्यत इति मायुः शब्दः ॥ क्रुवापाजीत्यादिनोण् ॥ सिंहनादं न चितयंत । न बुध्यंते ॥ चिती संज्ञाने । अस्मात्सिचि संज्ञापूर्वकस्य विधेरनित्यत्वाल्लघूपधगुणाभावः । छांदसो लङ् ॥

सा वसु दधती श्वश्वुराय वय उषो यदि वष्टयंतिगृहात् ।
अस्तं ननक्षे यस्मिञ्चाकन्दिवा नक्तं श्नथिता वैतसेन ॥४॥
सा । वसु । दधती । श्वश्वुराय । वयः । उषः । यदि । वष्टि । अंतिऽगृहात् ।
अस्तं । ननक्षे । यस्मिन् । चाकन् । दिवा । नक्तं । श्नथिता । वैतसेन ॥४॥

इदमुत्तरं चोर्वशीवाक्यं । आत्मेन पुरात्मना कृतमुषसे निवेदयति । हे उषः सेयमुर्वशी वसु वासकं वयोऽन्नं श्वशुराय भर्तुः पुरूरवसः पित्रे दधती प्रयच्छंती तत्र गृहे स्थिता यदि पतिं वष्टि कामयते तदांतिगृहात् । स्वभर्तृभोगगृहांतिके यच्छ्वशुरस्य भोजनगृहं तदंतिगृहं । तस्मान्नृहात्सोर्वश्यस्तं पतिगृहं ननक्षे । व्याप्नोति । यस्मिन्गृहे चाकन् कामयत उर्वशी । सा चोर्वशी दिवा नक्तमहनि रात्रौ च वैतसेन । श्नेपो वैतस इति पुंस्प्रजननस्येति निरुक्तं । ३. २१. । पुंस्प्रजननेन श्नथिता ताडिता च भवति । एवमुर्वश्यात्मानं परोक्षेण निर्दिदेश ॥

चिः स्म माहुः श्नथयो वैतसेनोत स्म मेऽर्व्यत्ये पृणासि ।
पुरूरवोऽनु ते केतमायं राजा मे वीर तन्वस्तदासीः ॥५॥
चिः । स्म । मा । अहुः । श्नथयः । वैतसेन । उत । स्म । मे । अर्व्यत्ये । पृणासि ।
पुरूरवः । अनु । ते । केतं । आयं । राजा । मे । वीर । तन्वः । तत् । आसीः ॥५॥

अनेन पुरूरवसमेव संबोध्योक्तवती । हे पुरूरवः त्वं मा मामहुरहनि वैतसेन दंडेन पुंस्त्वजनेन चिस्विवारं ॥ द्विचितुर्भ्यः सुच् । पा० ५. ४. १८. ॥ श्नथयः स्म । अश्नथयः । अताडयः ॥ क्रत्वोऽर्थप्रयोगे । पा० २. ३. ६४. । इति कालवाचिनोऽहःशब्दादधिकरणे षष्ठी ॥ उतापि च । स्मेति पूरणः । अर्व्यत्ये । सपत्नीभिः सह पर्यायेण पतिमागच्छति सा अर्व्यती । न तादृश्यर्व्यती । तस्यै मे मह्यं पृणासि । पूरयसि । एवं बुद्धा हे पुरूरवः ते तव केतं गृहमन्वायं । अन्वगमं पूर्वं । हे वीर राजा त्वं च मे मम तन्वः शरीरस्य तत्तदासीः । अभवः । सुखयितेति शेषः । परमस्यैवं मंतव्यं किमिति कातरो भवसीत्युवाच ॥ ॥१॥

या सुजूर्णिः श्रेणिः सुम्नआपिर्हृदेचक्षुर्न ग्रंथिनी चरण्युः ।
ता अंजयोऽरुणयो न समुः श्रिये गावो न धेनवोऽनवंत ॥६॥
या । सुऽजूर्णिः । श्रेणिः । सुम्नेऽआपिः । हृदेऽचक्षुः । न । ग्रंथिनी । चरण्युः ।
ताः । अंजयः । अरुणयः । न । समुः । श्रिये । गावः । न । धेनवः । अनवंत ॥६॥

पुरूरवसो वाक्यं । या सुजूर्णिः सुजवेतन्नामिकास्ति तथा या श्रेणिर्या सुम्नआपिर्या हृदेचक्षुः । नकारः समुच्चये । ताभिस्तत्कल्पाभिर्मानिनीभिः सहिता ग्रंथिनी ग्रंथनवती संदर्भवती चरण्युश्चरणशीलोर्वश्यागमत् । यद्वा । ग्रंथिनीत्येतत्सखिभूताप्सरोनामधेयं । या सुजूर्णिः सुजवोर्वशी सा ताभिः सह अगमत् ।

ता अप्सरसोऽत्र आभरणोपेता अरुणवर्णा न सन्तुः । पूर्ववन्न गच्छंति । श्रिये श्रयणाय धेनवो नवप्रसूता गावो न गाव इव । आश्रयार्थं यथा गावोऽनवंत शब्दायंते तथा न शब्दयंतीति व्यतिरेके दृष्टांतः ॥

सꣳस्मिञ्जायमान आसत॒ मा उ॒तेमवर्धन्न॒द्य॑: स्वगू॒र्ताः ।
म॒हे यत्त्वा॑ पुरूरवो रणा॒यावर्धयन्दस्यु॒हत्या॑य दे॒वाः ॥७॥
सं । अ॒स्मि॒न् । जा॒यमा॒ने । आ॒स॒त॒ । मा॒ः । उ॒त । ई॒ । अ॒व॒र्ध॒न् । न॒द्यः॑ । स्व॒ऽगू॒र्ताः॑ ।
म॒हे । यत् । त्वा॒ । पु॒रू॒र॒वः॒ । र॒णा॒य । अ॒वर्ध॑यन् । द॒स्यु॒ऽह॒त्या॑य । दे॒वाः ॥७॥

अनयैताभिः सह संसर्गस्त्वयानुभूत इत्युर्वशी वदति । अस्मिन्पुरूरवसि जायमाने सति मा अप्सरसो देववेश्या अपि समासत । संगता अभवन् । अथवा जायमाने यज्ञार्थं प्रवर्धमाने सति मा देवपत्न्योऽपि समासत । समभवन् । उतापि चैनेनं पुरूरवसं स्वगूर्ताः स्वयंगामिन्यो नद्यस्तासामाश्रयभूता अवर्धयन् । किंच हे पुरूरवः यद्यस्मात्त्वा त्वां महे महते रणाय रमणीयाय संग्रामाय दस्युहत्याय दस्युहननाय देवास्त्वामवर्धयन् ॥

सचा॒ यदा॑सु ज॒ह॒तीष्वत्कम॑मानु॒षीषु॒ मानु॑षो नि॒षेवे॑ ।
अप॑ स्म॒ मत्त॒रस॑ती॒ न भु॒ज्युस्ता अ॑चसन्नथ॒स्पृशो॒ नाश्वा॑: ॥८॥
सचा॑ । यत् । आ॒सु॒ । ज॒ह॒तीषु॑ । अत्क॑म् । अ॒मा॒नु॒षीषु॑ । मानु॑षः । नि॒ऽसेवे॑ ।
अप॑ । स्म॒ । मत् । त॒रस॑ती । न । भु॒ज्युः । ताः । अ॒च॒स॒न् । र॒थ॒ऽस्पृशः॑ । न । अश्वाः॑ ॥८॥

इदमादिचीणिऊवाक्यानि । तत्रादितो द्वाभ्यामुर्वशीमन्याश्च सह स्तौति । यद्यदा सचा सहायभूतः पुरूरवा अत्कं स्वकीयं रूपं । अत्क इति रूपनाम । जहतीषु परित्यजंतीष्वमानुषीषु देवताभूतास्वप्सरःसु मानुषः सन्निषेवे अभिमुखं गच्छति तदानीं ता अप्सरसो मत्तोऽपापरूपत्वाचसन् । चसतिर्गतिकर्मा । गच्छंति । पलायने दृष्टांतः । तरसंती भुज्युर्न । तरसन्नाम मृगः । तस्य स्त्री भुज्युर्भोगसाधनभूता स्त्री मृगी । सा यथा व्याधाज्ञीता पलायते । किंच रथस्पृशो नाश्वा रथे नियुक्ता अश्वा इव । यथा ते पलायंते तद्वत्पलायंत इति । उर्वश्यानेकाभिरप्साभिः सह भोगमनुभूतवानसीत्युक्तः प्रत्याचष्टे ॥

यदा॑सु मर्तो॑ अ॒मृता॑सु नि॒स्पृक्सं क्षो॒णीभि॒: क्रतु॑भि॒र्न पृ॑ङ्क्ते ।
ता आ॒तयो॒ न त॒न्व॑: शुम्भत॒ स्वा अश्वा॑सो॒ न क्री॒ळयो॒ दंदशानाः ॥९॥
यत् । आ॒सु॒ । मर्तः॑ । अ॒मृता॑सु । नि॒ऽस्पृक् । सं । क्षो॒णीभिः॑ । क्रतु॑ऽभिः । न । पृ॒ङ्क्ते ।
ताः । आ॒तयः॑ । न । त॒न्वः॑ । शु॒म्भ॒त॒ । स्वाः । अश्वा॑सः । न । क्री॒ळयः॑ । दं॒द॒शा॒नाः ॥९॥

यद्यदाप्सु मृताप्सरःसु मर्तो मनुष्यः पुरूरवा निस्पृक् निःशेषेण स्पृशन् क्षोणीभिर्वाग्भिः क्रतुभिर्न कर्मभिश्च सं पृंक्ते संपर्कं करोति । नकारः समुच्चयार्थः । ता अप्सरस आतय आतिभूतास्तदानीं स्वास्तन्व आत्मीयानि रूपाणि न शुंभत । न प्रकाशयंति । अश्वासो नाश्वा इव क्रीळयः संक्रीडमाना दंदशाना दंदशूका जिह्वाभिरात्मीयाः स्वस्रा भक्षयंतः । ते यथा चापल्येन धावंतः स्वरूपं न प्रयच्छंति रथिकाय तद्वदिति दुःखाद्भूते ॥

विद्यु॑न्न या पत॑न्ती॒ दवि॑द्योत्स॒रंती॒ मे॒ अप्या॑ काम्या॑नि ।
जनि॑ष्टो॒ अपो॒ नर्यः॒ सुजा॑तः॒ प्रोर्वशी॑ तिरत दी॒र्घमायु॑: ॥१०॥

विऽद्युत्। न। या। पतंती। दविद्योत्। भरंती। मे। अप्या। काम्यानि।
जनिष्टो इति। अपः। नर्यः। सुऽजातः। प्र। उर्वशी। तिरत। दीर्घं। आयुः ॥१०॥

अनयोर्वशीं स्तौति। योर्वशी विद्युन्न विद्युदिव पतंती गच्छंती दविद्योत् द्योतते। किं कुर्वती। अप्या। अप इत्यंतरिक्षनाम। तत्संबंधीनि व्याप्तानि वा काम्यान्यस्मदभिमतान्युदकानि वा मे मह्यं भरंती संपादयंती। यदागतायास्तस्याः सकाशादपो व्याप्तः कर्मसु नर्यो नरेभ्यो हितः सुजातः सुजनमः पुत्रो जनिष्टो जनिष्ट उत्पद्यते तदानीं ममोर्वशी दीर्घमायुः प्र तिरत। प्रवर्धयति। प्रजामनु प्रजायसे तदु ते मर्त्यामृतं। तै० ब्रा० १. ५. ५. ६.। इति हि मंत्रः ॥ ॥२॥

जज्ञिष इत्था गोपीथ्याय हि दधाथ तत्पुरूरवो म ओजः।
अशासं त्वा विदुषी सस्मिन्नहन्न म आशृणोः किमभुग्वदासि ॥११॥
जज्ञिषे। इत्था। गोऽपीथ्याय। हि। दधाथ। तत्। पुरूरवः। मे। ओजः।
अशासं। त्वा। विदुषी। सस्मिन्। अहन्। न। मे। आ। अशृणोः। किं। अभुक्।
वदासि ॥११॥

इत्थेत्थं गोपीथ्याय। गौः पृथिवी। पीथं पालनं ॥ स्वार्थिकस्तद्धितः ॥ भूरक्षणाय जज्ञिषे हि। जातोऽसि खलु पुत्ररूपेण। आत्मा वै पुत्रनामेति श्रुतेः। पुनर्दैन्याह। हे पुरूरवः मे ममोदरे मय्योजोऽपत्योत्पादनसामर्थ्यं दधाथ। मयि निहितवानसि। तत्तथास्तु। अथापि ख्यातव्यमिति चेत् तत्राह। अहं विदुषी भावि कार्यं जानती सस्मिन्नहन् सर्वस्मिन्नहनि त्वया कर्तव्यं त्वा त्वामशासं। शिक्षितवत्यस्मि। त्वं मे मम वचनं नाशृणोः। न शृणोषि। किं त्वमभुगभोक्तापालयिता प्रतिज्ञातार्थमपालयन्वदासि हये आर्य इत्यादिकरूपं प्रलापं ॥ वदेर्लेट्यडागमः ॥ दिवसे त्रिवारं यभस्व एडकबालकमस्माकं पुत्रत्वेन परिकल्पय अपत्योत्पादनपर्यंतं वसामि नग्नं त्वां यदाद्राक्षं तदा गच्छामीत्येवंरूपो मिथःसमय उर्वशी हाप्सराः पुरूरवसमेळं चक्रमे तँ ह विंदमानोवाच त्रिः स्म माहो वैतसेन दंडेनेत्यादि वाजसनेयकमुदाहृतं ॥

कदा सूनुः पितरँ जात इच्छाच्चक्रन्नाश्रु वर्तयद्विजानन्।
को दंपती समनसा वि यूयोदध यदग्निः श्वशुरेषु दीदयत् ॥१२॥
कदा। सूनुः। पितरँ। जातः। इच्छात्। चक्रन्। न। अश्रु। वर्तयत्। विऽजानन्।
कः। दंपती इति दंऽपती। सऽमनसा। वि। यूयोत्। अध। यत्। अग्निः। श्वशुरेषु।
दीदयत् ॥१२॥

इदं पुरूरवसो वाक्यं। कदा कस्मिन्काले सूनुस्त्वयोदरजातः सन् पितरं मामिच्छात्। इच्छेत् ॥ इषु इच्छायां। लेटि शपीषुगमियमां छ इति छादेशः। लेटोऽडाटावित्यडागमः ॥ कदा वा विजानन्पितरं मामधिगच्छंश्चक्रन् क्रंदमानो नाश्रु वर्तयत्। नेति चार्थे। किंच कः किंविधः सन् सूनुः समनसा समनसौ समनस्कौ दंपती जायापती त्वां मां च वि यूयोत्। विश्लेषयेत् ॥ यु मिश्रणामिश्रणयोः। यौतेश्छांदसः शपः सुः। तुजादित्वादभ्यासस्य दीर्घः ॥ अधाधुना यथदापिस्तव हृदयस्थितस्त्वयोरूपो गर्भः श्वशुरेषु दीदयत् दीप्यते। दीदयतिर्दीप्तिकर्मेति नैरुक्तो धातुः ॥

प्रति ब्रवाणि वर्तयते अश्रु चक्रन्न क्रंददाध्ये शिवायै।
प्र तत्ते हिनवा यत्ते अस्मे परेह्यस्तं नहि मूर मापः ॥१३॥

प्रति । ब्रवाणि । वर्तयते । अश्रु । चक्रन् । न । क्रंदत् । आऽध्ये । शिवायै ।
प्र । तत् । ते । हिनव । यत् । ते । अस्मे इति । परा । इहि । अस्तं । नहि । मूर । मा । आपः ॥१३॥

इदमुर्वशीवाक्यं । हे पुरूरवः त्वां प्रति ब्रवाणि । प्रतिवच्मि । त्वदपत्यमश्रु वाष्पं वर्तयते । वर्तयिष्यति । आध्य आध्याते वस्तुनि शिवायै शिवे कल्याणि समुपस्थिते सति चक्रन्नुदन्नश्रूणि विसृजन्न क्रंदत् । नकारस्यार्थे । रोत्स्यति चेत्यर्थः । तत्त्वदपत्यं ते तुभ्यं हिनव प्रहिणोमि यदपत्यं ते तव संबंधस्मै अस्मासु निहितं । त्वं परेह्यस्तं । अस्तमिति गृहनाम । स्वगृहं प्रतिगच्छ । हे मूर मूढ मा मां न ह्यापः । न प्राप्नोषि ॥ हिनवेत्यत्र हिनोतेश्छंदसि लुङ्लङ्लिट इति भविष्यदर्थे लङि सिप आमादेशः । गुणः । अंत्यलोपश्छांदसः । बाहुलवचनाद्डभावः । आपः । आप्लृ व्याप्तौ । लिटि तिङां तिङो भवंतीति थलो णल् ॥

सुदेवो अद्य प्रपतेदनावृत्परावतं परमां गंतवा उ ।
अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासो अद्युः ॥१४॥
सुऽदेवः । अद्य । प्रऽपतेत् । अनावृत् । पराऽवतं । परमां । गंतवै । उ इति ।
अध । शयीत । निःऽऋतेः । उपऽस्थे । अध । एनं । वृकाः । रभसासः । अद्युः ॥१४॥

अथ परित्यक्तः पुरूरवा उवाच । सुदेवस्त्वया सह सुक्रीडः पतिरद्य प्रपतेत् । अद्यैव प्रपततु । अथवानावृदनावृत्तः सन् परमां परावतं दूरादपि दूरदेशं गंतवै गंतुं महाप्रस्थानगमनं कुर्यात् । अधाथवा यद्यकुत्रापि गंतुं समर्थो निर्ऋतेः पृथिव्या उपस्थे शयीत । शयनं कुर्यात् । यद्वा । निर्ऋतिः पापदेवता । तस्या उपस्थ उत्संगे संनिधौ म्रियतामित्यर्थः । अधाथवैनं वृका आरण्याः श्वानो रभसासो वेगवंतोऽद्युः । भक्षयंतु । अत्र वाजसनेयकं । सुदेवोऽद्योद्वा बध्नीत प्र वा पतेत्तदेनं वृका वा श्वानो वाद्युरिति हैव तदुवाच । शत० ११. ५. १. ८. । इति ॥

पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासो अशिवास उ क्षन् ।
न वै स्त्रैणानि सख्यानि संति सालावृकाणां हृदयान्येता ॥१५॥
पुरूरवः । मा । मृथाः । मा । प्र । पप्तः । मा । त्वा । वृकासः । अशिवासः । ऊं इति । क्षन् ।
न । वै । स्त्रैणानि । सख्यानि । संति । सालावृकाणां । हृदयानि । एता ॥१५॥

तमितरा प्रत्युवाच । हे पुरूरवः त्वं मा मृथाः । मृतिं मा प्राप्नुहि ॥ म्रियतेर्लुङि थासि ह्रस्वादंगादिति सिचो लोपः ॥ तथा मा प्र पप्तः । अद्यैव पतनं मा कार्षीः ॥ पतेर्लुङि ह्रदिस्त्वात्पुषादीत्यादिना च्लेरङ् । पतः पुमिति पुम् ॥ तथा त्वा त्वामग्निवासोऽग्निभा वृकासो वृका मा उ क्षन् । उ इत्येवकारार्थे । अक्षन् । माभ्यवहारयंतु । किमित्येवमस्मादुपर्यायमहं करोषि । मा कार्षीरित्यर्थः ॥ अदेर्लुङि लुङ्सनोर्घस्लृ । पा० २. ४. ३७. । इति घस्लादेशः । मंचे घसेति च्लेर्लुक् । गमहनेत्यादिनोपधालोपः । शासिवसीत्यादिना षत्वं । खरि चेति चर्त्वं । बाहुलकादडभावः ॥ अथ स्त्रैणेहस्त्रासारतामाह । स्त्रैणानि स्त्रीणां कृतानि सख्यानि न वै संति । न संति खलु । अभावे कारणमाह । एतानि सख्यानि सालावृकाणां हृदयानि यथा वत्सादीनां विश्वासापन्नानां घातुकानि तद्वत् । अत्र वाजसनेयकं । मैतदादृथा न वै स्त्रैणँ सख्यमस्ति पुनर्गृहानिहीति हैवैनं तदुवाच । शत० ११. ५. १. ९. । इति ॥ ॥३॥

यद्विरूपाचरं मर्त्येष्ववसं रात्रीः शरदश्चतस्रः ।
घृतस्य स्तोकं सकृदह्न आश्नां तादेवेदं तातृपाणा चरामि ॥१६॥

यत्। विऽरूपा। अचरं। मर्त्येषु। अवसं। रात्रीः। शरदः। चतस्रः।
घृतस्य। स्तोकं। सकृत्। अहः। आश्नां। तात्। एव। इदं। ततृपाणा। चरामि ॥१६॥

यद्यद्वा विरूपा मनुष्यसंपर्काद्विगतसहजभूतदेवरूपापत्त्यानुकूल्येन नानारूपा वा सत्यौ मनुष्येष्वचरं तदानीं रात्रीः पूरयित्रीश्चतस्रः शरदोऽवसं। न्यवसं ॥ अत्यंतसंयोगे द्वितीया ॥ तदानीं घृतस्य स्तोकं सकृदह्न आश्नां। तादेव तेनैव स्तोकेनाहमिदं संप्रति तातृपाणा तृप्ता सती चरामि ॥

अंतरिक्षप्रां रजसो विमानीमुप शिक्षाम्युर्वशीं वसिष्ठः।
उप त्वा रातिः सुकृतस्य तिष्ठान्नि वर्तस्व हृदयं तप्यते मे ॥१७॥
अंतरिक्षऽप्रां। रजसः। विऽमानीं। उप। शिक्षामि। उर्वशीं। वसिष्ठः।
उप। त्वा। रातिः। सुऽकृतस्य। तिष्ठात्। नि। वर्तस्व। हृदयं। तप्यते। मे ॥१७॥

अंतरिक्षप्रां स्वतेजसांतरिक्षस्य पूरयित्रीं तथा रजसो रंजकस्योदकस्य विमानीं निर्मात्रीमुर्वशीं वसिष्ठः समानानां मध्येऽतिशयेन वासयिताहमुप शिक्षामि। वशं नयामि। सुकृतस्य शोभनकर्मणो रातिर्दाता पुरूरवास्त्वा त्वामुप तिष्ठात्। उपतिष्ठतु। मे हृदयं तप्यते। अतो नि वर्तस्व। एवं राजोवाच ॥

इति त्वा देवा इम आहुरैळ यथेमेतद्भवसि मृत्युबंधुः।
प्रजा ते देवान्हविषा यजाति स्वर्ग उ त्वमपि मादयासे ॥१८॥
इति। त्वा। देवाः। इमे। आहुः। ऐळ। यथा। ईं। एतत्। भवसि। मृत्युऽबंधुः।
प्रऽजा। ते। देवान्। हविषा। यजाति। स्वःऽगे। ऊं इति। त्वं। अपि। मादयासे ॥१८॥

हे ऐळ पुरूरवः त्वा त्वामिमे देवा इत्याहुः। मृत्युबंधुर्मृत्योर्बंधको मृत्योर्बंधुभूतो वा मृत्युवशमप्राप्तुवंस्त्वं यथें यथैतद्भवसि भविष्यसि प्रजा प्रकर्षेण जायमानस्त्वं ते तव संबंधिनो यष्टव्यान्देवान्हविषा यजासि। यजसि। स्वर्ग उ स्वर्ग एव त्वमपि मादयासे। मादयसेऽस्माभिः सह। एवमाऽऽरित्यर्थः। यस्मादेवं करोषि तस्मादभिलाषं हित्वा सुखी भवेति सेयं पुरूरवसं प्रत्युवाच ॥ ॥४॥

अथ प्र ते महे इति चतुर्दशर्चं षष्ठं सूक्तं। बर्हणामांगिरस ऋषिः इंद्रस्य पुत्रः सर्वहरिर्वा नाम। द्वादशीचतुर्दश्यौ त्रिष्टुभौ शिष्टा एकादश जगत्यः। इंद्रस्त्वाग्नी हरी। तयोरत्र स्तूयमानत्वात्तद्देवताकमिदं। तथा चानुक्रांतं। प्र ते सप्तोना बर्हः सर्वहरिर्वैंद्रो हरिस्तुतिर्द्वित्रिष्टुबंतं ॥ अतिरात्रे तृतीये पर्यायेऽग्निष्टोमसंस्थे ब्राह्मणाच्छंसिन एतत्सूक्तं। सूचितं च। प्र ते महे जती शचीवसव वीर्येणेति याज्या। आ० ६. ४.। इति ॥ षोडशिशस्त्रेऽप्यायमृचः शंसनीयः। सूचितं च। प्र ते महे विदथे शंसिषं हरी इति तिस्रो जगत्यः। आ० ६. २.। इति ॥

प्र ते महे विदथे शंसिषं हरी प्र ते वन्वे वनुषो हर्यतं मदं।
घृतं न यो हरिभिश्चारु सेचत आ त्वा विशंतु हरिवर्पसं गिरः ॥१॥
प्र। ते। महे। विदथे। शंसिषं। हरी इति। प्र। ते। वन्वे। वनुषः। हर्यतं। मदं।
घृतं। न। यः। हरिऽभिः। चारु। सेचते। आ। त्वा। विशंतु। हरिऽवर्पसं। गिरः ॥१॥

हे इंद्र ते तव हरी अश्वौ महे महति विदथे यज्ञे प्र शंसिषं। अशंसिषं। अस्ताविषं। तथा वनुषः ॥ वनु हिंसायां ॥ हिंसकस्य ते तव हर्यतं ॥ हर्य गतिकांत्योः। तस्मौणादिकोऽतच्। चित्त्वरिछांतोदात्तः ॥ अमदीयं

मदं प्र वन्दे । प्रयाचेऽमदभिमतं ॥ वसु याचने ॥ य इंद्रो हरिभिर्हरितवर्णैरश्वैर्मध्यागं गत्वा याद् वरणीयं घृतं न घृतमिव सुपूतमुदकं सेचने वर्षति तं तादृशं हरिवर्पसं । वर्प इति रूपनाम । हरितरूपं त्वा त्वामा विशंतु गिरोऽमदीयाः स्तुतिवाचस्त्वद महाय ॥

हरिं हि योनिमभि ये समस्वरन्हिन्वंतो हरी दिव्यं यथा सदः ।
आ यं पृणंति हरिभिर्न धेनव इंद्राय शूषं हरिवंतमर्चत ॥२॥
हरिं । हि । योनिं । अभि । ये । सं३अस्वरन् । हिन्वंतः । हरी इति । दिव्यं । यथा । सदः ।
आ । यं । पृणंति । हरिऽभिः । न । धेनवः । इंद्राय । शूषं । हरिऽवंतं । अर्चत ॥२॥

ये पूर्वे स्तोतार ऋषयो योनिमिंद्रस्य स्थानभूतं हरिमश्वमभि समस्वरन् ॥ स्वृ शब्दोपतापयोः ॥ अभिसंस्तुवंति । किं कुर्वंतः । दिव्यं देवसंबंधि सदो यागगृहं यथा प्रेरयंतींद्रं तथा हरी अश्वौ हिन्वंतः प्रेरयंतः । सोमेऽभिषुते सति स्वयमेवेंद्रो रथेऽश्वौ प्रेरयति अतः स्तोतृणां हरिप्रेरणत्वं । यद्वा । दिव्यं सद इंद्रः प्राप्नुयाद्यथा तथा हरी स्तुतिभिर्हिन्वंतः प्रेरयंतः । यमिंद्रं धेनवो नवप्रसूतिका गावो यथा पृणंति क्षीरादिभिः । अत्र पुरस्तादुपचारोऽपि नकार उपमार्थीयः । हरिभिर्हरितवर्णैः सोमैरा पृणंति पूरयंति च । तथा यूयमपींद्रायेंद्रस्य हरिवंतं शूषं बलमर्चत । पूजयत हे स्तोतारः स्तुतिभिः ॥

सो अंस्य वज्रो हरितो य आयसो हरिर्निकामो हरिरा गभस्त्योः ।
द्युम्नी सुशिप्रो हरिमन्युसायक इंद्रे नि रूपा हरिता मिमिक्षिरे ॥३॥
सः । अस्य । वज्रः । हरितः । यः । आयसः । हरिः । निऽकामः । हरिः । आ । गभस्त्योः ।
द्युम्नी । सुऽशिप्रः । हरिमन्युऽसायकः । इंद्रे । नि । रूपा । हरिता । मिमिक्षिरे ॥३॥

असेंद्रस्य स वज्रो हरितो हरितवर्णो य आयसोऽयःसारभूतोऽस्ति निर्मितः । स च हरिर्हरितवर्णो वज्रो निकामो नितरां कमनीयः । स आ हंता शत्रूणां । तादृशो वज्रो गभस्त्योर्हस्तयोर्वर्तत इति शेषः । अथमिंद्रो द्युम्नी । द्युम्नं द्योतमानं धनं । तद्वान् सुशिप्रः शोभनहनुर्हरिमन्युसायकः । यस्य मन्युः सायकः शत्रुहंताभिगंता वा भवति । यद्वा । शत्रुहंता कोपः सायकश्च यस्य स तादृशो भवति । किं बहुना । इंद्रे रूपा रूपाणि हरिता हरितानि नि मिमिक्षिरे । निषिक्तानि बभूवुः ॥ मिहेः सर्गतात्कर्मणि लिटि रूपं ॥

दिवि न केतुरधि धायि हर्यतो विव्यचद्वज्रो हरितो न रंह्या ।
तुददहिं हरिशिप्रो य आयसः सहस्रशोका अभवद्धरिभ्यः ॥४॥
दिवि । न । केतुः । अधि । धायि । हर्यतः । विव्यचत् । वज्रः । हरितः । न । रंह्या ।
तुदत् । अहिं । हरिऽशिप्रः । यः । आयसः । सहस्रऽशोकाः । अभवत् । हरिऽभ्यः ॥४॥

दिवंतरिक्षे केतुः प्रकाशेन सर्वस्य प्रज्ञापक आदित्य इव स यथाधि निहितः एवमयमिंद्रोऽधि धायि । अधधायि । स्तोतृभिरधि निहितः । किंचेंद्रस्य वज्रो हर्यतः स्पृहणीयः सन् विव्यचत् । व्याप्नोति व्याप्नवं शत्रुसंघं । तत्र दृष्टांतः । हरितो न हरितवर्णा अश्वाहर्तारो वाश्वा आदित्यसंबंधिनः । ते यथा रंह्या रंहणीयेन वेगेन व्याप्नुवंति व्याप्नवं । योऽस्य वज्र आयसोऽयोविकारोऽहिं वृत्रं मेघं वा तुदत् हिनस्ति । योऽयं महानुभावो हरिशिप्रः सोमपानरभसेन हरितवर्णनासिकास्यहनुर्वा हरिभरो हर्योर्भर्तेंद्रः सहस्रशोका अभवत् ॥ शुच दीप्तौ ॥ अपरिमितदीप्तिर्भवति ॥

त्वंत्वमहर्यथा उपस्तुतः पूर्वेभिरिंद्र हरिकेश यज्वभिः ।
त्वं हर्यसि तव विश्वमुक्थ्य१मसामि राधो हरिजात हर्यतं ॥५॥
त्वंऽत्वं । अहर्यथाः । उपंऽस्तुतः । पूर्वेभिः । इंद्र । हरिऽकेश । यज्वऽभिः ।
त्वं । हर्यसि । तव । विश्वं । उक्थ्यं । असामि । राधः । हरिऽजात । हर्यतं ॥५॥

हे इंद्र हे हरिकेश हरितरोमवदश्व त्वंत्वं त्वमेव सर्वत्र यज्ञेऽहर्यथाः । अकामयथाः स्तोत्रं हविर्वा । कीदृशस्त्वं । पूर्वेभिः पूर्वतनैर्यज्वभिर्यज्ञमानैरुपस्तुतः सन् । हे हरिजात हरितवर्ण सन्प्रादुर्भूत हारकप्रादुर्भाव वा । शत्रुवधार्थं प्रादुर्भूतेत्यर्थः । हे तादृशेंद्र त्वं तव । स्वभूतमिति शेषः । विश्वं व्याप्तं सोमचरुपुरोडाशादिरूपं सर्वं वा । यद्वा । यच्च यानि यानि हवींषि दीयंते तत्सर्वं वा । तथोक्थ्यं प्रशस्यमसाम्यसाधारणमसमं श्रेष्ठं हर्यतं कांतं राधोऽन्नं हविर्लक्षणं हर्यसि । कामयसे ॥ ॥५॥

ता वज्रिणं मंदिनं स्तोम्यं मद इंद्रं रथे वहतो हर्यता हरी ।
पुरूण्यस्मै सवनानि हर्यत इंद्राय सोमा हरयो दधन्विरे ॥६॥
ता । वज्रिणं । मंदिनं । स्तोम्यं । मदे । इंद्रं । रथे । वहतः । हर्यता । हरी इति ।
पुरूणि । अस्मै । सवनानि । हर्यते । इंद्राय । सोमाः । हरयः । दधन्विरे ॥६॥

ता तौ प्रसिद्धौ हर्यता हर्यतौ गंतारौ कांतौ वा हरी हरितवर्णावश्वौ मंदिनं मोदमानं स्तोम्यं स्तुत्यं वज्रिणमिंद्रं मदे निमित्ते रथे वहतः । धारयतः । यज्ञमस्मदीयं प्रापयतः । अस्मै हर्यते कांतायेंद्राय पुरूणि बहूनि सवनानि प्रातरादीनि हरयो हरितवर्णाः सोमा दधन्विरे । निधीयंते ॥

अरं कामाय हरयो दधन्विरे स्थिराय हिन्वन्हरयो हरी तुरा ।
अर्वंच्चियों हरिभिर्जोषमीयते सो अस्य कामं हरिवंतमानशे ॥७॥
अरं । कामाय । हरयः । दधन्विरे । स्थिराय । हिन्वन् । हरयः । हरी इति । तुरा ।
अर्वंत्ऽभिः । यः । हरिऽभिः । जोषं । ईयते । सः । अस्य । कामं । हरिऽवंतं । आनशे ॥७॥

अरमलं पर्याप्तं कामायेंद्रकामनाय हरयो हरितवर्णाः सोमा दधन्विरे । ते च हरयः स्थिराय युद्धेऽपलायितायेंद्राय तुरा तुरौ त्वरमाणौ हरी अश्वौ हिन्वन् । प्रेरयंति । योऽर्वञ्चिररणकुशलैर्हरिभिरश्वैर्जोषं शूरैः सेव्यं संग्राममीयते गच्छति स रथोऽस्येंद्रस्य स्वभूतं कामं कमनीयं हरिवंतं सोमवंतं यज्ञमानशे । व्याप्नोति ॥

हरिश्मशारुर्हरिकेश आयसस्तुरस्येये यो हरिपा अवर्धत ।
अर्वंच्चियों हरिभिर्वाजिनीवसुरति विश्वा दुरिता पारिषद्भरी ॥८॥
हरिऽश्मशारुः । हरिऽकेशः । आयसः । तुरःऽपेयें । यः । हरिऽपाः । अवर्धत ।
अर्वंत्ऽभिः । यः । हरिऽभिः । वाजिनीऽवसुः । अति । विश्वा । दुःऽइता । पारिषत् ।
हरी इति ॥८॥

हरिश्मशारुर्हरितवर्णश्मश्रुर्हरिकेशो हरितवर्णकेश आयसोऽयोमयहृदयः । शत्रूणां घातक इत्यर्थः । एतादृशो य इंद्रस्तुरस्येये तूर्णं पातव्ये सोमे हरिपा हरितवर्णसोमपा अवर्धत वर्धते यश्चार्वञ्चिर्गंतृभिर्हरि-

भिरश्वैः सोमैर्वा वाजिनीवसुः । वाजिनमन्नं हविर्लक्षणं । तदस्या अस्तीति वाजिनी क्रिया । सैव वसु धनं यस्य स तथोक्तः । यज्ञधन इत्यर्थः । यद्वा । वाजिनमेव वाजिनी । तदेव धनं यस्य । स एवमुक्तलक्षण इंद्रो हरी रथे योजयित्वा विश्वा विश्वानि सर्वाणि दुरिताऽस्माकं दुरितानि पारिषत् । पारयतु ॥ पारयतेर्लेटि सिप्यडागमः ॥

सुवेव॒ यस्य॒ हरि॑णी विपे॒ततुः॒ शिप्रे॒ वाजा॑य॒ हरि॑णी॒ दवि॑ध्वतः ।
प्र यत्कृ॒ते च॑म॒से म॑र्मृ॒ज॒द्धरी॑ पी॒त्वा म॑द॒स्य॑ हर्य॒तस्यांध॑सः ॥९॥
सु॒वाऽइ॒व । यस्य॑ । हरि॑णी॒ इति॑ । वि॒ऽपे॒ततुः॑ । शिप्रे॒ इति॑ । वाजा॑य । हरि॑णी॒ इति॑ । दवि॑ध्वतः ।
प्र । यत् । कृ॒ते । च॒म॒से । म॒र्मृ॒जत् । हरी॒ इति॑ । पी॒त्वा । म॒द॒स्य॑ । हर्य॒तस्य॑ । अंध॑सः ॥९॥

यस्येंद्रस्य हरिणी हरितवर्णावश्वौ विपेततुः रथ इंद्रमारोप्य विपततो यज्ञमस्मदीयं । यद्वा । यस्य हरिणी हरितवर्णे कनीनिके विपेततुः सोमं प्रति विपततः । तत्र दृष्टांतः । सुवेव । यथा सुवा सुवौ हविषा पूर्णौ पात्रविशेषौ होमार्थं विपततः तद्वत् । तथा यस्य च हरिणी हरितवर्णे शिप्रे हनू वाजाय सोमलक्षणान्नाय दविध्वतः कंपयतः पुरतः प्रत्तस्य सोमस्य प्रीत्या चलतः । तथा यद्यदा कृते संस्कृते चमसे वर्तमानं मदस्य मदकरं हर्यतस्य कांतमंधसोऽन्नं सोमं पीत्वा हरी अश्वौ प्र मर्मृजत् प्रमार्ष्टि । तदानीं स्तुत इत्यर्थः ॥

उ॒त स्म॒ सद्म॑ हर्य॒तस्य॑ पस्त्यो॑३॑रत्यो॒ न वाज॑ं हरि॒वाँ॑ अचिक्रदत् ।
म॒ही चि॒द्धि धि॒षणा॑हर्य॒दोज॑सा बृ॒हद्वयो॑ दधिषे हर्य॒तश्चि॒दा ॥१०॥
उ॒त । स्म॒ । सद्म॑ । हर्य॒तस्य॑ । पस्त्योः॑ । अत्यः॑ । न । वाज॑ं । हरि॑ऽवान् । अचिक्रदत् ।
म॒ही । चि॒त् । हि । धि॒षणा॑ । अहर्यत् । ओज॑सा । बृ॒हत् । वयः॑ । द॒धि॒षे॒ । हर्य॒तः॑ ।
चि॒त् । आ ॥१०॥

उतापि च हर्यतस्य कमनीयस्येंद्रस्य सद्म सदनं पस्त्योर्द्यावापृथिव्योः संबंधि । सोऽयमत्यो नाश्व इव वाजं संग्रामं हरिवानश्ववानधिक्रदत् । गच्छति । तथा हि यस्मात्ते इंद्र त्वां मही महती धिषणा स्तुतिरोजसा बलेन युक्तमिंद्रमहर्यत् कामयते । चिदिति पूरणः । अतो वाजमचिक्रदत् । तथा सति हर्यतः कामयमानस्य यजमानस्य बृहद्महद्वयोऽन्नमा दधिषे । धारयसि । आप्रयच्छसि । चिदिति पूरणः ॥ ॥६॥

आ रोद॑सी॒ हर्य॑माणो महि॒त्वा नव्यं॑नव्यं हर्यसि॒ मन्म॒ नु प्रि॒यं ।
प्र प॒स्त्य॑मसुर हर्य॒तं गोरावि॒ष्कृ॑धि॒ हर॑ये॒ सूर्या॑य ॥११॥
आ । रोद॑सी॒ इति॑ । हर्य॑माणः । म॒हि॒ऽत्वा । नव्यं॑ऽनव्यं । हर्यसि॒ । मन्म॑ । नु । प्रि॒यं ।
प्र । प॒स्त्य॑म् । असु॑र । हर्य॒तं । गोः । आ॒विः । कृ॒धि॒ । हर॑ये । सूर्या॑य ॥११॥

हे इंद्र हर्यमाणः कामयमानो महित्वा महत्त्वेन रोदसी द्यावापृथिव्यावा । पूरयसीति शेषः । तथा नव्यंनव्यं नवतरं प्रियं प्रियकरं मम मननीयं स्तोत्रं नु क्षिप्रं हर्यसि । कामयसे । हे असुर बलवन् । असुः प्राणः । तद्वत् ॥ मत्वर्थीयो रः ॥ तादृशेंद्र गोः । आत्मीयवचनं । गवां हर्यतं स्पृहणीयं पस्त्यं गृहं गोशब्दवाच्यो-क्तगुणकं स्थानं वा हरय उद्वक्षश्च हर्यं सूर्याय प्र प्रकर्षेणाविष्कृधि । प्रकटीकुरु ॥

आ त्वा हर्यंतं प्रयुजो जनानां रथे वहंतु हरिशिप्रमिंद्र ।
पिबा यथा प्रतिभृतस्य मध्वो हर्यन्यज्ञं सधमादे दशोणिं ॥१२॥
आ । त्वा । हर्यंतं । प्रऽयुजः । जनानां । रथे । वहंतु । हरिऽशिप्रं । इंद्र ।
पिब । यथा । प्रतिऽभृतस्य । मध्वः । हर्यन् । यज्ञं । सधऽमादे । दशऽओणिं ॥१२॥

हे इंद्र हरिशिप्रं हरितवर्णशिप्रं त्वा त्वां हर्यंतं यज्ञं कामयमानं प्रयुजो रथे प्रयुक्ता अश्वा रथे स्थापयित्वा जनानामृत्विग्यजमानानामंतिकं वहंतु । प्रापयंतु । प्रवहंति । यथा येन प्रकारेण प्रतिभृतस्य ग्रहादिषु संभृतं मध्वो मधु सोमरसं यज्ञं यागसाधनं दशोणिं । ओणयोऽंगुलयः । दशभिरंगुलिभिः संपादितं सोमं हर्यन् कामयमानः सन् पिब पिबसि सधमादे संग्रामे जयार्थं तथावहंत्वित्यर्थः ॥

अपाः पूर्वेषामित्येषा षोडशिशस्त्रस्य याज्या । सूचितं च । एवा हि शक्रो वशी हि शक्र इति जपित्वापाः पूर्वेषां हरिवः सुतानामिति यजति । आ० ६. २. । इति ॥

अपाः पूर्वेषां हरिवः सुतानामथो इदं सवनं केवलं ते ।
ममद्धि सोमं मधुमंतमिंद्र सचा वृषञ्जठर आ वृषस्व ॥१३॥
अपाः । पूर्वेषां । हरिऽवः । सुतानां । अथो इति । इदं । सवनं । केवलं । ते ।
ममद्धि । सोमं । मधुऽमंतं । इंद्र । सचा । वृषन् । जठरे । आ । वृषस्व ॥१३॥

हे इंद्र सुतानामभिषुतानां पूर्वेषां प्रातःसवनसंपादितानां । कर्मणि षष्ठ्यावेते । अभिषुतान्प्रातःसवनिकान्सोमानित्यर्थः । तानपाः । अपिबः । हे हरिव हरीतींद्रसंबोधनं । हरिभ्यामश्वाभ्यां तद्वन् । यद्वा । ऋक्सामाभ्यां हरिभ्यां युक्त । ऋक्सामे वा इंद्रस्य हरी । ऐ० ब्रा० २. २४. तै० सं० ६. ५. ९. २. । ताभ्यामेष हरतीति ब्राह्मणं । अथो अपि चेदं माध्यंदिनं सवनं केवलं ते तवैवासाधारणं । माध्यंदिनं सवनं केवलं ते । ऋ० ४. ३५. ७. । इति हि मंत्रांतरं । तस्मिन्सवने हे इंद्र मधुमंतं माधुर्योपेतं सोमं ममद्धि । पिब । आस्वादयेत्यर्थः । मदिरश्चास्वादनकर्मा । पिबंतु मदंतु वियंत्विति च मंत्रः । सचा वृषन् । सचाशब्दो भूयिष्ठवचनः । हे भूयिष्ठ वर्षितरिंद्र जठर आ वृषस्व । आसिंचस्व ॥ ॥७॥

या ओषधीरिति चयोविंशत्यृचं सप्तमं सूक्तं । अथर्वणः पुत्रस्य भिषगाख्य ऋषिः । आनुष्टुभमोषधिदेवताकं । तथा चानुक्रांतं । या ओषधीस्त्र्यधिकाथर्वणो भिषगोषधिसुतिरानुष्टुभमिति ॥ दीक्षितानां ज्वरायुपसंतापे संजातेऽनेन सूक्तेन मार्जयेत् । सूचितं च । ओषधिसूक्तेन चाज्याद्यानुमृज्येत् । आ० ६. ९. । इति ॥

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।
मनै नु बभ्रूणामहं शतं धामानि सप्त च ॥१॥
याः । ओषधीः । पूर्वाः । जाताः । देवेभ्यः । त्रिऽयुगं । पुरा ।
मनै । नु । बभ्रूणां । अहं । शतं । धामानि । सप्त । च ॥१॥

या ओषधयः पूर्वाः पुरातन्यो जाता उत्पन्नाः । केभ्यः सकाशात् । देवेभ्यो जगन्निर्मातृभ्यः । यद्वा । देवा द्योतमाना ऋतवः । तेभ्यः । कस्मिन्काले । त्रियुगं त्रिषु युगेषु विशेषेण प्रादुर्भावयोग्यया कृतादियुगत्रययुक्तं कलौ स्वल्पंताल्पत्वादुपेक्षितं । अथवा त्रिषु युगेषु वसंते प्रावृषि शरदि चेत्यर्थः । अहं बभ्रूणां बभ्रुवर्णानां सोमाद्योषधीनां शतं सप्त च धामान्यनुलेपमार्जनाभिषेकादिरूपेणाश्रयभूतानि स्थानानि नु क्षिप्रं मनै । मन्वै । संभावयामीत्यर्थः । अत्र वाक्यशेषोयं । या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरेत्यृतवो वै देवास्तेभ्य एतास्त्रिः पुरा जायंते वसंते प्रावृषि शरदि मनै नु बभ्रूणामहमिति सोमो वै बभ्रुः सोम्या ओषधय ओषधयः

पुरुषः शतं धामानीति यदिदँ शतायुः शतार्धः शतवीर्य एतानि हास्य तानि शतं धामानि सप्त चेति य एवेमे सप्त शीर्षन्प्राणास्तानेतदाह । शत० ७. २. ४. २६. । इति । अथ निघण्टवः च । या ओषधयः पूर्वा जाता देवेभ्यस्त्रीणि युगानि पुरा मन्ये नु तद्बभ्रूणामहं बभ्रुवर्णानां भरणानामिति वा शतं धामानि सप्त चेति । धामानि यथाणि भवंति स्थानानि नामानि जन्मानीति । अन्यान्यचाभिप्रेतानि सप्तशतानि सप्तशतं पुरुषस्य मर्मणां तेष्वेना दधति । नि० ९. २८. । इति ॥

शतं वो अंब धामानि सहस्रमुत वो रुहः । अधा शतक्रत्वो यूयमिमं मे अगदं कृत ॥२॥
शतं । वः । अंब । धामानि । सहस्रं । उत । वः । रुहः । अध । शतऽक्रत्वः । यूयं । इमं ।
मे । अगदं । कृत ॥२॥

हे अंब मातर ओषधयः वो युष्माकं धामानि स्थानानि जन्मानि वा शतमपरिमितानि । उतापि च वो युष्माकं रुहः प्ररोहः प्रोन्नमः सहस्रमपरिमितः । अधापि च हे शतक्रत्वः शतकर्माणः यूयमिमं मे मां मदीयं वा जनमामयग्रस्तमगदं । गदो रोगः । तद्रहितं कृत । कुरुत ॥

ओषधीः प्रति मोदध्वं पुष्पवतीः प्रसूवरीः ।
अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥३॥
ओषधीः । प्रति । मोदध्वं । पुष्पऽवतीः । प्रऽसूवरीः ।
अश्वाःऽइव । सऽजित्वरीः । वीरुधः । पारयिष्णवः ॥३॥

हे ओषधीरोषधयः प्रति मोदध्वं । इमं रुग्णं प्रति मुदिता हृष्टा भवत । कीदृश्यो यूयं । पुष्पवतीः पुष्पवत्यः प्रसूवरीः । प्रकर्षेण सूयंत उपभोगायेति प्रसवाः फलानि । तद्वत्यः किंचाश्वा इवाशुवाना हया इव सजित्वरीः सह रोगं जयंत्यः वीरुधो विरोहंत्यः पारयिष्णवो रुग्णं पुरुषं पारयंत्यो रोगात् ॥

ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे । सनेयमश्वं गां वासं आत्मानं तव पूरुष ॥४॥
ओषधीः । इति । मातरः । तत् । वः । देवीः । उप । ब्रुवे । सनेयं । अश्वं । गां । वासः ।
आत्मानं । तव । पुरुष ॥४॥

हे ओषधीरोषधयो देवीर्देव्यो द्योतनादिगुणका हे मातरो जनानां मातृभूताः । मातृवद्धितकारित्वान्मातृत्वोपचारः । अथवा मातर आरोग्यनिर्माञ्यः वो युष्माकं संबंधिनं भिषजं तद्वक्ष्यमाणमितीत्यर्थः उप ब्रुवे । उपब्रवीमि । किं तदिति चेत् उच्यते । ओषधार्थमहमश्वं गां वासोऽन्नं किं बहुनात्मानमपि हे पुरुष चिकित्सक तव तुभ्यं सनेयं । ददामि ॥

अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ।
गोभाज इत्किलासथ यत्सनवथ पूरुषं ॥५॥
अश्वत्थे । वः । निऽसदनं । पर्णे । वः । वसतिः । कृता ।
गोऽभाजः । इत् । किल । असथ । यत् । सनवथ । पुरुषं ॥५॥

हे ओषधिदेवताः वो युष्माकमश्वत्थे निषदनं नितरां वर्तनं । तथा वो युष्माकं पर्णे पलाशे वसतिर्निवासः कृता । तृतीयस्थानमितो दिवि सोम आसीत्तं गायत्र्याहरत्तस्य पर्णमच्छिनत तत्पर्णोऽभवत् तत्पर्णस्य पर्णत्व-

मिति । तै० ब्रा० १. १. ३. १०. । ब्राह्मणात्पलाशस्य पर्णत्वप्रसिद्धिः । अश्वत्थपलाशयोर्यज्ञयोग्यत्वप्राधान्यापेक्षयोपादानं । किंच गोभाज इत्किल गवां भाजयित्र्य एवासथ । भवथ खलु । यद्यदि सनवथ संभजध्वे पुरुषं तन्नोपि भवथेति ॥ वन षण संभक्तौ । लेट्यडागमः । व्यत्ययेनोप्रत्ययः । यद्वा । औत्सर्गिकः शश्चेति द्विर्विकरणता ॥ ॥८॥

यच्चौषधीः समग्मत राजानः समितावि व ।
विप्रः स उच्यते भिषग्रक्षोहामीवचातनः ॥६॥
यच्च । ओषधीः । सं३अग्मत । राजानः । समितौ३इव ।
विप्रः । सः । उच्यते । भिषक् । रक्षः३हा । अमीव३चातनः ॥६॥

यच्च यस्मिन्देशे ओषधीरोषधयः समग्मत संगच्छंते । राजानः समितावि संग्रामे यथा संगता भवंति तद्वत् । तासां नानाविधानामोषधीनां संगमनं यस्मिन्देशेऽस्ति तत्र विप्रः प्राज्ञो ब्राह्मणो भिषगुच्यते रक्षोहा रक्षोहंता । अमीवचातनः । अमीवा व्याधिः । तस्य चातनस्यातयिता नाशयिता च भवति तदानीं ॥

अश्वावतीं सोमावतीमूर्जयंतीमुदोजसं ।
आविवित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥७॥
अश्व३वतीं । सोम३वतीं । ऊर्जयंतीं । उत्३ओजसं ।
आ । अविवित्सि । सर्वीः । ओषधीः । अस्मै । अरिष्ट३तातये ॥७॥

अश्वावत्यादयः प्रधानभूता ओषधयश्चतस्रः । ताः सर्वा ओषधीराविवित्सि । आजानि । सौमीत्यर्थः । अस्मा अरिष्टतातये । अमुं रोगं विनाशयितुमित्यर्थः ॥

उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते । धनं सनिष्यंतीनामात्मानं तव पूरुष ॥८॥
उत् । शुष्माः । ओषधीनां । गावः । गोस्थात्३इव । ईरते । धनं । सनिष्यंतीनां ।
आत्मानं । तव । पुरुष ॥८॥

ओषधीनां शुष्मा बलान्युदीरते । उन्नच्छंति । स्वगो स्वकीयं प्रोन्नमयंतीत्यर्थः । गावो गोष्ठादिव । ता यथा ततः सकाशादुदीरते तद्वत् । कीदृशीनामोषधीनां । उच्यते । धनं स्वसामर्थ्यलक्षणं सनिष्यंतीनां दातुमिच्छंतीनां । किं प्रतीति उच्यते । पुरुष पुरुष रोगग्रस्त तवात्मानं शरीरं प्रति । यद्वा । प्ररोहंतीरोषधीर्दृष्ट्वा वदति । हे पुरुष प्रियंग्वाद्योषधिस्वामिन् तवात्मानं वर्धयितुं धनं सनिष्यंतीनां व्रीह्याद्योषधीनां शुष्मा उदीरते ॥

इष्कृतिर्नाम वो माताथो यूयं स्थ निष्कृतीः ।
सीराः पतत्रिणीः स्थन यदामयति निष्कृथ ॥९॥
इष्कृतिः । नाम । वः । माता । अथो इति । यूयं । स्थ । निः३कृतीः ।
सीराः । पतत्रिणीः । स्थन । यत् । आमयति । निः । कृथ ॥९॥

हे ओषधयः वो माता जननीष्कृतिर्नाम । सर्वेषां व्रणानां निष्कर्त्रीति प्रसिद्धा यस्मात्सा व्रणं निष्करोति । अथातो यूयमपि निष्कृतीर्निष्कृतयः स्थ । भवथ । किंच यूयं सीराः सरणशीलाः पतत्रिणीः पतनवत्यश्च स्थन । भवथ ॥ तप्तनविति तलादेशः ॥ किंच पुरुषो यद्यदामयति व्याधितो भवति तं निष्कृथ । संस्कुरुथ ॥

अति विश्वाः परिष्ठाः स्तेन इव व्रजमक्रमुः ।
ओषधीः प्राचुच्यवुर्यत्किं च तन्वोऽ३ रपः ॥१०॥
अति । विश्वाः । परिऽस्थाः । स्तेनःऽइव । व्रजं । अक्रमुः ।
ओषधीः । प्र । अचुच्यवुः । यत् । किं । च । तन्वः । रपः ॥१०॥

विश्वा व्याप्ताः परिष्ठाः परितः स्थिता ओषधयोऽत्यक्रमुः । व्याधीनतिक्रांतवत्यः । स्तेन इव व्रजं । यथा स्तेनो व्रजमत्यक्रमीत् तद्वत् । तथा क्रत्वौषधीरोषधयः प्राचुच्यवुः प्रच्यावयंति यत्किं च तन्वो रुग्णशरीरस्य रपः पापं व्याधिलक्षणमस्ति तदिति ॥ ॥९॥

यदिमा वाजयन्नहमोषधीर्हस्त आदधे ।
आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥११॥
यत् । इमाः । वाजयन् । अहं । ओषधीः । हस्ते । आऽदधे ।
आत्मा । यक्ष्मस्य । नश्यति । पुरा । जीवऽगृभः । यथा ॥११॥

अहं यद्यदीमा ओषधीर्हस्त आदधे आधारयामि । किं कुर्वन् । वाजयन् रुग्णं बलिनं कुर्वन् । ततः पुरा यक्ष्मस्य रोगस्यात्मा नश्यति नष्टो भवति जीवगृभो यथा । जीवानां शकुनादीनां ग्राहकाद्व्याधादथा जीवा नश्यंति तद्वत् । यद्वा । जीवगृभो मृत्योः सकाशाज्जीवोऽपह्रियते । तद्वत् ॥

यस्यौषधीः प्रसर्पथांगमंगं परुष्परुः । ततो यक्ष्मं वि बाधध्व उग्रो मध्यमशीरिव ॥१२॥
यस्य । ओषधीः । प्रऽसर्पथ । अंगंऽअंगं । परुःऽपरुः । ततः । यक्ष्मं । वि । बाधध्वे ।
उग्रः । मध्यमशीःऽइव ॥१२॥

हे ओषधीरोषधयः यस्य रुग्णस्यांगमंगं यद्यदंगं परुःपरुर्यद्यत्पर्व प्रसर्पथ प्रकर्षेणाश्रयथ ततोऽंगात्पर्वणश्च यक्ष्मं व्याधिं वि बाधध्वे । उग्र उद्गूर्णबलो मध्यमशीर्मध्यमस्थाने वर्तमानो राजा यथोपद्रवकारिणः समनंतरं शत्रूनुपदेपदे विबाधते तद्वत् ॥

साकं यक्ष्म प्र पत चाषेण किकिदीविना ।
साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥१३॥
साकं । यक्ष्म । प्र । पत । चाषेण । किकिदीविना ।
साकं । वातस्य । ध्राज्या । साकं । नश्य । निऽहाकया ॥१३॥

हे अस्मदीयस्य पुरुषस्य शरीराधिष्ठायिन्यक्ष्म व्याधे त्वं साकं सहैव प्र पत । प्रकर्षेण शीघ्रं गच्छ । केन साकमिति उच्यते । चाषेणातिशीघ्रं पतता चाषाख्येन पक्षिणा सह । तथा किकिदीविना पक्षिणा च सह । तथा वातस्य शीघ्रं गच्छतो वायोर्ध्राज्या ॥ ध्रज गतौ ॥ गतिवेगेन सह गच्छ । तथा निहाकया गोधिकया साकं नश्य । नाशं प्राप्नुहि ॥

अन्या वो अन्यामवत्वन्यान्यस्या उपावत ।
ताः सर्वाः संविदाना इदं मे प्रावता वचः ॥१४॥

अन्या । वः । अन्यां । अवतु । अन्या । अन्यस्याः । उपं । अवत ।
ताः । सर्वाः । संऽविदानाः । इदं । मे । प्र । अवत । वचः ॥१४॥

हे ओषधयः वो युष्माकं मध्येऽन्यौषधिरन्यामोषधिमवतु । प्राप्नोतु । अवतिरत्र गत्यर्थः । तस्मान्मामवत । उपगच्छत । एवं याः संति ताभ्यामोषधयः ताः सर्वाः संविदानाः परस्परमैकमत्यं प्राप्ताः सत्य इदं मे मदीयं वचः प्रार्थनालक्षणं वचनं प्रावत । प्ररक्षत ॥

याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुंचंत्वंहसः ॥१५॥
याः । फलिनीः । याः । अफलाः । अपुष्पाः । याः । च । पुष्पिणीः ।
बृहस्पतिऽप्रसूताः । ताः । नः । मुंचंतु । अंहसः ॥१५॥

याः फलिनीः फलवत्यो या अफलाः फलवर्जिता या अपुष्पाः पुष्परहिता याश्च पुष्पिणीः पुष्पवत्यो बृहस्पतिप्रसूताः । बृहस्पतिर्मेघाभिमानी देवः । तेनानुज्ञाताः । ता नोऽस्मानंहसो मुंचंतु । मोचयंतु ॥ ॥१०॥

मुंचंतु मा शपथ्या३दथो वरुण्यादुत ।
अथो यमस्य पड्वीशात्सर्वस्माद्देवकिल्बिषात् ॥१६॥
मुंचंतु । मा । शपथ्यात् । अथो इति । वरुण्यात् । उत ।
अथो इति । यमस्य । पड्वीशात् । सर्वस्मात् । देवऽकिल्बिषात् ॥१६॥

मा मामोषधयः शपथ्याच्छपथसंजातादेनसः सकाशान्मुंचंतु । अथो अपि च वरुण्याद्वरुणसंभवान्मां मुंचंतु । वरुणोऽपि स्वपाशेन जातमात्रं पुरुषं बध्नाति । उतेति पूरणः । अथो अपि च यमस्य पड्वीशात्पादबंधनान्निगडान्मुंचंतु । न केवलं वरुणादेः पापात् किंतु सर्वस्माद्देवैः कृतात्पापान्मुंचंतु ॥

अवपतंतीरवदन्दिव ओषधयस्परि । यं जीवमश्नवामहै न स रिष्याति पूरुषः ॥१७॥
अवऽपतंतीः । अवदन् । दिवः । ओषधयः । परि । यं । जीवं । अश्नवामहै । न ।
सः । रिष्याति । पुरुषः ॥१७॥

दिवो द्युलोकादवपतंतीरवपतंत्य ओषधय इत्यं पर्यवदन् । किमिति उच्यते । यं जीवं जीवंतमश्नवामहै व्याप्नुमो न स पुरुषः पुरुषो रिष्याति । रिष्यति । विनश्यति ॥

या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः ।
तासां त्वमस्युत्तमारं कामाय शं हृदे ॥१८॥
याः । ओषधीः । सोमऽराज्ञीः । बह्वीः । शतऽविचक्षणाः ।
तासां । त्वं । असि । उत्ऽतमा । अरं । कामाय । शं । हृदे ॥१८॥

या ओषधीरोषधयः सोमराज्ञीः सोमो राजा स्वामी यासां तास्तथोक्ता बह्वीरसंख्याताः शतविचक्षणा बहुदर्शना हे सोमाख्य ओषधे तासामोषधीनां त्वमुत्तमासि । यस्मादेवं तस्मादरमलमत्यर्थं कामाय कांताय हृदे हृदयाय शं सुखकरी भवेति शेषः ॥

या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु ।
बृहस्पतिप्रसूता अस्यै सं दत्त वीर्यं ॥१९॥
याः । ओषधीः । सोमऽराज्ञीः । विऽस्थिताः । पृथिवीं । अनु ।
बृहस्पतिऽप्रसूताः । अस्यै । सं । दत्त । वीर्यं ॥१९॥

या ओषधीरोषधयः सोमराज्ञीः पृथिवीमनु विष्ठिता विविधं स्थिताः दिवः सकाशादागत्य पृथिव्यां नानाभेदेन स्थिताः बृहस्पतिप्रसूता बृहस्पतिनानुज्ञाताः सत्यो यूयमस्यै रुग्णतन्वे वीर्यं सं दत्त । संधत्त ॥

मा वो रिषत्खनिता यस्मै चाहं खनामि वः ।
द्विपच्चतुष्पदस्माकं सर्वमस्त्वनातुरं ॥२०॥
मा । वः । रिषत् । खनिता । यस्मै । च । अहं । खनामि । वः ।
द्विऽपत् । चतुःऽपत् । अस्माकं । सर्वं । अस्तु । अनातुरं ॥२०॥

हे ओषधयः वो युष्माकं रिषत् । मा हिंस्यात् । कः । खनिता भूमेः खननकर्ता । यस्मै रुग्णाय चाहं खनामि वो युष्मान् । किंचास्माकं संबंधि द्विपत् पुत्रभृत्यादिकं चतुष्पन्नोमहिष्यादिकं च यदस्ति तत्सर्वमनातुरमरोगमस्तु ॥

याश्चेदमुपशृण्वंति याश्च दूरं परागताः । सर्वाः संगत्य वीरुधोऽस्यै सं दत्त वीर्यं ॥२१॥
याः । च । इदं । उपऽशृण्वंति । याः । च । दूरं । पराऽगताः । सर्वाः । संऽगत्य । वीरुधः ।
अस्यै । सं । दत्त । वीर्यं ॥२१॥

याश्चौषधय इदं स्रोत्रमुपशृण्वंति याश्चौषधयो दूरं परागताः सर्वा वीरुधः संगत्य संगताः सत्यो हे वीरुधः अस्यै रुग्णतन्वे वीर्यं सं दत्त ॥

ओषधयः सं वदंते सोमेन सह राज्ञा ।
यस्मै कृणोति ब्राह्मणस्तं राजन्पारयामसि ॥२२॥
ओषधयः । सं । वदंते । सोमेन । सह । राज्ञा ।
यस्मै । कृणोति । ब्राह्मणः । तं । राजन् । पारयामसि ॥२२॥

ओषधयः सर्वाः सोमेन राज्ञा सह सं वदंते । संवादं कुर्वंति । किमिति उच्यते । यस्मै रुग्णाय ब्राह्मण ओषधिसामर्थ्यज्ञो ब्राह्मणो वैद्यः कृणोति करोति चिकित्सां तं रुग्णं हे राजन् पारयामसि । पारयामः ॥ रदंतो मसिः ॥

त्वमुत्तमास्योषधे तव वृक्षा उपस्तयः ।
उपस्तिरस्तु सोऽस्माकं यो अस्माँ अभिदासति ॥२३॥
त्वं । उत्ऽतमा । असि । ओषधे । तव । वृक्षाः । उपस्तयः ।
उपस्तिः । अस्तु । सः । अस्माकं । यः । अस्मान् । अभिऽदासति ॥२३॥

हे ओषधे सोमाख्ये त्वमोषधीनामन्यासामुत्तमासि । तव वृषाः सर्व उपस्थयः । अधःशायिन एव । तथा सति स उपस्थिरस्तु अधःशायी भवतु योऽस्मानभिदासति हिनस्ति । भ्रातृव्य इति ॥ ॥ ११ ॥

बृहस्पते प्रतीति द्वादशर्चमष्टमं सूक्तं त्रैष्टुभं बृहस्पतिमिचादिसर्वदेवताकं । ऋष्टिषेणपुत्रो देवापिर्ऋषिः । तथा चानुक्रांतं । बृहस्पते द्वादशार्ष्टिषेणो देवापिर्वृष्टिकामो देवांस्तुष्टाव ॥ गतः सूक्तविनियोगः ॥ अस्य सूक्तस्याख्यानं निरुक्तकारः प्रदर्शयति । देवापिश्चार्ष्टिषेणः शंतनुश्च कौरव्यौ भ्रातरौ बभूवतुः । स शंतनुः कनीयानभिषेचयांचक्रे देवापिस्तपः प्रतिपेदे । ततः शंतनो राज्ये द्वादश वर्षाणि देवो न ववर्ष । तमूचुर्ब्राह्मणा अधर्मस्त्वया चरितो ज्येष्ठं भ्रातरमंतरित्याभिषेचितं तस्मात्ते देवो न वर्षतीति । स शंतनुर्देवापिं शिशिचे राज्येन । तमुवाच देवापिः पुरोहितस्तेऽसानि याजयानि च त्वेति । तस्यैतद्वर्षकामसूक्तं । नि० २. १०. । इति ॥

बृहस्पते प्रति मे देवतामिहि मित्रो वा यद्वरुणो वासि पूषा ।
आदित्यैर्वा यद्वसुभिर्मरुत्वान्त्स पर्जन्यं शंतनवे वृषाय ॥ १ ॥
बृहस्पते । प्रति । मे । देवताम् । इहि । मित्रः । वा । यत् । वरुणः । वा । असि । पूषा ।
आदित्यैः । वा । यत् । वसुऽभिः । मरुत्वान् । सः । पर्जन्यं । शंऽतनवे । वृषय ॥ १ ॥

तव ब्रह्मत्वे प्रवृत्तो बृहस्पतिमनुधावति । हे बृहस्पते मे मम वृष्ट्यर्थं प्रति देवतां प्रतीहि । प्रतिगच्छ । यष्टव्या देवताः प्रतिगच्छ । यदि त्वं मित्रो वासि अथवा वरुणोऽसि यद्वा पूषासि अथवादित्यैर्द्वादशादित्यैरुणादिभिर्वसुभिर्वासकैरष्टवसुभिर्धरध्रुवादिभिः सह मरुत्वान् । मरुतो देवाः । तद्वानसि । स त्वं पर्जन्यं तर्पयितारं मेघं शंतनवे राज्ञे वृषाय । वर्षय ॥ छंदसि शायजपीति व्यत्ययेन शपोऽपि शायजादेशः ॥

आ देवो दूतो अजिरश्चिकित्वान्त्वद्देवापे अभि मामगच्छत् ।
प्रतीचीनः प्रति मामा ववृत्स्व दधामि ते द्युमतीं वाचमासन् ॥ २ ॥
आ । देवः । दूतः । अजिरः । चिकित्वान् । त्वत् । देवऽआपे । अभि । मां । अगच्छत् ।
प्रतीचीनः । प्रति । मां । आ । ववृत्स्व । दधामि । ते । द्युऽमतीं । वाचं । आसन् ॥ २ ॥

देवः कश्चिद्दूतोऽजिरो गमनशीलश्चिकित्वांश्चेतनावान् हे देवापे त्वत् त्वत्तः सकाशात्त्वया प्रेषितः सन् मामभ्यागच्छत् । अभ्यागच्छतु । हे बृहस्पते प्रतीचीनोऽस्मदभिमुखो मां प्रत्या ववृत्स्व । मां प्रत्यागच्छ । ते तुभ्यं त्वदर्थं द्युमतीं दीप्तियुक्तां वाचं स्तुतिरूपां दधाम्यासन्नास्येऽस्मदीये ॥

अस्मे धेहि द्युमतीं वाचमासन्बृहस्पते अनमीवामिषिरां ।
यया वृष्टिं शंतनवे वनाव दिवो ष्टुप्सो मधुमाँ आ विवेश ॥ ३ ॥
अस्मे इति । धेहि । द्युऽमतीं । वाचं । आसन् । बृहस्पते । अनमीवां । इषिरां ।
यया । वृष्टिं । शंऽतनवे । वनाव । दिवः । ष्टुप्सः । मधुऽमान् । आ । विवेश ॥ ३ ॥

हे बृहस्पते त्वमस्मे अस्मासु द्युमतीं दीप्तिमतीं वाचं स्तोत्रात्मिकामासन्नास्येऽस्मदीये धेहि । स्थापय । कीदृशीं वाचं । अनमीवाममीवारहितां । वाचोऽमीवा नाम गद्गदादिदोषः । तथेषिरां गमनशीलां । यया वाचा स्तुत्यात्मिकया देवानिष्ट्वा शंतनवे वृष्टिकामाय वनाव संभजेवहि वृष्टिं त्वं चाहं च दिवो द्युलोकात् । त्वयाधिष्ठितो द्रप्स उदकस्यंदो मधुमान् माधुर्योपेत आ विवेश । आविशति वाचमिति समन्वयः ॥

आ नो॑ दृ॒प्सा मधु॑मंतो विशंत्विंद्र॑ देव्यधि॒रथं॑ स॒हस्रं॑ ।
नि षी॑द होत॒र्मनु॑षा॒ यज॑स्व दे॒वान्दे॒वापे ह॒विषा॑ सपर्य ॥४॥
आ । नः॒ । दृ॒प्साः । मधु॑ऽमंतः । वि॒श॒न्तु॒ । इंद्र॑ । दे॒हि॒ । अधि॑ऽरथं । स॒हस्रं॑ ।
नि । सी॒द॒ । होत॑र् । मनु॑षा । यज॑स्व । दे॒वान् । दे॒व॒ऽआ॒पे॒ । ह॒विषा॑ । स॒प॒र्य॒ ॥४॥

नोऽस्मान्दृप्सा वृष्टिसंस्थाया मधुमंतो माधुर्योपेता आ विशंतु । हे इंद्र परमेश्वर बृहस्पते अधिरथं रथस्याधुपरि वर्तमानं सहस्रं सहस्रसंख्याकं धनं देहि । धेहि । यद्वा । रथमधिकं यस्य सहस्रस्य तादृग्गं गोसहस्रं । हे देवापे नि षीद होत्रं । आर्त्विज्ये निषीद । निषण्णश्च त्वमृतुथा काले काले यजस्व यष्ट्वान्देवान् स्तुत्वा हविषा च सपर्य । परिचर ॥

आ॒र्ष्टि॒षे॒णो होत्र॒मृषि॑र्नि॒षीद॑न्दे॒वापि॑र्दे॒वसु॑मतिं चिकि॒त्वान् ।
स उत्त॑रस्मा॒दध॑रं स॒मुद्र॒मपो दि॒व्या अ॑सृजद्व॒र्ष्या॑ अ॒भि ॥५॥
आ॒र्ष्टि॒षे॒णः । होत्र॑ । ऋषिः॑ । नि॒ऽअ॒सी॒द॒त् । दे॒व॒ऽआ॒पिः॑ । दे॒व॒ऽसु॒मति॑ । चि॒कि॒त्वान् ।
सः । उत्ऽत॑रस्मात् । अध॑रं । स॒मुद्र॑ । अ॒पः । दि॒व्याः । अ॒सृ॒ज॒त् । व॒र्ष्याः॑ । अ॒भि ॥५॥

आर्ष्टिषेण ऋष्टिषेणस्य पुत्रो देवापिर्ऋषिर्देवसुमतिं देवानां कल्याणीं मतिं स्तुतिं चिकित्वाञ्जानन् होत्रं होतृकर्म कर्तुं निषीदन् निषण्णो भवति । स उत्तरस्मादुपरि वर्तमानादंतरिक्षाख्यात्समुद्रादधरमधो वर्तमानं पार्थिवं समुद्रमभि दिव्या दिवि भवा वर्ष्या वर्षभवा अपोऽसृजत् । सृजतु । अत्रार्ष्टिषेण ऋष्टिषेणस्य पुत्र इत्यादि निरुक्तं । २. ११. । द्रष्टव्यं ॥

अ॒स्मिन्त्स॒मुद्रे॒ अध्युत्त॑रस्मिन्नापो॒ देवे॑भि॒र्निवृ॑ता अतिष्ठन् ।
ता अ॑द्रव॒न्नार्ष्टि॑षेणं॒ सृष्टा॑ दे॒वापि॑ना॒ प्रेषि॑ता मृ॒क्षिणी॑षु ॥६॥
अ॒स्मिन् । स॒मुद्रे॑ । अधि॑ । उत्ऽत॑रस्मिन् । आपः॑ । दे॒वेभिः॑ । नि॒ऽवृ॑ताः । अ॒ति॒ष्ठ॒न् ।
ताः । अ॒द्र॒व॒न् । आ॒र्ष्टि॒षे॒णे॒न॑ । सृ॒ष्टाः । दे॒व॒ऽआ॒पिना॑ । प्र॒ऽइ॒षि॒ताः॑ । मृ॒क्षिणी॑षु ॥६॥

अस्मिन्पार्थिवे समुद्रे पूरणीये सति । अधीति सप्तम्यर्थानुवादी । उत्तरस्मिन्समुद्रेऽंतरिक्षाख्य आप उदकानि देवेभिर्द्योतमानैर्निवृता निरुद्धा अतिष्ठन् । ता आप आर्ष्टिषेणेनर्ष्टिषेणस्य पुत्रेण देवापिना स्रष्टाः प्रेषिताः प्रकर्षेणेच्छा प्राप्ताः कांचिता मृक्षिणीषु मृष्टवतीषु परिमृष्टासु स्थलीष्वद्रवन् । स्रवंति ॥ ॥१२॥

यद्दे॒वापि॒: शंत॑नवे पु॒रोहि॑तो हो॒त्राय॑ वृ॒तः कृ॑पयन्नदी॒धेत् ।
दे॒वश्रु॑तं वृ॒ष्टिव॑निं र॒राणो॒ बृह॒स्पति॒र्वाच॑मस्मा अयच्छत् ॥७॥
यत् । दे॒व॒ऽआ॒पिः॑ । शंऽत॑नवे । पु॒रःऽहि॑तः । हो॒त्राय॑ । वृ॒तः । कृ॒प॒यन् । अ॒दी॒धेत् ।
दे॒व॒ऽश्रु॑तं । वृ॒ष्टिऽव॑निं । र॒राणः॑ । बृह॒स्पतिः॑ । वाच॑ं । अ॒स्मै॒ । अ॒य॒च्छ॒त् ॥७॥

यद्यदा देवापिरार्ष्टिषेणः शंतनवे स्वभ्राते कौरव्याय पुरोहितः सन् होत्राय होत्रार्थं वृतः सन् देवश्रुतं । देवा एनं शृण्वंतीति देवश्रुत् । तं तथा वृष्टिवनिं वृष्टियाचिनं बृहस्पतिमदीधेत् अन्वध्यायत् स च रराणो रममाणो बृहस्पतिर्देवोऽस्मै देवापये वाचमयच्छत् ॥

यं त्वा देवापिः शुशुचानो अग्न आर्ष्टिषेणो मनुष्यः समीधे ।
विश्वेभिर्देवैरनुमद्यमानः प्र पर्जन्यमीरया वृष्टिमन्तं ॥ ८॥
यं । त्वा । देवऽआपिः । शुशुचानः । अग्ने । आर्ष्टिषेणः । मनुष्यः । सं ऽईधे ।
विश्वेभिः । देवैः । अनुऽमद्यमानः । प्र । पर्जन्यं । ईरय । वृष्टिऽमंतं ॥ ८॥

हे अग्ने यं त्वा त्वां शुशुचानः स्तोत्रेण ज्वलन् मनुष्य आर्ष्टिषेणो देवापिः समीधे सम्यग्दीपयति स त्वं विश्वेभिः सर्वैर्देवैरनुमद्यमानोऽनुमाद्यमानः सन् पर्जन्यं मेघं वृष्टिमंतं वर्षणवंतं प्रेरय । गमय ॥

त्वां पूर्व ऋषयो गीर्भिरायन्त्वामध्वरेषु पुरुहूत विश्वे ।
सहस्राण्यधिरथान्यस्मे आ नो यज्ञं रोहिदश्वोप याहि ॥ ९॥
त्वां । पूर्वे । ऋषयः । गीःऽभिः । आयन् । त्वां । अध्वरेषु । पुरुऽहूत । विश्वे ।
सहस्राणि । अधिऽरथानि । अस्मे इति । आ । नः । यज्ञं । रोहित्ऽअश्व । उप । याहि ॥ ९॥

हे अग्ने त्वां पूर्व ऋषयो गीर्भिः स्तुतिभिरायन् । आगच्छन् । तथा हे पुरुहूत बहुभिराहूताग्ने विश्वे सर्वेऽपीदानींतना यजमाना अध्वरेषु यज्ञेषु स्तुतिभिर्गच्छंतीति शेषः । किंच सहस्राणि सहस्रसंख्यानि गोयुक्तान्यधिरथानि रथाधिकान्यस्मे अस्माकं शांतनुना दक्षिणात्वेन संकल्पितानि भवंत्विति शेषः । हे रोहिदश्व नो यज्ञमुप याहि । उपागच्छ ॥

एतान्यग्ने नवतिर्नव त्वे आहुतान्यधिरथा सहस्रा ।
तेभिर्वर्धस्व तन्वः शूर पूर्वीर्दिवो नो वृष्टिमिषितो रिरीहि ॥ १०॥
एतानि । अग्ने । नवतिः । नव । त्वे इति । आऽहुतानि । अधिऽरथा । सहस्रा ।
तेभिः । वर्धस्व । तन्वः । शूर । पूर्वीः । दिवः । नः । वृष्टिं । इषितः । रिरीहि ॥ १०॥

हे अग्ने गवां नवतिर्नव च तथैतान्यधिरथानि सहस्रा सहस्राणि च रथाधिकानि गवां सहस्राणि च त्वे त्वय्याहुतानि त्वयि प्रीणयितव्ये सत्याहुतानि । यद्वा । त्वे त्वय्याहुतानि समर्पितानीत्यर्थः । तेभिस्तैः प्रत्तैः पूर्वीर्बह्वीस्तन्वस्तनूर्युष्मदीया वर्धस्व । वर्धय । नोऽस्मदर्थं दिवो द्युलोकाद्वृष्टिमिषितः प्रार्थितः सन् रिरीहि । पूरय ॥

एतान्यग्ने नवतिं सहस्रा सं प्र यच्छ वृष्ण इंद्राय भागं ।
विद्वान्पथ ऋतुशो देवयानान्प्यौलानं दिवि देवेषु धेहि ॥ ११॥
एतानि । अग्ने । नवतिं । सहस्रा । सं । प्र । यच्छ । वृष्णे । इंद्राय । भागं ।
विद्वान् । पथः । ऋतुऽशः । देवऽयानान् । अपि । औलानं । दिवि । देवेषु । धेहि ॥ ११॥

हे अग्ने नवामेतानि नवतिं सहस्रा सहस्राणि च वृष्णे वर्षित्रे इंद्राय भागं सं प्र यच्छ । तत्प्रीत्यर्थं मृत्विग्भ्यो देहि । किंच देवयानान्पथो देवयानाभागानिद्वांस्त्वमृतुशः काले काले औलानमपि कुरुकुलजातमपि शांतनवं देवेषु मध्ये धेहि । निधेहि । स्थापय ॥

अग्ने बाधस्व वि मृधो वि दुर्गहापामीवामप रक्षांसि सेध ।
अस्मात्समुद्राद्बृहतो दिवो नोऽपां भूमानमुप नः सृजेह ॥१२॥
अग्ने । बाधस्व । वि । मृधः । वि । दुःऽगहा । अप । अमीवां । अप । रक्षांसि । सेध ।
अस्मात् । समुद्रात् । बृहतः । दिवः । नः । अपां । भूमानं । उप । नः । सृज । इह ॥१२॥

हे अग्ने दुर्गहा दुर्गहाणि दुःखेन गाहितव्यानि शत्रुपुराणि वि बाधस्व । तथामीवां रोगमप सेध । तथा रक्षांस्यप सेध । अपवारय । अस्मात्समुद्रात् समुद्रवत्साधनाद्बृहतो महतो दिवो द्युलोकादंतरिक्षाद्वापामुदकानां भूमानं बहुभावं वृष्टिसंस्थायमिहास्मिँल्लोक उप सृज । प्रयच्छेत्यर्थः ॥ ॥१२॥

कं न इति द्वादशर्चं नवमं सूक्तं । वैखानसस्य वसुरुषार्षं त्रैष्टुभमैंद्रं । तथा चानुक्रांतं । कं नो वसुर्वो वैखानस इति ॥ गतो विनियोगः ॥

कं नश्चित्रमिषण्यसि चिकित्वान्पृथुग्मानं वाश्रं वावृधध्यै ।
कत्तस्य दातु शवसो व्युष्टौ तक्षद्वज्रं वृत्रतुरमपिन्वत् ॥१॥
कं । नः । चित्रं । इषण्यसि । चिकित्वान् । पृथुऽग्मानं । वाश्रं । ववृधध्यै ।
कत् । तस्य । दातु । शवसः । विऽउष्टौ । तक्षत् । वज्रं । वृत्रऽतुरं । अपिन्वत् ॥१॥

हे इंद्र नोऽस्माकं चित्रं चायनीयं कं धनविशेषमिषण्यसि । प्रेरयसि । चिकित्वान् सर्वथा प्रेरणीयमिति जानन् । कीदृशं तं । पृथुग्मानं पृथुभावं प्राप्नुवंतं वाश्रं शब्दनीयं सुतं । किमर्थं च । ववृधध्या अस्माकं वर्धनाय । किंच तस्येंद्रस्य शवसो बलस्य व्युष्टौ व्युच्छने सति कद्दातु किं दानमस्माकं भवतीति शेषः । यं वज्रं वृत्रतुरं वृत्रस्यावरकस्य पापस्य हिंसकं त्वष्टा तक्षत् अतक्षत् साधु संपादितवान् अपिन्वत् असिंचच्च । तस्य शवसो व्युष्टाविति संबंधः । यद्वा । हे इंद्र कत्किं तस्य वज्रस्य दानं भवति यं वज्रमिंद्रार्थं तक्षदिति योजना । मह्यं त्वष्टा वज्रमतक्षदायसं । ऋ० १०. ४८. ३. । इति मंत्रांतरं ॥

स हि द्युता विद्युता वेति सामं पृथुं योनिमसुरत्वा ससाद ।
स सनीळेभिः प्रसहानो अस्य भ्रातुर्न ऋते सप्तथस्य मायाः ॥२॥
सः । हि । द्युता । विऽद्युता । वेति । सामं । पृथुं । योनिं । असुरऽत्वा । आ । ससाद ।
सः । सऽनीळेभिः । प्रऽसहानः । अस्य । भ्रातुः । न । ऋते । सप्तथस्य । मायाः ॥२॥

स हि स खल्विंद्रो द्युता द्योतमानेन विद्युतैतन्नामकेनायुधेन युक्तः सन् साम स्तोत्रात्मकं यज्ञसंबंधि वेति । गच्छति । तथासुरत्वासुरत्वेन बलेन युक्तः सन् पृथुं विस्तीर्णं योनिं फलस्योत्पादकं यज्ञं ससाद । संगतो भवति । स इंद्रः सनीळेभिः । नीडं विमानं । सविमानैर्मरुद्भिर्युक्तः प्रसहानोऽभिभवन्भवति । तस्य सप्तथस्यादित्यानां धात्रादीनां मध्ये सप्तमस्येंद्रस्य भ्रातुर्भागैर्भक्तव्यस्य मायासुर्यृते यज्ञे न संभवतीति शेषः ॥

स वाजं यातापदुष्पदा यन्त्स्वर्षाता परि षदत्सनिष्यन् ।
अनर्वा यच्छतदुरस्य वेदो घ्नञ्छिश्नदेवाँ अभि वर्पसा भूत् ॥३॥
सः । वाजं । याता । अपदुःऽपदा । यन् । स्वःऽसाता । परि । सदत् । सनिष्यन् ।
अनर्वा । यत् । शतऽदुरस्य । वेदः । घ्नन् । शिश्नऽदेवान् । अभि । वर्पसा । भूत् ॥३॥

वाजं भूरिगंतव्यं संग्रामं याता स इंद्रः ॥ न लोकाव्ययेति षष्ठीप्रतिषेधः ॥ अपदुष्पदापगतदुष्टपतनेन यत् गच्छन् सनिष्यंश्च शत्रुधनानि संभक्तुमिच्छन् परि वदत् । परिषीदति । कुचेति उच्यते । स्वर्षाता स्वर्षातौ सर्वलाभोपेते संग्रामे । किंचानर्वा युद्धेऽप्रत्यृत इंद्रः शतदुरस्य शत्रुपुरस्यांतर्गिहितं यद्वेदो धनमस्ति तद्दृनं वर्षसावरकेण बलेनाभि भूत् । अभिभवति । किं कुर्वन् । शिश्नदेवानब्रह्मचर्याञ्शतद्वारेषु शत्रुपुरसंबंधिषु वर्तमानान् घ्नन् हिंसन् ॥

स यह्वो॒ऽवनी॒र्गोष्ववा॑ जुहोति प्रध॒न्यासु॑ सस्निः ।
अपादो॒ यच्च॑ युज्या॒सो॑ऽर॒था द्रोण्यश्वा॑स॒ ईर॑ते घृ॒तं वाः ॥४॥
सः । यह्वः॑ । अव॑नीः । गोषु॑ । अवा॑ । आ । जु॒हो॒ति॒ । प्र॒ऽध॒न्यासु॑ । सस्निः॑ ।
अपा॑दः । यच्च॑ । यु॒ज्या॒सः॑ । अ॒र॒थाः । द्रोणि॑ऽअश्वासः । ईर॑ते । घृ॒तं । वारि॑ति॒ वाः ॥४॥

स इंद्रोऽवा मेघेष्वभिगंता सस्निः सरणकुशलः प्रधन्यासु प्रकृष्टधननिमित्तासु गोषु भूमिषु यह्वः । महन्नामैतत् । महतीरवनीः । अवंतीत्यवनय आपः । ता आ जुहोति । आक्षिपति । यच्च यासु भूमिष्वपादः पादरहिता अरथा रथवर्जिताः । पादरहिताः केचन रथेन गच्छंति । केनापि शून्या द्रोण्यश्वासो द्रुतत्वापना युज्यासो युज्या इंद्रस्य सख्यो नद्यो वार्वारकं घृतमुदकमीरते प्रेरयंति तच्चाजुहोति ॥

स रु॒द्रेभि॒रशं॑स्तवार ऋ॒भ्वा हि॒त्वी गय॑मा॒रेअ॑वद्य आगा॑त् ।
व॒म्रस्य॑ मन्ये मिथु॒ना विव॑व्री॒ अन्न॒मभी॑त्या॒रोद॑यन्मुषा॒यन् ॥५॥
सः । रु॒द्रेभिः॑ । अशं॑स्तऽवारः । ऋ॒भ्वा । हि॒त्वी । गय॑म् । आ॒रेऽअ॑वद्यः । आ । अ॒गा॒त् ।
व॒म्रस्य॑ । म॒न्ये॒ । मि॒थु॒ना । विव॑व्री॒ इति॒ विऽव॑व्री । अन्न॑म् । अभि॑ऽइत्या॑ । अरो॑दयत् ।
मु॒षा॒यन् ॥५॥

स इंद्रो रुद्रेभी रुद्रपुत्रैर्मरुद्भिः सहित आगात् । आगच्छतु । कीदृशः । अशंस्तवारः स्तोतृभिरभिप्रार्थितधनः । स्वयमेव प्रदातीत्यर्थः । तथर्भ्वा महान् गयं हित्वी हित्वा स्वस्थानं परित्यज्यागात् । आगच्छतु । तत्र संबंधः । आरेअवद्यो दूरेगतगर्ह्यः । किंच वम्रस्यैतन्नामकस्यर्षेर्मम मिथुना मिथुनौ मातापितरौ विवव्री विगतज्वरौ मन्ये । अवगच्छामि । अयं वम्रोऽन्नं शत्रुसंबंध्यभीत्याभिप्राप्य मुषायन्मुष्णन्नरोदयत् । रोदयति ॥ छंदसि शायजपीत्यहावपि मुषेः शः शायजादेशः ॥

स इद्दासं॑ तुवी॒रवं॑ पति॒र्दन्प॒ष्ठ॒हं चि॑शी॒र्षाणं॑ दमन्यत् ।
अ॒स्य चि॒तो न्वोज॑सा वृधा॒नो वि॒पा व॑रा॒हमयो॑अ॒यया॑ हन् ॥६॥
सः । इत् । दास॑म् । तु॒वि॒ऽर॒वं॑ । पतिः॑ । दन् । ष॒ट्ऽअ॒क्षं॑ । चि॒ऽशी॒र्षाण॑ । द॒मन्यत् ।
अ॒स्य । चि॒तः॑ । नु । ओज॑सा । वृ॒धा॒नः॑ । वि॒पा । व॒रा॒हं । अयः॑ऽअ॒यया॑ । ह॒न्निति॑ हन् ॥६॥

स इत् स एवेंद्रः पतिः सर्वस्य स्वामी दासमुपक्षपयितारं तुवीरवं बहुशब्दं संग्रामे भयंकरं शब्दं कुर्वाणं वृत्रं दन् दमयन् षळक्षमक्षिषट्कोपेतं चिशीर्षाणं चिशिरस्कं त्वष्टुः पुत्रं विश्वरूपं दमन्यत् । दमितुं प्रहर्तुमिच्छत् । अवधीदित्यर्थः । यद्वा । दमयतीति दमनः ॥ नंद्यादित्वाल्युः ॥ स इवाचरति ॥ उपमानादाचारे । पा० ३. १. १०. । इति क्यच्यलोपश्छांदसः । ततो लङि बहुलं छंदसीत्यडभावः ॥ किंच चित एतन्नामा महर्षिरस्येंद्रस्यौजसा बलेन वृधानो वर्धमानो विपांगुल्या । कीदृश्या । अयोअयायायोवत्कठिनखया वराहं वराहारमुदकवंतं मेघं व्यहन् । विहतवान् ॥ ॥ १४ ॥

स दुद्रुणे मनुष ऊर्ध्वसान आ साविषदर्शसानाय शरुं।
स नृतमो नहुषोऽस्मत्सुजातः पुरोऽभिनदर्हन्दस्युहत्ये ॥७॥
सः। दुद्रुणे। मनुषे। ऊर्ध्वसानः। आ। साविषत्। अर्शसानाय। शरुं।
सः। नृऽतमः। नहुषः। अस्मत्। सुऽजातः। पुरः। अभिनत्। अर्हन्। दस्युऽहत्ये॥७॥

स इंद्रो द्रुद्रुणे द्रुद्रुणाय दृढं शत्रुभिर्द्रातव्याय मनुषे मनुष्याय योद्त्रे स्वभक्तायोर्ध्वसानः। ऊर्ध्व उच्छ्रितः शौर्यादिभिर्गुणैरधिकः सन् स्यति शत्रूणामंतं करोतीत्यूर्ध्वसः। स इवाचरन्॥ ऊर्ध्वसशब्दादाचारार्थे क्विबंताच्छानच्॥ अर्शसानाय शत्रूणां हिंसित्रे शरुं हिंसकमायुधमा साविषत्। आभिमुख्येन प्रसौति। यच्छति। यद्वा। द्रुद्रुणे मनुषे द्रोग्धव्याय मनुष्यायार्शसानाय स्वभक्तहिंसित्रे तस्य वधार्थमूर्ध्वसानः सन्शरुमा साविषत्। वज्रं प्रेरयति। स एवेंद्रो नहुषो मनुष्यान्नृतमो मनुष्याणां नेतृतमः संग्रामे शूराणां गमयितृतमः। यद्वा। नृतमो नहुषो बंधकश्च। अस्मदस्मदर्थं सुजातः सुष्ठु प्रादुर्भूतोऽर्हन् पूज्यः सन् दस्युहत्ये। दस्यव उपक्षपयितारः शत्रवः। तेषां हत्यं हननं यस्मिन् तादृशे संग्रामे पुरः शत्रूणां शरीराण्यभिनत्। भिन्नवान्॥

सो अभ्रियो न यवस उदन्यन्क्षयाय गातुं विदन्नो अस्मे।
उप यत्सीदिदिंदुं शरीरैः श्येनोऽयोपाष्टिर्हंति दस्यून् ॥८॥
सः। अभ्रियः। न। यवसे। उदन्यन्। क्षयाय। गातुं। विदत्। नः। अस्मे इति।
उप। यत्। सीदत्। इंदुं। शरीरैः। श्येनः। अयःऽअपाष्टिः। हंति। दस्यून् ॥८॥

स इंद्रोऽभ्रियो न। न भ्राजंतेऽपो बिभ्रतीति वाभ्राणि मेघाः। तेषां संघोऽभ्रियः। स इव यवसे गवादिभक्षणसाधनाय तृणायोदन्यन्नुदकं दातुमिच्छन्। तथा क्षयाय गमनाय निवासाय वास्मे अस्माकं गातुं मार्गं विदन्लंभयन्। न इति पूरणः। तादृशः सन् यदिंदुं सोमं शरीरैः स्वशरीरावयवैरंगैरुप सीदत् उपगच्छति॥ यच्छब्दयोगादनिघातः॥ तदानीं श्येनः। सादृश्यप्रधानोऽयं निर्देशः। श्येनसदृशः श्येनवच्छंसनीयगमनोऽयोपाष्टिः। अपयष्टिर्बाहुर्यस्य स प्रदेशोऽपाष्टिः पार्ष्णिः। अयोमयोऽपाष्टिः पार्ष्णिर्यस्य सः। दस्यून्शत्रून्हंति। हिनस्ति॥

स व्राधतः शवसानेभिरस्य कुत्साय शुष्णं कृपणे परादात्।
अयं कविमनयच्छस्यमानमत्कं यो अस्य सनितोत नृणां ॥९॥
सः। व्राधतः। शवसानेभिः। अस्य। कुत्साय। शुष्णं। कृपणे। परा। अदात्।
अयं। कविं। अनयत्। शस्यमानं। अत्कं। यः। अस्य। सनिता। उत। नृणां ॥९॥

स इंद्रो व्राधतः। महन्नामैतत्। महतोऽपि शत्रून्शवसानेभिर्बलमाचरद्भिरायुधैरस्य। अस्यतु॥ असु क्षेपणे। व्यत्ययेन भध्यमः॥ कुत्सायैतन्नामकाय स्तुपणे स्तोत्रे। स्तुपतिः स्तुतिकर्मा। शुष्णं शोषकमेतन्नामकमसुरं परादात्। पराभूय खंडितवान्। कुत्साय शुष्णमशुषं नि बर्हीः। ऋ० ४. १६. १२। इति मंत्रांतरं। किंचायमिंद्रः कविमुशनसं। कविरिति पितृनाम्ना पुत्रस्यापि व्यवहार उपचारात्। शस्यमानं स्तूयंतमनयत्। वशं प्रापयत्तस्य विरोधिनं। यद्वा। कविं भार्गवमेव स्तोतृभिः शस्यमानं स्ववशमनयत्। यः कविरस्येंद्रस्यात्कं रूपं सनिता संभक्ता भवति॥ न लोकाव्ययेति षष्ठीप्रतिषेधः॥ उतापि च नृणां वृष्ट्यादिनेतृणामिंद्रानुचराणां मरुतां यः कविः सनिता। तमनयदिति॥

अयं दशस्यन्नर्येभिरस्य दस्मो देवेभिर्वरुणो न मायी ।
अयं कनीन ऋतुपा अवद्यमिमीतारꣳ यश्चतुष्पात् ॥१०॥
अयं । दशस्यन् । नर्येभिः । अस्य । दस्मः । देवेभिः । वरुणः । न । मायी ।
अयं । कनीनः । ऋतुऽपाः । अवेदि । अमिमीत । अरꣳ । यः । चतुःऽपात् ॥१०॥

अयमिंद्रो दशस्यन् स्तोतृभ्यो धनं प्रयच्छन् । दशस्यतिर्दानकर्मा । नर्येभिर्नर्यैर्मनुष्यहितैर्मरुद्भिरस्य । अस्यति ॥ छांदसस्तिपो लोपः । यद्वा । व्यत्ययेन लोण्मध्यमः ॥ तथा देवेभिर्द्योतमानैः स्वतेजोभिर्दस्मो दर्शनीयो वरुणो न वरुण इव । वरुणस्तमोवारक आदित्यो वरुण एव वा । स इव मायी मायावान् । तथायं कनीनः कमनीय ऋतुपा ऋतौ पातावेदि । अश्नाति । तथारꣳमसुरमेतन्नामानममिमीत । अमिनात् । योऽरꣳ चतुष्पात् पादचतुष्टयोपेतः ॥ मीङ् हिंसायां । लङि बहुलं छंदसीति विकरणस्य लुः ॥

अस्य स्तोमेभिरौशिज ऋजिश्वा व्रजं दरयद्वृषभेण पिप्रोः ।
सुत्वा यद्यजतो दीदयद्गीः पुर इयानो अभि वर्पसा भूत् ॥११॥
अस्य । स्तोमेभिः । औशिजः । ऋजिश्वा । व्रजं । दरयत् । वृषभेण । पिप्रोः ।
सुत्वा । यत् । यजतः । दीदयत् । गीः । पुरः । इयानः । अभि । वर्पसा । भूत् ॥११॥

अस्येंद्रस्य स्तोमेभिः स्तोत्रैरौशिज उशिजः पुत्र ऋजिश्वैतन्नामा वृषभेण वज्रेण वृषभेण वा युक्तं व्रजं गोष्ठं पिप्रोरेतन्नामकस्यासुरस्य संबंधिनं तेनापहृत्य पालितं दरयत् । अदारयत् । यद्यदा सुत्वा सोमस्य सोता ॥ सुयजोर्ङ्वनिबिति वनिप् । ह्रस्वस्य पितीति तुक् ॥ यजतो यष्टौशिजो गीः स्तुतिवाचो दीदयत् दीपितवान् । तथा यद्यदेयानो गच्छन् पुरः शत्रुपुराणि । यद्वा । पुरः पुर इव संघीभूतानि पापानि । अभि भूत । अभिभवति । केन साधनेन । वर्पसा । रूपनामैतत् । रूपेणेंद्रानुगृहीतेन । यदैवमकरोत् तदा व्रजं दरयदिति संबंधः ॥

एवा महो असुर वक्षथाय वम्रकः पद्भिरुप सर्पदिंद्रं ।
स इयानः करति स्वस्तिमस्मा इषमूर्जं सुक्षितिं विश्वमाभाः ॥१२॥
एव । महः । असुर । वक्षथाय । वम्रकः । पट्ऽभिः । उप । सर्पत् । इंद्रं ।
सः । इयानः । करति । स्वस्तिं । अस्मै । इषं । ऊर्जं । सुऽक्षितिं । विश्वं । आ । अभारिति अभाः ॥१२॥

अनया स्तुतिमुपसंहृत्याभिमतं वम्रकः प्रार्थयते । हे असुर बलवन्निंद्र त्वामेवैवमुक्तप्रकारेण महो महतो हविषः स्तोत्रस्य वा वक्षथाय वहनाय महतः स्वर्गादेः प्रापणाय वा पद्भिः पादैरुप सर्पत् । उपागमत् । स इयान उपागम्यमानः सन् करति करोतु स्वस्तिमविनाशमस्मै वम्रकाय । तथेषमन्नमूर्जं रसं सुक्षितिं सुनिवासं सम्यक्विश्वं सर्वमाभाः । आहरतु ॥ ॥१५॥ ॥८॥

नवमेऽनुवाके चयोदश सूक्तानि । तत्रेंद्र हवीति द्वादशर्चं प्रथमं सूक्तं वंदनपुत्रस्य दुवस्योरार्षं वैश्वदेवं । द्वादशी त्रिष्टुप् । शिष्टा जगत्यः । तथा चानुक्रांतं । इंद्र दुवस्युर्वांदनो वैश्वदेवं स्वंत्या त्रिष्टुबिति ॥ गतो विनियोगः ॥

इंद्र दृह मघवन्त्वादिदुग्र इह स्तुतः सुतपा बोधि नो वृधे ।
देवेभिर्नः सविता प्रावतु श्रुतमा सर्वतातिमदितिं वृणीमहे ॥१॥

इंद्र। दृह्य। मघऽवन्। त्वाऽवत्। इत्। भुजे। इह। स्तुतः। सुतऽपाः। बोधि। नः। वृधे।
देवेभिः। नः। सविता। प्र। अवतु। श्रुतं। आ। सर्वऽतातिं। अदितिं। वृणीमहे ॥१॥

हे इंद्र मघवन्धनवन् त्वं त्वावदित् त्वत्सदृशमेव शत्रुबलं दृह्य। मारय। किमर्थं। भुजेऽस्माकं भोगाय। तदर्थमिहास्मिन्यज्ञे स्तुतः सन् सुतपाः सुतस्याभिषुतस्य सोमस्य पाता बोधि। बुध्यस्व। भवेत्यर्थः। किमर्थं। नोऽस्माकं वृधे वर्धनाय। किंच देवेभिर्देवैः सह नोऽस्माकं श्रुतं विश्रुतं यज्ञं सविता सर्वस्य स्वस्वकर्मसु प्रेरको देवः प्रावतु। प्ररक्षतु। किंच सर्वतातिं ॥ स्वार्थिकस्तातिल् ॥ सर्वां सर्वात्मिकां। यद्वा। सर्वे तायंतेऽस्यामिति सर्वतातिः ॥ छांदसो दीर्घः ॥ तादृशीमदितिमखंडनीयां देवमातरमा वृणीमहे ॥

भराय सु भरत भागमृत्वियं प्र वायवे शुचिपे क्रंददिष्टये।
गौरस्य यः पयसः पीतिमानश आ सर्वतातिमदितिं वृणीमहे ॥२॥
भराय। सु। भरत। भागं। ऋत्वियं। प्र। वायवे। शुचिऽपे। क्रंदत्ऽइष्टये।
गौरस्य। यः। पयसः। पीतिं। आनशे। आ। सर्वऽतातिं। अदितिं। वृणीमहे ॥२॥

भराय संग्रामकारिणे सर्वेषां पोषकाय वेंद्रायर्त्वियं काले जातं प्राप्तकालं भागं सु भरत। सुष्ठु संपादयत हे ऋत्विजः। तथा शुचिपे शुद्धस्य सोमस्य पात्रे क्रंददिष्टये शब्दितगमनाय। वायोः शीघ्रगमने हि शब्दः प्रत्यक्षः। तादृशाय वायवे देवाय प्र भरत भागमिति शेषः। यो देवो गौरस्य गौरवर्णस्य पशोः पयसः पीतिं पानमानशे प्राप्नोति तस्मै वायवे। शिष्टमुक्तं ॥

आ नो देवः सविता साविषद्वयं ऋजूयते यजमानाय सुन्वते।
यथा देवान्प्रतिभूषेम पाकवदा सर्वतातिमदितिं वृणीमहे ॥३॥
आ। नः। देवः। सविता। साविषत्। वयं। ऋजुऽयते। यजमानाय। सुन्वते।
यथा। देवान्। प्रतिऽभूषेम। पाकऽवत्। आ। सर्वऽतातिं। अदितिं। वृणीमहे ॥३॥

सविता सर्वस्य प्रेरकः सूर्यो नोऽस्माकं संबंधिन ऋजूयत ऋजुकामाय सुन्वतेऽभिषवं कुर्वते यजमानाय यज्ञं पाकवत् पाकोपेतं। व्यवहितमप्येतदत्र संबध्यते। आ साविषत्। आभिमुख्येन प्रसौति ॥ सौतेर्ण्यंतान्लेटि रूपं ॥ यथा येन प्रकारेण देवान्प्रतिभूषेम प्रतिभवेम ॥ भवतेर्लिङि सिप्यपौ। द्विवकरणता ॥ यद्वा ॥ भूष अलंकारे। भ्वादिकः ॥ भूषयेमेत्यर्थः ॥

इंद्रो अस्मे सुमना अस्तु विश्वहा राजा सोमः सुवितस्याध्येतु नः।
यथायथा मिचधितानि संदधुरा सर्वतातिमदितिं वृणीमहे ॥४॥
इंद्रः। अस्मे इति। सुऽमनाः। अस्तु। विश्वहा। राजा। सोमः। सुवितस्य। अधि। एतु। नः।
यथाऽयथा। मिचऽधितानि। संऽदधुः। आ। सर्वऽतातिं। अदितिं। वृणीमहे ॥४॥

इंद्रो देवोऽस्मे अस्माकं सुमनाः सुमनस्कोऽनुग्रहचेता अस्तु। भवतु। विश्वहा सर्वेष्वहःसु। राजा सोमश्च नोऽस्माकं सुवितस्य सुवितं स्तोत्रमध्येतु। अधिगच्छतु। यथायथा येन येन प्रकारेणास्माकं मिचधितानि मिचनिहितानि धनानि संदधुः तथाधिगच्छतु सोमः। तथेंद्रोऽपि सुमना अस्त्विति समन्वयः ॥

इंद्रं उक्थेन शवसा परुर्दधे बृहस्पते प्रतरीतास्यायुषः ।
यज्ञो मनुः प्रमतिर्नः पिता हि कमा सर्वतातिमदितिं वृणीमहे ॥५॥
इंद्रः । उक्थेन । शवसा । परुः । दधे । बृहस्पते । प्रऽतरीता । असि । आयुषः ।
यज्ञः । मनुः । प्रऽमतिः । नः । पिता । हि । कं । आ । सर्वऽतातिं । अदितिं । वृणीमहे ॥५॥

अयमिंद्र उक्थेन शवसा सुस्थेन बलेन परुः पर्व यज्ञियमस्मदीयं वा दधे । धारयति । हे बृहस्पते आयुषो ममायुष्यस्य प्रतरीता प्रवर्धयितासि । भव । तथा यज्ञो मनुर्मंता प्रमतिः प्रकृष्टा मतिर्यस्य स नः पिता पालकः सन् कं सुखं प्रयच्छतु । यद्वा । यज्ञो मंत्रो बुद्धिश्च प्रत्येकं सुखं प्रयच्छतु ॥

इंद्रस्य नु सुकृतं दैव्यं सहोऽग्निर्गृहे जरिता मेधिरः कविः ।
यज्ञश्च भूदुदिथे चारुरंतम आ सर्वतातिमदितिं वृणीमहे ॥६॥
इंद्रस्य । नु । सुऽकृतं । दैव्यं । सहः । अग्निः । गृहे । जरिता । मेधिरः । कविः ।
यज्ञः । च । भूत् । उदिथे । चारुः । अंतमः । आ । सर्वऽतातिं । अदितिं । वृणीमहे ॥६॥

दैव्यं देवानां हितं सहो बलं यदस्ति तदिंद्रस्य सुकृतं । इंद्रेण खलु सुष्ठु संपादितं । यद्वा । यत्सुकृतं दैव्यं सहो बलं मरुत्संज्ञकमस्ति तदिंद्रस्य नु । इंद्रस्य संबंधि खलु । अथवा । इंद्रस्य नु संबंधि सुकृतं दैव्यं सहो देवार्हं बलमग्निर्गृहेऽस्मदीये यागगृहे वर्तत इति शेषः । इंद्रस्य संबंधी सुष्ठु संपादितो देवानां बलभूतोऽग्निर्गार्हपत्यः सन् वर्तत इत्यर्थः । स चाग्निर्जरिता देवानां स्तोता मेधिरः । मेधो यज्ञो हविर्वा । तद्वान् कविः क्रांतप्रज्ञो यज्ञो यष्टव्यश्च भूत् । भवति । कुत्र । विदथे यज्ञे । किंच सोऽग्निश्चारुश्चरणीयोऽतमोऽस्माकमंतिकतमश्च ॥ ॥१६॥

न वो गुहा चकृम भूरि दुष्कृतं नाविष्यं वसवो देवहेळनं ।
माकिर्नो देवा अनृतस्य वर्पस आ सर्वतातिमदितिं वृणीमहे ॥७॥
न । वः । गुहा । चकृम । भूरि । दुःऽकृतं । न । आविःऽत्यं । वसवः । देवऽहेळनं ।
माकिः । नः । देवाः । अनृतस्य । वर्पसः । आ । सर्वऽतातिं । अदितिं । वृणीमहे ॥७॥

हे देवाः वो युष्माकं गुहा गुहायां प्रच्छन्ने देशे भूरि प्रभूतं दुष्कृतं पापं । द्रोहमित्यर्थः । न चकृम । तथाविध्यमाविः संभूतं देवहेळनं देवानां क्रोधनं तन्निमित्तं द्रोहं न चक्रम हे वसवो वासका देवाः । किंच हे देवाः नोऽस्माकमनृतस्य वर्पसो रूपस्य प्राप्तिर्माकिः । मा भूत् । इतः परं मानुषं रूपं मा भूदित्यर्थः । शिष्टमुक्तं ॥

अपामीवां सविता साविषन्नयाग्वरीय इदप सेधंत्वद्रयः ।
यावा यच्च मधुषदुच्यते बृहदा सर्वतातिमदितिं वृणीमहे ॥८॥
अप । अमीवां । सविता । साविषत् । न्यक् । वरीयः । इत् । अप । सेधंतु । अद्रयः ।
यावा । यच्च । मधुऽसुत् । उच्यते । बृहत् । आ । सर्वऽतातिं । अदितिं । वृणीमहे ॥८॥

सविता सर्वस्य प्रेरकः सवितृदेवताकाः संबंधिनममीवां रोगमप साविषत् । अपप्रेरयतु । अपगमयत्वित्यर्थः । तथा वरीय इदुरुतरमपि पापं न्यग्वीचीनमप सेधंत्वद्रयः पर्वताभिमानिनो देवा अभिषवाद्यमानो

वा। एतत्सर्वं कुत्र भवतीति चेत् उच्यते। यत्र यस्मिन्प्रदेशे यस्मिन्यागे वा मधुरस्य सोमस्य सोता यावा वृहत्प्रवृद्धमुच्यते स्तूयते तत्र ॥

ऊर्ध्वो यावा वसवोऽस्तु सोतरि विश्वा द्वेषांसि सनुतर्युयोत।
स नो देवः सविता पायुरीड्य आ सर्वतातिमदितिं वृणीमहे ॥ ९॥
ऊर्ध्वः। यावा। वसवः। अस्तु। सोतरि। विश्वा। द्वेषांसि। सनुतः। युयोत।
सः। नः। देवः। सविता। पायुः। ईड्यः। आ। सर्वऽतातिं। अदितिं। वृणीमहे ॥ ९॥

हे वसवो देवाः सोतरि सोमाभिषवकर्तरि मयि यावोर्ध्व उन्नतोऽस्तु। तेनोच्छ्रितेन विश्वा द्वेषांसि सर्वानपि द्वेष्टॄन्सनुतर्निगूढान्युयोत। पृथक्कुरुत। स सविता देवो नोऽस्माकं पायुः पालयिता ॥ कृवापाजीत्यादिनोण्। प्रत्ययस्वरः ॥ स ईड्यः स्तोतव्यश्च ॥

ऊर्जं गावो यवसे पीवो अत्तन ऋतस्य याः सदने कोशे अङ्ध्वे।
तनूरेव तन्वो अस्तु भेषजमा सर्वतातिमदितिं वृणीमहे ॥ १०॥
ऊर्जं। गावः। यवसे। पीवः। अत्तन। ऋतस्य। याः। सदने। कोशे। अङ्ध्वे।
तनूः। एव। तन्वः। अस्तु। भेषजं। आ। सर्वऽतातिं। अदितिं। वृणीमहे ॥ १०॥

हे गाव आशिरार्थाः यूयं यवसे तृणवति देशे पीवः प्रवृद्धमूर्जं रसमत्तन। अत्त। या ऋतस्य यज्ञस्य सदने गृहे कोशे गोष्ठे दोहनस्थानेऽङ्ध्वे व्यंजयथ ता अत्तन। तनूरेव। जन्ये जनकशब्दः। तनूरेव क्षीरमेव तन्वः सोमरसस्य भेषजमस्तु। यद्वा। पृथगेव वाक्यं। अस्माकं तन्वो भेषजमस्तु। किंच तनूरेव पशुशरीरमेव। पशुना यागे सति स्वर्गस्य संपादयितुं शक्यत्वात् ॥

क्रतुप्रावा जरिता शश्वतामव इंद्र इद्भद्रा प्रमतिः सुतावतां।
पूर्णमूर्धो दिव्यं यस्य सिक्तय आ सर्वतातिमदितिं वृणीमहे ॥ ११॥
क्रतुऽप्रावा। जरिता। शश्वतां। अवः। इंद्रः। इत्। भद्रा। प्रऽमतिः। सुतऽवतां।
पूर्णं। ऊधः। दिव्यं। यस्य। सिक्तये। आ। सर्वऽतातिं। अदितिं। वृणीमहे ॥ ११॥

क्रतुप्रावा कर्मणां पूरकः ॥ प्रा पूरणे। आतो मनिन्क्वनिब्वनिप् ॥ जरिता स्तोता। यजमानं साधु सोमः कृत इति स्तौति। यद्वा शश्वतां सर्वेषां जरयितेंद्र इदिंद्र एव सुतावतां सोमवतां यजमानानामवो रक्षको भद्रा भद्रया सुत्या प्रमतिः। यस्येंद्रस्य सिक्तये सेकाय पानायोधस्तत्ततरं द्रोणकलशं पूर्णं सोमेन पूर्णं भवति स एवावः स एव प्रमतिरिति ॥

चित्रस्ते भानुः क्रतुप्रा अभिष्टिः संति स्पृधो जरणिप्रा अधृष्टाः।
रजिष्ठया रज्या पन्थ आ गोस्तूतूर्षेति पर्यं दुवस्युः ॥ १२॥
चित्रः। ते। भानुः। क्रतुऽप्राः। अभिष्टिः। संति। स्पृधः। जरणिऽप्राः। अधृष्टाः।
रजिष्ठया। रज्या। पन्थः। आ। गोः। तूतूर्षेति। परि। अयं। दुवस्युः ॥ १२॥

हे इंद्र ते भानुः प्रकाशश्चित्र आश्चर्यभूतस्त्वायनीयो वा। तथा क्रतुप्राः स भानुरस्माकं कर्मणां पूरको

ऽभिष्टिरभ्येषणीयः । हे इंद्र ते अरणिप्राः स्तोतॄणां धनस्य पूरयित्र्योऽधृष्टा अन्यैरप्रधृष्याः सुधः सुधाः संति । यस्मादेवं तस्माद्वज्रिञ्छयर्जुतमया रज्या रज्ज्वा गोः पश्वः पशोरयं दुवस्युः परिचरणमिच्छन्नेतन्नामर्षिः परि तूतुर्षति । अभित्वरयति ॥ ॥१७॥

उद्बुध्वमिति द्वादशर्चं द्वितीयं सूक्तं । सोमपुत्रस्य बुधस्यार्षं । आ वो धियमिति नवमी कपुत्रर इत्यन्या च द्वे जगत्यौ । चतुर्थीषष्ठ्यौ गायत्र्यौ । निराहावानिति पंचमी बृहती । शिष्टास्त्रिष्टुभः । विश्वे देवा देवता । ऋत्विक्स्तुतिरूपोऽर्थो वा देवता । तथा चानुक्रांतं । उद्बुध्वं बुधः सौम्य ऋत्विक्स्तुतिर्वा नवम्यंत्ये जगत्यौ गायत्र्योर्मध्ये पंचमी बृहतीति ॥ गतः सूक्तविनियोगः ॥

उद्बुध्वध्वं समनसः सखायः समग्निमिंध्वं बहवः सनीळाः ।
दधिक्रामग्निमुषसं च देवीमिंद्रावतोऽवसे नि ह्वये वः ॥१॥
उत् । बुध्यध्वं । सऽमनसः । सखायः । सं । अग्निं । इंध्वं । बहवः । सऽनीळाः ।
दधिऽक्रां । अग्निं । उषसं । च । देवीं । इंद्रऽवतः । अवसे । नि । ह्वये । वः ॥१॥

अग्निं चेष्यमाणा ऋत्विजो वदंति । हे सखायः सखिभूता ऋत्विजः समनसः समानमनस्काः परस्परमद्रोग्धारः । अन्योन्यं कर्मानुकूला इत्यर्थः । तादृशा यूयमुदुत्कृष्टं बुध्वं । जानीध्वं । उत्तरत्र युष्माकं कर्तव्यमेवोपदिशति । तथाग्निं समिंध्वं । सम्यग्दीपयध्वं ॥ त्रिरुन्धी दीप्तौ रौधादिकः । लोटि श्नसोरल्लोप इत्यल्लोपः ॥ बहवोऽनेके सनीळाः समाननिवासा एकस्थानमेव शालायां निवसंतः । अहं च दधिक्रामेतन्नामिकां देवतामग्निमुषसं च देवीमेतांस्त्रीन्देवानिंद्रावत इंद्रेण युक्तान्वो युष्मानवसेऽस्माकं रक्षणाय नि नितरां ह्वये । आह्वयामि ॥

मंद्रा कृणुध्वं धिय आ तनुध्वं नावमरित्रपरणीं कृणुध्वं ।
इष्कृणुध्वमायुधारं कृणुध्वं प्रांचं यज्ञं प्र णयता सखायः ॥२॥
मंद्रा । कृणुध्वं । धियः । आ । तनुध्वं । नावं । अरित्रऽपरणीं । कृणुध्वं ।
इष्कृणुध्वं । आयुधा । अरं । कृणुध्वं । प्रांचं । यज्ञं । प्र । नयत । सखायः ॥२॥

मंद्रा मंद्राणि मदकराणि स्तोत्राणि कृणुध्वं । कुरुध्वं हे सखायः ॥ कृवि हिंसाकरणयोः । धिन्विकृण्व्योरच्येत्युप्रत्ययः । अकारश्चांतादेशः । यद्वा । करोतिर्वर्त्तत्ययेन शप्रुः ॥ तथा धियः कर्माणि चयनप्रदेशकर्षणादीन्या तनुध्वं । विस्तारयत । तथारित्रपरणीं कर्षणादिरूपेणारित्रेण पारयितव्यां नावं चयनाख्यां कृणुध्वं । कुरुध्वं । तथायुधायुधानि सीरयुगादीन्यरमलं कृणुध्वं । हे सखाय ऋत्विजः प्रांचं प्रागंचनं यज्ञं यष्टव्यमग्निं प्र णयत । प्रकर्षेण नयत । आदौ कर्षणं प्रांचं कुरुतेत्यर्थः ॥

युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजं ।
गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः पक्वमेयात् ॥३॥
युनक्त । सीरा । वि । युगा । तनुध्वं । कृते । योनौ । वपत । इह । बीजं ।
गिरा । च । श्रुष्टिः । सऽभराः । असत् । नः । नेदीयः । इत् । सृण्यः । पक्वं । आ । इयात् ॥३॥

हे सखायः यूयं सीरा सीराणि युनक्त । युंग्ध्वमनडुद्भिः सह ॥ युजेर्लोटि तप्तनप्तनथनाश्चेति तबादेशः । अत एवाडित्वाच्छसोरल्लोप इत्यल्लोपाभावः ॥ तदर्थं युगा युगानि वि तनुध्वं । विस्तारयध्वं । कृते च योनाविह सीतायां बीजं ग्राम्यमारण्यं च वपत । निधत्त । तिलमाषव्रीह्यादिकं ग्राम्यसप्तकं वेणुश्यामाकनीवारा-

दिकमारण्यबीजसप्तकं च कृष्टाकृष्टयोर्निवपतेत्यर्थः । सप्त ग्राम्याः कृष्टे सप्तारण्या अकृष्ट इत्यापस्तंबः । तथा नोऽस्माकं गिरा स्तुत्या प्रशस्त्या सहास्माकं शुष्टिरन्नं सभराः सभरमसत् । भवति । भवतु । तथा नेदीय इदंतिकमेव कृण्वः । कृणिरंकृग्वः । अंकृग्ववद्को लविचः । पक्वं खंबमेयात् । आभिमुख्येन गच्छतु ॥ शुष्टिः सभरा असत् कृण्वः पक्वमेयादिति चग्रब्दानुवृत्तेश्चवायोगे प्रथमेति प्रथमस्य निघाताभावः ॥

सीरा युंजंति कवयो युगा वि तन्वते पृथक् । धीरा देवेषु सुम्नया ॥४॥
सीरा । युंजंति । कवयः । युगा । वि । तन्वते । पृथक् । धीराः । देवेषु । सुम्नऽया ॥४॥

कवयो मेधाविन ऋत्विजः सीरा सीराणि कर्षणसाधनानि युंजंति । योजयंति । युगा युगान्यपि पृथक् परस्परं वि तन्वते । भिन्नप्रदेशानि कुर्वंति । कीदृशाः कवयः । देवेषु विषये धीरा धीमंतः । किमर्थं । सुम्नया । सुम्नमिति सुखनाम । सुखेच्छया ॥ सुम्नशब्दात्क्यजंताच्चावे अ प्रत्ययादित्यकारप्रत्ययः । सुपां सुलुगिति तृतीयाया आकारः ॥ अथवा । धीरा धीमंतो देवेषु सुम्नया सुम्नेन । देवेषु सुखं भूयादिति ॥ सुपां सुलुगिति विभक्तेर्याजादेशः ॥

निरहावान्कृणोतन सं वरचा दधातन ।
सिंचामहा अवतमुद्रिणं वयं सुषेकमनुपक्षितं ॥५॥
निः । आऽहावान् । कृणोतन । सं । वरचाः । दधातन ।
सिंचामहै । अवतं । उद्रिणं । वयं । सुऽसेकं । अनुपऽक्षितं ॥५॥

हे सखायः आहावान् । आह्रयंते पानार्थं गावोऽत्रेत्याहावा निपानानि । अत्रौचित्यादग्निचयनप्रदेशकर्षणार्थगोपानसाधनद्रुममयपानपात्राण्युच्यंते । तानाहावान् निष्कृणोतन । निष्कुरुत ॥ आह्रयंतेर्निपानमाहावः । पा० ३. ३. ७४. । इति निपातितः । थाथादिस्वरः । कृणोतन । तप्तनबित्यादिना तनप् । तेनाङित्त्वाद्गुणः । भ्राभस्त्योरात इत्याकारलोपः ॥ किमर्थमाहावकरणं वरत्रस्थापनं चेति । अत्रोच्यते । वयमवतमवटं सिंचामहै । कीदृशमवटं । उद्रिणमुद्रावंतं सुषेकं सुष्ठु सेकुं शक्यं अनुपचितमनुपक्षीणं कदाचिदुदकोपचयरहितं ॥

इष्कृताहावमवतं सुवरचं सुषेचनं । उद्रिणं सिंचे अक्षितं ॥६॥
इष्कृतऽआहावं । अवतं । सुऽवरचं । सुऽसेचनं । उद्रिणं । सिंचे । अक्षितं ॥६॥

इष्कृताहावं संस्कृताहावमवतमवटं द्रोणं सिंचे । सेचयामि । पुनः कीदृशमवटं । सुवरचं शोभनवरत्रोपेतं सुषेचनं शोभनोदकसेकोपेतं उद्रिणमुद्रावंतं अक्षितमक्षीणं ॥ ॥१८॥

प्रीणीताश्वान्हितं जयाथ स्वस्तिवाहं रथमित्कृणुध्वं ।
द्रोणाहावमवतमश्मचक्रमंसचकोशं सिंचता नृपाणं ॥७॥
प्रीणीत । अश्वान् । हितं । जयाथ । स्वस्तिऽवाहं । रथं । इत् । कृणुध्वं ।
द्राणंऽआहावं । अवतं । अश्मंऽचक्रं । अंसचऽकोशं । सिंचत । नृऽपानं ॥७॥

हे ऋत्विजः यूयमश्वान्यापनशीलान्बलिवर्दान्प्रीणीत । उचितघासोदकादिप्रदानेन प्रीणयत । यथा सेचनकर्षणाय प्रभवंति तथा कुरुतेत्यर्थः । तथा कृत्वा हितं चयनायोचितं कर्षणं जयाथ । जयथ । संपादयथ । तथा रथं चयनाख्यं हलाख्यं वा स्वस्तिवाहमित् सुखस्य वाहकमेव कृणुध्वं । कुरुध्वं । तदर्थं द्रोणाहावं । आह्रयंत्यत्र पानार्थं बलिवर्दानित्याहावो जलाधारः पात्रविशेषः । स च द्रोणमयो द्रुममय आहावो यस्य

तादृशमवतमवटवन्निम्नभूतमश्मचक्रं व्याघ्रक्रमणमश्ममयचक्रं वांसत्रकोशं अंसत्रं कवचं यथा कायं रक्षति तद्वदुदकस्य कोशं कोशस्थानीयं नृपाणं नृणां कर्मनेतॄणां पानयोग्यमीदृशमवतं सिंचत हे ऋत्विजः । एवमृत्विक्स्तुतिर्वेति पक्षे । सूक्तस्य वैश्वदेवपक्ष एवं योजना । प्रीणीत प्रीणयतास्मान् । स्नानपानयोग्यान्नैः संग्रामयोग्यान्करूतेत्यर्थः । हितं जयाथ । हितमिति क्रियाविशेषणं । कथं जयथ । बंधुसुहृद्यो यथा हितं भवति तथा जयथ संग्रामं । स्वस्तिवाहं । स्वस्तीत्यविनाशनाम । अविनाशवाहनं रथमिद्रथं च कृणुध्वं । इदिति चार्थे । अश्वरथं च दृढं कृत्वा संग्रामभूमिं गत्वा द्रोणाहावमित्यादीनि द्वितीयांतानि कूपाख्यसंग्रामविशेषणानि सिंचतेत्यनेन संबध्यंते । द्रोणो द्रुममयः स एव रथ आहाव आह्वानीयो यस्य संग्रामस्य तं । अवतं । कूपनामैतत् । कूपं संग्रामाख्यं । अश्मचक्रं कूपप्रांतनिबद्धाश्मसदृशप्रहरणायुधवंतं । असनानि वा क्षेपणानि वा चक्राख्यायुधविशेषा यस्मिन् तं । व्याघ्रचरणवंतं व्याघ्रक्रमणवंतं वा । चक्रं चकतेर्वा चरतेर्वा क्रामतेर्वेति निरुक्तं । ४. २७. । अंसत्रकोशं अंसत्राणि धनूंषि कवचानि च कोशस्थानीयानि यस्मिन् तं सिंचत । नृपाणं यस्मिन्योद्वार उदकवत्पीयंते मार्यंते तं । ईदृशं कूपसदृशं संग्रामं सिंचत हे अस्मदीया योद्वारः । सूक्तस्य वैश्वदेवत्वाद्ये सैनिका विश्वेषां देवानां प्रसादेन सर्वमेतत्कुरूतेत्यर्थः । एवं निराहावानित्यादिषु कूपरूपव्याजेन संग्रामवर्णनमवगंतव्यं ॥

व्रजं कृणुध्वं स हि वो नृपाणो वर्म सीव्यध्वं बहुला पृथूनि ।
पुरः कृणुध्वमायसीरधृष्टा मा वः सुस्रोच्चमसो दृंहता तं ॥ ८॥
व्रजं । कृणुध्वं । सः । हि । वः । नृऽपानः । वर्म । सीव्यध्वं । बहुला । पृथूनि ।
पुरः । कृणुध्वं । आयसीः । अधृष्टाः । मा । वः । सुस्रोत् । चमसः । दृंहत । तं ॥ ८॥

हे ऋत्विजः व्रजं कृणुध्वं । व्रजं गोष्ठं कुरूध्वं । आग्निरदोहार्थं गोस्थानं कुरूत । स हि स खलु वो नृपाणो नेतॄणां देवानां पातव्यः । देवपानसाधन इति । सांनाय्यरूपेण वाग्निरूपेण वा गोः पयआदिकं देवाः पिबंति खलु । वर्म वर्माणि सीव्यध्वं । वर्मवत्प्रधानस्योभयत आच्छादकत्वात्प्रयाजादीनि प्राच्यानि प्रतीच्यानि चांगानि वर्माणि । तानि सीव्यध्वं । दृलयध्वं । कुरूध्वमित्यर्थः । कीदृशानि वर्माणि । बहुला बहुलान्यनेकानि । तानि च पृथूनि विस्तीर्णानि । तथा पुरः पुराणि धिष्ण्यादीनि यष्टव्यानां देवानां वा पुरः शरीराण्यायसीरयोमयवत् सारभूता अधृष्टा अन्यैरधृष्याः । पूरणीया यहा वा पुर इत्युच्यंते । तानुक्तलक्षणान्कुरूत । वो युष्मदीयश्चमसो यज्ञाख्यो भक्षणसाधनश्चमस एव वा । चमसपक्षे सामान्यैनेकवचनं । मा सुस्रोत् । मा स्रवेत् ॥ स्रवतेर्लङि बहुलं छंदसीति शपः श्लुः ॥ तं दृंहत । दृढीकुरूत । यथा विकलो न भवति तथा कुरूत ॥ दृह दृहि वृद्धौ भौवादिकः । तस्माल्लोटीदित्त्वान्नुम् ॥ ऋत्विक्स्तुतिपक्ष एवं । वैश्वदेवपक्षे । अस्मदीया योद्वारो यूयं । नरो योद्वारः पिबंति प्रत्यर्थिनां प्राणानिति नृपाणः । स तादृशो युष्मदीयः खलु । गोष्ठपक्षे नराणां पानसाधनः स खलु ॥ पातेः करणाधिकरणयोरिति ल्युट् ॥ वर्म वर्माणि कवचानि सीव्यध्वं बहुलानि पृथूनि च यथा भवंति तथा । पुरः पुरीः कृणुध्वमायसीरन्यैरधृष्टाश्च । चश्मसोऽदनसाधनो मा सुस्रोत् । मा स्रवेत् । तं दृंहतेति । इति देवतानुग्रहलब्धबलो वदति ॥

आ वो धियं यज्ञियां वर्त ऊतये देवा देवीं यजतां यज्ञियामिह ।
सा नो दुहीयद्यवसेव गत्वी सहस्रधारा पयसा मही गीः ॥ ९॥
आ । वः । धियं । यज्ञियां । वर्ते । ऊतये । देवाः । देवीं । यजतां । यज्ञियां । इह ।
सा । नः । दुहीयत् । यवसाऽइव । गत्वी । सहस्रऽधारा । पयसा । मही । गीः ॥ ९॥

हे देवाः स्तोतार ऋत्विजः वो युष्माकमूतये यज्ञियां यज्ञार्हां धियं बुद्धिमा वर्ते । प्रवर्तये । यद्वा । हे देवा ऋत्विजः वो यज्ञियां धियं युष्माकं कर्तव्यत्वेन संबंधिनीमस्माकमूतये रक्षणाया वर्ते । अपि च हे देवा

एव संबोध्याः । हे देवाः वो युष्माकं धियं बुद्धिमा वर्ते । आवर्तयामि । किमर्थं । ऊतयेऽस्माकं रक्षणाय । कीदृशीं धियं । यज्ञियां यज्ञार्हां देवीं द्योतमानां यजतां पूज्यां । इहास्मिन्यागेऽस्यां भूमौ वा । एको यज्ञियामिति शब्दः पूरणः । सा धीर्नोऽस्माकं दुहीयत् । दुह्यात् । तत्र दृष्टांतः । यवसेव यवसानि भक्षयित्वेव गत्वा पुनर्गोष्ठं गत्वा । पीत्वोतिवत् । पयसा सहस्रधारा मही महती गौर्यथा दुग्धे तद्वत् ॥

आ तू षिंच हरिमीं द्रोरुपस्थे वाशीभिस्तक्षताश्मन्मयीभिः ।
परि ष्वजध्वं दश कक्ष्याभिरुभे धुरौ प्रति वहिं युनक्त ॥ १० ॥
आ । तु । सिंच । हरिं । ईं । द्रोः । उपऽस्थे । वाशीभिः । तक्षत । अश्मन्ऽमयीभिः ।
परि । स्वजध्वं । दश । कक्ष्याभिः । उभे इति । धुरौ । प्रति । वहिं । युनक्त ॥ १० ॥

हे अध्वर्यो स्वमेनं हरिं हरितवर्णं सोमं द्रोर्द्रुमविकारस्य पात्रस्योपस्थ उपर्या सिंच । आसेकं कुरु । त्विति पूरणः । तदर्थं हे पात्रसंपादिनः अश्मन्मयीभिरयःशिलासारभूताभिर्वाशीभिस्तक्षत पात्राणि ॥ नकारोपजनश्छांदसः । मयटः टित्त्वाद्ङीप् ॥ तानि पात्राणि सोमपूर्णानि दश दशसंख्याकानि कक्ष्याभिः प्रकारैः पर्यायेण परि ष्वजध्वं । संस्कुरुध्वं । आसादयत । यद्वा । वाशीभिरश्मन्मयीभिर्हविर्धानशकटे तक्षत । ते च दश कक्ष्याभिर्दशसंख्याकाभी रज्जुभिः परि ष्वजध्वं । उभे धुरौ युगसंबंधिन्यौ प्रति वहीं वाहकावनड्वाहौ युनक्त । अथवायं मंत्रश्चयनचेचकर्षणसाधनहलाविषयतया व्याख्येयः ॥

उभे धुरौ वहिरापिष्ट्मानोऽतर्योनेव चरति द्विजानिः ।
वनस्पतिं वन आस्थापयध्वं नि षू दधिध्वमखनंत उत्सं ॥ ११ ॥
उभे इति । धुरौ । वहिः । आऽपिष्ट्मानः । अंतः । योनाऽइव । चरति । द्विऽजानिः ।
वनस्पतिं । वने । आ । अस्थापयध्वं । नि । सु । दधिध्वं । अखनंतः । उत्सं ॥ ११ ॥

हविर्धानशकटस्योभे धुरावापिष्ट्मान आपिशब्दमानो वहिर्हविर्वाहको ऽनड्वान् योनावंतरिव द्विजानिर्द्विजायः । तयोरंतश्चरति । तं वनस्पतिं वनस्पतिविकारं शकटं वने वनसंबंधिनि वृक्षे । मेथीभूत इत्यर्थः । तत्रास्थापयध्वं । यद्वा । वने वननीये देशे आस्थापयध्वं । तत्पश्चात्तत्रं सोमं सु सुष्ठु नि दधिध्वं । सुखं यथा भवति तथा स्थापयतासंद्यां । अभिषवप्रदेशे च पश्चादुत्सं तद्रसमखनंतः संपादयतेत्यर्थः ॥ अथवायमपि मंत्रः कर्षणपरो व्याख्येयः । यस्य लांगलस्योभे धुरावापिष्ट्मानोऽपिशब्दमानो वहिरनड्वान् अंतर्योनाविवेत्यादि समानं । तादृशं वनस्पतिं वनस्पतिविकारं लांगलं वने वननीये वपनार्थं कर्षणप्रदेश आस्थापयध्वं । सु सुष्ठु सर्वत्र तं लांगलं नि दधिध्वं । उत्सं सेकसाधनं गर्तं सिक्तं वा प्रदेशमखनंतः ॥

षष्ठेऽहनि ब्राह्मणाच्छंसिशस्त्रे कपृन्नर इत्येषा । कपृन्नरो यज्ञ प्राचीरजगंतेति चैते । आ० ८. ३. । इति ॥

कपृन्नरः कपृथमुद्धातन चोदयंत खुदत वाजसातये ।
निष्टिग्र्यः पुचमा च्यावयोतय इंद्रं सबाध इह सोमपीतये ॥ १२ ॥
कपृत् । नरः । कपृथं । उत् । धातन । चोदयंत । खुदत । वाजऽसातये ।
निष्टिग्र्यः । पुचं । आ । च्यवय । ऊतये । इंद्रं । सऽबाधः । इह । सोमऽपीतये ॥ १२ ॥

हे नरो नेतार ऋत्विजः एष इंद्रः कपृत् । सुखस्य पूरको यष्टॄणां स्तोतॄणां च । कमिति सुखनाम । तं कपृथं सुखस्य पूरयितारमिंद्रं चोदयत । प्रेरयत । खुदत । खुर्दत । क्रीडयत ॥ खुर्द क्रीडायां भौवादिकः । व्यत्ययेन शः । रेफलोपश्छांदसः ॥ संपिष्ट । संस्कृतेत्यर्थः । किमर्थं । वाजसातयेऽन्नस्य लाभाय । तदेवाह । हे होतः

निष्टिग्र्यः पुत्रं । निष्टिं दितिं स्वसपत्नीं गिरतीति निष्टिग्रीरदितिः । तस्याः पुत्रमिंद्रं सबाधः । सह पापैः प्रयासरूपैः कर्मभिर्बाधंत इति सबाध ऋत्विजः । तथाविधा यूयं सोमपीतये तस्य सोमपानायोतयेऽस्माकं रक्षणाय वा च्यवय ॥ व्यत्ययेनैकवचनं ॥ आच्यावयतेत्यर्थः ॥ ॥ १९ ॥

प्र ते रथमिति द्वादशर्चं तृतीयं सूक्तं । भर्म्यश्वपुत्रो मुद्गल ऋषिः । आद्या तृतीयांत्या चेति तिस्रो बृहत्यः । शिष्टा नव त्रिष्टुभः । द्रुघणो नाम मुद्गरः । तद्देवत्यमिदमिंद्रदेवत्यं वा । तथा चानुक्रांतं । प्र ते मुद्गलो भार्म्यश्व ऋषभेण द्रुघणेन चाजिं जिगायेति द्रौघणं वाद्या तृतीयांत्या च बृहत्य इति ॥ गतो विनियोगः ॥ अचाक्रुः । मुद्गलस्य हृता गावश्चोरैस्त्यक्ता जरन्नवं । स शिष्टं शकटे कृत्वा गत्वैक ऋजुराहवं । द्रुघणं युयुजे ऽन्यच्च चोरमार्गानुसारकः । द्रुघणं चायतः क्षिप्त्वा चोरेभ्यो जगृहे स्वगा इति ॥ तथा निरुक्तेऽपीयं कथा सूचिता । मुद्गलो भार्म्यश्व ऋषिर्वृषभं च द्रुघणं च युक्त्वा संग्रामे व्यवहृत्याजिं जिगाय । नि० ९. २३. । इति ।

प्र ते॒ रथं॑ मिथू॒कृत॒मिंद्रो॑ऽवतु धृष्णु॒या ।
अ॒स्मिन्नाजौ॑ पुरूहूत श्रवा॒य्ये॑ धनभ॒क्षेषु॑ नोऽव ॥१॥
प्र । ते॒ । रथं॑ । मि॒थु॒ऽकृत॑म् । इंद्रः॑ । अ॒व॒तु॒ । धृ॒ष्णु॒ऽया ।
अ॒स्मिन् । आ॒जौ । पु॒रु॒ऽहू॒त॒ । श्र॒वा॒य्ये॑ । ध॒न॒ऽभ॒क्षेषु॑ । नः॒ । अ॒व॒ ॥१॥

हे मुद्गल ते रथं मिथूकृतं मिथःकृतमसहायं कृतं । अथवा मिथुरिति मिथ्यानाम । अश्वादिभिः शून्यं कृतं धृष्णुया धर्षणशील इंद्रोऽवतु । रक्षतु । यद्वा । धृष्णुया धर्षणशीलेन वज्रेण ॥ उभयत्र सुपां सुलुगिति सुपो याजादेशः ॥ अथ प्रत्यक्षकृतः । हे पुरुहूत बहुभिराहूतेंद्र अस्मिन्नाजौ संग्रामेऽपहृतगोभिश्चौरैः कृते संग्रामे । कीदृशे । श्रवाय्ये श्रोतव्ये । विश्रुत इत्यर्थः । शुदक्षीत्यादिना । उ० ३. ९६. । आय्यप्रत्ययः ॥ धनभक्षेष्वस्मासु गोरूपधनभजनकामेषु सत्सु । यद्वा । गोरूपधनस्य भक्षकेषु चौरेषु जेतव्येषु सत्सु । नोऽस्मानव । रक्ष ॥

उत्स्म॒ वातो॑ वहति॒ वासो॑ अस्या॒ अधि॒ रथं॒ यदज॑यत्स॒हस्रं॑ ।
र॒थीर॑भून्मुद्ग॒लानी॒ गवि॑ष्टौ॒ भरे॑ कृतं॒ व्यचेदिंद्रसेना ॥२॥
उत् । स्म॒ । वातः॑ । व॒ह॒ति॒ । वासः॑ । अ॒स्याः॒ । अधि॑ । रथं॑ । यत् । अज॑यत् । स॒हस्र॑म् ।
र॒थीः । अ॒भू॒त् । मु॒द्ग॒लानी॑ । गोऽइ॑ष्टौ । भरे॑ । कृ॒तं॒ । वि । अ॒चे॒त् । इंद्र॑ऽसेना ॥२॥

अस्या रथीरभून्मुद्गलानीति वक्ष्यमाणत्वादस्य मुद्गलस्य पत्न्याः सारथिभूताया वासोऽशुकं वातो वायुरुद्वहति । ऊर्ध्वं प्रापयति । श्रमजनितस्वेदापनयनाय । अथवा शीघ्ररथधावनजनितो वायुरंशुकं चालयतीत्यर्थः । कदेति उच्यते । यदादाधिरथमधिकं रथमारुह्य सहस्रं सहस्रसंख्याकं गोसंघमजयत् तदा । यद्वा गोसहस्रमजयदस्या इति वा योज्यं ॥ यद्योगाज्जयतेर्न निघातः ॥ गविष्टौ गवामपहृतानामेषणे मुद्गलानी मुद्गलस्य स्त्री रथीरभूत् । सारथिरभवत् ॥ छांदस आगुक् ॥ इंद्रसेना स्तुत्या परितुष्टेंद्रस्य सेना । यद्वा । इंद्रस्य शत्रूणां दारयितुर्मुद्गलस्य सेनानीरूपा मुद्गलानी । भरे संग्रामे कृतं संपादितं गोसंघं व्यचेत् । व्यचिनोत् । शत्रुभ्यः पृथक्कृतवती ॥ चयतेर्लङि बहुलं छंदसीति विकरणस्य लुक् ॥

अं॒तर्य॑च्छ॒ जिघां॑सतो॒ वज्र॑मिंद्राभि॒दास॑तः ।
दास॑स्य वा मघवन्नार्य॑स्य वा सनु॒तर्य॑वया व॒धं ॥३॥
अं॒तः । य॒च्छ॒ । जिघां॑सतः । वज्र॑म् । इं॒द्र॒ । अ॒भि॒ऽदास॑तः ।
दास॑स्य । वा॒ । म॒घ॒ऽव॒न् । आर्य॑स्य । वा॒ । स॒नु॒तः । य॒व॒य॒ । व॒धं ॥३॥

हे इंद्र त्रिधांसतो हंतुमिच्छतोऽभिदासतोऽभिदुह्यतः शत्रोर्वज्रमंतर्यच्छ । अंतर्गमय । तदेवाह । हे मघवन्धनवन्निंद्र दासस्य वोपक्षीणस्याल्पस्यार्थस्याभिगंतव्यस्य महतो वा शत्रोर्वधं । वज्रनामैतत् । हननसाधनं वज्रं सनुतः । अंतर्हितनामैतत् । अंतर्हितं गूढं प्रयुज्यमानं यवय । पृथक्कुरु ॥

उन्नो हूदमपिबज्जर्हृषाणः कूटं स्म तृंहदभिमातिमेति ।
प्र मुष्कभारः श्रव इच्छमानोऽजिरं बाहू अभरत्सिषासन् ॥४॥
उन्नः । हूदं । अपिबत् । जर्हृषाणः । कूटं । स्म । तृंहत् । अभिऽमातिं । एति ।
प्र । मुष्कऽभारः । श्रवः । इच्छमानः । अजिरं । बाहू इति । अभरत् । सिसासन् ॥४॥

अत्र वृषभः स्तूयते । वृषभ उन्न उदकस्य हूदमगाधजलाशयमपिबज्जर्हृषाणोऽत्यंतं हृषितः सन् । तथा कूटं पर्वतशृंगं चौरैर्गोपिधानार्थं निहितं तृंहत्स्म । शृंगेण विहिंसितवान् । व्यदारयदित्यर्थः । तथा कृत्वाभिमातिमेति । शत्रुं गच्छति हंतुं । पश्चान्मुष्कभारः प्रवृद्धमुष्कः । प्रवृद्धस्य वृषभस्य हि मुष्कवृद्धिर्भवति । तथा प्रवृद्धो वृषभः श्रवः । श्रूयत इति श्रवो यशः । इच्छमान इच्छन्नजिरं गमनशीलं शत्रुं बाह्व बाहुभ्यां बाहोर्वा प्राभरत् । प्रहृतवान् । यद्वा । अजिरमिति क्षिप्रनाम । क्षिप्रं सिषासन् संभक्तुमिच्छन् बाह्व प्राभरत् । प्रसारितवानित्यर्थः ॥

न्यक्रंदयन्वृपयंत एनममेहयन्वृषभं मध्य आजेः ।
तेन सूभर्वं शतवत्सहस्रं गवां मुन्नलः प्रधने जिगाय ॥५॥
नि । अक्रंदयन् । उपऽयंतः । एनं । अमेहयन् । वृषभं । मध्ये । आजेः ।
तेन । सूभर्वं । शतऽवत् । सहस्रं । गवां । मुन्नलः । प्रऽधने । जिगाय ॥५॥

मुन्नल आह । तेनेति तच्छब्दश्रुतेर्यच्छब्दाध्याहारः । यमेनं वृषभं न्यक्रंदयन् नितरां क्रंदनमकुर्वन् । के । उपयंतः समीपे गच्छंतो नरः । यथा प्रचंडेन क्रंदनेन शत्रवो भीताः पलायंते तथाकुर्वन् । किं । वृषभं वर्षकं सेक्तारमाजेः संग्रामस्य मध्येऽमेहयन् मूत्रपुरीषोत्सर्गं विश्रामार्थं कारितवंतः सूभर्वं । भर्वतिरत्तिकर्मा । शोभनचर्वणादिभक्षकं । तादृशो यथा भवति तथा कृत्वेत्यर्थः । यद्वा । एतन्नोसहस्रविशेषणं । तेनोक्तरूपेण वृषभेण सूभर्वं सुष्ठु यवसास्वादि शतवच्छतोपेतं गवां सहस्रं मुन्नल एतन्नामाहं प्रधने संग्रामे जिगाय । अजैषं ॥

कर्कर्दवे वृषभो युक्त आसीदवावचीत्सारथिरस्य केशी ।
दुधेर्युक्तस्य द्रवतः सहानस ऋच्छंति ष्मा निष्पदो मुन्नलानीं ॥६॥
कर्कर्दवे । वृषभः । युक्तः । आसीत् । अवावचीत् । सारथिः । अस्य । केशी ।
दुधेः । युक्तस्य । द्रवतः । सह । अनसा । ऋच्छंति । स्म । निःऽपदः । मुन्नलानीं ॥६॥

कर्कर्दवे हिंसनाय शत्रूणां वृषभो वर्षिता गौर्युक्त आसीत् । रथे संबद्धोऽभूत् । केशी केशवान् प्रग्रहवानस्य राज्ञो रथस्य वा सारथिः । मुन्नलानीत्यर्थः । सारथ्यभिप्रायेण केशीति पुँल्लिंगता । अवावचीत् । वृषभमयजनकं शत्रुभयजनकं वाक्रोशमकरोत् । अथवा । केशी केशिनी सारथिरस्य । असुमित्यर्थः । असुं वृषभं शब्दमकारयत् ॥ वच परिभाषण इत्यस्य केवलस्यांतर्णीतण्यर्थस्य यङ्लुगंतस्य लुकि रूपं ॥ अथवा । अस्य सारथिः सहायभूतः केशी प्रशस्तकेशो वृषभोऽवावचीत् । भृशमशब्दयत् । एवंभूतस्य दुधेर्दुर्धरस्यानसा सह द्रवतः शीघ्रं शत्रुमध्ये रथेन सह धावतो वृषभस्य भयंकरशब्देन निष्पदो निर्गच्छंतो योद्धारो मुन्नलानीं मुन्नलस्य योषितं सारथिभूतां प्रत्यृच्छंति स्म । अगच्छन्नित्यर्थः ॥ पाद्रित्वादिनर्च्छादेशः ॥ ॥२०॥

उत प्रधिमुदहन्नस्य विद्वानुपायुनग्वंसगमत्र शिक्षन् ।
इंद्र उदावत्पतिमघ्यानामरंहत पद्याभिः ककुद्मान् ॥ ७ ॥
उत । प्रऽधिं । उत् । अहन् । अस्य । विद्वान् । उप । अयुनक् । वंसगं । अत्र । शिक्षन् ।
इंद्रः । उत् । आवत् । पतिं । अघ्यानां । अरंहत । पद्याभिः । ककुत्ऽमान् ॥ ७ ॥

उतापि च विद्वान् स मुन्नलोऽस्य रथस्य प्रधिं । प्रधिरच्छिद्रकाष्ठः प्रांतकाष्ठः । स च रथावयवानामुपलक्षकः । रथावयवमुदहन् । उद्गमयत् । रथं संनाहेत्यर्थः । तदनंतरमत्र रथे वंसगं वननीयगमनं वृषभं शिक्षन्शिक्षयन्रज्जुषु स्थापयन्नुपायुनक् । रथसमीपे युगेऽयोजयत् ॥ युजेर्लङि तिपो हल्ङ्यादिलोपः ॥ एवं सतींद्रो देवोऽघ्यानामहंतव्यानां गवां पतिमुदावत् । उत्कृष्टमावत् । रक्षामकरोत् । पश्चात्ककुद्मान्वृषभः पद्याभिः सरणिभिररंहत । वेगेनागमत् । रहिर्गत्यर्थः ॥

शुनमष्ट्रावचरत्कपर्दी वरत्रायां दारुनह्यमानः ।
नृम्णानि कृण्वन्बहवे जनाय गाः पस्पशानस्तविषीरधत्त ॥ ८ ॥
शुनं । अष्ट्राऽवी । अचरत् । कपर्दी । वरत्रायां । दारु । आऽनह्यमानः ।
नृम्णानि । कृण्वन् । बहवे । जनाय । गाः । पस्पशानः । तविषीः । अधत्त ॥ ८ ॥

शुनमिति सुखनाम । सुखं यथा भवति तथा । अष्ट्रावी । अष्ट्रा प्रतोदः । तद्वान् ॥ छांदसो विनिः ॥ कपर्दी कपर्दवानचरत् । संचरति । किं कुर्वन् । वरत्रायां वध्र्यां दारु काष्ठं रथांगभूतमानह्यमानः सर्वतो बध्नन् । पुनः किं कुर्वन् । बहवे जनाय स्वपुत्रभृत्यादिलक्षणाय नृम्णानि धनानि शत्रुसंबंधीनि सुखानि वा कृण्वन् । गाः पस्पशानः स्पृशन् ॥ स्पश बाधनस्पर्शनयोः । छांदसो लिटि कानच् ॥ एवं कुर्वंस्तविषीर्बलान्यधत्त । धत्ते । जयं प्राप्नोतीत्यर्थः ॥

इमं तं पश्य वृषभस्य युंजं काष्ठाया मध्ये दुघणं शयानं ।
येन जिगाय शतवत्सहस्रं गवां मुन्नलः पृतनाज्येषु ॥ ९ ॥
इमं । तं । पश्य । वृषभस्य । युंजं । काष्ठायाः । मध्ये । दुऽघनं । शयानं ।
येन । जिगाय । शतऽवत् । सहस्रं । गवां । मुन्नलः । पृतनाज्येषु ॥ ९ ॥

कंचन सखायं सेनादिसहायाभावेन जयविषय उपहासं कुर्वाणं प्रति ब्रवीति । राजा द्रुघणेन वृषभेण चाजिं जिगायेत्युक्तवान् । पूर्वं वृषभो वर्णितः । अत्र द्रुघणो वर्ण्यते । हे सखे तमिमं द्रुघणं पश्य । कीदृशमिममिति उच्यते ॥ युजेरसमासे । पा० ७. १. ७१. । इति नुम् ॥ युंजं । युज्यत इति युक् सखा । वृषभस्य सखिभूतं । वृषभो यावंतमर्थं साधयति तावंतमेव साधयंतमित्यर्थः । पुनः कीदृशं । काष्ठाया मध्ये । आज्यंतोऽपि काष्ठोच्यत इति निघंटवः । २. १५. । आज्यंतस्य मध्ये । संग्राम इत्यर्थः । तत्र शयानं हंतव्यान्सर्वान्हत्वा सुखेन स्वपंतं निर्व्यापारत्वेन वर्तमानं । ईदृशं द्रुममयं घनं पश्येत्यर्थः । येन द्रुघणेन शतवच्छतोपेतं गवां सहस्रं पृतनाज्येषु संग्रामेषु जिगाय अहमजैषं तमिमं पश्येति समन्वयः ॥ जयतेर्लिट् । सनिटोर्जेरित्यभ्यासादुत्तरस्य कुत्वं । मिपो णल् ॥

आरे अघा को न्वित्था ददर्श यं युंजंति तम्वा स्यापयंति ।
नास्मै तृणं नोदकमा भरंत्युत्तरो धुरो वहति प्रदेदिशत् ॥ १० ॥

आरे । अघा । कः । नु । इत्था । ददर्श । यं । युंजंति । तं । ऊं इति । आ । स्थापयंति ।
न । अस्मै । तृणं । न । उदकं । आ । भरंति । उत्ऽतरः । धुरः । वहति । प्रऽदेदिशत् ॥१०॥

य आरे समीप एवाघाघानि दुःखानि शत्रुरूपाणि करोति तं को नरो न्विदानीमित्येतं ददर्श । पश्यति । किंच यं द्रुघणं युंजंति रथे तमु तमेवा स्थापयंति । आरोहयंतीत्यर्थः । अथवा यं रथे युंजंति तमेव प्रहरणार्थमा स्थापयंति । उभयविधं कार्यमेकः करोतीत्यर्थः । किंचास्मै तृणं ना भरंति । नाहरंति । तथोदकं नाहरंति ॥ हव्यहोर्भ इति भत्वं ॥ ईदृशो द्रुघण उत्तरो दक्षिणस्य वृषभस्य स्वयमुत्तरः सन् धुरो रथभारस्य रथधुरं वहति प्रदेदिशत् प्रकर्षेण जयं स्वामिने प्रदिशन् शत्रूणां वा भयं प्रदिशन् वहति ॥ दिश अतिसर्जने इत्यस्माद्बहुलगंताच्छतरि रूपं ॥

परिवृक्तेव पतिविद्यमानद् पीप्याना कूचक्रेणेव सिंचन् ।
एषा चिदृथ्या जयेम सुमंगलं सिनवदस्तु सातं ॥११॥
परिवृक्ताऽइव । पतिऽविद्यं । आनट् । पीप्याना । कूचक्रेणऽइव । सिंचन् ।
एषऽएथ्या । चित् । रथ्या । जयेम । सुऽमंगलं । सिनऽवत् । अस्तु । सातं ॥११॥

अत्र सुन्वलानी सारथिः स्तूयते । एषा सुन्वलानी परिवृक्तेव ॥ वृजी वर्जने ॥ परित्यक्ता पत्या पत्या वियुक्ता योषिदिव । सा यथा पतिविद्यं । विद्यो वेद्यो लंभनीयः । पतिश्चासौ विद्यश्च । पतिविद्यमानश्चेति तद्वत्पतिविद्यमानट् ॥ आनड् व्याप्निकर्मा । नशेर्लुङि मंत्रे घसेति च्लेर्लुक् । छंदस्यपि दृश्यते । पा० ६. ४. ७३. । इत्यनजादीनामप्यडागमः । अश्नोतेर्लिटि वा णलो पप्कांदसः ॥ तथा पतिसमीपं सारथिस्त्वेनागत्य पीप्याना वर्धमाना भवति । किमिव । कूचक्रेणेव सिंचन् । कुः पृथिवी । तस्याश्चक्रो वलयः कूचक्रः । तेन वर्षणीयस्त्वेन निमित्तेन सिंचन्नलं वर्षन्मेघ इव । स यथांतरिक्षे स्वल्पमाचोऽपि वर्षणसमये महान्भवति तद्वदियमपि शत्रुमध्ये शरधारा वर्षती वर्धत इत्यर्थः । तथैषेथ्या । एषितव्यो गोसंघ एषः । तमिच्छतीत्येषेथी । ईदृश्या तया रथ्या सारथिभूतया जयेम शत्रुभिरपहृतं गोसंघं । तस्याः सातं दत्तं संभजनं वा सुमंगलं शोभनमंगलवत् सिनवत् । सिनमन्नं । तद्वस्त्वस्तु । गोरूपान्नवच्च भवतु ॥

त्वं विश्वस्य जगतश्चक्षुरिंद्रासि चक्षुषः ।
वृषा यदाजिं वृषणा सिषाससि चोदयन्वध्रिणा युजा ॥१२॥
त्वं । विश्वस्य । जगतः । चक्षुः । इंद्र । असि । चक्षुषः ।
वृषा । यत् । आजिं । वृषणा । सिसाससि । चोदयन् । वध्रिणा । युजा ॥१२॥

सूक्तस्य विकल्पेनेंद्रत्वादादाविंद्रस्य स्तुतत्वादंतेऽपींद्रः स्तूयते । हे इंद्र त्वं विश्वस्य सर्वस्य जगतश्चक्षुश्चक्षुष्मतः पश्यतो वा जगतश्चक्षुरसि । प्रत्येकमुत्पत्तिविशिष्टचक्षुःसद्भावेऽपि सर्वस्य साधारणं चक्षुरसि । त्वया द्रष्ट्यानैहिकामुष्मिकपदार्थान्पश्यंतीत्यर्थः । त्वामेव हि यज्ञादिना लब्ध्वा पुरुषार्थान्साधयंति । यद्वा । विश्वस्य जगतो यन्नित्यं चक्षुरसि तस्यापि चक्षुषस्त्वं चक्षुरसि । यस्मात्तृषाभिमतवर्षकस्त्वमाजिं सुन्वलस्य मम संग्रामं वध्रिणा पाशेन युजा युजौ युक्तौ वृषणा वृषणौ वर्षकावश्वौ रथे योजयित्वा चोदयञ्शत्रुषु प्रेरयन् सिषाससि आजिं संभक्तुमिच्छसि तस्माच्चक्षुरसि ॥ ॥२१॥

आशुः शिशान इति चयोदशर्चं चतुर्थं सूक्तमिंद्रपुत्रस्याप्रतिरथनाम्न आर्षं । चयोदश्यनुष्टुप् शिष्टास्त्रिष्टुभः । बृहस्पते परि दीयेत्यस्या बृहस्पतिर्देवता । अमीषां चित्तमित्यस्या अप्वाख्या देवी देवता । शिष्टा ऐंद्र्यः । चयोदशी विकल्पेन मारुती । तथा चानुक्रांतं । आशुः सप्तेनेंद्रोऽप्रतिरथश्चतुर्थी बार्हस्पत्योपांत्याप्वादेवंत्याऽनुष्टुम्मारुती वेति ॥ सामिचित्ये क्रतौ चित्यमिषु प्रणीयमानेषु दक्षिणतो व्रजता ब्रह्मणीतत्सूक्तं जप्यं । तथा च

सूत्रितं । दक्षिणतश्च व्रजन्नपत्यास्युः शिशान इति सूक्तं समाप्य । आ० १. १२. । इति । ब्रह्मप्रतिरथं जपित्वा । आ० ४. ८. । इति च ॥ युद्धार्थं राज्ञः सन्नहनेऽनेन सूक्तेन राज्ञिचितव्यः । सूचितं च । अथैनमन्वीक्षेताप्रतिरथशाससौपर्णैः । आ० गृ० ३. १२. १३. । इति ॥

आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनां ।
संक्रंदनोऽनिमिष एकवीरः शतं सेना अजयत्साकमिंद्रः ॥१॥
आशुः । शिशानः । वृषभः । न । भीमः । घनाघनः । क्षोभणः । चर्षणीनां ।
संऽक्रंदनः । अनिऽमिषः । एकऽवीरः । शतं । सेनाः । अजयत् । साकं । इंद्रः ॥१॥

अयमिंद्र आशुः शीघ्रकारी व्यापको वा शिशानो निशितः । शत्रूणां भयजनक इत्यर्थः । क इव । वृषभो न भीमः । बिभेत्यस्मादिति भीमः । तादृशो वृषभ इव । स यथा तीक्ष्णाभ्यां शृंगाभ्यां भीमो भवति तद्वत् । अथवा । शिशानस्तीक्ष्णमतिः ॥ व्यत्ययेनात्मनेपदं ॥ वृषभो न भीमः वृषभो यथा शृंगाभ्यां भयजनकः तद्वच्छत्रूणां भयजनकश्च । घनाघनो घातकः शत्रूणां हंता ॥ पचाद्यच् हंतेर्धश्च । पा० ६. १. १२. ७. । इति द्विर्वचनमभ्यासस्याडागमो घत्वं च धात्वभ्यासयोः ॥ चर्षणीनां । चर्षणयो मनुष्याः । मनुष्याणां द्वेष्याणां क्षोभणः क्षोभयिता । संक्रंदनः सम्यक्क्रंदयिता प्राणिनामाकर्षणेन प्रहरेण वा । अनिमिषश्चक्षुर्निमेषरहितः । सर्वदा स्वयत्नशासनसुखादिकार्येष्वनलस इत्यर्थः । एकवीरः । वीरयत्यभिचारिणमिति वीरः । एकश्चासौ वीरश्च । अथवा । एक एव विक्रांतः । असाहाय्येन कार्यक्षम इत्यर्थः । ईदृशोऽयमिंद्रः शतं सेनाः साकं सहैकयोगेनैवाजयत् । जयति ॥

संक्रंदनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिंद्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥२॥
संऽक्रंदनेन । अनिऽमिषेण । जिष्णुना । युत्ऽकारेण । दुःऽच्यवनेन । धृष्णुना ।
तत् । इंद्रेण । जयत । तत् । सहध्वं । युधः । नरः । इषुऽहस्तेन । वृष्णा ॥२॥

अस्तु नामेंद्र उक्तविधः तथाप्यस्माकं किमिति चेत् आह । संक्रंदनेनानिमिषेण चोक्तलक्षणेन जिष्णुना जयशीलेन युत्कारेण । योधनं युत् । युद्धकारिणा ॥ कर्मण्यण् ॥ दुश्च्यवनेनान्यैरविचाल्येन ॥ च्युङ् प्रुङ् गतौ । कंदसि गत्यर्थेभ्यः । पा० ३. ३. १२९. । इति युच् ॥ धृष्णुना धर्षकेण ईदृशेनेंद्रेण तद्युवं जयत । शत्रुबलं सहध्वं । अभिभवत । हे युधो योद्धारो हे नरो नेतारः ॥ विभाषितं विशेषवचने बहुवचनं । पा० ८. १. ७४. । इति पूर्वस्माविद्यमानवत्त्वनिषेधादुत्तरं निहन्यते ॥ पुनः कीदृशेनेंद्रेणेति । इषुहस्तेन वृष्णा वर्षिणा च ॥

स इषुहस्तैः स निषंगिभिर्वशी संस्रष्टा स युध इंद्रो गणेन ।
संसृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥३॥
सः । इषुऽहस्तैः । सः । निषंगिऽभिः । वशी । संऽस्रष्टा । सः । युधः । इंद्रः । गणेन ।
संसृष्टऽजित् । सोमऽपाः । बाहुऽशर्धी । उग्रऽधन्वा । प्रतिऽहिताभिः । अस्ता ॥३॥

पूर्वमंत्र इंद्रेण जयतेत्युक्तं । अथेंद्रस्य जयसाधनसमर्थत्वं दर्शयति । स इंद्र इषुहस्तैर्भटैर्मरुदादिभिर्वशी वशीलवान् । तथा निषंगिभिर्युक्तः । निषंगः खड्गः । तद्वन्निर्वशी । स इंद्रो युधो युध्यमानः सन् । इषुधनवचनः कः ॥ अथवा युधो युद्धहेतोर्वशेन शत्रुसंघेन सह संसृष्टीभवनशीलः । यत एवंविधोऽतः संसृष्टजित् । ये परस्परैकमत्येन युद्धाय संसृष्टा भवंति तेषां जेता । तथा सोमपाः सोमस्य पाता । बाहुशर्धी । शर्धो बलं ।

बाह्वोर्बलं बाह्वबलं । तद्वान् ॥ मत्वर्थीय इनिः । यद्वा । मृधु प्रसहने । बाह्वभ्यां मृधयत्यभिभवतीति बाह्वमृधी । सुपजातौ णिनिस्ताच्छील्ये । पा० ३. २. ७८. । इति णिनिः ॥ उग्रधन्वोद्यतधन्वा प्रतिहिताभिः मृत्युषु प्रेरिताभिरिषुभिरस्त्रा मारयिता । यच्चेषूनुंचति तच्च वृथा न भवतीत्यर्थः । ईदृशेनेंद्रेण जयतेति संबंधः ॥

बृहस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः ।
प्रभंजन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानां ॥ ४॥
बृहस्पते । परि । दीय । रथेन । रक्षःऽहा । अमित्रान् । अपऽबाधमानः ।
प्रऽभंजन् । सेनाः । प्रऽमृणः । युधा । जयन् । अस्माकं । एधि । अविता । रथानां ॥ ४॥

हे बृहस्पते बृहतां पातः पालयितर्देव रथेन परि दीय । परिगच्छ । दीयतिर्गच्छतिकर्मा । आगत्य च रक्षोहा रक्षसां हंतामित्रांश्च शत्रूनपबाधमानः सर्वतो नाशयन् तथा सेनाः शत्रुसंबंधिनीः प्रभंजन् प्रकर्षेण नाशयन् प्रमृणः प्रकर्षेण हिंसन् ॥ मृङ् हिंसायां । दृगुपधलक्षणः कः ॥ केन हिंसन् । युधा युद्धेन ॥ सावेकाच इति विभक्तेरुदात्तत्वं ॥ जयन्नेवं सर्वत्र जयं प्रतिपद्यमानः ईदृशस्त्वमस्माकं रथानामवितेधि । भव ॥

बलविज्ञायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः ।
अभिवीरो अभिसत्वा सहोजा जैत्रमिंद्र रथमा तिष्ठ गोवित् ॥ ५॥
बलऽविज्ञायः । स्थविरः । प्रऽवीरः । सहस्वान् । वाजी । सहमानः । उग्रः ।
अभिऽवीरः । अभिऽसत्वा । सहःऽजाः । जैत्रं । इंद्र । रथं । आ । तिष्ठ । गोऽवित् ॥ ५॥

सर्वस्य भूतस्य बलं विजानातीति बलविज्ञायः । यद्वा । बलं ममायमिति सर्वैर्बललक्षेण विज्ञायत इति बलविज्ञायः । सर्वस्य बलभूत इत्यर्थः । स्थविरो महान् प्रवीरः प्रकर्षेण वीरः सहस्वान् पराभिभवसामर्थ्यवान् वाजी वेगवान् अन्नवान्वा सहमानः शत्रूणामभिभवितोग्र उद्गूर्णबलोऽभिवीरः । अभिगता वीरा वीर्यवंतोऽनुचरा यस्य स तथोक्तः । अभिसत्वाभिगतसत्वा सहोजाः सहसो बलाज्जातः एवंमहानुभावस्त्वं हे इंद्र जैत्रं जयशीलं रथमा तिष्ठ । अस्मत्सहायार्थमारोढुमर्हसि । त्वं च गोविदुदकस्य स्तुतिर्वा लब्धा वेदिता वा ॥

गोत्रभिदं गोविदं वज्रबाहुं जयंतमज्मं प्रमृणंतमोजसा ।
इमं सजाता अनु वीरयध्वमिंद्रं सखायो अनु सं रभध्वं ॥ ६॥
गोत्रऽभिदं । गोऽविदं । वज्रऽबाहुं । जयंतं । अज्मं । प्रऽमृणंतं । ओजसा ।
इमं । सऽजाताः । अनु । वीरयध्वं । इंद्रं । सखायः । अनु । सं । रभध्वं ॥ ६॥

गोत्रभिदं । गा उदकानि त्रायंत इति गोत्रा मेघाः । यद्वा । गौर्भूमिः । तां त्रायंत इति गोत्राः पर्वताः । तेषां भेत्तारं गोविदुदकस्य लब्धारं वज्रबाहुं वज्रहस्तं ॥ प्रहरणार्थेभ्यः । पा० २. २. ३६. ४. । इति परनिपातः ॥ जयंतं शत्रूनभिभवंतं जयनशीलमज्मं गमनशीलं शत्रुबलमोजसा बलेन जयंतं यद्वाज्माजिं जयंतमोजसा बलेन प्रमृणंतं शत्रूनभिभवंतं ईदृशं महानुभावमिममिंद्रं हे सजाताः सहोत्पन्ना योद्धारः यूयमनु वीरयध्वं । एनमयतः कृत्वानु पश्चाद्वीरयध्वं । वीरकर्म युद्धं कुरुध्वं ॥ भूर वीर विक्रांतौ । वीरशब्दान्तत्करोति तदाचष्ट इति णिच् । हे सखायः परस्परं सखिभूताः यूयमिममिंद्रं संरभमाणमनु सं रभध्वं ॥ ॥ २२॥

अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिंद्रः ।
दुश्यवनः पृतनाषाळयुध्योऽस्माकं सेना अवतु प्र युत्सु ॥ ७॥

अभि । गोत्राणि । सहसा । गाहमानः । अदयः । वीरः । शतऽमन्युः । इंद्रः ।
दुःऽच्यवनः । पृतनाषाट् । अयुध्यः । अस्माकं । सेनाः । अवतु । प्र । युत्ऽसु ॥७॥

अयमिंद्रो गोत्राणभ्राणि मेघान् सहसा बलेनाभि गाहमानः प्रविशन्नदयो निर्दयो वीरो विक्रांतः शतमन्युर्बहुक्रतुर्यज्ञो बहुक्रोधो वा दुश्च्यवनोऽन्यैरचाल्यः ॥ स्वयं पृतनाषाट् शत्रुसेनानामभिभविता ॥ छंदसि सह इति ण्विः । सहेः साडः स इति मूर्धन्यादेशः ॥ अयुध्यः संप्रहर्तुमशक्यः ॥ युध संप्रहारे । छांदसः क्यप् ॥ ईदृगिंद्रोऽस्माकं सेना युत्सु संग्रामेषु प्रावतु । प्रकर्षेण रक्षतु ॥

इंद्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेनानामभिभंजतीनां जयंतीनां मरुतो यंत्वग्रं ॥८॥
इंद्रः । आसां । नेता । बृहस्पतिः । दक्षिणा । यज्ञः । पुरः । एतु । सोमः ।
देवऽसेनानां । अभिऽभंजतीनां । जयंतीनां । मरुतः । यंतु । अग्रं ॥८॥

आसामस्मत्सहायार्थमागतानामयमिंद्रो नेता नायकोऽस्तु । तथा तस्य बृहस्पतिः पुर एतु । एवं दक्षिणा यज्ञः सोमश्च पुर एत्विति प्रत्येकं संबंधः । तथा देवसेनानामभिभंजतीनामस्मदभिज्ञानाभिमुख्येन मर्दयंतीनां जयंतीनां ॥ छंदसीति नाम उदात्तत्वं जयंतीनामित्यत्र बहुलवचनान्न भवति । पा० ६. १. १७८. ॥ तासामग्रं मरुतो यंतु । गच्छंतु ॥

इंद्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रं ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥९॥
इंद्रस्य । वृष्णः । वरुणस्य । राज्ञः । आदित्यानां । मरुतां । शर्धः । उग्रं ।
महाऽमनसां । भुवनऽच्यवानां । घोषः । देवानां । जयतां । उत् । अस्थात् ॥९॥

वृष्णो वर्षकस्येंद्रस्य राज्ञो वरुणस्यादित्यानां मरुतां चोग्रमुद्गूर्णं शर्धो बलमस्माकं भवत्विति शेषः । किंच महामनसामुदारमनसां भुवनच्यवानां च्यावयितॄणां देवानां घोषो जयशब्द उदस्थात् । उत्तिष्ठति ॥ अगूर्ध-कर्मत्वादात्मनेपदाभावः । पा० १. ३. २४. ॥

उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनांसि ।
उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यंतु घोषाः ॥१०॥
उत् । हर्षय । मघऽवन् । आयुधानि । उत् । सत्वनां । मामकानां । मनांसि ।
उत् । वृत्रऽहन् । वाजिनां । वाजिनानि । उत् । रथानां । जयतां । यंतु । घोषाः ॥१०॥

हे मघवन्निंद्र अस्मदीयान्यायुधान्युद्धर्षय । उत्कृष्टं हर्षय । प्रहरणीयेषूद्युक्तानि भवंत्वित्यर्थः । मामकानामस्मदीयानां सत्वनां प्राणिनां सेवकानां मनांसि चोद्धर्षय । हे वृत्रहन्निंद्र वाजिनामश्वानां वाजिनानि वेगा उद्यंतु । तथा जयतां रथानां घोषा उद्यंतु ॥

अस्माकमिंद्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयंतु ।
अस्माकं वीरा उत्तरे भवंत्वस्माँ उ देवा अवता हवेषु ॥११॥

अस्माकं । इंद्रः । संऽऋतेषु । ध्वजेषु । अस्माकं । याः । इषवः । ताः । जयंतु ।
अस्माकं । वीराः । उत्ऽतरे । भवंतु । अस्मान् । उं इति । देवाः । अवत । हवेषु ॥ ११ ॥

अस्माकं संबंधिष्वेव समृतिषु परसेनां संप्राप्तेषु ध्वजेषु ध्वजवत्सु सैनिकेष्विंद्रो रक्षिता भवतु । तथास्माकं या इषवः संति ता एव जयंतु शत्रून् । तथास्माकं वीरा भटा उत्तर उपरि भवंतु । हे देवाः अस्माँ उ अस्मानेवावत रक्षत हवेषु संग्रामेषु ॥

अमीषां चित्तं प्रतिलोभयंती गृहाणांगान्यप्वे परेहि ।
अभि प्रेहि निर्दह हृत्सु शोकैरंधेनामित्रास्तमसा सचंतां ॥ १२ ॥
अमीषां । चित्तं । प्रतिऽलोभयंती । गृहाण । अंगानि । अप्वे । परा । इहि ।
अभि । प्र । इहि । निः । दह । हृत्ऽसु । शोकैः । अंधेन । अमित्राः । तमसा । सचंतां ॥ १२ ॥

हे अप्वे पापाभिमानिनि देवते अमीषां योद्धृणां शत्रूणां चित्तं प्रतिलोभयंती विमोहयंत्यंगानि तेषामवयवान्शिरआदिकान्गृहाण । स्वीकुरु । अभि प्रेहि । अभिगच्छ । तेषां समीपं गत्वा च हृत्सु हृदयेषु शोकैर्निर्दह । नितरां भस्मीकुरु । तेऽमित्रा अस्मच्छत्रवोऽधेन तमसा सचंतां । संगच्छंतां ॥

प्रेता जयता नर इंद्रो वः शर्म यच्छतु । उग्रा वः संतु बाहवोऽनाधृष्या यथासथ ॥ १३ ॥
प्र । इत । जयत । नरः । इंद्रः । वः । शर्म । यच्छतु । उग्राः । वः । संतु । बाहवः ।
अनाधृष्याः । यथा । असथ ॥ १३ ॥

हे नरो नेतारः संग्रामस्य निर्वोढारो योद्धारः प्रेत । प्रकर्षेण गच्छत । गत्वा च जयत तान्प्रतिभटान् ॥ तिङः परत्वात्तिङ्ङतिङ इति निघाताभावः ॥ वो युष्माकमिंद्रः शर्म सुखं यच्छतु । प्रयच्छतु । वो बाहव उग्रा उन्नूर्णबलाः संतु । भवंतु । अनाधृष्या अन्यैरनभिभाव्या यथा यूयमसथ भविष्यथ तथोग्राः संतु वो बाहवः ॥ ॥ २३ ॥

असावीत्येकादशर्चं पंचमं सूक्तं । वैश्वामित्रस्याष्टकस्यार्षं वैष्टुभमिंद्रं । तथा चानुक्रांतं । असाव्येकादशाष्टको वैश्वामित्र इति ॥ गतः सूक्तविनियोगः ॥

असावि सोमः पुरुहूत तुभ्यं हरिभ्यां यज्ञमुप याहि तूयं ।
तुभ्यं गिरो विप्रवीरा इयाना दधन्विर इंद्र पिबा सुतस्य ॥ १ ॥
असावि । सोमः । पुरुऽहूत । तुभ्यं । हरिऽभ्यां । यज्ञं । उप । याहि । तूयं ।
तुभ्यं । गिरः । विप्रऽवीराः । इयानाः । दधन्विरे । इंद्र । पिब । सुतस्य ॥ १ ॥

हे पुरुहूत बहुभिः स्तोतृभिराहूत तुभ्यं त्वदर्थं सोमोऽसावि । अभिषुतोऽभूत् ॥ षुञ् अभिषव इत्यस्मात्कर्मणि लुङ् ॥ अतो हरिभ्यां हरितवर्णाभ्यामश्वाभ्यां यज्ञमस्मदीयं तूयं तूर्णमुप याहि । उपागच्छ । तुभ्यं त्वदर्थं गिरोऽस्मदीयाः स्तुतयो विप्रवीराः । विप्रा मेधाविनो वीरा विशेषेण प्रेरयितारः प्रोन्नमयितारो यासां तास्तथोक्ताः । इयाना गमनशीला दधन्विरे । गम्यंते । अस्माभिर्युष्मत्प्रीणनाय प्राप्यंत इत्यर्थः ॥ इङ् गतौ । ताच्छील्यिकः शानच् । छांदसो विकरणस्य लुक् । धविर्गत्यर्थः । इदित्त्वान्नुम् । कर्मणि च्छांदसो लिट् ॥ यत एवमतः सुतस्याभिषुतस्यांशुं सुतं सोमं वा पिब ॥

प्रथमे पर्याये ब्राह्मणाच्छंसिशस्त्रेऽप्सु धूतस्येत्येषा याज्या । सूचितं च । अप्सु धूतस्य हरिवः पिबेहेति याज्या । आ० ६. ४. । इति ॥

अप्सु धूतस्य हरिवः पिबेह नृभिः सुतस्य जठरं पृणस्व ।
मिमिक्षुर्यमद्रय इंद्र तुभ्यं तेभिर्वर्धस्व मदमुक्थवाहः ॥२॥
अप्ऽसु । धूतस्य । हरिऽवः । पिब । इह । नृऽभिः । सुतस्य । जठरं । पृणस्व ।
मिमिक्षुः । यं । अद्रयः । इंद्र । तुभ्यं । तेभिः । वर्धस्व । मदं । उक्थऽवाहः ॥२॥

हे हरिवः ऋक्सामे वा इंद्रस्य हरी । ऐ० ब्रा० २. २४. । इति श्रुतेः स्तोत्रशस्त्राधारभूताभ्यामृक्सामाभ्यां हरिभ्यां तद्वन्निंद्र अप्स्विकधानादिषूदकेषु धूतस्य कंपितस्य । अभिषुतस्येत्यर्थः । तथा नृभिः कर्मनेतृभिः कर्मनिर्वाहकैरध्वर्य्वादिभिः सुतस्याभिषुतस्य ॥ उभयत्र क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानसंज्ञायां चतुर्थ्यर्थे बहुलं छंदसीति षष्ठी ॥ ईदृशं सोममिहास्मिन्यज्ञे पिब । पीत्वा च जठरं स्वकीयं पृणस्व । पूरय च ॥ चादिलोपे विभाषेति प्रथमा तिङ्भिन्नैर्न निहन्यते ॥ यं सोममद्रयोऽभिषवग्रावाणो हे इंद्र तुभ्यं त्वदर्थं मिमिक्षुः सेक्तुमभिषोतुमैच्छन् । अभिषवमकुर्वन्नित्यर्थः ॥ मिह सेचन इत्यस्य सनि सिज्झुसि रूपं ॥ हे उक्थवाह उक्थैः शस्त्रैरुह्यमान तेभिस्तैर्मदं वर्धस्व ॥

द्वितीये पर्याये ब्राह्मणाच्छंसिनः प्रोग्यामित्येषा याज्या । सूचितं च । अश्वावति प्रथमः प्रोग्यां पीतिं वृणे इयर्मि सत्यामिति याज्या । आ० ६. ४. । इति ॥

प्रोग्यां पीतिं वृणे इयर्मि सत्यां प्रये सुतस्य हर्यश्व तुभ्यं ।
इंद्र धेनाभिरिह मादयस्व धीभिर्विश्वाभिः शच्या गृणानः ॥३॥
प्र । उग्यां । पीतिं । वृणे । इयर्मि । सत्यां । प्रऽये । सुतस्य । हरिऽअश्व । तुभ्यं ।
इंद्र । धेनाभिः । इह । मादयस्व । धीभिः । विश्वाभिः । शच्या । गृणानः ॥३॥

हे हर्यश्वेंद्र वृणे वर्षकाय तुभ्यमुग्यामुद्गूर्णां सत्यां पीतिं सोमपानं प्रेयर्मि । प्रेरयामि । किमर्थं । प्रये प्रगमनाय । कस्य पीतिं । सुतस्याभिषुतस्य । अतो हे इंद्र शच्या शक्त्या कर्मणा वा युक्तो गृणानः स्तूयमानस्त्वं विश्वाभिः सर्वाभिर्धेनाभिः स्तुतिवाग्भिर्विश्वाभिर्धीभिः सर्वैः कर्मभिश्चेहास्मिन्यागे मादयस्व । तृप्यस्व ॥ मद तृप्तियोगे । आत्मनेपदं ॥

तृतीये पर्याये ब्राह्मणाच्छंसिनः शस्त्र ऊती शचीव इत्येषा याज्या । ऊती शचीवस्तव वीर्येणेति याज्या । आ० ६. ४. । इति सूचितं ॥

ऊती शचीवस्तव वीर्येण वयो दधाना उशिजं ऋतज्ञाः ।
प्रजावदिंद्र मनुषो दुरोणे तस्थुर्गृणंतः सधमाद्यासः ॥४॥
ऊती । शचीऽवः । तव । वीर्येण । वयः । दधानाः । उशिजः । ऋतऽज्ञाः ।
प्रजाऽवत् । इंद्र । मनुषः । दुरोणे । तस्थुः । गृणंतः । सधऽमाद्यासः ॥४॥

हे शचीवः शक्तिवन्निंद्र तवोत्यूत्या रक्षणेन तव वीर्येण वयोऽन्नं प्रजावत्प्रजोपेतं दधाना धारयंत उशिजस्त्वामेव कामयमाना ऋतज्ञा ऋतं यज्ञमहर्जानंतः । अंगिरसः सत्त्रमनुतिष्ठंतः षष्ठेऽहनि प्रयोगमूढाः संतो नाभानेदिष्ठेन पारं गता यतः अतस्तेषामृतज्ञत्वं । ईदृशोऽंगिरसो मनुषो मनुष्यस्य यजमानस्य दुरोणे यज्ञगृहे गृणंतस्त्वां स्तुवंतः सधमाद्यासः सह माद्यंतस्तस्थुः । तिष्ठंति ॥ मादयतेः क्त्यस्त्युटौ बहुलमिति वचनात्कर्तर्यचो यदिति यत् । छांदसः सधादेशः ॥ अतो वयमपि तिष्ठेमेत्यर्थः ॥

प्रणीतिभिष्टे हर्यश्व सुष्टोः सुषुम्नस्य पुरुरुचो जनासः ।
मंहिष्ठामूतिं वितिरे दधानाः स्तोतार इंद्र तव सूनृताभिः ॥५॥
प्रनीतिऽभिः । ते । हरिऽअश्व । सुऽस्तोः । सुऽसुम्नस्य । पुरुऽरुचः । जनासः ।
मंहिष्ठां । ऊतिं । विऽतिरे । दधानाः । स्तोतारः । इंद्र । तव । सूनृताभिः ॥५॥

हे हर्यश्व हरितवर्णाश्वोपेतेंद्र सुष्टोः सुष्ठु स्तूयमानस्य सुषुम्नस्य सुसुखस्य सुधनस्य वा पुरुरुचो बहुदीप्तेस्ते तव प्रणीतिभिः प्रणयनैर्धनादिप्रदानैर्जनासो जनाः स्तोतारः सूनृताभिः प्रियसत्यात्मिकाभिर्वाग्भिः । एतत्प्रणीतिभिरित्यनेन समन्वीयते । वितिरेऽन्येभ्योऽर्थिभ्यो वितरणाय मंहिष्ठामतिशयेन महनीयां तव संबंधिनीमूतिं रक्षां दधाना आसत इति शेषः ॥ ॥२४॥

उप ब्रह्माणि हरिवो हरिभ्यां सोमस्य याहि पीतये सुतस्य ।
इंद्र त्वा यज्ञः क्षममाणमानड् दाश्वाँ अस्यध्वरस्य प्रकेतः ॥६॥
उप । ब्रह्माणि । हरिऽवः । हरिऽभ्यां । सोमस्य । याहि । पीतये । सुतस्य ।
इंद्र । त्वा । यज्ञः । क्षममाणं । आनट् । दाश्वान् । असि । अध्वरस्य । प्रऽकेतः ॥६॥

हे हरिवो हरिवन्निंद्र सुतस्याभिषुतस्य सोमस्य पीतये पानाय ब्रह्माणि परिवृढान्यस्मदीयानि कर्माणि स्तोत्राणि वोप याहि । उपागच्छ । केन साधनेनेति तदुच्यते । हरिभ्यामश्वाभ्यां । ताभ्यां युक्तेन रथेनेत्यर्थः । यद्वा । हरिभ्यां हरिव इति संबंधनीयं । हे इंद्र क्षममाणं त्वा त्वां यज्ञः सोमयाग आनट् । व्याप्नोति ॥ नशेर्लुङि मंत्रे घसेति च्लेर्लुक् । छंदस्यपि दृश्यत इत्याडागमः । अश्नोतेरेव वा लिटि च्छांदसस्तप्रत्ययस्य लोपः । अश्नोतेश्चेति नुडागमः ॥ अध्वरस्य यागस्य प्रकेतः प्रकर्षेण जानंस्त्वं दाश्वानसि । दातासि कर्मफलस्य ॥

सहस्रवाजमभिमातिषाहं सुतेरणं मघवानं सुवृक्तिं ।
उप भूषंति गिरो अप्रतीतमिंद्रं नमस्या जरितुः पनंत ॥७॥
सहस्रऽवाजं । अभिमातिऽसहं । सुतेऽरणं । मघऽवानं । सुऽवृक्तिं ।
उप । भूषंति । गिरः । अप्रतिऽइतं । इंद्रं । नमस्याः । जरितुः । पनंत ॥७॥

सहस्रवाजमपरिमितान्नमपरिमितबलं वाभिमातिषाहमभिमातीनां सर्वतो हिंसकानां शत्रूणामभिभवितारं सुतेरणमभिषुते सोमे रममाणं मघवानं धनवंतं सुवृक्तिं शोभनस्तुतिकमप्रतीतं युद्धेऽन्यैरप्रतिगतमिंद्रं गिरः स्तुतिरूपा वाच उप भूषंति । अलंकुर्वंति । तदेवाह । जरितुः स्तोतुर्नमस्याः स्तुतयः पनंत । स्तुवंति ॥

सप्तापो देवीः सुरणा अमृक्ता याभिः सिंधुमतर इंद्र पूर्भित् ।
नवतिं स्रोत्या नव च स्रवंतीर्देवेभ्यो गातुं मनुषे च विंदः ॥८॥
सप्त । आपः । देवीः । सुऽरणाः । अमृक्ताः । याभिः । सिंधुं । अतरः । इंद्र । पूःऽभित् ।
नवतिं । स्रोत्याः । नव । च । स्रवंतीः । देवेभ्यः । गातुं । मनुषे । च । विंदः ॥८॥

हे इंद्र त्वदाश्रया सप्तैतत्संख्याका आपोऽम्बूपा देवीर्देव्यो गंगाद्याः सुरणाः सुष्ठु रममाणाः शोभनशब्दा वा ॥ रणिः शब्दार्थः । वशिरण्योरुपसंख्यानं । पा० ३. ३. ५८. ३. । इति भावेऽप् । बहुव्रीहावाषुदात्तं द्व्यच्छंद-

सीत्युत्तरपदाद्युदात्तत्वं ॥ अमृता अहिंसिताः प्रवहंतीति शेषः । हे इंद्र पुर्भित् पुरां भेत्ता त्वं याभिर्गंगादिभिः सप्तनदीभिः सिंधुं समुद्रमतरः । प्रावर्धय इत्यर्थः । यद्वा । सप्त सर्पणस्वभावा उत्तालवणा आपो देवस्त्वया सृष्टाः प्रवहंति याभिः सिंधुं नदीमतरः । किंच त्वं नवतिं नव च नवोत्तरनवतिसंख्याकाः स्रवंतीः प्रवहंतीः स्रोत्याः । नदीनामेतत् । नदीर्देवेभ्यो हविरर्थं मनुषे मनुष्याय भोगार्थं च गातुं गंतव्यं तासां मार्गं च विदः । अलभथाः ॥

अपो महीरभिशस्तेरमुंचोऽजागरास्वधि देव एकः ।
इंद्र यास्त्वं वृचतूर्ये चकर्थ ताभिर्विश्वायुस्तन्वं पुपुष्याः ॥ ९॥
अपः । महीः । अभिऽशस्तेः । अमुंचः । अजागः । आसु । अधि । देवः । एकः ।
इंद्र । याः । त्वं । वृचऽतूर्ये । चकर्थ । ताभिः । विश्वऽआयुः । तन्वं । पुपुष्याः ॥९॥

हे इंद्र महीर्महतीरप उदकान्यभिशस्तेरभिशंसकाद्वृचादमुंचः । आसु मुक्तास्वप्सु देवस्त्वमेक एक एवासहायः सन्नधजागः । अप्रमत्तो भवसि । यद्वा । अधीति सप्तम्यर्थानुवादी । हे इंद्र त्वं या अपो वृचतूर्ये वृचहत्यायां चकर्थ करोषि ताभिरद्भिर्विश्वाभिः सर्वाभिस्त्वं तनुं स्वकीयं शरीरं पुपुष्याः । पोषयेः ॥ पुष पुष्टावित्यस्य व्यत्ययेन शपः ॥

वीरेण्यः क्रतुरिंद्रः सुशस्तिरुतापि धेना पुरुहूतमीट्टे ।
आर्दयद्वृचमकृणोदु लोकं ससाहे शक्रः पृतना अभिष्टिः ॥ १०॥
वीरेण्यः । क्रतुः । इंद्रः । सुऽशस्तिः । उत । अपि । धेना । पुरुऽहूतं । ईट्टे ।
आर्दयत् । वृचं । अकृणोत् । उं इति । लोकं । ससहे । शक्रः । पृतनाः । अभिष्टिः ॥१०॥

इंद्रो वीरेण्यो वीरैर्गंतव्योऽतिशयेन वीरो वा क्रतुः कर्मवान् सुशस्तिः शोभनस्तुतिकः । उतापि च । अपीत्यनर्थकः । अपि च धेना । वाङ्नामैतत् । प्रीणयित्री स्तुतिवाक् पुरुहूतमिंद्रमीट्टे । स्तौति पूजयति वा । यत उत्तालवणः अतः स्तौतीत्यर्थः । किंचायं वृचमावरकमेतन्नामकमसुरमार्दयत् । हतवानित्यर्थः । उ अपि च लोकं । लोक्यत इति लोकः प्रकाशः । तमकृणोत् । अकरोत् । आवरकमसुरं हत्वा प्रकाशं कृतवानित्यर्थः । न केवलं तमेकमेव अपि तु शक्र इंद्रोऽभिष्टिः शत्रूणामभिगंता पृतनाः शत्रुसेनाः ससाहे । अभ्यभवत् ॥

ध्रुवं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां ॥ ११॥
ध्रुवं । हुवेम । मघऽवानं । इंद्रं । अस्मिन् । भरे । नृऽतमं । वाजऽसातौ ।
शृण्वंतं । उग्रं । ऊतये । समत्ऽसु । घ्नंतं । वृत्राणि । संऽजितं । धनानां ॥११॥

पूर्वं व्याख्याता ॥ ॥ २५ ॥

कदेत्येकादशर्चं षष्ठं सूक्तं । ऐंद्रकुत्सपुत्रो नाम्ना दुर्मित्रो गुणतः सुमित्रः यद्वा नाम्ना सुमित्रो गुणतो दुर्मित्र ऋषिः । हरी यस्य सुयुजा वज्रं यश्चक्र इति द्वे पिपीलिकमध्ये एकादशपदे त्रैकादशके उष्णिहौ । अंत्या त्रिष्टुप् । आद्या गायत्री वा । अक्षरव्यूहेन पक्षांतर उष्णिक् । शिष्टाभिः सप्तोष्णिहः । तथा चानुक्रांतं । कदा क्रौत्सो दुर्मित्रो नाम्ना सुमित्रो गुणतः सुमित्रो वा नाम्ना दुर्मित्रो गुणत औष्णिहं हरी वज्रं पिपीलिकमध्ये त्रिष्टुबंत्याद्या गायत्री वेति ॥ गतो विनियोगः ॥

कदा वसो स्तोत्रं हर्यत आ वं श्मशा रुधद्वाः । दीर्घं सुतं वाताप्याय ॥१॥
कदा । वसो इति । स्तोत्रं । हर्यते । आ । अवं । श्मशा । रुधत् । वारिति वाः । दीर्घं । सुतं । वाताप्याय ॥१॥

हे वसो वासयितरिंद्र स्तोत्रमस्मत्कर्तृकं हर्यते कामयमानाय कामयमानं त्वां ॥ क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी ॥ कदा कस्मिन्काले ऽव रुधत् । अवरोत्स्यति । अवरुध्य च कदा वाः । वारयिष्यति । तादृशः कालः कदास्माकं संभविष्यतीत्याशास्ते ॥ रुधेर्लुङीरितो वेति च्लेरङादेशः । वारिति वृणोतेर्ण्यंताच्छन्दि च्छंदसः शपो लुक् । छंदस्युभयथेति तिप आर्धधातुकत्वाच्छेरित्यीटीति लोपे हल्ङ्याब्भ्य इति तिलोपः ॥ तत्र दृष्टांतः । अश्नुते व्यश्नवमिति श्मशा कुल्या । लुप्तोपममेतत् । यथा कुल्यातस्तत उदकान्यवरुणद्धि अवरुध्य च वारयति तथेत्यर्थः । किमुद्दिश्यावरोध इति तत्राह । दीर्घं सवनत्रयरूपेणायतं सुतमभिषुतं सोमं प्रति । किमर्थमिति तदाह । वाताप्याय । वातेनाप्यते ऽध्वन्यान्निपात्यत इति वाताप्यमुदकं । तस्य प्रदानायेत्यर्थः ॥

हरी यस्य सुयुजा विव्रता वेरवंतानु शेपा । उभा रजी न केशिना पतिर्दन् ॥२॥
हरी इति । यस्य । सुऽयुजा । विऽव्रता । वेः । अवंता । अनु । शेपा । उभा । रजी इति । न । केशिना । पतिः । दन् ॥२॥

यस्येंद्रस्य हरी हरितवर्णावश्वौ सुयुजा सुष्ठु नियोज्यौ । सुश्लिष्टाविति यावत् । विव्रता । व्रतमिति कर्मनाम । विश्लिष्टकर्माणावर्वंतावरणकुशलौ शेपा शेपवंतौ । मत्वर्थो लुप्यते । प्रशस्तपुंस्त्वावित्यर्थः । उभौभौ रजी न रजसी द्यावापृथिव्याविव यद्वा महांतौ रंजकौ सूर्याचंद्रमसाविव केशिनौ प्रकाशमानौ केशवंतौ वा ईदृशावश्वौ हे इंद्र यस्य ते तव स्वभूतौ तयोः पतिः स्वामी त्वं दन् धनानि प्रयच्छन्ननु वेः । सुतशस्त्वादीन्यनुकामयस्व ॥ दन्निति ददातेः शतरि च्छंदस्युभयथेत्यार्धधातुकत्वादातो लोप इटि चेत्याकारलोपः । अत एव श्लभावश्च ॥

अप योरिंद्रः पापजा आ मर्तो न शश्रमाणो बिभीवान् ।
शुभे यद्युयुजे तविषीवान् ॥३॥
अप । योः । इंद्रः । पापजे । आ । मर्तः । न । शश्रमाणः । बिभीवान् ।
शुभे । यत् । युयुजे । तविषीऽवान् ॥३॥

य इंद्रः पापजे । आ इत्यनर्थकः । पापाज्जायत इति पापजो वृत्रः । तस्मिन्मर्तो न मनुष्य इव शश्रमाणेन सह युद्धे श्राम्यन् बिभीवान् बिभ्यच्च भवति ॥ श्राम्यतेश्छंदसि लिट् । तस्य व्यत्ययेन कानच् ॥ स इंद्रो यदा तविषीवान् मरुद्भिर्बलैर्बलवान्युयुजे युज्यते संपद्यते शुभे शोभार्थं तदानीमप योः । तस्य वृत्रस्यापयोरपयोजिता भवति ॥

सचायोरिंद्रश्चर्कृषे आँ उपानसः सपर्यन् । नदयोर्विव्रतयोः शूर इंद्रः ॥४॥
सचा । आयोः । इंद्रः । चर्कृषे । आ । उपानसः । सपर्यन् । नदयोः । विऽव्रतयोः । शूरः । इंद्रः ॥४॥

आयोः । मनुष्यनामैतत् । मनुष्यस्य स्तोतुश्चर्कृषे पुनःपुनर्विलेखनाय । धनप्रदानायेत्यर्थः । सचा सह दातृभिर्धनैः सहितः । यद्वा । आयोः सचा सहायभूतः । उपानसोऽन उपागतवान् ॥ अत्यादयः क्रांताद्यर्थे द्वितीयया । म० २. २. १८. ४. । इति प्रादिसमासः । अनसंताच्च पुंसकात् । पा० ५. ४. १०३. । इति समासांतष्टच् ॥

आरूढरथ इत्यर्थः । सपर्यन् धनैः स्तोतारं पूजयन् । यद्वा । व्यत्ययेन कर्तृप्रत्ययः । स्तुतिभिर्हविर्भिश्च पूज्यमानः । उक्तगुणविशिष्टः सन्ना । आगच्छति । उपसर्गश्रुतेरुचितक्रियाध्याहारः । कीदृश इंद्रः । नद्योर्हविषाशब्दं कुर्वतोर्विव्रतयोर्विशिष्टकर्मणोरश्वयोर्नियंता शूरो विक्रांतः ॥

अधि यस्तस्थौ केशंवंता व्यचंस्वंता न पुष्ट्यै । वनोति शिप्रांभ्यां शिप्रिणीवान् ॥५॥
अधि । यः । तस्थौ । केशऽवंता । व्यचस्वंता । न । पुष्ट्यै । वनोति । शिप्रांभ्यां । शिप्रिणीऽवान् ॥५॥

य इंद्रः केशवंता केशिनौ व्यचस्वंता व्यचनवंतौ व्याप्तिमंतौ । नित्यनर्थको निपातः । ईदृशावश्वौ पुष्ट्यै पोषणाय यजमानस्यात्मनो वाधि तस्थौ अधितिष्ठति आरोहति ॥ अधिशीङ्स्थासां कर्म । पा० १. ४. ४६. । इति कर्मणोऽधिकरणसंज्ञा ॥ यद्वा । नेति चार्थे । तेन गुणौ समुच्चीयेते । प्रशस्तकेशौ व्यचस्वंतौ चेत्यर्थः । स शिप्राभ्यां हनूभ्यां शिप्रिणीवान्शिप्रवानिंद्रः । एको मत्वर्थीयोऽनुवादः । वनोति । सोमान्याचते ॥ वनु याचने ॥ यद्वा । वनुथतिर्हंतिकर्मा । शत्रून्हिनस्ति ॥ ॥२६॥

प्रास्तौदृष्वौजा ऋष्वेभिस्ततक्ष शूरः शवसा । ऋभुर्न क्रतुभिर्मातरिश्वा ॥६॥
प्र । अस्तौत् । ऋष्वऽओजाः । ऋष्वेभिः । ततक्ष । शूरः । शवसा । ऋभुः । न । क्रतुऽभिः । मातरिश्वा ॥६॥

ऋष्वौजा दर्शनीयबलो व्याप्तबलो वर्ष्वेभिर्दर्शनीयैर्मरुद्भिः सह प्रास्तौत् । स्तुत्यादिकं सम्यक्कृतमनेनेति प्रशंसति । यद्वा । कर्मणि कर्तृप्रत्ययः । प्रकर्षेण स्तुतोऽभूत् । य इंद्रः शूरो विक्रांतो मातरिश्वा वृष्टेर्निर्मातर्यंतरिक्षे श्वसन्वर्तमानः सञ्शवसा बलेन क्रतुभिः क्रियमाणैः कर्मभिः । यद्वा । क्रतुरिति प्रज्ञानाम । बलेन प्रज्ञाभिश्च ततक्ष वृत्रवधादिकं चकार । तत्र दृष्टांतः । ऋभुर्नर्भव इव ॥ सुपां सुलुगिति जसः सुरादेशः ॥ ऋभवो यथा कर्मभिः प्रज्ञाभिश्चानन्यसाधारणरथचमसादिनिर्माणमकुर्वन् तद्वदित्यर्थः ॥

वज्रं यश्चक्रे सुहनांय दस्यवे हिरीमशो हिरीमान् । अरुतहनुरङ्गुतं न रजः ॥७॥
वज्रं । यः । चक्रे । सुऽहनाय । दस्यवे । हिरीमशः । हिरीमान् । अरुतऽहनुः । अङ्गुतं । न । रजः ॥७॥

य इंद्रः सुहनाय सुष्ठु हननीयाय दस्यव उपक्षपयित्रे शत्रवे तस्य वधाय वज्रं प्रहरणसाधनमायुधं चक्रे कृतवान् स त्वं वृजिना शिशीहीत्युत्तरसंबंधः । कीदृश इंद्रः । हिरीमशो हरितश्मश्रुः ॥ पृषोदरादिः ॥ हिरीमान् हरिताश्वो हरितवर्णो वा अरुतहनुरबाधितहनुः । किमिव । अङ्गुतं न रजः । अङ्गुतमिति महन्नाम । रज इति रंजकमंतरिक्षमुच्यते । महदंतरिक्षमिव । तद्वयान्यैरबाध्यं भवति तद्वत् ॥

अवं नो वृजिना शिशीह्यृचा वनेमानृचः । नाब्रह्मा यज्ञ ऋधग्जोषति त्वे ॥८॥
अवं । नः । वृजिना । शिशीहि । ऋचा । वनेम । अनृचः । न । अब्रह्मा । यज्ञः । ऋधक् । जोषति । त्वे इति ॥८॥

हे इंद्र नोऽस्माकं वृजिना वृजिनानि वर्जनीयानि पापान्यव शिशीहि । अत्यर्थं तनूकुरु । विनाशयेत्यर्थः । वयं चर्चा स्तुत्या साधनेनानृचोऽस्तुतिकानयजमानान्वनेम । हिंसाम । अब्रह्मा । ब्रह्म परिवृढं स्तोत्रं । स्तुतिविरहितो यज्ञ ऋधक् सस्तुतिकायज्ञात्पृथग्भूतस्त्वे त्वयि न जोषति । न सेवते त्वां । न प्रीणयतीत्यर्थः ॥ जुषी प्रीतिसेवनयोः । व्यत्ययेन शप् परस्मैपदं च ॥

ऊर्ध्वा यत्ते चेतिनी भूद्यज्ञस्य धूर्षु सद्मन्। सजूर्नावं स्वयशसं सचायोः ॥९॥

ऊर्ध्वा। यत्। ते। चेतिनी। भूत्। यज्ञस्य। धूःऽसु। सद्मन्। सऽजूः। नावं। स्वऽयशसं। सचा। आयोः ॥९॥

हे इंद्र ते तव स्वभूता चेतिनी। चेताम्निचयं। तद्वती चेतिनी क्रिया। सा यदोर्ध्वोन्नता प्रवृत्ता भूत् अभूत्॥ यद्योगादनिघातः॥ कुच स्थान इति। यज्ञस्य यागस्य सद्मन् सदने। केष्विति। धूर्षु कर्मणां वोढृष्वृत्विक्षु। तदानीं सजूर्यजमानेन मरुद्भिर्वा सह प्रीयमाणो वा सन्नायोर्मनुष्यस्य यजमानस्य सचा सह तेन साकं स्वयशसं स्वायत्तयशस्कं यशःसाधनं नावं तरणसाधनं तरणिं। आरोहसीति शेषः। एकमेव रथं यजमान आरोहति स्वतरणार्थं तमेव तस्य साधकमारोहसीत्यर्थः। यद्वा। नावं रथं स्वयशसमायोर्यजमानस्य सचा सहायभूतः सजूस्तेन सह प्रीयमाण आरोहेत्यर्थः॥

श्रिये ते पृश्निरुपसेचनी भूच्छुचये दर्विररेपाः। यया स्वे पात्रे सिंचस उत् ॥१०॥

श्रिये। ते। पृश्निः। उपऽसेचनी। भूत्। श्रिये। दर्विः। अरेपाः। यया। स्वे। पात्रे। सिंचसे। उत् ॥१०॥

हे इंद्र ते तव संबंधिनः सोमस्य श्रिये श्रयणाय पृश्निर्गौः पृश्निवर्णोपसेचनी पयसो दोग्ध्री भूत्। भवतु। तथा दर्विररणिररेपा अपापा सती ते श्रिये हविषः श्रयणाय भूत्। भवतु। यया दर्व्या स्वे स्वकीये पात्रे पानसाधने मुख उत्सिंचसे उपर्याक्षिप्य पिबसि सा श्रिये भूदिति संबंधः॥

शतं वा यदसुर्य प्रति त्वा सुमिच इत्यास्तौदुर्मिच इत्यास्तौत्।
आवो यद्स्युहत्ये कुत्सपुत्रं प्रावो यद्स्युहत्ये कुत्सवत्सं ॥११॥

शतं। वा। यत्। असुर्य। प्रति। त्वा। सुऽमिचः। इत्या। अस्तौत्। दुःऽमिचः। इत्या। अस्तौत्।
आवः। यत्। दस्युऽहत्ये। कुत्सऽपुत्रं। प्र। आवः। यत्। दस्युऽहत्ये। कुत्सऽवत्सं॥११॥

हे असुर्य बलवन्निंद्र। अवध्यत्वेनासुरसंबंधित्वात्। त्वा त्वां प्रति शतं वा शतसंख्याकं धनं। वाशब्देनापरिमितं धनं वा। यद्यदा कामितवानित्यर्थः। यद्यदा च दस्युहत्ये दस्युहननेन शत्रुवधे कुत्सपुत्रं दुर्मित्रमावः रक्षितवानसि। तथा कुत्सवत्सं कुत्सपुत्रं प्रावः प्रकर्षेण रक्षितवानसि॥ अव रक्षणादौ। लङ्याडजादीनामित्याडागमः। पादादित्वादनिघातः। पुनरुक्तिरादरार्था॥ तदानीं सुमित्रो नाम्नेत्यमस्तौत्। तथा दुर्मित्रो गुणत इत्यमस्तौत्। तद्विपरीतं वा द्रष्टव्यं। सुमित्रो नाम्ना दुर्मित्रो गुणत इति कात्यायनेन तथोक्तेः। स इत्येत्यमनेन कृतप्रकारेणास्तौत्। अस्तावीत्। इत्यास्तौदिति द्विरुक्तिः स्तुतिसमाप्त्यर्था॥ ॥२७॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थाञ्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्येऽष्टमाष्टके पंचमोऽध्यायः॥

यस्य निःश्वसितं वेदा यो वेदेभोऽखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
अष्टमे पंचमाध्यायं व्याख्याय श्रुतिकोविदः। सायणार्यस्ततोऽध्यायं षष्ठं च व्याचिकीर्षति ॥

तचोभा उ नूनमित्येकादशर्चमाद्यं सूक्तं। अनुवाकापिक्षया सप्तमं सूक्तं। त्रैष्टुभमश्विदैवत्यं। काश्यपपुत्रो भूतांशो नामर्षिः। तथा चानुक्रम्यते। उभौ भूतांशुः काश्यप आश्विनमिति ॥ अग्नेर्यामेऽच्छावाकातिरिक्तोक्थ्य एतत्सूक्तं। सूचितं च। उभा उ नूनं दैव्या होतारा प्रथमा पुरोहितेति परिधानीया। आ० ९. ११.। इति ॥

उभा उ नूनं तदिदर्थयेथे वि तन्वाथे धियो वस्त्रापसेव।
सध्रीचीना यातवे प्रेमजीगः सुदिनेव पृक्ष आ तंसयेथे ॥१॥
उभौ। ऊं इति। नूनं। तत्। इत्। अर्थयेथे इति। वि। तन्वाथे इति। धियः। वस्त्रा। अपसाऽइव।
सध्रीचीना। यातवे। प्र। ईं। अजीगरिति। सुदिनाऽइव। पृक्षः। आ। तंसयेथे इति ॥१॥

हे अश्विनावुभौ युवां नूनमिदानीं तदिदस्माभिर्दीयमानं हविः क्रियमाणं स्तोत्रमेवार्थयेथे। प्रार्थयथः ॥ अर्थ याच्ञायां चौरादिकः। अनुदात्तेत्। उः पूरणः ॥ संप्रार्थ्य च धियः कर्माणि स्तुतीर्वा वि तन्वाथे। विस्तारयथः ॥ तनु विस्तारे तानादिकः ॥ तत्र दृष्टांतः। अपसेवापस्विनौ कुविंदौ यथा वस्त्रा वस्त्राणि विस्तारयतः ॥ अपःशब्दान्मत्वर्थीयो विनिः। तस्य बहुलं छंदसीति लुक्। प्रातिपदिकस्वरेणांतोदात्तः। उभयत्र सुप आकारः ॥ ईमयं यजमानः सध्रीचीना सध्रीचीनौ सहांचनौ युवां ॥ सहपूर्वादंचतेः क्विनि सहस्य सध्रिरिति सध्र्यादेशः। विभाषांचेरदिक्स्त्रियामिति खः। सुप आजादेशः ॥ तौ यातवे ॥ तुमर्थे तवेन्प्रत्ययः ॥ अभिमतप्राप्त्यर्थं प्राजीगः। प्रकर्षेण स्तौति। यद्वा। युवां प्रति स्तुतीरुद्गिरति ॥ गृ शब्दे। गृ निगरणे वा। एताभ्यां लुङि बहुलं छंदसीति विकरणस्य सुः। बहुलं छंदसीत्यभ्यासस्येत्वं। दीर्घश्छांदसः। गुणे हृते हल्ङ्यादिना तिपो लोपः ॥ किंच सुदिनेव सुदिनेष्वन्नानि यथालंकुर्वंति। यद्वा। सुदिना सुदिनौ। अहोरात्रयोः प्रवर्तकत्वेन तद्वंतौ सूर्याचंद्रमसौ स्वरश्मिभिर्यथान्नान्यलंकुरुतः। तद्वद्युवां पृक्षः। अन्ननामैतत्। भोक्तृभिः संपृच्यंत इति पृक्षोऽन्नानि। आ तंसयेथे। समंतादलंकुरुथः ॥ तसि भूष अलंकारे चौरादिकः ॥

उष्टारेव फर्वरेषु श्रयेथे प्रायोगेव श्वाघ्या शासुरेथः।
दूतेव हि ष्थो यशसा जनेषु मा पथ स्यातं महिषेवावपानात् ॥२॥
उष्टाराऽइव। फर्वरेषु। श्रयेथे इति। प्रायोगाऽइव। श्वाघ्या। शासुः। आ। इथः।
दूताऽइव। हि। स्थः। यशसा। जनेषु। मा। अप। स्यातं। महिषाऽइव। अवऽपानात् ॥२॥

उष्टारेव। उष्टः कामयेते गंतव्यं देशमित्युष्टारौ प्रासंगस्य वोढारावनड्वाहाविव ॥ वश्र कांतावित्यस्मात्तृचि च्छांदसं संप्रसारणमिडभावश्च ॥ तौ यथा संपूर्णघासेषु संचरतः तद्वत्फर्वरेषु स्तुतिभिर्हविर्भिश्च पूरयितृषु जनेषु श्रयेथे। तत्स्वीकरणार्थमाश्रयथः ॥ फर्वतिः पूरणार्थः। अस्मादौणादिको रन्प्रत्ययः ॥ प्रायोगेव प्रयोक्तृव्यावनड्वाहाविव ॥ प्रपूर्वाद्युजेः कर्मणि घञ्युपसर्गस्य दीर्घः। यथादिस्वरेणांतोदात्तः ॥ तौ यथा श्वाघ्या श्वाघ्यौ। शु क्षिप्रमतनं श्वाघं। तच्च साधु भवतः तद्वत्। यद्वा। युद्ध्यर्थे प्रयोक्तृव्यावश्वाविव श्वाघ्यौ। श्वाघमिति धननाम। तच्च भवौ। धनस्य साधकावित्यर्थः। तौ युवां शासुः शंसितुः स्तोतुः स्तुतिं प्रत्येथः। आगच्छथः ॥ इण् गतौ आदादिकः ॥ दूतेव दूताविव यथा राज्ञः प्रियतमौ दूतौ जनपदेषु यशस्विनौ भवतः तद्वज्जनेषु स्तोतृषु यशसा यशस्विनौ स्थो हि। भवथः खलु ॥ अस्तेर्लटि रूपं। हियोगादनिघातः ॥ महिषेव महिषाविव यथा आंतौ महिषावपानात्। पीयतेऽस्मिन्निति पानं हृदादि ॥ अधिकरणे ल्युट् ॥ पानमेवावपानं। संनि-

ष्टात्यागादपगच्छतः तद्वद्युवामस्मदीयाद्यविषः स्तोत्राच्च माप स्थातं । मापक्रम्य तिष्ठतं ॥ तिष्ठतेर्लुङि गातिस्थेति सिचो लुक् । न माङ्योग इत्यडभावः ॥

साकंयुजा शकुनस्येव पक्षा पश्वेव चिचा यजुरा गमिष्टं ।
अग्निरिव देवयोर्दीदिवांसा परिज्मानेव यजथः पुरुचा ॥३॥
साकंऽयुजा । शकुनस्यऽइव । पक्षा । पश्याऽइव । चिचा । यजुः । आ । गमिष्टं ।
अग्निःऽइव । देवऽयोः । दीदिऽवांसा । परिज्मानाऽइव । यजथः । पुरुऽचा ॥३॥

शकुनस्येव पक्षिण इव यथा पक्षिणः पक्षा पक्षौ संहत्य वर्तमानौ तद्वत्साकंयुजा साकंयुजौ सहावियुज्य वर्तमानौ भवथः ॥ युजेः सत्सूद्विषेत्यादिना क्विप् ॥ पश्वेव पशू इव ॥ सुप आकारः ॥ तौ यथा चायनीयौ तद्वच्चिचा चिचौ चायनीयौ युवां यजुर्यजनावस्मदीयावा गमिष्टं । आगच्छतं ॥ यजेरौणादिको भाव उसिन्प्रत्ययः । गमिष्टं । गमेर्लेटि सिब्बहुलं लेटीति सिप् । सिप आर्धधातुकत्वान्नमेरिट् परस्मैपदेषु । पा० ७. २. ५८. । इतीडागमः ॥ देवयोर्देवानिच्छतो यजमानस्य यज्ञेऽग्निरिवाग्निर्यथा हविर्भिः स्तुतिभिश्च दीप्यते तद्वद्दीदिवांसा दीदिवांसौ स्तुतिभिर्दीप्तौ भवथः ॥ दीप्यतेः क्वसौ वस्वेकाजाद्धसामिति नियमाद्दिडभावः । वसि लोपे तुजादित्वादभ्यासस्य दीर्घः ॥ परिज्मानेव परिज्मानाविव परितोऽजतो गच्छतः कर्मकरणार्थमिति परिज्मानावध्वर्यू इव स्थितौ युवां पुरुचा बहुषु देशेषु यजथः । देवान्पूजयथः । अश्विनौ हि देवानामध्वर्यू इत्याम्नायात् । ऐ० ब्रा० १. १८. । यद्वा । परिज्मानेव परितो गंतारौ पुरो वा पश्माद्वा तौ यथा बहुषु देशेषु यजथः संगच्छमानौ भवथः ॥ यज देवपूजासंगतिकरणदानेषु । पुरुचा । देवमनुष्येत्यादिना चाप्रत्ययः ॥

आपी वो अस्मे पितरेव पुचोयेव रुचा नृपतीव तुर्यै ।
इर्यैव पुष्ट्यै किरणेव भुज्यै श्रुष्टीवानेव हवमा गमिष्टं ॥४॥
आपी इति । वः । अस्मे इति । पितराऽइव । पुचा । उयाऽइव । रुचा । नृपती इवेति नृपतीऽइव । तुर्यै ।
इर्याऽइव । पुष्ट्यै । किरणाऽइव । भुज्यै । श्रुष्टीवानाऽइव । हवं । आ । गमिष्टं ॥४॥

अस्मे अस्माकं वो युवां । पूजायां बहुवचनं । आपी प्राप्तौ बंधुभूतौ भवथः । पितरेव पितराविव यथाच पितरौ प्रति पुचा पुचौ बंधुभूतौ भवतः तद्वत् । यद्वा । पुचा । षष्ठ्या आकारः ॥ पुचाणां पितरौ बंधू । तथोयेवोयाविव यथोयौ स्वतेजसोर्णावन्यादित्यौ यथा रोचमानौ भवतः तद्वद्रुचा दीप्त्या युक्तौ ॥ रोचतेर्भावे क्विप् । सावेकाच इति विभक्तेरुदात्तत्वं ॥ यद्वा । रुचा रोचमानौ भवथः ॥ रोचतेरिगुपधलक्षणः कः । सुप आकारः ॥ नृपतीव यथा नृणां पालयितारौ राजानौ संभ्रमयुक्तायै सेनायै रक्षकत्वेन भवतः तद्वत्तुर्यै कर्मार्थं त्वरमाणायै संभ्रमवत्यै जनतायै युवामभीष्टदातृत्वेन भवथः ॥ तुर त्वरणे । इगुपधात्कित् । उ० ४. ११९. । इतीन्प्रत्ययः । कृदिकारादक्तिनः । पा० ४. १. ४५.*। इति ङीष् । उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं ॥ इर्यैवेर्यावि व । इरां । तच्च भवति ॥ भावार्थे यत् ॥ अन्नवंतावाढ्यौ स्वजनपरितोषणाय भवतः । तद्वद्युवां पुष्ट्यै धनादिदानेनास्माकं परितोषणाय भवथः । किरणेव किरणाविव यथान्यादित्यकिरणौ सर्वेषां प्रकाशनादिद्वारेण भोगाय भवतः तद्वद्भुज्यै स्तोतॄणां परिभोगाय भवथः । श्रुष्टीवानेव श्रुष्टिवंताविव । श्रुष्टीति क्षिप्रनाम ॥ मत्वर्थीयो वनिप् ॥ तद्वंतावश्वौ यथा लक्ष्यं देशं प्रति शीघ्रं गच्छतः तद्वत् । यद्वा । श्रुष्टीवानेव । श्रुष्टीति सुखनाम । तद्वंतौ पुरुषौ यथा क्रीडार्थमागच्छतः तद्वद्युवां हवमस्मदीयमाह्वानं प्रत्या गमिष्टं । आगच्छतं ॥ हवं । भावेऽनुपसर्गस्येति ह्वयतेरप् संप्रसारणं च ॥

वंसगेव पूषर्यो शिंबाता मिचेव क्षुता शुतरा शातपंता ।
वाजेवोस्रा वयसा घर्म्येष्ठा मेषेवेषा सपर्यो३ पुरीषा ॥५॥
वंसगाऽइव । पूषर्यो । शिंबाता । मिचाऽइव । क्षुता । शुतरा । शातपंता ।
वाजाऽइव । उस्रा । वयसा । घर्म्येऽस्था । मेषाऽइव । इषा । सपर्यो । पुरीषा ॥५॥

वंसगेव वंसगाविव वलनीयगमनौ वृषभाविव तौ यथा पूषर्या पूषर्यौ पूषणौ भवौ । पुष्टावयवाविवार्थः । तद्वद्युवां स्त्रीत्वांनावयवौ ॥ पुष पुष्टौ । अस्मादौणादिको भावेऽरन्प्रत्ययः । तदंताद्भावे छंदसीति यत् । तित्स्वरितं ॥ तथा शिंबाता शिंबातौ । सुखनामैतत् । शिंबेन दुःखानां तनूकरणेन हेतुनातितं प्राप्तमिति । शिञ् निशाने । अस्माच्छिंबमिति वाऽलकादुप्रत्ययो मुक्च निपात्यते । अततेः कर्मणि यत् । सुप आत्मादेशः ॥ सुखकरौ भवथः । मिचेव मिचाविव । मिचशब्देन वर्हणोऽप्युपलक्ष्यते । सहावस्थितमिचावर्हणाविवर्तनौ सत्यभूतौ तद्वद्यथार्थदर्शिनौ भवथः । तथा शुतरा शुतं शुतसंख्याकानि बहूनि रायो धनानि ययोः संति तौ तथोक्तौ ॥ सुपो डादेशः ॥ यद्वा । शुतमनेकमिंद्रियप्रसादादि राति ददातीति शुतरा सुखं । तेन तद्वंतौ । शातपंता शातपंतौ तीक्ष्णस्तुतिकौ ॥ शातं तीक्ष्णं । पंतं । पनतेर्बाऽलकात्तन् । उ० ३. ८६. ॥ यद्वा । शातपंता शुतेन दुःखानां तनूकरणेन पन्यते स्तूयत इति शातपंतं सुखं ॥ शो तनूकरणे । निष्ठा । पनतेस्तन् ॥ तेन युवां सुखवंतौ भवथः । यद्यपि शिंबाता शुतरा शातपंतेति त्रीण्यपि सुखनामानि तथापि कालत्रयेऽप्यश्विनोः सुखकरत्वस्य विवक्षितत्वेन विषयभेदादपौनरुक्त्यं । वाजेव वाजाविव यथाश्वौ घासादिनोन्नतौ संपूर्णावयवौ तद्वद्वयसा हवीरूपेणान्नेन हेतुनोस्रोर्वर्तमानौ । पुष्टाविवार्थः ॥ उस्रा । उस्रैःशब्दात्सुपो डादेशः । डित्त्वाट्टिलोपः ॥ घर्म्येष्ठा घर्मस्थौ । घर्मं दीप्तमंतरिक्षं । तत्संबंधिनि देशे सूर्याचंद्रमसो रूपेणावस्थितौ भवथः । सूर्याचंद्रमसाविति यास्कः । नि० १२. १. । यद्वा । घर्मे प्रवर्ग्ये भवं घर्म्यं हविः । तच्च देवतात्मनावस्थितौ भवथः ॥ तिष्ठतेरन्येभ्योऽपि दृश्यंत इति विच् । तत्पुरुषे कृति बहुलमिति पूर्वपदस्य सप्तम्या अलुक् ॥ मेषेव मेषाविव । तौ यथान्नेन परिचरणीयौ तद्वद्युवामिषा हवीरूपेणान्नेन सपर्या सपर्यौ परिचरणीयौ भवथः ॥ सपरशब्दः कंड्वादिः । सपर्यतिः परिचरणकर्मा ॥ पुरीषा पुरीषौ धनादिदानेन स्तोतॄणां पोषयितारौ यद्वा हविर्भिः पोषणीयौ भवथः । पुरीषं पुष्णातेः पोषयतेर्वेति यास्कः ॥ ॥ १ ॥

सृण्येव जर्भरी तुर्फरीतू नैतोशेव तुर्फरी पर्फरीका ।
उदन्यजेव जेमना मदेरू ता मे जराय्वजरं मरायु ॥६॥
सृण्याऽइव । जर्भरी इति । तुर्फरीतू इति । नैतोशाऽइव । तुर्फरी इति । पर्फरीका ।
उदन्यजाऽइव । जेमना । मदेरू इति । ता । मे । जरायु । अजरं । मरायु ॥६॥

सृण्येव सृण्याविव । सृणिरंकुशः ॥ तत्र साधुरिति यत् ॥ अंकुशार्हौ मत्तगजाविव जर्भरी गात्रविनामं कुर्वंती ॥ जभ जृभि गात्रविनामे । अस्मादौणादिको रिप्रत्ययः ॥ यद्वा । सृण्येव । सृणिर्द्विविधा । मत्तगजशीघ्रावस्थापयित्र्येका । अपरा बाधयित्री ॥ सर्तेः किच्च । उ० ४. ४९. १०४. । इत्नीणादिको निप्रत्ययः । कित्त्वादगुणः । छंदिकारादक्लिन इति ङीष् । सुप आकारः । उदात्तस्वरितयोर्यण इति स्वरितः ॥ तादृशौ सृण्याविव अर्भरी मर्तारावेकश्चैवावस्थापकौ । तथा तुर्फरीतू तर्फितारौ शत्रूणां हंतारौ ॥ अर्भरी । भरतेर्यङ्लुगंताद्दौणादिक इप्रत्ययः । अभ्यासस्य अकारश्छांदसः । तृफ तृंफ हिंसायां । अस्मात्तृजंतस्य तुर्फरीतारावित्यस्य पृषोदरादित्वाद्वर्णविकारः । यद्वा । अस्माद्वाऽलकादौणादिकोऽरीतुप्रत्ययश्च । अत्र णिच्च । द्विविधा सृणिर्भवति मर्ता च हंता च तथाश्विनौ चापि मर्तारौ अर्भरी मर्तारावित्यर्थसुफरीतू हंतारावित्यादि । नि० १३. ५. ॥ नैतोशेव । नितोशतिर्वधकर्मा । नितोशयतीति नितोशः । तस्यापत्यं नैतोशः । तावित्र तुर्फरी शत्रूणां हंतारौ ॥ तृफतिर्हिंसार्थः । अस्मादौणादिको रिप्रत्ययश्च ॥ पर्फरीका पर्फरीकौ शत्रूणां

विदारयितारौ ॥ त्रिफला विशरणे । अस्मात्पर्फरीकादयश्च । उ० ४. २०. । इतीकप्रत्ययांतो निपात्यते ॥ यद्वा । स्रोतृजनानां धनादिदानेन पूरयितारौ ॥ पॄ पालनपूरणयोः । अस्मादीकञि पूर्ववत्सर्वं निपात्यते । फर्वतेः पूरणार्थाद्वा ॥ उदन्यजेव उदन्यजे इव । उदके भवमुदन्यं ॥ पद्दन्नोमास् । पा० ६. १. ६३. । इत्यादिनाऽप्रत्ययमुतिष्वप्युदन्नादेशः ॥ तत्र जाते रथे इव निर्मलौ । कांतियुक्तावित्यर्थः । जेमना जेमनौ जयशीलौ ॥ अयतेरभ्योऽपि दृश्यंत इति मनिन् । दीर्घाभावश्छांदसः ॥ मदेरू बलातिशयेन मत्तौ स्तुत्यौ वा । तौ पूर्वोक्तगुणावश्विनौ युवां मे मदीयं जरायु जरायुजं अत एव मरायु मरणशीलं शरीरमजरं जरारहितं मरणधर्मरहितं कृणुतं ॥ नञो जरमरमित्यमृता इति नञ उत्तरस्य जरशब्दस्यायुदात्तत्वं ॥

पज्रेव॒ चर्चरं॒ जारं॑ म॒रायु॒ क्षम्नेवार्थेषु॒ तर्तरीथ॒ उभ्या ।
ऋभू॒ नाप॑त्खरम॒ज्मा ख॒रज्गु॑र्वा॒युर्न पर्फर॒त्क्षय॒द्रयी॑णां ॥७॥
पज्रा॑ऽइव । चर्चरं॑ । जारं॑ । म॒रायु॑ । क्षम्ऽइ॑व । अर्थे॑षु । तर्तरीथः । उ॒भ्या॑ ।
ऋभू॒ इति॑ । न । आ॒प॒त् । ख॒रम॒ज्मा । ख॒रऽज्गुः॑ । वा॒युः । न । पर्फ॑रत् । क्षय॑त् । र॒यी॒णां ॥७॥

हे उग्रोग्रावुग्रूर्णेतिजस्कावश्विनौ पज्रेव पञ्जाविव प्राञ्जितबलौ वीराविव स्थितौ । यद्वा । पज्रेव ॥ ज्रि ज्रि अभिभवे ॥ पादाभ्यामभिभवंतौ समर्थाविव स्थितौ । युवां चर्चरं चरणशीलं जारं जरायुजं अत एव मरायु मरणशीलं मदीयं शरीरमर्थेषु गंतव्येषु तरीतवीथ्यापदादिषु पज्रेव । उदकनामैतत् । उदकमिव तर्तरीथः । अत्यंतं तारयथः ॥ तॄ प्लवनतरणयोः । यङ्लुगंताल्लटि छंदस्युभयथेति थस आर्धधातुकत्वेनेडागमः । वृतो वा । पा० ७. २. ३८. । इति दीर्घः ॥ ऋभू नर्भू इव । दार्ष्टांतिकसाम्याद्द्विवचनं । ऋभू यथा स्वनिर्मितो रथ आपत् तद्वत् खरमज्मा खरं तीक्ष्णं मज्जयितारौ शोधयितारौ । अत्यंतं शुद्धबलावित्यर्थः ॥ टुमस्जो शुद्धौ । अस्मादौणादिको रप्रत्ययः ॥ तादृशौ युवां खरशुक्षीक्ष्णगतिरतिशयेन वेगवानुभिर्दत्तो रथो युवामापत् । आप्नोत् ॥ आप्लृ व्याप्तौ । लुङि च्लेश्चिण्वदिट्त्वाच्चिरड् ॥ स रथो वायुरिव पर्फरत् । सर्वत्रापूरयत् । सर्वत्र व्याप्नवानित्यर्थः ॥ फर्व पूरणे । अस्माच्छेटि बहुलं छंदसीति शपः सुः । अभ्यासस्य ह्रस्वागमो वर्णव्यत्ययश्च । लेटोऽडाटावित्यडागमः ॥ ततः स रथो रयीणां धनानां धनानि क्षयत् । शृणुभ्य आगमयत् ॥ क्षि निवासगत्योः । अस्मादंतर्णीतण्यर्थाल्लेट्यडागमः ॥ यद्वा । क्षयतिरैश्वर्यकर्मा । धनानामीष्टे ॥ छांदसमुदात्तत्वं ॥

घर्मेव॒ मधु॑ ज॒ठरे॑ स॒नेरू॒ भगे॑विता तु॒र्फरी॑ फारि॒वारं॑ ।
प॒तरे॑व॒ चर॒रा चं॒द्रनि॑र्णि॒ग्नक्ष॒ंगा मन॒न्या॒३ न ज॑ग्मी ॥८॥
घर्मा॑ऽइव । मधु॑ । ज॒ठरे॑ । स॒नेरू॒ इति॑ । भगे॑ऽअविता । तु॒र्फरी॒ इति॑ । फारि॒वा । अर॑ं ।
प॒तरा॑ऽइव । चर॒रा । चं॒द्रऽनि॑र्णिक् । मनः॑ऽअक्षंगा । मन॒न्या॑ । न । ज॒ग्मी॒ इति॑ ॥८॥

घर्मेव घर्मावित्र महावीरावित्र जठरे स्वोदरे मधु मधुनः ॥ षष्ठ्या लुक् ॥ घृतस्य सनेरू संभक्तारौ । वन षण संभक्तौ । अस्मादौणादिक एरुप्रत्ययः ॥ भगेविता । भगो धनं । तद्विषयरक्षायुक्तौ ॥ अक्तिर्भावे क्तः । तत्पुरुषे कृति बहुलमिति बहुलवचनाद्भक्तिरीहावयवलुक् । यद्वा । अवतेर्लुप्तांतस्य सुपो डादेशः । स्वरस्य च्छांदसः ॥ अरमलं तुर्फरी शत्रूणां हिंसितारौ अत एव फारिवा । फारिरायुधं । तद्वंतौ भवतः ॥ स्फुरतिर्वधकर्मा । अस्माण्णिचि चिस्फुरोर्णौ । पा० ६. १. ५४. । इत्वात्वं । तदंतादिप्रत्ययः । सकारस्योपश्छांदसः । छंदसीवनिपाविति मत्वर्थीयो वनिप् । सुपो डादेशः ॥ पतरेव पतरावित्र पतनशीलौ पक्षिणाविव चचरा संचरंतौ चंद्रनिर्णिक् । निर्णिगिति रूपनाम ॥ सुपो लुक् ॥ चंद्रनिर्णिजौ चंद्रसदृशरूपयुक्तौ । यद्वा । चंद्रमाह्लादिकं रूपं ययोस्तौ वर्तेते । मनश्चंगा मनसा प्रसाधनं ययोस्तौ ॥ चंजतिः प्रसाधनकर्मा । अस्माद्भावे घञ् । बहुव्रीहिस्वरः ॥ मनन्या न मनन्यौ यथा । मनसे साधू । स्तुत्यावित्यर्थः ॥ मनसश्चेत्यस्य साधुरिति यत् । तित्स्वरितं ॥ वायुग्रावित्र जग्मी यज्ञं प्रत्यागमनशीलौ भवतः ॥ मनेरादुनसहन इति क्विप्रत्ययः ॥

बृहंतेव गंभरेषु प्रतिष्ठां पादेव गाधं तरते विदाथः ।
कर्णेव शासुरनु हि स्मराथोऽंशेव नो भजतं चिचमप्रः ॥९॥
बृहंताऽइव । गंभरेषु । प्रतिऽस्थां । पादाऽइव । गाधं । तरते । विदाथः ।
कर्णाऽइव । शासुः । अनु । हि । स्मराथः । अंशाऽइव । नः । भजतं । चिचं । अप्रः ॥९॥

बृहंतेव बृहंताविव प्रांशू पुरुषौ यथा गंभरेषु गहनेषु जलेषु प्रतिष्ठां विंदतः तद्वन्नद्गुरेषु गंभीरेषु दुष्प्रवेशेषु स्थानेषु प्रतिष्ठामवस्थितिमासदं युवां विदाथः । जानीथः । पादेव पादाविव यथा तरते । षष्ठ्यर्थे चतुर्थी । तरतः पुरुषस्य पादौ यथा गाधं जलं वित्तः तद्वद्युवां तार्येषु जलेषु गाधं विदाथः । जानीथः ॥ विद ज्ञाने । लेट्यडागमः ॥ कर्णेव यथा कर्णाभ्यां शब्दं विदतुः तद्वद्युवां शासुः शासितारं स्तुतिं कुर्वाणं जनमनु हि स्मराथः । अनुकूलं जानीथः खलु ॥ स्मरतेर्लेट्यडागमः । हियोगादभिघातः । अधीगर्थदयेशां कर्मणि । पा० २. ३. ५२. । इति शासुरित्यस्य षष्ठी । अंशेवांशाविव यथावयवौ तद्वंतं यज्ञं भजेते तद्वद्युवां नोऽस्मदीयं चित्तं चायनीयमप्रः कर्म भजतं । आश्रयतं ॥ अप्रः । आपॄ व्याप्तौ । अस्मादापः कर्माख्यायां ड्रस्नौ नुड् वा । उ० ४. २०७. । इत्यसुन् तत्संनियोगेन ड्रस्नौ नुडागमश्च । नित्स्वरेणाद्युदात्तः ॥

आरंगरेव मध्वेरयेथे सारघेव गवि नीचीनबारे ।
कीनारेव स्वेदमासिष्विदाना क्षामेवोर्जा सूयवसात्सचेथे ॥१०॥
आरंगराऽइव । मधु । आ । ईरयेथे इति । सारघाऽइव । गवि । नीचीनऽबारे ।
कीनाराऽइव । स्वेदं । आऽसिस्विदाना । क्षामऽइव । ऊर्जा । सुयवसऽअत् ।
सचेथे इति ॥१०॥

आरंगरेव ॥ गॄ शब्दे । अस्माद्भाव ऋदोरप् । अरमलं पर्याप्तं गरः शब्दनं । तस्य संबंधिनौ । तखेदमित्यण् ॥ शब्दवंतौ मेघाविव यथा मधु जलं प्रेरयतः तद्वद्युवामेरयेथे । प्रेरयथः ॥ ईर प्रेरणे चौरादिकः ॥ सारघेव सारघाविव । सरघा मधुमक्षिका । सरघेव सारघा ॥ प्रज्ञादिखादण् । पा० ५. ४. ३८. ॥ ते यथा नीचीनबारे नीचीनद्वारे मधुपुष्पे मधु प्रेरयतः तद्वद्युवां नीचीनबारे न्यग्भूतद्वारे गवि गोरूपधरि क्षीरं प्रविपथः । कीनारेव कीनाराविव कुत्सितमनुष्यौ यथा स्विद्यमानौ भवतः तद्वत्स्वेदं स्विद्यमानं जलमासिस्विदाना समंतात् स्वेदयंतौ प्रचारयंतौ भवथः ॥ ञिष्विदा गात्रप्रक्षरणे । अनुदात्तेत् । तस्माच्छांदसे लिटि क्वसावादेशः । क्षामेव । वै जै घे क्षये । अस्मादातो मनिन् । ड्रस्नश्छांदसः ॥ क्षामा क्षीणा गौः सुयवसात् ॥ अदेः क्विप् ॥ शोभनं यवसं घासादिकं भक्षयंती क्षीरक्षेपणान्नेन समवेता यथा भवति तद्वद्युवामूर्जा हवीरूपेणान्नेन सचेथे । संगच्छेथे ॥ षच समवाये ॥

ऋध्याम स्तोमं सनुयाम वाजमा नो मंचं सरथेहोप यातं ।
यशो न पक्वं मधु गोष्वंतरा भूतांशो अश्विनोः काममप्राः ॥११॥
ऋध्याम । स्तोमं । सनुयाम । वाजं । आ । नः । मंचं । सऽरथा । इह । उप । यातं ।
यशः । न । पक्वं । मधु । गोषु । अंतः । आ । भूतऽअंशः । अश्विनोः । कामं । अप्राः ॥११॥

हे अश्विनौ वयं स्तोमं चित्रुत्संचदश्वादिकमृध्याम । ऋध्यास्म । वर्धयेम ॥ ऋधु वृद्धौ । अस्मादाशीर्लिङि लिदाशिषीति यासुटः कित्त्वं ॥ वाजं हविर्लक्षणमन्नं युवाभ्यां सनुयाम । प्रयच्छेम ॥ षणु दाने तानादिकः । विधिलिङ् । वाक्यभेदादभिघातः ॥ तस्माद्युवां सरथा सरथौ समानरथविशिष्टमेव रथमारूढौ संताविहागच्छि-

र्कर्मणि नोऽस्मदीयं मंत्रं मननीयं स्तोत्रमुप यातं। उपागच्छतं। गोप्यंतर्गोरूधस्यवस्थितं पक्वं परिणतं अत एव मधु मधुरं यशो न। यश इत्यन्ननाम। तस्मार्थे। वीराज्यादिलक्षणं महावीरेऽवनीयमानमन्नं चापेक्ष्यागच्छतमिति संबंधः। एवमुक्तप्रकारेण भृतांश एतन्नामर्षिरश्विनोः काममभिलाषमात्मीयाभिः स्तुतिभिरप्राः। आपूरयत्। संपूर्णमकार्षीदित्यर्थः ॥ प्रा पूरणे आदादिकः। व्यत्ययेन मध्यमः ॥ अत्राश्विने सूक्ते सर्वाण्यपि पदानि दुर्बुत्पादान्यस्माभिर्दिङ्मात्रं प्रदर्शितानि। एवं निरुक्तव्याकरणादिभिरर्थविशेषे बुद्धिमद्भिरुह्यानि ॥ ॥ २ ॥

आविरित्येकादशर्चमष्टमं सूक्तं। दिव्यो नामांगिरस ऋषिः। प्रजापतेः सुता दक्षिणा सा वर्षिका। शतधारं वायुमिति चतुर्थी जगती शिष्टा दश त्रिष्टुभः। अनेन सूक्तेनर्त्विग्भ्यो दीयमाना दक्षिणा तद्दातारो यजमाना वा स्तूयंते। अतः सैव देवता। तथा चानुक्रांतं। आविर्दिव्यो दक्षिणा वा प्राजापत्या दक्षिणां तद्दातॄन्वास्तौच्चतुर्थी जगतीति ॥ गतो विनियोगः ॥

आविरभून्महि माघोनमेषां विश्वं जीवं तमसो निरमोचि।
महि ज्योतिः पितृभिर्दत्तमागादुरुः पंथा दक्षिणाया अदर्शि ॥ १ ॥
आविः। अभूत्। महि। माघोनं। एषां। विश्वं। जीवं। तमसः। निः। अमोचि।
महि। ज्योतिः। पितृऽभिः। दत्तं। आ। अगात्। उरुः। पंथाः। दक्षिणायाः। अदर्शि ॥ १ ॥

इदं सूक्तं दक्षिणाया वा तद्दातॄणां वा स्तावकं। दक्षिणा तु यागांगं यागस्तु सायंकाले न क्रियते। न सायमस्ति देवत्वा अजुष्टं। ऋ० ५.७७.२। इत्यादिश्रवणात्। तस्मादह्नैव कर्तव्यः। अहश्च सूर्योदयात्पश्चान्नवतीति सूक्तादौ सूर्योदयोऽभिधीयते। माघोनं। मघवेंद्रः। इंद्रश्च सूर्यश्चैमासे तयोरिंद्र इति स्मरणात्। तस्य संबंधि ॥ तस्येदमित्यण्। अतद्धिते प्रत्यये संप्रसारणमभिहितं। पा० ६.४.१३३। सर्वविधीनां छंदसि विकल्पितत्वाद्च तद्धितेऽपि संप्रसारणं ॥ सूर्यात्मकस्येंद्रस्य स्वभूतं महि महत्तेज एषां यजमानानां यागसिद्ध्यर्थमाविरभूत्। प्रकाशितमुन्नतमभूत्। तच्च विश्वं सर्वं जीवं स्थावरजंगमात्मकं जगत्तमसः सकाशान्निरमोचि। निर्मुक्तमभूत् ॥ मुंचतेः कर्मण्लुङि चिणि रूपं ॥ अथानंतरं पितृभिर्यत्पितृभिर्देवैर्दत्तं नो हविषामागमनाय तन्महि महज्ज्योतिः सूर्याख्यमागात्। आगच्छति। पश्चाद्दक्षिणाया यागांगभूताया उरुर्महान् पंथा मार्गोऽदर्शि। सर्वैर्यजमानैर्दृष्टोऽभूत्। सर्वे यागं कृत्वर्त्विग्भ्यो दक्षिणां दत्तवंत इत्यर्थः ॥

उच्चा दिवि दक्षिणावंतो अस्थुर्ये अश्वदाः सह ते सूर्येण।
हिरण्यदा अमृतत्वं भजंते वासोदाः सोम प्र तिरंत आयुः ॥ २ ॥
उच्चा। दिवि। दक्षिणाऽवंतः। अस्थुः। ये। अश्वऽदाः। सह। ते। सूर्येण।
हिरण्यऽदाः। अमृतऽत्वं। भजंते। वासःऽदाः। सोम। प्र। तिरंते। आयुः ॥ २ ॥

दक्षिणावंतो दक्षिणाया देयत्वेन तद्वंतो दक्षिणां दत्तवंतो यजमाना उच्चोच्चैः स्थानैः स्थिते दिवि द्युलोकेऽस्थुः। तिष्ठंति। सामान्येनोक्ता दातृविशेषाणां फलविशेषमाह। अश्वदा अश्वानां दातारो ये यजमानाः ते सूर्येण सर्वस्य स्वस्वकर्मणि प्रेरकेणादित्येन सह तिष्ठंति। ये हिरण्यदा हिरण्यदातारः तेऽमृतत्वममरणधर्मत्वं देवत्वं भजंते। अमृतं वै हिरण्यमित्याम्नानात्। तथा सौम्यं वै वास इति श्रवणात्सोम एव संबोध्यते। हे सोम वासोदास्त्वद्दत्तवस्त्राणां दातारो ये संति ते त्वया सह तिष्ठंतीति शेषः। एते सर्व आयुर्जीवनं प्र तिरंते। प्रवर्धयंति। प्रपूर्वस्तिरतिर्वृद्ध्यर्थः ॥

दैवी पूर्तिर्दक्षिणा देवयज्या न कवारिभ्यो नहि ते पृणंति।
अधा नरः प्रयतदक्षिणासोऽवद्यभिया बहवः पृणंति ॥ ३ ॥

दैवी । पूर्तिः । दक्षिणा । देवऽयज्या । न । कवऽअरिभ्यः । नहि । ते । पृणंति ।
अर्यः । नरः । प्रयतऽदक्षिणासः । अवद्यऽभिया । बहवः । पृणंति ॥३॥

दैवी देवसंबंधिनी ॥ देवाद्यज्ञी । पा० ४. १. ८५. ३. इत्यञ् ॥ तादृशी पूर्तिः पालिनी तत्साध्या देवयज्या ॥ छंदसि निष्टर्क्येति निपातितः ॥ देवयागः । तदंगभूता दक्षिणा न कवारिभ्यः ॥ ऋ गतावित्यस्माच्च इः । उ० ४. १३८. । इतीप्रत्ययः ॥ कुत्सितगंतृभ्योऽयष्टृभ्यः । एतेभ्यो न भवति । यद्वा । देवानां स्वभूता पूर्तिः पूरयित्री स्तुतिभिर्हविर्भिश्च तादृशी देवयज्या दक्षिणा च तेभ्यो न भवतः । तत्र हेतुरुच्यते । हि यस्मात्ते कुत्सितगंतारो नहि पृणंति देवान्स्तुतिभिर्हविर्भिर्वा न प्रीणयंति ॥ पृण प्रीणने तौदादिकः ॥ अर्येति प्रश्ने । यष्टॄणां देवयागादि कथं भवति । उच्यते । नरः कर्मणां नेतारः अत एव प्रयतदक्षिणासो दत्तदक्षिणा बहवो यजमाना अवद्यभिया ॥ अवद्यपण्यवर्या गर्ह्येति । पा० ३. १. १०१. । यत्प्रत्ययांतत्वेन निपातितः ॥ पापभिया । विहिताननुष्ठाने दुरितानि भवंति खलु । तस्मात्तन्नीत्या पृणंति । देवान्प्रीणयंति । तस्माद्यष्टॄणां देवपालनयागदक्षिणा भवतीत्यर्थः ॥

शतधारं वायुमर्कं स्वर्विदं नृचक्षसस्ते अभि चक्षते हविः ।
ये पृणंति प्र च यच्छंति संगमे ते दक्षिणां दुहते सप्तमातरं ॥४॥
शतऽधारं । वायुं । अर्कं । स्वःऽविदं । नृऽचक्षसः । ते । अभि । चक्षते । हविः ।
ये । पृणंति । प्र । च । यच्छंति । संऽगमे । ते । दक्षिणां । दुहते । सप्तऽमातरं ॥४॥

शतधारं वज्रधारिणोपेतं वायुमेतन्नामकं स्वर्विदं स्वर्गस्य लंभकं सर्वस्य वेत्तारं वार्कमर्चनीयमादित्यं च तौ नृचक्षसो नृणां द्रष्टृनन्यानिंद्रादीन्देवांश्चाभिलक्ष्य ते यजमाना हविश्चक्षते । तेभ्यो दातुं पश्यंति आगंति । चष्टेर्लेटि रूपं ॥ किंच संगमे । कर्मकरणार्थमृत्विजोऽत्र संगच्छंत इति संगमः ॥ गृहवृदृनिशिगमश्चेत्यधिकरणेऽप् । यथादिस्वरः ॥ तस्मिन्यज्ञे ये यष्टारः पृणंति स्तुतिभिः प्रीणयंति । ये च तेभ्यो देवेभ्यो हवींषि प्रयच्छंति । उभयत्र यथायोगादन्वितघातः ॥ ते सप्तमातरं । सप्तसंख्याका मातृभूता अग्निष्टोमादिसंस्था यस्यां भवंति सा । यद्वा । सप्तसंख्याका मातरः कर्मणां निर्मातारः कर्तारो होत्रादयः संति । तादृशीं दक्षिणां दुहते । ऋत्विग्भ्यो दुहंति ॥

दक्षिणावान्प्रथमो हूत एति दक्षिणावान्याममणीरयमेति ।
तमेव मन्ये नृपतिं जनानां यः प्रथमो दक्षिणामाविवाय ॥५॥
दक्षिणाऽवान् । प्रथमः । हूतः । एति । दक्षिणाऽवान् । याम्ऽनीः । अयं । एति ।
तं । एव । मन्ये । नृऽपतिं । जनानां । यः । प्रथमः । दक्षिणां । आऽविवाय ॥५॥

हूत ऋत्विग्भिराहूतो दक्षिणावान्यजमानः प्रथमः सर्वेषां मुख्यः सन्नेति । सर्वत्र गच्छति । तथा यामण्यो यामानां नेता धनवत्त्वेन तेषां कर्ता दक्षिणावान् सोऽयमेति । सर्वेषां प्रथममेव गच्छति । तमेव नृपतिं नराणां पालयितारमिति मन्य ऋषिरहमवबुध्ये प्रथमो यो जनानां दक्षिणामाविवाय आगमयति । वी गत्यादिषु । तस्य लिटि रूपं ॥ तं नृपतिमिति मन्ये । यद्वा । जनानामिति पूर्ववाक्यशेषः । जनानां मध्ये तमेव मनुष्याणां स्वामिनमिति मन्ये ॥ ॥३॥

तमेव ऋषिं तमु ब्रह्माणमाहुर्यज्ञन्यं सामगामुक्थशासं ।
स शुक्रस्य तन्वो वेद तिस्रो यः प्रथमो दक्षिणया रराध ॥६॥

तं। एव। ऋषिं। तं। ऊं इति। ब्रह्माणं। आहुः। यज्ञऽन्यं। सामऽगां। उक्थऽशसं।
सः। शुक्रस्य। तन्वः। वेद। तिस्रः। यः। प्रथमः। दक्षिणया। रराध ॥६॥

तमेव दक्षिणाया दातारमृषिमतींद्रियार्थदर्शिनं यद्वा सत्कर्मकरणेनर्षिमित्याहुः। तथा तमु तमेव ब्रह्माणमाहुः। किंच तमेव यज्ञन्यं ॥ यज्ञान् प्रापणे। क्विप्। उदात्तस्वरितयोर्यण इत्यमः स्वरितत्वं ॥ यज्ञस्य नेतारमध्वर्युमित्याहुः। तमेव सामगां साम्नां गातारमिति। तथोक्थशसं ॥ शंसु स्तुतौ। क्विप्। संहितायां दीर्घश्छांदसः ॥ उक्थशसं शस्त्राणां शंसितारं होतारमिति ब्रुवंति। दक्षिणादानेन तत्कर्मणः परिग्रहात्। स दाता शुक्रस्य दीप्यमानस्य ज्योतिष्टोमस्यान्वोऽग्निर्वैद्युतादित्यात्मकानि त्रीणि शरीराणि वेद। जानाति। यद्वा। शुक्रस्य दीप्तस्याग्नेराहवनीयाद्यात्मकानि त्रीणि शरीराणि जानाति। प्रथमो मुख्यो यो जनो दक्षिणया रराध ऋत्विगादीनाराधयति ॥ राध संसिद्धौ। लिटि रूपं। लिट्स्वरः ॥

दक्षिणाश्वं दक्षिणा गां ददाति दक्षिणा चंद्रमुत यद्धिरण्यं।
दक्षिणान्नं वनुते यो न आत्मा दक्षिणां वर्म कृणुते विजानन् ॥७॥
दक्षिणा। अश्वं। दक्षिणा। गां। ददाति। दक्षिणा। चंद्रं। उत। यत्। हिरण्यं।
दक्षिणा। अन्नं। वनुते। यः। नः। आत्मा। दक्षिणां। वर्म। कृणुते। विऽजानन् ॥७॥

दक्षिणा तद्दातृभ्योऽश्वं ददाति। तथा गां च ददाति तथा चंद्रं सुवर्णं ददाति। उतापि च यद्धिरण्यं रजतमस्ति। रजतं हिरण्यमित्याम्नानात्। तच्च ददाति। किंच सान्नं वनुते। ददाति। वनोतिरत्र दानार्थः। तस्मान्नोऽस्मदीयो य आत्मास्ति स वर्म विजानन् कवचं यथायुधानां निवारकं तद्वद्दुरितानि वारयतीति कवचमिति विजानन् दक्षिणामस्मादिदानगृहीतां कृणुते। ऋत्विग्भ्यः करोति ॥

न भोजा मम्रुर्न्यर्थमीयुर्न रिष्यंति न व्यथंते ह भोजाः।
इदं यद्विश्वं भुवनं स्वश्चैतत्सर्वं दक्षिणैभ्यो ददाति ॥८॥
न। भोजाः। मम्रुः। न। निऽअर्थं। ईयुः। न। रिष्यंति। न। व्यथंते। ह। भोजाः।
इदं। यत्। विश्वं। भुवनं। स्वरिति स्वः। च। एतत्। सर्वं। दक्षिणा। एभ्यः। ददाति ॥८॥

भोजा भोजयितारो धनादिदानेन दातारो न मम्रुः। न म्रियंते। देवत्वं भजंत इत्यर्थः। अत एव व्यर्थं ॥ ऋ गतौ। ऋषिकृषिगार्तिभ्यस्थन्। उ० २. ४.। समासे थाथादिस्वरः ॥ निकृष्टां गतिं नेयुः। न प्राप्नुवंति ॥ इण् गतौ। लिटि दीर्घ इणः कितीति दीर्घः ॥ तथा न रिष्यंति। कैश्चिदप्यहिंसिता भवंति ॥ कर्मणि व्यत्ययेन परस्मैपदं ॥ अत एव भोजा दातारो न व्यथंते। परस्परं न भीता न बाधिता वा भवंति। ह प्रसिद्धौ। किंचेदं परिदृश्यमानं विश्वं सर्वं भुवनं यद्भूतजातमस्ति स्वश्च स्वर्गलोकश्च एतत्सर्वं दक्षिणा स्वयमेभ्यस्तद्दातृभ्यो ददाति। प्रयच्छति ॥

भोजा जिग्युः सुरभिं योनिमग्रे भोजा जिग्युर्वध्वं या सुवासाः।
भोजा जिग्युरंतःपेयं सुरायां भोजा जिग्युर्ये अहूताः प्रयंति ॥९॥
भोजाः। जिग्युः। सुरभिं। योनिं। अग्रे। भोजाः। जिग्युः। वध्वं। या। सुऽवासाः।
भोजाः। जिग्युः। अंतःऽपेयं। सुरायाः। भोजाः। जिग्युः। ये। अहूताः। प्रऽयंति ॥९॥

भोजा दातारोऽग्रे प्रथममेव योनिं क्षीरादेरुत्पत्तिस्थानं सुरभिं धेनुं जिग्युः। शत्रुभ्यो जितवंतः ॥ जि जये। लिटि सन्लिटोर्जेरित्यभ्यासादुत्तरस्य कवर्गादेशः ॥ तथा भोजा दातारो वध्वं वधूं नवोढां स्त्रीं

जिग्युः । या स्त्री सुवासाः शोभनवासा अस्ति तां जिग्युः । किंच भोजाः शत्रूणां सुराया अंतःपेयमंतःपानं जिग्युः ॥ पा पाने । भावे यत् । ईयतीतीत्वं । आर्धधातुकलक्षणो गुणः । छंदुत्तरपदप्रकृतिस्वरत्वं ॥ ये शत्रवो ऽहता बलाधिक्येनाहन्यमानाः प्रयंति प्रमुखमागच्छंति ताञ्भोजा दक्षिणाया दातारो जना जिग्युः । जयंति ॥

भोजायाश्वं सं मृजंत्याशुं भोजायास्ते कन्या शुंभमाना ।
भोजस्येदं पुष्करिणीव वेश्म परिष्कृतं देवमानेव चित्रं ॥१०॥
भोजाय । अश्वं । सं । मृजंति । आशुं । भोजाय । आस्ते । कन्या । शुंभमाना ।
भोजस्य । इदं । पुष्करिणीऽइव । वेश्म । परिऽकृतं । देवमानाऽइव । चित्रं ॥१०॥

भोजाय दात्रे आशुं शीघ्रगामिनमश्वं सं मृजंति । परिचारकाः सम्यगलंकुर्वंति ॥ मृजू शौचालंकारयोः ॥ तथा कन्या । कन्यात्वेनात्र संनिकर्षादभिनवं यौवनं लक्ष्यते । अभिनवयौवना शुंभमाना शरीरावयवशोभया वस्त्राद्यलंकारशोभया च शोभमाना स्त्री तस्मै भोजाय दात्रे आस्ते । तथा भोजस्य दातुरेव हृदयाह्लादकरं वेश्म गृहं भवति । कीदृशं । पुष्करिणीव । पुष्कराणि पद्मानि यस्याः संतीति पुष्करिणी सरसी । सा यथा पद्महंसादिभिरलंकृता भवति तद्वत् परिष्कृतं वितानादिभिरलंकृतं ॥ परिपूर्वस्य करोतेर्भूषणार्थे संहितायां सुडागमः । परिनिविभ्य इति सुटः षत्वं । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं ॥ तथा देवमानेव ॥ सुपां सुलुगिति प्रथमैकवचनस्याकारः ॥ देवमानमिव चित्रं मनोहरं वेश्म तस्य भवति ॥

भोजमश्वाः सुष्ठुवाहो वहंति सुवृद्रथो वर्तते दक्षिणायाः ।
भोजं देवासोऽवता भरेषु भोजः शत्रून्त्समनीकेषु जेता ॥११॥
भोजं । अश्वाः । सुष्ठुऽवाहः । वहंति । सुऽवृत् । रथः । वर्तते । दक्षिणायाः ।
भोजं । देवासः । अवत । भरेषु । भोजः । शत्रून् । संऽअनीकेषु । जेता ॥११॥

सुष्ठुवाहः ॥ वह प्रापणे । वहश्चेति क्विप्प्रत्ययः ॥ शोभनवहनसमर्था अश्वा भोजं दातारं वहंति । स्वर्गं देशं प्रापयंति । ततो दक्षिणाया दातुर्यजमानस्य सुवृत् सुष्ठु चक्रादिवर्तनं यस्य सोऽश्वादिसहितो रथो वर्तते । अथ प्रत्यक्षः । हे देवासो हे देवा इंद्रादयः भरेषु । ध्रियत आहवनीयादिरूपेणाग्निरेषु भरा यज्ञाः । यद्वा ॥ भृ भर्त्सने ॥ भृणंति भर्त्सयंति योद्धारोऽनेति भराः संग्रामाः । तेषु भोजं दातारमवत । रक्षत । ततो युष्माभिः पालितो भोजो धनादिदानेन जनानां भोजयिता सन् समनीकेषु संग्रामेषु शत्रूञ्जिता जयशीलो भवति ॥ जि जये । ताच्छीलिकस्तृन् । अत एव न लोकाव्ययेति शत्रुशब्दस्य षष्ठीप्रतिषेधः ॥ ॥४॥

किमिच्छंतीत्येकादशर्चं नवमं सूक्तं त्रैष्टुभं । ऐंद्रपुरोहितस्य बृहस्पतेर्गोषु बलनाम्नोऽसुरस्य भटैः पणिनामकैरसुरैररण्यत्व गुहायां निहितासु सतीषु बृहस्पतिप्रेरितेनेंद्रेण गवामन्वेषणाय सरमा नाम देवशुनी प्रेषिता । सा च महतीं नदीमुत्तीर्य बलपुरं प्राप्य गुप्तस्थाने नीतास्ता गा ददर्श । अथ तस्मिन्नंतरे पणय इदं वृत्तांतमवगच्छंत एनां मित्रीकर्तुं संवादमकुर्वन् । तत्र प्रथमातृतीयाद्या अयुजोऽत्रावर्जिताः पणीनां वाक्यानि । अत्र त ऋषयः सरमा देवता । द्वितीयाचतुर्थ्याद्या युज्र एकादशी च षट् सरमाया वाक्यानि । अतस्तासु सर्षिः पणयो देवता । तथा चानुक्रांतं । किमिच्छंती पणिभिरसुरैर्निगूढा गा अन्वेषुं सरमां देवशुनीमिंद्रेण प्रहितामयुग्भिः पणयो मित्रीयंतः प्रोचुः सा तान्युग्मांत्याभिरभिच्छंती प्रत्याचष्ट इति ॥ ततो विनियोगः ॥

किमिच्छंती सरमा प्रेदमानड् दूरे ह्यध्वा जगुरिः पराचैः ।
कास्मेहितिः का परितक्म्यासीत्कथं रसाया अतरः पयांसि ॥१॥

किं। इच्छंती। सरमा। प्र। इदं। आनट्। दूरे। हि। अध्वा। जगुरिः। पराचैः।
का। अस्मेऽहितिः। का। परिऽतक्म्या। आसीत्। कथं। रसायाः। अतरः। पयांसि ॥१॥

अनयागच्छंतीं सरमां दृष्ट्वा पणयो वदंति । सरमा सरणशीलेतन्नामिका देवशुनी किमिच्छंती किं प्रार्थयमाना सतीदमस्मदीयं स्थानं प्रानट् । प्राप्नोत् ॥ आङ्पूर्वो नशिर्व्याप्तिकर्मा । तस्य लुङि मंत्रे घसेत्यादिना च्लेर्लुक् । छंदस्यपि दृश्यत इत्याडागमः ॥ पराचैः परांचि पराङ्मुखान्यावृत्तिवर्जितानि यानि गमनानि तैर्जगुरिरत्यन्तूर्णः । महता प्रयत्नेनापि गंतुं न शक्यत इत्यर्थः ॥ गृ निगरणे । आदृगमहनेत्यादिना किन्प्रत्ययः । बहुलं छंदसि । पा० ७. १. १०३. । इत्युत्वं ॥ तादृशोऽयमध्वा दूरे हि । विप्रकृष्टः खलु । यद्वा । पराचैः परांचैर्जगुरिरत्यर्थं गंत्री पार्ष्णिभागमनालोकमाना सतीदं स्थानं प्राप्नोति । दूरेऽयमध्वा यदृच्छया गंतुं न शक्यते । अतो वयमेतां पृच्छामः । हे सरमे का कीदृश्यस्मेहितिः । कोऽस्मास्वर्थहितिः । कोऽस्मासु स्वदर्पेचितार्थो निहितः । यद्वा । अस्मासु कोऽर्थो गतः ॥ दधातेर्हिनोतेर्वा क्तिनि रूपं ॥ आगच्छंत्यास्तव का कीदृशी परितक्म्या राचिरासीत् । यद्वा । तकतिर्गत्यर्थः । परितकनं परितो गमनं भ्रमणं वा कीदृशमासीत् । कथं च रसायाः शब्दायमानाया अंतरिक्षनद्या योजनशतविस्तीर्णायाः पयांस्युदकान्यतरः । तीर्णवत्यसि । एतद्वद । अत्र किमिच्छंती सरमेदं प्रागडित्यादिकं निरुक्तं द्रष्टव्यं । नि० ११. २५. ॥

इंद्रस्य दूतीरिषिता चरामि महे इच्छंती पणयो निधीन्वः ।
अतिष्कदो भियसा तन्न आवत्तथा रसाया अतरं पयांसि ॥२॥
इंद्रस्य। दूतीः। इषिता। चरामि। महः। इच्छंती। पणयः। निऽधीन्। वः।
अतिऽस्कदः। भियसा। तत्। नः। आवत्। तथा। रसायाः। अतरं। पयांसि ॥२॥

अनया तान्सरमा प्रत्युवाच । हे पणय एतन्नामका असुराः इंद्रस्य दूतीः ॥ सुपां सुलुगिति प्रथमैकवचनस्य सुरूक्कांदसः ॥ अहमिषिता तेनैव प्रेषिता सती चरामि । युष्मदीयं स्थानमागच्छामि । किमर्थं । वो युष्मदीयान्युष्मदीये पर्वतेऽधिष्ठापितान्महो महतो निधीन्बृहस्पतेर्गोनिधीनिच्छंती कामयमाना सती चरामि । किंचातिष्कदः ॥ स्कंदिर् गतिशोषणयोः । भावे क्विप् ॥ अतिष्कंदनादतिक्रमणाज्जातेन भियसा भयेन तन्नदीजलं नः । पूजायां बहुवचनं । मामावत् । अरक्षत् । तथा तेन प्रकारेण रसाया नद्याः पयांस्युदकान्यतरं । तीर्णवत्यस्मि ॥

कीदृङिंद्रः सरमे का दृशीका यस्येदं दूतीरसरः पराकात् ।
आ च गच्छान्मिचमेना दधामाथा गवां गोपतिर्नो भवाति ॥३॥
कीदृङ्। इंद्रः। सरमे। का। दृशीका। यस्य। इदं। दूतीः। असरः। पराकात्।
आ। च। गच्छात्। मिचं। एन। दधाम। अथ। गवां। गोऽपतिः। नः। भवाति ॥३॥

तेषां वाक्यं । हे सरमे तव स्वामींद्रः कीदृक् । कियत्पराक्रमवान् । का दृशीका । तस्य कीदृशी दृष्टिः । दृष्टिरूपा सेना कियती । यस्य दूतीर्दूती त्वमिदमस्मदीयं स्थानं पराकादतिदूरादसरः आगमः । इति तामुत्प्रेक्षमाणां ते परस्परमाहुः । एषा सरमा गच्छात्तु । आगच्छतु च ॥ गमेर्लेट्याडागमः ॥ स्वामी भवाति । भवतु । न ह्येकस्या गोः किंतु बहूनां गवां स्वामी भवतु । वृत्यवृत्तिभ्यां स्वामित्वं बाहुल्यं च विवक्षयते ॥

नाहं तं वेद दभ्यं दभत्स यस्येदं दूतीरसरं पराकात् ।
न तं गूहंति स्रवतो गभीरा हता इंद्रेण पणयः शयध्वे ॥४॥

न । अहं । तं । वेद । दभ्यं । दभत् । सः । यस्य । इदं । दूतीः । असरं । पराकात् ।
न । तं । गूहंति । स्रवतः । गभीराः । हताः । इंद्रेण । पणयः । शयध्वे ॥ ४ ॥

सरमा वदति । हे पणयः तमिंद्रं दभ्यं हंतव्यमिति न वेद । न जानामि ॥ दभेरचौ यत् ॥ वध्यं । स इंद्रो दभत् । सर्वाज्ञनाद्दभति । हिंसत्येव ॥ दभेर्लेटि रूपं । वाक्यभेदादनिघातः ॥ यस्य दूतीर्दूत्यहमिदं युष्मदीयं स्थानं पराकादतिदूराद्देशादसरं प्राप्ताभूवं । इंद्रो हिंसितव्यो न भवतीत्यत्र युक्तिमाह । स्रवतः । स्रवणं स्रवः । तमाचरंति ॥ आचारार्थे क्विप् । तुगागमः । असि रूपं ॥ स्रवणशीला गभीरा गंभीरा नद्यस्तमिंद्रं न गूहंति । न संवृण्वंति । नाच्छादयंति । किंत्वाविष्कुर्वंति । वयं यस्य महिम्ना समुद्रं प्रतिसरामः । तस्मादिंद्रस्य इत्थंभूतं प्रकटीकुर्वंति ॥ गुह संवरणे भौवादिकः ॥ तस्मात्ते पणयः यूयमिंद्रेण तादृशपराक्रमेण हताः संतः शयध्वे ॥ शीङ् स्वप्ने । बहुलं छंदसीति शपो लुगभावः ॥

इमा गावः सरमे या ऐच्छः परि दिवो अंतान्त्सुभगे पतंती ।
कस्ते एना अव सृजादयुध्युतास्माकमायुधा संति तिग्मा ॥ ५ ॥
इमाः । गावः । सरमे । याः । ऐच्छः । परि । दिवः । अंतान् । सुऽभगे । पतंती ।
कः । ते । एनाः । अव । सृजात् । अयुध्वी । उत । अस्माकं । आयुधा । संति । तिग्मा ॥ ५ ॥

कृत्राः पणयः प्रत्यूचुः । हे सुभगे शोभनसौभाग्यवति हे सरमे दिवो द्युलोकस्यांतान्पर्यंतान्परि पतंती कुत्र गावस्तिष्ठंतीति परितो गच्छंती त्वमिमाः परिदृश्यमाना या गावः ॥ सुब्व्यत्ययः ॥ गा ऐच्छः कामयसे ता एना गास्ते त्वदीयः कोऽयुध्व्ययुद्धाव स्रजात् । अस्मात्पर्वतादवसृजेत् । विनिर्गमयेत् ॥ सृजेर्लेटि रूपं । अयुध्वी युधेः क्त्वाप्रत्यये स्नात्व्यादयश्चेति निपातितः । नञ्समासत्वाद्व्यवादेशाभावः । नञः प्रकृतिस्वरत्वं ॥ उतापि चास्माकं तिग्मा तीक्ष्णान्यायुधायुधानि संति । तस्मादस्माभिर्युद्धमकृत्वा को नाम गा आहरति ॥ ॥ ५ ॥

असेन्या वः पणयो वचांस्यनिषव्यास्तन्वः संतु पापीः ।
अधृष्टो व एतवा अस्तु पंथा बृहस्पतिर्व उभया न मृळात् ॥ ६ ॥
असेन्याः । वः । पणयः । वचांसि । अनिषव्याः । तन्वः । संतु । पापीः ।
अधृष्टः । वः । एतवै । अस्तु । पंथाः । बृहस्पतिः । वः । उभया । न । मृळात् ॥ ६ ॥

सा तान्निराह । हे पणयः वो युष्माकं वचांसि पूर्वोक्तानि वचनान्यसेन्यासेन्यानि । सेनार्हाणि न भवंति ॥ सेनाशब्दात्तदर्हतीत्यर्थे छंदसि चेति यत्प्रत्ययः । नञा समासः । ययतोश्चातदर्थे । पा० ६. २. १५६ । इत्युत्तरपदांतोदात्तत्वं ॥ तथा तन्वो युष्मदीयानि शरीराण्यनिषव्या इष्वर्हाणि न संतु पराक्रमराहित्येन ॥ पूर्ववत्प्रत्ययः । ओर्गुणः । पा० ६. ४. १४६ । इति गुणः । स्वरश्च तादृक् ॥ यतः पापीः पापयुक्तानि खलु ॥ छंदसीवनिपाविति प्रत्ययः । असः शुः ॥ किंच वो युष्मदीयः पंथा मार्ग एतवै गंतुमधृष्टोऽसमर्थोऽस्तु ॥ इण् गतावित्यस्य तुमर्थे तवैप्रत्ययः । तवै चांतश्च युगपत् । पा० ६. २. ५१ । इति धातोः प्रत्ययस्य च युगपदुदात्तत्वं । तत्र हेतुमाह । वो युष्मदीयानुभयोभयविधान्पूर्वोक्तांस्तन्वो देहान्बृहस्पतिरिंद्रप्रेरितो न मृळात् । न सुखयतु । किंतु बाधेत ॥ मृड सुखने । लेट्यडागमः ॥

अयं निधिः सरमे अद्रिबुध्नो गोभिरश्वेभिर्वसुभिर्न्यृष्टः ।
रक्षंति तं पणयो ये सुगोपा रेकु पदमलकमा जगंथ ॥ ७ ॥

अयं। निऽधिः। सरमे। अद्रिऽबुध्नः। गोभिः। अश्वेभिः। वसुऽभिः। निऽऋष्टः।
रक्षंति। तं। पणयः। ये। सुऽगोपाः। रेकु। पदं। अलकं। आ। जगंथ ॥७॥

ते पुनराहुः। हे सरमे अयं निधिरस्मदीयः कोशोऽद्रिबुध्नः ॥ बन्ध बंधने। बंधेर्नप्रत्ययो बुध इत्यादेशः ॥ अद्रिर्बंधको यस्य तादृशः। तथाहृतैर्गोभिरश्वैरश्वैश्च वसुभिरात्मीयैर्धनैश्च न्यृष्टो नितरां प्राप्तो भवति ॥ ऋषी गतौ। क्तप्रत्यये श्वीदितो निष्ठायामितीट्प्रतिषेधः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं ॥ सुगोपाः ॥ गुपू रक्षणे। आयप्रत्ययांतात्क्विप्यातोलोपयलोपौ ॥ सुष्ठु गोपायितारो ये पणयस्तेऽसुराः निधिं रक्षंति। पालयंति। रेकु ॥ रेक्ण शंकायां। श्रीणादिक उप्रत्ययः ॥ शंकितं गोभिः शब्दायमानं पदमस्माभिः पालितं स्थानमलकं व्यर्थमेवा जगंथ। आगतवत्यसि ॥ गमेर्लिटि रूपं ॥

एह गमन्नृषयः सोमशिता अयास्यो अंगिरसो नवग्वाः।
त एतमूर्वं वि भजंत गोनामथैतद्वचः पणयो वमन्नित् ॥८॥
आ। इह। गमन्। ऋषयः। सोमऽशिताः। अयास्यः। अंगिरसः। नवऽग्वाः।
ते। एतं। ऊर्वं। वि। भजंत। गोनां। अथ। एतत्। वचः। पणयः। वमन्। इत् ॥८॥

सरमा पुनः प्रत्युवाच। हे पणयः सोमशिताः सोमेन तीक्ष्णीकृताः सोमपानेन मत्ताः ॥ शित् निशाने। कर्मणि क्तप्रत्ययः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं ॥ तादृशा नवग्वा नवगतयः। यद्वा। अंगिरसां सत्त्रमासीनानां मध्ये केचन नवसु मासःस्वध्यतिष्ठन् ते नवग्वाः। अनेन दृग्म्वा अप्युपलक्ष्यंते। उभयविधास्ते ऽंगिरस ऋषयः तेषां प्रथमोऽयास्य एतन्नामा च त एत इह युष्मदीये स्थान आ गमन्। आगच्छेयुः ॥ गमेश्छंदसि लुङ्लङ्लिट इति सार्वकालिको लुङ्। च्लेश्चिण्वदिरङ् ॥ आगत्य च ते गोनां ॥ गोः पादांत इति च्छंदसि गुडागमः ॥ गवामूर्वं तं समूहं वि भजंत। विभागं कुर्युः ॥ अद्यापि पूर्ववत्सार्वकालिको लुङ् ॥ अथानंतरं पणयो यूयमेतद्वचः पूर्वं यद्ब्रार्थमागतासीति यद्वाक्यमवोचत तद्वाक्यं तदा वमन्निद्वमंतः परित्यजंत एव भवथ ॥ वमु उद्गिरणे। शतरि सुपां सुलुगिति जसो लुक्। नुमागमः। संयोगांतस्य लोपः। यद्वा। लङि रूपं। स्वरश्छांदसः ॥

एवा च त्वं सरम आजगंथ प्रबाधिता सहसा दैव्येन।
स्वसारं त्वा कृणवै मा पुनर्गा अप ते गवां सुभगे भजाम ॥९॥
एव। च। त्वं। सरमे। आऽजगंथ। प्रऽबाधिता। सहसा। दैव्येन।
स्वसारं। त्वा। कृणवै। मा। पुनः। गाः। अप। ते। गवां। सुऽभगे। भजाम ॥९॥

तथैवमुक्ते सति पणयः प्रणयवाक्यमाहुः। हे सरमे त्वं दैव्येन देवसंबंधिना सहसा बलेन प्रबाधिता यथा तथा बलपुरं प्राप्य तत्र स्थिता गा दृष्ट्वा पुनरागच्छेति तेन प्रपीडिता त्वमेवं चेदाजगंथ आगतवत्यसि ॥ चशब्दश्चेदर्थे। निपातैर्यद्यदिहंतेति तिङो निघाताभावः। गमेर्लिटि थलि रूपं। सह सुपेत्यत्र सहेति योगविभागात्समासः। तिङि चोदात्तवतीति गतेर्निघातः। लित्स्वरः ॥ तर्हि त्वा त्वां स्वसारं भगिनीं कृणवै। करवै। समूहार्थैकवचनं। त्वं तु पुनर्मा गाः। इंद्रादीन्मा गच्छ। अपि तर्हि हे सुभगे सरमे ते त्वदीयानां गवां समूहं पर्वताद्पगमय्य भजाम। त्वं च वयं च विभजाम। विभागं करवामेत्यर्थः ॥

नाहं वेद भ्रातृत्वं नो स्वसृत्वमिंद्रो विदुरंगिरसश्च घोराः।
गोकामा मे अच्छदयन्यदायमपात इत पणयो वरीयः ॥१०॥

न। अहं। वेद। भातृऽत्वं। नो इति। स्वसृऽत्वं। इंद्रः। विदुः। अंगिरसः। च। घोराः।
गोऽकामाः। मे। अच्छदयन्। यत्। आयै। अपं। अतः। इत। पणयः। वरीयः ॥१०॥

सा तान्प्रत्याचष्टे। हे पणयः अहं भातृत्वं न वेद। न जानामि। तथा स्वसृत्वं च नो वेद। नैव जानामि। के जानंति। तानाह। इंद्रो घोराः शत्रूणां भयंकरा अंगिरसश्च विदुः। जानंति। किंचास्मात्स्थानादहं यद्यदायं इंद्रादीन्प्राप्नवं ॥ अय पय गतौ। लङि रूपं ॥ तदा मे मदीया गोकामा युष्माभिरपहृता गाः कामयमाना इंद्रादय अच्छदयन्। युष्मदीयं स्थानमाच्छादयंति ॥ छद अपवारणे ॥ अतः कारणाद्दे पणयः वरीय उरुतरं गवां वृंदं परित्यज्यापित। अन्यत्स्थानं प्रति गच्छत। यद्वा। वरीयः प्रभूतमतिदूरं देशं गच्छत ॥ इत। इण् गतौ। लोटि रूपं। वरीयः। उरुशब्दादीयसुनि प्रियस्थिरेत्यादिना वरादेशः ॥

दूरमित पणयो वरीय उद्गावो यंतु मिनतीर्ऋतेन।
बृहस्पतिर्या अविंदन्निगूळ्हाः सोमो ग्रावाण ऋषयश्च विप्राः ॥११॥
दूरं। इत। पणयः। वरीयः। उत्। गावः। यंतु। मिनतीः। ऋतेन।
बृहस्पतिः। याः। अविंदत्। निऽगूळ्हाः। सोमः। ग्रावाणः। ऋषयः। च। विप्राः ॥११॥

हे पणयः यूयं वरीय उरुतरं दूरं दूरदेशमित। गच्छत। युष्माभिरपहृता गाव ऋतेन सत्येन मिनतीर्मिनत्यो द्वारस्थं पिधायकं पर्वतं हिंसत्यो विदारयंत्य उद्यंतु। तस्मादुन्नच्छंतु। यद्वा। मिनतीः ॥ व्यत्ययेन कर्मणि शतृ ॥ मीयमाना युष्माभिर्बाध्यमानास्ता गावः ॥ सुब्व्यत्ययः ॥ गा ऋतेन स्तुतिभिर्गंतव्येनेंद्रेण सहायेन बृहस्पत्यादय उद्यंतु। पर्वतादुन्नमयंतु। निगूढा नितरां स्थापिता या गा बृहस्पतिरविंदत् लप्स्यते तथा सोमस्तदभिषवकारिणो ग्रावाणश्च विप्रा मेधाविन ऋषयोऽंगिरसश्च लप्स्यंते ॥ विदृ लाभे तौदादिकः। तस्माच्छंदसि लुङ्लङ्लिट इति भविष्यदर्थे लङ्। श्ने सुचादीनामिति नुमागमः ॥ ॥६॥

तेऽवदन्निति सप्तर्चं दशमं सूक्तं। जुह्वर्नाम ब्रह्मवादिन्यृषिः। ब्रह्मपुत्र ऊर्ध्वनाभा नाम वा। षष्ठीसप्तम्यावनुष्टुभौ। शिष्टाः पंच त्रिष्टुभः। विश्वे देवा देवता। तथा चानुक्रांतं। तेऽवदन्सप्त जुह्वर्ब्रह्मजाया ब्राह्मो वोर्ध्वनाभा वैश्वदेवं द्व्यनुष्टुबंतमिति ॥ गतो विनियोगः ॥

तेऽवदन्प्रथमा ब्रह्मकिल्बिषेऽकूपारः सलिलो मातरिश्वा।
वीळुहरास्तप उग्रो मयोभूरापो देवीः प्रथमजा ऋतेन ॥१॥
ते। अवदन्। प्रथमाः। ब्रह्मऽकिल्बिषे। अकूपारः। सलिलः। मातरिश्वा।
वीळुऽहराः। तपः। उग्रः। मयःऽभूः। आपः। देवीः। प्रथमऽजाः। ऋतेन ॥१॥

अत्रेतिहासमाचष्टे। जुह्वरिति वाग्नाम। सा ब्रह्मणो जाया च। बृहस्पतेर्वाचस्पतित्वाद्बृहस्पतेर्जुह्वर्नाम भार्या बभूव। कदाचिदस्य किल्बिषमस्या दौर्भाग्यरूपेणासांचक्रे। अत एव स एनां पर्यत्यागीत्। अनंतरमादित्यादयो देवा मिथो विचार्यैनामकिल्बिषां कृत्वा पुनर्बृहस्पतये प्रादुरिति। तदत्र वर्ण्यते। प्रथमा मुख्यास्ते देवा ब्रह्मकिल्बिषे ॥ षष्ठीसमासः। समासस्वरः ॥ ब्रह्मणो बृहस्पतेः किल्बिषे पापे जुह्वर्दौर्भाग्यरूपे विषयेऽवदन्। निष्कृत्युपायमवोचन् ॥ वकारपरत्वाच्च प्रकृतिभावाभावः ॥ के ते। अकूपारः। अत्र यास्कः। आदित्योऽप्यकूपार उच्यतेऽकूपारो भवति दूरपारः। नि० ४. १८.। इति। अकुत्सितपारो महागतिरादित्यः सलिलोऽब्देवता वरुणो मातरिश्वा वायुर्वीळुहराः ॥ हरतेरसुनि रूपं हर इति ॥ हरति विनाशयति तमांसीति हरस्तेजः। प्रभूततेजस्काः। तपः ॥ तृतीयायाः सुः ॥ तपसा तापनेनोग्र उद्गूर्णोऽग्निर्मयोभूः सुखस्य भावयिता सोमो देवोदैव्य आपः। कीदृश्यः। ऋतेन सत्यभूतेन ब्रह्मणा प्रथमजा आदित एवोत्पादिताः। एत उपायमुक्त्वा प्रायश्चित्तमप्यकारयन्निति भावः ॥

सोमो राजा प्रथमो ब्रह्मजायां पुनः प्रायच्छदहृणीयमानः ।
अन्वर्तिता वरुणो मित्र आसीदग्निर्होता हस्तगृह्या निनाय ॥२॥
सोमः । राजा । प्रथमः । ब्रह्मऽजायां । पुनरिति । प्र । अयच्छत् । अहृणीयमानः ।
अनुऽअर्तिता । वरुणः । मित्रः । आसीत् । अग्निः । होता । हस्तऽगृह्य । आ । निनाय ॥२॥

प्रथमो मुख्यः सोमो राजाहृणीयमाणः । पापापगमनेनालज्जमानः संस्तामेनामकिल्बिषां ब्रह्मजायां पुनर्बृहस्पतये प्रायच्छत् । ततो वरुणोऽन्वर्तिता ॥ ऋतिः सौत्रो धातुर्घृणायां वर्तते । तस्य तृचि रूपं ॥ सोममनुमोदयितासीत् । सर्वथा त्वं परिगृहाणेति दयामकार्षीत् । तथा मित्रश्च । अनंतरं होता देवानामाह्वाता मनुष्याणां होमनिष्पादको वाग्निर्हस्तगृह्य तां हस्ते गृहीत्वा निनाय । आनैषीत् । प्रादादित्यर्थः ॥ हस्तगृह्य । नित्यं हस्ते पाणावुपयमने । पा० १.४.७७. । इति हस्तशब्दस्य गतिसंज्ञायां ग्रहिणा समासे ल्यप् । एकारश्छांदसः । यद्वा । हस्तशब्दात्परस्य गृहेश्छांदसो समासल्यपौ ॥

हस्तेनैव ग्राह्य आधिरस्या ब्रह्मजायेयमिति चेदवोचन् ।
न दूताय प्रह्ये तस्थ एषा तथा राष्ट्रं गुपितं क्षत्रियस्य ॥३॥
हस्तेन । एव । ग्राह्यः । आऽधिः । अस्याः । ब्रह्मऽजाया । इयं । इति । च । इत् । अवोचन् ।
न । दूताय । प्रऽह्ये । तस्थे । एषा । तथा । राष्ट्रं । गुपितं । क्षत्रियस्य ॥३॥

देवा बृहस्पतिमूचुः । हे बृहस्पते अस्या आधिः । आधीयंत आभरणान्यत्रेत्याधिः शरीरं ॥ उपसर्गे घोः किः । पा० ३.३.९२. । इति किप्रत्ययः ॥ अस्याः शरीरं हस्तेनैव ग्राह्यो गृहीतव्यमेव । पुनस्ते देवा इदानीमियं ब्रह्मजायेत्येवावोचन् । अवादिषुः ॥ चशब्दस्त्वेदर्थे । अत एव निपातैर्यद्यदिहंतेति तिङो निघाताभावः । ब्रूञ् व्यक्तायां वाचि । लुङि ब्रुवो वचिः । अस्तिवक्तिख्यातिभ्योऽङीति च्लेरङादेशः । वच उमित्युमागमः । अडागमस्वरः । इदवधारणे ॥ एषा ब्रह्मजाया पुरा प्रह्ये ॥ हि गतौ वृद्धौ च । कर्मण्यौणादिकः क्विप् । तुगभावश्छांदसः । ङिच्चने संज्ञापूर्वकस्य विधेरनित्यत्वान्नुणाभावः । उदात्तस्वरितयोर्यण इति सुपः स्वरितत्वं ॥ प्रहिताय त्वया भार्यान्वेषणार्थं प्रेषिताय दूताय तथा न तस्थे । स्वात्मानं न प्रकाशयति ॥ तिष्ठतेर्लिटि प्रकाशनस्थेयाख्ययोश्च । पा० १.३.२३. । इत्यात्मनेपदं । स्थाघ्वोरिच्चेति स्थाशपां । पा० १.४.३४. । इति दूतस्य संप्रदानसंज्ञा ॥ तत्र दृष्टांतः । यथा क्षत्रियस्य राज्ञो गुपितं रक्षितं राष्ट्रं राज्यं शत्रवे यथा न प्रकाशयति तद्वदसौ दौर्भाग्ययुक्ततया तस्मै स्वात्मानं न प्रकाशितवती । इदानीं तु तद्ग्राहित्वेन प्रकाशमानेयं ब्रह्मजायेत्यब्रुवन् ॥

देवा एतस्यामवदंत पूर्वे सप्तऋषयस्तपसे ये निषेदुः ।
भीमा जाया ब्राह्मणस्योपनीता दुर्धां दधाति परमे व्योमन् ॥४॥
देवाः । एतस्यां । अवदंत । पूर्वे । सप्तऽऋषयः । तपसे । ये । निऽसेदुः ।
भीमा । जाया । ब्राह्मणस्य । उपऽनीता । दुःऽधां । दधाति । परमे । विऽओमन् ॥४॥

पूर्वे चिरंतना देवा आदित्यादय एतस्यां विषयेऽवदंत । इयं पापरहितेत्यवादिषुः । तथा ये सप्तर्षयः ॥ समासस्वरः ॥ सप्तसंख्याका ऋषयस्तपसे तपश्चरणाय निषेदुः निषण्णा बभूवुः ॥ सदेर्लिटि रूपं । उपसर्गेण समासः । यद्योगान्निघातः ॥ तेऽप्यवादिषुः ॥ ततो भीमा शत्रुरूपाणां पापानां भयंकरी सुकृतवत्येषा जाया ब्राह्मणस्य बृहस्पतेरुपनीता । समीपे देवैः स्थापिता ॥ णीञ् प्रापणे । कर्मणि क्तः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं ॥ तथा हि । तपःप्रभावो दुर्धा दुर्धानामपि परमे व्योमन् व्योमन्युत्तमे स्थाने दधाति । विदधाति खलु । तस्मादेनामपि देवतापरित्यक्तरूपस्तपोमहिमा बृहस्पतेरंतिके स्थापयति ॥

ब्रह्मचारी चरति वेविषद्विषः स देवानां भवत्येकमंगं ।
तेन जायामन्वविंदद्बृहस्पतिः सोमेन नीतां जुह्वं न देवाः ॥५॥
ब्रह्मऽचारी । चरति । वेविषत् । विषः । सः । देवानां । भवति । एकं । अंगं ।
तेन । जायां । अनु । अविंदत् । बृहस्पतिः । सोमेन । नीतां । जुह्वं । न । देवाः ॥५॥

एवं स्वपतिर्मामलभतेति जुह्वः परोक्षतया वदति । हे देवाः पूर्वं स ब्रह्मचारी जायाभावेन ब्रह्मचारी चरति । अत एव विषः सर्वेषु यज्ञेषु व्याप्नवान्देवान्वेविषत् स्तुतिभिर्हविर्भिश्च व्याप्नुवन् देवानामेकमंगं भवति । जायापती यज्ञस्य द्वे अंगे खलु ॥ वेविषत् । विष्लृ व्याप्तौ औहोत्यादिकः । निजां चयाणां गुणः स्त्री । पा० ७. ४. ७५. । इत्यभ्यासस्य गुणः । शृतुर्नाभ्यस्ताच्छतुरिति नुमागमप्रतिषेधः । अभ्यस्तानामादिरित्याद्युदात्तत्वं ॥ तेन देवानां परिचरणेन बृहस्पतिर्जायायां जुह्वनामिकां मामन्वविंदत् । अनुगम्याप्नुवत । नञ्शब्द उपमार्थे । पूर्वं यथा सोमेन नीतां सोमो ददन्नंधर्वाय । ऋ० १०. ८५. ४१. । इत्यादिक्रमेण नीतां जुह्वं जुह्वं यथा लब्धवान् तद्वदिदानीमपि ॥ जुह्वं । ह्वृ दानादनयोः । अन्येभ्योऽपि दृश्यत इति क्विप् । जुहोतेर्द्वे चेति द्विर्वचनं दीर्घश्च । उदात्तयणो हल्पूर्वादिति विभक्त्युदात्तत्वे प्राप्ते नोङ्धात्वोरिति प्रतिषेध उदात्तस्वरितयोर्यण इति स्वरितत्वं ॥

पुनर्वै देवा अददुः पुनर्मनुष्या उत । राजानः सत्यं कृण्वाना ब्रह्मजायां पुनर्ददुः ॥६॥
पुनः । वै । देवाः । अददुः । पुनः । मनुष्याः । उत । राजानः । सत्यं । कृण्वानाः । ब्रह्म
ऽजायां । पुनः । ददुः ॥६॥

लाभहेतुमाह । देवा ब्रह्मजायां जुह्वं बृहस्पतये पुनरददुः । वैशब्दः प्रसिद्धिवाची । उताप्यर्थे । मनुष्या अपि पुनरददुः । एवं देवमनुष्यैः कृतं दानं सत्यं यथार्थं कृण्वानाः कुर्वाणा राजानोऽपि पुनस्तस्मै ददुः । एवमन्यवहार्यनिमित्तं पापमपि व्यनाशयन्निति भावः ॥

पुनर्दाय ब्रह्मजायां कृत्वी देवैर्निकिल्बिषं । ऊर्जं पृथिव्या भक्षायोरुगायमुपासते ॥७॥
पुनःऽदाय । ब्रह्मऽजायां । कृत्वी । देवैः । निऽकिल्बिषं । ऊर्जं । पृथिव्याः । भक्षाय ।
उरुऽगायं । उप । आसते ॥७॥

देवैः ॥ सुपां सुपो भवंतीति जसस्तृतीयादेशः ॥ देवा निकिल्बिषं ॥ अर्थाभावेऽव्ययीभावः । समासस्वरः ॥ तस्याः किल्बिषाभावं कृत्वी ॥ स्नात्व्यादयश्चेति निपातितः ॥ कृत्वा ब्रह्मजायां ब्रह्मणो बृहस्पतेर्भार्यां पुनर्दाय पुनर्दत्त्वा ॥ पुनश्चनसोश्छंदसि गतिसंज्ञा वक्तव्येति । पा० १. ४. ६०. २. । पुनःशब्दस्य गतिसंज्ञायां समासस्यापि । न ल्यपि । पा० ६. ४. ६९. । इतोत्वप्रतिषेधः । कृदुत्तरपदप्रकृतिस्वरत्वं ॥ पृथिव्या ऊर्जं रसभूतमन्नं हविरूपं भक्षाय । त्को यक् । पा० ७. १. ४७. । इति यगागमः ॥ भक्षा विभक्त्योरुगायं बहुकीर्तिं बहुभिः स्तोतव्यं वा बार्हस्पत्यं यज्ञमुपासते । सेवंते ॥ ॥७॥

समिद्ध इत्येकादशर्चमेकादशं सूक्तं वैष्टुभं । भार्गवो जमदग्निर्ऋषिः । तस्य पुत्रो रामो वा यः परशुराम इति प्रख्यातः । आप्रीसूक्तमिदं । अतः समिदाद्याः सप्तानुपातो नराशंसवर्जिताः प्रयुचं देवताः । तथा चानुक्रांतं । समिद्ध एकादश जमदग्निस्तत्सुतो वा राम आप्रिय इति ॥ पशौ जामदग्न्यानामिदमाप्रीसूक्तं यद्वाविशेषेण सर्वेषां । सूचितं च । समिद्धो अग्नेति सर्वेषां यथर्षि वा । आ० ३. २. । इति ॥ अग्निचयनांगभूते प्राजापत्ये पशौ सर्वेषां नित्यमिदमाप्रीसूक्तं । सूचितं च । प्राजापत्ये तु जामदग्न्यः सर्वेषां । आ० ३. २. । इति ।

समिद्धो अद्य मनुषो दुरोणे देवो देवान्यजसि जातवेदः ।
आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि प्रचेताः ॥१॥
संऽइद्धः । अद्य । मनुषः । दुरोणे । देवः । देवान् । यजसि । जातऽवेदः ।
आ । च । वह । मित्रऽमहः । चिकित्वान् । त्वं । दूतः । कविः । असि । प्रऽचेताः ॥१॥

हे जातवेदो जातप्रज्ञाग्ने देवः स्वतेजसा दीप्यमानस्त्वं मनुषो मनुष्यस्य यष्टुर्दुरोणे । गृहनामैतत् । दुरवन आयासेन रचितव्ये गृहेऽवास्मिन्कर्मणि समिद्धः सम्यक्प्रज्वालितः सन् देवानिंद्रादीन्यजसि । हविर्भिः पूजय ॥ समिद्धः । इन्धी दीप्तौ । कर्मणि क्त स्वीदितो निष्ठायामितीट्प्रतिषेधः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं ॥ हे मित्रमहः स्तुत्यस्तोतृलक्षणत्वेन मित्रभूतानां स्तोतृणां पूजयितः तैः पूज्यमान वाग्ने चिकित्वांस्त्वं ज्ञाता: स्तुतीः प्रज्ञानन् चेतनावान्वा स्वमस्मदीये यज्ञे देवाना वह च । आप्रापय ॥ वह प्रापणे । लोटि रूपं । चवायोगे प्रथमेति न निघातः ॥ तथा कविः क्रांतप्रज्ञः अत एव प्रचेताः प्रकृष्टज्ञानस्त्वं दूतो देवानां हविष्प्रापणेन हितकारी भवसि ॥

तनूनपात्पथ ऋतस्य यानान्मध्वा समंजन्त्स्वदया सुजिह्व ।
मन्मानि धीभिरुत यज्ञमृंधन्देववीं च कृणुह्यध्वरं नः ॥२॥
तनूऽनपात् । पथः । ऋतस्य । यानान् । मध्वा । संऽअंजन् । स्वदय । सुऽजिह्व ।
मन्मानि । धीभिः । उत । यज्ञं । ऋंधन् । देवऽवीं । च । कृणुहि । अध्वरं । नः ॥२॥

हे तनूनपात् । नपादित्यनंतरापत्यनामधेयं । गौरत्र तनूरुच्यते तता अस्यां भोगाः क्षीरादय इति । तस्याः पयो जायते पयस आज्यं तस्मादग्निः । यद्वा । अंतरिक्षे तता आपस्तन्वः ताभ्य ओषधादयः तेभ्यो ऽग्निरिति । एवंरूप हे सुजिह्व शोभनज्वाल यद्वा । जिह्वेति वाङ्नाम । शोभनवाग्ने ऋतस्य यज्ञस्य यानान्फलप्राप्तिहेतून्पथो मार्गान्हविराख्यान्मध्वा मदकरेण रसेन यद्वा वाग्जनितेन रसेन समंजन् सम्यग्दीपयन् स्वदय । स्वादयस्व । स्वादूकुरु ॥ स्वद आस्वादने । णिच्युपधावृद्ध्यभावश्छांदसः ॥ किंच मन्मानि । मन्यतेरर्चतिकर्मणः । मननीयान्यस्मदभिप्रेतानि स्तोत्राणि धीभिः प्रज्ञाभिः कर्मभिर्वोतापि च यज्ञं यजनीयं हविश्च ऋंधन् समृद्धानि कुर्वन् नोऽस्मदीयमध्वरं यज्ञं देवत्रा देवेषु कृणुहि । कुरु ॥ देवशब्दाद्देवमनुष्येत्यादिना सप्तम्यर्थे त्राप्रत्ययः ॥

आजुह्वान ईड्यो वंद्यश्चा याह्यग्ने वसुभिः सजोषाः ।
त्वं देवानामसि यह्व होता स एनान्यक्षीषितो यजीयान् ॥३॥
आऽजुह्वानः । ईड्यः । वंद्यः । च । आ । याहि । अग्ने । वसुऽभिः । सऽजोषाः ।
त्वं । देवानां । असि । यह्व । होता । सः । एनान् । यक्षि । इषितः । यजीयान् ॥३॥

हे अग्ने त्वमस्मत्कर्मणा याहि । आगच्छ । कीदृशः । आजुह्वानो देवानामाहाता ॥ ह्व दानादनयोः जौहोत्यादिकः । अभ्यस्तस्वरः ॥ ईड्यः । ईडिरध्येषणाकर्मा । अध्येष्यः प्रार्थ्यमानः वंद्यः स्तोतव्यः वसुभिर्देवैः सजोषाः सह प्रीयमाणः । आगत्य च हे यह्व । महन्नामैतत् । हे महन् स त्वं देव देवानां होताह्वातासि । ततो यजीयान् ॥ यष्टृशब्दादीयसुनि तुरिष्टेमेयःस्विति तृचो लोपः ॥ यष्टृतरः स त्वमिषितोऽस्माभिरध्येषितः प्रार्थितः सन्नेतान्देवान्यक्षि । यज । हविषा पूजय ॥

प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नां ।
व्युं प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनं ॥४॥

प्राचीनं । बर्हिः । प्रऽदिशा । पृथिव्याः । वस्नोः । अस्याः । वृज्यते । अग्रे । अह्नां ।
वि । ऊं इति । प्रथते । विऽस्तरं । वरीयः । देवेभ्यः । अदितये । स्योनं ॥ ४ ॥

यदिदं प्राचीनं प्रागंचितं प्राङ्मुखं बर्हिरस्ति तदिदं पृथिव्या वेदिलक्षणाया वस्नोः ॥ वस आच्छादने । तुन्प्रत्ययः । चतुर्थ्यर्थे बऋलं छंदसीति षष्ठी । यद्वा । भावलक्षणे तोसुन् द्रष्टव्यः ॥ वसनायाच्छादनार्थमङ्गाग्रये पूर्वाह्णे प्रदिशा प्रकर्षेण दिश्यमानेन मंत्रेणास्याः प्राच्या दिशो वृज्यते । स्रूयते । आहियते । तथा च निगमः । त आ वहंति कवयः पुरस्तादित्यादि । तस्मादृतं वरीय उरुतरं बर्हिर्वितरं विस्तीर्णतरं यथा भवति तथा वि प्रथते । विविधमेव वेद्यां प्रस्तृतं भवति । तथा देवेभ्योऽदितये वेदिलक्षणायै पृथिव्यै च स्योनं सुखकरं भवति । विस्तीर्णे बर्हिषि देवाः सुखं निषीदंति ॥

व्यचस्वतीरुर्विया वि श्रयंतां पतिभ्यो न जनयः शुंभमानाः ।
देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥ ५ ॥
व्यचस्वतीः । उर्विया । वि । श्रयंतां । पतिऽभ्यः । न । जनयः । शुंभमानाः ।
देवीः । द्वारः । बृहतीः । विश्वंऽइन्वाः । देवेभ्यः । भवत । सुप्रऽअयनाः ॥ ५ ॥

व्यचस्वतीः । व्यचो व्यापनं । तद्वत्यः ॥ वा छंदसीति पूर्वसवर्णदीर्घः ॥ ता द्वारदेवता उर्विया ॥ उरुशब्दात्तृतीयैकवचन इयाडियाजीकाराणामुपसंख्यानं । पा० ७. १. ३९. १. । इतीयादेशः ॥ उरुत्वेन वि श्रयंतां । विशेषेणाश्रिता भवंतु । तत्र दृष्टांतः । पतिभ्यो न यथा पतीनामर्थाय संभोगकाले शुंभमानाः शोभमाना जनयो जाया विश्रयंति तद्वदस्मिन्कर्मणि विश्रयंतां । हे बृहतीर्महत्यो हे विश्वमिन्वाः ॥ इविः प्रीणनार्थः । तस्मात्कर्मण्युपपदेऽण । इदित्त्वान्नुम् । तत्पुरुषे कृति बऋलमित्यत्र बऋलवचनाद्वितीयाया अप्यलुक् ॥ सर्वस्य प्रीणयित्र्यो हे द्वारो देवीर्द्वाराभिमानिन्यो हे देव्यः यूयं देवेभ्यो देवानामर्थाय सुप्रायणाः सुप्रगमनाः सुविवृता भवत ॥ ॥ ८ ॥

आ सुष्वयंती यजते उपाके उषासानक्ता सदतां नि योनौ ।
दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं शुक्रपिशं दधाने ॥ ६ ॥
आ । सुस्वयंती इति । यजते इति । उपाके इति । उषसानक्ता । सदतां । नि । योनौ ।
दिव्ये इति । योषणे इति । बृहती इति । सुरुक्मे इति सुऽरुक्मे । अधि । श्रियं ।
शुक्रऽपिशं । दधाने इति ॥ ६ ॥

सुस्वयंती ॥ अय पय गतौ । शतर्युपसर्गस्य सोर्द्वित्वं छांदसं ॥ सुष्वयंत्यौ गच्छंत्यौ । यद्वा ॥ स्वपेर्यंतस्य वर्णलोपः ॥ सुष्वापयंत्यौ । यजते यष्टव्ये उपाके उपक्रांते उषसानक्तोषश्च नक्तं च ॥ द्वंद्व उषासोषसः । पा० ६. ३. ३९. । इत्युषासादेशः । देवताद्वंद्वे चेति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वं ॥ अहोरात्रदेव्यौ योनावस्मिन्यज्ञस्थाने नि नितरां नियमेन वा सदतां । आसीदतां ॥ सदेर्लुङि च्लेश्चिण्वदित्वाच्चेरङ् ॥ कीदृश्यौ । दिव्ये दिवि भवे योषणे योषितावित्र प्रीणयित्र्यौ । यद्वा । योषणे समिते परस्परतोऽविविक्ते । बृहती गुणैर्महत्यौ सुरुक्मे शोभनदीप्ती ॥ रुक्मं । रोचतेर्मकप्रत्यये कुत्वे च रुक्मे रूपं ॥ शुक्रपिशं शोभमानरूपां श्रियमधि दधाने अधिकं धारयंत्यौ ॥

दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै ।
प्रचोदयंता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशंता ॥ ७ ॥

दैव्या । होतारा । प्रथमा । सुऽवाचा । मिमाना । यज्ञं । मनुषः । यजध्यै ।
प्रऽचोदयंता । विदथेषु । कारू इति । प्राचीनं । ज्योतिः । प्रऽदिशा । दिशंता ॥ ७ ॥

दैव्या ॥ देवाद्यजाविति यञ्प्रत्ययः ॥ देवसंबंधिनौ होतारौ होमनिष्पादकौ होतृनामकावग्न्यादित्यावत्रिन्यञ्च आसीदतां । कीदृशौ । प्रथमा मनुष्यहोतुः पूर्वभाविनौ सुवाचा शोभनस्तोत्रौ मनुषो मनुष्यस्य सर्वस्य यष्टुर्यजध्यै यागनिवृत्तये ॥ यजेसुमर्थे शध्यैन्प्रत्ययः ॥ यज्ञं मिमाना निर्मिमानावुत्पादयंतौ । विदथेषु । विदंत्यत्रर्त्विजः स्वस्वकर्माणीति विदथा यज्ञाः । तेष्वृत्विजो यजमानांश्च प्रचोदयंता प्रेरयंतौ कारू स्तुतीनां कर्तारौ प्राचीनं पूर्वस्यां दिशि यष्टव्यत्वेन स्थितमाहवनीयाख्यं ज्योतिः प्रदिशा प्रकृष्टेनोपदिष्टमार्गेण यद्वा प्रदिश्यमानेन मंत्रेण दिशंता निर्वहंतौ ॥

आ नो यज्ञं भारती तूयमेत्विळा मनुष्वदिह चेतयंती ।
तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती स्वपसः सदंतु ॥ ८ ॥
आ । नः । यज्ञं । भारती । तूयं । एतु । इळा । मनुष्वत् । इह । चेतयंती ।
तिस्रः । देवीः । बर्हिः । आ । इदं । स्योनं । सरस्वती । सुऽअपसः । सदंतु ॥ ८ ॥

भारती । भरत आदित्यः । तस्य स्वभूता दीप्तिः ॥ तस्येदमित्यर्थ उत्सादित्वादञ् । पा० ४. १. ८६. । टिड्ढाणञ्त्रिति ङीप् ॥ नोऽस्मदीयं यज्ञं तूयं क्षिप्रमेतु । आगच्छतु । तथा मनुष्वन्मनुष्यो यथेदं मया कर्तव्यमिति जानाति तद्वेतयंती जानतीळा देवी चेहास्मिन्कर्मण्यागच्छतु । तथा सरस्वती च । स्वपसः सुकर्माणः । अप इति कर्मनाम ॥ आप्नोतेरसुन्यापः कर्माख्यायां ह्रस्वः । बह्वृचैर्हावावुदात्तं द्व्यच्छंदसीत्युत्तरपदावुदात्तत्वं ॥ एतास्तिस्रो देवीर्दैव्यः स्योनं सुखकरमिदं बर्हिरिमं यज्ञमा सदंतु । आसीदंतु । प्राप्नुवंतु ॥ सदेर्लोटि सीदादेशाभावश्छांदसः ॥

त्वाष्ट्रस्य पशोर्वपायां य इमे इत्येषानुवाक्या । सूचितं च । य इमे द्यावापृथिवी जनित्री तन्नसुरीपमध पोषयितु । आ० ३. ८. । इति ॥

य इमे द्यावापृथिवी जनित्री रूपैरपिंशद्भुवनानि विश्वा ।
तमद्य होतरिषितो यजीयान्देवं त्वष्टारमिह यक्षि विद्वान् ॥ ९ ॥
यः । इमे इति । द्यावापृथिवी इति । जनित्री इति । रूपैः । अपिंशत् । भुवनानि । विश्वा ।
तं । अद्य । होतः । इषितः । यजीयान् । देवं । त्वष्टारं । इह । यक्षि । विद्वान् ॥ ९ ॥

यस्त्वष्टा देवो जनित्री विश्वस्य जनयित्र्याविमे द्यावापृथिवी ॥ द्वंद्वे दिवो द्यावेति द्यावादेशः । आद्युदात्तः । पृथिवीशब्दो ङीषंतत्वेनांतोदात्तः । देवतादंद्वे चेति पूर्वोत्तरपदयोः प्रकृतिस्वरत्वं ॥ द्यावापृथिव्यौ रूपैर्देवतिर्यङ्मनुष्याद्याकारैररपिंशत् रूपवत्यावकरोत् ॥ पिश अवयवे तौदादिकः । शे मुचादीनामिति नुमागमः ॥ तथा विश्वा सर्वाणि भुवनानि भूतजातानि रूपयुक्तान्यकरोत् । हे होतः यजीयान्यष्टृतमो विद्वान् सर्वं जानंस्त्वमिषितोऽस्माभिरध्येषितः प्रार्थितः सन्निहास्मिन्कर्मण्यास्मिन्दिने तं त्वष्टारं देवं यक्षि । स्तुतिभिर्हविर्भिर्वा यज । पूजय ॥

उपावसृज त्मन्या समंजन्देवानां पाथ ऋतुथा हवींषि ।
वनस्पतिः शमिता देवो अग्निः स्वदंतु हव्यं मधुना घृतेन ॥ १० ॥

THE RAMAKRISHNA MISSION INSTITUTE OF CULTURE • CALCUTTA • LIBRARY

उप॒ऽअव॑सृज। त्मन्या॑। सं॒ऽअ॑ञ्जन्। दे॒वाना॑। पाथः॑। ऋ॒तु॒ऽथा। ह॒वीं॑षि।
वन॒स्पतिः॑। श॒मि॒ता। दे॒वः॑। अ॒ग्निः॑। स्वद॑न्तु। ह॒व्यं॑। मधु॑ना। घृते॑न ॥१०॥

हे वनस्पते यूप त्मन्या ॥ आत्मशब्दस्य तृतीयैकवचने यादेशः। मंत्रेष्वाङ्यादेरात्मन इत्याकारलोपः ॥ आत्मनेवर्तुथर्तावृतौ प्राप्ते काले देवानामर्थाय पाथः पशुलक्षणमन्नमन्यानि च हवींषि समंजन् सम्यग्व्यक्तीकुर्वन्नुपावसृज। उपागम्य प्रयच्छ ॥ गतिर्गतौ। पा० ८. १. ७०.। इति गतेर्निघातः ॥ किंच वनस्पतिर्योऽयं यूपः शमितेतन्नामको देवः यद्वा शमितोऽग्निर्देवो दीप्यमान आहवनीयाख्योऽग्निर्यते यथो मधुना मधुरेण घृतेन। यद्वा। मधुनोदकेन प्रोक्षणोपनयनादिगतेन घृतेन च। हव्यं हवनयोग्यं स्वदंतु। स्वादं कुर्वंतु ॥

सद्यो जा॒तो व्य॑मिमीत य॒ज्ञम॒ग्निर्दे॒वाना॑मभवत्पु॒रोगाः॑।
अ॒स्य होतुः॑ प्र॒दिश्यृ॒तस्य॑ वा॒चि स्वाहा॑कृतं ह॒विर॑दंतु दे॒वाः ॥११॥
सद्यः॑। जा॒तः॑। वि। अ॒मि॒मी॒त। य॒ज्ञं। अ॒ग्निः॑। दे॒वाना॑। अ॒भ॒व॒त्। पु॒रःऽगाः॑।
अ॒स्य। होतुः॑। प्र॒ऽदिशि॑। ऋ॒तस्य॑। वा॒चि। स्वाहा॑ऽकृतं। ह॒विः॑। अ॒द॒न्तु॒। दे॒वाः॑ ॥११॥

अयमग्निः सद्यस्तदानीमेव जातो जायमान एव यज्ञं व्यमिमीत। विशेषेण निर्ममीते। उत्पादयति। माङ् माने शब्दे च जौहोत्यादिकः ॥ अत एवायमग्निर्देवानां पुरोगाः प्रथमगामी मुख्योऽभवत् ॥ गमेर्विट्-प्रत्यय आत्वे च कृते रूपं ॥ ततः प्रदिशि प्रकृष्टायां दिशि प्राच्यामृतस्याहवनीयात्मनागतस्यास्य होतुर्होमनिष्पादकस्याग्नेर्वाचि। अत्र वागाश्रय आज्यं लक्ष्यते। वाच्याज्ये स्वाहाकृतं स्वाहाकारेण प्रक्षिप्तं हविः सर्वे देवा अदंतु। भक्षयंतु। इदं सूक्तं यास्केन सम्यगन्वधायि। नि० ८. ५–२१.। तदनुसंधीयतां ॥ ॥९॥

मनीषिण इति दशर्चं द्वादशं सूक्तं वैरूपस्याष्टादंष्ट्रस्यार्षं चैष्टुभमैंद्रं। तथा चानुक्रम्यते। मनीषिणो दशाष्टादंष्ट्र इति ॥ गतो विनियोगः ॥

मनी॑षिणः॒ प्र भ॑रध्वं मनी॒षां यथा॑यथा म॒तयः॑ संति॑ नृ॒णां।
इंद्रं॑ स॒त्यैरे॑रयामा कृ॒तेभिः॒ स हि वी॒रो गि॒र्वण॑स्युर्वि॒दानः॑ ॥१॥
मनी॑षिणः। प्र। भ॒र॒ध्वं॒। म॒नी॒षां। यथा॑ऽयथा। म॒तयः॑। संति॑। नृ॒णां।
इंद्रं॑। स॒त्यैः। आ। ई॒र॒या॒म॒। कृ॒तेभिः॑। सः। हि। वी॒रः। गि॒र्वण॑स्युः। वि॒दानः॑ ॥१॥

हे मनीषिणः स्तोतारः मनीषां मनस ईषितृत्वीं स्तुतिमिंद्राय प्र भरध्वं। कुरुत। नृणां कर्मनेतृणां युष्माकं यथायथा मतयः संति भवंति तथा बुद्ध्यनुसरिणं स्तुतिं कुरुध्वं। वयं च कृतेभिः कृतैः सत्यैर्यथार्थभूतैः स्तोत्रैरिंद्रमेरयाम। यज्ञं प्रत्यागमयाम ॥ ईर गतौ। क्षंतस्य लोट् ॥ हि यतो विदानो जानानः समर्थः स इंद्रो गिर्वणस्युः। गीर्भिर्वननं संभजत इति गीर्वणसः स्तोतारः ॥ वनतेरसुनि रूपं। उपपदस्य दीर्घाभावश्छांदसः। तदंतात्क्यप्। क्याच्छंदसीत्युप्रत्ययः ॥ स्तोतृन्कामयमानः खलु। अतस्तमभिष्टुत ॥

ऋ॒तस्य॒ हि सद॑सो धी॒तिर॒द्यौत्सं गार्ष्टे॒यो वृ॑ष॒भो गो॒भिरा॑नट्।
उद॑तिष्ठत्त॒विषे॑णा॒ रवे॑ण म॒हांति॑ चि॒त्सं वि॒व्याचा॒ रजां॑सि ॥२॥
ऋ॒तस्य॑। हि। सद॑सः। धी॒तिः। अ॒द्यौ॒त्। सं। गार्ष्टे॒यः। वृ॒ष॒भः। गो॒भिः। आ॒न॒ट्।
उत्। अ॒ति॒ष्ठ॒त्। त॒विषे॑ण। रवे॑ण। म॒हांति॑। चि॒त्। सं। वि॒व्याच॑। रजां॑सि ॥२॥

ऋतस्योदकस्य सदसः स्थानस्यांतरिक्षस्य भीतिर्धारकः स इंद्रोऽवीत्। वीतते। प्रकाशते। हि प्रसिद्धौ॥ वुत दीप्तौ। लुङि वुद्यो लुकीति परस्मैपदं। ष्ठिवुक्लमां छांदसः। हलंतलक्षणा वृद्धिरपि॥ यद्वा। अवीत्। तादृशः इंद्रो यज्ञमभिगच्छति॥ वु अभिगमे आदादिकः। लङ्। उतो वृद्धिर्लुकि हलीति वृद्धिः॥ गार्ष्टेयः। सप्तत्यसूता धेनुर्गृष्टिः। तस्या अपत्यं वृषभो गोभिः समागट्। संव्याप्नोति। तथैषोऽपि सर्वं स्वमहिम्ना व्याप्नोति। तथा तविषेण। महन्नामैतत्। महता रवेण शब्देनोदतिष्ठत्। उच्छ्रित उन्नतोऽभवत्। अत एव महांति चिन्महांत्यपि रजांस्युदकानि भुवनानि वा सं विव्याच। संव्याप्नोति॥

इंद्रः किल श्रुत्या अस्य वेद स हि जिष्णुः पथिकृत्सूर्याय।
आन्मेनां कृण्वन्नच्युतो भुवन्नोः पतिर्दिवः सनजा अप्रतीतः॥३॥
इंद्रः। किल। श्रुत्यै। अस्य। वेद। सः। हि। जिष्णुः। पथिऽकृत्। सूर्याय।
आत्। मेनां। कृण्वन्। अच्युतः। भुवत्। गोः। पतिः। दिवः। सनऽजाः। अप्रतिऽइतः॥३॥

अस्माकदीयस्य स्तोत्रस्य श्रुत्यै श्रवणायेंद्रः किलेंद्र एव वेद। जानाति। स हि स एव जिष्णुः शत्रूणां जयशीलः सूर्याय पथिकृन्मार्गकर्ता भवति। किंचाच्युतः शत्रुभिरगंतव्यो वृषणश्वस्य मेनामात्मानं कृण्वन् कुर्वन् इंद्र आत्। आगच्छत्यस्मदीयं यज्ञं। मेनाभवो वृषणश्वस्य सुकृतो। ऋ० १. ५१. १३.। इति मंत्रांतरं॥ अस गतिदीप्त्यादानेषु भौवादिकः। ---॥ दिवो द्युलोकस्य च पतिर्भुवत्। अभूत्॥ भवतेर्लेट्। वाक्यभेदादनिघातः॥

इंद्रो महा महतो अर्णवस्य व्रताभिनाद्गिरोभिर्गृणानः।
पुरूणि चिन्नि ततानारजांसि दाधार यो धरुणं सत्यताता॥४॥
इंद्रः। महा। महतः। अर्णवस्य। व्रता। अभिनात्। अंगिरःऽभिः। गृणानः।
पुरूणि। चित्। नि। ततान। रजांसि। दाधार। यः। धरुणं। सत्यऽताता॥४॥

इंद्रोऽंगिरोभिर्ऋषिभिर्गृणानः स्तूयमानः सन् महतोऽर्णवस्य॥ अर्णसः सलोपश्च। का० ५. २. १०९. ३.। इति वप्रत्ययः॥ उदकवतो मेघस्य व्रता व्रतानि कर्माणि महा स्वमहिम्नैवाभिनात्। अहिंसीत्॥ मीङ् हिंसायां। लङि मीनातेर्निगम इति ह्रस्वः॥ ततः पुरूणि चिद्बहून्येव रजांस्युदकानि नि ततान। नीचीनान्यकरोत्। य इंद्रः सत्यताता सत्यैर्देवैस्तते। यद्वा। सत्यशब्दादपि स्वार्थिकस्तातिल् द्रष्टव्यः। सत्ये। द्युलोके धरुणं धारकं बलं दाधार अधारयत्॥

इंद्रो दिवः प्रतिमानं पृथिव्या विश्वा वेद सवना हंति शुष्णं।
महीं चिद्द्यामातनोत्सूर्येण चास्कंभ चित्कंभनेन स्कभीयान्॥५॥
इंद्रः। दिवः। प्रतिऽमानं। पृथिव्याः। विश्वा। वेद। सवना। हंति। शुष्णं।
महीं। चित्। द्यां। आ। अतनोत्। सूर्येण। च। अस्कंभ। चित्। स्कंभनेन। स्कभीयान्॥५॥

दिवो द्युलोकस्य पृथिव्याश्च प्रतिमानं महत्त्वेन प्रतिनिधिरिंद्रो विश्वा सर्वाणि सवना सवनानि वेद। सोमपानार्थं जानाति। शुष्णं सर्वस्य शोषकमेतन्नामानमसुरं हंति॥ वाक्यभेदादनिघातः॥ अपि च महीं चिन्महतीमपि द्यां सूर्येणातनोत्। सर्वत्र प्रकाशयुक्तामकरोत्। स्कभीयान् स्कंभयितृणां मध्ये श्रेष्ठः स स्कंभनेन चिन्निरोधनसाधनेन सामर्थ्येनैव चास्कंभ। द्युलोकमवष्टब्धमकरोत्॥ स्कंभिः सौत्रो धातुः। लिटि तुजादीनामिति दीर्घः। चित्स्कंभनेनेत्यत्र संहितायां सलोपः। उत्पूर्वश्च स्कंभेरदः स्कानंभोः। पा० ८. ४. ६१.। इति सलोप उक्तः। चित्पूर्वस्य स्कंभेरपि भवति छंदोविषयत्वात्॥ ॥१०॥

वज्रेण हि वृत्रहा वृत्रमस्तरदेवस्य शूशुवानस्य मायाः ।
वि धृष्णो अत्र धृषता जघंथाथाभवो मघवन्बाह्वोजाः ॥६॥
वज्रेण । हि । वृत्रऽहा । वृत्रं । अस्तः । अदेवस्य । शूशुवानस्य । मायाः ।
वि । धृष्णो इति । अत्र । धृषता । जघंथ । अथ । अभवः । मघऽवन् । बाहुऽओजाः ॥६॥

हे इंद्र वृत्रहा वृत्रस्य हंता वज्रेण वृत्रमस्तः । असृणाः । अवधीः ॥ सृणातेर्लङि बहुलं छंदसीति विकरणस्य लुक् । सिपि गुणः । हियोगादनिघातः ॥ अनंतरं हे धृष्णो धर्षणशील त्वमदेवस्यातीतमानस्य शूशुवानस्य स्वबलेन वर्धमानस्य तस्य माया धृषता समर्थेन वज्रेणात्रास्मिन्काल एव वि जघंथ । विनाशितवानसि ॥ हंतेर्लिटि थल्यभ्यासाच्चेति कुत्वं ॥ अथ हे मघवन्धनवन्निंद्र बाह्वोर्बा भुजबलवानभवः ॥

सचंत यदुषसः सूर्येण चित्रामस्य केतवो रामविंदन् ।
आ यन्नक्षत्रं ददृशे दिवो न पुनर्यतो नकिरद्धा नु वेद ॥७॥
सचंत । यत् । उषसः । सूर्येण । चित्रां । अस्य । केतवः । रां । अविंदन् ।
आ । यत् । नक्षत्रं । ददृशे । दिवः । न । पुनः । यतः । नकिः । अद्धा । नु । वेद ॥७॥

यद्यदोषस उषःकालाः सूर्येण सूर्यात्मकेनेंद्रेण सचंत संगच्छंते ॥ सच समवाये भौवादिकः ॥ तदानीमस्य स्वभूताः केतवः सर्वस्य प्रज्ञापका रश्मयश्चित्रां नानावर्णां रां रायं श्रियमविंदन् । अलभंत । पुनरुदयानंतरं यद्यदा दिवो नक्षत्रं न ददृशे न दृश्यते ॥ दृशेः कर्मणि लिट् । यद्योगादनिघातः ॥ तदानीं यतः ॥ इणः शतंतस्य शसि शतुरनुमो नद्यजादी इति विभक्तेरुदात्तत्वं ॥ सर्वत्र गच्छतोऽस्य रश्मीन्नकिर्न कश्चिन्नु वेद । जानाति । एतदद्धा सत्यमेव ॥

दूरं किल प्रथमा जग्मुरासामिंद्रस्य याः प्रसवे ससुरापः ।
क्व स्विदयं क्व बुध्न आसामापो मध्यं क्व वो नूनमंतः ॥८॥
दूरं । किल । प्रथमाः । जग्मुः । आसां । इंद्रस्य । याः । प्रऽसवे । ससुः । आपः ।
क्व । स्वित् । अयं । क्व । बुध्नः । आसां । आपः । मध्यं । क्व । वः । नूनं । अंतः ॥८॥

आसामपां मध्ये प्रथमाः प्रथमगामिन्यस्ता आपो दूरं किल अग्मुः । दूरमेव गताः । या आप इंद्रस्य प्रसवे प्रेरणे ॥ षू प्रेरणे । जवसवौ चेति वक्तव्यं । पा० ३. ३. ५६. ४. । इत्यवपवादेऽच् । थाथघञ्क्ताजबित्रकाणामित्युत्तरपदांतोदात्तत्वं ॥ तस्माच्छायां ससुः । सरंति । गच्छंति खलु । अथ प्रत्यक्षतः । हे आपः आसां युष्माकमयं क्व स्वित् । कुत्र वर्तते । बुध्नो मूलं च क्व । तथा वो युष्माकं मध्यं च क्व नूनमिदानीं युष्माकमंतोऽवसानं च क्व । सर्वगतत्वादनिर्ज्ञायमानगमना आसन्नित्यर्थः ॥ क्व । किंशब्दात् सप्तम्यर्थे किमोऽदित्यत्रत्रयः । क्वातीति क्वादेशः । तित्स्वरितः । अंतः । अमेर्गत्यर्थस्यासिहसीत्यादिना तन्प्रत्ययः ॥

सृजः सिंधूँरहिना जग्रसानाँ आदित्ता प्र विविज्रे जवेन ।
मुमुक्षमाणा उत या मुमुच्रेऽधेदेता न रमंते नितिक्ताः ॥९॥
सृजः । सिंधून् । अहिना । जग्रसानान् । आत् । इत् । एताः । प्र । विविज्रे । जवेन ।
मुमुक्षमाणाः । उत । याः । मुमुच्रे । अध । इत् । एताः । न । रमंते । निऽतिक्ताः ॥९॥

हे इंद्र अहिनाहंतव्येन वृत्रेण मेघेन वा जग्रसानान् ॥ ग्रस अदने । अगुदात्तित् । छंदसि लिटः कानच् ।

यस्याः सिंधून् स्यंदमाना अपः सृजः । असृजः । निरगमयः । आदित् । इदवधारणे । अनंतरमेवेता आपो जवेन वेगेन प्र विविशे । सर्वत्रात्यंतं चलिता बभूवुः ॥ ओविजी भयचलनयोः । उदात्तेत् । लिटीरयो रे । पा० ६. ४. ७६. । इतीरयो रेआदेशः ॥ उतापि च मुमुचमाणा इंद्रेण मोचयितुमिष्यमाणा या आपो मुमुचे इंद्रेण मोचिता अभूवन् ॥ मुचेः कर्मणि लिट् ॥ अधेदनंतरमेव निर्गता नितरां मुक्ता आपो न रमंते । एकत्र न क्रीडंते । किंतु सर्वत्र गमनशीला इत्यर्थः ॥

सध्रीचीः सिंधुमुशतीरिवायन्त्सनाज्जार आरितः पूर्भिदासां ।
अस्मा ते पार्थिवा वसून्यस्मे जग्मुः सूनृता इंद्र पूर्वीः ॥१०॥
सध्रीचीः । सिंधुं । उशतीःऽइव । आयन् । सनात् । जारः । आरितः । पूःऽभित् । आसां ।
अस्मै । आ । ते । पार्थिवा । वसूनि । अस्मे इति । जग्मुः । सूनृताः । इंद्र । पूर्वीः ॥१०॥

सध्रीचीः ॥ सहस्य सध्रिरिति सध्रीत्यादेशः । अंचतेश्चोपसंख्यानमिति ङीप् । अलोपदीर्घौ । वा छंदसीति पूर्वसवर्णदीर्घः ॥ सहांचनाः सहगमना आपः सिंधुं समुद्रं भर्तारमायन् । आगच्छन् । तत्र दृष्टांतः । उशतीरिव यथा कामयमानाः स्त्रियः स्वपतिमभिगच्छंति तद्वत् । जारः शत्रूणां जारयिता पुर्भिदिंद्रः सनाच्चिरादेवासामपामारितः प्रेरकत्वेन स्वामी भवति । हे इंद्र अस्मै अस्माकं स्वभूतानि पार्थिवा पार्थिवानि वसूनि धनवत्तीर्णयितॄणि हवींषि पूर्वीर्बह्व्यः सूनृता वाचः स्तुतिलक्षणाश्च ते त्वदीयमस्तं गृहमा जग्मुः । आगच्छंतु । यद्वा । अस्मदीयाः स्तुतयस्ते गृहं गच्छंतु । अस्माकं गृहं त्वदीयानि पार्थिवानि धनान्यभिगच्छंतु ॥ गमेश्छंदसि सार्वकालिको लिट् ॥ ॥११॥

इंद्र पिबेति दशर्चं चतुर्दशं सूक्तं त्रैष्टुभमैंद्रं नभःप्रभेदनो नाम विरूपगोत्र ऋषिः । तथा चानुक्रम्यते । इंद्र पिब नभःप्रभेदन इति ॥ गतो विनियोगः ॥

इंद्र पिब प्रतिकामं सुतस्य प्रातःसावस्तव हि पूर्वपीतिः ।
हर्षस्व हंतवे शूर शचूनुक्थेभिष्टे वीर्या३ प्र ब्रवाम ॥१॥
इंद्र । पिब । प्रतिऽकामं । सुतस्य । प्रातःऽसावः । तव । हि । पूर्वऽपीतिः ।
हर्षस्व । हंतवे । शूर । शचून् । उक्थेभिः । ते । वीर्या । प्र । ब्रवाम ॥१॥

हे इंद्र त्वं प्रतिकामं ये ये कामास्तांस्तान्प्रति ॥ अव्ययीभावसमासः । तस्य स्वरः ॥ यथेच्छं सुतस्याभिषुतस्य यो भागस्तुभ्यं दातव्यस्तं पिब ॥ आमंत्रितस्याविद्यमानत्वेन पादादित्वादनिघातः ॥ प्रातःसावः प्रातःसवने ऽभिषूयमाणः सोमस्तव हि । तृतीयार्थे षष्ठी । त्वयैव पूर्वपीतिः प्रथमत एव पातव्यः । यद्वा । प्रातःसावः । सप्तम्याः सुः । प्रातःसवने तवैव प्रथमपानं खलु । ऐंद्रवायवग्रहे ह्यादित एवेंद्रः पिबति ॥ तत्पुरुषे दासीभारादित्वात्पूर्वपदांतोदात्तत्वं । यद्वा । बहुव्रीहिः ॥ ततो हे शूर समर्थ त्वं शत्रून्हंतवे हंतुं हर्षस्व । हृष्टो भव । अथ ते त्वदीयानि वीर्या वृत्रहननादिलक्षणानि वीर्याण्युक्थेभिरुक्थैः शस्त्रैः प्र ब्रवाम । प्रकर्षेण वदाम ॥

यस्ते रथो मनसो जवीयानेंद्र तेन सोमपेयाय याहि ।
तूयमा ते हरयः प्र द्रवंतु येभिर्यासि वृषभिर्मंदमानः ॥२॥
यः । ते । रथः । मनसः । जवीयान् । आ । इंद्र । तेन । सोमऽपेयाय । याहि ।
तूयं । आ । ते । हरयः । प्र । द्रवंतु । येभिः । यासि । वृषऽभिः । मंदमानः ॥२॥

हे इंद्र मनसोऽपि जवीयानतिशयेन गंता ते त्वदीयो यो रथोऽस्ति तेन रथेन सोमपेयायास्मदीयं

सोमं पातुमा याहि । आगच्छ ॥ पा पाने । भावेऽचो यत् । ईष्यतीतीत्वं । आर्धधातुकलक्षणो गुणः । ह्रस्वोत्तरपदप्रकृतिस्वरत्वं ॥ तथा ते त्वदीया हरयो रथे संयुक्ता अश्वाश्चूयं क्षिप्रमभिमुखीन प्र द्रवंतु । प्रगच्छंतु । वृषभिः सेक्तृभिर्यैर्भिर्यैरश्वैर्मंदमानो मोदमानः सन् यासि गच्छसि । हरी इंद्रेति वचनादिंद्रस्य द्वावेवाश्वाविति न चोदनीयं आ त्वा सहस्रमा शतमित्यादिनिगमांतरे दर्शनात् । ऋ० ८. १. २४. ॥

हरित्वता वर्चसा सूर्यस्य श्रेष्ठै रूपैस्तन्वं स्पर्शयस्व ।
अस्माभिरिंद्र सखिभिर्हुवानः सधीचीनो मादयस्वा निषद्य ॥३॥
हरित्वता । वर्चसा । सूर्यस्य । श्रेष्ठैः । रूपैः । तन्वं । स्पर्शयस्व ।
अस्माभिः । इंद्र । सखिऽभिः । हुवानः । सधीचीनः । मादयस्व । निऽसद्य ॥३॥

हे इंद्र हरित्वता ॥ हरिच्छब्दान्मतुपो मयु इति वत्वं ॥ हरिवर्णयुक्तेन सूर्यस्य वर्चसा तेजसा तत्सदृशैः श्रेष्ठैः प्रशस्यतमैरात्मीये रूपैस्तन्वमात्मीयं शरीरं मदीयं वा । यद्वा । तायत इति तनूर्यज्ञः । तं स्पर्शयस्व । तेजोयुक्तं कुरु । किंच सधीचीनः ॥ विभाषांचेरदिक्स्त्रियामिति खप्रत्ययः ॥ मरुद्भिः सहांचनस्त्वं सखिभिः सखिभूतैरस्माभिर्हूयमानः सन्निषद्य यज्ञे निषण्णो भूत्वा मादयस्व । सोमपानेन हृष्टो भव ॥

यस्य त्यत्ते महिमानं मदेष्विमे मही रोदसी नाविविक्तां ।
तदोक आ हरिभिरिंद्र युक्तैः प्रियेभिर्याहि प्रियमन्नमच्छ ॥४॥
यस्य । त्यत् । ते । महिमानं । मदेषु । इमे इति । मही इति । रोदसी इति । न । अविविक्तां ।
तत् । ओकः । आ । हरिऽभिः । इंद्र । युक्तैः । प्रियेभिः । याहि । प्रियं । अन्नं । अच्छ ॥४॥

हे इंद्र इमे मही महत्यौ रोदसी द्यावापृथिव्यौ यस्य ते तव सोमपानेन जनितेषु मदेषु संभूतं त्वत्तं महिमानं नाविविक्तां न पृथक्कुरुतः किंतु यस्य महिम्न्येव तिष्ठतः ॥ विचिर् पृथग्भावे औहोत्यादिकः । खडि संज्ञापूर्वको विधिरनित्य इत्यभ्यासस्य गुणाभावः । यद्योगादनिघातः ॥ प्रियेभिः प्रियतमै रथे युक्तैर्हरिभिरश्वैः प्रियं प्रीणनकरमन्नं सोमलक्षणमच्छाभिलक्ष्य तदोकोऽस्मदीयं यज्ञसदनमा याहि । आगच्छ ॥

यस्य शश्वत्पपिवाँ इंद्र शचूननानुकृत्या रणया चकर्थ ।
स ते पुरंधिं तविषीमियर्ति स ते मदाय सुत इंद्र सोमः ॥५॥
यस्य । शश्वत् । पपिऽवान् । इंद्र । शचून् । अननुऽकृत्या । रणया । चकर्थ ।
सः । ते । पुरंऽधिं । तविषीं । इयर्ति । सः । ते । मदाय । सुतः । इंद्र । सोमः ॥५॥

हे इंद्र पपिवान् ॥ पिबतेः क्वसौ वस्वेकाजाद्धसामितीडागमः ॥ सोमं पीतवांस्त्वमनानुकृत्यानुकरणरहितेन सकृत्प्रहारेण शत्रुहननसमर्थेन रण्या सांयुगीनेनायुधेन ॥ रणशब्दात्साध्वर्थे प्राग्घितीयो यत् ॥ यस्य यजमानस्य शत्रून्शश्वद्बहुवारं चकर्थ हतवानसि ॥ कृञ् हिंसायां । लिटि थलि यद्योगादनिघातः लित्स्वरः ॥ स यष्टा ते त्वदर्थं तविषीं महतीं पुरंधिं बहुविधां स्तुतिमियर्ति । प्रेरयति ॥ ऋ गतौ औहोत्यादिकः । अर्तिपिपर्त्योरित्यभ्यासस्येत्वं । अभ्यासस्यासवर्ण इतीयङ् ॥ हे इंद्र सुतोऽभिषुतः स सोमस्ते मदाय समर्थो भवति । यद्वा । स यष्टा सुतः सोमः । सुञ्धात्वयः । अभिषुतं सोमं स्वमदाय प्रेरयति ॥ ॥१२॥

इदं ते पात्रं सनविन्नमिंद्र पिबा सोममेना शतक्रतो ।
पूर्णं आहावो मदिरस्य मध्वो यं विश्व इदभिहर्यंति देवाः ॥६॥

इदं । ते । पात्रं । सनऽवित्तं । इंद्र । पिब । सोमं । एना । शतक्रतो इति शतऽक्रतो ।
पूर्णः । आऽहावः । मदिरस्य । मध्वः । यं । विश्वे । इत् । अभिऽहर्यंति । देवाः ॥६॥

हे इंद्र ते त्वदर्थं पात्रं चमसादिकं सनवित्तं । अस्माभिश्चिरादेव लब्धं ॥ विदृ लाभे । कर्मणि निष्ठा ॥ हे शतक्रतो बहुकर्मन्निंद्रेनेतेन पात्रेण सोमं पिब । यतो मदिरस्य मदकरस्य मध्वो मधुनः सोमस्याहावः पानस्थानीयपात्रविशेषः पूर्णः पूरितोऽभूत् ॥ ह्वेञ् स्पर्धायां । निपानमाहावः । पा० ३. ३. ७४. । इति निपातितः । स्तुतिभिराह्रयमाना देवा अत्र सोमं पिबंतीति । याथादिक्यरः ॥ यमित्यमाहावमेव विश्वे सर्वे देवा अभिहर्यंति । अभिकामयंते ॥ हर्य गतिकांत्योः भौवादिकः । यद्योगात्तिङो निघाताभावे तिङि चोदात्तवतीति गतेर्निघातः ॥

वि हि त्वामिंद्र पुरुधा जनासो हितप्रयसो वृषभं हुवंते ।
अस्माकं ते मधुमत्तमानीमा भुवन्त्सवना तेषु हर्य ॥७॥
वि । हि । त्वां । इंद्र । पुरुधा । जनासः । हितऽप्रयसः । वृषभं । हुवंते ।
अस्माकं । ते । मधुमत्ऽतमानि । इमा । भुवन् । सवना । तेषु । हर्य ॥७॥

हे इंद्र वृषभ कामानां वर्षक हितप्रयसः । प्रय इत्यन्ननाम प्रीणनकारित्वात् । संभृतहविष्का जनासो जनाः पुरुधा बहुधा । हिरवधारणे । त्वामेव वि हुवंते । विविधमाह्वयंति ॥ ह्वेञ् स्पर्धायां । निसमुपविभ्यो ह्व इत्यात्मनेपदं ॥ अस्माकं स्वभूतानीमानि सवना सवनानि ते त्वदर्थं मधुमत्तमान्यतिशयेन सोमवंति भुवन् । अभवन् । तस्मात्त्वं तेषु सवनेषु हर्य । सोमाभ्कामयस्व ॥

प्र तं इंद्र पूर्व्याणि प्र नूनं वीर्या वोचं प्रथमा कृतानि ।
सतीनमन्युरश्रथायो अद्रिं सुवेदनामकृणोर्ब्रह्मणे गां ॥८॥
प्र । ते । इंद्र । पूर्व्याणि । प्र । नूनं । वीर्या । वोचं । प्रथमा । कृतानि ।
सतीनऽमन्युः । अश्रथयः । अद्रिं । सुऽवेदनां । अकृणोः । ब्रह्मणे । गां ॥८॥

हे इंद्र ते त्वदीयानि प्रथमादितः कृतानि पूर्व्याणि पुरातनानि च वीर्या वीर्याणि नूनमिदानीं प्र वोचं । प्रकर्षेण वदामि । एकः प्रशब्दः पूरणः ॥ वोचं । ब्रुञि ब्रुवो वचिः । ब्लेरङ् ॥ कानि तानि । सतीनमन्युः । सतीनमित्युदकनाम । उदकाभिवर्षणबुद्धियुक्तस्त्वमद्रिं मेघमश्रथयः । वज्रेणाहिंसीः । ब्रह्मणे बृहस्पतये गां पणिभिरपहृतां सुवेदनां सुष्ठु लाभनीयामकृणोः । अकरोरित्यादीनि ॥

नि षु सीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनां ।
न ऋते त्वत्क्रियते किं चनारे महामर्कं मघवञ्चित्रमर्च ॥९॥
नि । सु । सीद । गणऽपते । गणेषु । त्वां । आहुः । विप्रऽतमं । कवीनां ।
न । ऋते । त्वत् । क्रियते । किं । चन । आरे । महां । अर्कं । मघऽवन् । चित्रं । अर्च ॥९॥

हे गणपते त्वं गणेषु स्तोतृगणेषु सु सुष्ठु नि षीद । स्तुतिश्रवणार्थं निषण्णो भव । यतः कवीनां क्रांतप्रज्ञानां मध्ये त्वा त्वां विप्रतममतिशयेन मेधाविनमित्याहुः । किंच त्वदृते ॥ अन्यारादितरर्ते । पा० २. ३. २९. । इति पंचमी ॥ त्वां वर्जयित्वा किं चन कर्मारे दूरे समीपे वा न क्रियते । तस्मान्निषीद । ततो हे मघवन्धनवन्निंद्र महां महांतमर्कमर्चनीयमस्मदीयं चित्रं चित्रत्वंचदश्चादिलक्षणं सोमं चित्रं नानारूपं फलत्वार्च । पूजय । विधेहि ॥ अर्च पूजायां भौवादिकः ॥

अभिख्या नो मघवन्नाधमानान्त्सखे बोधि वसुपते सखीनां ।
रणं कृधि रणकृत्सत्यशुष्माभक्ते चिदा भजा राये अस्मान् ॥१०॥
अभिऽख्या । नः । मघऽवन् । नाधमानान् । सखे । बोधि । वसुऽपते । सखीनां ।
रणं । कृधि । रणऽकृत् । सत्यऽशुष्म । अभक्ते । चित् । आ । भज । राये । अस्मान् ॥१०॥

हे मघवन्धनवन्निंद्र नाधमानान् ॥ नाधृ नाधृ याच्ञोपतापैश्वर्याशीःषु भौवादिकः । अनुदात्तेत् ॥ याचमानान्नोऽस्मानभिख्याभिख्यापनेन तेजसा युक्तान्कुरु । प्रसिद्धान्वा कुरु । हे सखे धनदानेन हे वसुपते वसूनां स्वामिन् त्वं सखीनां स्तोतृत्वेन सखिभूतानामस्माकं स्वभूतानि स्तोत्राणि बोधि । बुधस्व ॥ बुध अवगमने भौवादिकः । लोटि च्छांदसः शपो लुक् । छंदस्युभयथेति हेरार्धधातुकत्वेनाङित्त्वादङितश्चेति हेर्धिभावः । अत एव गुणः । सार्वधातुकत्वेन ङित्त्वादंतोदात्तत्वं । वर्णलोपश्छांदसः ॥ हे रणक्षक्षत्रुभिः सह युद्धकर्तः अत एव हे सत्यशुष्म यथार्थबलोपेत त्वं रणं क्षधि । कुरु । शत्रूञ्जहि ॥ करोतेर्लोटि शृणुपृकृवृभ्यश्छंदसीति हेर्धिः ॥ किंचाभक्ते चिदसंभजनीये स्थानेऽप्यस्मान्राये धनाया भजा । भागिनः कुरु ॥ ह्रुचोऽतस्तिङ इति संहितायां दीर्घः ॥ ॥ १३ ॥ ॥ ९ ॥

दशमेऽनुवाके षोडश सूक्तानि । तत्र तमस्येति दशर्चं प्रथमं सूक्तमैंद्रं । शुनप्रभेदनो नाम वैरूप ऋषिः । अंत्या चिष्टुप् शिष्टा जगत्यः । तथा चानुक्रांतं । तमस्य शुनप्रभेदनस्त्रिष्टुबंतमिति ॥ दशरात्रस्याष्टमेऽहनि मरुत्वतीय एतत्सूक्तं । सूचितं च । तमस्य द्यावापृथिवी महाँ इंद्रो नृवदिति मरुत्वतीयं । आ० ८. ७. । इति ॥

तमस्य द्यावापृथिवी सचेतसा विश्वेभिर्देवैरनु शुष्मावतां ।
यदैत्कृण्वानो महिमानमिंद्रियं पीत्वी सोमस्य क्रतुमाँ अवर्धत ॥१॥
तं । अस्य । द्यावापृथिवी इति । सऽचेतसा । विश्वेभिः । देवैः । अनु । शुष्मं । आवतां ।
यत् । ऐत् । कृण्वानः । महिमानं । इंद्रियं । पीत्वी । सोमस्य । क्रतुऽमान् । अवर्धत ॥१॥

सचेतसा सह चेतयंत्यौ द्यावापृथिवी द्यावापृथिव्यौ विश्वेभिः सर्वैर्देवैः सहास्य ॥ अन्वादेशेऽनुदात्तादेशोऽनुदात्तः । पा० २. ४. ३२. ॥ एतस्येंद्रस्य तं शुष्मं शत्रूणां शोषकं बलमन्वावतां । रक्षतां । तस्य बलं पूर्वमस्मान्रक्षतु पश्चादेते अपि रक्षतामिति भावः ॥ अवतेर्लुङ् ॥ क्षण्वानो वृत्रवधादिकं कुर्वाणः स महिमानमिंद्रियमिंद्रस्यात्मनः पर्याप्तं वीर्यं च यदैत् प्राप्नोत् ॥ इण् गतौ आदादिकः । आडजादीनामित्याडागमः ॥ तदा क्रतुमान्कर्मवान् स सोमस्य पीत्वी सोमं पीत्वावर्धत ॥ क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानसंज्ञा । चतुर्थ्यर्थे बहुलं छंदसीति षष्ठी । पीत्वी । स्नात्व्यादयश्चेति निपातितः ॥

तमस्य विष्णुर्महिमानमोजसांशुं दधन्वान्मधुनो वि रप्शते ।
देवेभिरिंद्रो मघवा सयावभिर्वृत्रं जघन्वाँ अभवद्वरेण्यः ॥२॥
तं । अस्य । विष्णुः । महिमानं । ओजसा । अंशुं । दधन्वान् । मधुनः । वि । रप्शते ।
देवेभिः । इंद्रः । मघऽवा । सयावऽभिः । वृत्रं । जघन्वान् । अभवत् । वरेण्यः ॥२॥

विष्णुरेतन्नामकः । व्याप्तो यज्ञो वा । मधुनो मदकरस्य सोमस्यांशुं लताखंडं दधन्वान् प्रेरयन् । धवेर्गत्यर्थस्य क्वसाविदित्वान्नुमागमे क्ते वलि लोपः ॥ ओजसा स्ववीर्येण संजातमस्येंद्रस्य तं महिमानं वि रप्शते । विविधं शब्दयति । स्तौति । मघवा धनवान् सयावभिः ॥ यातेरातो मनिन्निति क्वनिप् ॥ सहगंतृभिर्देवेभिर्देवैर्मरुद्भिश्च वृत्रं जघन्वान् हतवानिंद्रो वरेण्यः सर्वैर्वरणीयः संभजनीयोऽभवत् ॥

वृचेण यदहिना बिभ्रदायुधा समस्थिथा युधये शंसमाविदे ।
विश्वे ते अत्र मरुतः सह त्मनावर्धन्नुग्र महिमानमिंद्रियं ॥३॥
वृचेण । यत् । अहिना । बिभ्रत् । आयुधा । सं ऽअस्थिथाः । युधये । शंसं । आ ऽविदे ।
विश्वे । ते । अत्र । मरुतः । सह । त्मना । अवर्धन् । उग्र । महिमानं । इंद्रियं ॥३॥

युधये योधनायायुधायुधानि वज्रादीनि बिभ्रद्वारयन्निंद्रस्त्वं. यदाहिनाहंतव्येन वृचेण समस्थिथाः सहास्थाः ॥ तिष्ठतेर्लुङि समवप्रविभ्यः स्थ इत्यात्मनेपदं । स्थाध्वोरिच्चेति सिचः कित्त्वमिकारश्चांतादेशः । हस्वादंगादिति सिचो लोपः । यद्योगादनिघातः । तिङि चोदात्तवतीति गतेर्निघातः ॥ तदाविदे ॥ तुमर्थे केन्प्रत्ययः ॥ तव वृत्रवधादिकं वीर्यं प्रज्ञापयितुं शंसं । अशंसं । शंसैरहं स्तौमि ॥ शन्सु स्तुतौ । लङ् । वाक्यभेदादनिघातः ॥ किंच हे उग्रोद्भूर्णबल अत्रास्मिन्काल एव ते त्वदीयं महिमानमिंद्रियं वीर्यं च विश्वे सर्वे मरुतस्त्मनात्मना सहैवावर्धन् ॥ वर्णलोपश्छांदसः ॥ अवर्धयन् । मरुतो ह्यींद्रस्य वीर्यं भवति ॥

जज्ञान एव व्यबाधत स्पृधः प्रापश्यद्वीरो अभि पौंस्यं रणं ।
अवृश्चदद्रिमव सस्यदः सृजदस्तभ्नान्नाकं स्वपस्यया पृथुं ॥४॥
जज्ञानः । एव । वि । अबाधत । स्पृधः । प्र । अपश्यत् । वीरः । अभि । पौंस्यं । रणं ।
अवृश्चत् । अद्रिं । अव । सऽस्यदः । सृजत् । अस्तभ्नात् । नाकं । सुऽअपस्यया । पृथुं ॥४॥

स इंद्रो जज्ञान एव ॥ जनी प्रादुर्भावे । छांदसस्य लिटः कानच् ॥ जायमान एव स्पृधः शत्रून्व्यबाधत । अत्यर्थमपीडयत् ॥ स्पृधः । स्पर्ध संघर्षे । क्विप् । अपस्पृधेथामिति निपातनेनैकच संप्रसारणदर्शनादचापि भवति ॥ अत एव वीरः समर्थः स रणं संग्राममभिलक्ष्य पौंस्यमात्मीयं बलं प्रापश्यत् । अस्यैतावद्बलमिति प्रकर्षेण पश्यति । जानाति । किंचाद्रिं मेघमवृश्चत् । वर्षणार्थमच्छिनत् । अनंतरं सस्यदः ॥ स्यन्दू प्रस्रवणे । क्विप् । शसि नलोपः ॥ सह स्यंदमाना अपोऽव सृजत् । अवाङ्मुखमसृजत् । निरगमयत् । तथा स पृथुं महांतं नाकं द्युलोकं स्वपस्यया ॥ सुप आत्मनः क्यच् । अ प्रत्ययादिति स्त्रियामप्रत्ययः ॥ शोभनकर्मेच्छयास्तभ्नात् । निरुद्यमकरोत् ॥ स्तंभिः सौत्रो धातुः ॥

आदिंद्रः सचा तविषीरपत्यत वरीयो द्यावापृथिवी अबाधत ।
अवाभरद्वृषितो वज्रमायसं शेवं मित्राय वरुणाय दाशुषे ॥५॥
आत् । इंद्रः । सचा । तविषीः । अपत्यत । वरीयः । द्यावापृथिवी इति । अबाधत ।
अव । अभरत् । धृषितः । वज्रं । आयसं । शेवं । मित्राय । वरुणाय । दाशुषे ॥५॥

आदपि च स इंद्रस्तविषीर्महतीः सेनाः सचा सहैवापत्यत । अगच्छत् ॥ पद गतौ दैवादिकः । वर्णव्यत्ययः ॥ यद्वा । पत्यत इत्यैश्वर्यकर्मा । सेनानामीष्टे । तासामीश्वरोऽभवदित्यर्थः । स एव द्यावापृथिवी द्यावापृथिव्यौ वरीयः ॥ तृतीयायाः सुः ॥ उरुतरेण महिम्नाबाधत । तयोरंतःस्थिताञ्शत्रूनवधीदित्यर्थः । धृषितः शत्रुवधे प्रगल्भः सन्नायसमयोमयं वज्रमवाभरत् । अधारयत् । किमर्थं । मित्राय वरुणाय दाशुषे हविर्दत्तवते यज्वने च शेवं सुखं कर्तुं ॥ ॥१४॥

इंद्रस्याच तविषीभ्यो विरप्शिनं ऋघायतो अरंहयंत मन्यवे ।
वृत्रं यदुग्रो व्यवृश्चदोजसापो बिभ्रतं तमसा परीवृतं ॥६॥

इंद्रस्य । अवं । तविषीभ्यः । विऽरप्शिनः । ऋघायतः । अरंहयंत । मन्यवे ।
वृचं । यत् । उग्रः । वि । अवृश्चत् । ओजसा । अपः । बिभ्रतं । तमसा । परिऽवृतं ॥ ६ ॥

अचाख्यिम्काल एव विरप्शिनो महतो विविधं शब्दायमानस्य वर्धायतः शत्रूञ्हिंसत इंद्रस्य तविषीभ्यः । षष्ठ्यर्थे चतुर्थी । बलानां मन्यवे प्रख्यापनायारंहयंत । आपो निरगच्छन् । रहिर्गत्यर्थः । उग्र उद्गूर्णः सोऽप उदकानि बिभ्रतं धारयंतं तमसा परीवृतं परितो वेष्टितं ॥ वृणोतेः कर्मणि क्तः । गतिरनंतर इति स्वरः । संहितायामुपसर्गस्य घञि । पा० ६. ३. १२२. । इति दीर्घः ॥ तं वृचं यदाख्यिम्काल ओजसा स्ववीर्येण अवृश्चत् अत्यर्थमवधीत् ॥

या वीर्याणि प्रथमानि कर्त्वा महित्वेभिर्यतमानौ समीयतुः ।
ध्वांतं तमोऽव दध्वसे हत इंद्रो महा पूर्वहूतावपत्यत ॥ ७ ॥
या । वीर्याणि । प्रथमानि । कर्त्वा । महिऽत्वेभिः । यतमानौ । सं ऽईयतुः ।
ध्वांतं । तमः । अव । दध्वसे । हते । इंद्रः । महा । पूर्वऽहूतौ । अपत्यत ॥ ७ ॥

महित्वेभिर्महनीयैः स्वबलैर्यतमानौ युद्धाय प्रयत्नं कुर्वताविंद्रवृचौ प्रथमानि पूर्वभावीनि कर्त्वा ॥ छंदस्यर्थे क्त्वाप्रत्ययः ॥ कर्तव्यानि यानि वीर्याणि समीयतुः संयोजयामासतुः ॥ इण् गतौ । लिटि दीर्घ इणः किताविति दीर्घः ॥ तयोर्मध्य इंद्रेण वृत्रे हते सति ध्वांतमतिनिविडं तमोऽव दध्वसे । अवध्वस्तं विनष्टमभूत् ॥ ध्वंसेर्लिट् । कित्त्वान्नलोपः ॥ इंद्रस्तु महा स्वमहिम्ना पूर्वहूतौ प्रथमाह्वानेऽपत्यत । अगच्छत् । शूराणां मध्येऽयमेव प्रथममाह्वयमानोऽभवदित्यर्थः ॥

विश्वे देवासो अध वृष्ण्यानि तेऽवर्धयन्त्सोमवत्या वचस्यया ।
रुजं वृचमहिमिंद्रस्य हन्मनाग्निर्न जंभैस्तृष्वन्नमावयत् ॥ ८ ॥
विश्वे । देवासः । अध । वृष्ण्यानि । ते । अवर्धयन् । सोमऽवत्या । वचस्यया ।
रुजं । वृचं । अहिं । इंद्रस्य । हन्मना । अग्निः । न । जंभैः । तृषु । अवं । आवयत् ॥ ८ ॥

हे इंद्र अध वृत्रहननानंतरं विश्वे देवासो देवा ऋत्विजः सोमवत्या सोमयुक्तया वचस्यया स्तुतीच्छया ते त्वदीयानि वृष्ण्यानि बलान्यवर्धयन् । वर्धयंति । इंद्रस्य हन्मना हननसाधनेन वज्रेण रुजं ॥ रध हिंसासंराद्धोः ॥ हिंसितमहिं वृत्रमपामावरकं मेघं तृषु शीघ्रमन्नमावयत् । अभक्षयत् । तज्ज्ञानेनोदकेन संपादितमन्नं जनोऽभक्षयदित्यर्थः । आवयतिरत्तिकर्मा । तत्र दृष्टांतः । अग्निर्न यथाग्निर्जंभैरात्मीयैर्दंतैरन्नं भक्षयति तद्वत् ॥

भूरि दक्षेभिर्वचनेभिर्ऋक्वभिः सख्येभिः सख्यानि प्र वोचत ।
इंद्रो धुनिं च चुमुरिं च दंभयञ्छ्रद्दामनस्या शृणुते दभीतये ॥ ९ ॥
भूरि । दक्षेभिः । वचनेभिः । ऋक्वऽभिः । सख्येभिः । सख्यानि । प्र । वोचत ।
इंद्रः । धुनिं । च । चुमुरिं । च । दंभयन् । श्रद्धाऽमनस्या । शृणुते । दभीतये ॥ ९ ॥

हे स्तोतारः दक्षेभिर्वर्धनहेतुभिर्ऋक्वभिः ॥ छंदसीवनिपाविति वनिप्प्रत्ययः । अयस्मयादित्वेन भलाञ्जस्त्वाभावः । पदत्वात्कुत्वं । का० ७. ४. २०. ॥ मंचयुक्तैः सख्येभिः ॥ तदर्हतीत्यर्थे छंदसि चेति यत्प्रत्ययः ॥ सख्युरिंद्रस्य योग्यैर्वचनेभिर्वचनैः स्तोत्रैः सख्यानि स्तुत्यस्तोतृलक्षणान्यभिलक्ष्य भूरि बहुवारमिंद्रं प्र वोचत । प्रब्रूत । अभिष्टुत । इंद्रस्तु दभीतय एतन्नामकाय राजर्षये धुनिं च चुमुरिं चैतन्नामकौ द्वावसुरौ दंभयन्

हिंसञ्जडामनस्का ॥ मनःशब्दात्क्यच् ॥ अन्यायुक्तया मनस इच्छया शृणुति । युष्माभिः कृतानि स्तोत्राणि शृणोति ॥

त्वं पुरूण्या भरा स्वश्व्या येभिर्मंसै निवचनानि शंसन् ।
सुगेभिर्विश्वा दुरिता तरेम विदो षु ण उर्विया गाधमद्य ॥१०॥
त्वं । पुरूणि । आ । भर । सुऽअश्व्या । येभिः । मंसै । निऽवचनानि । शंसन् ।
सुऽगेभिः । विश्वा । दुःऽइता । तरेम । विदो इति । सु । नः । उर्विया । गाधं । अद्य ॥१०॥

हे इंद्र त्वं स्वश्व्या स्वश्व्यानि शोभनाश्वयुक्तानि पुरूणि बहूनि धनानि मह्यमा भर । आहर । प्रयच्छ । निवचनानि नितरां वक्तव्यानि स्तोत्राणि शंसन्नहं येभिर्धनैर्मंसै । मन्यतिरर्चतिकर्मा । देवान्पूजयामि तानि देहि ॥ मन्यतेर्लेटि बहुलं छंदसीति विकरणस्य लुक् । सिप्यडागमः । सिपः पित्त्वेनानुदात्तत्वाद्धातुस्वरः ॥ सुगेभिः सुष्ठु गंतव्यैस्तीर्थैः स्तोत्रैर्वा विश्वा सर्वाणि दुरिता दुरितानि पापानि तरेम । हे इंद्र अद्यास्मिन्कर्मणि गाधं ग्रथ्यमानं क्रियमाणं नोऽस्मदीयं स्तोत्रमुर्वियोरुत्तेन बहुमानेन सु सुष्ठु विदो । विद उ । जानीह्येव ॥ ॥१५॥

घर्मेति दशर्चं द्वितीयं सूक्तं । सधिर्नाम वैरूप ऋषिः । तपसः पुत्रो घर्मो वा । चतुर्थी जगती । शिष्टास्त्रिष्टुभः । तथा चानुक्रांतं । घर्मा सधिस्तापसो वा घर्मो वैश्वदेवं चतुर्थी जगतीति ॥ गतो विनियोगः ॥

घर्मा समंता चिवृतं व्यापतुस्तयोर्जुष्टिं मातरिश्वा जगाम ।
दिवस्पयो दिधिषाणा अवेषन्विदुर्देवाः सहसामानमर्कं ॥१॥
घर्मा । संऽअंता । चिऽवृतं । वि । आपतुः । तयोः । जुष्टिं । मातरिश्वा । जगाम ।
दिवः । पयः । दिधिषाणाः । अवेषन् । विदुः । देवाः । सहऽसामानं । अर्कं ॥१॥

समंता समंतौ संव्याप्तदिगंतौ घर्मा ॥ घृ क्षरणदीप्त्योः ॥ घर्मौ दीप्यमानावग्न्यादित्यौ चिवृतं । चयो वा इमे चिवृतो लोकाः । ऐ० आ० १.१.२. इत्यात्मानात् । त्रैलोक्यं व्यापतुः । स्वतेजोभिर्व्याप्तवंतौ । मातरिश्वांतरिक्षे वर्तमानो वायुस्तयोरग्न्यादित्ययोर्जुष्टिं प्रीतिं जगाम । गतवान् । यदा सहसामानं । सामशब्द उपलक्षकः । वेदत्रयतेजःसहितं । सर्वं तेजः सामरूपं ह वाग्वादित्यात्मानात् । ईदृशमर्कमर्चनीयं सूर्यं देवा दीप्यमानाः स्वरश्मयो विदुः विविदुः लेभिरे प्रापुः तदा दिधिषाणा लोकधारणशीलास्ते दिवो द्युलोकस्य संबंधि पय उदकमवेषन् । व्याप्नुवंतः । ववर्षुरित्यर्थः ॥ दिवस्पय इत्यत्र षष्ठ्याः पतिपुत्रेति सत्वं । दिधिषाणाः । धिष धारणे । चानश् । शपः सुः । यद्वा । धि धारणे । सनंतस्य चानश् । अज्झनगमां सनीति दीर्घाभावश्छांदसः ॥ यद्वा । समंतौ संगतौ घर्मौ स्वयं दीप्यमानौ जीवेश्वरौ चिवृतं सत्त्वरजस्तमोगुणात्मिकां मायां व्यापतुः । नियंतृनियंतव्यभावेन मातरिश्वा परमात्मा तयोर्जुष्टिं संभोक्तव्यपदार्थैः संजातां प्रीतिं जगाम । गतवान् । तं परमात्मानं वेदमयमिमं सूर्यमिति देवा जानंति ॥

तिस्रो देष्ट्राय निर्ऋतीरुपासते दीर्घश्रुतो वि हि जानंति वह्नयः ।
तासां नि चिक्युः कवयो निदानं परेषु या गुह्येषु व्रतेषु ॥२॥
तिस्रः । देष्ट्राय । निःऽऋतीः । उप । आसते । दीर्घऽश्रुतः । वि । हि । जानंति । वह्नयः ।
तासां । नि । चिक्युः । कवयः । निऽदानं । परेषु । याः । गुह्येषु । व्रतेषु ॥२॥

निर्ऋतीः । पृथिवीनामैतत् । अग्नेरितरलोकावुपलक्षयति । तत्राधिष्ठितास्त्रिस्रोऽग्न्यादिदेवता देष्ट्राय हविषां

प्रदानायोपासते । यजमाना उपासनं कुर्वते । ततो दीर्घश्रुतः प्रभूतकीर्तयो बहूयो जगतः प्रापिकास्ता देवता वि जानंति । एतैः कृतामुपासनां मन्वत एव । यद्वा । निर्ऋतीः । निःशेषेणार्च्छंति गच्छंतीति निर्ऋतयः । तासिस्तः सृष्टिस्थितिसंहृतीर्दैंद्रीयात्मनः कर्मभोगदानायोपासते ते दीर्घश्रुतो दीर्घं संसारे शृण्वंतो मंतव्यदृश्यादिपदार्थं जानंतः । मंत्रदृष्ट्यादिरूपमजानंत इत्यर्थः । अत एव बहूयः संसारस्य वोढारस्ता न जानंति । कवयः क्रांतदर्शिनस्तु तासां सृष्ट्यादीनामग्न्यादीनां वा निदानं मूलकारणं परमात्मानं नि चिक्युः । नितरां चिन्वंति जानंति । परेषूत्कृष्टेषु वा गुह्येषु वा गोप्तव्येषु कर्मसु यमनियमादिषु व्रतेषु याः प्रवृत्तयः संति तासां निदानं नि चिक्युः । जानंति ॥ चिञ् चयने । लिटि विभाषांचेरित्यभ्यासादुत्तरस्य कवर्णादेशः । यद्वा । चायतेर्लिटि चायः की । पा० ६. १. ३५. । इति छंदसि कीत्यादेशः ॥

चतुष्कपर्दा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते ।
तस्यां सुपर्णा वृषणा नि षेदतुर्यत्र देवा दधिरे भागधेयं ॥३॥
चतुःऽकपर्दा । युवतिः । सुऽपेशाः । घृतऽप्रतीका । वयुनानि । वस्ते ।
तस्यां । सुऽपर्णा । वृषणा । नि । सेदतुः । यत्र । देवाः । दधिरे । भागऽधेयं ॥३॥

चतुष्कपर्दा चतुष्कोणा युवतिः स्त्रीरूपा सुपेशाः शोभनालंकारा घृतप्रतीका घृतप्रमुखहविष्कैतादृशी वेदिर्वयुनानि ज्ञातव्यानि पदार्थजातानि कर्माणि स्तोत्राणि वा वस्ते । आच्छादयति । तस्यां वेद्यां वृषणा वृषणौ हविषां वर्धितारौ सुपर्णा सुपर्णौ सुपतनौ जायापती यजमानब्राह्मणौ वा नि षेदतुः । निषण्णौ भवतः । यत्र यस्यां वेद्यां देवा अग्न्यादयो भागधेयं । स्वार्थिको धेयप्रत्ययः । स्वस्वभागं हविर्दधिरे । धारयंति ॥ यद्वा । चतुष्कपर्दा नामाख्यातोपसर्गनिपातास्चत्वारः कपर्दस्थानीया यस्याः सा युवतिस्तरुणी नित्या घृतप्रतीका दीप्यमानवर्णावयवैषौपनिषदी वाग्वयुनानि ज्ञानानि वस्ते । आच्छादयति । तस्यां वाचि सुपर्णा सुपर्णौ जीवपरमात्मानौ निषण्णौ भवतः । यत्र ॥ इतराभ्योऽपि दृश्यंत इति तृतीयार्थे तस्प्रप्रत्ययः ॥ यया वाचा देवा भागं धारयंति ॥

एकः सुपर्णः स समुद्रमा विवेश स इदं विश्वं भुवनं वि चष्टे ।
तं पाकेन मनसापश्यमंतितस्तं माता रेळ्हि स उ रेळ्हि मातरं ॥४॥
एकः । सुऽपर्णः । सः । समुद्रं । आ । विवेश । सः । इदं । विश्वं । भुवनं । वि । चष्टे ।
तं । पाकेन । मनसा । अपश्यं । अंतितः । तं । माता । रेळ्हि । सः । ऊं इति । रेळ्हि ।
मातरं ॥४॥

एकः सर्वकार्येष्वसहायः सुपर्णः सुपतनो मध्यमस्थानो देवः समुद्रमंतरिक्षमा विवेश । आविशति । आविश्य च स इदं विश्वं सर्वं भुवनं भूतजातं वि चष्टे । अनुग्राह्यतयाभिपश्यति । तमेवंरूपं देवं पाकेन परिपक्वेन मनसांतितः समीपेऽहमपश्यं । अदर्शं । किंच मातोदकानां निर्मात्री माध्यमिका वाक् तां रेळ्हि । आस्वादयति । उपजीवनमात्रमत्र लक्ष्यते । स उ स खलु मातरं वाचं रेळ्हि । लेढि । तामेवोपजीवति ॥ लिह आस्वादने ॥ यद्वा । सुपर्णः पचत्राग्निराधारसंचार्यैकः प्राणवायुः परमात्मा वा समुद्रं । समुद्रवंत्यापोऽस्मादिति समुद्रमंतरिक्षं । यद्वा । समुद्रवं सर्वतो गमनं । तच्छीलं प्रपंचजातमाविष्टवान् । सृष्ट्वा तदेवानुप्राविशत् । तै० आ० ८. ६. । इति श्रुतेः । वायुपत्रे वाय्वादिरूपेणा विवेश । स इदं विश्वं सर्वं लोकं वि चष्टे । विशेषेण ख्यापयति । सति हि प्राणे परमात्मनि वा जीवंतः पुरुषा लोकं विख्यातं कुर्वंति । तं देवमुपासको ऽहं पाकेन परिपक्वज्ञानेन मनसांतितः ॥ अंतिकशब्दात्तसिः । अंतिकस्य तसि कादिलोपो भवत्यादुदात्तत्वं च । पा० ६. ४. १४९. ८. । इति कादिलोपः ॥ अंतिके समीपे स्वहृदयेऽपश्यं । तं प्राणं माता वाग्रेळ्हि । वाक् प्राणेऽंतर्भवतीत्यर्थः । स्वापे हि वाग्व्यापारो न दृश्यते प्राणव्यापारस्तु दृश्यत इति ॥

सुपर्णं विप्राः कवयो वचोभिरेकं संतं बहुधा कल्पयंति ।
छंदांसि च दधतो अध्वरेषु यहान्त्सोमस्य मिमते द्वादश ॥५॥
सुऽपर्णं । विप्राः । कवयः । वचःऽभिः । एकं । संतं । बहुधा । कल्पयंति ।
छंदांसि । च । दधतः । अध्वरेषु । यहान् । सोमस्य । मिमते । द्वादश ॥५॥

विप्रा मेधाविनः कवयः क्रांतप्रज्ञा मनुष्याः सुपर्णं सुपतनमेकं संतं परमात्मानं वचोभिः स्तुतिलक्षणैर्वचनैर्बहुधा बहुप्रकारं कल्पयंति । कुर्वंति । किंच त एव कवयोऽध्वरेषु यज्ञेषु छंदांसि गायत्र्यादीनि सप्त छंदांसि दधतः स्तोत्रशस्त्रादिना धारयंतो द्वादशसंख्याकान्सोमस्य यहान् यहणसाधनानि पात्राण्युपांश्वंतर्यामादीनि मिमते । निर्मिमते ॥ यहान् । गृह्यत एभिरिति यहाः । यहवृदृनिश्चिगमश्चेति करणेऽप्प्रत्ययः । सोमस्येति कर्मणि षष्ठी । द्वादशेत्यत्र संख्या । पा० ६. २. ३५. । इति पूर्वपदप्रकृतिस्वरत्वं ॥ ॥१६॥

षट्त्रिंशांश्च चतुरः कल्पयंतश्छंदांसि च दधत आद्वादशं ।
यज्ञं विमाय कवयो मनीष ऋक्सामाभ्यां प्र रथं वर्तयंति ॥६॥
षट्ऽत्रिंशान् । च । चतुरः । कल्पयंतः । छंदांसि । च । दधतः । आऽद्वादशं ।
यज्ञं । विऽमाय । कवयः । मनीषा । ऋक्ऽसामाभ्यां । प्र । रथं । वर्तयंति ॥६॥

पूर्वं सामान्येन यज्ञयहानुक्त्वेदानीं सर्वयहादिपूर्वको यज्ञोऽभिधीयते । षट्त्रिंशान् । द्वावुपांश्वंतर्यामौ । ऐंद्रवायवादयस्त्रयो द्विदेवत्यग्रहाः । द्वौ शुक्रामंथिनौ । आग्रयण उक्थ्यो ध्रुवश्चेति चयः । ऋतुयहा द्वादश । ऐंद्राग्नो वैश्वदेवश्च द्वौ । चयो मरुत्वतीयाः । एको माहेंद्रः । आदित्यसावित्रौ द्वौ । वैश्वदेवः पात्नीवतो हारियोजन इति चयो यहाः । एवं षट्त्रिंशद्भवंति । अत्यग्निष्टोमे पूर्वे षट्त्रिंशद्यहा द्वावश्वदाभ्यौ दधिग्रहः षोडशीति चेति चत्वारः । एतांश्चत्वारिंशत्संख्याकान्यहान्कल्पयंतः सोमेन पूरयंतः । किंचाद्वादशं ॥ आङ्मर्यादाभिविध्योः । पा० २. १. १३. । इत्यव्ययीभावसमासः । तस्य स्वरः ॥ द्वादशसंख्याकप्रउगादिशस्त्रसमाप्तिपर्यंतं छंदांसि गायत्र्यादीनि दधतः संतः शस्त्रादिरूपेण धारयंतः कवयो मनीषा ॥ तृतीयाया आकारः ॥ मनीषया बुद्ध्यैवं यज्ञं विमाय निर्माय रथं । रमंत्यत्रेति रथो यज्ञः । तं रथं यज्ञमृक्सामाभ्यां प्र वर्तयंति । प्रकर्षेण संपादयंति ॥ चतुर इत्यत्र चतुरः शसीत्यंतोदात्तत्वं ॥

चतुर्दशान्ये महिमानो अस्य तं धीरा वाचा प्र णयंति सप्त ।
आप्रानं तीर्थं क इह प्र वोचद्येन पथा प्रपिबंते सुतस्य ॥७॥
चतुःऽदश । अन्ये । महिमानः । अस्य । तं । धीराः । वाचा । प्र । नयंति । सप्त ।
आप्रानं । तीर्थं । कः । इह । प्र । वोचत् । येन । पथा । प्रऽपिबंते । सुतस्य ॥७॥

अस्य यज्ञरूपस्य परमात्मनोऽन्ये चतुर्दश चतुर्दशसंख्याका महिमानो विभूतयो भवंति । तं यज्ञं सप्त सप्तसंख्याका धीरा धीमंतो होत्रादयो वाचा शस्त्ररूपया प्र णयंति । प्रकर्षेण नयंति । आप्रानं ॥ आप्लृ व्याप्तौ । ताच्छीलिके चानशि व्यत्ययेन विकरणस्य व्यत्ययः ॥ व्यापनशीलं तीर्थं पापोत्तारणसमर्थं चात्मानोत्करमध्यदेशमिहास्मिन्यज्ञे कः प्र वोचत् । को वक्ति । न कोऽपीत्यर्थः । येन पथा येन यज्ञमार्गेण सुतस्याभिषुतं सोमं प्रपिबंते देवा अतिशयेन पिबंति ॥ पा पाने । पाघ्रेत्यादिना पिबादेशः । व्यत्ययेनात्मनेपदं । उपसर्गेण समासः । यद्योगादनिघाते तिङि चोदात्तवतीति गतेर्निघातः ॥

सहस्रधा पंचदशान्युक्था यावद्द्यावापृथिवी तावदित्तत् ।
सहस्रधा महिमानः सहस्रं यावद्ब्रह्म विष्ठितं तावती वाक् ॥ ८॥
सहस्रधा । पंचऽदशानि । उक्था । यावत् । द्यावापृथिवी इति । तावत् । इत् । तत् ।
सहस्रधा । महिमानः । सहस्रं । यावत् । ब्रह्म । विऽस्थितं । तावती । वाक् ॥ ८॥

सहस्रधा सहस्रसंख्याकेषु ब्रह्मादिस्तंबपर्यंतेषु देहेषु पंचदशानि चक्षुः श्रोत्रं मनो वाक् प्राण इत्येतानि पंच । तदाधारत्वेन मातापित्रोः सकाशादागतानि पृथिव्यग्निजोवाय्वाकाशरूपाणि भूतानि मिलितानि दश । एवं पंचदशसंख्याकान्युक्थान्युत्कृष्टान्यंगानि विद्यंते प्राणिदेहेषु जातेषु । द्यावापृथिवी ॥ षष्ठीद्विवचनस्य सुपां सुलुगिति पूर्वसवर्णदीर्घः ॥ द्यावापृथिव्योर्यावत्परिमाणमस्ति तावदित्तत्परिमाणमेवात्माधिष्ठितं प्राणिदेहजातं भवति ॥ यावत्तावच्छब्दयोर्यत्तदेतेभ्यः परिमाणे वतुपि । पा० ५. २. ३९. । आ सर्वनाम्नः । पा० ६. ३. ९१. । इति दीर्घः ॥ किंच सहस्रधा सहस्रसंख्याकेषु सहस्रं महिमानः सहस्रसंख्याका महांतो व्यवहारविशेषा भवंति । प्रतिविषयं प्रतिलक्षणं दर्शनश्रवणादिव्यवहारनिष्पत्तेः ॥ सहस्रधेत्यत्र विधार्थे धाप्रत्ययः । ब्रह्म जगत्कारणं वस्तु यावन्नानाविधप्राणिदेहरूपेण यावत्परिमाणं भूत्वा विष्ठितं विशेषेण स्थितं वाक् तावती तत्परिमाणा भवति । एकैकस्याभिधेयार्थस्यैकैकनामापेक्षणात् । अन्यत्रापि श्रूयते । सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्त इति । सहस्रधा पंचदशान्युक्थेति पंच हि दशतो भवंतीत्यादिकमारण्यकमत्रानुसंधेयं । ऐ० आ० १. ३. ८. ॥

कꣳछंदसां योगमा वेद धीरः को धिष्ण्यां प्रति वाचं पपाद ।
कमृत्विजामष्टमं सूरमाहुर्हरी इंद्रस्य नि चिकाय कः स्वित् ॥ ९॥
कः । छंदसां । योगं । आ । वेद । धीरः । कः । धिष्ण्यां । प्रति । वाचं । पपाद ।
कं । ऋत्विजां । अष्टमं । सूरं । आहुः । हरी इति । इंद्रस्य । नि । चिकाय । कः । स्वित् ॥ ९॥

धीरो धीमान् को मानुषश्छंदसां गायत्र्यादीनां योगं सुतश्रस्त्वात्मना नियोगमा वेद । आजानाति । को वा धिष्ण्यां । धिष्ण्यानि होत्रादीनां सप्त स्थानानि । तदर्हा वाचं प्रति पपाद । प्रतिपादयति । करोति । किंचर्त्विजां होत्रादीनां सप्तानामष्टममष्टसंख्यापूरकं सूरं स्वतंत्रं कमाहुः । वदंति । कः स्वित् कः खल्विंद्रस्य हरी ऋक्सामरूपौ द्वावश्वौ । ऋक्सामे वा इंद्रस्य हरी इत्याम्नायते । तादृशौ हरी नि चिकाय । नितरां पूजयति । जानाति । वेदिता प्रतिपादयिताष्टसंख्यापूरकस्य देवस्य ज्ञाता वा परमात्मनोऽन्यो नास्तीत्यर्थः ॥

भूम्या अंतं पर्येके चरंति रथस्य धूर्षु युक्तासो अस्युः ।
अमस्य दायं वि भजंत्येभ्यो यदा यमो भवति हर्म्ये हितः ॥ १०॥
भूम्याः । अंतं । परि । एके । चरंति । रथस्य । धूःऽसु । युक्तासः । अस्युः ।
अमस्य । दायं । वि । भजंति । एभ्यः । यदा । यमः । भवति । हर्म्ये । हितः ॥ १०॥

एके केचनाश्वा भूम्याः पृथिव्याः । अनेन द्युलोकोऽप्युपलक्ष्यते । द्युलोकस्य चांतं पर्यंतं परि चरंति । *तदानीं सर्वत आगच्छंति* । तदा च तेऽश्वा रथस्य धूर्षु युगादिभारेषु युक्तासो युक्ताः संतोऽस्युः । तिष्ठंति । *एभ्योऽश्विभ्यः अमस्य दायं* ॥ दो अवखंडने । घञ् । कर्षात्वत इत्यंतोदात्तत्वं ॥ अमस्य नाशकं घासादिकं वि भजंति । देवाः प्रयच्छंति । यदा यस्मिन्काले यमो नियंता सूर्यो हर्म्ये हर्म्यस्थानीये रथे हितो निहितो भवति । तदैते भजंतीत्यर्थः ॥ ॥ १७॥

चित्र इति नवर्चं तृतीयं सूक्तमापीयं । उपस्तुतो नाम वृष्टिहव्यपुत्र ऋषिः । अष्टमी त्रिष्टुप् । नवमी

शक्करी । आदितः सप्त जगत्यः । तथा चानुक्रांतं । चित्र इन्नव वार्ष्टिहव्य उपस्तुत आग्नेयं आगतं चिष्टुप्शक्वर्यंतमिति ॥ प्रातरनुवाकाश्विनशस्त्रयोर्जागते छंदसीदं सूक्तं । सूचितं च । चित्र इच्छिशोर्वसुं न चित्रमहसमिति जागतं । आ० ४. १३. । इति ॥

चित्र इच्छिशोस्तरुणस्य वक्षथो न यो मातरावप्येति धातवे ।
अनूधा यदि जीजनदधा च नु ववक्ष सद्यो महि दूत्यं१ चरन् ॥१॥
चित्रः । इत् । शिशोः । तरुणस्य । वक्षथः । न । यः । मातरौ । अपिऽएति । धातवे ।
अनूधाः । यदि । जीजनत् । अध । च । नु । ववक्ष । सद्यः । महि । दूत्यं । चरन् ॥१॥

शिशोः शिशुभूतस्य अत एव तरुणस्य नूतनस्याग्नेर्वक्षथः ॥ वक्षेरौणादिकोऽथप्रत्ययः ॥ हविर्वहनं चित्र इदाश्चर्यभूतमेव यो जातोऽग्निर्मातरौ सर्वस्य निर्मात्र्यौ मातृपितृभूते द्यावापृथिव्यावरणौ वा धातवे नाशेति ॥ धेट् पाने । तुमर्थे तवेन्प्रत्ययः ॥ पानायापि न गच्छति ॥ इण् गतौ । लघुपसर्गेण समासः । तिङि चोदात्तवतीति गतेर्निघातः ॥ अनूधाः ॥ नञ्बहुव्रीहिः । समासांतस्यानङः स्त्रियामिष्टत्वादचानङभावः । पा० ५. ४. १३१. । प्रत्येकविवक्षयैकवचनं ॥ ऊधोरहितोऽयं लोकोऽसौ लोकश्चेनमग्निं यदि जीजनत् अजीजनत् अजनयत् । तर्हि स्तनपानाय न गच्छतीति युक्तं । तथा न भवति । किंतु द्यावापृथिव्यौ सर्वेषां कामदुघे खलु । तथापि न याति । तस्मादस्य हविर्वहनं चित्रं । अध चोत्पत्त्यनंतरमेव त्वष्टास्मिन्हिते सद्यस्तदानीमेव शीघ्रं महि महद्दूत्यं ॥ दूतस्य भागकर्मणो इति कर्मणि यत्प्रत्ययः ॥ दूतकर्म चरन् ववक्ष । देवान्प्रति हवींषि वहति ॥

अग्निर्ह नामं धायि दन्नपस्तमः सं यो वना युवते भस्मना दता ।
अभिप्रमुरा जुह्वा स्वध्वर इनो न प्रोथमानो यवसे वृषा ॥२॥
अग्निः । ह । नामं । धायि । दन् । अपःऽतमः । सं । यः । वना । युवते । भस्मना । दता ।
अभिऽप्रमुरा । जुह्वा । सुऽअध्वरः । इनः । न । प्रोथमानः । यवसे । वृषा ॥२॥

अपस्तमः ॥ अपःशब्दस्यांतोदात्तत्वेन मत्वर्थो लुप्त इति ज्ञायते । अन्यथापः कर्माख्यायामित्यसुनि कृत आद्युदात्तत्वमेव स्यात् ॥ अपस्तिमः कर्मवत्तमोऽग्निर्नाम ॥ तृतीयाया लुक् ॥ नाम्ना नमयितृणा हविषा स्तोत्रेण वा धायि । यजमानैर्धार्यते खलु । यतो दन् यष्टॄणां धनदाता ॥ डुदाञ् दाने । हेतौ छंदस्युभयथेति शतुराद्यर्धधातुकत्वेनाकारलोपः । अत एव शपोऽसंभवः ॥ योऽग्निर्भस्मना भासकेन प्रकाशकेन तेजसा दता दंतेन च वना वनान्यरण्यानि सं युवते संयुनक्ति । संदहतीति यावत् ॥ यु मिश्रणामिश्रणयोः । व्यत्ययेन शः । आत्मनेपदं च । दता । दंतशब्दस्य पद्दन्नित्यादिना दन्नादेशः । ऊडिदमिति विभक्तेरुदात्तत्वं ॥ किंचाभिप्रमुरा ॥ मूर्छा मोहसमुच्छ्राययोः । अस्मात्क्विपि रात्लोप इति छकारलोपः । मुर संवेष्टन इत्यस्माद्वा क्विप् । छंदुत्तरपदप्रकृतिस्वरत्वं ॥ अभितः समुच्छ्रितेनोद्यतेन यद्वा सर्वतो हविर्भिः संवेष्टितेन जुह्वैतन्नामकेन पात्रविशेषेण स्वध्वरः शोभनयज्ञोऽग्निरदनीये हविषि चरतीति शेषः । तत्र दृष्टांतः । इनो न समर्थः प्रोथमानः पर्याप्तः पुष्टांगो वृषा यवसे न यथा वृषभो घासादिषु चरति ॥

तं वो विं न दुषदं देवमंधस इंदुं प्रोथंतं प्रवपंतमर्णवं ।
आसा वहिं न शोचिषा विरप्शिनं महिव्रतं न सरजंतमध्वनः ॥३॥
तं । वः । विं । न । दुःसदं । देवं । अंधसः । इंदुं । प्रोथंतं । प्रऽवपंतं । अर्णवं ।
आसा । वहिं । न । शोचिषा । विऽरप्शिनं । महिऽव्रतं । न । सरजंतं । अध्वनः ॥३॥

हे स्तोतारः वो यूयं तमग्निमभिष्टुत । कीदृशं । विं न पक्षिणमिव द्रुषदं । द्रुर्वृक्षः । अरणिलक्षणे वृक्षे सीदंतं देवं द्योतमानं अंधस इंदुं स्तोतृणामन्नस्य क्लेदयितारं प्रापयितारं ॥ उंदेरिच्चादेः । उ० १. १३. । इत्युप्रत्ययः । निदित्यनुवृत्तेरादुदात्तत्वं ॥ प्रोथंतं शब्दायमानं प्रवर्पंतमत्यर्थं वनानां दाहकं अर्णवं ॥ अर्णसः सलोपश्चेति मत्वर्थीयो वः ॥ अग्नौ प्राप्ताऽऽहुतिरित्यादिक्रमेणोदकवंतं आसा ॥ आस्यशब्दस्य पद्दन्नित्यादिनासन्नादेशः । वर्णलोपश्छांदसः ॥ आस्येन वह्निं हविषां वोढारं । यद्वा । आसा । अंतिकनामैतत् । देवानां समीपे हविषां प्रापकं । वहने दृष्टांतः । वह्निं न । वह्निर्वा अनड्वान् । तै० ब्रा० १. ८. २. ५. । इति श्रवणादनड्वाहमिव वहने समर्थं शोचिषा स्वदीप्त्या विरप्शिनं । महन्नामैतत् । महांतं महिव्रतं न महाकर्माणमादित्यमिवाध्वनः सरजंतं । मार्गान्सह युगपदेव रंजयंतं । एवंगुणमग्निमभिष्टुत ॥ सरजंतं । रञ्ज रागे । रंजेः शतरि रंजेश्च । पा० ६. ४. २६. । इति नलोपे सहस्य सभावे च कृते रूपं ॥ यद्वा । सरतीति सरः । सरस्योदकस्य जनयितारं ॥ जनेस्त्रप्रत्यये कृते रूपमिति वा । व्युत्पत्त्यनवधारणादनवग्रहः ॥

वि यस्य ते जयसानस्याजर धक्षोर्न वाताः परि संत्यच्युताः ।
आ रण्वासो युयुधयो न सत्वनं चितं नशंत प्र शिषंत इष्टये ॥ ४ ॥
वि । यस्य । ते । जयसानस्य । अजर । धक्षोः । न । वाताः । परि । संति । अच्युताः ।
आ । रण्वासः । युयुधयः । न । सत्वनं । चितं । नशंत । प्र । शिषंतः । इष्टये ॥ ४ ॥

हे अजर जरारहितायें ज्रयसानस्य ॥ ज्रयतिर्गत्यर्थः । बाहुलकादस्मादप्यसानच्प्रत्ययः ॥ गमनशीलस्य धक्षोः ॥ दहेः सन् । द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यं । का० ६. १. ८. १. । इति द्विर्वचनाभावः । तदंतादुप्रत्ययः । अरण्यदहनेच्छोर्यस्य ते तव स्वभूता अच्युताः शत्रुभिरच्यवनीयाः प्रभावा वाता न वायव इव वि परि संति सर्वतो विशेषेण वर्तंते ॥ संति । अस्तेर्लट् । यद्योगादनिघातः ॥ युयुधयो न ॥ युधेः किन्प्रत्ययः ॥ योद्धार इव रण्वासः शीघ्रं गंतारः शब्दायमाना वर्त्विज इष्टये यागाय प्र शिषंतः प्रकर्षेण सिषंतः सिषासंतः संभक्तुमिच्छंतः सत्वनं बलवंतं चितं चिष्वाहवनीयादिषु स्थानेषु ततं विस्तृतं त्वामा नशंत । स्तुतिभिर्हविर्भिश्च व्याप्नुवंति । आङ्पूर्वो नशिर्व्याप्तिकर्मा । आचाण आनडिति व्याप्तिकर्मसु पाठात् ॥

स इद्ग्निः कण्वतमः कण्वसख्यः परस्यांतरस्य तरुषः ।
अग्निः पातु गृणतो अग्निः सूरीनग्निर्ददातु तेषामवो नः ॥ ५ ॥
सः । इत् । अग्निः । कण्वऽतमः । कण्वऽसखा । अर्यः । परस्य । अंतरस्य । तरुषः ।
अग्निः । पातु । गृणतः । अग्निः । सूरीन् । अग्निः । ददातु । तेषां । अवः । नः ॥ ५ ॥

कण्वतमः ॥ कणतेः शब्दार्थादग्निप्रुषीत्यादिना क्वन्प्रत्ययः ॥ अतिशयेन स्तोता अत एव कण्वसखा ॥ बहुव्रीहित्वात्समासांतोदात्ताभावः ॥ कण्वाः स्तोतारः सखायो यस्य स तादृशोऽर्यः ॥ स्वामिन्यंतोदात्तत्वं वक्तव्यं । पा० ३. १. १०३. १. । इत्यंतोदात्तत्वं ॥ स्वामी सर्वस्येश्वरः स इत् स एवाग्निः परस्य च प्रकृष्टस्य च बाह्यस्यांतरस्याभ्यवहितस्य समीपे वर्तमानस्य शत्रोस्तरुषस्तारयिता विनाशयिता भवति । सोऽग्निर्गृणतः स्तोतृनस्मान्पातु । रक्षतु ॥ गृ शब्दे क्र्यादिकः । शतुरनुमो नद्यजादी इति विभक्तेरुदात्तत्वं ॥ तथा सूरीन् ॥ षू प्रेरणे ॥ हविषां प्रेरयितॄनस्मान्रक्षतु । किंच तेषामेषां नोऽस्माकमवो रक्षणमन्नं वाग्निर्ददातु । प्रयच्छतु ॥ ॥ १८ ॥

वाजिंतमाय सह्यसे सुपिप्य नृषु च्यवानो अनु जातवेदसे ।
अनुद्रे चिद्यो धृषता वरं सते महिंतमाय धन्वनेदविष्यते ॥ ६ ॥

वाजिन्ऽतमाय। सह्यसे। सुऽपित्र्य। तृषु। च्यवानः। अनु। जातऽवेदसे।
अनुद्रे। चित्। यः। धृषता। वरे। सते। महिन्ऽतमाय। धन्वना। इत्। अविष्यते ॥ ६॥

हे सुपित्र्य। पितुरागतः पित्र्यः ॥ पितुर्यच्च। पा० ४. ३. ७९.। इति यत्प्रत्ययः ॥ शोभनपित्र्य हे अग्ने वाजिंतमायातिशयेनान्नवतेऽत्यंतं बलवते वा ॥ नाहस्रेति नुडागमः ॥ सह्यसे सहीयसे शत्रूणामतिशयेनाभिभवित्रे जातवेदसे जातप्रज्ञाय तुभ्यं त्वां स्तोतुं तृषु क्षिप्रमनु च्यवानः स्तुतिभिरनुगत उद्युक्तोऽस्मि ॥ क्रियार्थोपपदस्य च कर्मणीति जातवेदःशब्दस्य चतुर्थी। सह्यसे। सहस्विञ्शब्दादीयसुनि विन्मतोर्लुगितीयसुन ईकारस्योपश्छांदसः ॥ अनुद्रे चिदुदकवर्जिते स्थाने। आपदीत्यर्थः। शत्रुभिः संजातायामापदि धृषता शत्रुधर्षणसमर्थेन धन्वनेदात्मीयेन धनुषैवाविष्यते पालकाय सते भूष्णवे ॥ शतुरनुम इति विभक्तेरुदात्तत्वं ॥ महिंतमाय पूज्यतमाय दातृतमाय वा ईदृशायाग्नये योऽहं वरं वरणीयं हविः प्रयच्छामि सोऽहं स्तुतिमपि तस्मै करोमीत्यर्थः ॥

एवाग्निर्मंतैः सह सूरिभिर्वसु ष्टवे सहसः सूनरो नृभिः।
मिचासो न ये सुधिता ऋतायवो द्यावो न द्युम्नैरभि संति मानुषान् ॥ ७॥
एव। अग्निः। मंतैः। सह। सूरिऽभिः। वसुः। स्तवे। सहसः। सूनरः। नृऽभिः।
मिचासः। न। ये। सुऽधिताः। ऋतऽयवः। द्यावः। न। द्युम्नैः। अभि। संति। मानुषान्॥ ७॥

सहसो बलस्य सूनरः सुष्ठु प्रेरकः। यद्वा। सूनुरित्यस्य वर्णव्यत्ययः। सूनरः सूनुः। बलेन मध्यमानत्वात्तस्य पुत्रः। अग्निर्नृभिः कर्मनेतृभिर्मतैर्मनुष्यैः सह सूरिभिर्विद्वद्भिरस्माभिर्वसु धनमभिलक्ष्यैवं स्तवे। स्तूयते ॥ वसु ष्टव इत्यत्र संहितायां पूर्वपदादिति षत्वं ॥ मिचासो न सुहृद इव सुधिताः सुहितासृप्राः ॥ दधातेर्निष्ठायां सुधितवसुधितेति निपातितः। सुधितार्थासृप्रशब्दार्था इति काशिकायामुक्तं ॥ ऋतायवो यज्ञं कामयमानाः ॥ न च्छंदस्यपुत्रस्येति दीर्घत्वयोः प्रतिषेधः ॥ ईदृशा ये सूरयो द्यावो न द्योतमाना इव द्युम्नैः। द्युम्नं द्योततेर्यशो वान्नं वा। नि० ५. ५.। इति यास्कः। अग्निप्रदत्तैर्बलैरात्मीयैर्यशोभिर्वा मानुषाञ्शत्रवाक्रमणानभि संति अभिभवंति ॥ यद्वृत्तयोगादनिघातः ॥

ऊर्जो नपात्सहसावन्निति त्वोपस्तुतस्य वंदते वृषा वाक्।
त्वां स्तोषाम त्वया सुवीरा द्राघीय आयुः प्रतरं दधानाः ॥ ८॥
ऊर्जः। नपात्। सहसाऽवन्। इति। त्वा। उपऽस्तुतस्य। वंदते। वृषा। वाक्।
त्वां। स्तोषाम। त्वया। सुऽवीराः। द्राघीयः। आयुः। प्रऽतरं। दधानाः ॥ ८॥

ऊर्जो नपात्। नपादित्यपत्यनाम। अन्नस्य पुत्र। अन्नं वा आज्यमिति श्रवणात्तेन प्रवृध्यमानत्वात्। बलस्य वा पुत्र ॥ सुवामंचिते परांगवत्स्वर इत्यूर्ज इत्यस्य परांगवन्नावेगामंचितत्व आमंचितस्य चेति षाष्ठिकमाद्युदात्तत्वं ॥ हे सहसावन् सहस्विन्नग्ने त्वा त्वामित्येवमुपस्तुतस्तैस्तन्नामकस्तर्षैर्मम वृषा हविषां वर्षयित्री नैः सहिता वाक् स्तुतिर्वंदते। स्तौति ॥ वृषा। इगुपधज्ञीति कः। अजाद्यतष्टाप् ॥ किंच वयं त्वां स्तोषाम। स्तवाम ॥ स्तौतेर्लेट्यडागमः ॥ ततस्त्वया सुवीराः शोभनपुत्राः स्याम। द्राघीयो दीर्घतममायुर्जीवनं प्रतरमत्यर्थं दधाना धारयंतो भवेम ॥

इति त्वाग्ने वृष्टिहव्यस्य पुत्रा उपस्तुतास ऋषयोऽवोचन्।
तांश्च पाहि गृणतश्च सूरीन्वषट्वषट्कृत्यूर्ध्वासो अनक्षन्नमो नम इत्यूर्ध्वासो अनक्षन् ॥ ९॥

इति । त्वा । अग्ने । वृष्टिऽहव्यस्य । पुत्राः । उपऽस्तुतासः । ऋषयः । अवोचन् ।
तान् । च । पाहि । गृणतः । च । सूरीन् । वषट् । वषट् । इति । ऊर्ध्वासः । अनक्षन् ।
नमः । नमः । इति । ऊर्ध्वासः । अनक्षन् ॥ ९ ॥

हे अग्ने त्वा त्वामित्येवमुक्तप्रकारेण वृष्टिहव्यस्येतन्नामकस्यर्षेः पुत्रा उपस्तुतास उपस्तुता एतदभिधाना ऋषयः सूक्तद्रष्टारोऽवोचन् । अभ्यष्टुवन् । तानृषींश्च त्वं पाहि । रक्ष ॥ चवायोगे प्रथमेति न निघातः ॥ तथा गृणतः स्तोतॄन् सूरीन्विदुषश्च पाहि । वषड्वषडिति मंत्रेणोर्ध्वासो हविष्प्रदानार्थमूर्ध्वमुखहस्ताः संतोऽनक्षन् । व्याप्नुवन् । नक्षतिर्व्याप्तिकर्मा । नमो नम इत्येवमूर्ध्वासः स्तोतुमुद्युक्ता अनक्षन् । य उक्तगुणास्तानुभयविधान्यष्टॄन् स्तोतॄन्पालय ॥ ॥ १९ ॥

पिबेति नवर्चं चतुर्थं सूक्तं त्रैष्टुभमैंद्रं । स्थूरनाम्नः पुत्रोऽग्नियुताख्य ऋषिरग्नियूपाख्यो वा । तथा चानुक्रम्यते । पिब स्थौरोऽग्नियुतोऽग्नियूपो वेति ॥ गतो विनियोगः ॥

पिबा सोमं महत इंद्रियाय पिबा वृत्राय हंतवे शविष्ठ ।
पिब राये शवसे हूयमानः पिब मध्वस्तृपदिंद्रा वृषस्व ॥ १ ॥
पिब । सोमं । महते । इंद्रियाय । पिब । वृत्राय । हंतवे । शविष्ठ ।
पिब । राये । शवसे । हूयमानः । पिब । मध्वः । तृपत् । इंद्र । आ । वृषस्व ॥ १ ॥

हे इंद्र त्वं महते प्रभूतायेंद्रियायेंद्रस्यात्मनो जुष्टाय वीर्याय सोममस्माभिर्दीयमानं पिब ॥ इंद्रियमिंद्रलिंगेत्यादिनेंद्रियशब्दो यजंतत्वेन निपातितः ॥ हे शविष्ठातिशयेन प्रवृद्ध वृत्राय हंतवे वृत्रं हंतुं सोमं पिब ॥ क्रियाग्रहणं कर्तव्यमिति वृत्रस्य संप्रदानत्वं ॥ तथा हूयमानोऽस्माभिराह्रयमानस्त्वं राये धनाय ॥ ऊडिदमित्यादिना विभक्तेरुदात्तत्वं ॥ शवसेऽन्नाय । धनान्नयोः प्रदानाय सोमं पिब । मध्वो मदकरान्सर्वान्सोमान्पिब ॥ वा छंदसीति पूर्वसवर्णदीर्घाभावः । अनंतरं हे इंद्र तृपत्तृप्तो भवन्ना वृषस्व । अस्मदभिलषितान्यासिंच । ददस्व ॥ तृपत् । तृन्प तृप्तौ तौदादिकः । अनित्यमागमशासनमिति नुमभावः ॥

अस्य पिब क्षुमतः प्रस्थितस्येंद्र सोमस्य वरमा सुतस्य ।
स्वस्तिदा मनसा मादयस्वावाचीनो रेवते सौभगाय ॥ २ ॥
अस्य । पिब । क्षुऽमतः । प्रऽस्थितस्य । इंद्र । सोमस्य । वरं । आ । सुतस्य ।
स्वस्तिऽदाः । मनसा । मादयस्व । अवाचीनः । रेवते । सौभगाय ॥ २ ॥

हे इंद्र क्षुमतः स्तुतियुक्तस्य यद्वा हवीरूपान्नवतः प्रस्थितस्य हविर्धानादुत्तरवेदिं प्रति प्रस्थापितस्य सुतस्याभिषुतस्य सोमस्य वरं वरणीयं त्वदीयं भागमाभिमुख्येन पिब ॥ प्रस्थितस्य । तिष्ठतेः कर्मणि निष्ठा । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं ॥ ततः स्वस्तिदाः कल्याणस्य दाता त्वं मनसांतःकरणेन मादयस्व । हृष्टो भव । यद्वा । अस्मानपि हृष्टान्कुरु । तदेवोच्यते । रेवते धनवते सौभगाय सौभाग्याय तदस्मभ्यं दातुमर्वाचीनोऽभिमुखांचनो भव ॥ विभाषांचेरदिक्स्त्रियामिति खः । रथिशब्दान्मतुपश्छंदसीर इति वत्वं । रथीर्मतौ बह्वलमिति संप्रसारणं । पूर्वरूपत्वे गुणः । सौभगाय । उन्नाचादिषु सुभग मंच इति पठ्यते । तस्योत्तरपदस्य हृन्नगेति वृद्धिर्नेष्यते सर्वविधीनां छंदसि विकल्पितत्वात् । त्रित्स्वरेणाद्युदात्तत्वं ॥

ममत्तु त्वा दिव्यः सोम इंद्र ममत्तु यः सूयते पार्थिवेषु ।
ममत्तु येन वरिवश्चकर्थ ममत्तु येन निरिणासि शत्रून् ॥ ३ ॥

मम॑त्तु । त्वा । दि॒व्यः । सोमः॑ । इ॒न्द्र॒ । मम॑त्तु । यः । सूय॑ते । पार्थि॑वेषु ।
मम॑त्तु । येन॑ । वरि॑वः । च॒कर्थ॑ । मम॑त्तु । येन॑ । नि॒ऽअरि॑णासि । शत्रू॑न् ॥३॥

हे इंद्र त्वा त्वां दिव्यो दिवि भवः सोमो ममत्तु । आत्मीयकलाप्रदानेन मादयतु । देवा ह्यपरपक्षे सोमस्य कलां पिबंति ॥ मदेर्लोटि व्यत्ययेन सुः । भीह्रीत्यादिना । पा० ६. १. १९२. । पितः पूर्वस्योदात्तत्वं ॥ तथा पार्थिवेषु पृथिव्यां भवेषु देवयजनेषु यः सोमोऽस्माभिः सूयते अभिषूयते सोऽप्यस्माभिर्दत्तो ममत्तु । त्वां हर्षयतु । येन सोमेन वरिवो वरणीयं धनं चकर्थ कृतवानसि स च ममत्तु ॥ करोतेर्लिट् । यद्योगाद्-निघाते लित्स्वरः ॥ किंच येन शत्रून्निरिणासि निर्गमयसि । सोऽपि ममत्तु । त्वां मादयतु ॥ रिणासि । री गतिरिषणयोः क्र्यादिः । प्वादीनां ह्रस्वत्वं ॥

आ द्वि॒ऽबर्हा॑ अमि॒नो या॑त्विंद्रो॒ वृषा॒ हरि॑भ्यां परि॒षिक्त॑मंधः ।
गव्या॑ सु॒तस्य॒ प्रभृ॑तस्य॒ मध्वः॑ स॒चा खेदा॑मरुश॒हा वृ॑षस्व ॥४॥
आ । द्वि॒ऽबर्हाः॑ । अ॒मि॒नः॑ । या॒तु॒ । इंद्रः॑ । वृषा॑ । हरि॑ऽभ्यां । परि॑ऽसिक्तं । अंधः॑ ।
गव्या॑ । आ । सु॒तस्य॑ । प्र॒ऽभृ॑तस्य । मध्वः॑ । स॒चा । खेदा॑म् । अ॒रु॒श॒ऽहा । आ । वृ॒ष॒स्व ॥४॥

द्विबर्हा द्वयोर्लोकयोः परिवृढः । यद्वा । द्वाभ्यां सुतशस्त्राभ्यां वर्धनीयः ॥ वृहिर्वर्धनार्थस्य कर्तरि कर्मणि वासुन् ॥ अमिनः । अमतेर्गत्यर्थादौणादिक इनच् । सर्वत्र गंता । यद्वा । कांत्यर्थात् । सर्वैः काम्यमानः । अत एव वृषाभिलषितानां वर्षक इंद्रः परिषिक्तं वसतीवरीभिः परितः सिक्तमंधोऽस्मदीयं सोमलक्षणमन्नं प्रति हरिभ्यामितन्नामकाभ्यामश्वाभ्यां सहा यातु । आगच्छतु । अथ प्रत्यक्षः । हे इंद्र अरुशहा । अरुशाः शत्रवः । तेषां हंता ॥ अर्तेरौणादिक उशन् । वक्रलं छंदसीति हंतेः क्विप् ॥ सचा । सप्तम्या डादेशः । अस्मदीये सचे यज्ञे गव्यानडुहे चर्मणि सुतस्याभिषुतस्य प्रभृतस्य पात्रेषु प्रहृतस्य ॥ ह्यग्रहोर्भः ॥ ईदृशस्य मध्वो मदकरस्य सोमस्य पानेन हृष्टः सन् खेदां खिद्यमानानां शत्रूणामुत्खित्तत्व आभिमुख्येन वृषस्व । वृष इवाचर ॥ वृषशब्दादाचारार्थे क्विप् । व्यत्ययेनात्मनेपदं । खेदां । खिद दैन्ये । कर्मणि घञंतस्यामि नुडागमाभावश्छांदसः ॥

नि ति॒ग्मानि॑ भ्राशयन्भ्राश्या॒न्यव॑ स्थि॒रा त॑नुहि यातुजू॒नां ।
उ॒ग्राय॑ ते॒ सहो॒ बल॑ं द॒दामि॒ प्रतीत्या॒ शत्रू॒न्विग॒देषु॑ वृश्च ॥५॥
नि । ति॒ग्मानि॑ । भ्रा॒श॒य॒न् । भ्रा॒श्या॒नि॒ । अव॑ । स्थि॒रा । त॒नु॒हि॒ । या॒तु॒ऽजू॒नां ।
उ॒ग्राय॑ । ते॒ । सहः॑ । बल॑म् । द॒दामि॑ । प्रति॑ऽइत्य । शत्रू॑न् । वि॒ऽग॒देषु॑ । वृ॒श्च॒ ॥५॥

हे इंद्र भ्राश्यानि प्रकाश्यानि तिग्मानि तीक्ष्णान्यायुधानि नितरां भ्राशयन् प्रकाशयन् ॥ भ्राशृ दीप्तौ ॥ स त्वं यातुजूनां ॥ जु इति सौत्रो धातुः । भ्राजभासेत्यत्र जवतेर्दीर्घः । का० ३. २. १७७. १. । क्विप्चेति क्विप् । दीर्घस्यामि नुडागमश्छांदसः ॥ यातुधानानां स्थिरा स्थिराणि दृढान्यपि शरीराण्यव तनुहि । अवस्रावयतनुभूतान्पातय । उग्रायोरूणबलाय ते तुभ्यं सहः शत्रुसहनसमर्थं बलं बलहेतुकं हविर्ददामि । अहं प्रयच्छामि । ततो विगदेषु । विविधं गदंति शब्दायंते ॥ गदेर्घञर्थे कविधानमित्यधिकरणे कः ॥ शत्रूनप्रतीत्य प्रतिगम्य प्रतिकूलं गत्वा वृश्च । तांश्छिंद्धि ॥ श्रीव्रश्चू छेदने तौदादिकस्य लोट् ॥ ॥२०॥

व्य१॒॑र्य इं॑द्र तनुहि श्रवां॒स्योजः॑ स्थि॒रेव॒ धन्व॑नोऽभिमा॒तीः ।
अ॒स्मद्र्य॑ग्वावृधा॒नः सहो॑भिर॒निभृ॑ष्टस्त॒न्वं॑ वावृधस्व ॥६॥

वि । अर्यः । इंद्र । तनुहि । अवांसि । ओजः । स्थिराऽइव । धन्वनः । अभिऽमातीः ।
अस्मद्र्यक् । ववृधानः । सहःऽभिः । अनिऽभृष्टः । तन्वं । ववृधस्व ॥ ६॥

हे इंद्र अर्यः स्वामी त्वं अवांस्यन्नानि । अव इत्यन्ननाम । अस्मभ्यं वि तनुहि । विस्तारय । प्रयच्छ ॥ तनोतेर्लोंयुतस्य प्रत्ययाच्छंदसि वावचनं । पा० ६. ४. १०६. १. । इति हेर्लुगभावः ॥ तथाभिमातीः । अभितो मातिर्मानं येषां तेऽभिमातयः शत्रवः । तान्प्रत्योज आत्मीयं वीर्यं स्थिरेव स्थिराणीव धन्वनो धनूंषि च विस्तारय । तैः शत्रूञ्जहीत्यर्थः । अपि चास्मद्र्यगस्मदभिमुखांचनः ॥ विष्वग्देवयोश्च टेरञ्चतावित्यञ्प्रादेशः । पा० ६. ३. ९२. । अद्रिसध्योरंतोदात्तत्वेन निपातनात् । पा० ६. ३. ९५. १. । उदात्तस्वरितयोर्यण इति धातोरकारस्यानुदात्तस्य स्वरितत्वं ॥ सहोभिरात्मीयैर्बलैर्वावृधानः प्रवृद्धः अत एवानिभृष्टः शत्रुभिरपरिभवनीयस्त्वं तन्वमात्मीयं शरीरं वावृधस्व । वर्धय । यद्वा । तन्वं । तन्यत इति तनूर्यज्ञः । तं वर्धय । त्वदागमनेन हि यज्ञो वर्धते ॥

इदं हविर्मघवन्तुभ्यं रातं प्रति सम्राळृणानो गृभाय ।
तुभ्यं सुतो मघवन्तुभ्यं पक्वोऽद्रींद्र पिब च प्रस्थितस्य ॥ ७॥
इदं । हविः । मघऽवन् । तुभ्यं । रातं । प्रति । संऽराट् । ऋणानः । गृभाय ।
तुभ्यं । सुतः । मघऽवन् । तुभ्यं । पक्वः । अद्रि । इंद्र । पिब । च । प्रऽस्थितस्य ॥ ७॥

हे मघवन्धनवन् सम्राट् सम्यग्याजमान सर्वेषामीश्वरेति वा इदं सोमादिलक्षणं रातमस्माभिर्दत्तं हविर्हे इंद्र तुभ्यमृणानोऽक्रुध्यन् प्रति गृभाय । प्रतिगृहाण ॥ ग्रहेर्लोटि आप्रत्ययस्य च्छंदसि शायजपीति शायजादेशः । हृग्रहोर्भ इति भः । संनिपातपरिभाषाया अनित्यत्वाद्धेर्लुक् ॥ हे मघवन् तुभ्यमेवायं सोमः सुतः ॥ ङयि च । पा० ६. १. २१२. । इत्यावुदात्तत्वं ॥ तुभ्यमेवायं पुरोडाशादिः पक्वः । हे इंद्र तं पुरोडाशमद्रि । भक्षय । किंच प्रस्थितस्य हविर्धानादुत्तरवेदिं प्रति प्रस्थापितं सोमं पिब ॥ वाक्यभेदान्निघातः । यद्वा । आमंत्रितस्याविद्यमानत्वेन तिङ उत्तरत्वान्निघातः ॥

अद्रींद्र प्रस्थितेमा हवींषि चनो दधिष्व पचतोत सोमं ।
प्रयस्वंतः प्रति हर्यामसि त्वा सत्याः संतु यजमानस्य कामाः ॥ ८॥
अद्रि । इत् । इंद्र । प्रऽस्थिता । इमा । हवींषि । चनः । दधिष्व । पचता । उत । सोमं ।
प्रयस्वंतः । प्रति । हर्यामसि । त्वा । सत्याः । संतु । यजमानस्य । कामाः ॥ ८॥

हे इंद्र प्रस्थिता प्रस्थितान्युत्तरवेदिं प्रतीमेमानि ॥ उभयत्र डादेशः ॥ हवींष्यद्धीत् । इदवधारणे । भक्षयैव । चनः । चन इत्यन्ननाम । तद्धिष्व । धारय । उदरे प्रक्षिप ॥ दधातेर्लोटि च्छंदस्युभयथेति थास आर्धधातुकत्वादिडागमः ॥ पचता पचतानि सवनीयपुरोडाशादीनि च धारय ॥ पचेर्भृमृदृगीत्यादिना कर्मण्यतच्प्रत्ययः ॥ उतापि च सोमं पिब । ततः प्रयस्वंतः । प्रीणयतीति प्रयोऽन्नं । तेन तद्वंतः संतस्त्वा त्वां प्रति हर्यामसि । हर्यामः । कामयामहे धनादीनि ॥ हर्यतिः प्रेप्साकर्मा । इदंतो मसिः ॥ तस्माद्यजमानस्य यागं कुर्वाणस्य कामा धनादिविषया अभिलाषाः सत्या यथार्थाः संतु ॥ पुंस्यञोः शानन् । पा० ३. २. १२८. । इति यजेः शानन्प्रत्ययः । नित्त्वादाद्युदात्तः ॥

प्रेंद्राग्निभ्यां सुवचस्यामियर्मि सिंधाविव प्रेरयं नावमर्कैः ।
अया इव परि चरंति देवा ये अस्मभ्यं धनदा उद्भिदश्च ॥ ९॥

प्र। इंद्राग्निऽभ्यां। सुऽवचस्यां। इयर्मि। सिंधौऽइव। प्र। ईरयं। नावं। अर्कैः।
अयाःऽइव। परि। चरंति। देवाः। ये। अस्मभ्यं। धनऽदाः। उत्ऽभिदः। च ॥९॥

इंद्राग्निभ्यां देवाभ्यां सुवचस्यां ॥ छंदसि चेति यत्प्रत्ययः ॥ सुवचनार्हां स्तुतिमहं प्रेरयामि ॥ ऋ गतौ जौहोत्यादिकः । अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं । देवताद्वंद्वे चेतींद्राग्न्योरुभयपदप्रकृतिस्वरत्वे प्राप्ते नोत्तरपदेऽनुदात्तादाविति प्रतिषेधः ॥ सिंधाविव सिंधौ नद्यां यथा नावं प्रेरयंति तद्वदर्कैरर्चनीयैर्मंत्रैः सहितां स्तुतिं प्रेरयं । प्रावादिषं ॥ ईर गतौ । एतस्य लङ्युत्तमस्यामादेशः ॥ स्तुतास्ते देवा अया इव । अयंति कर्मकरणार्थं गच्छंतीत्यया ऋत्विजः कर्मकरा वा । तद्वत्परि चरंति । अस्मान्धनादिदानेन पूजयंति । ये देवा अस्मभ्यं धनदा धनस्य दातार उन्निदोऽस्मच्छत्रूणामुन्नेतारश्च ये संति ॥ ॥२१॥

न वा इति नवर्चं पंचमं सूक्तं । भिक्षुर्नामांगिरस ऋषिः । प्रथमाद्वितीये जगत्यौ शिष्टाः सप्त त्रिष्टुभः । अत्र धनस्यान्नस्य च दानं स्तूयते । अतस्तद्देवत्यमिदं । तथा चानुक्रांतं । न वा उ भिक्षुर्धनान्नदानप्रशंसावे जगत्याविति ॥ गतो विनियोगः ॥

न वा उं देवाः क्षुधमिद्वधं ददुरुताशितमुप गच्छंति मृत्यवः ।
उतो रयिः पृणतो नोप दस्यत्युतापृणन्मर्डितारं न विंदते ॥१॥
न। वै। ऊं इति। देवाः। क्षुधं। इत्। वधं। ददुः। उत। आशितं। उप। गच्छंति। मृत्यवः।
उतो इति। रयिः। पृणतः। न। उप। दस्यति। उत। अपृणन्। मर्डितारं। न। विंदते ॥१॥

भिक्षुः प्रथमं व्यतिरेकमुखेनान्नदानं प्रशंसति । देवा वै देवाः खलु सर्वेषां क्षुधं न ददुः । न प्रायच्छन् । किंतु वधमिद्वधमेव दत्तवंतः । एतादृशीं वधरूपां क्षुधमन्नदानेन यः शमयति स दाता खलु । उ इति पूरणः । योऽदत्त्वा भुंक्ते तमाशितं भुंजानं पुरुषमपि मृत्यवो मरणान्युप गच्छंति । समीपे यांति ॥ आशितः कर्ता । पा० ६. १. २०७. । इत्यायुदात्तत्वं ॥ क्षुधार्त्तानां भोक्तॄणां च मरणं समानं । किं दानेन धनमात्मरूपेण । अत आह । उतो । उतशब्दोऽप्यर्थे । पृणतः प्रयच्छतः पुरुषस्य रयिर्धनं नोप दस्यति । नोपक्षीयते ॥ दसु उपक्षये दैवादिकः । पृण दाने तौदादिकः । तस्य शृणंतस्य शृणुरनुमो नद्यजादी इति विभक्तेरायुदात्तत्वं ॥ दानप्रसंगेनादातारं दूषयति । अपृणन्नप्रयच्छन् पुरुषस्तु मर्डितारमात्मनः सुखयितारं न विंदते । न कुत्रापि लभते । इह बंधवोऽप्रदानान्न सुखयंति देवा अपि हविरप्रदानाभावात् ॥

य आध्राय चकमानाय पित्वोऽन्नवान्त्सन्रफिताय्युपजग्मुषे ।
स्थिरं मनः कृणुते सेवते पुरोतो चित्स मर्डितारं न विंदते ॥२॥
यः। आध्राय। चकमानाय। पित्वः। अन्नऽवान्। सन्। रफिताय। उपऽजग्मुषे।
स्थिरं। मनः। कृणुते। सेवते। पुरा। उतो इति। चित्। सः। मर्डितारं। न। विंदते ॥२॥

यः पुरुषः स्वयमन्नवानप्याध्राय । आधार्यतेऽसावित्याध्रो दुर्बलः । तस्मै पित्वः पितूनन्नानि चकमानाय । चकमानः कांतिकर्मा । रफिताय । रफतिर्हिंसार्थः । दारिद्र्येण हिंसितायोपजग्मुषे गृहं प्रत्यागतायातिशयेन मन आत्मीयमंतःकरणमदानि स्थिरं कृणुते कुरुते । मनःस्थैर्यकरणेन तं श्लेशयतीत्यर्थः ॥ कृणुते । कृवि हिंसाकरणयोः । धिन्विकृण्व्योरित्युप्रत्ययः । करोतेर्वा व्यत्ययेन शुः । विकरणस्वरः सति शिष्टेऽपि ससार्वधातुकस्वरं न बाधते । म० ६. १. १५८. ११. । इति ससार्वधातुकस्वरः । न केवलं श्लेशकरणं अपि तु पुरा तस्य पुरस्तादेव सेवते भोगान । सोऽपि मर्डितारमात्मनः सुखयितारं न विंदते । न कुत्रापि लभते ॥

स इद्भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय ।
अरमस्मै भवति यामहूता उतापरीषु कृणुते सखायं ॥ ३ ॥
सः । इत् । भोजः । यः । गृहवे । ददाति । अन्नऽकामाय । चरते । कृशाय ।
अरं । अस्मै । भवति । यामऽहूतौ । उत । अपरीषु । कृणुते । सखायं ॥ ३ ॥

अन्वयमुखेन प्रशंसति । स इत् स एव भोजो दाता खलु यो गृहवे ॥ यहेर्मृगय्वादिखात् । उ० १. ३८. । कुप्रत्ययः ॥ प्रतिगृहीत्रेऽन्नकामायान्नं याचमानाय चरते गृहमागतवते क्षुधाय दारिद्र्येणेतादृशायातिथयेऽन्नं ददाति प्रयच्छति ॥ अभ्यस्तानामादिरित्याबुदात्तत्वं ॥ यामहूतौ । यामा गंतारो देवाः ॥ अच यतेरर्तिसु-सुकन्ह । उ० १. १३९. । इत्यादिना मन्प्रत्ययः ॥ त आह्रयंतेऽत्रेति यामहूतिर्यज्ञः । तस्मिन्नस्मै दात्रे फलमरमलं पर्याप्तं भवति । कामप्रदानं भवतीत्यर्थः । उतापि चापरीषु ॥ केवलमामकेति ङीप् । पा० ४. १. ३०. ॥ अन्यासु शत्रवीषु सेनासु सखायं कृणुते । तद्वदाचरतीत्यर्थः । तस्य सर्वे सखाय एव न शत्रव इत्यर्थः ॥

न स सखा यो न ददाति सख्ये सचाभुवे सचमानाय पित्वः ।
अपास्मात्प्रेयान्न तदोको अस्ति पृणंतमन्यमरणं चिदिच्छेत् ॥ ४ ॥
न । सः । सखा । यः । न । ददाति । सख्ये । सचाऽभुवे । सचमानाय । पित्वः ।
अप । अस्मात् । प्र । इयात् । न । तत् । ओकः । अस्ति । पृणंतं । अन्यं । अरणं । चित् । इच्छेत् ॥ ४ ॥

व्यतिरेकेण निंदामाह । स पुरुषः सखा न भवति यः पुरुषः सचाभुवे सर्वदा सहभवनशीलाय सचमानाय सेवमानायोपसर्जनीभूताय सख्ये सखिजनाय पित्वः पितूनन्नानि न ददाति न प्रयच्छति । स सुहृन्न भवतीत्यर्थः । अस्माददातुः सख्युः सोऽप प्रेयात् । अपगच्छेत् । यद्वेनं परित्यज्य गच्छेत् ॥ इण् गतौ । लिङि यासुट् ॥ तर्हि तदोको निवासः सदनं नास्ति । न भवति । सदनं हि बंधुभिः परिवृतं । स गतः पुरुषः पृणंतमन्नादिकं प्रयच्छंतमन्यमरणं चिदपि स्वामिनमेवेच्छेत् । कामयेत ॥

पृणीयादिन्नाधमानाय तव्यान्द्राघीयांसमनु पश्येत पंथां ।
ओ हि वर्तंते रथ्येव चक्रान्यमन्यमुप तिष्ठंत रायः ॥ ५ ॥
पृणीयात् । इत् । नाधमानाय । तव्यान् । द्राघीयांसं । अनु । पश्येत । पंथां ।
ओ इति । हि । वर्तंते । रथ्याऽइव । चक्रा । अन्यंऽअन्यं । उप । तिष्ठंत । रायः ॥ ५ ॥

धनवंतं पुरुषं दाने प्रेरयति । तव्यांस्तवीयान्धनैरतिशयेन प्रवृद्धः पुरुषो नाधमानाय याचमानायातिथये पृणीयादित् । धनानि दद्यादेव ॥ पृ पालनपूरणयोः क्र्यादिः । प्वादीनां ह्रस्वः ॥ यदि दद्यात् द्राघीयांसं ॥ दीर्घशब्दादीयसुनि प्रियस्थिरेत्यादिना द्राघीत्यादेशः ॥ दीर्घतमं पंथां पंथानं सुकृतमार्गमनु पश्येत । अनुपश्येत् ॥ व्यत्ययेनात्मनेपदं । तत्र कारणमाह । रायो धनान्यो हि । आ उ । आवर्तंते खलु । एकत्र न तिष्ठंतीत्यर्थः । तत्र दृष्टांतः । रथ्येव यथा रथ्यानि ॥ रथाद्यत् । पा० ४. ३. १२१. । इति तस्मिदमित्यर्थे यत् ॥ रथसंबंधीनि चक्राण्युपर्यधोभावेनावर्तंते तद्वदावृत्तिमेव दर्शयति । अन्यमन्यं पुरुषं धनान्युप तिष्ठंत । उपतिष्ठंते । समवेतानि भवंति ॥ उपाद्देवपूजासंगतिकरणेति । का० १. ३. २५. १. । आत्मनेपदं ॥ तस्माद्धनानि देयानीति भावः ॥ ॥ २२ ॥

मोघमन्नं विंदते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य ।
नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥ ६ ॥

मोघं । अन्नं । विंदते । अप्रऽचेताः । सत्यं । ब्रवीमि । वधः । इत् । सः । तस्य । न । अर्यमणं । पुष्यति । नो इति । सखायं । केवलऽअघः । भवति । केवलऽआदी ॥ ६ ॥

अदातारं दूषयति । अप्रचेता अप्रकृष्टज्ञानः दाने चेतो मनो यस्य न भवति स मोघं व्यर्थमेवान्नं विंदते । लभते ॥ विदॢ लाभे तौदादिकः । शे मुचादीनामिति नुमागमः ॥ इदं सत्यं यथार्थमेवेति ब्रवीमि । ऋषिरहं वदामि । न केवलं व्यर्थं किंतु तस्य पुरुषस्य स वध इदृध एवान्नं परामृशतः ॥ तच्छब्दस्य वधसामानाधिकरण्यात्पुँल्लिंगता । यथा शेरणावित्यत्र । पा० १. ३. ६७. । यत्कर्म स एव कर्तेति ॥ अथवा स निरर्थको वध एव यः पुरुषोऽर्यमणं । उपलक्षणमिदं । सर्वान्देवानर्यमादीन्न पुष्यति हविष्प्रदानेन न पोषयति नो नापि सखायं समानख्यानमभ्यागतमतिथिं मित्रवर्गं च न पोषयति ॥ पुष पुष्टौ दैवादिकः । यच्छब्दाध्याहाराद्निघातः ॥ अत एव केवलादी ॥ अदेः सुपयजातौ । पा० ३. २. ७८. । इति णिनिः । अत उपधालक्षणा वृद्धिः ॥ केवलमसाधिकमन्नं भुंजानः स केवलाघो भवति । केवलपापवान्भवति । अघमेव केवलं तस्य श्लिष्यते । ऐहिकामुष्मिकमिति । तस्मादयथाकथंचिद्दातव्यमित्यभिप्रायः ॥

कृषन्नित्फाल आशितं कृणोति यन्नध्वानमप वृंक्ते चरिभ्यः ।
वदन्ब्रह्मावदतो वनीयान्पृणन्नापिरपृणंतमभि ष्यात् ॥ ७ ॥

कृषन् । इत् । फालः । आशितं । कृणोति । यन् । अध्वानं । अप । वृंक्ते । चरिभ्यः । वदन् । ब्रह्मा । अवदतः । वनीयान् । पृणन् । आपिः । अपृणंतं । अभि । स्यात् ॥ ७ ॥

कृषन् कृषिं कुर्वन्फाल आशितं कर्षकं भोक्तारं कृणोति । करोति । तथाध्वानं मार्गं यन् ॥ इणः शतरि नुमागमः ॥ गच्छन्पुरुषश्चरिभ्यः चरितारीभ्यो गमनेभ्य अप वृंक्ते । स्वामिनो धनमावर्जयति ॥ वृजी वर्जने आदादिकः । अनुदात्तेत् ॥ वदञ्शास्त्रार्थं ब्रुवाणो ब्रह्मा ब्राह्मणोऽवदतः शास्त्रार्थमब्रुवानाज्जनाद्वनीयान् । संभक्तृतमः प्रियकरो भवति ॥ वनतेर्नृजंतस्येयसुनि तुरिष्ठेमेयःस्विति तृचो लोपः ॥ ते यथा स्वकर्मणि प्रवर्तमानाः परेषामुपकारकाः तथा पृणन् दाता पुरुषोऽपृणंतमदातारं जनमभ्यभिलक्ष्यापिः स्यात् । बंधुर्भवेत् ॥

एकपाद्भूयो द्विपदो वि चक्रमे द्विपात्त्रिपादमभ्येति पश्चात् ।
चतुष्पादेति द्विपदामभिस्वरे संपश्यन्पंक्तीरुपतिष्ठमानः ॥ ८ ॥

एकऽपात् । भूयः । द्विऽपदः । वि । चक्रमे । द्विऽपात् । त्रिऽपादं । अभि । एति । पश्चात् । चतुःऽपात् । एति । द्विऽपदां । अभिऽस्वरे । संऽपश्यन् । पंक्तीः । उपऽतिष्ठमानः ॥ ८ ॥

अत्र पादशब्दो भागवचनः । एकपादेकभागधनः पुरुषो द्विपदो द्विगुणधनस्य मार्गं भूयः ॥ तृतीयायाः सुः ॥ भूयसा कालेन वि चक्रमे । विविधं गच्छति ॥ वेः पादविहरणे । पा० १. ३. ४१. । इत्यात्मनेपदं ॥ तथा द्विपात्पुरुषस्त्रिपादं त्रिभागधनं पुरुषं पश्चादभ्येति । अभिगच्छति । चतुष्पाच्चतुर्भागधनस्तु द्विपदां । बहुवचनादेकपादादय उपलक्ष्यंते । एकपादधनादीनां पंक्तीरभिस्वरेऽभिगमने संपश्यन् सम्यगीक्षमाणः सन्नुपतिष्ठमान एति । गच्छमानो भवति । अन्योन्यापेक्षया सर्व उत्तमाधमाः । तस्मात्त्वमहमेव धनवानिति न मन्यैः किंत्वतिथिभ्यो धनानि ददस्वेत्यर्थः ॥

समौ चिद्रथौ न समं विविष्टः संमातरा चिन्न समं दुहाते ।
यमयोश्चिन्न समा वीर्याणि ज्ञाती चित्संतौ न समं पृणीतः ॥ ९ ॥

समौ । चित् । हस्तौ । न । समं । विविष्टः । संऽमातरा । चित् । न । समं । दुहाते इति । यमयोः । चित् । न । समा । वीर्याणि । ज्ञाती इति । चित् । संतौ । न । समं । पृणीतः ॥९॥

अतिथिभ्यो धनमप्रयच्छन्नपि मम भ्राता दास्यतीति चेत् तत्र हेतुमाह । समौ चिद्यमौ समावपि समं समानं न विविष्टः । कार्यं न व्याप्नुतः ॥ विषॢ व्याप्तौ जौहोत्यादिकः । संज्ञापूर्वकस्य विधेरनित्यत्वादभ्यासस्य गुणाभावः ॥ तथा संमातरा वत्सस्य मातरौ धेनू समे अपि समं समानं पयो न दुहाते । यमयोश्चित् सहजातयोः पुत्रयोरपि समा समानि वीर्याणि न संति । तस्माज्ज्ञाती चिदेकस्मिन्कुले संतौ जातावपि समं न पृणीतः । न प्रयच्छतः । तस्माद्यस्य धनमस्ति स एव दद्यादित्यर्थः ॥ ॥२३॥

अग्ने हंसीति नवर्चं षष्ठं सूक्तममहीयुगोच्चस्फोरुक्षयस्यार्षं गायत्रं । रात्रौहाग्निर्देवता । तथा चानुक्रम्यते । अग्ने हंस्युरुक्षय आमहीयव आग्नेयं रात्रौघ्नं गायत्रं त्विति ॥ मध्यमानेऽग्नावजायमान इदमनुवाक्यं । सूचितं च । अजायमाने त्वेतस्मिन्नेवावसानेऽग्ने हंसि न्यत्रिणमिति सूक्तमावपेत । आ० २. १६. । इति ॥ प्रातरनुवाकाश्विनशस्त्रयोरपि गायत्रे छंदसीदं सूक्तं । सूचितं च । अग्ने हंस्यग्निं हिन्वंतु नः । आ० ४. १३. । इति ॥ दशमेऽहनि धिष्ण्यांगाराभिविहरण आद्या ऋचा । सूचितं च । परि त्वाग्ने पुरं वयमित्येतस्याः स्थानेऽग्ने हंसि न्यत्रिणं । आ० ८. १२. । इति ॥

अग्ने हंसि न्यत्रिणं दीद्यन्मर्त्येष्वा । स्वे क्षये शुचिव्रत ॥१॥
अग्ने । हंसि । नि । अत्रिणं । दीद्यत् । मर्त्येषु । आ । स्वे । क्षये । शुचिऽव्रत ॥१॥

हे शुचिव्रत पूतकर्मन् दीप्यमानतेजस्क हे अग्ने अत्रिणमत्तारं शत्रुं तमोरूपं नितरां हंसि । विनाशय ॥ आमंत्रितस्याविद्यमानत्वेन पादादित्वादनिघातः ॥ किं कुर्वन् । मर्त्येषु मनुष्येषु यजमानेष्वाभिमुख्येन दीद्यत् कर्मसिद्ध्यर्थं प्रकाशमानः । दीदितिर्दीप्तिकर्मा । तथा स्व आत्मीये क्षये निवासभूत आहवनीयादिस्थाने दीप्यमानः ॥ क्षयो निवासे । पा० ६. १. २०१. । इत्यावुदात्तत्वं ॥

उत्तिष्ठसि स्वाहुतो घृतानि प्रति मोदसे । यत्त्वा स्रुचः समस्थिरन् ॥२॥
उत् । तिष्ठसि । सुऽआहुतः । घृतानि । प्रति । मोदसे । यत् । त्वा । स्रुचः । संऽअस्थिरन् ॥२॥

हे अग्ने स्वाहुतोऽस्माभिः सुष्ठ्वाह्रयमानः सन्नुत्तिष्ठसि । अरणीभ्यामुन्नतो भव ॥ ऊर्ध्वकर्मत्वादात्मनेपदाभावः । पा० १. ३. २४. ॥ उन्नत्य च घृतानि घृतेन सहितान्यस्माभिर्दीयमानानि हवींषि प्रति मोदसे । हृष्टो भव ॥ मुद हर्षे भौवादिकः । अनुदात्तेत् ॥ यद्यदा त्वा त्वां स्रुचो जुह्वादीनि पात्राणि समस्थिरन् संगतान्यभवन् ॥ समवप्रविभ्यः स्थ इति लुङ्यात्मनेपदं । स्थाघ्वोरिच्चेति सिचः कित्त्वमिकारस्यांतादेशः । ह्रस्वादंगादिति सिचो लोपः । व्यत्ययेन झस्य रन् । तिङि चोदात्तवतीति गतेर्निघातः ॥

स आहुतो वि रोचतेऽग्निरीळेन्यो गिरा । स्रुचा प्रतीकमज्यते ॥३॥
सः । आऽहुतः । वि । रोचते । अग्निः । ईळेन्यः । गिरा । स्रुचा । प्रतीकं । अज्यते ॥३॥

आहुत आभिमुख्येन हुतः ॥ गतिरनंतर इति गतेः प्रकृतिस्वरः ॥ गिरा स्तुतिलक्षणया वाचेळेन्यः स्तोतव्यः सोऽग्निर्वि रोचते । अत्यर्थं दीप्यते । तथा प्रतीकं सर्वेषां देवानां पूर्वमेव स्रुचा घृतसहितयाज्यते । सिच्यते ॥

घृतेनाग्निः समज्यते मधुप्रतीक आहुतः । रोचमानो विभावसुः ॥४॥
घृतेन । अग्निः । सं । अज्यते । मधुऽप्रतीकः । आऽहुतः । रोचमानः । विभाऽवसुः ॥४॥

अभिर्घृतेन हविषा समज्यते । सम्यक् सिक्तो भवति । कीदृशः । मधुप्रतीको घृतप्रयुक्तावयवः आहुतः स्तुतिभिर्हविर्भिर्वा रोचमानो दीप्यमानः विभावसुः स्वदीप्त्या सर्वमाच्छादयन् । यद्वा । दीप्तिरेव धनं यस्य सः ॥

अग्नोर्यामे होतुरतिरिक्तोक्थ्ये जरमाणाः समिधस इत्यनुरूपसूचः । सूचितं च । जरावोध तद्विविड्ढि जरमाणः समिध्यसे । आ० ९. ११. । इति ॥

जरमाणः समिध्यसे देवेभ्यो हव्यवाहन । तं त्वा हवंत मर्त्याः ॥५॥

जरमाणः । सं । इध्यसे । देवेभ्यः । हव्यऽवाहन । तं । त्वा । हवंत । मर्त्याः ॥५॥

हे हव्यवाहन हव्यानां प्रापयितः ॥ हव्येऽनंतःपादं । पा० ३. २. ६६. । इति ण्युट् ॥ जरमाणः स्तोतृभिः स्तूयमानः । जरतिः स्तुतिकर्मा । स त्वं देवेभ्यो देवार्थं समिध्यसे । हविर्भिः सम्यग्दीप्यसे । तं तादृशं त्वा त्वां मर्त्या मनुष्येषु साधवो यजमाना हवंत । आह्वयंति ॥ ह्वयतेर्लङि बहुलं छंदसीति संप्रसारणं ॥ ॥२४॥

तं मर्ता अमर्त्यं घृतेनाग्निं सपर्यत । अदाभ्यं गृहपतिं ॥६॥

तं । मर्ताः । अमर्त्यं । घृतेन । अग्निं । सपर्यत । अदाभ्यं । गृहऽपतिं ॥६॥

हे मर्ता ऋत्विजः अमर्त्यं मनुष्यधर्मरहितमग्निं घृतेन हविषा सपर्यत । परिचरत ॥ सपरश्छन्दः कंड्वादिः ॥ कीदृशं । अदाभ्यं केनचिदप्यहिंस्यं ॥ दभेरिति वक्तव्यं । पा० ३. १. १२४. ३. । इति ण्यत् ॥ गृहपतिं गृहस्य स्वामिनं यजमानरूपं ॥ पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरः ॥

अदाभ्येन शोचिषाग्ने रक्षस्वं दह । गोपा ऋतस्य दीदिहि ॥७॥

अदाभ्येन । शोचिषा । अग्ने । रक्षः । त्वं । दह । गोपाः । ऋतस्य । दीदिहि ॥७॥

हे अग्ने त्वमदाभ्येनाहिंस्येन शोचिषा तेजसा रक्षः । जातावेकवचनं । सर्वान्राक्षसान्दह । विनाशय । किंचतस्य यज्ञस्य गोपा गोपायिता सन् दीदिहि । दीप्यस्व ॥

स त्वमग्ने प्रतीकेन प्रत्योष यातुधान्यः । उरुक्षयेषु दीद्यत् ॥८॥

सः । त्वं । अग्ने । प्रतीकेन । प्रति । ओष । यातुऽधान्यः । उरुऽक्षयेषु । दीद्यत् ॥८॥

हे अग्ने स त्वं प्रतीकेन त्वदवयवभूतेन तेजसा यातुधान्यो यातुधानी राक्षसीः प्रत्योष । प्रतिकूलं दह ॥ उष दाहे भौवादिकः । लोटि हेर्लुक् । जातेरस्त्रीविषयात् । पा० ४. १. ६३. । इति यातुधानशब्दस्य ङीष् । उदात्तस्वरितयोर्यण इति स्वरितत्वं ॥ किं कुर्वन् । उरुक्षयेषु विस्तीर्णेषु निवासेष्वाहवनीयादिषु दीयद्दीप्यमानः ॥

तं त्वा गीर्भिरुरुक्षया हव्यवाहं समीधिरे । यजिष्ठं मानुषे जने ॥९॥

तं । त्वा । गीःऽभिः । उरुऽक्षयाः । हव्यऽवाहं । सं । ईधिरे । यजिष्ठं । मानुषे । जने ॥९॥

हे अग्ने उरुक्षया बहुनिवासा यजमाना हव्यवाहं हविषां वोढारं मानुषे मनुष्यसंबंधिनि जने जनमध्ये यजिष्ठं यष्टृतमं तं त्वा त्वां गीर्भिः स्तुतिभिस्तत्सहितैर्हविर्भिः समीधिरे । सम्यगदीदिपन् ॥ इंधेर्लिटीधिभवतिभ्यां चेति किच्चि नलोपः ॥ ॥२५॥

इति वा इति चयोदशर्चं सप्तमं सूक्तं गायत्रं । इंद्रो लवरूपमास्थाय सोमपानं कुर्वन् तदागीमृषिभिः दृष्टः सन् स्वात्मानमनेन सूक्तेनास्तावीत् । अतो लवरूपापन्न इंद्र ऋषिः । स एव देवता । तथा चानुक्रम्यते । इति वै सप्तोनिंद्रो लव आत्मानं तुष्टावेति ॥ अतो विनियोगः ॥

इति॒ वा इति॑ मे॒ मनो॒ गामश्वं॑ सनुया॒मिति॑ । कु॒वित्सोम॒स्यापा॒मिति॑ ॥१॥
इति॑ । वै । इति॑ । मे॒ । मनः॑ । गां । अश्व॑म् । स॒नु॒या॑म् । इति॑ । कु॒वित् । सोम॑स्य । अपा॑म् । इति॑ ॥१॥

इति वा इति खल्वित्येवंप्रकारेण मे मदीयं मनो वर्तते । तं प्रकारं दर्शयति । गामश्वं च सनुयां स्तोतृभ्यः प्रयच्छामीति ॥ षणु दाने तानादिकः ॥ इतिशब्दो हेतौ । यस्मात् कुविद्बहुवारं सोमस्य सोममपां पीतवानस्मि ॥ क्रियाग्रहणं कर्तव्यमिति सोमस्य संप्रदानसंज्ञा । चतुर्थ्यर्थे बहुलमिति षष्ठी । पा पाने । लुङि गातिस्थेति सिचो लुक् । कुवित्योगादनिघातः ॥

प्र वाता॑ इव॒ दोध॑त॒ उन्मा॑ पी॒ता अ॑यंसत । कु॒वित्सोम॒स्यापा॒मिति॑ ॥२॥
प्र । वाताः॑ऽइव । दोध॑तः । उत् । मा॒ । पी॒ताः॑ । अ॒यं॒स॒त॒ । कु॒वित् । सोम॑स्य । अपा॑म् । इति॑ ॥२॥

दोधतो भृशं कंपयमाना वाता इव वायवो यथा वृक्षादीनुद्यच्छंते तद्वत्पीताः सोमा मा मां प्रकर्षेणोद्यंसत । उद्यच्छंते ॥ यमेर्लुङि समुदाङ्भ्यो यमोऽग्रंथे । पा० १. ३. ७५. । इत्यात्मनेपदं ॥ यस्माद्बहुवारं सोममपां ॥

उन्मा॑ पी॒ता अ॑यंसत॒ रथ॒मश्वा॑ इवाशवः । कु॒वित्सोम॒स्यापा॒मिति॑ ॥३॥
उत् । मा॒ । पी॒ताः॑ । अ॒यं॒स॒त॒ । रथ॑म् । अश्वा॑ः॑ऽइव । आ॒श॒वः॑ । कु॒वित् । सोम॑स्य । अपा॑म् । इति॑ ॥३॥

पीताः सोमा मामुदयंसत । उद्यच्छंते । तत्र दृष्टांतः । रथमश्वा इव यथाशवः क्षिप्रगामिनो गमनेन व्याप्ता वाश्वा रथमुन्नमयंति तद्वत् ॥

उप॑ मा म॒तिर॑स्थित वा॒श्रा पु॒त्रमि॑व प्रि॒यं । कु॒वित्सोम॒स्यापा॒मिति॑ ॥४॥
उप॑ । मा॒ । म॒तिः॑ । अ॒स्थि॒त॒ । वा॒श्रा । पु॒त्रं॑ऽइव । प्रि॒यं । कु॒वित् । सोम॑स्य । अपा॑म् । इति॑ ॥४॥

मतिः स्तोतृभिः क्रियमाणा स्तुतिर्मा मामुपास्थित । संयोजयति ॥ उपाद्देवपूजासंगतिकरणेत्यात्मनेपदं ॥ कथमिव । वाश्रा पुत्रमिव यथा वाश्रा शब्दायमाना धेनुः प्रियं पुत्रं वत्सं संगच्छति तद्वत् ॥

अ॒हं त॒ष्टेव॒ वंधु॑रं॒ पर्य॑चामि हृ॒दा म॒तिं । कु॒वित्सोम॒स्यापा॒मिति॑ ॥५॥
अ॒हं । त॒ष्टा॑ऽइव । वंधु॑रं । परि॑ । अ॒चा॒मि॒ । हृ॒दा । म॒तिं । कु॒वित् । सोम॑स्य । अपा॑म् । इति॑ ॥५॥

तष्टेव तक्षा यथा वंधुरं सारथिनिवासस्थानं । तद्वान्वोपलक्ष्यते । तत्स्थानं रथं वा साधुकरोति तद्वदहं मतिं स्तुतिं हृदात्मीयेन मनसा पर्यचामि । साधुकरणाय परिगच्छामि ॥

न॒हि मे॑ अ॒क्षिप॑च्च॒नाच्छा॑न्त्सुः पंच कृ॒ष्टयः॑ । कु॒वित्सोम॒स्यापा॒मिति॑ ॥६॥
न॒हि । मे॒ । अ॒क्षि । अ॒प॒त् । च॒न । अच्छा॑न्त्सुः । पंच॑ । कृ॒ष्टयः॑ । कु॒वित् । सोम॑स्य । अपा॑म् । इति॑ ॥६॥

चनेति निपातसमुदायोऽप्यर्थे । पंच क्षष्टयोऽपि निषादपंचमाश्चत्वारो वर्णाः पंच जनाः । यद्वा । देवमनुष्यादयः । मे मदीयमक्षिपक्षमपतनं वृष्टिसंचारं नाच्छान्त्सुः । न ह्यपवृण्वंति । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इति हि श्रुतिः । श्रुत० १४. ७. १. २३. ॥ छदि अपवारणे । चुरादीनामिति वा ण्यंतत्वादत्र ण्यभावे लुङि हलंतलक्षणा वृद्धिः । पा० ७. २. ३. ॥ यस्माद्बहुवारं सोममपां ॥ ॥ २६ ॥

नहि मे रोदसी उभे अन्यं पक्षं चन प्रति । कुवित्सोमस्यापामिति ॥७॥
नहि । मे । रोदसी इति । उभे इति । अन्यं । पक्षं । चन । प्रति । कुवित् । सोमस्य । अपाँ । इति ॥७॥

उभे रोदसी द्यावापृथिव्यौ मे मदीयमन्यं पक्षं चन पक्षमपि प्रति समाने न भवतः ॥

अभि द्यां महिना भुवमभी३मां पृथिवीं महीं । कुवित्सोमस्यापामिति ॥८॥
अभि । द्यां । महिना । भुवं । अभि । इमां । पृथिवीं । महीं । कुवित् । सोमस्य । अपाँ । इति ॥८॥

उक्तमर्थं प्रतिपादयति । महिना महिम्नात्मीयेन द्यां द्युलोकमभि भुवं । अभिभवामि । तथा महीं महतीमिमां पृथिवीं स्वमहिम्नाभि भवामि ॥ भवतेर्लङि च्छांदसो विकरणस्य लुक् । भूसुवोस्तिङीति गुणे प्रतिषिद्ध उवङादेशः ॥

हंताहं पृथिवीमिमां नि दधानीह वेह वा । कुवित्सोमस्यापामिति ॥९॥
हंत । अहं । पृथिवीं । इमां । नि । दधानि । इह । वा । इह । वा । कुवित् । सोमस्य । अपाँ । इति ॥९॥

हंतेति संभावनायामनुज्ञायां वा । संभावयाम्येतदनुजानामि वा । किं तत् । अहमिमां पृथिवीमिह वांतरिक्षे नि दधानि । इह वा द्युलोक इति हस्तेन निर्दिशति ॥ दधातेर्लोटि मेर्निः ॥

ओषमित्पृथिवीमहं जंघनानीह वेह वा । कुवित्सोमस्यापामिति ॥१०॥
ओषं । इत् । पृथिवीं । अहं । जंघनानि । इह । वा । इह । वा । कुवित् । सोमस्य । अपाँ । इति ॥१०॥

अहं पृथिवीमभिलक्ष्यौषं स्वतेजसा तापकमादित्यमिह वांतरिक्ष इह वा द्युलोके जंघनानि । भृशं यापयानि । इदिति पूरणः ॥ हंतेर्गत्यर्थस्य यङ्लुगंतस्य लोटि श्नपो लुगभावश्छांदसः ॥

दिवि मे अन्यः पक्षोऽधो अन्यमचीकृषं । कुवित्सोमस्यापामिति ॥११॥
दिवि । मे । अन्यः । पक्षः । अधः । अन्यं । अचीकृषं । कुवित् । सोमस्य । अपाँ । इति ॥११॥

मे मदीयोऽन्यः पक्षो दिवि द्युलोके स्थापितः । अधः ॥ पूर्वाधरावराणामसीत्यादिनासिप्रत्ययः । प्रकृतेरधादेशश्च ॥ अधस्तात्पृथिव्यामन्यं पक्षमचीक्षषं । अकार्षं ॥ कृष विलेखने । स्यंतस्य लुङि चङि नित्यं छंदसि । पा० ७. ४. ८. । इत्यृकारादेशः ॥ विलेखनं नामोत्पादनं । उदपादयं । आस्थापयमित्यर्थः ॥

अहमस्मि महामहोऽभिनभ्यमुदीषितः । कुवित्सोमस्यापामिति ॥१२॥
अहं । अस्मि । महाऽमहः । अभिऽनभ्यं । उत्ऽईषितः । कुवित् । सोमस्य । अपाँ । इति ॥१२॥

अभिनभ्यं नाभौ मध्यस्थाने भवं नभ्यमंतरिक्षं ॥ उगवादिभ्यो यत् । पा० ५. १. २. । इति यत्प्रत्ययः । तथैव पाठान्नभादेशश्च । लक्षणेनाभिप्रती आभिमुख्ये । पा० २. १. १४. । इत्यव्ययीभावसमासस्वरः ॥ अंतरिक्षमभुदीषित उन्नतः सूर्यात्माहं महामहोऽस्मि । महतामपि महानस्मि । यद्वा । महत्प्रभूतं महस्तेजो यस्य । प्रभूततेजस्कोऽस्मि ॥ आत्मस्तुत इत्यार्षं ॥

गृहो याम्यरंकृतो देवेभ्यो हव्यवाहनः । कुवित्सोमस्यापामिति ॥१३॥
गृहः । यामि । अरंऽकृतः । देवेभ्यः । हव्यऽवाहनः । कुवित् । सोमस्य । अपां । इति ॥१३॥

गृहो हविषां ग्रहीतारंकृतो यजमानैरलंकृतोऽहं देवेभ्य इंद्रादिभ्यो हव्यवाहनो हविषां वोढा प्रापयितागन्यात्मा सन्यामि । हवींषि प्रापयामि ॥ या प्रापणे । लट् । हव्येऽनंतःपादमिति वहेर्ण्युट् । ञ्नित्त्वादाद्युदात्तः । समासे ऋदुत्तरपदप्रकृतिस्वरः ॥ इति यस्मात्कुवित्प्रश्नवारं सोमस्य सोममपां पीतवानस्मि । तस्मादेतान्यकार्षमितींद्रः स्वात्मानमेवास्तावीत् ॥ ॥२७॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थाश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्येऽष्टमाष्टके षष्ठोऽध्यायः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

तत्राष्टमाष्टके षष्ठाध्यायं व्याख्याय सप्तमाध्याय आरभ्यते । दशममंडलस्य दशमेऽनुवाके सूक्तसप्तकं व्याख्यातं । तदिदिति नवर्चमष्टमं सूक्तमथर्वणः पुत्रस्य बृहद्दिवस्यार्षं वैष्टुभमैंद्रं । तथा चानुक्रांतं । तदिन्नवाथर्वणो बृहद्दिव इति ॥ चातुर्विंशिकेऽहनि निष्केवल्यं इदं सूक्तं । सूचितं च । तदिदासेति च पुरस्तात्सूक्तस्य शंसेत् । आ० ७. ३. । इति ॥ द्यौमविश्वदेवसुत्यंचशारदीयेष्वग्निष्टोमेष्वेकाहेष्विदमेव निष्केवल्यनिविद्धानं । सूचितं च । एतेषां त्रयाणां कया शुभा तदिदासेति मध्यंदिनः । आ० ९. ८. । इति ॥ राशिभरायाख्ययोरेकाहयोरपीदं निष्केवल्यनिविद्धानं । सूचितं च । राशिभरायस्यैश्च कयाशुभीयतदिदासीये । आ० ९. ८. । इति ॥ महाव्रते निष्केवल्येऽप्येतत्सूक्तं । तथैव पंचमारण्यके शौनकेन सूचितं । तदिदास भुवनेषु ज्येष्ठं तां सु ते कीर्तिं मघवन्महित्वा । ऐ० आ० ५. १. ६. । इति ॥

तदिदास् भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः ।
सद्यो जज्ञानो नि रिणाति शत्रूननु यं विश्वे मदंत्यूमाः ॥१॥
तत् । इत् । आस । भुवनेषु । ज्येष्ठं । यतः । जज्ञे । उग्रः । त्वेषऽनृम्णः ।
सद्यः । जज्ञानः । नि । रिणाति । शत्रून् । अनु । यं । विश्वे । मदंति । ऊमाः ॥१॥

तज्जगत्कारणत्वेन सर्ववेदांतप्रसिद्धं । इच्छब्दोऽवधारणे । भुवनेषु ॥ भू सत्तायां ॥ सत्सु पृथिव्यादिषु लोकेषु मध्ये जगत्कारणं ब्रह्मैव ज्येष्ठं प्रशस्ततममास । बभूव । तस्य परमार्थत्वात् तद्व्यतिरिक्तानां व्यावहारिकत्वाच्च । यद्वा । ज्येष्ठं वृद्धतमं जगत्कारणत्वेन सर्वेषामादिभूतं बभूव ॥ असेर्लिटि छंदस्युभयथेति सार्वधातुकत्वादस्तेर्भूः । पा० २. ४. ५२. । इति भूभावाभावः । यद्वा । वृद्धं तदेव ब्रह्म स्वप्रकाशतयास । दिदीपे ॥ अस

गतिदीप्त्यादानेषु । अस्माल्लिटि रूपं ॥ यत उपादानभूतायस्माद्ब्रह्मण उग्र उन्नूर्णस्त्वेषनृम्णः प्रदीप्तबलः सूर्यात्मक इंद्रो जज्ञे जातो बभूव । श्रूयते हि । चक्षोः सूर्यो अजायत । ऋ० १०. ९०. १३. । इति । सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत् । ऋ० १०. १९०. ३. । इति च ॥ जनिकर्तुः प्रकृतिः । पा० १. ४. ३०. । इति प्रकृतेरपादानसंज्ञायां यत इति पंचमी । जनेर्लिटि गमहनेत्यादिनोपधालोपः । द्विर्वचनेऽचीति तस्य स्थानिवद्भावाद्द्विर्वचनादि । यद्वृत्तान्नित्यमिति निघातप्रतिषेधः ॥ स च जज्ञानो जायमान एव सद्यः शीघ्रं शत्रून्ज्ञातयितॄन्देहादीन्बाधसान्नि रिणाति । निहिनस्ति । यद्वा । उपासकानां पापरूपान्शत्रून्निहंति । तथा च ब्राह्मणं । सद्यो ह्येष जातः पाप्मानमपाहत । ऐ० आ० १. ३. ४. । इति ॥ जज्ञान इति जनेर्लिटि कानचि रूपमेतत् । रिणाति । री गतिरेषणयोः क्र्यादिः । प्वादीनां ह्रस्व इति ह्रस्वत्वं ॥ विश्वे सर्व ऊमाः । अवंति रक्षंतीत्यूमाः प्राणिनः ॥ अवतेरौणादिको मन्प्रत्ययः । ज्वरत्वरेत्यादिना वकारोपधयोः स्थान ऊट् ॥ सर्वे प्राणिनो यं सूर्यात्मकमुद्यंतमिंद्रमनुलक्ष्य मदर्थमुदगान्मदर्थमुदगादिति मदंति हृष्यंति ॥ मदी हर्षे । व्यत्ययेन शप् ॥ तथा च ब्राह्मणं । भूतानि वै विश्व ऊमास्त एनमनुमदंत्युदगादुदगादिति । ऐ० आ० १. ३. ४. । इति । तैत्तिरीयकं च । तस्मात्सर्व एव मन्यंते मां प्रत्युदगादितीति । यद्वा । यं स्तुत्यादिभिर्मार्गंतमनु पश्चात्सर्वे प्राणिनोऽभीष्टप्राप्त्या हृष्यंति ॥ अनुर्लक्षणे । पा० १. ४. ८४. । इत्यनोः कर्मप्रवचनीयत्वात्कर्मप्रवचनीययुक्त इति द्वितीया ॥ स इंद्रो जज्ञ इत्यन्वयः ॥

वावृधानः शवसा भूर्योजाः शत्रुर्दासाय भियसं दधाति ।
अव्यनच्च व्यनच्च सस्नि सं ते नवंत प्रभृता मदेषु ॥२॥
ववृधानः । शवसा । भूरिऽओजाः । शत्रुः । दासाय । भियसं । दधाति ।
अविऽअनत् । च । विऽअनत् । च । सस्नि । सं । ते । नवंत । प्रऽभृता । मदेषु ॥२॥

शवसा बलेन ववृधानो वर्धमानः अत एव भूर्योजा बह्वबलः शत्रुः शातयितेंद्रो दासायोपक्षयकारिणे शत्रवे भियसं भीतिं दधाति । विदधाति । करोति । अव्यनत् । विविधमनिति श्वसितीति व्यनत् प्राणवज्जंगमं । तद्विलक्षणमव्यनत् स्थावरं । तदुभयमपि सस्नि संस्नातमिंद्रेण सम्यक्शोधितं भवति ॥ स्नातेरादृगमहन इति व्यत्ययेन कर्मणि किन्प्रत्ययः ॥ यद्वा ॥ श्नंतर्णीतण्यर्थात्कर्तर्येव किन् ॥ वृध्यादिना सम्यक् स्नापयिता शोधयिता भवति ॥ न लोकाव्ययेति कर्मणि षष्ठ्याः प्रतिषेधः ॥ शिष्टः पादः प्रत्यक्षकृतः । हे इंद्र ते तव मदेषु हर्षेषु हविषा स्तुत्या च जातेषु सत्सु प्रभृता प्रभृतानि प्रकर्षेण धृतानि पोषितानि वा सर्वाणि भूतजातानि सं नवंत । संगच्छंते । स्तोतुं हवींषि च दातुं समूहीभवंतीत्यर्थः । नवतिर्गतिकर्मा ॥ प्रभृता । बिभर्तेः कर्मणि निष्ठा । शेश्छंदसि बहुलमिति शेर्लोपः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं ॥

त्वे क्रतुमपि वृंजंति विश्वे द्विर्यदेते त्रिर्भवंत्यूमाः ।
स्वादोः स्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः ॥३॥
त्वे इति । क्रतुं । अपि । वृंजंति । विश्वे । द्विः । यत् । एते । त्रिः । भवंति । ऊमाः ।
स्वादोः । स्वादीयः । स्वादुना । सृज । सं । अदः । सु । मधु । मधुना । अभि । योधीः ॥३॥

हे इंद्र त्वे त्वयि ॥ सुपां सुलुगिति सप्तम्येकवचनस्य शेआदेशः ॥ विश्वे सर्वे यजमानाः क्रतुमनुष्ठेयं कर्म वृंजंति । समापयंति । अपिशब्दो ब्राह्मणोक्तसर्वभूतानां सर्वमनसां समुच्चयार्थः । सर्वाणि पृथिव्यादीनि भूतानि सर्वेषां प्राणिनां मनांसि सर्वे यज्ञक्रतवश्च त्वय्ये त्वय्येव यजमानैः परिसमाप्यंत इत्यर्थः । तथा च ब्राह्मणं । त्वयीमानि सर्वाणि भूतानि सर्वाणि मनांसि सर्वे क्रतवोऽपि वृंजंतीत्येव तदाह । ऐ० आ० १. ३. ४. । इति । यद्यस्मादेत ऊमास्तर्पकाः ॥ अवतेस्तर्पणार्थादौणादिको मन्प्रत्ययः । ज्वरत्वरेत्यादिना वकारोपधयोरूट् ॥ ईदृशा यजमानाः पूर्वमेकाकिनः संतः पश्चाद्द्विर्द्विवारं स्त्रीरूपेण पुंरूपेण च जाताः संतः पुनरपत्नीक सार्धं

चिर्चिवारं जन्मभाजो भवंति । एक एवात्मा स्त्रीपुंरूपेण जायते । अर्धो वा एष आत्मनो यत्पत्नीति श्रुतेः । पुत्रोऽप्यात्मैव । आत्मा वै पुत्रनामासि । शत० १४. ९. ४. २६. । इति श्रुतेः । यत एवमेतेऽभिवृद्धा भवंति ततोऽवगम्यते त्वयैवानुष्ठितं सर्वं कर्म परिसमापयंतीति । तथा च ब्राह्मणं । द्वौ वै संतौ मिथुनौ प्रजायेते प्रजाथै । ऐ० आ० १. ३. ४. । इति । हे इंद्र त्वं स्वादोः प्रियाबृहधनादेरपि स्वादीयः स्वादुतरं प्रियतरमपत्यं स्वादुना स्वादुभूतेन मिथुनेन मातापित्रात्मकेन सं सृज । संयोजय । यद्वा । स्वादुना भावेनोत्पन्नं तदपत्यमपि संयोजय । एतदेवाह । अदस्तदपत्यं मधु मधुरं मधुना मद्हेतुना मिथुनांतरेण पौत्रेण वा सु सुष्ठभि योधीः । अभियोधय । अभितः क्रीडय ॥ धातूनामनेकार्थत्वाद्युध्यतिरत्र क्रीडार्थे वर्तते ॥ मिथुनं वै स्वादु प्रजा स्वादु । ऐ० आ० १. ३. ४. । इत्यादि ब्राह्मणमत्रानुसंधेयं ॥

इति चिद्धि त्वा धना जयंतं मदेमदे अनुमदंति विप्राः ।
ओजीयो धृष्णो स्थिरमा तनुष्व मा त्वा दभन्यातुधाना दुरेवाः ॥४॥
इति । चित् । हि । त्वा । धना । जयंतं । मदेऽमदे । अनुऽमदंति । विप्राः ।
ओजीयः । धृष्णो इति । स्थिरं । आ । तनुष्व । मा । त्वा । दभन् । यातुऽधानाः । दुःऽएवाः ॥४॥

इति चित्त्वेवमेव खलु हे इंद्र मदे मदे सोमपानजन्ये हर्षे सति धना शत्रुधनानि जयंतं जयेन प्राप्नुवंतं त्वामनु पश्चात् ॥ लक्षणेऽनोः कर्मप्रवचनीयत्वं ॥ विप्रा मेधाविनः स्तोतारो मदंति हृष्यंति यद्वा त्वामनुमदंति अनुक्रमेण स्तुवंति । मदतिः स्तुतिकर्मा ॥ हि चेति निघातप्रतिषेधः ॥ हे धृष्णो शत्रूणां धर्षयितरिंद्र ॥ वसिगृधिधृषिक्षिपेः क्नुः ॥ ओजीयः ॥ ओजस्विशब्दादीयसुनि विन्मतोर्लुगिति विनो लुक् । टेरिति टिलोपः ॥ बलवत्तरं अत एव स्थिरं दृढं धनमा तनुष्व । अभितोऽस्मदर्थं विस्तारय । त्वा त्वां च मा दभन् मा हिंसंतु दुरेवा दुर्गतयो यातुधाना राक्षसाः ॥

त्वया वयं शाशद्महे रणेषु प्रपश्यंतो युधेन्यानि भूरि ।
चोदयामि ते आयुधा वचोभिः सं ते शिशामि ब्रह्मणा वयांसि ॥५॥
त्वया । वयं । शाशद्महे । रणेषु । प्रऽपश्यंतः । युधेन्यानि । भूरि ।
चोदयामि । ते । आयुधा । वचःऽभिः । सं । ते । शिशामि । ब्रह्मणा । वयांसि ॥५॥

हे इंद्र त्वयानुगृहीता वयं रणेषु संग्रामेषु शाशद्महे । भृशं शत्रून्शातयामः ॥ शदॄ शातने । अस्मायामंतानन्महिङ्स्कंदस्वुभयधेत्यार्धधातुकत्वादतोलोपयलोपौ ॥ किं कुर्वंतः । युधेन्यानि योधनार्हाणि ॥ छत्यर्थे तवैकेन्केन्यत्वन इति युधेरर्हार्थे केन्यप्रत्ययः ॥ भूरि बहूनि बहुलानि ॥ सुपां सुलुगिति शसो लुक् ॥ प्रपश्यंतः प्रकर्षेण जानंतः । अपि च ते तवायुधायुधान्यायोधनसाधनानि वज्रादीनि ॥ शेश्छंदसि बहुलमिति शेर्लोपः ॥ वचोभिः स्तुतिभिश्चोदयामि । शत्रून्प्रति प्रेरयामि । ते त्वदर्थं ब्रह्मणा मंत्रेण स्तुतिरूपेण सहितानि वयांसि । अन्ननामैतत् । हविर्लक्षणान्यन्नानि सं शिशामि । सम्यग्भिनश्मि । संस्करोमीत्यर्थः ॥ शो तनूकरणे । छांदसो विकरणस्य लुः । बहुलं छंदसीत्यभ्यासस्येत्वं ॥ ॥१॥

स्तुषेयं पुरुवर्पसमृभ्वमिनतममाश्रमाश्वानां ।
आ दर्षते शवसा सप्त दानून्प्र साक्षते प्रतिमानानि भूरि ॥६॥
स्तुषेयं । पुरुऽवर्पसं । ऋभ्वं । इनऽतमं । आश्रं । आश्वानां ।
आ । दर्षते । शवसा । सप्त । दानून् । प्र । साक्षते । प्रतिऽमानानि । भूरि ॥६॥

सुषेव्यं स्तोतव्यं ॥ सुवः क्षेव्यश्छंदसि । उ० ३. ९९. । इत्यौणादिकः क्षेव्यप्रत्ययः ॥ पुरुवर्पसं बहुरूपमृभ्वमुरु भासमानमुरुभूतं वेनतममतिशयेनेश्वरमाप्त्यानामाप्नव्यानां मध्य आप्यमाप्नव्यं एवंभूतमिंद्रं स्तौमीति शेषः । य इंद्रः शवसा बलेन सप्त सप्तसंख्याकान्हानून्हानवान्वृजनमुचिकुथवादीना दर्षते आदृणाति हिनस्ति ॥ दृ विदारणे । अस्माल्लेटि व्यत्ययेनात्मनेपदं । लेटोऽडाटावित्यडागमः । सिब्बहुलमिति सिप् ॥ तथा प्रतिमानान्यसुराणां प्रतिरूपाणि भूरि भूरीणि बहून्यसुरबलानि प्र साषते य इंद्रः प्रसहते । यद्वा । बहूनि प्रतिमानान्यसुराणां स्थानानि प्र साषते प्राप्नोति । साषतिराप्नोतिकर्मेति यास्कः । नि० ११. २१. ॥ षह अभिभवे । लेव्यडागमः । सिब्बहुलमिति सिप् । टित्वकित्वषत्वानि । छांदसो दीर्घः ॥

नि तद्दधिषेऽवरं परं च यस्मिन्नाविथावसा दुरोणे ।
आ मातरा स्थापयसे जिगत्नू अत इनोषि कर्वरा पुरूणि ॥ ७ ॥
नि । तत् । दधिषे । अवरं । परं । च । यस्मिन् । आविथ । अवसा । दुरोणे ।
आ । मातरा । स्थापयसे । जिगत्नू इति । अतः । इनोषि । कर्वरा । पुरूणि ॥ ७ ॥

तत्तस्मिन्यजमानस्य गृहेऽवरमल्पं भौमं धनं परमुत्कृष्टं दिवि भवं धनं च हे इंद्र त्वं नि दधिषे । निदधासि । निक्षिपसि । यस्मिन्दुरोणे गृहेऽवसा । अन्ननामैतत् । तर्पकेणान्नेन हविर्लक्षणेनाविथ अवसि तृप्यसि ॥ अवतेस्तृप्त्यर्थाच्छंदसि लुङ्लङ्लिट इति सार्वकालिको लिट् । अत आदेरित्यभ्यासस्यात्वं । यदृत्तान्नित्यमिति निघातप्रतिषेधः ॥ अपि च मातरा सकलस्य भूतजातस्य निर्मात्र्यौ द्यावापृथिव्यौ जिगत्नू गमनशीले इतस्ततः प्रचलत्यावा स्थापयसे । स्वकीये स्थानेऽवस्थापयसि । नैश्चल्येन यथावतिष्ठेते तथा करोषीत्यर्थः । विष्वक्प्रस्तंभ पृथिवीमुत द्यामिति निगमांतरं । ऋ० १०. ८९. ४. । हे इंद्र अतः कारणात्पुरूणि बहूनि कर्वरा । कर्मनामैतत् । कर्वराणि ॥ शेश्छंदसि बहुलमिति शेर्लोपः ॥ कर्माणि लौकिकानि वैदिकानि चेनोषि । प्राप्नोषि ॥ इण् गतौ । व्यत्ययेन भुः ॥

इमा ब्रह्म बृहद्दिवो विवक्तींद्राय शूषमंगियः स्वर्षाः ।
महो गोत्रस्य क्षयति स्वराजो दुरश्च विश्वा अवृणोदप स्वाः ॥ ८ ॥
इमा । ब्रह्म । बृहत्ऽदिवः । विवक्ति । इंद्राय । शूषं । अंगियः । स्वःऽसाः ।
महः । गोत्रस्य । क्षयति । स्वऽराजः । दुरः । च । विश्वाः । अवृणोत् । अप । स्वाः ॥ ८ ॥

बृहद्दिव ऋषिरिमेमानि ब्रह्म ब्रह्माणींद्राय शूषं सुखं यथा भवति तथा विवक्ति । प्रब्रवीतीत्यात्मन एव परोक्षनिर्देशः ॥ वच परिभाषणे आदादिकः । छांदसः शपः लुः । बहुलं छंदसीत्यभ्यासस्येत्वं ॥ ऋषिर्विशेष्यते । अंगियोऽग्नेर्भवः । ऋषीणां प्रमुखः श्रेष्ठ इत्यर्थः ॥ घच्छौ च । पा० ४. ४. ११७. । इत्यंगशब्दाच्छ्वार्थे घच् ॥ स्वर्षाः स्वर्गस्य संभक्ता । यद्वा । स्वरादित्य इंद्रः । असौ वा आदित्य इंद्र इति श्रुत्यंतरात् । तस्य संभक्ता सेवक इत्यर्थः ॥ वन घण संभक्तौ । जनसनखनक्रमगमो विट् । विड्वनोरनुनासिकस्यादित्यात्वं । सनोतेरन इति षत्वं ॥ य इंद्रो महो महतो गोत्रस्य पर्वतस्य बलेनासुरेण गवां पिधानार्थं निहितस्य स्वराजः स्वयमेव राजमानस्य ॥ क्रियायाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी ॥ ईदृशं पर्वतं क्षयति अपगमयति ॥ क्षि क्षये भौवादिकः ॥ यद्वा ॥ गोशब्दात्समूहार्थ इनिचकव्यचश्च । पा० ४. २. ५१. । इति त्रप्रत्ययः ॥ गोत्रस्य गोसमूहस्य महो महतः स्वराजः स्वयमेव राजमानस्य य इंद्रः क्षयति ईष्टे । क्षयतिरैश्वर्यकर्मा ॥ स्वशब्दोपपदाद्राजतेः सत्सूद्विषेति क्विप् । छंदुत्तरपदप्रकृतिस्वरत्वं ॥ दुरश्च बिलद्वाराणि च विश्वाः सर्वाः स्वा बलासुरस्य स्वभूता अपावृणोत् । अपगतावरणा अकरोत् । उद्घाटितवानित्यर्थः । यद्वा । दुरश्चापावृणोत् विश्वाः सर्वाः स्वाः स्वभूता गा बिलमध्ये वर्तमाना अलभतेति शेषः । एवंभूतो य इंद्रस्तस्मा इंद्राय विवक्तीत्यन्वयः ॥

एवा महान्बृहद्दिवो अथर्वावोचत्स्वां तन्वं१मिंद्रमेव ।
स्वसारो मातरिभ्वरीररिप्रा हिन्वंति च शवसा वर्धयंति च ॥९॥
एव । महान् । बृहत्ऽदिवः । अथर्वा । अवोचत् । स्वां । तन्वं । इंद्रं । एव ।
स्वसारः । मातरिभ्वरीः । अरिप्राः । हिन्वंति । च । शवसा । वर्धयंति । च ॥९॥

महान्गुणैरधिकोऽथर्वा । उपचाराज्जन्ये जनकशब्दः । अथर्वणः पुत्रो बृहद्दिवाख्य ऋषिर्देवेषु मध्य इंद्रमेव प्रति स्वामात्मीयां तन्वं विस्तृतां स्तुतिमेवमवोचत् । प्रोक्तवान् ॥ वचेर्लुङ्यस्तिवक्तीत्यादिना सिचेरङादेशः । वच उमित्युमागमः । पादादित्वान्न निहन्यते ॥ अपि चैनमेवेंद्रं मातरिभ्वरीर्मातरि सकलस्य भूतजातस्य निर्माञ्यां भूमौ भवंत्यो वर्तमानाः ॥ भवतेरन्येभ्योऽपि दृश्यंत इति वनिप् । वनो र चेति ङीब्रेफौ । जसि वा छंदसीति पूर्वसवर्णदीर्घः । पृषोदरादित्वाद्वर्णलोपः ॥ अरिप्रा अपापाः स्वसारः स्वयमेव सरंत्यः परस्परं भगिन्यो वा गंगादा नद्यो हिन्वंति । यागसाधनत्वेन प्रीणयंति ॥ हिविः प्रीणनार्थः । भौवादिकः । व्यत्ययेन शपः । इदित्त्वान्नुम । यद्वा । हि गतौ वृद्धौ च । स्वादिभ्यः श्नुः ॥ वृध्यर्थं तमिंद्रमुपगच्छंति । गत्वा च शवसा यागजन्येन बलेन तं वर्धयंति च ॥ ॥२॥

हिरण्यगर्भ इति दशर्चं नवमं सूक्तं प्रजापतिपुत्रस्य हिरण्यगर्भाख्यस्यार्षं त्रैष्टुभं । कशब्दाभिधेयः प्रजापतिर्देवता । तथा चानुक्रांतं । हिरण्यगर्भो दश हिरण्यगर्भः प्राजापत्यः कायमिति ॥ गतः सूक्तविनियोगः ॥ प्राजापत्यस्य पशोर्वपापुरोडाशग्रहविषां क्रमेणादितस्तिस्रोऽनुवाक्यास्ततस्तिस्रो याज्याः । सूचितं च । हिरण्यगर्भः समवर्ततायं इति षट् प्राजापत्याः । आ० ३. ८. । इति ॥ वरुणप्रघासेषु कायस्य हविषो हिरण्यगर्भ इत्येषा याज्या । सूचितं च । कया नश्चित्र आ भुवदिरण्यगर्भः समवर्ततायं इति प्रतिप्रस्थाता वाजिने तृतीयः । आ० २. १७. । इति ॥

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥१॥
हिरण्यऽगर्भः । सं । अवर्तत । अग्रे । भूतस्य । जातः । पतिः । एकः । आसीत् ।
सः । दाधार । पृथिवीं । द्यां । उत । इमां । कस्मै । देवाय । हविषा । विधेम ॥१॥

हिरण्मयो हिरण्मयस्यांडस्य गर्भभूतः प्रजापतिर्हिरण्यगर्भः । तथा च तैत्तिरीयकं । प्रजापतिर्वै हिरण्यगर्भः प्रजापतेरनुरूपत्वाय । तै० सं० ५. ५. १. २. । इति । यद्वा । हिरण्मयोऽंडो गर्भवद्यस्योदरे वर्तते सोऽसौ सूत्रात्मा हिरण्यगर्भ इत्युच्यते । अग्रे प्रपंचोत्पत्तेः प्राक् समवर्तत । मायाधिष्ठात्तिरूपोः परमात्मनः सकाशात्समजायत । यद्यपि परमात्मैव हिरण्यगर्भः तथापि तदुपाधिभूतानां वियदादीनां सूक्ष्मभूतानां ब्रह्मण उत्पत्तेस्तदुपाहितोऽप्युत्पन्न इत्युच्यते । स च जातो जातमात्र एवैकोऽद्वितीयः सन् भूतस्य विकारजातस्य ब्रह्मांडादेः सर्वस्य जगतः पतिरीश्वर आसीत् । न केवलं पतिरासीदेव अपि तर्हि स हिरण्यगर्भः पृथिवीं विस्तीर्णां द्यां दिवमुतापि चेमामस्माभिर्दृश्यमानां पुरोवर्तिनीमिमां भूमिं । यद्वा । पृथिवीत्यंतरिक्षनाम । अंतरिक्षं दिवं भूमिं च दाधार । धारयति ॥ छंदसि लुङ्लङ्लिट इति सार्वकालिको लिट् । तुजादिदाद्यभ्यासदीर्घः ॥ कस्मै । अत्र किंशब्दोऽनिर्ज्ञातस्वरूपत्वात्प्रजापतौ वर्तते । यद्वा । क्षय्यर्थं कामयत इति कः ॥ कमेर्डप्रत्ययः ॥ यद्वा । कं सुखं । तद्रूपत्वात्क इत्युच्यते । अथर्वेंद्रेण पृष्टः प्रजापतिर्मदीयं महत्त्वं तुभ्यं प्रदायाहं कः कीदृशः स्वामित्युक्तवान् । स इंद्रः प्रत्यूचे यदीदं ब्रवीष्यहं कः स्वामिति तदेव त्वं भवेति । अतः कारणात्क इति प्रजापतिराख्यायते । इंद्रो वै वृत्रं हत्वा सर्वा विजितीर्विजित्याब्रवीदित्यादिकं ब्राह्मणमत्रानुसंधेयं । ऐ० ब्रा० ३. २१. ॥ यदासौ किंशब्दस्तदा सर्वनामत्वात्सीभावः सिद्धः । यदा तु यौगिकस्तदा व्यत्ययेनेति द्रष्टव्यं । सावेकाच इति प्राप्तस्य न गोश्वन्स्तावर्वेति प्रतिषेधः । क्रियायाहणं कर्तव्यमिति कर्मणः संप्रदान-

त्वाच्चतुर्थी ॥ कं प्रजापतिं देवाय देवं दानादिगुणयुक्तं हविषा प्राजापत्यस्य पशोर्वपारूपेणैकपात्कात्मकेन पुरोडाशेन वा विधेम । वयमृत्विजः परिचरेम । विधतिः परिचरणकर्मा ॥

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्यच्छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥२॥

यः । आत्मऽदाः । बलऽदाः । यस्य । विश्वे । उपऽआसते । प्रऽशिषं । यस्य । देवाः ।
यस्य । छाया । अमृतं । यस्य । मृत्युः । कस्मै । देवाय । हविषा । विधेम ॥२॥

यः प्रजापतिरात्मदा आत्मनां दाता । आत्मानो हि सर्वे तस्मात्परमात्मन उत्पद्यंते । यथापेः सकाशाद्विस्फुलिंगा जायंते तद्वत् । यद्वा । आत्मनां शोधयिता ॥ दैप् शोधने । आतो मनिन्निति विच् ॥ बलदा बलस्य च दाता शोधयिता वा । यस्य च प्रशिषं प्रकृष्टं शासनमाज्ञां विश्वे सर्वे प्राणिन उपासते प्रार्थयंते सेवंते वा ॥ शासु अनुशिष्टौ । शास इत् । पा० ६. ४. ३४. । इत्युपधाया इत्वं । शासिवसिघसीनां चेति षत्वं । क्रादुत्तरपदप्रकृतिस्वरत्वं । आसेरनुदात्तेत्त्वाच्चसार्वधातुकानुदात्तत्वे धातुस्वरः । तिङि चोदात्तवतीति गतिरनुदात्ता ॥ तथा देवा अपि यस्य प्रशासनमुपासते । अपि चामृतममृतत्वं । भावप्रधानो निर्देशः । यद्वा । अमृतं । मरणं नास्त्यस्मिन्नित्यमृतं सुधा ॥ बहुव्रीहौ नञो जरमरमित्यमृता इत्युत्तरपदाद्युदात्तत्वं ॥ तदपि यस्य प्रजापतेश्छाया छायेव वर्तते भवति । मृत्युर्यमश्च प्राणापहारी छायेव भवति । तस्मै कस्मै देवायेत्यादि समानं पूर्वेण हविषा पुरोडाशात्मनेति तु विशेषः ॥

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥३॥

यः । प्राणतः । निऽमिषतः । महिऽत्वा । एकः । इत् । राजा । जगतः । बभूव ।
यः । ईशे । अस्य । द्विऽपदः । चतुःऽपदः । कस्मै । देवाय । हविषा । विधेम ॥३॥

यो हिरण्यगर्भः प्राणतः प्रश्वसतः ॥ अन प्राणने आदादिकः । शतुरनुम इति विभक्तेरुदात्तत्वं ॥ निमिषतोऽपिपक्ष्मचलनं कुर्वतः ॥ अचापि पूर्ववद्विभक्तेरुदात्तता ॥ जगतो जंगमस्य प्राणिजातस्य महित्वा महत्त्वेन ॥ सुपां सुलुगिति तृतीयाया आकारः ॥ माहात्म्येनैक इद्द्वितीय एव सन्राजा बभूव ईश्वरो भवति ॥ भवतेर्णलि लितीति प्रत्ययात्पूर्वस्योदात्तत्वं ॥ अस्य परिदृश्यमानस्य द्विपदो पादद्वययुक्तस्य मनुष्यादेश्चतुष्पदो गवाश्वादेश्च यः प्रजापतिरीशे ईष्टे ॥ ईश ऐश्वर्ये आदादिकोऽनुदात्तेत् । लोपस्त आत्मनेपदेष्विति तलोपः । अनुदात्तेत्त्वाच्चसार्वधातुकानुदात्तत्वे धातुस्वरः । अस्य । ऊडिदमितीदमो विभक्तेरुदात्तता । द्वौ पादौ यस्य स द्विपात् । संख्यासुपूर्वस्येति पादशब्दस्यात्यलोपः समासांतः । भसंज्ञायां पादः पदिति पद्भावः । द्वित्रिभ्यां पाद्दन्नित्येकादेशविकल्पतस्थानन्यत्वादुत्तरपदांतोदात्तत्वं । स्वरवर्जमेवेव चतुष्पद इत्यत्रापि प्रक्रिया । बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वरः । पूर्वपदं न्रः संख्यायाः । फिं० २. ५. । इत्यायुदात्तत्वं । इदुदुपधस्य चाप्रत्ययस्येति विसर्जनीयस्य षत्वं ॥ ईदृशो यः प्रजापतिस्तस्मै कस्मा इत्यादि सुबोधं हविषा हृदयाद्यात्मनेत्ययमत्र विशेषः ॥

यस्येमे हिमवंतो महित्वा यस्य समुद्रं रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥४॥

यस्य । इमे । हिमऽवंतः । महिऽत्वा । यस्य । समुद्रं । रसया । सह । आहुः ।
यस्य । इमाः । प्रऽदिशः । यस्य । बाहू इति । कस्मै । देवाय । हविषा । विधेम ॥४॥

हिमा अस्मिन्संतीति हिमवान् । तेन बहुवचनांतेन सर्वे पर्वता लक्ष्यंते । यथा छत्रिणो गच्छंतीति । हिमवंतो हिमवदुपलक्षिता इमे दृश्यमानाः सर्वे पर्वता यस्य प्रजापतेर्महिम्ना महत्त्वं माहात्म्यमैश्वर्यमित्याहुः । तेन रुष्टत्वात्तद्रूपेणावस्थानाद्वा । तथा रसया । रसो जलं । तद्वती रसा नदी ॥ अर्शआदित्वादच् ॥ जाताबेकवचनं । रसाभिर्नदीभिः सह समुद्रं । पूर्ववदेकवचनं । सर्वान्समुद्रान्यस्य महाभाग्यमित्याहुः कथयंति स्तुत्यभिज्ञाः । यस्य चेमाः प्रदिशः प्राच्यारंभा आग्नेय्यादयः कोणदिश ईशानांता वा । तथा बाहू । वचनव्यत्ययः । बाहवो भुजाः । भुजवत्प्राधान्ययुक्ताः प्रदिशश्च यस्य स्वभूताः । तस्मै कस्मा इत्यादि समानं पूर्वेण ॥

येन द्यौरुग्रा पृथिवी च दृळ्हा येन स्वः स्तभितं येन नाकः ।
यो अंतरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥५॥
येन । द्यौः । उग्रा । पृथिवी । च । दृळ्हा । येन । स्वरिति स्वः । स्तभितं । येन । नाकः ।
यः । अंतरिक्षे । रजसः । विऽमानः । कस्मै । देवाय । हविषा । विधेम ॥५॥

येन प्रजापतिना द्यौरंतरिक्षमुर्वोर्वृणं विशेषागहनरूपं वा । पृथिवी भूमिश्च दृळ्हा येन स्थिरीकृता । स्वः स्वर्गश्च येन स्तभितं स्तब्धं कृतं । यथाधो न पतति तथोपर्यवस्थापितमित्यर्थः ॥ ग्रसितस्कभितस्तभितेति निपात्यते ॥ तथा नाक आदित्यश्च येनांतरिक्षे स्तभितः । यश्चांतरिक्षे रजस उदकस्य विमानो निर्माता । तस्मै कस्मा इत्यादि गतं ॥ ॥३॥

यं क्रंदसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने ।
यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम ॥६॥
यं । क्रंदसी इति । अवसा । तस्तभाने इति । अभि । ऐक्षेतां । मनसा । रेजमाने इति ।
यत्र । अधि । सूरः । उत्ऽइतः । विऽभाति । कस्मै । देवाय । हविषा । विधेम ॥६॥

क्रंदितवान्रोदितवाननयोः प्रजापतिरिति क्रंदसी द्यावापृथिव्यौ । श्रूयते हि । यदरोदीत्तदनयो रोदस्त्वं । तै० ब्रा० २. २. ९. ४. । इति । ते अवसा रक्षणेन हेतुना लोकस्य रक्षणार्थं तस्तभाने प्रजापतिना सृष्टे लब्धस्थैर्ये सत्यौ यं प्रजापतिं मनसा बुद्ध्यर्थमैक्षेतां आवयोर्महत्त्वमनेनेत्यभ्यपश्येतां ॥ ईक्ष दर्शने । लङ्यडादित्वादाद्युदात्तत्वं ॥ कीदृश्यौ द्यावापृथिव्यौ । रेजमाने राजमाने दीप्यमाने ॥ आकारस्य व्यत्ययेनैत्वं । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । यद्वा । लिटः कानच् । फणां च सप्तानां । पा० ६. ४. १२५. । इत्येत्वाभ्यासलोपौ । छंदस्युभयथेति सार्वधातुकत्वाच्छप् । अभ्यस्तानामादिरित्याद्युदात्तत्वं ॥ यत्राधि यस्मिन्नाधारभूते प्रजापतौ सूरः सूर्य उदित उदयं प्राप्तः सन् विभाति प्रकाशते ॥ उत्पूर्वादेतेः कर्मणि निष्ठा । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं ॥ तस्मै कस्मा इत्यादि सुज्ञानं ॥

आपो ह यद्बृहतीर्विश्वमायन्गर्भं दधाना जनयंतीरग्निं ।
ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेम ॥७॥
आपः । ह । यत् । बृहतीः । विश्वं । आयन् । गर्भं । दधानाः । जनयंतीः । अग्निं ।
ततः । देवानां । सं । अवर्तत । असुः । एकः । कस्मै । देवाय । हविषा । विधेम ॥७॥

बृहतीर्बृहत्यो महत्यः ॥ जसि वा छंदसीति पूर्वसवर्णदीर्घः । बृहन्महतोरुपसंख्यानमिति ङीप उदात्तत्वं ॥ अग्निं । उपलक्षणमेतत् । अग्न्युपलक्षितं सर्वं वियदादिभूतजातं जनयंतीर्जनयंत्यः तदर्थं गर्भं हिरण्मयांडस्थं गर्भभूतं प्रजापतिं दधाना धारयंत्य आपो ह अप एव विश्वमायन् सर्वं जगद्व्याप्नुवन् यद्यस्मात् ततस्तस्मात्तेनोर्दे-

वानां देवादीनां सर्वेषां प्राणिनामसुः प्राणभूत एकः प्रजापतिः समवर्तत । समजायत । यद्वा । यत्यं गर्भं दधाना आपो विश्वात्मनावस्थिताः ततो गर्भभूतात्प्रजापतेर्देवादीनां प्राणात्मको वायुरजायत । अथवा । यत् ॥ लिंगवचनयोर्व्यत्ययः ॥ उक्तलक्षणा या आपो विश्वमावृत्य स्थिताः ततस्ताभ्योऽग्रः सकाशादेको ऽद्वितीयोऽसुः प्राणात्मकः प्रजापतिः समवर्तत । निरक्राम । तस्मै कस्मा इत्यादि गतं ॥

यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयंतीर्यज्ञं ।
यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेम ॥८॥
यः । चित् । आपः । महिना । परि ऽअपश्यत् । दक्षं । दधानाः । जनयंतीः । यज्ञं ।
यः । देवेषु । अधि । देवः । एकः । आसीत् । कस्मै । देवाय । हविषा । विधेम ॥८॥

यज्ञं यज्ञोपलक्षितं विकारजातं जनयंतीरुत्पादयंतीः तदर्थं दक्षं प्रपंचात्मना वर्धिष्णुं प्रजापतिमात्मनि दधाना धारयित्रीः ॥ दधातेर्हेतौ शानच् । अभ्यस्तानामादिरित्याद्युदात्तत्वं ॥ ईदृशीरापः । व्यत्ययेन प्रथमा । अपः प्रलयकालीना महिना महिम्ना ॥ छांदसो मलोपः ॥ स्वमाहात्म्येन यश्च प्रजापतिः पर्यपश्यत् परितो दृष्टवान् यश्च देवेष्वधि देवेषु मध्ये देवस्तेषामपीश्वरः सन्नेकोऽद्वितीय आसीत् भवति ॥ अस्तेश्छांदसो लङ् । अस्तिसिचोऽपृक्ते । पा० ७. ३. ९६. । इतीडागमः ॥ तस्मै कस्मा इत्यादि गतं ॥

मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान ।
यश्चापश्चंद्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम ॥९॥
मा । नः । हिंसीत् । जनिता । यः । पृथिव्याः । यः । वा । दिवं । सत्यऽधर्मा । जजान ।
यः । च । अपः । चंद्राः । बृहतीः । जजान । कस्मै । देवाय । हविषा । विधेम ॥९॥

स प्रजापतिर्नोऽस्मान्मा हिंसीत् । मा बाधतां । यः पृथिव्या भूमेर्जनिता जनयिता स्रष्टा ॥ जनिता मंत्र इति णिलोपो निपात्यते । उदात्तयणो हल्पूर्वादिति पृथिवीशब्दाद्विभक्तेरुदात्तत्वं ॥ यो वा यश्च सत्यधर्मा सत्यमवितथं धर्मं जगतो धारणं यस्य स तादृशः प्रजापतिर्दिवमंतरिक्षोपलक्षितान्सर्वाँल्लोकाञ्जजान जनयामास ॥ जनी प्रादुर्भावे । णिचि वृद्धौ जनीजृष्क्नसुरंजः । धा० १९. ६३–६७. । इति मित्त्वान्मितां ह्रस्व इति ह्रस्वत्वं । ततो लित्यमंत्रे । पा० ३. १. ३५. । इति निषेधादाम्प्रत्ययाभावे तिपो णलि वृद्धौ लितीति प्रत्ययात्पूर्वस्योदात्तत्वं ॥ यश्च बृहतीर्महतीश्चंद्रा आह्लादिनीरप उदकानि जजान जनयामास ॥ ऊडिदमित्यादिनाप्शब्दादुत्तरस्य शस उदात्तत्वं ॥ तस्मै कस्मा इत्यादि गतं ॥

इळादध्याज्य इध्मयजने प्राजापत्यस्य हविषः प्रजापत इत्येषानुवाक्या । सूचितं च । प्राजापत्य इळादधः प्रजापते न त्वदेतान्यन्यः । आ० २. १४. । इति ॥ केशनखकीटादिभिर्दुष्टानि हवींष्यनयैवाप्सु प्रक्षिपेत् । सूचितं च । अपोऽभ्यवहरेयुः प्रजापते न त्वदेतान्यन्यः । आ० ३. १०. । इति ॥ चौलादिकर्मस्वपीषा होमार्था । सूचितं च । तेषां पुरस्ताच्चतस्र आज्याहुतीर्जुहुयादप आयूंषि पवस इति तिसृभिः प्रजापते न त्वदेतान्यन्य इति च । आ० गृ० १. ४. ४. । इति ॥

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां ॥१०॥
प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां ॥१०॥

हे प्रजापते त्वत् त्वत्तोऽन्यः कश्चिदेतानीदानीं वर्तमानानि विश्वा विश्वानि सर्वाणि ॥ ग्रेरश्छंदसि बहुलमिति ग्रेर्लोपः ॥ जातानि प्रथमविकारभांजि ता तानि सर्वाणि भूतजातानि न परि बभूव । न परिगृह्णाति । न व्याप्नोति । त्वमेवैतानि परिगृह्य स्वर्तुं शक्नोषीति भावः । परिपूर्वो भवतिः परियहार्थः । वयं च यत्कामा यत्फलं कामयमानास्ते तुभ्यं जुह्वमः हवींषि प्रयच्छामः तत्फलं नोऽस्माकमस्तु । भवतु । तथा वयं च रयीणां धनानां पतय ईश्वराः स्याम । भवेम ॥ नामन्यतरस्यामिति नाम उदात्तत्वं ॥ ॥४॥

वसुं नेत्यष्टर्चं दशमं सूक्तं वसिष्ठपुत्रस्य चित्रमहस आर्षमाग्नेयं । आद्यापंचमी त्रिष्टुभौ शिष्टा जगत्यः । तथा चानुक्रांतं । वसुं नाष्टौ चित्रमहा वासिष्ठ आग्नेयं आगतमाद्यां पंचमीं चर्त इति ॥ प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ आगते छंदसोदं सूक्तं । सूचितं च । वसुं न चित्रमहसमिति आगतं । आ० ४. १३. । इति ॥

वसुं॑ न चि॒त्रमहसं॑ गृणीषे॒ वाम॑ शेव॒मति॑थिमद्वि॒षेण्यं॑ ।
स रा॑सते॒ शुरु॑धो॒ विश्व॑धायसो॒ऽग्निर्होता॑ गृ॒हप॑तिः सु॒वीर्यं॑ ॥१॥
वसुं॑ । न । चि॒त्रऽमहसं॑ । गृ॒णी॒षे॒ । वाम॑ । शे॒व॒म् । अति॑थिम् । अ॒द्वि॒षेण्यं॑ ।
सः । रा॒स॒ते॒ । शुरु॑धः । विश्व॑ऽधायसः । अ॒ग्निः । होता॑ । गृ॒हऽप॑तिः । सु॒ऽवीर्यं॑ ॥१॥

वसुं न वासकं सूर्यमिव चित्रमहसं चायनीयतेजस्कमग्निं गृणीषे । गृणे । स्तौमि ॥ गृ शब्दे क्र्यादिकः । पुरुषव्यत्ययः । प्वादिखाद्धस्वः ॥ यद्वा । चित्रमहसमिति प्रथमार्थे द्वितीया । नेति संप्रत्यर्थे । संप्रति वासकमग्निमहं चित्रमहाः स्तौमि । कीदृशं । वामं वननीयं शेवं सुखकरमतिथिमतिथिवत्पूज्यं यद्वा हविर्वहनाय सततगामिनं अद्विषेण्यं द्वेष्यरहितं ॥ द्विषेः क्तात्यर्थे तवैकेनिति केन्यप्रत्ययः । नञा बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं ॥ सोऽग्निः शुरुधः शोकस्य रोधयित्रीर्निवारयित्रीर्विश्वधायसः वीरप्रदानादिना विश्वं सर्वं जगद्धारयंतोर्गाः सुवीर्यं शोभनवीर्यं च रासते । यजमानेभ्यो ददाति ॥ रा दाने । अस्माल्लेट् । लेट्यडागमः । सिब्बहुलमिति सिप् । व्यत्ययेनात्मनेपदं । विश्वशब्दोपपदाद्धाधातोर्वहिहाधाभ्य इत्यसुन् । णिदित्यनुवृत्तेरातो युक्चिण्कृतोरिति युक् । मरुत्वृधादित्वात्पूर्वपदांतोदात्तत्वं ॥ कीदृशोऽग्निः । होता देवानामाह्वाता होमनिष्पादको वा गृहपतिर्यजमानगृहाणामीश्वरः ॥ गेहे कः । पा० ३. १. १४४. । इति गेहेः कप्रत्ययः । यहिज्येत्यादिना संप्रसारणं । पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरत्वं । शोभनं वीर्यं यस्येति बहुव्रीहौ वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं ॥

जु॒षा॒णो अ॑ग्ने॒ प्रति॑ हर्य मे॒ वचो॒ विश्वा॑नि विद्वान्व॒युना॑नि सु॒क्रतो॑ ।
घृ॒तनि॑र्णि॒ग्ब्रह्म॑णे गातु॒मेर॑य॒ तव॑ दे॒वा अ॑जनयन्न॒नु व्र॒तं ॥२॥
जु॒षा॒णः । अ॒ग्ने॒ । प्रति॑ । ह॒र्य॒ । मे॒ । वचः॑ । विश्वा॑नि । वि॒द्वान् । व॒युना॑नि । सु॒क्रतो॒ इति॑ सु॒ऽक्रतो॑ ।
घृ॒तऽनि॑र्णिक् । ब्रह्म॑णे । गा॒तु॒म् । आ । ई॒र॒य॒ । तव॑ । दे॒वाः । अ॒ज॒न॒य॒न् । अ॒नु॒ । व्र॒तं ॥२॥

हे अग्ने जुषाणः प्रीयमाणस्त्वं मे मम वचो वचनं स्तोत्रं प्रति हर्य । कामयस्व ॥ हर्य गतिकांत्योः ॥ तथा हे सुक्रतो शोभनकर्मन् शोभनप्रज्ञ वा त्वं विश्वानि सर्वाणि वयुनानि । ज्ञानमेतत् इह ज्ञातव्ये वर्तते । ज्ञातव्यान्यर्थजातानि विद्वाञ्जानन्वर्तसे ॥ हेतौ शतृप्रत्ययः ॥ यतो जानासि ततो हेतोर्मद्वचनं कामयस्वेत्यर्थः । हे घृतनिर्णिग्घृतेनाज्येन निर्णिज्यमान पुष्यमाणशरीर ॥ णिजिर् शौचपोषणयोः ॥ यद्वा । निर्णिगिति रूपनाम । दीप्तरूपाग्ने ब्रह्मणे ब्राह्मणाय यजमानाय गातुं गातव्यं ज्ञातव्यं वा यज्ञमेरय । आगमय । तव व्रतं त्वदीयं यज्ञकर्मानु पश्चाद्देवा इंद्रादयः सर्वेऽजनयन् । यजमानाय फलानि जनयंति । अतस्त्वदीयं यज्ञं यजमानाय प्रापयेत्यर्थः ॥ लचणोऽनोः कर्मप्रवचनीययुक्त इति द्वितीया । अनेर्ख्यताच्छांदसो खय् । अनीशृष्कासुरंजोऽमंताश्चेति मित्त्वाश्चितां ह्रस्व इति ह्रस्वत्वं ॥

सप्त धामानि परियन्नमर्त्यो दाशद्दाशुषे सुकृते मामहस्व ।
सुवीरेण रयिणाग्ने स्वाभुवा यस्त आनट् समिधा तं जुषस्व ॥३॥
सप्त । धामानि । परिऽयन् । अमर्त्यः । दाशत् । दाशुषे । सुऽकृते । ममहस्व ।
सुऽवीरेण । रयिणा । अग्ने । सुऽआभुवा । यः । ते । आनट् । सं ऽइधा । तं । जुषस्व ॥३॥

हे अग्ने सप्त सप्तसंख्याकानि धामानि स्थानानि पृथिव्यादिलोकात्मकानि परियन् परितो गच्छन्नमर्त्यो मरणधर्मरहितस्त्वं यो यजमानः पुरोडाशादीनि हवींषि दाशत् प्रयच्छति तस्मै दाशुषे दत्तवते सुकृते सुष्ठु यागं कृतवते मामहस्व । अपेक्षितं धनं ददस्व । महतिर्दानकर्मा ॥ सुकर्मपापेत्यादिना सुपूर्वात्कृञो भूते काले क्विप् ॥ यस्त्वं यजमानः समिधा समिंधनसाधनेनेध्मेन हे अग्ने ते त्वामानट् प्राप्नोति ॥ नशतिर्गतिकर्मा । अन्नाच्छांदसो वलच् । बहुलं छंदसीति शपो लुक् । छंदस्यपि दृश्यत इत्याडागमः । अश्नोतेर्वा व्यत्ययेन शम् ॥ तं यजमानं सुवीरेण । शोभनवीराः पुत्रा यस्य ॥ वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं ॥ तादृशेन त्वाभुवा सुष्ठु समंताद्भूष्णुना वर्धिष्णुना रयिणा धनेन दातव्येन सार्धं जुषस्व ॥

यज्ञस्य केतुं प्रथमं पुरोहितं हविष्मंत ईळते सप्त वाजिनं ।
शृण्वंतमग्निं घृतपृष्ठमुक्षणं पृणंतं देवं पृणते सुवीर्यं ॥४॥
यज्ञस्य । केतुं । प्रथमं । पुरःऽहितं । हविष्मंतः । ईळते । सप्त । वाजिनं ।
शृण्वंतं । अग्निं । घृतऽपृष्ठं । उक्षणं । पृणंतं । देवं । पृणते । सुऽवीर्यं ॥४॥

यज्ञस्य यागस्य केतुं प्रज्ञापकं प्रथमं सर्वेषु देवेषु मुख्यं प्रथमस्थानं वा पुरोहितं पुरतो हितकारिणं । यद्वा । पुरस्तात्पूर्वस्यां दिशाहवनीयरूपेण निहितं ॥ पूर्वाधरेत्यादिना पूर्वशब्दादसिः प्रत्ययः । तत्संनियोगेन प्रकृतेः पुरादेशश्च । तद्धितश्चासर्वविभक्तिरित्यव्ययसंज्ञायां पुरोऽव्ययमिति गतिसंज्ञा । धात्वः कर्मणि निष्ठा । दधातेर्हिः । ततः समासे गतिरनंतर इति गतेः प्रकृतिस्वरत्वं ॥ वाजिनं बलवंतमन्नवंतं वा शृण्वंतमस्मत्स्तुतीः श्रोत्रेण आगंतं घृतपृष्ठं दीप्तपृष्ठं दीप्तांगमुक्षणं यागवृद्धिरेण वृष्टेः संभर्तारं यद्वा सेचनसमर्थं युवानं पृणते हविर्भिः प्रीणयित्रे यजमानाय ॥ पृण प्रीणने तौदादिकः । शतुरनुम इति विभक्तेरुदात्तत्वं । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी ॥ हविर्भिः प्रीणयंतं यजमानं धनैः प्रीणयंतं । यद्वा । पृणतिर्दानकर्मा । हवींषि ददते यजमानाय पृणंतं धनानि प्रयच्छंतं । सुवीर्यं शोभनवीर्योपेतं देवं द्योतमानं दानादिगुणयुक्तं वा एवंगुणविशिष्टमग्निं हविष्मंतो हविर्भिर्युक्ताः सप्त होतृप्रमुखा वषट्कर्तार ईळते । स्तुवंति ॥ ईड स्तुतौ अदादिकः ॥

त्वं दूतः प्रथमो वरेण्यः स हूयमानो अमृताय मत्स्व ।
त्वां मर्जयन्मरुतो दाशुषो गृहे त्वां स्तोमेभिर्भृगवो वि रुरुचुः ॥५॥
त्वं । दूतः । प्रथमः । वरेण्यः । सः । हूयमानः । अमृताय । मत्स्व ।
त्वां । मर्जयन् । मरुतः । दाशुषः । गृहे । त्वां । स्तोमेभिः । भृगवः । वि । रुरुचुः ॥५॥

हे अग्ने त्वं दूतो देवानां दूतकर्मणि नियुक्तः प्रथमो मुख्यः प्रथितः प्रख्यातो वा वरेण्यः संभजनीयश्चासि । स त्वममृतायामरणाय तदर्थं नोऽस्माभिर्हूयमानो हविषा तर्प्यमाणो वा सन् मत्स्व । तृप्यस्व ॥ मदी हर्षे । छांदसो विकरणस्य लुक् ॥ अपि च त्वां मध्यमस्थाने वैद्युतरूपेण वर्तमानं मरुतस्तत्स्था देवगणा मर्जयन् । मार्जयंति । अलंकुर्वंति । तथा दाशुषो हवींषि दत्तवतो यजमानस्य गृहे स्तोमेभिः स्तोमैः स्तोत्रैर्भृगवो भृगुगोत्रा

ऋषयस्त्वां वि ररचुः । विशेषेण दीपयंति ॥ भृगुशब्दादुत्तरस्य तद्धितस्याञ्चिभृगुकुत्सेत्यादिना । पा० २. ४. ६५. । बहुषु लुक् । ररचुः । रच दीप्तौ । अस्माच्छंदसो लिट् ॥ ॥५॥

इषं दुहन्त्सुदुघां विश्वधायसं यज्ञप्रिये यजमानाय सुक्रतो ।
अग्ने घृतस्नुस्त्रिचृतानि दीद्यद्वर्तिर्यज्ञं परियन्त्सुक्रतूयसे ॥ ६॥
इषं । दुहन् । सुऽदुघां । विश्वऽधायसं । यज्ञऽप्रिये । यजमानाय । सुक्रतो इति सुऽक्रतो ।
अग्ने । घृतऽस्नुः । त्रिः । ऋतानि । दीद्यत् । वर्तिः । यज्ञं । परिऽयन् । सुक्रतुऽयसे ॥ ६॥

हे सुक्रतो सुकर्मन् शोभनप्रज्ञ वाग्ने यज्ञप्रिये यज्ञैर्हविर्भिर्देवान्प्रीणयित्रे यजमानाय विश्वधायसं विश्वस्य सर्वस्य धारयित्रीं सुदुघां दोग्धुं सुशक्यां यज्ञरूपिणीं गामिषमिष्यमाणं यागफलरूपं पयो दुहन् धारयन् तथा घृतस्नुर्घृतेनाज्येन प्रस्नातः ॥ स्नातेरौणादिकः कुप्रत्ययः ॥ यद्वा । घृतो दीप्तः स्नुः सानुः समुच्छ्रितो ज्वालासमूहो यस्य स तथोक्तः ॥ पदादिषु मांसृत्स्नूनामुपसंख्यानं । पा० ६. १. ६३. १. । इति सानुशब्दस्य स्नुभावः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥ ईदृशस्त्वं त्रिस्त्रिवारमावृत्तान्यृतानि सत्यभूतानि पृथिव्यादीनि त्रीणि स्थानानि यद्वा गार्हपत्यादीनि स्थानानि दीद्यद्दीपयन्वर्तिः सर्वं यज्ञगृहं सर्वमनुष्ठीयमानं यागं च परियन् परितो गच्छन् तत्तद्यज्ञगृहं तं तं यज्ञं च प्राप्नुवन् सुक्रतूयसे । शोभनं क्रतुं यज्ञमात्मन इच्छसि । यद्वा । शोभनः क्रतुर्यस्यासौ सुक्रतुर्यजमानः । स इवाचरसि । स यथा सम्यगनुष्ठाने प्रवर्तते एवं त्वमपि स्वयमेव यागस्य सम्यग्निष्पत्त्यर्थं प्रवर्तस इत्यर्थः ॥

त्वामिदस्या उषसो व्युष्टिषु दूतं कृण्वाना अयजन्त मानुषाः ।
त्वां देवा महयाय्याय वावृधुराज्यमग्ने निमृजंतो अध्वरे ॥ ७॥
त्वां । इत् । अस्याः । उषसः । विऽउष्टिषु । दूतं । कृण्वानाः । अयजन्त । मानुषाः ।
त्वां । देवाः । महयाय्याय । ववृधुः । आज्यं । अग्ने । निऽमृजंतः । अध्वरे ॥ ७॥

अस्या इदानीं दृश्यमानाया उषसो व्युष्टिषु विवासनेषु प्रभातेषु सत्सु हे अग्ने त्वामित्त्वामेव देवानां दूतं कृण्वानाः कुर्वाणा मानुषा मनुष्या अयजंत । यजंति । सर्वदेवात्मकं त्वामेव यजंतीत्यर्थः । तथा देवा अपि त्वां महयाय्याय पूजायै ॥ मह पूजायां । अस्मादौणादिको भाव आय्यप्रत्ययः ॥ आत्मनः पूजार्थं वावृधुः । वर्धयंति । किं कुर्वंतः । अध्वरे । ध्वरो हिंसानिमित्तः प्रत्यवायः । तद्रहिते याग आज्यं । उपलक्षणमेतत् । आज्योपलक्षितं सर्वं हविर्निमृजंतस्त्वयि निमार्जयंतः । प्रक्षिपंत इत्यर्थः ॥

नि त्वा वसिष्ठा अहृंत वाजिनं गृणंतो अग्ने विदथेषु वेधसः ।
रायस्पोषं यजमानेषु धारय यूयं पात स्वस्तिभिः सदा नः ॥ ८॥
नि । त्वा । वसिष्ठाः । अहृंत । वाजिनं । गृणंतः । अग्ने । विदथेषु । वेधसः ।
रायः । पोषं । यजमानेषु । धारय । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥ ८॥

हे अग्ने विदथेषु । विदंत्यस्मिन्यष्टव्यान्देवानिति विदथो यज्ञः । तेषु वेधसः कर्मणां विधातारो गृणंतः स्तुवंतो वसिष्ठा वसिष्ठपुत्रा ऋषयो वाजिनमन्नवंतं बलवंतं वा त्वां न्यहृंत । नितरामाहृयन् । अस्माविषुर्वा ॥ हृञो लुङि सिसमुपविधिभ्यो ङ इत्यात्मनेपदं । आत्मनेपदेष्वन्यतरस्यां । पा० ३. १. ५४. । इति च्लेरङादेशः । वसिष्ठशब्दाद्धितस्यापत्यार्थप्रत्ययस्याञ्चिभृगुकुत्सेत्यादिना बहुषु लुक् ॥ स त्वं यजमानेष्वस्मासु रायो धनस्य पोषं पुष्टं धारय । अवस्थापय ॥ ऊडिदमित्यादिना रेशब्दात्षष्ठ्या उदात्तत्वं । षष्ठ्याः पतिपुत्रेति विसर्जनीयस्य सत्वं । गतमन्यत् । एकस्मिन्नप्यग्नौ पूजार्थं बहुवचनं ॥ ॥६॥

अयं वेन इत्यष्टर्चमेकादशं सूक्तं भार्गवस्य वेनस्यार्षं त्रैष्टुभं । वेनो देवता । तथा चानुक्रांतं । अयं वेनो वैन्यमिति ॥ प्रवर्ग्येऽभिष्टव आयानुवाक्या । सूचितं । सूक्ते द्रप्सस्यायं वेनश्चोदयत्पृश्निगर्भाः । आ० ४. ६. । इति ॥ वैश्वदेवशस्त्रेऽप्येषा धाय्या । सूचितं च । तच्चत्रयमयं वेनश्चोदयत्पृश्निगर्भाः । आ० ५. १८. । इति ॥

अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने ।
इममपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहंति ॥१॥
अयं । वेनः । चोदयत् । पृश्निऽगर्भाः । ज्योतिःऽजरायुः । रजसः । विऽमाने ।
इमं । अपां । संऽगमे । सूर्यस्य । शिशुं । न । विप्राः । मतिऽभिः । रिहंति ॥१॥

वेनः कांत एतत्संज्ञो मध्यस्थानो देवो ज्योतिर्जरायुः । ज्योतिर्द्योतमानो मेघो जरायुः । उदरे गर्भो येन वेष्टितोऽवतिष्ठते तज्जरायु । तदिव वेष्टको यस्य स तथोक्तः । मेघमध्ये गर्भवदवस्थित इत्यर्थः । विमाने । विमीयंते निर्मीयंतेऽस्मिन्नाप इति विमानमंतरिक्षं । रजस उदकस्य निर्मातर्यंतरिक्षे स्थितः सन्नयं वेनः पृश्निगर्भाः । पृश्निरादित्यः । तस्य गर्भभूताः । यद्वा पृश्नयः सप्तोज्ज्वलवर्णाः सूर्यरश्मयः । तेषां गर्भभूता अंतरिक्षस्था अपश्चोदयत् । पृथिवीं प्रति प्रेरयति । अपामुदकानामांतरिक्षाणां सूर्यस्य च संगमने ऽंतरिक्षे स्थितमिमं वेनं विप्रा मेधाविनः स्तोतारो मतिभिः स्तुतिभी रिहंति । रिहतिरर्चतिकर्मा । अर्चंति । पूजयंति । स्तुवंतीत्यर्थः । शिशुं न । यथा बालं पुत्रं मातापित्राद्या बांधवाः स्तुतिपदैरुपलालयंति तद्वत् ॥

तस्मिन्नेवाभिष्टवे समुद्रादूर्मिमित्येषा । सूत्र्यते हि । समुद्रादूर्मिमुदियर्ति वेनो द्रप्सः समुद्रमभि यज्जिगाति । आ० ४. ७. । इति ॥

समुद्रादूर्मिमुदियर्ति वेनो नभोजाः पृष्ठं हर्यतस्य दर्शि ।
ऋतस्य सानावधि विष्टपि भ्राट् समानं योनिमभ्यनूषत व्राः ॥२॥
समुद्रात् । ऊर्मिं । उत् । इयर्ति । वेनः । नभःऽजाः । पृष्ठं । हर्यतस्य । दर्शि ।
ऋतस्य । सानौ । अधि । विष्टपि । भ्राट् । समानं । योनिं । अभि । अनूषत । व्राः ॥२॥

समुद्रवंत्यस्मादाप इति समुद्रमंतरिक्षं । तस्मादूर्मिं जलसमूहमयं वेन उदियर्ति । उन्नमयति । अधः पातयतीत्यर्थः । कीदृशः । नभोजाः । नभस्याकाशे - - - । इमं वेनमभि शब्दायंते ॥ गु स्तुतौ । कुटादिः । छांदसो लुङ् ॥

समानं पूर्वीरभि वावशानास्तिष्ठन्वत्सस्य मातरः सनीळाः ।
ऋतस्य सानावधि चक्रमाणा रिहंति मध्वो अमृतस्य वाणीः ॥३॥
समानं । पूर्वीः । अभि । वावशानाः । तिष्ठन् । वत्सस्य । मातरः । सऽनीळाः ।
ऋतस्य । सानौ । अधि । चक्रमाणाः । रिहंति । मध्वः । अमृतस्य । वाणीः ॥३॥

पूर्वीर्बह्व्यः समानं वेनस्यात्मनश्च साधारणं स्थानं प्राप्याभि वावशाना अभितः शब्दायमानाः । यद्वा । तमेव वेनमभिकामयमानाः । वत्सस्य वत्सस्थानीयस्य वैद्युताग्नेर्मातरो मातृभूताः सनीळाः समाननिलया एवंविधा आंतरिक्ष्या आपस्तिष्ठन् । तिष्ठंति । अपि चर्तस्योदकस्य सानावधि सानौ समुच्छ्रिते ऽंतरिक्षस्थाने चक्रमाणाः प्रवर्तमाना मध्वो मधुरस्यामृतस्योदकस्य वाणीर्वाण्यः शब्दा रिहंति । इमं वेनमर्चंति । अलंकुर्वंतीत्यर्थः ॥

जानंतो रूपमकृपंत विप्रा मृगस्य घोषं महिषस्य हि ग्मन् ।
ऋतेन यंतो अधि सिंधुमस्युर्विदद्गंधर्वो अमृतानि नाम ॥४॥
जानंतः । रूपं । अकृपंत । विप्राः । मृगस्य । घोषं । महिषस्य । हि । ग्मन् ।
ऋतेन । यंतः । अधि । सिंधुं । अस्युः । विदत् । गंधर्वः । अमृतानि । नाम ॥४॥

विप्रा मेधाविनः स्तोतारोऽस्य वेनस्य रूपं जानंतोऽकृपंत । सुवंति । कृपतिः स्तुतिकर्मा । कथमस्य रूपं जानंतीत्यत आह । मृगस्यान्वेषणीयस्य महिषस्य । महन्नामैतत् । महतो वेनस्य घोषं गर्जितलक्षणं मेघस्थं शब्दं हि यस्माद्ग्मन् अभिगच्छंति अतस्तदीयं रूपं जानंतीत्यर्थः ॥ गमेश्छांदसे क्तिन् वक्तव्यं छंदसीति ग्मपो लुक् । गमहनेत्युपधालोपः । वक्तव्यं छंदस्यमाङ्योगेऽपीत्यडभावः ॥ अपि चैतेन सत्यभूतेन स्तोत्रेण यज्ञेन वा यंतस्तं वेनं गच्छंतः प्राप्नुवंतो जनाः सिंधुं स्यंदनशीलं जलसमूहमध्यस्युः । अधितिष्ठंति । तेषां स वेनो वृष्टिं करोतीत्यर्थः । तत्र किं कारणमिति चेत् यतोऽयं गंधर्वो गवामुदकानां धर्ता वेनोऽमृतान्यमरणहेतुभूतानि नाम । उदकनामैतत् । गमनशीलान्युदकानि विदत् वेद जानाति । तस्य वशे वर्तत इत्यर्थः । अतस्तज्ज्ञानां वृष्टिः सुलभा ॥

अप्सरा जारमुपसिष्मियाणा योषा बिभर्ति परमे व्योमन् ।
चरंत्प्रियस्य योनिषु प्रियः सन्त्सीदत्पक्षे हिरण्यये स वेनः ॥५॥
अप्सराः । जारं । उपऽसिष्मियाणा । योषा । बिभर्ति । परमे । विऽओमन् ।
चरत् । प्रियस्य । योनिषु । प्रियः । सन् । सीदत् । पक्षे । हिरण्ययें । सः । वेनः ॥५॥

अप्सरा अपां सारथिर्जप्सु क्रीडार्थं सरंती वोपसिष्मियाणा कांतसमीपमुपगच्छेषद्वसंती ॥ स्मिङ् ईषद्वसने । छांदसो लिट् । तस्य लिटः कानज्वेति कानच् ॥ ईदृशी योषा स्त्री विद्युद्रूपा जारमपां जारयितारं । यद्वा । जार उपपतिः । स इव प्रियं । इमं वेनं परम उत्कृष्टे व्योमन् व्योमन्यंतरिक्षे बिभर्ति । पोषयति । धारयति वा । यथा काचिद्रूपवती योषिज्जारमुपगच्छेषद्वसंती तं निर्जने स्थले पुष्णाति तद्वदनेन वेनेन विद्युद्रूपता इत्यर्थः । प्रियस्यास्य वेनस्य योनिषु स्थानेषु चरत् । विद्युद्रूपा योषिच्चरति गच्छति । अभिसारिकावृत्त्या स्वयमेव गच्छति । स च वेनः प्रियोऽस्या अनुकूलतमः सन् हिरण्यये हिरण्मये हिरण्मयवच्चास्तरे हितरमणीयरूपे वा पक्ष आत्मनः पक्षभूते मेघे सीदत् । सीदति । तया सहोपविशति ॥ ॥७॥

अभिष्टवे नाके सुपर्णमित्येषा । सूचितं च । नाके सुपर्णमुप यत्पतंतमिति समाप्य प्रणवेनोपविशेत् । आ० ४. ७. । इति ॥

नाकें सुपर्णमुप यत्पतंतं हृदा वेनंतो अभ्यचक्षत त्वा ।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युं ॥६॥
नाकें । सुऽपर्णं । उप । यत् । पतंतं । हृदा । वेनंतः । अभि । अचक्षत । त्वा ।
हिरण्यऽपक्षं । वरुणस्य । दूतं । यमस्य । योनौ । शकुनं । भुरण्युं ॥६॥

हे वेन त्वा त्वां हृदा हृद्येन मनसा वेनंतः कामयमानाः स्तोतारो नाकेऽंतरिक्षे यद्यदाभ्यचक्षत अभिपश्यंति तदानीं त्वमुप आगच्छसीति शेषः । कथंभूतं । सुपर्णं शोभनपतनं पतंतमंतरिक्षे गच्छंतं हिरण्यपक्षं हिरण्मयाभ्यां पक्षाभ्यामुपेतं वरुणस्य जलाभिमानिनो देवस्य दूतं चारं यमस्य नियामकस्य वैद्युतामेर्योनौ स्थानेऽंतरिक्षे शकुनं पक्षिरूपेण वर्तमानं भुरण्युं भर्तारं । यद्वा । वृष्टिप्रदानादिना सर्वस्य जगतः पोषकं ॥ भुरण धारणपोषणयोः । कंड्वादिः । अन्नादीनादिक उप्रत्ययः ॥

ऊर्ध्वो गंधर्वो अधि नाके अस्थात्प्रत्यङ्चित्रा बिभ्रदस्यायुधानि ।
वसानो अत्कं सुरभिं दृशे कं स्वर्णो नाम जनत प्रियाणि ॥७॥
ऊर्ध्वः । गंधर्वः । अधि । नाके । अस्थात् । प्रत्यङ् । चित्रा । बिभ्रत् । अस्य । आयुधानि ।
वसानः । अत्कं । सुरभिं । दृशे । कं । स्वः । न । नाम । जनत । प्रियाणि ॥ ७ ॥

ऊर्ध्व उपरिदेशे वर्तमानो गंधर्वो गवामुदकानां धर्ता । गवि गन् धृञो व इति गोशब्दोपपदाद्धृञ् धारण इत्यस्माद्वप्रत्यय उपपदस्य गन्भावश्च ॥ ईदृशो वेनः प्रत्यङ्नस्मत्प्रत्यंचनोऽभिमुखः सन्नाके ऽध्वंतरिक्षेऽस्थात् । तिष्ठति । किं कुर्वन् । अस्यात्मनः स्वभूतानि चित्रा चित्राणि चायनीयान्यास्वर्यभूतानि वायुधानि बिभ्रद्धारयन् ॥ बिभर्तेः शतरि भृञामिदित्यभ्यासस्येत्वं । नाभ्यस्ताच्छतुरिति शुग्निषेधः । अभ्यस्तानामादिरित्युदात्तत्वं ॥ तथा सुरभिं शोभनमत्कमात्मीयं व्याप्तं रूपं वसानः सर्वतश्छादयन् । किमर्थं । दृशे दर्शनार्थं ॥ दृशे विख्ये चेति केप्रत्ययांतो निपात्यते ॥ कमिति पूरणः । तत्र दृष्टांतः । स्वर्णः । स्वः शोभनारुण आदित्यः । स यथात्मीयं रूपं दर्शनाय सर्वतश्छादयति तद्वत् । तदनंतरं नाम नामानि नमनशीलान्युदकानि प्रियाणि सर्वेषामनुकूलानि जनत । जनयति । वृष्टिमुत्पादयतीत्यर्थः ॥

प्रवर्ग्येऽभिष्टवे द्रप्सः समुद्रमित्येषा । सूचितं च । द्रप्सः समुद्रमभि यज्जिगाति सखे सखायमभ्या ववृत्स्व । आ० ४. ७. । इति ॥

द्रप्सः समुद्रमभि यज्जिगाति पश्यन्गृध्रस्य चक्षसा विधर्मन् ।
भानुः शुक्रेण शोचिषा चकानस्तृतीये चक्रे रजसि प्रियाणि ॥८॥
द्रप्सः । समुद्रं । अभि । यत् । जिगाति । पश्यन् । गृध्रस्य । चक्षसा । विऽधर्मन् ।
भानुः । शुक्रेण । शोचिषा । चकानः । तृतीये । चक्रे । रजसि । प्रियाणि ॥ ८ ॥

विधर्मन्विधर्मणि विधारकेऽन्तरिक्षे स्थितो द्रप्सो द्रवणशीलः । यद्वा । द्रप्सा उदकबिंदवः । तद्वान् ॥ अर्शआदित्वादच् ॥ गृध्रस्य गृधो रसानभिकांक्षतः सूर्यस्य चक्षसा तेजसा पश्यन् प्रकाशमानो वेनो यदा समुद्रं समुंदनशीलं मेघमभि जिगाति अभिगच्छति तदानीं भानुः सूर्यः शुक्रेण शुभ्रेण शोचिषा तेजसा तृतीये रजसि लोके चकानो दीप्यमानः प्रियाणि सर्वेषामभीष्टान्युदकानि चक्रे । करोति ॥ ॥ ८ ॥

इमं नो अग्न इति नवर्चं द्वादशं सूक्तं । द्वितीयाद्याभिस्तिसृभिरग्निर्ऋषिर्भूत्वा स्वात्मानं देवतारूपिणमस्तौत् । अतस्तासां स एवर्षिर्देवता च । शिष्टाभिरग्निवरुणसोमा अस्तुवन् । अतस्तासां षण्णां त ऋषयः । आद्यापैयी । नवमींद्रदेवत्या । शिष्टासु चतसृषु लिंगोक्तदेवता । सप्तमी जगती शिष्टास्त्रिष्टुभः । तथा चानुक्रांतं । इमं नो नवैंद्युत्तमा लिहवोऽग्निवरुणसोमानामाद्यापैयी तिसृणामैरात्मस्तवः शिष्टा यथानिपातं सप्तमी जगतीति ॥ गतो विनियोगः ॥

इमं नो अग्न उप यज्ञमेहि पंचयामं त्रिवृतं सप्ततंतुं ।
असो हव्यवाळुत नः पुरोगा ज्योगेव दीर्घं तम आशयिष्ठाः ॥१॥
इमं । नः । अग्ने । उप । यज्ञं । आ । इहि । पंचऽयामं । त्रिऽवृतं । सप्तऽतंतुं ।
असः । हव्यऽवाट् । उत । नः । पुरःऽगाः । ज्योक् । एव । दीर्घं । तमः । आ । अशयिष्ठाः ॥ १ ॥

भ्रातृषु हविर्वहनेषु मृतेषु मरणभीत्या छतपलायनं गुहायां निगूढमग्निमग्न्याद्याः सूक्तद्रष्टार ऋषयोऽनयाऽचयन् । हे अग्ने नोऽस्माकमिमं यज्ञमुपेहि । उपागच्छ । प्राप्नुहि । मा पलायिष्ठाः । कीदृशं । पंचयामं

यजमानपंचमैर्ऋत्विग्भिर्नियमितं । यद्वा । धानाकरंभादिभिः पंचभिर्हविर्भिः पंचभिः प्रयाजैर्वा प्राप्तं । त्रिवृतं पाकयज्ञहविर्यज्ञसोमयज्ञभेदेन सवनत्रयात्मना वा त्रिगुणं सप्ततंतुं सप्त तंतवस्तनितारः कर्मणां विस्तारयितारो होत्राद्याः सप्त वषट्कर्तारो यस्य । यद्वा । अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोळशी वाजपेयोऽतिरात्रो ऽप्तोर्याम इति सप्तधा विस्तीर्यमाणं । ईदृशं यज्ञमुपगत्य चानंतरं नोऽस्माकं हव्यवाड्हव्यानां हविषां वोढासः । भव ॥ अस्तेर्लेंड्यडागमः ॥ उतापि च नोऽस्माकं पुरोगाः पुरतो गंता भव ॥ जनसनखनक्रमगमो विट् । विड्वनोरनुनासिकस्यादित्यात्वं ॥ ज्योक् चिरकालमेवास्मान्परित्यज्य दीर्घं तमो महदंधकारं गृहायामाश्रयिष्टाः । आस्थाय शयनमकार्षीः । इत ऊर्ध्वं तस्मात्स्थानादस्मानागच्छेत्यर्थः ॥

अदेवाद्देवः प्रचता गुहा यन्प्रपश्यमानो अमृतत्वमेमि ।
शिवं यत्संतमशिवो जहामि स्वात्सख्यादरणीं नाभिमेमि ॥२॥
अदेवात् । देवः । प्रऽचता । गुहा । यन् । प्रऽपश्यमानः । अमृतऽत्वं । एमि ।
शिवं । यत् । संतं । अशिवः । जहामि । स्वात् । सख्यात् । अरणीं । नाभिं । एमि ॥२॥

अदेवाद्देवनशीलान्नुहा गुहायां वर्तमानात् ॥ सुपां सुलुगिति सप्तम्या लुक् ॥ प्रचता देवानां प्रयाजनेन हेतुना यन् निर्गच्छन् देवो देवनशीलोऽहं प्रपश्यमानो देवैर्मदर्थं कल्पितं प्रयाजानुयाजादिलक्षणं हविर्भागं प्रपश्यमानो निरीक्षमाणः सन्नमृतत्वमेमि । मरणधर्मराहित्यं देवत्वं प्राप्नोमि ॥ दृशेर्व्यत्ययेनात्मनेपदं ॥ हविर्वहनाद्भीतः पलायितोऽवादिषु स्थानेषु निगूढः पुनर्देवैर्हविर्वहनाय प्रार्थ्यमानस्तैर्दत्तेन हविषाहं देवत्वं प्राप्तवानस्मीत्यर्थः । यद्यप्यहं गुहातो निर्गत्य प्रकाशमानः सञ्शोभनं यज्ञं निवर्तयामि तथापि शिवं शोभनं संतं भवंतं यज्ञमशिवोऽशोभनरूपोऽप्रकाशमानः सन् यद्यस्मिन्समाप्तिकाले जहामि परित्यजामि तदानीं नाभिं नहनशीलां बंधनशीलामरणीमश्वत्थमेव स्वात्सख्यादात्मीयात्सखित्वाच्चिरकालमश्वरूपोऽहं तत्र न्यवात्समिति स्नेहवशादेमि । प्राप्नोमि ॥

पश्यन्नन्यस्या अतिथिं वयाया ऋतस्य धाम वि मिमे पुरूणि ।
शंसामि पित्रे असुराय शेवमयज्ञियाद्यज्ञियं भागमेमि ॥३॥
पश्यन् । अन्यस्याः । अतिथिं । वयायाः । ऋतस्य । धाम । वि । मिमे । पुरूणि ।
शंसामि । पित्रे । असुराय । शेवं । अयज्ञियात् । यज्ञियं । भागं । एमि ॥३॥

मम स्थानभूता या पृथिवी ततोऽन्यस्या वयाया गंतव्याया दिवः संबंधिनमतिथिं सततगामिनं सूर्यं पश्यञ्जानन् सूर्यस्य गतिमनुसृत्य वसंतादिकाल ऋतस्य यज्ञस्य धाम धामानि शरीराणि पुरूणि बहूनि वि मिमे । निर्मिमे । निष्पादयामि । ततः पित्रे पितृभूताय द्युलोकवर्तिने देवजनायासुराय शत्रुक्षेपणकुशलाय शेवं सुखमुद्दिश्य होता भूत्वाहमुक्थानि शंसामि । यत एवं तस्मात्कारणादयज्ञियाद्यज्ञानर्हात्प्रदेशान्निर्गत्य यज्ञियं यज्ञार्हं वेदिलक्षणं भूभागं हविर्लक्षणं वैमि । प्राप्नोमि ॥ यज्ञशब्दादर्हार्थे यज्ञर्त्विग्भ्यां घखञाविति घप्रत्ययः ॥

बह्वीः समा अकरमंतरस्मिन्निंद्रं वृणानः पितरं जहामि ।
अग्निः सोमो वरुणस्ते च्यवंते पर्यावर्द्राष्ट्रं तदवाम्यायन् ॥४॥
बह्वीः । समाः । अकरं । अंतः । अस्मिन् । इंद्रं । वृणानः । पितरं । जहामि ।
अग्निः । सोमः । वरुणः । ते । च्यवंते । परिऽआवर्त् । राष्ट्रं । तत् । अवामि । आऽयन् ॥४॥

अस्मिन्वेदिलक्षणस्थाने बह्वीः समाः संवत्सरानकरं । अकार्षं । चिरकालं न्यवात्सं । तत्रेंद्रं वृणानः

संभजमानः पितरमृत्पादकमरक्षात्मकं जहामि। परित्यजामि। यदा त्वहं देवेभ्यो निर्गत्य गुहायां निगूढः तदा ते देवा अग्निः सोमो वरुणश्च च्यवंते। राष्ट्रात्प्रच्युता अभवन्। एकस्याप्यग्नेर्हविर्वोढृत्वरूपेण देवतात्मना च पृथक्त्वात्परोक्षनिर्देशः। आयन् पुनरागच्छन्नहं यद्राष्ट्रमसुरैरपहृतं पर्यावर्त् पर्यावर्तमानं मदभिमुखं पुनरावर्तमानं तद्राष्ट्रं राज्यं यज्ञभूमिमवामि। असुरेभ्यो रक्षामि। पर्यावर्त्॥ उपरुष्टावृतेरन्येभ्योऽपि दृश्यंत इति विच्। रात्सस्येति नियमात्संयोगांतस्येति लोपाभावः॥

निर्मीया उ त्ये असुरा अभूवन्त्वं च मा वरुण कामयासे।
ऋतेन राजन्ननृतं विविंचन्मम राष्ट्रस्याधिपत्यमेहि ॥५॥
निःऽमायाः। ऊं इति। त्ये। असुराः। अभूवन्। त्वं। च। मा। वरुण। कामयासे।
ऋतेन। राजन्। अनृतं। विऽविंचन्। मम। राष्ट्रस्य। अधिऽपत्यं। आ। इहि ॥५॥

त्ये तेऽसुरा मय्यागते सति निर्माया मायारहिता अभूवन्। आसुर्यः सर्वा माया मया दग्धा आसन्नित्यर्थः। हे वरुण त्वं च॥ अयं चशब्दश्चेदर्थे वर्तमानश्चेति निपातांतरं। अनेन युक्तत्वात्कामयास इति तिङ्भक्तेर्निपातैर्यद्यदिहंतेति निघातप्रतिषेधः। पा० ८. १. ३०.॥ हे वरुण त्वं चेन्मा कामयासे मां कामयेथाः तर्हि हे राजन्नीश्वर ऋतेन सत्येनास्मदीयेन कर्मणानृतमसत्यभूतं मायामयमासुरं चरित्रं विविंचन् पृथक्कुर्वन्नपसारयन् मम राष्ट्रस्य मया यत्साधितं राज्यं तस्याधिपत्यमधिपतित्वमीश्वरत्वमेहि। प्राप्नुहि॥ ॥९॥

इदं स्वरिदमिदास वाममयं प्रकाश उर्वंतरिक्षं।
हनाव वृत्रं निरेहि सोम हविष्मा संतं हविषा यजाम ॥६॥
इदं। स्वः। इदं। इत्। आस। वामं। अयं। प्रऽकाशः। उरु। अंतरिक्षं।
हनाव। वृत्रं। निःऽएहि। सोम। हविः। त्वा। संतं। हविषा। यजाम ॥६॥

इयमृगग्नेर्वरुणस्य वा वाक्यं। हे सोम इदं स्वरयं द्युलोकः यद्वायं शोभनारणः सूर्य इदमिदिदमेव वामं वननीयमास। बभूव। इदंशब्देन प्रकृतं स्वः परामृश्यते। अयं च प्रकाशः प्रकाशस्याधारभूत उरु विस्तीर्णमिदमंतरिक्षं हे सोम एतत्सर्वं पश्य। अत एवास्मिन्समय आवां वृत्रं हनाव। हिनसाव। तदर्थं निरेहि। निष्क्रम्यागच्छ। हविः संतं लतारूपेण हविर्भवंतं देवतात्मानं त्वां हविषा चरुपुरोडाशादिना वयं यजाम॥

कविः कवित्वा दिवि रूपमासजदप्रभूती वरुणो निरपः सृजत्।
क्षेमं कृण्वाना जनयो न सिंधवस्ता अस्य वर्णं शुचयो भरिभ्रति ॥७॥
कविः। कविऽत्वा। दिवि। रूपं। आ। असजत्। अप्रऽभूती। वरुणः। निः। अपः। सृजत्।
क्षेमं। कृण्वानाः। जनयः। न। सिंधवः। ताः। अस्य। वर्णं। शुचयः। भरिभ्रति ॥७॥

कविः क्रांतदर्शी मित्रः कवित्वा कवित्वेन॥ सुपां सुलुगिति तृतीयाया आकारः॥ क्रांतदर्शनेन दिवि द्युलोके रूपमात्मीयं तेज आसजत्। आसक्तं करोति॥ षन्ज संगे। अस्यासञ्जिङि शपि दंशसंजस्वंजां शपि। पा० ६. ४. २५.। इति नलोपः॥ अप्रभूत्यप्रभूत्या॥ सुपां सुलुगिति तृतीयायाः पूर्वसवर्णदीर्घः॥ अप्रभूष्णुनाल्पेनैव यत्नेन वरुणो मेघादपो निः सृजत्। निरगमयत्। वरुणेन विसृष्टास्ता आपः सिंधवः स्यंदनशीला नद्यो भूत्वा जनयो न जाया इव यथा जायाः पत्युः क्षेमकारिण्यो भवंति तथा क्षेमं कुर्वाणा जगतो रक्षणं कुर्वाणाः शुचयः शुद्धा दीप्यमाना वास्य वरुणस्य वर्णं शुक्लं भास्वरूपं भरिभ्रति। भृञं बिभ्रति धारयंति॥ दाधर्त्यादिसूत्रे भरिभ्रदिति निपातनाद्बिभर्तेर्यङ्लुक्यभ्यासस्य जश्त्वाभावः॥

ता अस्य ज्येष्ठमिंद्रियं सचंते ता ईमा क्षेति स्वधया मदंतीः ।
ता ईं विशो न राजानं वृणाना बीभत्सुवो अप वृचादतिष्ठन् ॥८॥
ताः । अस्य । ज्येष्ठं । इंद्रियं । सचंते । ताः । ईं । आ । क्षेति । स्वधया । मदंतीः ।
ताः । ईं । विशः । न । राजानं । वृणानाः । बीभत्सुवः । अप । वृचात् । अतिष्ठन् ॥८॥

ताः पूर्वोक्ता वृष्टा आपोऽस्य वरुणस्य ज्येष्ठं वृद्धतममिंद्रियं वीर्यं सचंते । समवयंति । संभजंते । धारयंतीत्यर्थः । आपो वरुणस्य पत्न्य आसन्निति श्रुतेः । स्वधया । अन्ननामैतत् । हविर्लक्षणेनान्नेन मदंतीर्माद्यंतीः । यद्वा । व्रीह्यादयुत्पादनद्वारेण हविषा माद्यंतीः । ता अप ईमयं वरुण आ क्षेति । अभिगच्छति ॥ क्षि निवासगत्योः । छांदसो विकरणस्य लुक् ॥ ताश्चेमं वरुणं विशो न विशः प्रजा यथा राजानं स्वामिनं संभजंते तथा वृणानाः संभजमाना बीभत्सुवो भयेन कंपमानाः । यद्वा । वज्रा वृत्रेणावृताः सत्यः । तस्मिन्हते सति तस्माद्वृत्राद्पातिष्ठन् । अपक्रम्य तत्र तत्रावतिष्ठंते ॥ बध बंधन इत्यस्माद्बातोर्माभ्बधदान्शान्भ्यः । पा० ३. १. ६. । इति सन् अभ्यासस्य च दीर्घः । सनाशंसभिक्ष उरित्युप्रत्ययः । असि च्छांदस उवङादेशः ॥

बीभत्सूनां सयुजं हंसमाहुरपां दिव्यानां सख्ये चरंतं ।
अनुष्टुभमनु चर्चूर्यमाणमिंद्रं नि चिक्युः कवयो मनीषा ॥९॥
बीभत्सूनां । सऽयुजं । हंसं । आहुः । अपां । दिव्यानां । सख्ये । चरंतं ।
अनुऽस्तुभं । अनु । चर्चूर्यमाणं । इंद्रं । नि । चिक्युः । कवयः । मनीषा ॥९॥

बीभत्सूनां कंपमानावयवानां यद्वा मेघेन बद्धानां । हंति गच्छतीति हंसः सूर्यः । तं सयुजं सखायमाहुः । ब्रह्मवादिनः कथयंति । एतदेवाह । दिव्यानां दिवि भवानामंतरिक्षाणामपां सख्ये सखित्वे चरंतं वर्तमानं । अनुष्टुभमनुष्टोभनीयं स्तोतव्यं । यद्वा । अनुष्टुप्शब्देन तत्संबद्धो यागः स्तुतिर्वा लक्ष्यते । अनुष्टुप्संबद्धं यागमनुष्टुप्छंदसा युक्तं स्तुतिविशेषं वा । अनुलक्ष्य चर्चूर्यमाणं पुनःपुनश्चरंतं गच्छंतं ॥ चरतेर्यङ्युत्परस्मातः । पा० ७. ४. ८८. । इत्यभ्यासादुत्तरस्याकारस्योत्वं । चरफलोश्च । पा० ७. ४. ८७. । इति नुकि प्राप्ते व्यत्ययेनाभ्यासस्य दीर्घागमः ॥ एवंगुणविशिष्टमिंद्रं कवयः क्रांतदर्शिन ऋषयो मनीषा मनीषया स्तुत्या नि चिक्युः । पूजयंति । यद्वा । मनीषा बुद्ध्या नि चिक्युः । जानंति ॥ मनीषाशब्दात्तृतीयायाः सुपां सुलुगिति लुक् । चायृ पूजानिशामनयोरित्यस्माच्छांदसे लिटि चायः की । पा० ६. १. ३५. । इति प्रकृतेः कीभावः । एरनेकाच इति यण् ॥ ॥१०॥

अहमित्यष्टर्चं चयोदशं सूक्तं । अंभृणस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मविदुषी स्वात्मानमस्तौत् । अतः सर्षिः । सच्चित्सुखात्मकः सर्वगतः परमात्मा देवता । तेन ह्येषा तादात्म्यमनुभवंती सर्वजगद्रूपेण सर्वस्याधिष्ठानत्वेन चाहमेव सर्वं भवामीति स्वात्मानं स्तौति । द्वितीया जगती शिष्टाः सप्त त्रिष्टुभः । तथा चानुक्रांतं । अहमष्टौ वागांभृणी तुष्टावात्मानं द्वितीया जगतीति ॥ गतो विनियोगः ॥

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिंद्राग्नी अहमश्विनोभा ॥१॥
अहं । रुद्रेभिः । वसुऽभिः । चरामि । अहं । आदित्यैः । उत । विश्वऽदेवैः ।
अहं । मित्रावरुणा । उभा । बिभर्मि । अहं । इंद्राग्नी इति । अहं । अश्विना । उभा ॥१॥

अहं सूक्तस्य द्रष्ट्री वागांभृणी यद्वस्तु जगत्कारणं तद्रूपा भवंती रुद्रेभी रुद्रैरेकादशभिः । इत्यंभावे तृतीया । तदात्मना चरामि । एवं वसुभिरित्यादौ तत्तदात्मना चरामीति योज्यं । तथा मित्रावरुणा मित्रं

च वक्ष्यं च ॥ सुपां सुलुगिति द्वितीयाया आकारः ॥ उभोभावहमेव ब्रह्मीभूता बिभर्मि । धारयामि । इंद्राग्नी अप्यहमेव धारयामि । उभोभावश्विनाश्विनावप्यहमेव धारयामि । मयि हि सर्वं जगच्छुक्तौ रजतमिवाध्यस्तं सहृश्यते । माया च जगदाकारेण विवर्तते । तादृक्षा मायाया आधारत्वेनासंगस्यापि ब्रह्मण उक्तस्य सर्वस्योत्पत्तिः ॥

अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगं ।
अहं दधामि द्रविणं हविष्मते सुप्राव्ये३ यजमानाय सुन्वते ॥२॥
अहं । सोमं । आहनसं । बिभर्मि । अहं । त्वष्टारं । उत । पूषणं । भगं ।
अहं । दधामि । द्रविणं । हविष्मते । सुप्रऽअव्ये । यजमानाय । सुन्वते ॥२॥

आहनसमाहंतव्यमभिषोतव्यं सोमं यद्वा शृणुमाहंतारं दिवि वर्तमानं देवतात्मानं सोममहमेव बिभर्मि । तथा त्वष्टारमुतापि च पूषणं भगं चाहमेव बिभर्मि । तथा हविष्मते हविर्भिर्युक्ताय सुप्राव्ये शोभनं हविर्देवानां प्रापयित्रे तर्पयित्रे ॥ अवतेस्तर्पणार्थादवितृस्तृतंत्रिभ्य ईः । उ० ३. १५८. । इतीकारप्रत्ययः । चतुर्थ्येकवचने यण्वदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्येति सुपः स्वरितत्वं ॥ सुन्वते सोमाभिषवं कुर्वते ॥ शृणुरणुम इति चतुर्थ्या उदात्तत्वं ॥ ईदृशाय यजमानाय द्रविणं धनं यागफलरूपमहमेव धारयामि । एतच्च ब्रह्मणः फलदातृत्वं फलमत उपपत्तेः । ३. २. ३८. । इत्यधिकरणे भगवता भाष्यकारेण समर्थितं ॥

अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानां ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयंतीं ॥३॥
अहं । राष्ट्री । संऽगमनी । वसूनां । चिकितुषी । प्रथमा । यज्ञियानां ।
तां । मा । देवाः । वि । अदधुः । पुरुऽत्रा । भूरिऽस्थात्रां । भूरि । आऽवेशयंतीं ॥३॥

अहं राष्ट्री । ईश्वरनामैतत् । सर्वस्य जगत ईश्वरी । तथा वसूनां धनानां संगमनी संगमयित्र्युपासकानां प्रापयित्री । चिकितुषी यत्साक्षात्कर्तव्यं परं ब्रह्म तज्ज्ञातवती स्वात्मतया साक्षात्कृतवती । अत एव यज्ञियानां यज्ञार्हाणां प्रथमा मुख्या । यैवंगुणविशिष्टाहं तां मां भूरिस्थात्रां बहुभावेन प्रपंचात्मनावतिष्ठमानां भूरि भूरीणि बहूनि भूतजातान्याविशयंतीं जीवभावेनात्मानं प्रवेशयंतीं ईदृशीं मां पुरुत्रा बहुषु देशेषु व्यदधुः । देवा विदधति । कुर्वंति । उक्तप्रकारेण वैश्वरूप्येणावस्थानात् । यद्यत्कुर्वंति तत्सर्वं मामेव कुर्वंतीत्यर्थः ॥

मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तं ।
अमंतवो मां त उप क्षियंति श्रुधि श्रुत श्रद्धिवं ते वदामि ॥४॥
मया । सः । अन्नं । अत्ति । यः । विऽपश्यति । यः । प्राणिति । यः । ईं । शृणोति । उक्तं ।
अमंतवः । मां । ते । उप । क्षियंति । श्रुधि । श्रुत । श्रद्धिऽवं । ते । वदामि ॥४॥

योऽन्नमत्ति स भोक्तृशक्तिरूपया मयैवान्नमत्ति । यश्च विपश्यति । आलोकयतीत्यर्थः । यश्च प्राणिति श्वासोच्छ्वासादिव्यापारं करोति सोऽपि मयैव । यश्चोक्तं शृणोति ॥ श्रु श्रवणे । श्रुवः शृ च्वेति श्रुधातोः शृभावः ॥ य ईदृशीमंतर्यामिरूपेण स्थितां मां न जानंति तेऽमंतवोऽमन्यमाना अजानंत उप क्षियंति । उपक्षीणाः संसारेण हीना भवंति ॥ मनेरौणादिकस्नुप्रत्ययः । नञ्समासे व्यत्ययेनांतोदात्तत्वं । यद्वा । भावे तुप्रत्ययः । ततो बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । माममंतवो मद्विषयज्ञानरहिता इत्यर्थः ॥ हे श्रुत विश्रुत सखे श्रुधि । मया वक्ष्यमाणं शृणु ॥ छांदसो विकरणस्य लुक् । शृशृणुपृकृवृभ्य इति हेर्धिभावः ॥

किं तच्छ्रोतव्यं । अद्विवं । अद्विः अद्रा । तया युक्तं । अद्रायत्नेन लभ्यमित्यर्थः । अदंतरोरुपसर्गवदृत्तिरिष्यते । पा० १. ४. ५७. २. । इति अच्छब्दस्योपसर्गवद्वर्तमानत्वादुपसर्गे घोः किरिति किप्रत्ययः । मत्वर्थीयो वः ॥ ईदृशं ब्रह्मात्मकं वस्तु ते तुभ्यं वदामि । उपदिशामि ॥

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ।
यं कामये तंतमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधां ॥५॥
अहं । एव । स्वयं । इदं । वदामि । जुष्टं । देवेभिः । उत । मानुषेभिः ।
यं । कामये । तंऽतं । उग्रं । कृणोमि । तं । ब्रह्माणं । तं । ऋषिं । तं । सुऽमेधां ॥५॥

अहं स्वयमेवेदं वस्तु ब्रह्मात्मकं वदामि । उपदिशामि । देवेभिर्देवैरिंद्रादिभिरपि जुष्टं सेवितं । उतापि च मानुषेभिर्मनुष्यैरपि जुष्टं । ईदृग्वस्त्वात्मिकाहं कामये यं पुरुषं रचितुमहं वांछामि तं तं पुरुषमुग्रं क्रूरं कृणोमि । सर्वेभ्योऽधिकं करोमि । तमेव ब्रह्माणं स्रष्टारं करोमि । तमेवर्षिमतींद्रियार्थदर्शिनं करोमि । तमेव सुमेधां शोभनप्रज्ञं च करोमि ॥ ॥११॥

अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे शरवे हंतवा उ ।
अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ विवेश ॥६॥
अहं । रुद्राय । धनुः । आ । तनोमि । ब्रह्मऽद्विषे । शरवे । हंतवै । ऊं इति ।
अहं । जनाय । सऽमदं । कृणोमि । अहं । द्यावापृथिवी इति । आ । विवेश ॥६॥

पुरा त्रिपुरविजयसमये रुद्राय रुद्रस्य । षष्ठ्यर्थे चतुर्थी । महादेवस्य धनुश्चापमहमा तनोमि । ज्यया ततं करोमि । किमर्थं । ब्रह्मद्विषे ब्राह्मणानां द्वेष्टारं शरवे शरं हिंसकं त्रिपुरनिवासिनमसुरं हंतवै हंतुं हिंसितुं ॥ हंतेस्तुमर्थे सेसेनिति तवैप्रत्ययः । अंतश्च तवै युगपदित्याद्यंतयोर्युगपदुदात्तत्वं । भृ हिंसायामित्यस्माच्छ्रुस्रुह्नीत्यादिनोप्रत्ययः । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी ॥ उशब्दः पूरकः । अहमेव समदं । समानं मायंत्यस्मिन्निति समत्संग्रामः । स्तोतृजनार्थं शत्रुभिः सह संग्राममहमेव कृणोमि । करोमि । तथा द्यावापृथिवी दिवं च पृथिवीं चांतर्यामितयाहमेवा विवेश । प्रविष्टवती ॥

अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वंतः समुद्रे ।
ततो वि तिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि ॥७॥
अहं । सुवे । पितरं । अस्य । मूर्धन् । मम । योनिः । अप्ऽसु । अंतरिति । समुद्रे ।
ततः । वि । तिष्ठे । भुवना । अनु । विश्वा । उत । अमूं । द्यां । वर्ष्मणा । उप । स्पृशामि ॥७॥

द्यौः पितेति श्रुतेः पिता द्यौः । पितरं दिवमहं सुवे । प्रसुवे । जनयामि । आत्मन आकाशः संभूतः । तै० आ० ८. १. । इति श्रुतेः । कुत्रेति तदाह । अस्य परमात्मनो मूर्धन्मूर्धन्युपरि । कारणभूते तस्मिन्हि वियदादिकार्यजातं सर्वं वर्तते तंतुषु पट इव । मम च योनिः कारणं समुद्रे । समुद्रवंत्यस्मान्नूतनजातानीति समुद्रः परमात्मा । तस्मिन्नप्सु व्यापनशीलासु धीवृत्तिष्वंतर्मध्ये यद्ब्रह्म चैतन्यं तन्मम कारणमित्यर्थः । यत ईदृग्भूताहमस्मि ततो हेतोर्विश्वा विश्वानि सर्वाणि भुवनानि भूतजातान्यनु प्रविश्य वि तिष्ठे । विविधं व्याप्य तिष्ठामि ॥ समवप्रविभ्यः स्थ इत्यात्मनेपदं ॥ उतापि चामूं द्यां विप्रकृष्टदेशेऽवस्थितं स्वर्गलोकं । उपलक्षणमेतत् । एतदुपलक्षितं कृत्स्नं विकारजातं वर्ष्मणा कारणभूतेन मायात्मकेन मदीयेन देहेनोप स्पृशामि । यद्वा । अस्य भूलोकस्य मूर्धन्मूर्धन्युपर्यहं पितरमाकाशं सुवे । समुद्रे जलधावप्सूदकेष्वंतर्मध्ये मम योनिः

कारणभूतोऽभृणाख्य ऋषिर्वर्तते । यद्वा । समुद्रेऽन्तरिक्षेऽप्सम्मयेषु देवशरीरेषु मम कारणभूतं ब्रह्म चैतन्यं वर्तते । ततोऽहं कारणात्मिका सती सर्वाणि भुवनानि व्याप्नोमि । अन्यत्समानं ॥

अहमेव वात इव प्र वाम्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यैतावती महिना सं बभूव ॥८॥
अहं । एव । वातः । इव । प्र । वामि । आऽरभमाणा । भुवनानि । विश्वा ।
परः । दिवा । परः । एना । पृथिव्या । एतावती । महिना । सं । बभूव ॥८॥

विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि कार्याख्यारभमाणा कारणरूपेणोत्पादयंत्यहमेव परेणाऽधिष्ठिता स्वयमेव प्र वामि । प्रवर्ते । वात इव यथा वातः परेणाप्रेरितः सन् स्वेच्छयैव प्रवाति तद्वत् । उक्तं सर्वं निगमयति । परो दिवा । पर इति सकारांतं परस्तादित्यर्थे वर्तते यथाध इत्यधस्तादर्थे । तद्योगे च तृतीया सर्वत्र दृश्यते । दिव आकाशस्य परस्तात् । एना पृथिव्या ॥ द्वितीयाटौःस्वेन इतीदम एनादेशः ॥ अस्याः पृथिव्याः परः परस्तात् । द्यावापृथिव्योरुपादानमुपलक्षणं । एतदुपलक्षितात्सर्वाद्विकारजातात्परस्ताद्वर्तमानासंगोदासीनकूटस्थब्रह्मचैतन्यरूपाहं महिना महिम्नैतावती सं बभूव । एतच्छब्देनोक्तं सर्वं परामृश्यते । एतत्परिमाणमस्याः ॥ यत्तदेतेभ्यः परिमाणे । पा० ५. २. ३९. । इति वतुप् । आ सर्वनाम्न इत्यात्वं ॥ सर्वजगदात्मनाहं संभूतास्मि ॥ महच्छब्दादिमनिचि टेरिति टिलोपः । ततः तृतीयायामुदात्तनिवृत्तिस्वरेण तस्या उदात्तत्वं । छांदसो मलोपः ॥ ॥१२॥

न तमित्यष्टर्चं चतुर्दशं सूक्तं शिलूषपुत्रस्य कुत्सलवर्हिषस्यार्षं वामदेवपुत्रस्यांहोमुग्ब्राह्मो वा । वैश्वदेवं । अष्टमी त्रिष्टुप् शिष्टा उपरिष्टाद्बृहत्यः । अष्टकद्वादशकवत्युपरिष्टाद्बृहती । अंत्यश्चेदुपरिष्टाद्बृहती । अनु० ७. ४. । इति हि तल्लक्षणं । तथा चानुक्रांतं । न तं शैलूषः कुत्सलवर्हिषो वामदेव्यो वांहोमुग्विश्वदेवमुपरिष्टाद्बार्हतमंत्या त्रिष्टुबिति ॥ गतो विनियोगः ॥

न तमंहो न दुरितं देवासो अष्ट मर्त्यं ।
सजोषसो यमर्यमा मित्रो नयति वरुणो अति द्विषः ॥१॥
न । तं । अंहः । न । दुःऽइतं । देवासः । अष्ट । मर्त्यं ।
सऽजोषसः । यं । अर्यमा । मित्रः । नयति । वरुणः । अति । द्विषः ॥१॥

हे देवासो देवाः ॥ आज्जसेरसुक् ॥ तं मर्त्यं मनुष्यमंहः पापं दुरितं तत्फलरूपं दुर्गमनं च नाष्ट । न प्राप्नोति ॥ अग्निश्छांदसे लुङि झलो झलीति सिचो लोपः । अडभावश्छांदसः ॥ अरीन्नियच्छतीत्यर्यमा प्रमीतेस्त्रायको देवो मित्रः पापानां निवारयिता देवो वरुणः । एते त्रयो देवाः सजोषसः संगताः समानं प्रीयमाणा वा भवंतो द्विषो द्वेष्टॄञ्शत्रूनतिक्रम्य यं स्तोतारं नयंत्यभिमतं देशं प्रापयंति तं नाष्टेत्यन्वयः ॥

तद्वि वयं वृणीमहे वरुण मित्रार्यमन् ।
येना निरंहसो यूयं पाथ नेथा च मर्त्यमति द्विषः ॥२॥
तत् । हि । वयं । वृणीमहे । वरुण । मित्र । अर्यमन् ।
येन । निः । अंहसः । यूयं । पाथ । नेथ । च । मर्त्यं । अति । द्विषः ॥२॥

हिरवधारणे । तद्वि तदेव रत्नं वयं वृणीमहे । प्रार्थयामहे ॥ सति शिष्टेऽपि विकरणस्य स्वरो लसार्वधातुकस्वरं न बाधते । म० ६. १. १५८. ११. । इति वचनात्त्रिङ एव स्वरः शिष्यते । हि चेति निघात-

प्रतिषेधः ॥ हे वरुण हे मित्र हे अर्यमन् येन रक्षणेन मर्त्यं स्तोतारमंहसः पापाद्यूयं निः पाथ निःशेषेण रक्षथ ॥ पा रक्षणे आदादिकः । यद्वृत्तान्नित्यमिति निघातप्रतिषेधः ॥ येन च रक्षणेन मर्त्यं मनुष्यं स्तोतारं द्विषोऽति नेथ अतीत्य नयथ अभीष्टं प्रापयथ तदूतीमह इत्यन्वयः ॥ नयतेश्छांदसः शपो लुक् ॥

ते नूनं नोऽयमूतये वरुणो मित्रो अर्यमा ।
नयिष्ठा उ नो नेषणि पर्षिष्ठा उ नः पर्षण्यति द्विषः ॥३॥

ते । नूनं । नः । अयं । ऊतये । वरुणः । मित्रः । अर्यमा ।
नयिष्ठाः । ऊं इति । नः । नेषणि । पर्षिष्ठाः । ऊं इति । नः । पर्षणि । अति । द्विषः ॥३॥

अयं वरुणो मित्रश्चार्यमा च देवा नोऽस्माकमूतये रक्षणाय नूनमवश्यं भवंतु । नेषणि नेतव्ये विषये हे वरुणादयः यूयं नोऽस्मान्नयिष्ठाः । नयत ॥ वचनव्यत्ययः । यद्वा । प्रत्येकाभिप्रायेणैकवचनं । छांदसो लुक् ॥ उशब्दः समुच्चये पदपूरणार्थो वा । पर्षणि पारयितव्ये विषये नोऽस्मान्द्विषोऽति पर्षिष्ठाः । अतिपारयथ ॥ नयिष्ठा इतिवत्प्रक्रिया ॥

यूयं विश्वं परि पाथ वरुणो मित्रो अर्यमा ।
युष्माकं शर्मणि प्रिये स्याम सुप्रणीतयोऽति द्विषः ॥४॥

यूयं । विश्वं । परि । पाथ । वरुणः । मित्रः । अर्यमा ।
युष्माकं । शर्मणि । प्रिये । स्याम । सुऽप्रनीतयः । अति । द्विषः ॥४॥

हे देवा वरुणादयः यूयं विश्वं सर्वं जगत्परि पाथ । परितो रक्षथ । हे सुप्रणीतयः शोभनप्रणयना मित्रादयः युष्माकं युष्मदीये युष्माभिर्दत्ते प्रियेऽनुकूले वेदे शर्मणि सुखे वयं स्याम । भवेम । द्विषो द्वेष्टॄंश्चाति क्रामेम ॥

आदित्यासो अति स्रिधो वरुणो मित्रो अर्यमा ।
उग्रं मरुद्भी रुद्रं हुवेमेंद्रमग्निं स्वस्तयेऽति द्विषः ॥५॥

आदित्यासः । अति । स्रिधः । वरुणः । मित्रः । अर्यमा ।
उग्रं । मरुत्ऽभिः । रुद्रं । हुवेम । इंद्रं । अग्निं । स्वस्तये । अति । द्विषः ॥५॥

आदित्यासोऽदितिः पुत्रा वरुणादयो देवाः स्रिधो हिंसकान्शत्रूनस्मानति नयंतु । मरुद्भिः पुत्रैः सहितमुग्रमुत्कृष्टतेजसं रुद्रमिंद्रमग्निं च स्वस्तये क्षेमाय ऊतवे । आङ्पूर्वेमहि ॥ ह्वयतेराशीर्लिंगि वसुरं छंदसीति संप्रसारणं । लिड्यासीष्यङ् ॥ आहृतास्तेऽस्मान्द्विषो द्वेष्टॄनति नयंतु ॥

नेतारो उ षु णस्तिरो वरुणो मित्रो अर्यमा ।
अति विश्वानि दुरिता राजानश्चर्षणीनामति द्विषः ॥६॥

नेतारः । ऊं इति । सु । नः । तिरः । वरुणः । मित्रः । अर्यमा ।
अति । विश्वानि । दुःऽइता । राजानः । चर्षणीनां । अति । द्विषः ॥६॥

नेतारो नयनकुशलाः ॥ नयतेः साधुकारिणि तृन् ॥ वरुणादयो देवा नोऽस्माकं पापानि सु सुष्ठु तिरश्चिरोधानमदर्शनं नयंतु । उ इति पूरणः । चर्षणीनां मनुष्याणां राजानः स्वामिनो वरुणादयो देवा

विश्वानि सर्वाणि दुरिता दुरितानि दुर्गमनानि पापफलरूपाण्यस्मानति नयंतु । द्विषो द्वेष्टॄन्मच्चूंश्चाति नयंतु ॥ नामन्यतरस्यामिति चर्षणिशब्दात्परस्य नाम उदात्तत्वं ॥

शुनमस्मभ्यमूतये वरुणो मित्रो अर्यमा ।
शर्म यच्छंतु सप्रथ आदित्यासो यदीमहे अति द्विषः ॥७॥
शुनं । अस्मभ्यं । ऊतये । वरुणः । मित्रः । अर्यमा ।
शर्म । यच्छंतु । सऽप्रथः । आदित्यासः । यत् । ईमहे । अति । द्विषः ॥७॥

वरुणादयो देवा ऊतये रक्षायै शुनं सुखमस्मभ्यं स्तोतृभ्यः प्रयच्छंतु । तथादित्यासोऽदितेः पुत्रासः सप्रथः सर्वतः पृथु विस्तीर्णं शर्म सुखं च यच्छंतु । अस्मभ्यं ददतु । यच्छर्म वयमीमहे याचामहे । द्विषश्चाति नयंतु ॥

यथा ह त्यद्वसवो गौर्यं चित्पदि षिताममुंचता यजत्राः ।
एवो ष्वस्मन्मुंचता व्यंहः प्र तार्यग्ने प्रतरं न आयुः ॥८॥
यथा । ह । त्यत् । वसवः । गौर्यं । चित् । पदि । सितां । अमुंचत । यजत्राः ।
एवो इति । सु । अस्मत् । मुंचत । वि । अंहः । प्र । तारि । अग्ने । प्रऽतरं । नः । आयुः ॥८॥

हे वसवो वासका हे यजत्रा यागार्हा मित्रादयो देवाः ॥ अमिनतीत्यादिना । उ० ३. १०५ । यजेरत्रन्प्रत्ययः ॥ त्यत् ते प्रसिद्धा यूयं ॥ सुपां सुलुगिति विभक्तेर्लुक् ॥ यथा ह यथा खलु पदि पादे सितां बद्धां ॥ पहन्नित्यादिना पादशब्दस्य पदादेशः । ऊडिदंपदादीत्यादिना सप्तम्या उदात्तत्वं । षिञ् बंधन इत्यस्मान्निष्ठा ॥ ईदृशीं गौर्यं गौरीं गौरवर्णां सोमक्रयणीं गां ॥ षिद्गौरादिभ्यश्चेति ङीष् । अमि पूर्व इत्यत्र वा छंदसीत्यनुवर्तनात्पूर्वरूपस्य पूर्वसवर्णदीर्घस्य चाभावे यण् । उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं ॥ ईदृशीं गामसुंचत यथा खलु यूयं विश्वावसोर्गंधर्वान्मोचितवंतः एवो एवमेवास्मदस्मत्तोऽंहः पापं सुष्ठु वि मुंचत । विश्लेषयत । हे अग्ने नोऽस्माकमायुर्जीवनं प्रतरं प्र तारि । प्रकर्षेण त्वया प्रवर्धतां । प्रपूर्वस्तिरतिर्वर्धनार्थः ॥ प्रशब्दात्तरप्यमु च छंदसीत्यमुप्रत्ययः ॥ ॥ १३ ॥

राचीत्यष्टर्चं पंचदशं सूक्तं सोभरिपुत्रस्य कुत्सिकस्यार्षं । यद्वा । भारद्वाजस्य सुता राज्याख्यास्य सूक्तस्यर्षिका । गायत्रं राचिदेवताकं । तथा चानुक्रांतं । राची कुत्सिकः सौभरो राचिर्वा भारद्वाजी राचिस्तवं गायत्रमिति ॥ दुःस्वप्नदर्शन उपोषितेन कर्त्रा पायसेन होतव्यं । तच्चैतत्सूक्तं करणत्वेन विनियुक्तं । तथा चारण्यके श्रूयते । स यश्चैतेषां किंचित्पशुमुपोष्य पायसं स्थालीपाकं श्रपयित्वा राचीसूक्तेन प्रत्यृचं हुत्वा । ऐ० आ० ३. २. ४. । इति ॥

राची व्यख्यदायती पुरुचा देव्यक्षभिः । विश्वा अधि श्रियोऽधित ॥१॥
राची । वि । अख्यत् । आऽयती । पुरुऽचा । देवी । अक्षऽभिः । विश्वाः । अधि ।
श्रियः । अधित ॥१॥

आयत्यागच्छंती ॥ आङ्पूर्वादेतेः शतर्यादित्वाच्छपो लुक् । इणो यणिति यणादेशः । उगितश्चेति ङीप् । शतुरनुम इति नदा उदात्तत्वं ॥ अक्षभिरक्षिस्थानीयैः प्रकाशमानैर्नक्षत्रैः ॥ छंदस्यपि दृश्यत इत्यक्षिशब्दस्थानङादेशः ॥ यद्वा । अक्षभिरंजनैस्तेजोभिः । पुरुचा बहुषु देशेषु देवी देवनशीला ॥ देवमनुष्यपुरुषपुरुमर्तेभ्य इत्यादिना पुरुशब्दात्सप्तम्यर्थे चाप्रत्ययः ॥ राचीयं राचिदेवता व्यख्यत् । विचष्टे । विशेषेण पश्यति ॥ राचेरजसाविति ङीप् । ख्यातेश्छांदसे लुङ्यसतिवक्तीत्यादिना च्लेरङादेशः ॥ अपि चैषा विश्वाः सर्वाः

श्रियः शोभा अधधित । अधिधारयति ॥ दधातेर्लुङि ख्याध्वोरिच्चेतीत्वं । सिचः कित्त्वं । हृस्वादंगादिति सिचो लोपः ॥

ओर्वप्रा अमर्त्या निवतो देव्युद्वतः । ज्योतिषा बाधते तमः ॥२॥
आ । उरु । अप्राः । अमर्त्या । निऽवतः । देवी । उत्ऽवतः । ज्योतिषा । बाधते । तमः ॥२॥

अमर्त्या मरणरहिता देवी देवनशीला रात्रिरूरु विस्तीर्णमंतरिक्षमाप्राः । प्रथमतस्तमसापूरयति ॥ प्रा पूरणे आदादिकः । लङि व्यत्ययेन मध्यमः ॥ तथा निवतो नीचीनाञ्चँतागुल्मादीनुद्वत उत्थितान्वृक्षादींश्च स्वकीयेन तेजसावृणोति । तदनंतरं तत्तमोऽधकारं ज्योतिषा ग्रहनक्षत्रादिरूपेण तेजसा बाधते । पीडयति ॥

निरु स्वसारमस्कृतोषसं देव्यायती । अपेदु हासते तमः ॥३॥
निः । ऊं इति । स्वसारं । अकृत । उषसं । देवी । आऽयती । अप । इत् । ऊं इति । हासते । तमः ॥३॥

आयत्यागच्छंती देवी देवनशीला रात्रिः स्वसारं भगिनीमुषसं निरकृत । निष्करोति । प्रकाशेन संस्करोति । निवर्तयतीत्यर्थः । तस्यामुषसि जातायां नैशं तमोऽपेद्दासते । अपैव गच्छति ॥ ओहाङ् गतौ । लेट्यडागमः । सिब्बहुलमिति सिप् ॥

सा नो अद्य यस्या वयं नि ते यामन्नविक्ष्महि । वृक्षे न वसतिं वयः ॥४॥
सा । नः । अद्य । यस्याः । वयं । नि । ते । यामन् । अविक्ष्महि । वृक्षे । न । वसतिं । वयः ॥४॥

अद्यास्मिन्काले नोऽस्माकं सा रात्रिदेवता प्रसीदतु यस्या रात्रेर्यामन्यामनि प्राप्तौ सत्यां वयं न्यविक्ष्महि निविशामहे सुखेन गृह आस्महे ॥ विशेर्लङि नेर्विशः । पा० १. ३. १७. । इत्यात्मनेपदं । छांदसः शपो लुक् ॥ तत्र दृष्टांतः । वयः पक्षिणो वृक्षे न यथा वृक्षे नीडाश्रये वसतिं रात्रौ निवासं कुर्वंति तथा निवसाम इत्यर्थः ॥

नि ग्रामासो अविक्षत नि पद्वंतो नि पक्षिणः । नि श्येनासश्चिदर्थिनः ॥५॥
नि । ग्रामासः । अविक्षत । नि । पत्ऽवंतः । नि । पक्षिणः । नि । श्येनासः । चित् । अर्थिनः ॥५॥

ग्रामासो ग्रामाः । अत्र ग्रामशब्दो जनसमूहे वर्तते यथा ग्राम आगत इति । सर्वे जना न्यविशत । तस्यां रात्रावागतायां निविशंते । शेरते ॥ निपूर्वाद्विशतेश्छांदसे लुङि पूर्ववदात्मनेपदं । शल इगुपधादनिटः क्सः । पा० ३. १. ४५. । क्सस्याचि । पा० ७. ३. ७२. । इत्यकारलोपः ॥ तथा पद्वंतः पादयुक्ता गवाश्वादयश्च निविशंते । तथा पक्षिणः पक्षोपेताश्च निविशंते । अर्थिनः । अर्तेरर्थो गमनं । शीघ्रगमनयुक्ताः श्येनासश्चिच्छीघ्रा अपि तस्यां रात्र्यां निविशंते । एषा रात्रिः सर्वाणि भूतजातान्यहनि संचारेण श्रांतानि स्वयमागत्य सुखयतीत्यर्थः ॥

यावया वृक्यं वृकं यवय स्तेनमूर्म्ये । अथा नः सुतरा भव ॥६॥
यवय । वृक्यं । वृकं । यवय । स्तेनं । ऊर्म्ये । अथ । नः । सुऽतरा । भव ॥६॥

हे ऊर्म्ये । रात्रिनामैतत् । रात्रे वृक्यं वृकस्य स्त्रियं वृकं चास्मान्हिंसंतं यवय । अस्मत्तः पृथक्कुरु । अस्मान्बाधितुं यथा न प्राप्नोति तथा । स्तेनं तस्करं च यवय । अस्मत्तो वियोजय । अथानंतरं नोऽस्माकं सुतरा सुखेन तरणीया क्षेमकरी भव ॥

उप॑ मा॒ पेपिशत्तमः कृ॒ष्णं व्यक्त॒मस्थित । उष॑ ऋ॒णेव॑ यातय ॥७॥
उप॑ । मा॒ । पेपिशत् । तमः॑ । कृ॒ष्णं । विऽअ॑क्तं । अ॒स्थि॒त॒ । उषः॑ । ऋ॒णाऽइ॑व । या॒त॒य॒ ॥७॥

पेपिशत्पृशं पिंशत् सर्ववस्तुव्याप्तिष्टं तमोऽधकारं कृष्णं कृष्णवर्णं व्यक्तं विशेषेण स्वभासा सर्वस्मांजकं स्पष्टरूपं वा ईदृशं नैशं तमो मामुपास्थित । उपागच्छत् ॥ संगतकरण आत्मनेपदं ॥ हे उष उषोदेवते त्वमृणेवर्णानीव तत्तमो यातय । अपगमय । स्तोतृणामृणानि यथा धनप्रदानेनापाकरोषि तथा तमो ऽप्यपसारयेत्यर्थः ॥

उप॑ ते गा इ॒वाक॑रं वृणीष्व दुहितर्दिवः । रात्रि॒ स्तोमं॑ न जिग्युषे ॥८॥
उप॑ । ते॒ । गाःऽइ॑व । आ । अ॒क॒र॒म् । वृ॒णी॒ष्व॒ । दु॒हि॒तः॒ । दि॒वः॒ । रात्रि॑ । स्तोम॑म् । न । जि॒ग्युषे॑ ॥८॥

हे रात्रि रात्रिदेवते ते त्वां गा इव पयसो दोग्ध्रीर्धेनूरिवोपेत्याकरं । स्तुतिभिरभिमुखीकरोमि ॥ करोतेश्छांदसे लुङि क्षमृदृरुहिभ्य इति च्लेरङादेशः ॥ दिवो दुहितर्द्योतमानस्य सूर्यस्य पुत्रि यद्वा दिवसस्य तनये ॥ परमपि च्छंदसि । पा० २. १. २. ६. । इति परस्य षष्ठ्यंतस्य पूर्वामंत्रितांगवद्भावात्पदद्वयसमुदायस्याष्टमिकं सर्वानुदात्तत्वं ॥ त्वत्प्रसादाज्जिग्युषे शत्रूञ्जिग्युषो मम स्तोमं न स्तोत्रमिव हविरपि वृणीष्व । त्वं भजस्व ॥ जयतेर्लिटः क्वसुः । सन्लिटोर्जेरित्यभ्यासादुत्तरस्य जकारस्य कुत्वं । षष्ठ्यर्थे चतुर्थी वक्तव्येति चतुर्थी । वसोः संप्रसारणमिति संप्रसारणं ॥ ॥१४॥

ममाग्न इति नवर्चं षोडशं सूक्तमांगिरसस्य विहव्यस्यार्षं वैश्वदेवं । अंत्या जगती शिष्टास्त्रिष्टुभः । अनुक्रम्यते हि । ममाग्ने नव विहव्यो वैश्वदेवं जगत्यंतमिति ॥ संसवे निमित्तभूते वैश्वदेवसूक्तस्य पुरस्तादेतच्छंस्यं । सूचितं च । ममाग्ने वर्च इति वैश्वदेवसूक्तस्यापि वैतेष्वेव निविदो दध्यात् । आ० ६. ६. । इति ॥ समावर्तनेऽनेन सूक्तेन सिष्णासुना प्रत्यृचं समिदाधातव्या । सूचितं च । ममाग्ने वर्च इति प्रत्यृचं समिधोऽभ्यादध्यात् । आ० गृ० ३. ९. २. । इति ॥

ममाग्ने॒ वर्चो॑ विह॒वेष्व॑स्तु व॒यं त्वेधा॑नास्त॒न्वं॑ पुषेम ।
मह्यं॑ नमंतां प्र॒दिश॒श्चत॑स्र॒स्त्वया॒ध्यक्षे॑ण पृत॒ना ज॑येम ॥१॥
मम॑ । अ॒ग्ने॒ । वर्चः॑ । वि॒ऽह॒वेषु॑ । अ॒स्तु॒ । व॒यं । त्वा॒ । इ॒धा॒नाः॑ । त॒न्व॑म् । पु॒षे॒म॒ ।
मह्य॑म् । न॒मं॒ता॒म् । प्र॒ऽदिशः॑ । चत॑स्रः । त्वया॑ । अधि॑ऽअक्षेण । पृ॒त॒नाः॑ । ज॒येम॒ ॥१॥

हे अग्ने । विविधमाह्वयंते येषु शूरा इति विहवाः संग्रामाः । यद्वा । विविधं यागार्थं देवा आह्वयंत एष्विति विहवा यज्ञाः ॥ ह्वः संप्रसारणं च न्यभ्युपविषु । पा० ३. ३. ७२. । इत्यधिकरणेऽप् संप्रसारणं च । थाथादिनोत्तरपदांतोदात्तत्वं ॥ संग्रामेषु यज्ञेषु वा वर्चो दीप्तिस्त्वदनुग्रहान्ममास्तु । भवतु । वयं च त्वा त्वामिंधानाः समिद्भिर्दीपयंतस्तन्वं तव शरीरं पुषेम । हविर्भिर्वर्धयेम ॥ इंधेः शानचि श्नसोरल्लोप उदात्तनिवृत्तिस्वरेण शानच आद्युदात्तत्वे प्राप्ते विभाषा वेरिंधानयोः । पा० ६. १. २१५. । इत्याद्युदात्तत्वं ॥ तन्वं पुषेम ॥ पुषेर्लिङि सिज्याशिष्यङ् ॥ अपि च मह्यं मदर्थं ॥ ङयि चेत्यस्माद् आद्युदात्तत्वं ॥ चतस्रः प्रदिशः प्रकृष्टा दिशः । तद्वासिनो जना इत्यर्थः । नमंतां । स्वत एव प्रह्वीभवंतु ॥ नमतेः कर्मकर्तरि लोटि न दुहस्नुनमामिति यक्प्रतिषेधः ॥ त्वयाध्यक्षेणाधक्षेणेश्वरेण सता पृतनाः शत्रुसेना जयेम । अभिभवेम ॥

मम॑ दे॒वा वि॑ह॒वे सं॑तु सर्व॒ इंद्र॑वंतो मरुतो॒ विष्णु॑रग्निः ।
मम॑ांत॒रिक्ष॑मुरुलो॒कम॑स्तु॒ मह्यं॒ वातः॑ पवतां॒ कामे॑ अ॒स्मिन् ॥२॥

मम । देवाः । विऽहवे । संतु । सर्वे । इंद्रऽवंतः । मरुतः । विष्णुः । अग्निः ।
मम । अंतरिक्षं । उरुऽलोकं । अस्तु । मह्यं । वातः । पवतां । कामे । अस्मिन् ॥२॥

सर्वे देवा विहवे संग्रामे यज्ञे वा मम संतु । ममैव साधका भवंतु । के पुनस्ते । इंद्रवंत इंद्रेण युक्ता मरुतो विष्णुरग्निश्च । तथांतरिक्षं ममोरुलोकं विस्तीर्णप्रकाशकमस्तु ॥ लोक दर्शने । भावे घञ् । लोक आलोकः प्रकाशः । उरुर्लोको यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥ अपि चास्मिन्कामे कामयितव्ये फले निमित्तभूते सति वातो वायुः पवतां । अनुगुणं प्रवातु ॥ पूङ् पवने भौवादिकः । ऊडिदमित्यादिनेदमः सप्तम्या उदात्तत्वं ॥

मयि देवा द्रविणमा यजंतां मय्याशीरस्तु मयि देवहूतिः ।
दैव्या होतारो वनुषंत पूर्वेऽरिष्टाः स्याम तन्वा सुवीराः ॥३॥
मयि । देवाः । द्रविणं । आ । यजंतां । मयि । आऽशीः । अस्तु । मयि । देवऽहूतिः ।
दैव्याः । होतारः । वनुषंत । पूर्वे । अरिष्टाः । स्याम । तन्वा । सुऽवीराः ॥३॥

देवाः सर्वे द्रविणं धनं मयि स्तोतर्या यजंतां । गमयंतु । मह्यं ददत्वित्यर्थः । तथाशीराशंसनीयं यज्ञफलं च मय्येवास्तु । देवानां ह्वतिराह्वानमस्मिन्निति देवह्वतिर्यज्ञः । स च मय्यस्तु । अपि च देवानामिमे दैव्याः ॥ देवाद्यञ्त्रावितियञ् ॥ तादृशा होतारः साधुहोमनिष्पादका मदीया ऋत्विजः पूर्वेऽन्यदीयेभ्य ऋत्विग्भ्यः प्रथमभाविनः संतो वनुषंत । देवान्संभजंतां ॥ वनतेश्छांदसे लडि व्यत्ययो बहुलमिति त्रयो विकरणा उप्रत्ययः सिप्शपौ च । अडभावश्छांदसः ॥ वयं च तन्वा शरीरेणारिष्टा अहिंसिताः सुवीराः सुपुत्राश्च स्याम । भवेम ॥ वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं ॥

मह्यं यजंतु मम यानि हव्याकूतिः सत्या मनसो मे अस्तु ।
एनो मा नि गां कतमच्चनाहं विश्वे देवासो अधि वोचता नः ॥४॥
मह्यं । यजंतु । मम । यानि । हव्या । आऽकूतिः । सत्या । मनसः । मे । अस्तु ।
एनः । मा । नि । गां । कतमत् । चन । अहं । विश्वे । देवासः । अधि । वोचत । नः ॥४॥

मह्यं मदर्थं यजंतु । ऋत्विजो देवान्हविर्भिर्यजंतु । यद्वा । षष्ठ्यर्थे चतुर्थी । मह्यं मदीया ऋत्विज इत्यर्थः । मम स्वभूतानि हव्यानि यानि हवींषि चरुपुरोडाशादीनि संति तैर्हविर्भिरित्यर्थः । तथा मे मनस आकूतिः संकल्पनमभीष्टस्य प्रार्थनं सत्या यथार्थमस्तु । अपि चाहं कतमच्चन किमप्येनः पापं मा नि गां । मा नियतं निकृष्टतरं वा गच्छेयं । पापं मा कार्षमित्यर्थः ॥ एतेर्माङि लुङीणो गा लुङीति गादेशः । गातिस्थेति सिचो लुक् ॥ अपि च हे विश्वे सर्वे देवासो देवाः यूयं नोऽस्माकमधि वोचत । विवादेषु पक्षपातेन ब्रूत ॥ वक्तेर्लोटि व्यत्ययेनाट् । वच उमित्युमागमः ॥

देवीः षळुर्वीरुरु नः कृणोत विश्वे देवास इह वीरयध्वं ।
मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन् ॥५॥
देवीः । षट् । उर्वीः । उरु । नः । कृणोत । विश्वे । देवासः । इह । वीरयध्वं ।
मा । हास्महि । प्रऽजया । मा । तनूभिः । मा । रधाम । द्विषते । सोम । राजन् ॥५॥

हे षडुर्वीः षट्संख्याका उर्व्यः । एताश्चान्यत्राम्नायंते । षण्मोर्वीरंहसः पांतु द्यौश्च पृथिवी चाहश्च रात्रि-

स्यापस्यौषधयश्चेति । ईदृशो हे देवीर्देव्यः ॥ असि वा छंदसीति पूर्वसवर्णदीर्घः । नामंचिते समानाधिकरणे सामान्यवचनमित्यस्याविद्यमानत्वनिषेधेन षकुवीरित्यनयोरामंचितयोः पदात्परत्वादाष्टमिकमामंचितानुदात्तत्वं ॥ ता यूयमुरु विस्तीर्णं धनं नोऽस्माकं क्षणोत । कुरुत ॥ क्षवि हिंसाकरणयोः । धिन्विकृण्व्योरच्त्रियुप्रत्ययः । तप्ततनप्ततनथनाश्चेति तस्य तबादेशः ॥ हे विश्वे सर्वे देवासो देवाः यूयं चेहास्मिन्धने प्राप्तव्ये विषये वीरयध्वं । विक्रामयत । तथा वयं तद्धनं लभेमहि । तथा वीर्यवंतो यूयं प्रयच्छध्वमित्यर्थः ॥ वीर विक्रांतौ ॥ अपि च प्रजया पुत्रादिरूपया मा ह्रास्महि । वयं मा परित्यज्येमहि । मा च तनूभिः शरीरैस्त्यज्येमहि । अस्मान्कदाचिदपि पुत्राद्यः शरीराणि च मा परित्यागुरित्यर्थः ॥ ओहाक् त्यागे । अस्मात्कर्मणि लुङि चिण्वद्भावाभावे रूपमेतत् ॥ तथा हे राजन्राजमान यद्वास्माकं स्वामिन् हे सोम द्विषतेऽप्रीतिं कुर्वते ॥ द्विषेः शतर्यदादित्वाच्छपो लुक् । शतुरनुम इति विभक्तेरुदात्तत्वं । षष्ठ्यर्थे चतुर्थी वक्तव्येति चतुर्थी ॥ द्विषतः शत्रोर्मा रधाम । मा वशं प्रापयाम । तथा त्वं कुर्वित्यर्थः । रध्यतिर्वशगमन इति यास्कः । नि० ६. ३२. । यद्वा । द्विषते शत्रवे तदर्थं मा रधाम । परिपक्वा हननार्हा मा भूम । रध हिंसासंराद्ध्योः । संराद्धिः पाक इति तवृत्तिः । माङि लुङि पुषादित्वाच्लेरङादेशः ॥ ॥ १५ ॥

अग्ने मन्युं प्रतिनुदन्परेषामदब्धो गोपाः परि पाहि नस्त्वं ।
प्रत्यंचो यंतु निगुतः पुनस्तेऽमैषां चित्तं प्रबुधां वि नेशत् ॥ ६ ॥
अग्ने । मन्युं । प्रतिऽनुदन् । परेषां । अदब्धः । गोपाः । परि । पाहि । नः । त्वं ।
प्रत्यंचः । यंतु । निऽगुतः । पुनः । ते । अमा । एषां । चित्तं । प्रऽबुधां । वि । नेशत् ॥ ६ ॥

हे अग्ने परेषां शत्रूणां मन्युं क्रोधं प्रतिनुदन् प्रतिमुखं प्रेरयंस्त्वं रक्षन्नदब्धः केनाप्यहिंसितो गोपा गोपायिता ॥ गुपू रक्षण इत्यस्मादायप्रत्ययांतात्क्विपि वेरपृक्तस्य लोपात्पूर्वं वलि लोपे रूपमेतत् ॥ ईदृशस्त्वं नोऽस्मान्परि पाहि । परितः सर्वतो रक्ष । ते शत्रवः प्रत्यंचः प्रत्यंचंतः प्रतिनिवर्तमाना निगुतः ॥ गुङ् अव्यक्ते शब्दे । अस्मात्क्विपि तुक् ॥ भयेन गद्गदरूपमव्यक्तं शब्दं नितरां कुर्वंतः पुनर्यंतु । स्वकीयं स्थानं पुनर्गच्छंतु । अपि च प्रबुधां प्रबुध्यमानानामेतेषां शत्रूणां चित्तं ज्ञानसाधनं मनोऽमा सह युगपदेव वि नेशत् । विनश्यतु ॥ प्रत्येकाभिप्रायेणैकवचनं । णश अदर्शन इत्यस्माच्छांदसो लुङ् । पुषादित्वाच्लेरङादेशः । नशिमन्योरलिट्येत्वं वक्तव्यं । पा० ६. ४. १२०. ५. । इत्यकारस्येत्वं ॥

धाता धातॄणां भुवनस्य यस्पतिर्देवं त्रातारमभिमातिषाहं ।
इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पांतु यजमानं न्यर्थात् ॥ ७ ॥
धाता । धातॄणां । भुवनस्य । यः । पतिः । देवं । त्रातारं । अभिमातिऽसहं ।
इमं । यज्ञं । अश्विना । उभा । बृहस्पतिः । देवाः । पांतु । यजमानं । निऽअर्थात् ॥ ७ ॥

धातॄणां स्रष्टॄणामपि धाता स्रष्टा भुवनस्य क्षत्तस्य भूतजातस्य य इंद्रः सविता वा पतिः पालयिता तं देवं देवनशीलं त्रातारं सर्वेभ्यो भयेभ्यः पालयितारमभिमातिषाहमभिमातीनां शत्रूणां सोढारमभिभवितारं एवंगुणविशिष्टमिंद्रं सवितारं वा स्तौमीति शेषः ॥ षह अभिभवे । छंदसि सह इति ण्विप्रत्ययः । छांदसं विभक्त्युदात्तत्वं ॥ उभौभावश्विनौ बृहस्पतिश्चैतत्प्रमुखाः सर्वे देवा इमं यज्ञमनुष्ठीयमानं यजमानं च न्यर्थान्निकृष्टादर्थात्पापात् । यद्वा । अर्थस्य प्रयोजनस्याभावो न्यर्थं । तस्मात्पांतु । रक्षंतु । सफलं कुर्वंत्वित्यर्थः ॥ नेरनिधाने । पा० ६. २. १९२. । इत्युत्तरपदांतोदात्तत्वं ॥

उरुष्यचा नो महिषः शर्म यंसदस्मिन्हवे पुरुहूतः पुरुष्टुतः ।
स नः प्रजायै हर्यश्व मृळयेंद्र मा नो रीरिषो मा परा दाः ॥ ८ ॥

उरुऽव्यचाः । नः । महिषः । शर्म । यंसत् । अस्मिन् । हवे । पुरुऽहूतः । पुरुऽक्षुः ।
सः । नः । प्रऽजायै । हरिऽअश्व । मृळय । इंद्र । मा । नः । रिरिषः । मा । परा । दाः ॥ ८ ॥

उरुव्यचा विस्तीर्णव्यापनो महिषो महान्पूज्यो वा पुरुहूतो बहुभिर्यजमानैराहूतः पुरुषुर्बहुनिवासः ॥ क्षियतेर्मितद्वादिभ्य उपसंख्यानं । पा० ३. २. १८०. १. । इति डुप्रत्ययः ॥ यद्वा । पुरुभिर्बहुभिः शब्द्यमानः स्तूयमानः ॥ पूर्ववद्डुप्रत्ययः । औणादिके कर्मणि क्विपि वानित्यमागमशासनमिति तुगभावः ॥ ईदृश इंद्रो ऽस्मिन्हवे यज्ञे । ह्वयंतेऽस्मिन्हवींषीति हवो यज्ञः ॥ जुहोतेरधिकरणेऽप् ॥ यद्वा । अस्मिन्हवे स्वद्विषय आह्वाने ॥ भावेऽनुपसर्गस्येति ह्वयतेरप् संप्रसारणं च ॥ नोऽस्मभ्यं शर्म सुखं यंसत् । यच्छतु । ददात्वित्यर्थः ॥ यमेर्लेट्यडागमः । सिब्बहुलमिति सिप् ॥ हे हर्यश्व हरी अश्वौ यस्य तादृश हे इंद्र स त्वं नोऽस्माकं प्रजायै । द्वितीयार्थे चतुर्थी । प्रजां पुत्रपौत्रादिकां मृळय । सुखय । नोऽस्मान्मा रीरिषः । मा हिंसीः । मा च परा दाः । परादानं परित्यागः । मा परित्याक्षीरित्यर्थः ॥

ये नः सपत्ना अप ते भवंत्विंद्राग्निभ्यामव बाधामहे तान् ।
वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन् ॥ ९ ॥
ये । नः । सऽपत्नाः । अप । ते । भवंतु । इंद्राग्निऽभ्यां । अव । बाधामहे । तान् ।
वसवः । रुद्राः । आदित्याः । उपरिऽस्पृशं । मा । उग्रं । चेत्तारं । अधिऽराजं । अक्रन् ॥ ९ ॥

नोऽस्माकं ये सपत्नाः शत्रवस्तेऽप भवंतु । अपगता भवंतु । स्वस्थानादपगताः प्रच्युता भवंतु । तान्सपत्नानिंद्राग्निभ्यां हविर्भिः स्तुत्या च प्रसन्नाभ्यामनुगृहीता वयमव बाधामहे । निकृष्टतरं विनाशयामः । अपि च वसवो रुद्रा आदित्याश्च मा मामुपरिस्पृशमुन्नतपदस्य संस्पष्टारं सर्वेभ्यः श्रेष्ठमक्रन् । कुर्वंतु । तथोग्रमुद्गूर्णबलं चेत्तारं चेतितारं ॥ छांदस इडभावः ॥ सर्वस्य ज्ञातारमधिराजं सर्वेषामधीश्वरं च मां कुर्वंतु ॥ करोतेश्छांदसे लुङि मंत्रे घसेत्यादिना च्लेर्लुक् ॥ ॥ १६ ॥ ॥ १० ॥

एकादशेऽनुवाके चयोविंशतिसंख्यानि सूक्तानि । तत्र नासदासीदिति सप्तर्चं प्रथमं सूक्तं त्रैष्टुभं । परमेष्ठी नाम प्रजापतिर्ऋषिः । वियदादिभावानां सृष्टिस्थितिप्रलयादीनामत्र प्रतिपाद्यत्वात्तेषां कर्ता परमात्मा देवता । तथा चानुक्रांतं । नासत्सप्त प्रजापतिः परमेष्ठी भाववृत्तं त्विति ॥ गतो विनियोगः ॥

नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत् ।
किमावरीवः कुह कस्य शर्मन्नंभः किमासीद्गहनं गभीरं ॥ १ ॥
न । असत् । आसीत् । नो इति । सत् । आसीत् । तदानीं । न । आसीत् । रजः ।
नो इति । विऽओम । परः । यत् ।
किं । आ । अवरीवरिति । कुह । कस्य । शर्मन् । अंभः । किं । आसीत् । गहनं । गभीरं ॥ १ ॥

तपसस्तन्महिनाजायतैकमित्यादिनाग्रे सृष्टिः प्रतिपादयिष्यते । अधुना ततः प्रागवस्था निरस्तसमस्तप्रपंचा या प्रलयावस्था सा निरूप्यते । तदानीं प्रलयदशायामवस्थितं यदस्य जगतो मूलकारणं तदसच्छशविषाणवन्निरूपाख्यं नासीत् । न हि तादृशात्कारणादस्य सतो जगत उत्पत्तिः संभवति । तथा नो सन्नैव सदात्मवत्सत्त्वेन निर्वाच्यमासीत् । यद्यपि सदसदात्मकं प्रत्येकं विलक्षणं भवति तथापि भावाभावयोः सहावस्थानमपि संभवति । कुतस्तयोस्तादात्म्यमिति उभयविलक्षणमनिर्वाच्यमेवासीदित्यर्थः । ननु नो सदिति पारमार्थिकसत्त्वस्य निषेधः । तर्ह्यात्मनोऽप्यनिर्वाच्यत्वप्रसंगः । अथोच्यते । न । आनीदवातमिति तस्य सत्त्वमग्रे वक्ष्यते परिशेषान्नायाया एवात्र सत्त्वं निषिध्यत इति । एवमपि तदानीमिति विशेषणानर्थक्यं व्यवहारदशायामपि

तस्याः पारमार्थिकसत्त्वाभावात् । अथ व्यावहारिकसतां पृथिव्यादीनां भावानां विद्यमानत्वात् कथं नो सदिति निषेधः । तत्राह । नासीद्रज इत्यादि । लोका रजांस्युच्यंते । नि० ४. १९. । इति यास्कः । अत्र च सामान्यापेक्षमेकवचनं । व्योम्नो वक्ष्यमाणत्वात्तस्याधस्तनाः पातालाद्यः पृथिव्यंता नासन्नित्यर्थः । तथा व्योमांतरिक्षं तदपि नो नैवासीत् । पर इति सकारांतं परस्तादित्यर्थे वर्तते ॥ परश्शब्दाच्छांदसोऽस्तातिरर्थेऽसिप्रत्ययः ॥ परो व्योम्नः परस्तादुपरिदेशे द्युलोकप्रभृतिसत्यलोकांतं यदस्ति तदपि नासीदित्यर्थः । अनेन चतुर्दशभुवनगर्भं ब्रह्मांडं स्वरूपेण निषिद्धं भवति । अथ तदावरकत्वेन पुराणेषु प्रसिद्धानि यानि वियदादिभूतानि तेषामवस्थानप्रदेशं तदावरणनिमित्तं चाक्षेपमुखेन क्रमेण निषेधयति किमावरीवरिति । किमावरणीयं तत्त्वमावरकभूतजातमावरीवः । अत्यंतमावृणुयात् । आवार्याभावात्तदावरकमपि नासीदित्यर्थः ॥ वृणोतेर्यङ्लुगंताच्छांदसे लङि तिपि रूपमेतत् ॥ यद्वा । किमिति प्रथमैव । किं तत्त्वमावरकमावृणुयात् । आवार्याभावादाव्रियमाणवत्तदपि स्वरूपेण नासीदित्यर्थः । आवृण्वत्तत्त्वं कुह कुच देशेऽवस्थायावृणोति । आधारभूतस्तादृशो देशोऽपि नासीदित्यर्थः ॥ किंशब्दात्सप्तम्यर्थे हप्रत्ययः । कु तिहोः । पा० ७. २. १०४. । इति प्रकृतेः कादेशः ॥ कस्य शर्मन् कस्य वा भोक्तुर्जीवस्य शर्मणि सुखदुःखसाक्षात्कारलक्षणे वा निमित्तभूते सति तदावरकं तत्त्वमावृणुयात् । जीवानामुपभोगार्था हि सृष्टिः । तस्यां हि सत्यां ब्रह्मांडस्य भूतैरावरणं प्रलयदशायां च भोक्तारो जीवा उपाधिविलयात्प्रलीना इति कस्य कस्यिदपि भोक्ता न संभवतीत्यावरणस्य निमित्ताभावादपि तन्न घटत इत्यर्थः । एतेन भोग्यप्रपंचवद्भोक्तृप्रपंचोऽपि तदानीं नासीदित्युक्तं भवति ॥ किंशब्दादुत्तरस्य ङसः सावेकाच इति प्राप्तस्योदात्तत्वस्य न गोश्वन्साववर्णेति प्रतिषेधः । सुपां सुलुगिति शर्मणः सप्तम्या लुक् ॥ यद्यपि सावरणस्य ब्रह्मांडस्य निषेधेन तदंतर्गतमप्सत्त्वमपि निराकृतं तथाप्यापो वा इदमग्रे सलिलमासीत् । तै० सं० ७. १. ५. १. । इत्यादिश्रुत्या कस्यिदपां सद्भावमाशंक्येत । तं प्रत्याचष्टेऽंभः किमासीदिति । गहनं दुष्प्रवेशं गभीरं दुःखस्थानमत्यगाधं ईदृशमंभः किमासीत् । तदपि नैवासीदित्यर्थः । श्रुतिस्त्ववांतरप्रलयविषया ॥

न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः ।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास ॥२॥
न । मृत्युः । आसीत् । अमृतं । न । तर्हि । न । रात्र्याः । अह्नः । आसीत् । प्रऽकेतः ।
आनीत् । अवातं । स्वधया । तत् । एकं । तस्मात् । ह । अन्यत् । न । परः । किं ।
चन । आस ॥२॥

ननूक्तस्य प्रतिसंहारस्य संहर्त्रपेक्षत्वात् स एव संहर्ता मृत्युर्विद्यत इत्यत आह । न मृत्युरासीदिति । ननु यदि स नासीत् तर्हि तदभावकृतममृतममरणं प्राणिनामवस्थानं तदानीमपि स्यात् तत्राह । अमृतं न तर्हीति । तर्हि तस्मिन्प्रतिहारसमये । अयं भावः । सर्वेषां प्राणिनां परिपक्वं भोगहेतुभूतं सर्वं कर्म यदोपभुक्तमासीत् तदा भोगाभावान्निरयोजनमिदं जगदिति परमेश्वरस्य मनसि संजिहीर्षा जायते । तथैव स मृत्युः सर्वं जगत्संहरत इति किमनेन मृत्युना संहर्त्रा तदभावकृतं वा कथममरणं स्यादिति । एतदेवाभिप्रेत्य कठैराम्नायते । यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनं । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः । क० उ० २. २५. । इति । नन्वेतस्य सर्वस्याधिकरणभूतः कालो विद्यत इत्यत आह । न रात्र्या इति । न रात्र्या अह्नश्च प्रकेतः प्रज्ञानमासीत् । तद्धेतुभूतयोः सूर्याचंद्रमसोरभावात् । एतेनाहोरात्रनिषेधेन तदात्मको मासर्तुसंवत्सरप्रभृतिकः सर्वः कालः प्रत्याख्यातः । कथं तर्हि नो सदासीत्तदानीमिति कालवाची प्रत्ययः । उपचारादिति ब्रूमः । यथेदानींतननिषेधस्य कालोऽवच्छेदकस्तथा मायापि तदवच्छेदकत्वसाम्येनाकालेऽपि कालवाची प्रत्ययः । यद्वादिष्म ब्रह्मणः परमार्थसत्त्वमग्रे वक्ष्यत इति तदिदानीं दर्शयत्यानीदिति । तत्सकलवेदांतप्रसिद्धं ब्रह्मतत्त्वमानीत् । प्राणितवत् । नन्वेवं प्राणनकर्तुर्जीवभावापन्नस्यैव ब्रह्मणः सत्त्वं स्यात् न विवक्षितस्य निरुपाधिकस्य ब्रह्मणः । अप्राणो ह्यमनाः शुभ्र इति तस्य प्राणसंबंधाभावात् तत्राह्यानीदवातमिति । अयमाशयः । आनीदित्यत्र धात्वर्थक्रिया तत्कर्ता तस्य च भूतकालसंबंध इति त्रयोऽर्थाः प्रतीयंते । तत्र

समुदायो न विधीयते यथाग्नेयोऽष्टाकपाल इति येन ब्रह्मणः सत्त्वं न स्यात् । किं तर्ह्यनेन कर्तृत्वमनूद्य भूतकालसत्तालक्षणो गुणो विधीयते दध्ना जुहोतीति वाक्यांतरविहिताग्निहोत्रानुवादेन तत्र गुणविधानं । तत्राप्यनेन कर्तृत्वविशिष्टस्य न पूर्वकालसत्ता विधीयते तन्निषेधानुपपत्तिप्रसंगात् अतोऽनेन कर्तृत्वेनेदानींतनेनोपलक्षितं यन्निरुपाधिकं परं ब्रह्म तस्यैव भूतकालसत्ता विधीयत इति न कश्चिद्दोष इति । नन्वीदृशस्य ब्रह्मणो मायया सह संबंधासंभवात्सांख्याभिमता स्वतंत्रा सद्रूपा सत्त्वरजस्तमोगुणात्मिका मूलप्रकृतिरेवाभिमतेति कथं नो सदिति निषेधः । तत्राह स्वधयेति । स्वस्मिन्धीयते ध्रियत आश्रित्य वर्तत इति स्वधा माया । तया तद्ब्रह्मैकमविभागापन्नमासीत् ॥ सहयुक्तेऽप्रधाने । पा० २. ३. १९. । इति तृतीया सहशब्दयोगाभावेऽपि सहार्थयोगे भवति वृद्धो यूना । पा० १. २. ६५. । इति निपातनाच्च्छिंगात् ॥ अत्र प्रकृतिप्रत्ययाभ्यां तस्याः स्वातंत्र्यं निवार्यते । यद्यप्यसंगस्य ब्रह्मणस्तया सह संबंधो न संभवति तथापि तस्मिन्नविद्यया तत्स्वरूपमिव संबंधोऽप्यध्यस्यते यथा शुक्तिकायां रजतस्य । एतेन सद्रूपत्वमपि तस्याः प्रत्याख्यातं । ननु यदि माया ब्रह्मणा सहाविभागापन्ना तर्हि तस्या अनिर्वाच्यत्वाद्ब्रह्मणोऽपि तत्प्रसंग इति कथं तस्य सत्त्वमुक्तमागीदवातमिति । ब्रह्मणो वा सत्त्वात्तस्या अपि सत्त्वप्रसंग इति कथं नो सदासीदिति सत्त्वप्रतिषेधः । मैवं । अयुक्तिदृष्टैक्यावभासेऽपि युक्त्या विविच्य मायांशस्यानिर्वाच्यत्वं ब्रह्मणः सत्त्वं च प्रतिपादितं । ननु दृग्दृश्याविति द्वावेव पदार्थावानीदवातं स्वधयेति तौ चेदंगीक्रियेते तत्किमपरमवशिष्यते यन्नासीद्रज इत्यादिना प्रतिषिध्येत तत्राह तस्मादिति । तस्माद्य तस्मात्खलु पूर्वोक्तान्नायासहिताद्ब्रह्मणोऽन्यत्किं चन किमपि वस्तु भूतभौतिकात्मकं जगन्नास । न बभूव ॥ छंदस्युभयथेति लिटः सार्वधातुकत्वादस्तेर्भूभावाभावः ॥ ननु तदानीमन्यस्य सत्त्वनिषेधो न शंक्यः । असत्त्वे चाप्रसक्तत्वान्न निषेधोपयोग इत्यत आह पर इति । परः परस्तात्सृष्टेरूर्ध्वं वर्तमानमिदं जगत्तदानीं न बभूवेत्यर्थः । अन्यथोक्तरीत्या क्वचिदपि निषेधो न स्यादिति भावः ॥

तमं आसीत्तमसा गूळ्हमग्रेऽप्रकेतं सलिलं सर्वमा इदं ।
तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिनाजायतैकं ॥३॥
तमः । आसीत् । तमसा । गूळ्हं । अग्रे । अप्रऽकेतं । सलिलं । सर्वं । आः । इदं ।
तुच्छ्येन । आभु । अपिऽहितं । यत् । आसीत् । तपसः । तत् । महिना । अजायत । एकं ॥३॥

ननूक्तप्रकारेण यदि पूर्वमिदं जगन्नासीत्कथं तर्हि तस्य जन्म । जायमानस्य जनिक्रियायां कर्तृत्वेन कारकत्वात् कारकं च कारणावांतरविशेष इति कारकस्य सतो नियतपूर्ववर्तित्वस्यावश्यंभावात् । अथैतद्दोषपरिजिहीर्षया जनिक्रियायाः प्रागपि तद्विद्यत इत्युच्यते । कथं तस्य जन्म । अत आह । तमसा गूळ्हमग्र इति । अग्रे सृष्टेः प्राक् प्रलयदशायां भूतभौतिकं सर्वं जगत्तमसा गूळ्हं । यथा नैशं तमः सर्वपदार्थजातमावृणोति तद्वत् । आत्मतत्त्वस्यावरकत्वान्मायापरसंज्ञं भावरूपाज्ञानमत्र तम इत्युच्यते । तेन तमसा निगूढं संवृतं कारणभूतेन तेनाच्छादितं भवति । आच्छादकात्तस्मात्तमसो नामरूपाभ्यां यदाविर्भवनं तदेव तस्य जन्मेत्युच्यते । एतेन कारणावस्थायामसदेव कार्यमुत्पद्यत इत्यसद्वादिनोऽसत्कार्यवादिनो ये मन्यंते ते प्रत्याख्याताः । ननु कारणे तमसि तज्जगदात्मकं कार्यं विद्यते चेत् कथं नासीद्रज इत्यादिनिषेधः । तत्राह तम आसीदिति । तमो भावरूपाज्ञानं मूलकारणं । तद्रूपता तदात्मनां । यतः सर्वं जगत्प्राक् तम आसीदतो निषिध्यत इत्यर्थः । नन्वावरकत्वादावरकं तमः कर्तृ आवार्यत्वाज्जगत्कर्म । कथं तयोः कर्मकर्तृभावादात्म्यं । तत्राह । अप्रकेतमिति । अप्रकेतमप्रज्ञायमानं । अयमर्थः । यद्यपि जगतस्तमसश्च कर्मकर्तृभावो यौक्तिको विद्यते तथापि व्यवहारदशायामिव तस्यां दशायां नामरूपाभ्यां विश्लिष्टं न ज्ञायत इति तादात्म्यवर्णनं । अत एव मनुना स्मर्यते । आसीदिदं तमोभूतमप्रज्ञातमलक्षणं । अप्रतर्क्यमनिर्देश्यं प्रसुप्तमिव सर्वतः । मनु० १. ५. । इति । कुतो वा न प्रज्ञायते तत्राह । सलिलं ॥ सल गतौ । औणादिक इलच् ॥ इदं दृश्यमानं सर्वं जगत्सलिलं कारणेन संगतमविभागापन्नमाः । आसीत् ॥ अस्तेर्लङि तिपि बहुलं छंदसीतीडभावे हल्ङ्याब्भ्य इति तिलोपे तिप्यनस्तेः । पा० ८. २. ७३. । इति पर्युदासाद्दकाराभावः ॥ यद्वा सलिलमिति लुप्तोपमं । सलिलमिव । यथा क्षीरेणाविभागापन्नं नीरं दुर्विज्ञानं तथा तमसाविभागापन्नं जगन्न शक्यविज्ञानमित्यर्थः । ननु विविधविचि-

चरूपभूयसः प्रपंचस्य कथमतितुच्छेन तमसा चीरेण नीरस्येवाभिभवः । तथा तमोऽपि चीरवद्बलवदिति-वोच्यते । तर्हि दुर्बलस्य जगतः सर्गसमयेऽपि नोद्भवसंभव इत्यत आह । तुच्छ्येनेति । आ समंताद्भवतीत्याभु तुच्छ्येन ॥ छांदसो यकारोपजनः ॥ तुच्छ्येन तुच्छकल्पनेन सदसद्विलक्षणेन भावरूपाज्ञानेनापिहितं छादित-मासीत् ॥ दधातेः कर्मणि निष्ठा । दधातेर्हि । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं ॥ एकमेकीभूतं कारणेन तमसाविभागतां प्राप्तमपि तत्कार्यजातं तपसः स्रष्टव्यपर्यालोचनरूपस्य महिना माहात्म्येनाजायत । उत्पन्नं । तपसः स्रष्टव्यपर्यालोचनरूपत्वं चान्यत्राम्नायते । यः सर्वज्ञः सर्वविदस्य ज्ञानमयं तपः । मुं० उ० १.१.९.। इति ॥

कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् ।
सतो बंधुमसति निरविंदन्हृदि प्रतीष्या कवयो मनीषा ॥४॥
कामः । तत् । अग्रे । सं । अवर्तत । अधि । मनसः । रेतः । प्रथमं । यत् । आसीत् ।
सतः । बंधुं । असति । निः । अविंदन् । हृदि । प्रतिऽइष्य । कवयः । मनीषा ॥४॥

ननूक्तरीत्या यदीश्वरस्य पर्यालोचनं जगतः पुनरुत्पत्तौ कारणं तदेव किंनिबंधनमित्यत आह कामस्तदग्र इति । अग्रेऽस्य विकारजातस्य सृष्टेः प्रागवस्थायां परमेश्वरस्य मनसि कामः समवर्तत । सम्यगजायत । सिसृक्षा जातित्यर्थः । ईश्वरस्य सिसृक्षा वा किंहेतुकेत्यत आह मनस इति । मनसोऽंतःकरणस्य संबंधि वासनारूपेण मायायां विलीनेऽंतःकरणे समवेतं । सामान्यापेक्षमेकवचनं । सर्वप्राण्यंतःकरणेषु समवेत-मित्यर्थः । एतेनात्मनो गुणाधारत्वं प्रत्याख्यातं । तादृग्रेतो भाविनः प्रपंचस्य बीजभूतं प्रथममतीते कल्पे प्राणिभिः कृतं पुण्यात्मकं कर्म यद्यतः कारणात्सृष्टिसमय आसीत् अभवत् । भूष्णु वर्धिष्ण्वजायत परिपक्वं सत्फ-लोन्मुखमासीदित्यर्थः । तत्ततो हेतोः फलप्रदस्य सर्वसाक्षिणः कर्माध्यक्षस्य परमेश्वरस्य मनसि सिसृक्षाजाय-तेत्यर्थः । तस्यां च जातायां स्रष्टव्यं पर्यालोच्य ततः सर्वं जगत्सृजति । तथा चाम्नायते । सोऽकामयत बहुः स्यां प्रजायेयेति स तपोऽतप्यत स तपस्तप्त्वेदं सर्वमसृजत यदिदं किंच । तै० आ० ८. ६.। इति श्रुत्यात्मनेत्यमव-गमितेऽर्थे विद्वद्दनुभवमप्यनुग्राहकत्वेन प्रमाणयति सत इति । सतः सत्त्वेनेदानीमनुभूयमानस्य सर्वस्य जगतो बंधुं बंधकं हेतुभूतं कल्पांतरे प्राग्वृत्तं कर्मसमूहं कवयः क्रांतदर्शना अतीतानागतवर्तमानाभिज्ञा योगिनो हृदि हृदये निरुद्यया मनीषा मनीषया बुद्ध्या ॥ सुपां सुलुगिति तृतीयाया लुक् ॥ प्रतीष्य विचार्य ॥ अन्येषा-मपीति सांहितिको दीर्घः ॥ असति सद्विलक्षणेऽव्याकृते कारणे निरविंदन् । निष्कृष्यालभंत । विविच्या-जानन्नित्यर्थः ॥

तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त् ।
रेतोधा आसन्महिमान आसन्त्स्वधा अवस्तात्प्रयतिः परस्तात् ॥५॥
तिरश्चीनः । विऽततः । रश्मिः । एषां । अधः । स्वित् । आसी३त् । उपरि । स्वित् ।
आसी३त् ।
रेतःऽधाः । आसन् । महिमानः । आसन् । स्वधा । अवस्तात् । प्रऽयतिः । परस्तात् ॥५॥

एवमविद्याकामकर्माणि सृष्टेर्हेतुत्वेनोक्तानि । अधुना तेषां स्वकार्यजनने शैघ्र्यं प्रतिपाद्यते । येयं नासदा-सीदित्यविद्या प्रतिपादिता यस्य कामस्तदग्र इति कामो मनसो रेतः प्रथमं यदासीदिति यत्कर्मेषामविद्या-कामकर्मणां वियदादिभूतजातानि सृजतां रश्मी रश्मिसदृशौ यथा सूर्यरश्मिरुदयानंतरं निमेषमात्रेण युगपत्सर्वं जगद्व्याप्नोति तथा शीघ्रं सर्वत्र व्याप्नुवन् यः कार्यवर्गो विततो विस्तृत आसीत् । स्विदासीदिति वक्ष्यमाणमत्रापि संबध्यते ॥ विचार्यमाणानां । पा० ८.२.९७.। इति श्रुतः । तत्रोदात्त इत्यनुवृत्तेः स चोदात्तः । स्विदिति वितर्के ॥ स कार्यवर्गः प्रथमतः किं तिरश्चीनस्तिर्यगवस्थितो मध्ये स्थित आसीत् किंवाधोऽधस्ता-दासीत् । अहोस्विदुपर्युपरिष्टात्किमासीत् ॥ उपरि स्विदासीदिति च । पा० ८. २. १०२. । इत्यनुदात्तः श्रुतः ॥

आत्मन आकाशः संभूत आकाशाद्वायुर्वायोरग्निः । तै० आ० ८. १. । इत्यादिकया पंचमीश्रुत्या तत उत्पातारं ततो होतारमितिवत्क्रमप्रतिपत्तौ सत्यामपि विद्युत्प्रकाशवत्सर्गस्य शीघ्रव्यापनेन तस्य क्रमस्य दुर्लक्षणत्वादेतेषु त्रिषु स्थानेषु प्राथम्यं कुत्रेति विचार्यते । एवं नाम शीघ्रं सर्वतो दिशु सर्गो निष्पन्न इत्यर्थः । एतदेव विभजते । सृष्टेषु कार्येषु मध्ये केचिन्नावा रेतोधा रेतसो बीजभूतस्य कर्मणो विधातारः कर्तारो भोक्तारश्च जीवा आसन् अन्ये भावा महिमानः ॥ स्वार्थिक इमनिच् ॥ महांतो वियदादयो भोग्या आसन् । एवं मायासहितः परमेश्वरः सर्वं जगत्सृष्ट्वा स्वयं चानुप्रविश्य भोक्तृभोग्यादिरूपेण विभागं कृतवानित्यर्थः । अयमेवार्थस्तैत्तिरीयके तत्सृष्ट्वा तदेवानुप्राविशत् । तै० आ० ८. ६. । इत्यारभ्य प्रतिपाद्यते । तत्र च भोक्तृभोग्ययोर्मध्ये स्वधा । अन्नमैतत् । भोग्यप्रपंचोऽवस्तादवरो निकृष्ट आसीत् । प्रयतिः प्रयतिता भोक्ता परस्तात्पर उत्कृष्ट आसीत् । भोग्यप्रपंचं भोक्तृप्रपंचस्य शेषभूतं कृतवानित्यर्थः ॥ विभाषा परावराभ्यां । पा० ५. ३. २९. । इति प्रथमार्थे ऽस्तातिः । अस्तात् च । पा० ५. ३. ४०. । इत्यवरशब्दस्यावादेशः । अवस्तादिति संहितायामीषाअच्वादित्वात्प्रकृतिभावः ॥

को अद्धा वेद क इह प्र वोचत्कुत आजाता कुत इयं विसृष्टिः ।
अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव ॥ ६ ॥
कः । अद्धा । वेद । कः । इह । प्र । वोचत् । कुतः । आऽजाता । कुतः । इयं । विऽसृष्टिः ।
अर्वाक् । देवाः । अस्य । विऽसर्जनेन । अथ । कः । वेद । यतः । आऽबभूव ॥ ६ ॥

एवं भोक्तृभोग्यरूपेण सृष्टिः संग्रहेण प्रतिपादिता । एतावद्वा इदमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नाद इतिवत् । अथेदानीं सा सृष्टिर्दुर्विज्ञानेति न विस्तरेणाभिहितेत्याह । को अद्धेति । कः पुरुषोऽद्धा पारमार्थ्येन वेद । जानाति । को वेहास्मिँल्लोके प्र वोचत् । प्रब्रूयात् । इयं दृश्यमाना विसृष्टिर्विविधा भूतभौतिकभोक्तृभोग्यादिरूपेण बहुप्रकारा सृष्टिः कुतः कस्मादुपादानकारणात् कुतः कस्माच्च निमित्तकारणादाजाता । समंताज्जाता । प्रादुर्भूता । एतदुभयं सम्यङ्को वेद को वा विस्तरेण वक्तुं शक्नुयादित्यर्थः । ननु देवा अजानंतः । सर्वज्ञास्ते ज्ञास्यंति वक्तुं च शक्नुवंतीत्यत आह । अर्वागिति । देवाश्चास्य जगतो विसर्जनेन वियदादिभूतोत्पत्त्यनंतरं विविधं यज्ञौतिकं सर्जनं सृष्टिस्तेनार्वागर्वाचीनाः कृताः । भूतसृष्टेः पश्चाज्जाता इत्यर्थः । तथाविधास्ते कथं स्वोत्पत्तेः पूर्वकालीनां सृष्टिं जानीयुः । अजानंतो वा कथं प्रब्रूयुः । उक्तं दुर्विज्ञानत्वं निर्गमयति । अथेवं सति देवा अपि न जानंति किल । तद्व्यतिरिक्तः को नाम मनुष्यादिर्वेद तज्जगत्कारणं जानाति यतः कारणात्कृत्स्नं जगदाबभूव अजायत ॥

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न ।
यो अस्याध्यक्षः परमे व्योमन्त्सो अंग वेद यदि वा न वेद ॥ ७ ॥
इयं । विऽसृष्टिः । यतः । आऽबभूव । यदि । वा । दधे । यदि । वा । न ।
यः । अस्य । अधिऽअक्षः । परमे । विऽओमन् । सः । अंग । वेद । यदि । वा । न । वेद ॥ ७ ॥

उक्तप्रकारेण यथेदं जगत्सर्जनं दुर्विज्ञानं एवं सृष्टं तज्जगद्धुरंधरमपीत्याह । इयमिति । यत उपादानभूतात्परमात्मन इयं विसृष्टिर्विविधा गिरिनदीसमुद्रादिरूपेण विचित्रा सृष्टिराबभूव आजाता सोऽपि किल यदि वा दधे धारयति यदि वा न धारयति । एवं च को नामान्यो धर्तुं शक्नुयात् । यदि धारयेदीश्वर एव धारयेन्नान्य इत्यर्थः । एतेन कार्यस्य धारयितृत्वप्रतिपादनेन ब्रह्मण उपादानकारणत्वमुक्तं भवति । तथा च पारमार्षं सूत्रं । प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधात् । वेदां० १. ४. २३. । इति । यद्वा । अनेनार्धर्चेन पूर्वोक्तं सृष्टेर्दुर्ज्ञानत्वमेव दृढयति । को वेदेत्यनुवर्तते । इयं विविधा सृष्टिर्यत आबभूव आ समंताद्बभूवायतेति को वेद । न कोऽपि । नास्त्येव जगतो जन्म कदाचिदीदृशं जगदिति बहवो भ्रांता भवंत्यपि । यतः ॥ जनिकर्तुः

प्रकृतिः । पा० १. ४. ३०. । इत्यपादानसंज्ञायां पंचम्यास्तसिल् ॥ यस्मात्परमात्मन उपादानभूतादाबभूव तं परमात्मानं को वेद । न कोऽपि । प्रकृतितः परमाणुभ्यो वा जगज्जन्मेति हि बहवो भ्रांताः । तथा स एवोपादानभूतः परमात्मा स्वयमेव निमित्तभूतोऽपि सन् यदि वा दधे विदध इदं जगत्ससर्ज यदि वा न ससर्ज । असंदिग्धे संदिग्धवचनमेतच्छास्त्राणि चेत्प्रमाणं स्युरिति यथा । स एव विदधे । तं को वेद । अजानंतोऽपि बहवो जडात्प्रधानादकर्तृकमेवेदं जगत्स्वयमजायतेति विपरीतं प्रतिपन्ना विदधतो विधानमजानंतोऽपि । स एवोपादानभूत इत्यपि को वेद । न कोऽपि । उपादानादन्यस्टष्ट एवेश्वरो विदध इति हि बहवः प्रतिपन्नाः । देवा अपि यन्न जानंति तदर्वाचीनानामेषां तत्परिज्ञाने कैव कथेत्यर्थः । यद्येवं जगत्सृष्टिरत्यंतदुरवबोधना तर्हि सा प्रमाणपद्धतिमध्यास्त इत्याशंक्य तत्सद्भाव ईश्वरो वेदं प्रमाणयति । यो अस्येति । अस्य भूतभौतिकात्मकस्य जगतो योऽध्यक्ष ईश्वरः परम उत्कृष्टे सत्यभूते व्योमन् व्योमन्याकाश आकाशवन्निर्मले स्वप्रकाशे । यद्वा ॥ अवतेस्तर्पणार्थादन्येभ्योऽपि दृश्यंत इति मनिन् । नेड्वशि कृतीतीट्प्रतिषेधः । ज्वरत्वरेत्यादिना वकारोपधयोरूट् । सप्तम्या लुक् । न ङिसंबुद्ध्योरिति नलोपप्रतिषेधः ॥ व्योमनि विशेषेण तृप्ते । निरतिशयानंदस्वरूप इत्यर्थः । यद्वा । अवतिर्गत्यर्थः । व्योमनि विशेषेण गंतव्ये । देशकालवस्तुभिरपरिच्छिन्न इत्यर्थः । अथवा । अवतिर्ज्ञानार्थः । व्योमनि विशेषेण ज्ञातरि विशिष्टज्ञानात्मनि । ईदृशे स्वात्मनि प्रतिष्ठितः । श्रूयते हि सनत्कुमारनारदयोः संवादे । स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि । छां० उ० ७. २४. १. । इति । ईदृशो यः परमेश्वरः सो अंग । अंगेति प्रसिद्धौ । सोऽपि नाम वेद जानाति । यदि वा न वेद न जानाति । को नामान्यो जानीयात् । सर्वज्ञ ईश्वर एव तां सृष्टिं जानीयात् नान्य इत्यर्थः ॥ ॥ १७ ॥

यो यज्ञ इति सप्तर्चं द्वितीयं सूक्तं प्रजापतिपुत्रस्य यज्ञाख्यस्यार्षं । आद्या जगती शिष्टास्त्रिष्टुभः । अत्रापि यज्ञादीनां केषांचिद्भावानां सृष्टिः प्रतिपाद्यते । अतः सृष्टव्यत्वेन प्रधानभूतो योऽर्थः सैव देवता । तत्कर्ता प्रजापतिरेव देवता । तथा चानुक्रांतं । यो यज्ञो यज्ञः प्राजापत्यो जगत्याद्येति ॥ गतो विनियोगः ॥

यो यज्ञो विश्वतस्तंतुभिस्तत एकशतं देवकर्मेभिरायतः ।
इमे वयंति पितरो य आययुः प्र वयाप वयेत्यासते ततं ॥ १ ॥
यः । यज्ञः । विश्वतः । तंतुऽभिः । ततः । एकऽशतं । देवऽकर्मेभिः । आऽयतः ।
इमे । वयंति । पितरः । ये । आऽययुः । प्र । वय । अप । वय । इति । आसते । ततं ॥ १ ॥

तंतुभिस्तन्यितृभिर्विस्तारयितृभिर्विषयादिभूतैर्यः सर्गात्मको यज्ञो विश्वतः सर्वतस्ततो विसृतः । तथैकशतं । एकं च शतं चैकशतं ॥ संख्येति पूर्वपदप्रकृतिस्वरत्वं ॥ एकोत्तरशतमित्यर्थः । ब्रह्मा येषु शतसंख्येष्वात्मीयसंवत्सरेषु जीवति तदभिप्रायेणाच शतसंख्या । जीवता तेन प्रजापतिना सार्धमेकशतमित्युच्यते । यथा शतायुर्वै पुरुषः शतवीर्य आत्मैकशत इति । अत्यंतसंयोगे द्वितीया । ब्रह्मणः शतसंवत्सरपर्यंतं देवकर्मेभिर्देवानुद्दिश्य भोक्तृभिः कृतैः कर्मभिरायतः । दीर्घीभूतः । तावत्कालावस्थायी । एवमायामविस्तारवान् । ---। पितरः पालकाः प्रजापतेः प्राणभूता विश्वसृजो देवा वयंति । निर्मिमते । ये देवा आययुः स्रष्टव्यं सर्वं जगत्स्ववयनेन व्याप्नुः । अपि च प्र वयाप वयेति । प्रवाणं नाम प्रकृष्टस्य चेतनस्य भोक्तृप्रपंचस्य सर्जनं । अपवानं नामापकृष्टस्य निकृष्टस्याचेतनस्य भोग्यप्रपंचस्य सर्जनं ॥ वेञ् तंतुसंताने । समुच्चयेऽन्यतरस्यां । पा० ३. ४. ३. । इति लोट् । तस्य लोटो हिस्वावित्यनुवृत्तेर्हिरादेशः । श्लुग्गुणायादेशाः । अतो हेरिति लुक् ॥ प्र वयाप वयेति वयंतः प्रवाणमपवानं च कुर्वंत इत्यर्थः । एवंभूताः संतस्ते विश्वसृजस्ततो विसृते सत्यलोक आसते । प्राणरूपेण प्रजापतिमुपासते ॥ यद्वा । ज्योतिष्टोमादिर्यज्ञ एवंरूपकल्पेन पटात्मना वर्ण्यते । यो यज्ञो ज्योतिष्टोमादिस्तंतुभिस्तंतुस्थानीयैरग्निष्टोमात्यग्निष्टोमादिसंस्थाभेदैः सप्तभिश्छंदोभिर्वा सर्वतो विश्वतस्ततो विसृतः । तथैकशतं । तृतीयार्थे प्रथमा । एकाधिकेनाग्निचयनेन युक्तैर्देवकर्मेभिर्गवामयनप्रभृतिकैर्विश्वसृजामयनांतैरेकाहादिसत्रात्मकैर्वायतो दीर्घीभूत एवमायतो विस्तारवान्यज्ञात्मकोऽयं पटः प्रजापतिना सृष्टः । तं पटं पितरोऽस्माकं पितृभूता इमेऽंगिरसो वयंति । तस्य पटस्य प्राचीनतंतुस्थानीयानि सुतशस्त्राणि प्र वय त्वं कुरु अप वय

तिरश्चीनतंतुस्थानीयानि यजूंषि त्वं कुर्वित्येवं परस्परं नियुंजाना आसते । नियुंजंति ॥ एवं विसृतस्य यज्ञस्य प्रजापतेः सकाशादुत्पत्तिरुत्तरया प्रतिपाद्यते ॥

पुमाँ एनं तनुत उत्कृणत्ति पुमान्वि तंत्ने अधि नाके अस्मिन् ।
इमे मयूखा उप सेदुरू सदः सामानि चक्रुस्तसराण्योतवे ॥२॥
पुमान्। एनं। तनुते। उत्। कृणत्ति। पुमान्। वि। तत्ने। अधि। नाके। अस्मिन्।
इमे। मयूखाः। उप। सेदुः। ऊं इति। सदः। सामानि। चक्रुः। तसराणि। ओतवे ॥२॥

पुमान् पुरुष आदिपुरुषः प्रजापतिरेनं यज्ञं तनुते । विस्तारयति । सृष्टवानित्यर्थः । तथा च ब्राह्मणं । स प्रजापतिर्यज्ञमतनुत तमाहरत्तेनायजतेति । प्रजापतिर्यज्ञमसृजत यज्ञं सृष्टमनु ब्रह्मर्चे असृज्येतामिति च । ऐ० ब्रा० ५. ३२. ७. १९. । स एव पुमान् सृष्टं तं यज्ञमुत्कृणत्ति । उद्दिष्टयति ॥ क्र्तती वेष्टने रौधादिकः ॥ स एव पुमान् प्रजापतिरस्मिन्भूलोके नाके । अकं दुःखं नास्त्यस्मिन्निति नाकः स्वर्गलोकः ॥ नञ्नाएनपादित्यादिना नञः प्रकृतिभावः ॥ तच च वि तत्ने । इमं यज्ञं विस्तारयति । अधिः सप्तम्यर्थानुवादी ॥ तनोतेर्लिटि तनिपत्योरित्युपधालोपः । तस्य स्थानिवद्भावाद्विर्वचनं ॥ मयूखा रश्मिभूतास्तस्य प्रजापतेः प्राणात्मका इमे विश्वसृजो देवाः सदः सदनं देवयजनस्थानमुप सेदुः । विश्वसर्जनहेतुभूतं विश्वसृजामयनाख्यं यज्ञं कर्तुमुपसीदंति । उपसद्य च सामानि रथंतरादीन्योतवे वयनाय यज्ञाख्यं वस्त्रमोतुं तसराणि तिर्यक्सराणि तिरश्चीनसूत्राणि चक्रुः ॥

कासीत्प्रमा प्रतिमा किं निदानमाज्यं किमासीत्परिधिः क आसीत् ।
छंदः किमासीत्प्रउगं किमुक्थं यद्देवा देवमयजंत विश्वे ॥३॥
का। आसीत्। प्रऽमा। प्रतिऽमा। किं। निऽदानं। आज्यं। किं। आसीत्। परिऽधिः।
कः। आसीत्।
छंदः। किं। आसीत्। प्रऽउगं। किं। उक्थं। यत्। देवाः। देवं। अयजंत। विश्वे ॥३॥

विश्वसर्जनोपायत्वेन प्रजापतिना सृष्टे यज्ञे विश्वस्य स्रष्टारो विश्वसृजो देवा विश्वसर्जनाय तं यज्ञमन्वतिष्ठन् । तस्मिन्समये जगतोऽनुत्पत्तेर्जगदंतःपातिनो यागोपकरणभूताः पदार्थाः कथमासन्नित्यनया प्रश्नः क्रियते । यदा वा विश्वे सर्वे साध्या देवा देवं प्रजापतिमयजंत तदानीं तस्य यज्ञस्य प्रमा प्रमाणमियत्ता का कथंभूतासीत् । तथा प्रतिमा हविष्प्रतियोगित्वेन मीयते निर्मीयत इति प्रतिमा देवता । सा च तस्य यज्ञस्य कासीत् । तथा निदानमादिकारणं यागेऽप्रवृत्तस्य प्रवर्तकं फलं किमासीत् । तथाज्यं घृतमेतदुपलक्षितं हविर्वा तस्य यज्ञस्य किमासीत् । तथा परिधिः । परितो धीयंत इति चयः परिधयो बाह्यसमाचाः पलाशादिवृक्षजन्याः ॥ परिपूर्वाद्धातेरुपसर्गे घोः किरिति किप्रत्ययः । सामान्यापेक्षमेकवचनं ॥ परिधयः क आसन्नित्यर्थः । तथा तस्य यज्ञस्य गायत्र्यादिकं छंदः किमासीत् । तथा प्रउगमुक्थं । उपलक्षणमेतत् । आज्यप्रउगादीन्युक्थानि शस्त्राणि वा कान्यासन् । एतेषु प्रश्नेषु चयाणामुत्तरं वृचेनाह ॥

अग्नेर्गायत्र्यभवत्सयुग्वोष्णिहया सविता सं बभूव ।
अनुष्टुभा सोम उक्थैर्महस्वान्बृहस्पतेर्बृहती वाचमावत् ॥४॥
अग्नेः। गायत्री। अभवत्। सऽयुग्वा। उष्णिहया। सविता। सं। बभूव।
अनुऽस्तुभा। सोमः। उक्थैः। महस्वान्। बृहस्पतेः। बृहती। वाचं। आवत् ॥४॥

सयुग्वा सहयुक्तापीः सहायभूता गायत्र्यभवत् । यष्टव्यात्प्रजापतेर्मुखादजायत । देवतासु मध्येऽग्निश्छंदःसु

गायत्री चोभावप्यजायेतामित्यर्थः । तथा च तैत्तिरीयकं । प्रजापतिरकामयत प्रजायेयेति स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवतान्वसृज्यत गायत्री छंदः । तै० सं० ७. १. १. ४. । इति । उष्णिहयोष्णिक्छंदसा सह सविता देवः सं बभूव । तस्मात्प्रजापतेर्जज्ञे ॥ टापं चापि हलंतानामिति वचनादुष्णिहशब्दाट्टाप् ॥ तथा महस्वांस्तेजस्वी सोम उक्थैः स्तुतशस्त्रैरनुष्टुभानुष्टुप्छंदसा च सार्धं तस्मादेव प्रजापतेरजायत । तथा बृहस्पतेर्दैवस्य वाचं वाकं बृहतीच्छंद आवत् । अरचत् । अगच्छत् । बृहत्या सार्धं बृहस्पतिरपि तस्मात्प्रजापतेर्जज्ञ इत्यर्थः ॥

विराण्मित्रावरुणयोरभिश्रीरिंद्रस्य त्रिष्टुबिह भागो अह्नः ।
विश्वान्देवाञ्जगत्या विवेश तेन चाकॢप्र ऋषयो मनुष्याः ॥५॥
विऽराट् । मित्रावरुणयोः । अभिऽश्रीः । इंद्रस्य । त्रिऽस्तुप् । इह । भागः । अह्नः ।
विश्वान् । देवान् । जगती । आ । विवेश । तेन । चाकॢप्रे । ऋषयः । मनुष्याः ॥५॥

अपि च मित्रावरुणयोर्दैवयोर्विराट्छंदोऽभिश्रीः । अभिश्रिता । आश्रितासीत् । विराजा सह मित्रावरुणावपि प्रजापतेः सकाशादजायेतामित्यर्थः । इहास्मिन्यज्ञेऽह्नः सवनत्रयरूपस्य भागो मध्यंदिनसवनाख्यो ऽशस्त्रिष्टुप्छंदस्त्रिंद्रस्याभिश्रयणीयावास्तां । तावित्यर्थः । तथा च तैत्तिरीयकं । उरसो बाहुभ्यां पंचदशं निरमिमीत तमिंद्रो देवतान्वसृज्यत तच त्रिष्टुप्छंदो बृहत्साम । तै० सं० ७. १. १. ४. । इति । तथा विश्वान्सर्वान्देवाञ्जगतीछंद आ विवेश । प्रविष्टवती । विश्वे देवा जगती च प्रजापतेरजायेतेत्यर्थः । तथा च तैत्तिरीयकं । तं विश्वे देवा देवता अन्वसृज्यंत जगती छंदो वैरूपं साम । तै० सं० ७. १. १. ५. । इति । उक्तेन प्रकारेण प्रतिमा कासीत् छंदः किमासीत् प्रउगं किमुक्थमिति त्रयाणामुत्तरं जातं । आज्यं किमासीत् परिधिः क आसीदित्यनयोरुत्तरं पुरुषसूक्ते द्रष्टव्यं । तच ह्येवमाम्नायते । देवा यज्ञमतन्वत वसंतो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः । ऋ० १०. ९०. ६. । सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः । ऋ० १०. ९०. १५. । इति । अयमर्थः । सर्वरसोत्पादको वसंतस्तस्य जगत्सर्जनसाधनस्य यज्ञस्याज्यमासीत् । आज्यदध्यादिभी रसैः सार्धं तादृशो वसंतोऽजायतेत्यर्थः । सर्वरसानां शोषको ग्रीष्म ऋतुरिध्म आसीत् । शुष्कैः काष्ठैः सार्धं ग्रीष्मोऽजायतेत्यर्थः । पच्यमानव्रीहियुक्तः शरदृतुस्तस्य यज्ञस्य हविरासीत् । सप्त च्छंदांसि चितः सप्तैकविंशतिधा भूत्वाष्टादश समिधस्त्रयः परिधयस्त्रयश्चासन् । कासीत्प्रमा प्रतिमा किं निदानमित्यनयोरपि प्रश्नयोरग्नेयमुत्तरं पूर्वं विश्वसृजोऽमृताः शतं वर्षसहस्राणि दीक्षिताः सत्त्रमासतेति एतेन वै विश्वसृज इदं विश्वमसृजंतेति च तैत्तिरीयके । तै० ब्रा० ३. १२. ९. २–८. । समाम्नायते । अतस्तस्य यज्ञस्य सहस्रसंवत्सरपरिमितः कालः प्रमाणं । विश्वस्य जगतः सर्जनमादिकारणं प्रवर्तकं फलमित्यर्थः । एतदुक्तं भवति । यदा विश्वसृजो देवा देवं प्रजापतिं विश्वसृजामयनाख्येन यागेनायजन् तदोक्ताः सर्वयागोपकाराः प्रजापतेः सकाशादजायंतेति । यतोऽग्न्यादिदेवताभिः सह गायत्र्यादीनि सप्त च्छंदांसि जातानि अतो हेतोस्तेषां छंदसामग्न्यादयो देवता इति । छंदोविचितौ सूचितं च । अग्निः सविता सोमो बृहस्पतिर्मित्रावरुणाविंद्रो विश्वे देवा देवताः । पिं० ३. ६३. । इति । एवं प्राजापत्यो यज्ञोऽनुष्ठितः । तेन यज्ञेनर्षयो मनुष्याश्च चाकॢपिरे । चकॢपिरे । कॢप्ताः सृष्टा आसन् ॥ कृपेः कर्मणि लिटीरयोरिति रेआदेशः । कृपो रो लः । पा० ८. २. १८. । इति लत्वं । तुजादित्वादभ्यासदीर्घः ॥ तेनैव यज्ञेन सर्वं जगदसृजन्नित्यर्थः ॥

चाकॢप्रे तेन ऋषयो मनुष्या यज्ञे जाते पितरो नः पुराणे ।
पश्यन्मन्ये मनसा चक्षसा तान्य इमं यज्ञमयजंत पूर्वे ॥६॥
चाकॢप्रे । तेन । ऋषयः । मनुष्याः । यज्ञे । जाते । पितरः । नः । पुराणे ।
पश्यन् । मन्ये । मनसा । चक्षसा । तान् । ये । इमं । यज्ञं । अयजंत । पूर्वे ॥६॥

तिरश्चीनतंतुस्थानीयानि यजूंषि त्वं कुर्वित्येवं परस्परं नियुंजाना आसते । नियुंजंति ॥ एवं विसृतस्य यज्ञस्य प्रजापतेः सकाशादुत्पत्तिरुत्तरया प्रतिपाद्यते ॥

पुमाँ एनं तनुत उत्कृणत्ति पुमान्वि तत्ने अधि नाके अस्मिन् ।
इमे मयूखा उप सेदुरू सदः सामानि चक्रुस्तसराण्योतवे ॥२॥
पुमान् । एनं । तनुते । उत् । कृणत्ति । पुमान् । वि । तत्ने । अधि । नाके । अस्मिन् ।
इमे । मयूखाः । उप । सेदुः । ऊं इति । सदः । सामानि । चक्रुः । तसराणि । ओतवे ॥२॥

पुमान् पुरुष आदिपुरुषः प्रजापतिरेनं यज्ञं तनुते । विस्तारयति । सृष्टवानित्यर्थः । तथा च ब्राह्मणं । स प्रजापतिर्यज्ञमतनुत तमाहरत्तेनायजतेति । प्रजापतिर्यज्ञमसृजत यज्ञं सृष्टमनु ब्रह्मसृजे असृक्ष्येतामिति च । ऐ० ब्रा० ५. ३२. ७. १९. । स एव पुमान् सृष्टं तं यज्ञमुत्कृणत्ति । उद्वेष्टयति ॥ कृती वेष्टने रौधादिकः ॥ स एव पुमान् प्रजापतिरस्मिन्भूलोके नाके । अकं दुःखं नास्त्यस्मिन्निति नाकः स्वर्गलोकः ॥ नञ्नाएनपादित्यादिना नञः प्रकृतिभावः ॥ तत्र च वि तत्ने । इमं यज्ञं विस्तारयति । अधिः सप्तम्यर्थानुवादी ॥ तनोतेर्लिटि तनिपत्योश्छंदसीत्युपधालोपः । तस्य स्थानिवन्नावाद्विर्वचनं ॥ मयूखा रश्मिभूतास्तस्य प्रजापतेः प्राणात्मका इमे विश्वसृजो देवाः सदः सदनं देवयजनस्थानमुप सेदुः । विश्वसर्जनहेतुभूतं विश्वसृजामयनाख्यं यज्ञं कर्तुमुपसीदंति । उपसद्य च सामानि रथंतरादीन्योतवे वयनाय यज्ञाख्यं वस्त्रमोतुं तसराणि तिर्यक्सराणि तिरश्चीनसूत्राणि चक्रुः ॥

कासीत्प्रमा प्रतिमा किं निदानमाज्यं किमासीत्परिधिः क आसीत् ।
छंदः किमासीत्प्रउगं किमुक्थं यद्देवा देवमयजंत विश्वे ॥३॥
का । आसीत् । प्रऽमा । प्रतिऽमा । किं । निऽदानं । आज्यं । किं । आसीत् । परिऽधिः ।
कः । आसीत् ।
छंदः । किं । आसीत् । प्रउगं । किं । उक्थं । यत् । देवाः । देवं । अयजंत । विश्वे ॥३॥

विश्वसर्जनोपायत्वेन प्रजापतिना सृष्टे यज्ञे विश्वस्य स्रष्टारो विश्वसृजो देवा विश्वसर्जनाय तं यज्ञमन्वतिष्ठन् । तस्मिन्समये जगतोऽनुत्पत्तेर्जगदंतःपातिनो यागोपकरणभूताः पदार्थाः कथमासन्नित्यनया प्रश्नः क्रियते । यदा विश्वे सर्वे साध्या देवा देवं प्रजापतिमयजंत तदानीं तस्य यज्ञस्य प्रमा प्रमाणमियत्ता का कथंभूतासीत् । तथा प्रतिमा हविष्प्रतियोगित्वेन मीयते निर्मीयत इति प्रतिमा देवता । सा च तस्य यज्ञस्य कासीत् । तथा निदानमादिकारणं यागेऽप्रवृत्तस्य प्रवर्तकं फलं किमासीत् । तथाज्यं घृतमेतदुपलक्षितं हविर्वा तस्य यज्ञस्य किमासीत् । तथा परिधिः । परितो धीयंत इति चयः परिधयो बाह्यमाचाः पलाशादिवृक्षजन्याः ॥ परिपूर्वाद्धातेरूपसर्गे घोः किरिति किप्रत्ययः । सामान्यापेक्षमेकवचनं ॥ परिधयः क आसन्नित्यर्थः । तथा तस्य यज्ञस्य गायत्र्यादिकं छंदः किमासीत् । तथा प्रउगमुक्थं । उपलक्षणमेतत् । आज्यप्रउगादीन्युक्थानि शस्त्राणि वा कान्यासन् । एतेषु प्रश्नेषु चयाणामुत्तरं वृचेनाह ॥

अग्नेर्गायत्र्यभवत्सयुग्वोष्णिहया सविता सं बभूव ।
अनुष्टुभा सोम उक्थैर्महस्वान्बृहस्पतेर्बृहती वाचमावत् ॥४॥
अग्नेः । गायत्री । अभवत् । सऽयुग्वा । उष्णिहया । सविता । सं । बभूव ।
अनुऽस्तुभा । सोमः । उक्थैः । महस्वान् । बृहस्पतेः । बृहती । वाचं । आवत् ॥४॥

सयुग्वा सहयुक्तायैः सहायभूता गायत्र्यभवत् । यस्त्वात्प्रजापतेर्मुखादजायत । देवतासु मध्येऽग्निश्छंदःसु

गायत्री चोभावप्यजायेतामित्यर्थः । तथा च तैत्तिरीयकं । प्रजापतिरकामयत प्रजायेयेति स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवतान्वसृज्यत गायत्री छंदः । तै० सं० ७. १. १. ४. । इति । उष्णिहयोष्णिक्छंदसा सह सविता देवः सं बभूव । तस्मात्प्रजापतेर्जज्ञे ॥ टापं चापि हलंतानामिति वचनादुष्णिहशब्दाट्टाप् ॥ तथा महस्वांस्तेजस्वी सोम उक्थैः सुतशस्त्रैरनुष्टुभानुष्टुप्छंदसा च सार्धं तस्मादेव प्रजापतेरजायत । तथा बृहस्पतेर्दैवस्य वाचं वाक्यं बृहतीच्छंद आवत् । अरक्षत् । अगच्छत् । बृहत्या सार्धं बृहस्पतिरपि तस्मात्प्रजापतेर्जज्ञ इत्यर्थः ॥

विराण्मित्रावरुणयोरभिश्रीरिंद्रस्य त्रिष्टुबिह भागो अह्नः ।
विश्वान्देवाञ्जगत्या विवेश तेन चाक्लृप्र ऋषयो मनुष्याः ॥५॥
विऽराट् । मित्रावरुणयोः । अभिऽश्रीः । इंद्रस्य । त्रिऽस्तुप् । इह । भागः । अह्नः ।
विश्वान् । देवान् । जगती । आ । विवेश । तेन । चाक्लृप्रे । ऋषयः । मनुष्याः ॥५॥

अपि च मित्रावरुणयोर्दैवयोर्विराट्छंदोऽभिश्रीः । अभिश्रिता । आश्रितासीत् । विराजा सह मित्रावरुणावपि प्रजापतेः सकाशादजायेतामित्यर्थः । इहास्मिन्यज्ञेऽह्नः सवनत्रयरूपस्य भागो मध्यंदिनसवनाख्यो ऽयंत्रिष्टुप्छंदसेंद्रस्याभिश्रयणीयावास्तां । ताविंद्रश्च प्रजापतेः सकाशादजायेतेत्यर्थः । तथा च तैत्तिरीयकं । उरसो बाहुभ्यां पंचदशं निरमिमीत तमिंद्रो देवतान्वसृज्यत तच्च त्रिष्टुप्छंदो बृहत्साम । तै० सं० ७. १. १. ४. । इति । तथा विश्वान्सर्वान्देवाञ्जगतीछंद आ विवेश । प्रविष्टवती । विश्वे देवा जगती च प्रजापतेरजायेतेत्यर्थः । तथा च तैत्तिरीयकं । तं विश्वे देवा देवता अन्वसृज्यंत जगती छंदो वैरूपं साम । तै० सं० ७. १. १. ५. । इति । उक्तेन प्रकारेण प्रतिमा कासीत् छंदः किमासीत् प्रउगं किमुक्थमिति त्रयाणामुत्तरं जातं । आज्यं किमासीत् परिधिः क आसीदित्यनयोरुत्तरं पुरुषसूक्ते द्रष्टव्यं । तच्च ह्येवमाम्नायते । देवा यज्ञमतन्वत वसंतो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः । ऋ० १०. ९०. ६. । सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः । ऋ० १०. ९०. १५. । इति । अयमर्थः । सर्वरसोत्पादको वसंतस्तस्य जगत्सर्जनसाधनस्य यज्ञस्याज्यमासीत् । आज्यदध्यादिभी रसैः सार्धं तादृशो वसंतोऽजायतेत्यर्थः । सर्वरसानां शोषको ग्रीष्म ऋतुरिध्म आसीत् । शुष्कैः काष्ठैः सार्धं ग्रीष्मोऽजायतेत्यर्थः । पच्यमानव्रीहियुक्तः शरदृतुस्तस्य यज्ञस्य हविरासीत् । सप्त च्छंदांसि त्रिः सप्तैकविंशतिधा भूत्वाष्टादश समिधस्त्रयः परिधयश्चासन् । कासीत्प्रमा प्रतिमा किं निदानमित्यनयोरपि प्रश्नयोरथैवमुत्तरं पूर्वे विश्वसृजोऽमृताः शतं वर्षसहस्राणि दीक्षिताः सत्त्रमासतेति एतेन वै विश्वसृज इदं विश्वमसृजंतेति च तैत्तिरीयके । तै० ब्रा० ३. १२. ९. २–८. । समाम्नायते । अतस्तस्य यज्ञस्य सहस्रसंवत्सरपरिमितः कालः प्रमाणं । विश्वस्य जगतः सर्जनमादिकारणं प्रवर्तकं फलमित्यर्थः । एतदुक्तं भवति । यदा विश्वसृजो देवा देवं प्रजापतिं विश्वसृजामयनाख्येन यागेनायजन् तदोक्ताः सर्वयागोपकाराः प्रजापतेः सकाशादजायंतेति । यतोऽग्न्यादिदेवताभिः सह गायत्र्यादीनि सप्त च्छंदांसि जातानि अतो हेतोस्तेषां छंदसामग्न्यादयो देवता इति । छंदोविचितौ सूचितं च । अग्निः सविता सोमो बृहस्पतिर्मित्रावरुणाविंद्रो विश्वे देवा देवताः । पिं० ३. ६३. । इति । एवं प्राजापत्यो यज्ञोऽनुष्ठितः । तेन यज्ञेनर्षयो मनुष्याश्च चाक्लृप्रे । चक्लृपिरे । क्लृप्ताः सृष्टा आसन् ॥ क्लृपेः कर्मणि लिटीरयोरिति रेआदेशः । क्लृपो रो लः । पा० ८. २. १८. । इति लत्वं । तुजादित्वादभ्यासदीर्घः ॥ तेनैव यज्ञेन सर्वं जगदसृजन्नित्यर्थः ॥

चाक्लृप्रे तेन ऋषयो मनुष्या यज्ञे जाते पितरो नः पुराणे ।
पश्यन्मन्ये मनसा चक्षसा तान्य इमं यज्ञमयजंत पूर्वे ॥६॥
चाक्लृप्रे । तेन । ऋषयः । मनुष्याः । यज्ञे । जाते । पितरः । नः । पुराणे ।
पश्यन् । मन्ये । मनसा । चक्षसा । तान् । ये । इमं । यज्ञं । अयजंत । पूर्वे ॥६॥

पुराणे चिरंतनेऽस्मिन्यज्ञे जाते विश्वसृद्भिर्देवैः सम्यगनुष्ठिते सति तेन यज्ञेनर्षयो मनुष्या नोऽस्माकं पितरः पूर्वपुरुषाश्च चाक्लृप्रे । अकल्प्यंत । अरुज्यंत । इममीदृशं यज्ञं ये पूर्वे साध्या देवाः प्रजापतेः प्राणभूता अयजंत अन्वतिष्ठन् तान्देवान्प्राणात्मना सर्वत्र वर्तमानांश्चक्षसा दर्शनहेतुना मनसा पश्यज्ञानस्थे । तानेव विश्वसृष्टृन्देवान् स्तौमि । मन्यतिरर्चतिकर्मा ॥

सहस्तोमाः सहच्छंदस आवृतः सहप्रमा ऋषयः सप्त दैव्याः ।
पूर्वेषां पंथामनुदृश्य धीरा अन्वालेभिरे रथ्योऽ न रश्मीन् ॥७॥
सहऽस्तोमाः । सहऽछंदसः । आऽवृतः । सहऽप्रमाः । ऋषयः । सप्त । दैव्याः ।
पूर्वेषां । पंथां । अनुऽदृश्य । धीराः । अनुऽआलेभिरे । रथ्यः । न । रश्मीन् ॥७॥

स्तोमैः चितृत्संचदशादिभिः सह वर्तमानाः सहस्तोमाः सहच्छंदसो गायत्र्यादिभिश्छंदोभिः सह वर्तमाना आवृत आवर्तमानाः सहप्रमाः । प्रमितिः प्रमा यज्ञस्येयत्तापरिज्ञानं । तेन सह वर्तमाना दैव्या देवस्य प्रजापतेः संबंधिनः यद्वा देवानां यष्टव्यानां संबंधिन ऋषयो द्रष्टारः सप्तसंख्याकाः शीर्षण्याः । यद्वा । मरीचिप्रमुखाः सप्तर्षयो होत्रादयः सप्त वषट्कर्तारो वा । एवंविधा एते पूर्वेषां पूर्वपुरुषाणामंगिरःप्रभृतीनां विश्वसृजां देवानां वा पंथां पंथानमनुष्ठानमार्गमनुदृश्य क्रमेण ज्ञात्वा धीरा धीमंतः संतोऽन्वालेभिरे । अनुक्रमेणारब्धवंतः । यागानुष्ठाने प्रवृत्ता इत्यर्थः । रथ्यो न यथा रथिनो रथेन युक्ता रथस्य नेतारः सूता रश्मीनश्वनियोजनार्थान्ग्रहान् सम्यग्यथस्य नयनाय हस्तेनान्वारभंते । अन्वारभ्य च सम्यक् तं रथं प्रवर्तयंति एवमेतेऽप्यनुष्ठानमार्गे श्रुतितोऽवगम्य सम्यगन्वतिष्ठन्नित्यर्थः ॥ ॥१८॥

अप प्राच इति सप्तर्चं तृतीयं सूक्तं कक्षीवतः पुत्रस्य सुकीर्तेरार्षं । चतुर्थ्यनुष्टुप् शिष्टाः षट् त्रिष्टुभः । चतुर्थीपंचम्यावश्विदेवत्ये शिष्टा ऐंद्र्यः । तथा चानुक्रांतं । अप प्राचः सुकीर्तिः काक्षीवतो मध्येऽनुष्टुप्चोत्तरा चाश्विन्याविति ॥ षष्ठेऽहनि ब्राह्मणाच्छंसिन उक्थशस्त्र एतत्सूक्तं । सूचितं च । सुकीर्तिं ब्राह्मणाच्छंसी वृषाकपिं च पंक्तिशंसं । आ० ८. ४. । इति ॥ चातुर्विंशिकेऽहनि माध्यंदिने सवने मैत्रावरुणस्याप प्राच इत्येषारंभणीया कदुत्प्रगाथानंतरं शंसनीया । सूचितं च । कदुतः प्रगाथा अप प्राच इंद्र विश्वाँ अमित्रान् । आ० ७. ४. । इति ॥ अहर्गणेष्वपि द्वितीयादिष्वहःसु तस्यैव तस्मिन्नेव शस्त्र आरंभणीया । सूचितं च । आरंभणीयाः पर्यासाक्कदुतोऽहरहः शस्यानीति होत्रका द्वितीयादिष्वेव । आ० ७. १. । इति ॥

अप प्राचं इंद्र विश्वाँ अमित्रानपापांचो अभिभूते नुदस्व ।
अपोदींचो अप शूराधराचं उरौ यथा तव शर्मन्मदेम ॥१॥
अप । प्राचः । इंद्र । विश्वान् । अमित्रान् । अप । अपांचः । अभिऽभूते । नुदस्व ।
अप । उदींचः । अप । शूर । अधराचः । उरौ । यथा । तव । शर्मन् । मदेम ॥१॥

हे इंद्र प्राचः प्रमुखमंचतः प्राग्देशे वर्तमानान् । अस्मत्तः पूर्वभागे वर्तमानानित्यर्थः ॥ प्रपूर्वादंचतेर्ङ्वनिगित्यादिना क्विन् । अनिदितामिति नलोपः । शस्यच इत्यकारलोपे चाविति दीर्घत्वं । अनिगंतोऽंचतौ वप्रत्यये । पा० ६. २. ५२. । इति गतेः प्रकृतिस्वरत्वं ॥ तादृशान्विश्वान्सर्वानमित्रान्शत्रूनप नुदस्व । अस्मत्तोऽपगमय । तथा हे अभिभूते शत्रूणामभिभवितरिंद्र अपाचोऽपमुखमंचतः पृष्ठभागे वर्तमानान्सर्वान्शत्रूनप नुदस्व । अपि चोदीच ऊर्ध्वमंचत उपरिवर्तमानान् ॥ उत्पूर्वादंचतेः पूर्ववत्क्विन्प्रत्ययः । उदित्यंचतेरकारस्येकारः । पूर्ववत्स्वरः ॥ तथाविधानपि शत्रूनप नुदस्व । तथा हे शूर शौर्यवन्निंद्र अधराचोऽधरदेशमधोभागमंचतः स्थाधस्तनानपि शत्रूनप नुदस्व ॥ अधरशब्दोपपदादंचतेः शसि पूर्ववत्प्रक्रिया । चाविति पूर्वपदस्यांतोदात्तः ॥ उरौ विस्तीर्णे तव संबंधिनि त्वया दत्ते शर्मञ्शर्मणि गृहे सुखे वा यथा वयं मदेम निरुपद्रवाः संतो हृष्येम तथा त्वं सर्वत्र वर्तमानानस्मदीयाञ्शत्रून्विनाशयेत्यर्थः ॥

कुविदंग यवमंतो यवं चिद्यथा दांत्यनुपूर्वं वियूय ।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः ॥२॥
कुवित्। अंग। यवऽमंतः। यवं। चित्। यथा। दांति। अनुऽपूर्वं। विऽयूय।
इहऽइह। एषां। कृणुहि। भोजनानि। ये। बर्हिषः। नमःऽवृक्तिं। न। जग्मुः ॥२॥

अंग हे इंद्र यवमंतो यवादिधान्ययुक्ताः कर्षका यवं चित्। उपलक्षणमेतत्। यवगोधूमादीननुपूर्वं यो यो धान्यविशेषः प्रथमं पच्यते तेनानुपूर्व्येण वियूय पृथक्कृत्य यथा कुविद्बहुलं दांति लुनंति ॥ दाप् लवने आदादिकः। विपूर्वोऽयमीतिर्ल्लुप्येव युष्मदोर्दीर्घश्छंदसि। पा० ६. ४. ५८.। इति दीर्घः ॥ एवमिहेहास्मिन्नस्मिन्देशे सर्वस्मिन्नेषां यजमानानां भोजनानि। धननामैतत्। भोगसाधनानि धनानि कृणुहि। कुरु। यस्मिन्यस्मिन्देशे यज्ञनमपेक्षितं तदनुगुणं प्रयच्छेत्यर्थः ॥ उतश्च प्रत्ययाच्छंदसि वावचनं। पा० ६. ४. १०६. १.। इति हेर्लुगभावः ॥ एषामित्युक्ते के पुनरिम इत्यत आह। ये यजमाना बर्हिषो यज्ञस्य नमोवृक्तिं नमसो हविर्लक्षणस्यान्नस्य नमस्कारात्मकस्य स्तोत्रस्य वा वर्जनमकरणं न जग्मुः न प्राप्नुवंति किंतु सर्वदा हविर्भिर्यजंति स्तुतिभिः स्तुवंति च। एषां कृणुहीत्यन्वयः ॥

नहि स्थूर्यृतुथा यातमस्ति नोत श्रवो विविदे संगमेषु ।
गव्यंत इंद्रं सख्याय विप्रा अश्वायंतो वृषणं वाजयंतः ॥३॥
नहि। स्थूरिं। ऋतुऽथा। यातं। अस्ति। न। उत। श्रवः। विविदे। संऽगमेषु।
गव्यंतः। इंद्रं। सख्याय। विप्राः। अश्वऽयंतः। वृषणं। वाजयंतः ॥३॥

एकेन धुर्येण युक्तमनः स्थूरीत्युच्यते। ऋतुथर्तौ यस्मिन्काले प्राप्तव्यं तद्योग्यकाले स्थूर्यनो यातं तं देशं प्राप्तं नह्यस्ति। न हि भवति। एकेन धुर्येण युक्तः शकटः शीघ्रं गंतव्यं न प्राप्नोतीत्यर्थः। उतापि च संगमेषु संग्रामेषु श्रवोऽन्नं यशो वा न विविदे। न लभते। इंद्रसूक्तविलक्षणः। वृषणं वर्षितारं तमिंद्रं गव्यंतो गा इच्छंतो विप्रा मेधाविनो वयं सख्याय सखिकर्मण आह्वयाम इति शेषः। कथंभूताः। अश्वायंतोऽश्वानथात्मन इच्छंतः वाजयंतोऽन्नकामा बलकामाश्च ॥

सौत्रामण्यां सुराग्रहाणां पुरोनुवाक्या युवमित्येषा। सूचितं च। युवं सुराममश्विनेति ग्रहाणां पुरोनुवाक्या। आ० ३. ९.। इति ॥

युवं सुरामंमश्विना नमुंचावासुरे सचा। विपिपाना शुभस्पती इंद्रं कर्मस्वावतं ॥४॥
युवं। सुरामं। अश्विना। नमुंचौ। आसुरे। सचा। विऽपिपाना। शुभः। पती इति।
इंद्रं। कर्मऽसु। आवतं ॥४॥

हे अश्विनाश्विनौ हे शुभस्पती उदकस्य शोभनालंकारस्य वा पती पालयितारौ सुरामं सुष्ठु रमणसाधनमिदं हविर्विपिपाना विशेषेण पीतवंतौ युवं युवां सचा संतौ संगतावासुरेऽसुरपुत्रे नमुचावेतत्संज्ञेऽसुरे हंतव्ये सति कर्मसु योधनकर्मस्विंद्रमावतं। अरक्षतं ॥ विपिपाना। पा पान इत्यस्माच्छिटः कानच्। वकारश्छंदसीत्यभ्यासस्येत्वं। शुभस्पती इति सुशब्दमंचित इति षष्ठ्यंतस्य परांगवन्नावादष्ठ्यामंचितसमुदायस्याष्टमिकं सर्वानुदात्तत्वं ॥

पूर्वोक्तानामेव ग्रहाणां पुत्रमिवेति याज्या। सूचितं च। पुत्रमिव पितरावश्विनोभेति याज्या। आ० ३. ९.। इति ॥

पुत्रमिव पितरावश्विनोभेंद्रावथुः काव्यैर्दंसनाभिः ।
यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक् ॥५॥
पुत्रंऽइव । पितरौ । अश्विना । उभा । इंद्र । आवथुः । काव्यैः । दंसनाभिः ।
यत् । सुरामं । वि । अपिबः । शचीभिः । सरस्वती । त्वा । मघऽवन् । अभिष्णक् ॥५॥

हे इंद्र त्वां पितरौ मातापितरौ पुत्रमिव ॥ पिता मात्रा । पा० १. २. ७०. । इति पितुः शेषः ॥ उभोभावश्विनौ काव्यैः प्रशस्यैर्दंसनाभिरात्मीयैः कर्मभिरावथुः ॥ मध्यमो व्यत्ययेन ॥ आवतुः । ररक्षतुः । त्वं च सुरामं सुखेन रमणसाधनं हविर्यदा शचीभिः शक्तिभिः सार्धं व्यपिबः विशेषेण पीतवानसि तदा हे मघवन्धनवन्निंद्र सरस्वती देवी त्वा त्वामभिष्णक् । उपासेवत ॥ भिष्णक् उपसेवायां । कंड्वादिः । छांदसो यगभावः । लङि बहुलं छंदसीति शपो लुक् । हल्ङ्याब्भ्य इति लोपः ॥

इंद्रः सुत्रामा स्ववाँ अवोभिः सुमृळीको भवतु विश्ववेदाः ।
बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥६॥
इंद्रः । सुऽत्रामा । स्वऽवान् । अवःऽभिः । सुऽमृळीकः । भवतु । विश्वऽवेदाः ।
बाधतां । द्वेषः । अभयं । कृणोतु । सुऽवीर्यस्य । पतयः । स्याम ॥६॥

तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ।
स सुत्रामा स्ववाँ इंद्रो अस्मे आराच्चिद्वेषः सनुतर्युयोतु ॥७॥
तस्य । वयं । सुऽमतौ । यज्ञियस्य । अपि । भद्रे । सौमनसे । स्याम ।
सः । सुऽत्रामा । स्वऽवान् । इंद्रः । अस्मे इति । आरात् । चित् । द्वेषः । सनुतः । युयोतु ॥७॥

त्रातारमिंद्रमित्यस्मिन्वर्गे । ४. ७. ३२. । व्याख्याते । अक्षरार्थस्तु । सुत्राता धनवान् सर्वस्य वेदितेंद्रो रक्षणैः सुष्ठु सुखयिता भवतु शत्रूंश्च हिनस्तु भयराहित्यं च करोत्वस्माकं । अतो वयं शोभनवीर्योपेतस्य धनस्य स्वामिनो भवेमेति ॥ सप्तम्यास्तु । तस्य यज्ञार्हस्येंद्रस्यानुग्रहबुद्धौ भजनीये सौमनस्ये च वयं विषयभूता भवेम । सुष्ठु त्राता धनवान् स इंद्रोऽस्मत्तो दूरदेशे द्वेष्टॄनंतर्धानं योजयत्विति ॥ ॥१९॥

ईजानमिति सप्तर्चं चतुर्थं सूक्तं गृभेधपुत्रस्य शुक्रपूतस्यार्षं मित्रावरुणादेवताकं । आद्या तु लिंगोक्तसुभूम्यग्निदेवताका न्यंकुसारिणी द्वितीयद्वादशर्चकत्र्यष्टकवती । द्वितीयाषष्ठ्यौ प्रस्तारपंक्ती द्विद्वादशर्चकद्व्यष्टकवती । सप्तमी महासतोबृहती त्र्यष्टकद्विद्वादशर्चकवती । शिष्टास्तिस्रो विराडूपा एकादशर्चास्तयोऽष्टकस्थेति लक्षणलक्षिताः । तथा चानुक्रांतं । ईजानं शुक्रपूतो गार्गेधो मैत्रावरुणं न्यंकुसारिण्याद्या लिंगोक्तदेवतांत्या महासतोबृहत्युपाद्योपांत्ये प्रस्तारपंक्ती शेषा विराडूपा इति ॥ गतो विनियोगः ॥

ईजानमिद्द्यौर्गूर्तावसुरीजानं भूमिरभि प्रभूषणि ।
ईजानं देवावश्विनावभि सुम्नैरवर्धतां ॥१॥
ईजानं । इत् । द्यौः । गूर्तऽवसुः । ईजानं । भूमिः । अभि । प्रऽभूषणि ।
ईजानं । देवौ । अश्विनौ । अभि । सुम्नैः । अवर्धतां ॥१॥

गूर्तवसुः । गूर्तसुयतं स्तोतृभ्यो दानाय हस्ते धृतं वसु धनं यस्याः सा तथोक्ता ॥ गुरी उद्यमने । निष्ठा ।

स्त्रीदितो निष्ठायामितीट्प्रतिषेधः । नसत्तनिषक्तेत्यादिना निपातनान्निष्ठानत्वाभावः । अन्येषामपीति संहितायां दीर्घः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥ ईदृशी द्यौर्युवयोरेकाभिमानिनी देवतेजानमित्यनेनेरिष्टवंतमेव पुरुषमभिवर्धयति ॥ यजेर्लिटः कानच् । वचिस्वपीति संप्रसारणे द्विर्वचनं ॥ तथा भूमिश्च प्रभूषणि प्रभवने यद्वा प्रकृष्टभूषणेऽलंकारे निमित्तभूते सतीजानमभिवर्धयति । अपि च देवौ दानादिगुणयुक्तावश्विनावीजानमिष्टवंतं पुरुषं सुन्नैर्धनैरभ्यवर्धतां । अभिवर्धयतः ॥ वृधिरंतर्भावितण्यर्थाच्छांदसो लङ् ॥

ता वां मित्रावरुणा धारयत्क्षिती सुषुम्नेषितत्वता यजामसि ।
युवोः क्राणाय सख्यैरभि ष्याम रक्षसः ॥२॥
ता । वां । मित्रावरुणा । धारयत्क्षिती इति धारयत्ऽक्षिती । सुऽसुम्ना । इषितत्वता ।
यजामसि ।
युवोः । क्राणाय । सख्यैः । अभि । स्याम । रक्षसः ॥२॥

हे मित्रावरुणौ धारयत्क्षिती धियमाणभूमिकौ । यद्वा । क्षितिरिति मनुष्यनाम । हवींषि धारयंतः क्षितयो मनुष्या ययोः स्वभूतास्तथाविधौ । सुषुम्ना सुषुम्नौ सुधनौ सुसुखौ वा तौ वां युवामिषितत्वतेषितत्वेन ॥ तृतीयैकवचने छांदसस्तकारोपजनः । यद्वा । भावप्रत्ययांतात्पुनरपि भावप्रत्ययो विकरणद्वयवत् ॥ इषितव्यत्वेन प्राप्तव्यत्वेन । हेतौ तृतीया । यतो युवां देवेषु मध्ये प्राप्तव्यौ ततो हेतोर्यजामसि । हविर्भिर्यजामः ॥ इदंतो मसीति मस इकारागमः । एवं च युवोर्युवयोः सख्यैः सखित्वैः ॥ सख्युर्यः ॥ क्राणाय कुर्वते यजमानाय ॥ करोतेः शानचि च्छांदसो विकरणस्य लुक् । तादर्थ्ये चतुर्थी ॥ यजमानार्थं रक्षसो यज्ञस्य बाधकाद्राक्षसानभि ष्याम । अभिभवेम ॥ उपसर्गप्रादुर्भ्यां । पा० ८. ३. ८७. । इत्यस्तेः सकारस्य षत्वं ॥

अधा चिन्नु यद्दिधिषामहे वामभि प्रियं रेक्णः पत्यमानाः ।
दद्वाँ वा यत्पुप्यति रेक्णः सम्वारन्नकिरस्य मघानि ॥३॥
अध । चित् । नु । यत् । दिधिषामहे । वां । अभि । प्रियं । रेक्णः । पत्यमानाः ।
दद्वान् । वा । यत् । पुप्यति । रेक्णः । सं । ऊं इति । आरन् । नकिः । अस्य । मघानि ॥३॥

हे मित्रावरुणौ वां युवाभ्यां युवयोरर्थे यद्वा दिधिषामहे हवींषि धारयामः । यद्वा ॥ धिष शब्दे ॥ वां युवां स्तुमहे । अधा चिदनंतरमेव नु क्षिप्रं प्रियमभीष्टं रेक्णः । धननामैतत् । धनमभि पत्यमाना अभिपतंतोऽभिप्राप्नुवंतो भवामः । दद्वान् ददिवान् ॥ ददातेर्लिटः क्वसुः । छंदस्युभयथेति वसोः सार्वधातुकत्वाच्छाभ्यस्तयोरात इत्यकारलोपः । अत एवेडभावश्च । संहितायां नकारस्य दीर्घादटि समानपाद इति रुत्वं । आतोऽटि नित्यमिति सानुनासिक आकारः ॥ वाशब्दश्चार्थे । हवींषि दत्तवांश्च यतो यजमानो रेक्णो धनं पुष्यति वर्धयति अस्य दत्तवतो यजमानस्य मघानि धनानि नकिः समारन् । नैवापगच्छंति । किंतु तमेव सर्वदा भजंते । समित्येतदपेक्षितस्यार्थे । उ इति पूरणः ॥ ऋतेश्छांदसे लुङि सर्तिशास्त्यर्तिभ्यश्चेति च्लेरङादेशः । ऋदृशोऽङि गुणः । पा० ७. ४. १६. ॥

असावन्यो असुर सूयत द्यौस्त्वं विश्वेषां वरुणासि राजा ।
मूर्धा रथस्य चाकन्नेतावतेनसांतकधुक् ॥४॥
असौ । अन्यः । असुर । सूयत । द्यौः । त्वं । विश्वेषां । वरुण । असि । राजा ।
मूर्धा । रथस्य । चाकन् । न । एतावता । एनसा । अंतकऽधुक् ॥४॥

हे असुर तमसः क्षेपक। यद्वा। असवः प्राणाः। तान्ददाति मनुष्येभ्यः स्वोदयेन प्रयच्छतीत्यसुरः। ईदृश हे मित्र द्यौर्लोको देवनशीलादितिर्वान्यः॥ सुपां सुलुगिति द्वितीयायाः स्वादेशः॥ वरुणापेक्षयान्यमसावसुं नभसि दृश्यमानं त्वां सूयत। असूत॥ षूङ् प्राणिप्रसवे। छांदसोऽडभावः॥ हे वरुण त्वं च विश्वेषां सर्वेषां प्राणिनां राजासि। ईश्वरो भवसि। तादृशयोर्युवयो रथस्य मूर्धा शिरस्थानम्। अस्मत्सख्यं कामयते। यद्वा। रथस्य रंहणशीलस्य यज्ञस्य मूर्धा न मूर्धेव प्रधानः सोमस्थानम्। युवां कामयते॥ कमु दीप्तिकांतिगतिषु। अस्मात्यङ्लुगंताच्छांदसो लङ्॥ यत एवमतः कारणादंतकधुगंतकस्य हननशीलस्य राक्षसादेर्थमसीव वा द्रोग्धा॥ द्रुह जिघांसायां। सत्सूद्विषेत्यादिना क्विप्। वा द्रुहमुहष्णुहष्णिहां। पा० ८. २. ३३.। इति षत्वं। भव्भावः॥ ईदृशः स यज्ञ एतावतैनसेयत्परिमाणेनापि पापलेशेनापि न युज्यते॥

अस्मिन्त्स्वे३तच्छकपूत एनो हिते मित्रे निगतान्हंति वीरान्।
अवोर्वा यद्वान्नूष्वः प्रियासु यज्ञियास्वा॥५॥

अस्मिन्। सु। एतत्। शकऽपूते। एनः। हिते। मित्रे। निऽगतान्। हंति। वीरान्। अवोः। वा। यत्। धात्। तनूषु। अवः। प्रियासु। यज्ञियासु। अवा॥५॥

योऽयं शकपूताख्य ऋषिरस्मिञ्शकपूते स्थितमेतदेनः पापं शत्रूणां पापकरमायुधं वा मित्रे देवे हिते हिताचरणपरेऽनुकूले सति निगतान्निगंतव्यान्हननार्थं नियमेन प्राप्तव्यान्वीराञ्शत्रोः पुत्रादीन् सु सुष्ठु हंति। हिनस्ति। अस्मिन्नृषौ समवेतं यत्पापं तन्मित्रस्य प्रसादेन तदीयेषु शत्रुषु स्वकार्यं दुःखं जनयतीत्यर्थः॥ निगतान्। निपूर्वान्नमेः कर्मणि निष्ठा। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं॥ कदेत्यत आह। अवोर्हविर्भिस्तर्पयितुः॥ अवतेरौणादिक उप्रत्ययः॥ तस्य यजमानस्य यज्ञियासु यज्ञार्हासु क्रियासु तनूषु शरीरेष्ववोऽभिगंता मित्रो वरुणो वा यद्यदावो रक्षणं धात् दधाति निदधाति स्थापयति। यद्वा। यदावोऽभिगंता स ऋषिरवितू रक्षितुर्मित्रस्य वरुणस्य वा यागार्हासु प्रियासु तनूषु शरीरेष्ववो हविर्लक्षणमन्नं धात् धारयति। तदानीं मित्रे वरुणे चानुकूले सति तदेनो वीरान्हंतीत्यर्थः॥

युवोर्हि माता दितिर्विचेतसा द्यौर्न भूमिः पयसा पुपूतनि।
अवं प्रिया दिदिष्टन सूरो निनिक्त रश्मिभिः॥६॥

युवोः। हि। माता। अदितिः। विऽचेतसा। द्यौः। न। भूमिः। पयसा। पुपूतनि। अवं। प्रिया। दिदिष्टन। सूरः। निनिक्त। रश्मिऽभिः॥६॥

हे विचेतसा विशिष्टज्ञानौ मित्रावरुणौ युवोर्हि युवयोः खलु माता जनन्यदितिरदीनाखंडनीया वा भवति। सैव भूमिः। इयं वा अदितिरिति श्रुतेः। द्यौर्न यथा द्युलोकः पयसा वृष्युदकेन सर्वं जगत्पुनाति एवमेषा सा भूमिः पयसात्मीयेन रसेन हविरात्मना परिणतेन पुपूतनि परिपवने यजमानानां पापस्य शोधने हेतुर्भवतीत्यर्थः॥ पूतशब्दादाचारे क्विबंतादौणादिकः कनिप्रत्ययः। छांदसं द्विर्वचनं॥ तौ युवामितिद्विश्च यूयं प्रिया प्रियाणि धनान्यव दिदिष्टन। अवाङ्मुखमस्मदभिमुखं दिशत। दत्त॥ दिश अतिसर्जने। अस्माच्छोटि च्छांदसः शपः सुः। तप्ततनथनाश्चेति तशब्दस्य तनादेशः॥ अपि च सूरः सूर्यस्य रश्मिभिः किरणैर्निनिक्त। अस्मात्शोधयत पोषयत वा॥ णिजिर् शौचपोषणयोः जौहोत्यादिकः। संज्ञापूर्वको विधिरनित्य इति निजां त्रयाणां। पा० ७. ४. ७५.। इत्यभ्यासस्य गुणो न क्रियते॥

युवं ह्यप्नराजावसीदतं तिष्ठद्रथं न धूर्षदं वनर्षदं।
ता नः कणूकयंतीर्नृमेधस्तत्रे अंहसः सुमेधस्तत्रे अंहसः॥७॥

युवं । हि । अप्नऽराजौ । असीदतं । तिष्ठत् । रथं । न । धूःऽसदं । वनऽसदं ।
ताः । नः । कणूकऽयंतीः । नृऽमेधः । तचे । अंहसः । सुऽमेधः । तचे । अंहसः ॥७॥

हे मित्रावरुणौ युवं हि युवां खल्वप्नराजावप्नसा कर्मणा प्रवर्षणप्रकाशनादिना राजमानौ दीप्यमानौ संतावसीदतं । स्वकीये स्थाने निषीदतः । आसाथे ॥ अप्न इति कर्मनाम । कर्माख्यायां ङ्यखौ नुङ् च । उ० ४. २०७. । इत्याप्नोतेरसुन् तस्य नुडागमो धातोर्ङ्यखौ च । तस्मिन्नुपपदे राजतेः सत्सूद्विषेत्यादिना क्विप् । पीवोपवसनादीनां छंदसि लोपो वक्तव्यः । म० ६. ३. १०९. ६. । इत्यप्नसः सकारलोपः ॥ तौ मित्रावरुणौ कणूकयंतीः । कणतिः शब्दार्थः । कणनमाक्रोशशब्दं शब्दनमिच्छंतीस्ताः प्रसिद्धाः शाचवीः प्रजा अभिभवितुं । न संप्रत्यर्थे । संप्रति रथं तिष्ठत् । अभितिष्ठतां ॥ तिष्ठतेर्लेट्यडागमः । इतश्च लोप इतीकारलोपः । प्रत्येकाभिप्रायेणैकवचनं ॥ कीदृशं रथं । धूर्षदं धुर्यश्वयोर्वहनदेशे सीदंतं वनर्षदं वनेषूद्यानेषु क्रीडार्थं निषीदंतं । यद्वा । वनमित्युदकनाम । समुद्रमध्ये हि वरुणो निवसति । वने समुद्रोदके निषीदंतं ॥ उभयत्रापि पूर्ववत्क्विप् । वनसदमित्यत्र छांदसः सांहितिको रेफोपजनः ॥ हे मित्रावरुणौ युवाभ्यां नृमेधो मम पितांहसः पापात्तचे । ररचे । रक्षितो बभूव ॥ चेङ् पालन इत्यस्मात्कर्मणि लिट् ॥ यद्वा । उपचाराज्जन्ये जनकशब्दः । नृमेधस्य पुत्रः शकपूतोऽहं पापाद्युवाभ्यां तचे । रक्षितोऽस्मि । सुमेधोऽन्योऽपि सुयज्ञो यजमानोऽहसः पापात्तचे । युवाभ्यामेवारक्षत ॥ भीचार्थानां । पा० १. ४. २५. । इत्यंहसोऽपादानसंज्ञा ॥ ॥ २० ॥

प्रो ष्विति सप्तर्चं पंचमं सूक्तं पिजवनपुत्रस्य सुदास आर्षमैंद्रं । आद्यस्तृचः शाक्करः । षट्पंचाशदक्षरौ शक्करी । द्वितीयस्तृचो महापांक्तः । षळष्टका महापंक्तिः । सप्तमी त्रिष्टुप् । तथा चानुक्रांतं । प्रो षु सुदाः पैजवनः शाक्करमहापांक्तावाद्यौ तृचावंत्या त्रिष्टुबिति ॥ षोळशर्चस्य आद्यस्तृचः शंसनीयः । सूचितं च । चिकद्रुकेषु महिषो यवाशिरं प्रो ष्वस्मै पुरोरथमिति तृचावातिच्छंदसौ । आ० ६. २. । इति ॥ महाव्रते माध्यंदिनसवने ब्रह्मशस्त्रेऽनुरूपतृचस्य प्रो ष्वस्मा इत्येका । तथैव पंचमारण्यके सूचितं च । प्रो ष्वस्मै पुरोरथमित्यतोऽनुरूपः । ऐ० आ० ५. १. १. । इति ॥

प्रो ष्वस्मै पुरोरथमिंद्राय शूषमर्चत ।
अभीके चिदु लोककृत्संगे समत्सु वृत्रहास्माकं बोधि चोदिता नभंतामन्यकेषां
ज्याका अधि धन्वसु ॥१॥
प्रो इति । सु । अस्मै । पुरःऽरथं । इंद्राय । शूषं । अर्चत ।
अभीके । चित् । ऊं इति । लोकऽकृत् । संऽगे । समत्ऽसु । वृत्रऽहा । अस्माकं ।
बोधि । चोदिता । नभंतां । अन्यकेषां । ज्याकाः । अधि । धन्वऽसु ॥१॥

अस्मा इंद्राय । षष्ठ्यर्थे चतुर्थी । अस्येंद्रस्य पुरोरथं रथस्य पुरः पुरतः ॥ पुरोऽव्ययमिति गतित्वान्नतिसमासः ॥ रथस्यायतो वर्तमानं शूषं बलं सु प्रो अर्चत । हे स्तोतारः सुष्ठु प्रपूजयत । प्र उ इति निपातसमुदायः प्रो इति ॥ श्रीदिति प्रगृह्यसंज्ञं ॥ इंद्रो विशेष्यते । समत्सु । समानं मायंत्यत्रेति समदः संग्रामाः ॥ श्रीणादिकोऽधिकरणे क्विप् । समानस्य छंदसीति सभावः ॥ समत्सु संग्रामेषु संगे संगमनीये शत्रुबले ॥ ङोऽन्यत्रापि दृश्यते । पा० ३. २. ४८.* । इति गमेर्डः ॥ अभीके चिदभ्यर्णेऽपि निकटं प्राप्तेऽपि केशाकेशव्यवस्थायामपि लोककृत्स्थितिछेत्ता पलायिता क्षिप्त्वा वृत्रहा वृत्राणामावरकाणां हंता एवंविधः स इंद्रोऽस्माकं स्तोतृणां चोदिता धनानां प्रेरिता सन्बोधि । अस्माभिः कृतानि परिचरणानि बुध्यतां ॥ बुधेश्छांदसे लुङि दीपजनबुधेत्यादिना कर्तरि च्लेश्चिणादेशः । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः ॥ अपि चान्यकेषां कुत्सितानामन्येषां शत्रूणामधि धन्वसु धनुःष्वधिरोपिता ज्याकाः कुत्सिता ज्या नभंतां । हिंसंतां । नश्यंतु ॥ ज्याशब्दात्कुत्सायां प्राणिवात्कः । पा० ५. ३. ७०. ७४. । नभ तुभ हिंसायां क्रैथादिकः । व्यत्ययेन शप् ॥

त्वं सिंधूँरवासृजोऽधराचो अहन्नहिं ।
अशत्रुरिंद्र जज्ञिषे विश्वं पुष्यसि वार्यं तं त्वा परि ष्वजामहे नभंतामन्यकेषां ज्याका अधि धन्वसु ॥२॥

त्वं । सिंधून् । अव । असृजः । अधराचः । अहन् । अहिं ।
अशत्रुः । इंद्र । जज्ञिषे । विश्वं । पुष्यसि । वार्यं । तं । त्वा । परि । स्वजामहे । नभंतां ।
अन्यकेषां । ज्याकाः । अधि । धन्वऽसु ॥२॥

हे इंद्र सिंधून् स्यंदनशीलाञ्जलपूरानधराचोऽधरमधोमुखमंचतो गंतॄनवाक्षजः । मेघान्निरगमयः । यतस्त्वमहिमंतरिक्षे शयं मेघमहन् हतवानसि । यद्वा । अहिमागत्य हंतारं सर्वस्य जगत आवरकं वृत्रमसुरमहन् हतवानसि । अतो हे इंद्र त्वमशत्रुः शत्रुरहितो जज्ञिषे । जायसे ॥ न संति शत्रवोऽस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । जनेर्लिटि गमहनेत्यादिनोपधालोपः । द्विर्वचनेऽचीति स्थानिवद्भावाद्विर्वचनं ॥ तथा विश्वं सर्वं वार्यं वरणीयं संभजनीयं धनं पुष्यसि । वर्धयसि ॥ वृङ् संभक्तौ । ऋहलोर्ण्यत् । ईडवंदवृशंसदुहां ण्यत इत्यादुदात्तत्वं ॥ तादृशं त्वां परि ष्वजामहे । हविर्भिः स्तुतिभिश्चालिंगनं कुर्मः । वशीकुर्म इत्यर्थः ॥ ष्वञ्ज परिष्वंगे । दंशसंजष्वंजां शपि । पा० ६. ४. २५. । इत्यनुनासिकलोपः ॥

वि षु विश्वा अरातयोऽर्यो नशंत नो धियः ।
अस्तासि शत्रवे वधं यो नं इंद्र जिघांसति या ते रातिर्ददिर्वसु नभंतामन्यकेषां ज्याका अधि धन्वसु ॥३॥

वि । सु । विश्वाः । अरातयः । अर्यः । नशंत । नः । धियः ।
अस्ता । असि । शत्रवे । वधं । यः । नः । इंद्र । जिघांसति । या । ते । रातिः । ददिः । वसु ।
नभंतां । अन्यकेषां । ज्याकाः । अधि । धन्वऽसु ॥३॥

विश्वाः सर्वा अरातयोऽदात्र्योऽर्योऽभिगंत्र्यो नोऽस्माकं शत्रुभूताः प्रजाः सु सुष्ठु वि नशंत । विनश्यंतु । हे इंद्र त्वदर्थं धियः कर्माणि स्तुतयो वा प्रवर्ततां । हे इंद्र यो नोऽस्माञ्जिघांसति हंतुमिच्छति ॥ हंतेः सन्यङ्श्नगमां सनीति दीर्घः । अभ्यासस्येति कुत्वं ॥ तस्मै शत्रवे वधं हननसाधनमायुधमस्तासि । क्षेप्ता भवसि ॥ असु क्षेपणे । ताच्छीलिकस्तृन् ॥ ते तव या रातिर्धनप्रदानहेतुर्हस्तः ॥ रा दाने । करणे क्तिन् । मंत्रे वृषेषपचमनविदभूवीरा उदात्त इति क्तिन उदात्तत्वं ॥ सा रातिर्वसु धनं ददिः । अस्मभ्यं दाता भवतु ॥ आदृगमहन इति ददातेः किप्रत्ययः । न लोकाव्ययेति वसुशब्दात्षष्ठ्यभावः ॥ सिद्धमन्यत् ॥

यो नं इंद्राभितो जनो वृकायुरादिदेशति ।
अधस्पदं तमीं कृधि विबाधो असि सासहिर्नभंतामन्यकेषां ज्याका अधि धन्वसु ॥४॥

यः । नः । इंद्र । अभितः । जनः । वृकऽयुः । आऽदिदेशति ।
अधःऽपदं । तं । ईं । कृधि । विऽबाधः । असि । ससहिः । नभंतां । अन्यकेषां । ज्याकाः ।
अधि । धन्वऽसु ॥४॥

हे इंद्र यो जनो वृकायुः । वृको हिंसकोऽरण्यस्था स्तेनो वा । स इवाचरन्नोऽस्मानभितः सर्वत आदि-

देशति अभिलक्ष्यायुधान्यतिसृजति ॥ दिशतेर्लेव्यडागमः । छांदसः शपः सुः । नाभ्यस्ताच्चि पितीत्यच वक्तव्यं छंदसीति वक्तव्यमिति वचनात्प्रतिषेधाभावे लघूपधगुणः । अभ्यस्तानामादिरित्यादुदात्तत्वं ॥ तमीं तमिमं जनमधस्पदं पादस्याधस्तादृर्तमागं कृधि । कुरु ॥ करोतेश्छांदसो विकरणस्य लुक् । सृपृणुपृकृवृभ्य इति हेर्धिः ॥ यतस्त्वं विबाधो विशेषेण बाधिता शत्रूणां सासहिरभिभविता चासि । सिद्धः शेषः ॥

यो नं इंद्राभिदासंति सनाभिर्यश्च निष्ट्यः ।
अव तस्य बलं तिर महीव द्यौरध त्मना नभंतामन्यकेषां ज्याका अधि धन्वसु ॥५॥
यः । नः । इंद्र । अभिऽदासंति । सऽनाभिः । यः । च । निष्ट्यः ।
अव । तस्य । बलं । तिर । महीऽइव । द्यौः । अध । त्मना । नभंतां । अन्यकेषां ।
ज्याकाः । अधि । धन्वऽसु ॥५॥

हे इंद्र यः सनाभिः समानजन्मा शत्रुर्नोऽस्मानभिदासति उपक्षयति यश्च निष्ट्यो निकृष्टजन्मास्मानुपक्षयति ॥ जातार्थे निकृष्टवाचिनो निःशब्दादव्ययात्त्यप् । पा० ४. २. १०४. । कृत्याल्लादौ तद्धिते । पा० ८. ३. १०१. । इति षत्वं ॥ अधानंतरमेव महीव द्यौर्महती द्यौरिव विस्तृतं तस्य शत्रोर्बलं त्मनात्मना ॥ मंत्रेष्वाङ्यादेरात्मन इत्याकारलोपः ॥ स्वयमेवाव तिर । जहि । अवतिरतिर्वधकर्मा । गतमन्यत् ॥

वयमिंद्र त्वायवः सखित्वमा रभामहे ।
ऋतस्य नः पथा नयाति विश्वानि दुरिता नभंतामन्यकेषां ज्याका अधि धन्वसु ॥६॥
वयं । इंद्र । त्वायवः । सखिऽत्वं । आ । रभामहे ।
ऋतस्य । नः । पथा । नय । अति । विश्वानि । दुःऽइता । नभंतां । अन्यकेषां ।
ज्याकाः । अधि । धन्वऽसु ॥६॥

हे इंद्र त्वायवस्त्वामात्मन इच्छंतो वयं सखित्वं सखिकर्म यज्ञात्मकमा रभामहे । उपक्रमामहे । ऋतस्य सत्यस्य यज्ञस्य पथा मार्गेण ॥ भस्य टेर्लोपः । उदात्तनिवृत्तिस्वरेण तृतीयाया उदात्तत्वं ॥ विश्वानि सर्वाणि दुरिता दुरितानि दुर्गमनानि पापानि तत्फलानि च नोऽस्मानति नय । अतिपारय । गतमन्यत् ॥

अस्मभ्यं सु त्वमिंद्र तां शिक्ष या दोहते प्रति वरं जरित्रे ।
अच्छिद्रोधी पीपयद्यथा नः सहस्रधारा पयसा मही गौः ॥७॥
अस्मभ्यं । सु । त्वं । इंद्र । तां । शिक्ष । या । दोहते । प्रति । वरं । जरित्रे ।
अच्छिद्रऽऊधी । पीपयत् । यथा । नः । सहस्रऽधारा । पयसा । मही । गौः ॥७॥

हे इंद्र त्वं तां गामस्मभ्यं स्तोतृभ्यः सु शिक्ष । प्रदेहि । शिक्षतिर्दानकर्मा । या गौर्जरित्रे स्तोत्रे वरं वरणीयं पयः प्रति दोहते प्रतिदिनं निरंतरेण दुग्धे ॥ दुहेर्बक्तव्यं छंदसीति शपो लुगभावः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे शपः पित्त्वादनुदात्तत्वं । धातुस्वरः शिष्यते । वरं । वृञ् वरण इत्यस्माद्वृहवृवृनिश्विगमश्चेति कर्मण्यण् ॥ सा प्रक्ता गौरच्छिद्रोधी निविडोधस्का अत एव सहस्रधारा बहुभिः क्षीरधाराभिर्युक्ता मही महती सती यथा नोऽस्मान्पयसा क्षीरेण पीपयत् प्रवर्धयेत् तथा तां कुर्विति शेषः ॥ श्रीण्यायी वृद्धौ । स्तंताच्छांदसो लुक् । व्यत्ययेन धातोः पीभावः । अडभावश्छांदसः ॥ ॥ २१ ॥

उभे यदिति सप्तर्चं षष्ठं सूक्तं । युवनाश्वपुत्रस्य मांधातुरार्षं । पूर्वेणेत्यर्धर्चसहितायाः सप्तम्यास्तु गोधा

नाम ब्रह्मवादिन्यृषिः । सप्तमी पंक्तिः । शिष्टाः षळुष्टुभो महापंक्तयः । इंद्रो देवता । तथा चानुक्रांतं । उभे यन्मांधाता यौवनाश्वो महापांक्तं पंक्तिरंत्या तामध्यर्धी गोधापक्षदिति ॥ गतः सूक्तविनियोगः ॥ चातुर्विंशिके ऽहनि माध्यंदिनेऽच्छावाकस्याश्वसूचो वैकल्पिकः स्तोत्रियः । सूचितं च । उभे यदिंद्र रोदसी अव यत्त्वं शतक्रतो । आ० ७. ४. । इति ॥

उभे यदिंद्र रोदसी आपप्राथोषा इव ।
महांतं त्वा महीनां सम्राजं चर्षणीनां देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥१॥

उभे इति । यत् । इंद्र । रोदसी इति । आऽपप्राथ । उषाःऽइव ।
महांतं । त्वा । महीनां । संऽराजं । चर्षणीनां । देवी । जनित्री । अजीजनत् । भद्रा ।
जनित्री । अजीजनत् ॥ १॥

हे इंद्र उभे रोदसी द्यावापृथिव्यौ यद्यस्त्वमापप्राथ तेजसाप्रथयसि आपूरयसि ॥ प्रा पूरणे आदादिकः । छांदसो लिट् ॥ उषा इव यथोषाः स्वभासा सर्वं जगदापूरयति तद्वत् । तं महीनां महतां देवानामपि महांतमधिकं चर्षणीनां मनुष्याणामपि सम्राजमीश्वरमिंद्रं त्वा त्वां देवी देवनशीला जनित्र्यदितिरजीजनत् । अजनयत् ॥ जनेर्ण्यंताल्लुङि चङि रूपमेतत् ॥ यस्मादेषा जनित्रीदृशं पुत्रमजीजनत् अतः कारणात्सा भद्रा कल्याणी प्रशस्ता जाता ॥ जनेर्ण्यंतात्साधुकारिणि तृन् । जनिता मंत्र इतीडादौ णिलोपो निपात्यते । ऋन्नेभ्य इति ङीप् ॥

अव स्म दुर्हणायतो मर्तस्य तनुहि स्थिरं ।
अधस्पदं तमीं कृधि यो अस्माँ आदिदेशति देवी जनित्र्यजीजनद्भद्रा जनित्र्य-
जीजनत् ॥२॥

अव । स्म । दुःऽहनायतः । मर्तस्य । तनुहि । स्थिरं ।
अधःऽपदं । तं । ईं । कृधि । यः । अस्मान् । आऽदिदेशति । देवी । जनित्री । अजीजनत् ।
भद्रा । जनित्री । अजीजनत् ॥ २॥

दुर्हणायतो दुःखप्रदं हननमाचरतो मर्तस्य मनुष्यस्य शत्रोः स्थिरं दृढं बलमव तनुहि । अवततं नीचीनं कुरु । क्षेति पूरकः । तं शत्रुमीमेनमधस्पदं पादयोरधस्ताद्वर्तमानं कृधि । कुरु । यः शत्रुरस्मानादिदेशति जिघांसति । समानमन्यत् ॥

अव त्या बृहतीरिषो विश्वश्चंद्रा अमित्रहन् ।
शचीभिः शक्र धूनुहींद्र विश्वाभिरूतिभिर्देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीज-
नत् ॥३॥

अव । त्याः । बृहतीः । इषः । विश्वऽचंद्राः । अमित्रऽहन् ।
शचीभिः । शक्र । धूनुहि । इंद्र । विश्वाभिः । ऊतिऽभिः । देवी । जनित्री । अजीजनत् ।
भद्रा । जनित्री । अजीजनत् ॥ ३॥

हे अमित्रहन्नमित्राणां शत्रूणां हंतर्हे शक्रेंद्र शचीभिरात्मीयाभिः शक्तिभिरात्मीयैः कर्मभिर्वा त्वास्माः

प्रसिद्धा बृहतीर्महतीः ॥ बृहन्महतीरुपसंख्यानमिति ङीप उदात्तत्वं ॥ विश्वचंद्राः । विश्वानि सर्वाणि चंद्राणि हिरण्यानि यासां तादृशीः ॥ हस्वाच्चंद्रोत्तरपदे मंत्र इति सुडागमः । बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं ॥ एवंभूता इषोऽन्नानि विश्वाभिः सर्वाभिरूतिभी रक्षाभिः साधमव धूनुहि । अस्मात्सवाद्दुःखं कंपय । अस्मदभिमुखं गमयेत्यर्थः । गतमन्यत् ॥

चातुर्विंशिकेऽहनि माध्यंदिनेऽच्छावाकस्याव यत्त्वमिति तृचो वैकल्पिकोऽनुरूपः । सूचं तु सूत्रादावुदाहृतं ॥

अव॒ यत्त्वं श॒तक्र॑तविंद्र॒ विश्वा॑नि धूनुषे ।
र॒यिं न सु॑न्व॒ते सचा॑ सह॒स्रिणी॑भिरू॒तिभि॑र्दे॒वी ज॑नि॒त्र्यजीजनद्भ॒द्रा ज॑नि॒त्र्यजीजनत् ॥४॥
अव॑ । यत् । त्वं । श॒तक्र॑तो॒ इति॑ श॒तऽक्र॑तो । इंद्र॑ । विश्वा॑नि । धूनुषे ।
र॒यिं । न । सु॒न्व॒ते । सचा॑ । सह॒स्रिणी॑भिः । ऊ॒तिऽभिः॑ । दे॒वी । ज॒नि॒त्री । अ॒जी॒ज॒नत् ।
भ॒द्रा । ज॒नि॒त्री । अ॒जी॒ज॒नत् ॥४॥

हे शतक्रतो बहुकर्मन् बहुप्रज्ञ वेंद्र सुन्वते सोमाभिषवं कुर्वते ॥ सुनोतेर्लटः शतु । क्रमुवोः सार्वधातुक इति यण् । शतुरनुम इति विभक्तेरुदात्तत्वं ॥ ईदृशाय यजमानाय यदा त्वं विश्वानि व्याप्तान्यन्नानि वाव धूनुषे अभिगमयसि । ददासीत्यर्थः । तदा रयिं न रयिं च पुष्टरूपं धनं च सहस्रिणीभिः सहस्रसंख्यायुक्ताभिरूतिभी रक्षाभिः सचा सह प्रदेहि । गतमन्यत् ॥

अव॒ स्वेदा॑ इवा॒भितो॒ विष्व॑क्पतंतु दि॒द्यवः॑ ।
दू॒र्वाया इव॒ तं॑तवो॒ व्य१॒॑स्मदे॑तु दुर्म॒तिर्दे॒वी ज॑नि॒त्र्यजीजनद्भ॒द्रा ज॑नि॒त्र्यजीजनत् ॥५॥
अव॑ । स्वेदा॑ः । इ॒व॒ । अ॒भि॒तः॑ । विष्व॑क् । पतं॑तु । दि॒द्यवः॑ ।
दू॒र्वायाः॑ । इ॒व॒ । तं॑तवः । वि । अ॒स्मत् । ए॒तु॒ । दुः॒ऽम॒तिः॑ । दे॒वी । ज॒नि॒त्री । अ॒जी॒ज॒नत् ।
भ॒द्रा । ज॒नि॒त्री । अ॒जी॒ज॒नत् ॥५॥

स्वेदा इव गात्रात्स्वेदविंदव इवाभितः सर्वतो दिद्यवो द्योतमानान्यायुधानींद्रस्य दीप्तयो वा विष्वग्रामामुखा अव पतंतु । निपतंतु । दूर्वाया इव तंतवः । यथा दूर्वाकांडा बहुशः प्ररोहंति एवं बहुशो विसृता दृश्यंते । दुर्मतिर्दुष्टाभिसंधिः शत्रुरस्मदस्मत्तो वेतु । वियता गच्छतु । गतमन्यत् ॥

दी॒र्घं ह्यंकु॑शं॒ यथा॒ शक्तिं॑ बिभर्षि मंतुमः ।
पू॒र्वेण॑ मघवन्प॒दाजो व॒यां यथा॒ यमो दे॒वी ज॑नि॒त्र्यजीजनद्भ॒द्रा ज॑नि॒त्र्यजीजनत् ॥६॥
दी॒र्घं । हि । अंकु॑शं । यथा॒ । शक्तिं॑ । बिभर्षि । मंतुऽमः ।
पू॒र्वेण॑ । म॒घऽव॒न् । प॒दा । अ॒जः॒ । व॒यां । यथा॑ । यमः॑ । दे॒वी । ज॒नि॒त्री । अ॒जी॒ज॒नत् ।
भ॒द्रा । ज॒नि॒त्री । अ॒जी॒ज॒नत् ॥६॥

दीर्घमायतमंकुशं रश्मिं यथा बिभर्षि एवमायतां शक्तिं हे मंतुमः । मंतुर्ज्ञानं । तद्वन् ॥ मतुवसो रुरिति संबुद्धौ सकारस्य रुत्वं ॥ ईदृशेंद्र बिभर्षि । धारयसि ॥ डुभृञ् धारणपोषणयोः जौहोत्यादिकः । स्त्री

भृत्रामिदित्यभ्यासस्येत्वं ॥ हे मघवन्धनवन्निंद्र यथा पूर्वेण देहस्य पूर्वभागे वर्तमानेन पदा पादेनाजस्रङ्गागो वयां शाखामाकर्षति तथा पूर्वोक्तया शक्त्याक्रथ यमः । शचूनियच्छसि ॥ यमेर्लेव्यडागमः । बहुलं छंदसीति शपो लुक् ॥ गतमन्यत् ॥

नकिर्देवा मिनीमसि नकिरा योपयामसि मंत्रश्रुत्यं चरामसि ।
पक्षेभिरपिकक्षेभिरत्राभि सं रभामहे ॥७॥
नकिः । देवाः । मिनीमसि । नकिः । आ । योपयामसि । मंत्रऽश्रुत्यं । चरामसि ।
पक्षेभिः । अपिऽकक्षेभिः । अत्र । अभि । सं । रभामहे ॥७॥

हे देवा रुद्रादयः युष्मद्विषये नकिर्मिनीमसि । न किमपि हिंस्राः ॥ मीङ् हिंसायां क्रैयादिकः । मीनातेर्निगम इति ह्रस्वः । इदंतो मसिः ॥ आकारः समुच्चये । नकिर्ण किंच योपयामसि । योपयामः । अननुष्ठानेन विमोहयामः ॥ युप विमोहने ॥ किंतर्हि मंत्रश्रुत्यं मंत्रेण स्वार्थे श्रुतौ विधिवाक्ये प्रतिपाद्यं युष्मद्विषयं कर्म तच्चरामसि । आचरामः । अनुतिष्ठामः । अपि च पक्षेभिः पक्षैः पक्षस्थानीयैः स्तुतशस्त्रैरपिकक्षेभिः । अपिकक्षो नाम बाह्वोर्मध्यभागः । यत्रस्थापिकक्षभूतैर्हविर्भिरत्रास्मिन्यज्ञेऽभितः सर्वतो युष्मान्सं रभामहे । सम्यगवलंबामहे ॥ ॥२२॥

यस्मिन्निति सप्तर्चं सप्तमं सूक्तं यमगोत्रस्य कुमारस्यार्षं । आनुष्टुभं यमदेवत्यं । तथा चानुक्रांतं । यस्मिन्कुमारो यामायनो याममानुष्टुभं त्विति ॥

यस्मिन्वृक्षे सुपलाशे देवैः संपिबते यमः ।
अत्रा नो विश्पतिः पिता पुराणाँ अनु वेनति ॥१॥
यस्मिन् । वृक्षे । सुऽपलाशे । देवैः । संऽपिबते । यमः ।
अत्र । नः । विश्पतिः । पिता । पुराणान् । अनु । वेनति ॥१॥

वृक्षे । लुप्तोपममेतत् । वृक्षवत्सुपलाशे शोभनपलाशोपेते शोभनोद्यानसहिते । यद्वा । शोभनपर्णोपेते वृक्षे । तादृशस्य वृक्षस्य मूलं यथौष्ण्यजनितश्रमापनोदेन सुखकरं भवति तद्वत्सुखकरे यस्मिन्स्थाने देवैः परिजनभूतैर्यमो नियंता वैवस्वतः संपिबते सह भुंक्ते । पिबतीत्यर्थः । विश्पतिर्विशां प्रजानामधिपतिः पिता नः ॥ व्यत्ययेन बहुवचनं ॥ मम नचिकेतसो जनको वाजश्रवसोऽत्रास्मिन्यमस्य स्थाने पुराणान्पुरातनानत्र चिरकालं निवसतः पितॄननु तेषां पश्चात्तत्समीपे निवसत्वयमिति वेनति । मां कामयते । नचिकेता नाम कुमारो वाजश्रवसेन पित्रा यमलोकं प्रस्थापितः सन् यमं दृष्ट्वा प्रसाद्य पुनरपीमं लोकमाजगाम । अयमर्थ इदमादिकैर्मंत्रैः प्रतिपाद्यते । यद्वा । कुमारो नाम नचिकेतसोऽन्यः कश्चिदृषिः । यच्छतीति यम आदित्यः । तमनेन सूक्तेन तुष्टाव । सुपलाशे वृक्ष इव यस्मिञ्शोभने स्थाने यम आदित्यो देवैः । दीव्यंतीति देवा रश्मयः । तैः संपिबते संगच्छते ॥ उपसर्गवशात्पिबतिरत्र गत्यर्थः । व्यत्ययेनात्मनेपदं ॥ अत्रास्मिन्स्थाने स्थितो विश्पतिर्विशां प्रजानां प्रकाशनप्रवर्षणादिना पालयिता प्राणात्मना सर्वेषां जनकः स आदित्यः पुराणांश्चिरंतनान्स्तोतॄनोऽस्मानपि वेनति । अनुग्राह्यत्वेन कामयते । यद्वा । अत्र स्थाने स्थितान्नोऽस्मान् पुराणान्पूर्वपुरुषाननु वेनति । अनुक्रमेण कामयते ॥

पुराणाँ अनुवेनंतं चरंतं पापयामुया । असूयन्नभ्यचाकशं तस्मा अस्पृहयं पुनः ॥२॥
पुराणान् । अनुऽवेनंतं । चरंतं । पापया । अमुया । असूयन् । अभि । अचाकशं ।
तस्मै । अस्पृहयं । पुनरिति ॥२॥

पुराणान्पुरातनान्पितॄनगुवेनंतं मामनुगतं कामयमानममुयानया पापया निकृष्टया बुद्ध्या सह चरंतं वर्तमानं पितरं वाजश्रवसमसूयन् सुखेन जीवंतं मां मृत्युसमीपं प्रेहीत्युक्तवानिति मानसेनोपतापेन युक्तः सन् प्रथममभ्यचाकशं । अयं पश्यतिकर्मा । अभ्यपश्यं ॥ असुन् मानस उपतापे । कंड्वादिः ॥ पुनः पश्चात्तस्मा असूहयं । पितुराज्ञया तं मृत्युं प्राप्तुमिच्छं ॥ सूह ईप्सायां । चुरादिरदंतः । सूहेरीप्सितः । पा० १. ४. ३६. । इति संप्रदानसंज्ञायां तच्छब्दाच्चतुर्थी ॥ यद्वा । पुराणांश्चिरंतनान्स्तोतॄन्पूर्वपुरुषान्पितॄन्वागुवेनंतमनुक्रमेण कामयमानं चरंतमुद्दिश्यासमयाभ्यां दिवि परिवर्तमाननया पापया निकृष्टया स्तोतुमसमर्थया बुद्ध्यासूयन् । गुणेषु दोषाविष्करणमसूया । परकीयगुणेषु दूषणान्याविष्कुर्वन्नभ्यचाकशं । अयमपि कश्चिदिति सामान्यरूपेणाभ्यपश्यं । इदानीं तु पुनस्तस्मादित्यस्य माहात्म्यं जानंस्तस्मा असूहयं । तमेवादित्यं स्तुतिभिः परिचरणात्मकैः कर्मभिश्च प्राप्तुमिच्छं ॥

यं कुमार नवं रथमचक्रं मनसाकृणोः । एकेषं विश्वतः प्राचमपश्यन्नधि तिष्ठसि ॥३॥
यं । कुमार । नवं । रथं । अचक्रं । मनसा । अकृणोः । एकऽईषं । विश्वतः । प्राचं ।
अपश्यन् । अधि । तिष्ठसि ॥३॥

नचिकेतःसंज्ञं कुमारं यमोऽनयोक्तरया च प्रलोभयति । हे कुमार नवमभिनवमितः पूर्वमदृष्टं । अभिनवत्वमेव व्यनक्ति । अचक्रं चक्ररहितं तमेकेषमेकेषा यस्य तादृशं तथापि विश्वतः सर्वतः प्राचं प्रकर्षेणांचंतं गच्छंतं यं रथं मनसाकृणोर्मत्समीपं प्रतिगमनायाध्यवसायात्मकमीदृशं यं रथमकरोः कृत्वा चापश्यन् कर्तव्याकर्तव्यविभागमजानन्नधि तिष्ठसि । रथमारोहसि । यद्वा । स्तोतारं कुमाराख्यमृषिमादित्यः प्रत्यक्षः सन् देहात्मनोर्विवेकं बोधयति । हे कुमारर्षे चक्ररहितमेकेषं । एकः प्राण ईषास्थानीयो यस्य । ईदृशमभिनवं सर्वतो गच्छंतं शरीरात्मकं यं रथं मनसांतःकरणेनाकृणोः अकरोः । संकल्पात्मकेन मनसा हि कामो जायते । सत्यां हि कामनायां पुण्यापुण्यात्मकं कर्म क्रियते । तेन च भोगप्रदानायेदं शरीरमारभ्यत इति परंपरया मनसः शरीरनिष्पादकत्वं । तं शरीरात्मकं रथमपश्यन्नजानन् ॥ लक्षणहेत्वोः । पा० ३. २. १२६. । इति हेतौ शतृप्रत्ययः ॥ मत्स्वरूपापरिज्ञानाद्धेतोरधितिष्ठसि । भोगायतनत्वेन स्वीकरोषि ॥

यं कुमार प्रावर्तयो रथं विप्रेभ्यस्परि । तं सामानु प्रावर्तत समितो नाव्याहितं ॥४॥
यं । कुमार । प्र । अवर्तयः । रथं । विप्रेभ्यः । परि । तं । साम । अनु । प्र । अवर्तत ।
सं । इतः । नावि । आऽहितं ॥४॥

हे कुमार नचिकेतः यं पूर्वोक्तमधिष्ठितं रथं प्रावर्तयः मत्समीपं प्रत्यगमयो विप्रेभ्यो मेधाविभ्यः पर्युपरि भूलोके वर्तमानानां मेधाविनां बांधवानामुपरिष्टात् । अंतरिक्ष इत्यर्थः ॥ पंचम्याः परावध्यर्थ इति विसर्जनीयस्य सत्वं ॥ तं रथं साम पित्रा कृतं सांत्वनं यमसमीपं गत्वैवमेव त्वया वक्तव्यमिति प्रत्यागमनकारणमुपायोपदेशनमनु प्रावर्तत । इतोऽस्माल्लोकादन्वगच्छत् । कथंभूतं । नावि नौवत्तरणसाधनायां बुद्धौ समाहितं सम्यग्धृतं । यद्वा । हे कुमारर्षे यं शरीरात्मकं रथमधिष्ठितं प्रावर्तयः संसरि प्रवर्तितवानसि मेधाविनां मध्ये तं रथमनु साम । उपलक्षणमेतत् । ऋक्सामादिसाधं स्तोत्रं नावि नौवत्तारयित्र्यां वाचि वेदात्मिकायां समाहितं सम्यक्प्रतिपाद्यत्वेन हितं कर्म चेतोऽस्माल्लोकात्प्रावर्तत । प्रवृत्तमभूत् । इत्थमात्मस्वरूपापरिज्ञानेन शरीरबंधनं तेन कर्तव्यं व्यवहारजातं चोक्तं । अथ तु सत्यज्ञानादिस्वरूपमकर्तारं परमात्मानं यदि स्वात्मतया साक्षात्करोति तदोक्तं न संभवतीत्यभिप्रायः ॥

कः कुमारमजनयद्रथं को निरवर्तयत् । कः स्वित्तद्य नो ब्रूयादनुदेयी यथाभवत् ॥५॥
कः । कुमारं । अजनयत् । रथं । कः । निः । अवर्तयत् । कः । स्वित् । तत् । अद्य ।
नः । ब्रूयात् । अनुऽदेयी । यथा । अभवत् ॥५॥

कः पुरुष इमं कुमारमजनयत् । अधिक्षेपे किंशब्दः । ईदृशं बालं यमसमीपं प्रहिण्वन् कथं पिता समीचीनः स्यात् । तत्तावदास्तां । को वा पुरुषोऽस्य बालस्य यमसमीपं प्रतिगमनाय तं रथं निरवर्तयत् । निर्वर्तितवान् । सोऽपि मूर्ख इत्यर्थः । यथा येन प्रकारिणायं कुमारोऽनुदेय्यनुदातव्योऽभवत् भवति तत्तद्गुणं वचनमुपायकथनमस्मिन्काले नोऽस्माकं कः स्वित् को नाम ब्रूयात् । अभिदध्यात् । प्रथमं यमसमीपं गत्वा पश्चात्ततो निर्गमनोपायं ब्रुवन्नपि न प्राज्ञ इत्यर्थः । अथवा । कुमाराख्य ऋषिरात्मनः सर्वात्मत्यमवगच्छन् स्वव्यतिरिक्तस्यान्यस्यासंभवं किंशब्देनाक्षेपवाचिना दर्शयति । कुमारं मां कः पिताजनयत् । न कोऽपि । अजो नित्यः शाश्वतः । क० उ० २. १८. । इति श्रुत्युक्तरूपोऽहं भवामि । कश्च शरीरात्मकं रथं निरवर्तयत् । निर्वर्तयति । मद्व्यतिरिक्तस्य निर्वर्तयितुरभावात् तथा निर्वर्त्यस्यान्यस्यासंभवाच्च । अद्यास्मिन्काले सर्वात्मत्यानुभवदशायां तं तं प्रकारं कः स्वित्को नाम नोऽस्माकं ब्रूयात् यथा येन प्रकारिणानुदेय्यनुदातव्या मद्व्यतिरिक्तान्यपदार्थसत्ताभवत् भवति । स प्रकारोऽपि दुर्वचन इत्यर्थः ॥

यथाभवदनुदेयी ततो अयमजायत । पुरस्ताद्बुध्न आततः पश्चान्निरयणं कृतं ॥ ६ ॥

यथा । अभवत् । अनुऽदेयी । ततः । अयं । अजायत । पुरस्तात् । बुध्नः । आऽततः । पश्चात् । निःऽअयनं । कृतं ॥ ६ ॥

अनुदेय्यनुदातव्यो यथा येन प्रकारेण पितरमनुलक्ष्यायं कुमारो यमेन दत्तोऽभवत् भवति तथा ततस्तस्माद्वाजश्रवसात्पितुरयं यमसमीपं गच्छेति वचनस्यायतो वर्तमानं नचिकेतसा यमेन सह वदितव्यं तं वै प्रवसंतं गंतासीति होवाचेत्यादिकं । तै० ब्रा० ३. ११. ८. २. । ब्राह्मणांतरोक्तमजायत । प्रादुरभवत् । पितोपदिष्टवानित्यर्थः । पुरस्तात्ततः पूर्वं बुध्न उक्तस्यास्य मूलभूतं यमस्य गृहं प्रतिगच्छेति वचनमातनः । अतिविस्तृतमासीत् । अतस्तदशक्यपरिहारमिति पश्चात्क्रोधं परित्यज्य निरयणं तस्माद्यमान्निर्गमनोपायं कृतं । पित्राचरितं । यद्वा । अनुदेय्यात्मानमनु दातव्यात्मस्वरूपव्यतिरिक्तान्यपदार्थसत्ता यथाभवत् भवति तदनुगुणं ततस्तस्मान्मायाविशिष्टादात्मनोऽयं सृष्टव्यस्य विकारजातस्यायं मनस्त्वं सिसृक्षाकारणमजायत । उदपद्यत । पुरस्तात्सृष्टेः प्रागवस्थायां बुध्नो मूलमव्याकृतं मायात्मकं कारणमेवाततः । आ समंतात्ततं विस्तृतमासीत् । पश्चात्तमस उत्पत्त्यनंतरं निरयणं तन्नतानां कार्याणां तस्मात्कारणान्निर्गमनं घटपटादिभेदेन स्वरूपालंबनं कृतं । ब्रह्मणा निर्मितं । तथा मृद्विकारो घटादिर्मृदोऽन्यो न भवति । आदित्यानुग्रहाद्ब्रह्मभावं प्राप्तस्य मम विकारः प्रपंचो मदन्यो न भवतीति व्यतिरिक्तस्य पित्रादेराक्षेपः पूर्वोक्तः समर्थितः ॥

इदं यमस्य सादनं देवमानं यदुच्यते ।
इयमस्य धम्यते नाळीरयं गोभिः परिष्कृतः ॥ ७ ॥

इदं । यमस्य । सदनं । देवऽमानं । यत् । उच्यते ।
इयं । अस्य । धम्यते । नाळीः । अयं । गोःऽभिः । परिऽकृतः ॥ ७ ॥

इदं यमस्य नियंतुरादित्यस्य वैवस्वतस्य वा सदनं स्थानं ॥ छांदसः सांहितिको दीर्घः ॥ यत्सदनं देवमानं देवैर्निर्मितमित्युच्यते सर्वत्राभिधीयते । यद्वा । देवानां रश्मीनां निर्माणसाधनमिति गीयते । अस्य यमस्य प्रीणनायेयं नाळीर्वाद्यविशेषो वेणुर्धम्यते । वाद्यते । यद्वा । नाळीति वाङ्नाम । इयं स्तुतिरूपा वागस्य प्रीणनाय धम्यते । उच्चार्यते । एवं सत्ययं यमो गीर्भिः स्तुतिभिः परिष्कृतः । अलंकृतोऽभूत् ॥ संपर्युपेभ्य इति सुडागमः । परिनिविभ्य इति षत्वं । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं ॥ ॥ २३ ॥

केशीति सप्तर्चमष्टमं सूक्तमग्निसूर्यवायुदेवताकं । वातरशनपुत्रा ऋतिवातऋतिप्रभृतयः प्रत्यृचं क्रमेणार्षयः । तथा चानुक्रांतं । केशी मुनयो वातरशना ऋतिर्वातऋतिर्विप्रऋतिर्वृषाणकः करिक्रत एतश्च ऋष्यशृंगश्चैकर्चाः कैशिनमिति ॥ गतो विनियोगः ॥

केश्य१ग्निं केशी विषं केशी बिभर्ति रोदसी ।
केशी विश्वं स्वर्दृशे केशीदं ज्योतिरुच्यते ॥१॥
केशी । अग्निं । केशी । विषं । केशी । बिभर्ति । रोदसी इति ।
केशी । विश्वं । स्वः । दृशे । केशी । इदं । ज्योतिः । उच्यते ॥१॥

केशाः केशस्थानीया रश्मयः । तद्वंतः केशिनोऽग्निर्वायुः सूर्यश्च । एते त्रयः स्तूयंते । केशी रश्मिभिर्युक्तः प्रकाशमानो वा सूर्योऽग्निं बिभर्ति । हविर्भिः पोषयति । धारयति वा । कालविशेषे ह्यग्नेः पोषणाय होमः । स च कालविशेषः सूर्यगत्यधीन इति सूर्य एव बिभर्तीत्युच्यते । तथा विषं । उदकनामैतत् । उदकं रश्मिभिर्घर्मसमय आहृतमयमेव केशी बिभर्ति विसृष्टुं । तथा रोदसी द्यावापृथिव्यावप्ययमेव बिभर्ति । अपि च विश्वं व्याप्तं स्वः सर्वं जगद्दृशे दर्शनायायमेव केशी करोति । प्रकाशयतीत्यर्थः । इत्थंमहानुभावः केशी को नामेत्यत आह । इदं दृश्यमानं मंडलस्थं यज्ज्योतिरिदमेव केशीत्युच्यते । नान्य इत्यर्थः ॥

मुनयो वातरशनाः पिशंगा वसते मला ।
वातस्यानु ध्राजिं यंति यद्देवासो अविक्षत ॥२॥
मुनयः । वातऽरशनाः । पिशंगा । वसते । मला ।
वातस्य । अनु । ध्राजिं । यंति । यत् । देवासः । अविक्षत ॥२॥

वातरशना वातरशनस्य पुत्रा मुनयोऽतींद्रियार्थदर्शिनो जूतिवातजूतिप्रभृतयः पिशंगा पिशंगानि कपिलवर्णानि मला मलिनानि वल्कलरूपाणि वासांसि वसते । आच्छादयंति ॥ वस आच्छादने आदादिकः ॥ ईदृशास्ते यदा देवासो देवास्तपसो महिम्ना दीप्यमानाः संतोऽविक्षत देवतास्वरूपं प्राविशन् ॥ विशेर्लुङि शल इगुपधादनिटः क्सः । व्यत्ययेनात्मनेपदं ॥ तदा ते वातस्य वायोर्ध्राजिं गतिमनु यंति । अनुगच्छंति । प्राणोपासनया प्राणरूपिणो वायुभावं प्रपन्ना इत्यर्थः ॥

उन्मदिता मौनेयेन वातॉं आ तस्थिमा वयं ।
शरीरेदस्माकं यूयं मर्तासो अभि पश्यथ ॥३॥
उत्ऽमदिताः । मौनेयेन । वातान् । आ । तस्थिम । वयं ।
शरीरा । इत् । अस्माकं । यूयं । मर्तासः । अभि । पश्यथ ॥३॥

मौनेयेन मुनिभावेन लौकिकसर्वव्यवहारविसर्जनेनोन्मदिता उन्मत्ता उन्मत्तवदाचरंतः । यद्वा । उत्कृष्टं मदं हर्षं प्राप्ताः । वयं वातान्वायूनस्माभिरुपास्यमानानातस्थिम । आस्थितवंतः । हे मर्तासो मनुष्याः अस्माकं शरीरेच्छरीराण्येव यूयं केवलमभि पश्यथ । नास्मान् । यतो वयं नीरूपेण वायुना सायुज्यं प्राप्ताः ॥

अंतरिक्षेण पतति विश्वा रूपावचाकशत् ।
मुनिर्देवस्यदेवस्य सौकृत्याय सखा हितः ॥४॥
अंतरिक्षेण । पतति । विश्वा । रूपा । अवऽचाकशत् ।
मुनिः । देवस्यऽदेवस्य । सौकृत्याय । सखा । हितः ॥४॥

मुनिरस्यर्चो द्रष्टा वृषाणक ऋषिर्वातरूपतां सूर्यात्मतां वा तत्तदुपासनया प्राप्तः सन्नंतरिक्षेणाकाशेन

पतति । गच्छति । किं कुर्वन् । विश्वा विश्वानि सर्वाणि रूपाणि रूप्यमाणानि पदार्थजातान्यवचाकशद्भिपश्यन् स्वतेजसा दर्शयन् । तथा देवस्यदेवस्य ॥ नित्यवीप्सयोरिति द्विर्वचनं । अनुदात्तं चेति परस्यानुदात्तत्वं ॥ सर्वस्यापि देवस्य सखा सखिभूतः अत एव सौकृत्याय । सुष्ठु देवानुद्दिश्य क्रियमाणं यागात्मकं कर्म सुकृतं । तस्य भावाय सम्यगनुष्ठापनाय हितः । निहितः स्थापितो भवति ॥

वातस्याश्वो वायोः सखाथो देवेषितो मुनिः ।
उभौ समुद्रावा क्षेति यश्च पूर्व उतापरः ॥५॥
वातस्य । अश्वः । वायोः । सखा । अथो इति । देवऽईषितः । मुनिः ।
उभौ । समुद्रौ । आ । क्षेति । यः । च । पूर्वः । उत । अपरः ॥५॥

वातस्य वायोर्गतिरिवाश्वो व्याप्तः । यद्वा । वायोरग्निता भोक्ता । वायुरेव तस्याहार इत्यर्थः । अत एव वायोः सखा मित्रभूतः अथो अपि च देवेषितो देवेन द्योतमानेन वायुना सूर्येण वेषितः प्राप्तः ॥ तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं ॥ ईदृशो मुनिः करिक्रताख्य ऋषिरूपप्रकारेण वायुरूपः सूर्यरूपो वा सन्नुभौ समुद्रावुदधी आ क्षेति । अभिगच्छति ॥ क्षि निवासगत्योः । छांदसो विकरणस्य लुक् ॥ कौ तौ समुद्रौ । यश्च पूर्वः समुद्रः । उतशब्दश्चार्थे । यश्चापरः समुद्रः ॥

अप्सरसां गंधर्वाणां मृगाणां चरणे चरन् ।
केशी केतस्य विद्वान्त्सखा स्वादुर्मदिंतमः ॥६॥
अप्सरसां । गंधर्वाणां । मृगाणां । चरणे । चरन् ।
केशी । केतस्य । विद्वान् । सखा । स्वादुः । मदिन्ऽतमः ॥६॥

अप्सरसां देवस्त्रीणां गंधर्वाणां चरणे संचारभूते दिव्यंतरिक्षे च तथा मृगाणां सिंहादीनां संचारस्थले पृथिव्यां चरन् व्याप्य संचरन्केश्यग्निर्वायुः सूर्यो वा केतस्य ज्ञातव्यस्य सर्वस्यार्थजातस्य विद्वान् यद्वा ज्ञातव्यस्यास्यैरेतश्च सखा विद्वानविशेषात्सर्वं जानन् स्वादुः स्वादयिता रसयिता सर्वस्य रसस्योत्पादकः अत एव मदिंतमो मादयितृतमो भवति ॥ नाद्यस्येति तुडागमः ॥

वायुरस्मा उपामंथत्पिनष्टि स्मा कुनंनमा ।
केशी विषस्य पात्रेण यद्रुद्रेणापिबत्सह ॥७॥
वायुः । अस्मै । उप । अमंथत् । पिनष्टि । स्म । कुनंनमा ।
केशी । विषस्य । पात्रेण । यत् । रुद्रेण । अपिबत् । सह ॥७॥

केशी रश्मिभिर्युक्तः सूर्यो रुद्रेण रुद्रपुत्रेण मरुद्गणेन । यद्वा । रुद्रो वा एष यदग्निः । तै० सं० ५. ४. ३. १ । इति श्रवणाद्रुद्रो वैद्युताग्निः । तेन सह वर्तमानो विषस्य । उदकनामैतत् ॥ क्रियायाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी ॥ विषमुदकं पात्रेण पानसाधनेन रश्मिजालेन यद्यदापिबत् पिबति तदाग्नौ केश्यग्निर्वायुरूपामंथत् । भृगतं सर्वं रसमुपमथ्नाति । यद्वा । यदापिबत् पीतवान्भवति तदा सूर्यमंडले घनीभूतमस्य तदुदकं वायुरूपमथ्नाति । मंथनेन वैद्युताग्निनालोडयति । तथा कुनंनमा कुत्सितमपि भृशं नमयिता स्वयं नमयितुमशक्या स्वतंत्रा माध्यमिका वाक् पिनष्टि स्म । यथाधस्तात्स्रवति तथा चूर्णीकरोति । क्षेति प्रसिद्धौ ॥ कुपूर्वान्नमयतेः पचाद्यचि यङोऽचि चेति यङो लुक् । याताद्यनोत्तरपदांतोदात्तत्वं ॥ ॥२४॥

उत देवा इति सप्तर्चं नवमं सूक्तमागुष्टुभं वैश्वदेवं भरद्वाजकक्षपगोतमाग्निविश्वामित्रजमदग्निवसिष्ठा इति क्रमेण प्रत्यृचमृषयः । तथा चानुक्रांतं । उत देवाः सप्तर्षय एकर्षा वैश्वदेवमिति ॥ गतो विनियोगः ॥

उत देवा अवहितं देवा उन्नयथा पुनः। उतागश्चक्रुषं देवा देवा जीवयथा पुनः ॥१॥
उत। देवाः। अवऽहितं। देवाः। उत्। नयथ। पुनरिति। उत। आगः। चक्रुषं।
देवाः। देवाः। जीवयथ। पुनरिति ॥१॥

उतापि च हे देवाः अवहितमुन्नयथ। उतापि च हे देवाः आगोऽपराधं चक्रुषं कृतवंतं मां तस्मादागसो रक्षत। हे देवाः रक्षित्वा च पुनः पश्चाज्जीवयथ। चिरजीविनं कुरुत ॥

द्वाविमौ वातौ वात आ सिंधोरा परावतः।
दक्षं ते अन्य आ वातु परान्यो वातु यद्रपः ॥२॥
द्वौ। इमौ। वातौ। वातः। आ। सिंधोः। आ। पराऽवतः।
दक्षं। ते। अन्यः। आ। वातु। परा। अन्यः। वातु। यत्। रपः ॥२॥

इमौ दृश्यमानौ द्वौ वातौ पुरोवातः पश्चाद्वातश्च सिंधोरा समुद्रात्। मर्यादायामाकारः। यद्वा परावतः समुद्रादपि यो दूरदेशस्तं देशमवधीकृत्य वातः। गच्छतः ॥ वा गतिगंधनयोः आदादिकः ॥ तयोर्वातयोरन्य एको हे स्तोतः ते तव दक्षं बलमा वातु। आगमयतु। अन्यश्च त्वदीयं यद्रपः पापं तत्परा वातु। परागमयतु ॥

आ वात वाहि भेषजं वि वात वाहि यद्रपः। त्वं हि विश्वभेषजो देवानां दूत ईयसे ॥३॥
आ। वात। वाहि। भेषजं। वि। वात। वाहि। यत्। रपः। त्वं। हि। विश्वऽभेषजः।
देवानां। दूतः। ईयसे ॥३॥

हे वात भेषजं सुखं व्याध्युपशमनमौषधं वा वाहि। आगमय। हे वात यद्रपोऽस्मदीयं पापं तद्वि वाहि। विगमय। अस्मत्तो विश्लेषय। त्वं हि खलु देवानां दूतो विश्वभेषजः। विश्वानि भेषजानि यस्मिन् ॥ बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं ॥ ईदृशश्च सन्नीयसे। सततं गच्छसि ॥ ईङ् गतौ दैवादिकः। श्नसो नित्त्वात् श्लित्यादिर्नित्यमित्यायुदात्तत्वं। हि चेति निघातप्रतिषेधः ॥

आ त्वागमं शंतातिभिरथो अरिष्टतातिभिः।
दक्षं ते भद्रमाभार्षं परा यक्ष्मं सुवामि ते ॥४॥
आ। त्वा। अगमं। शंतातिऽभिः। अथो इति। अरिष्टतातिऽभिः।
दक्षं। ते। भद्रं। आ। अभार्षं। परा। यक्ष्मं। सुवामि। ते ॥४॥

हे स्तोतः त्वा त्वां शंतातिभिः सुखकरैरथो अपि चारिष्टतातिभिरहिंसाकरैश्च रक्षणैरागमं। आगतवानस्मि ॥ शिवशमरिष्टस्य करे। पा० ४. ४. १४३. इत्युभयत्र तातिल्प्रत्ययः। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं ॥ अपि च भद्रं कल्याणं ते तव दक्षं बलमाभार्षं। आहार्षं। वायुसकाशादानिषं। तथा ते तव यक्ष्मं रोगं च परा सुवामि। विनाशयामि ॥

चायंतामिह देवास्त्रायंतां मरुतां गणः।
चायंतां विश्वा भूतानि यथायमरपा असत् ॥५॥

चायँतां । इह । देवाः । चायतां । मरुतां । गणः ।
चायँतां । विश्वा । भूतानि । यथा । अयं । अरपाः । असत् ॥५॥

इहास्मिन्देशे सर्वे देवास्त्रायंतां । अस्मान्पालयंतां । तथा मरुतां गणः संघः स चायतां । विश्वानि सर्वाण्यन्यानि च भूतानि भूतजातानि चायंतां । अस्मान्रक्षंतु । यथायमस्मदीयः शरीरादिररपा असत् पापरहितो भवति तथेत्यर्थः ॥ रप इति पापनाम । नञा बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । अस्तेर्लेव्यडागमः । यावद्यथाभ्यां । पा० ८. १. ३६. । इति निघाताभावः ॥

आप इद्वा उ भेषजीरापो अमीवचातनीः ।
आपः सर्वस्य भेषजीस्तास्ते कृण्वंतु भेषजं ॥६॥
आपः । इत् । वै । ऊं इति । भेषजीः । आपः । अमीवऽचातनीः ।
आपः । सर्वस्य । भेषजीः । ताः । ते । कृण्वंतु । भेषजं ॥६॥

आप इद्वा आप एव खलु भेषजीर्भेषजभूताः । स्नानपानादिना सुखहेतवः । यद्वा । औषधिरूपेण परिणता रोगोपशमनहेतवो भवंति ॥ केवलमामकेत्यादिना । पा० ४. १. ३०. । भेषजशब्दाद्ङीप् । उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वं । जसि वा छंदसीति पूर्वसवर्णदीर्घत्वं ॥ यत एवमतः कारणादापोऽमीवचातनीरमीवचातन्यो रोगाणां नाशयित्र्यो भवंति । चातयतिर्वधकर्मा । किंचापः सर्वस्य प्राणिजातस्य भेषजीर्भेषजभूता भवंति न कतिपयस्य । तास्तथाविधा आपस्ते तव भेषजं कृण्वंतु । कुर्वंतु ॥

हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी ।
अनामयित्नुभ्यां त्वा ताभ्यां त्वोप स्पृशामसि ॥७॥
हस्ताभ्यां । दशऽशाखाभ्यां । जिह्वा । वाचः । पुरःऽगवी ।
अनामयित्नुऽभ्यां । त्वा । ताभ्यां । त्वा । उप । स्पृशामसि ॥७॥

दशशाखाभ्यां दशांगुलयः शाखाभूता ययोः तादृशाभ्यां प्रजापतेर्हस्ताभ्यां क्रियमाणा जिह्वा रसना वाचः शब्दस्य पुरोगवी पुरतो गंत्री जाता । यत्र यत्र शब्दस्तत्र सर्वत्र तस्य शब्दस्योच्चारणाय पुरतो व्याप्रियत इत्यर्थः । अनामयित्नुभ्यां सम्यगारोग्यहेतुभ्यां ताभ्यां हस्ताभ्यां हे स्तोतः त्वा त्वामुप स्पृशामसि । उपस्पृशामः ॥ इदंतो मसिः । त्वेति पुनरुक्तिः पादपूरणार्था ॥ ॥२५॥

तव त्य इति षड्ऋचं दशमं सूक्तमुरुक्षयस्य पुत्रस्यांगाख्यस्यार्षं जागतमैंद्रं । तथा चानुक्रांतं । तव त्ये षळंग औरवो जागतमिति ॥ गतो विनियोगः ॥

तव त्य इंद्र सख्येषु वह्नय ऋतं मन्वाना व्यदर्दिरुर्वलं ।
यत्रा दशस्यन्नुषसो रिणन्नपः कुत्साय मन्मन्नह्यश्च दंसयः ॥१॥
तव । त्ये । इंद्र । सख्येषु । वह्नयः । ऋतं । मन्वानाः । वि । अदर्दिरुः । वलं ।
यत्र । दशस्यन् । उषसः । रिणन् । अपः । कुत्साय । मन्मन् । अह्नः । च । दंसयः ॥१॥

हे इंद्र तव सख्येषु सखित्वेषु सत्सु त्वे ते प्रसिद्धा वह्नयो वोढारो हविषां स्तुतीनां वा अत एवर्तं यज्ञं मन्वाना अवबुध्यमाना अंगिरसो वलं गवामपहर्तारमेतत्संज्ञकमसुरं व्यदर्दिरुः । अत्यर्थं व्यदारयन् ॥ दृ विदारणे । अस्माद्यङ्लुगंताल्लुङ् । सिजभ्यस्तेति झेर्जुः । जुसि चेति गुणः । व्यत्ययेनेत्वं ॥ अपि च यत्र

यस्मिन्काले मन्यन् मन्थनि सोचे सति कुत्साय महर्षय उषस उषःकालान्वृचेणावृतत्वात्पूर्वमसत्प्रायांस्तदपनोदनेन दृश्यत्वमयच्छन् तथापो वृचेणावृतान्युदकानि च रिणंस्तस्मान्निर्गमयन्वर्तसे ॥ री गतिरेषणयोः क्रैयादिकः । प्वादीनां ह्रस्वत्वं ॥ तदागीमह्योऽहेर्वृत्रस्य च दंसयः कर्माणि वितथान्यासन्नित्यर्थः ॥

अवासृजः प्रस्वः स्रंचयो गिरीनुदाज उस्रा अपिबो मधु प्रियं ।
अवर्धयो वनिनो अस्य दंससा शुशोच सूर्यं ऋतजातया गिरा ॥२॥
अव । असृजः । प्रऽस्वः । स्रंचयः । गिरीन् । उत् । आजः । उस्राः । अपिबः । मधु । प्रियं ।
अवर्धयः । वनिनः । अस्य । दंससा । शुशोच । सूर्यः । ऋतऽजातया । गिरा ॥२॥

हे इंद्र प्रस्वः । प्रसूतिर्जन्म । तद्धेतुभूता अपोऽवासृजः । आवरकान्मेघाद्धः पातितवानसि । तथा गिरीन्पर्वतान्वलेन गोमतो विलस्य पिधानाय निहितान्स्रंचयः । अभैत्सीरित्यर्थः ॥ स्रचि गतौ । अस्मात्यंताल्लङि वक्तव्ये छंदस्यमाङ्योगेऽपीत्यडभावः । समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः । पा० ८. १. १८. ५. । इति वचनात्पूर्वपदस्यासमानवाक्यगतत्वेनास्य तिङ्तिङ इति निघाताभावः ॥ तथा वलासुरेण बिले निहिता उस्रा गाः पर्वतभेदनानंतरमुदाजः । उद्गमयः । ततः पयोदध्याज्यादिकं प्रियमनुकूलं मधु मधुरं हविरपिबः । पीतवानसि । यद्वा । अयणसाधनासु तासु गोष्वागतासु यजमानैः प्रियमभीष्टं मधु सोमात्मकमपिबः । पिबसि । तथा वनिनो वनसंबद्धान्वृक्षान् । यद्वा । वनमित्युदकनाम । तद्युक्तान्समुद्रान् । अवर्धयः । वृष्टिप्रदानेन वर्धयसि । ऋतजातया । ऋतं यज्ञं । तदर्थं जातं जन्म यस्याः तया गिरा वेदात्मिकया वाचा स्तूयमानस्यास्येंद्रस्य दंससा कर्मणावृण्वतो वृचादेरपि नोदनात्मकेन सूर्यः शुशोच । नभसि प्रदिदीपि । यद्वा । ऋतजातया गिरेति सूर्यस्यैव विशेषणं । त्रयोरूपया वाचा प्रदीप्यत इत्यर्थः । ऋग्भिः पूर्वाह्णे दिवि देव ईयत इत्यादिकं तैत्तिरीयकमत्रानुसंधेयं । तै० ब्रा० ३. १२. ९. १. ॥ शुशोचेत्यस्य पदात्परत्वेऽपि पादादित्वात्पादादाविति पर्युदासस्यानुवृत्तेर्निघाताभावः ॥

वि सूर्यो मध्ये अमुचद्रथं दिवो विदद्दासाय प्रतिमानमार्यः ।
दृळ्हानि पिप्रोरसुरस्य मायिन इंद्रो व्यास्यच्चकृवाँ ऋजिश्वना ॥३॥
वि । सूर्यः । मध्ये । अमुचत् । रथं । दिवः । विदत् । दासाय । प्रतिऽमानं । आर्यः ।
दृळ्हानि । पिप्रोः । असुरस्य । मायिनः । इंद्रः । वि । आस्यत् । चक्रुऽवान् । ऋजिश्वना ॥३॥

दिवो द्युलोकस्य मध्ये सूर्य आदित्यो रथं प्रख्यानाय व्यमुचत् । विमुक्तवान् ॥ मुचेर्लुङि रुदित्वाच्छ्लेरङादेशः ॥ कदेति चेत् उच्यते । यदार्योऽभिज्ञ इंद्रो दासायोपक्षपयिचे वृचादये प्रतिमानं प्रतिक्रतिं प्रतीकारं विदत् वेत्ति जानाति । अलभत वा । अपि च मायिनो मायाविनः ॥ मायाशब्दस्य व्रीह्यादिषु पाठाद्व्रीह्यादिभ्यश्चेतोनिप्रत्ययः ॥ पिप्रोरेतन्नाम्नोऽसुरस्य दृळ्हानि दृढानि स्थिराणि पुराणि बलानि वर्जिश्वना राजर्षिणा चक्रवान् सख्यं कुर्वन्निंद्रो व्यास्यत् । व्यक्षिपत् । विविधमाक्षिप्तवान् । व्यनीनशदित्यर्थः ॥ असु क्षेपणे ॥

अनाधृष्टानि धृषितो व्यास्यन्निधीरदेवाँ अमृणद्यास्यः ।
मासेव सूर्यो वसु पुर्यमा ददे गृणानः शचीरमृणाद्विरुक्मता ॥४॥
अनाधृष्टानि । धृषितः । वि । आस्यत् । निऽधीन् । अदेवान् । अमृणत् । अयास्यः ।
मासाऽइव । सूर्यः । वसु । पुर्यं । आ । ददे । गृणानः । शचीन् । अमृणात् । विरुक्मता ॥४॥

धृषितः शत्रूणां धर्षयिता प्रगल्भ इंद्रोऽनाधृष्टानीतः पूर्वं शत्रुभिरप्रधृष्टान्यबाधितान्यसुरबलानि व्यास्यत् ।

व्याप्तिमवान्। तथायास्योऽयासनीयस्यालयितुमशक्यः। यद्वा। अयास्योऽंगिराः। स्तोतृवाचिना शब्देन स्तुत्यो लक्ष्यते। अयास्येनर्षिणा स्तुत्य इंद्रो निधीनसुरैर्निहितान्धनसमूहान् यद्वा निधातॄन्नितरां बलानां धारयितॄन्देवान्देवविरोधिनोऽसुरानमृणत्। अहिंसीत्॥ मृण हिंसायां तौदादिकः॥ अपि च सूर्यो मासेव मासेनैव॥ पद्दन्नित्यादिना मासशब्दस्य मास्भावः॥ स यथा मासविशेषेण भौमान्नसानादत्ते तथा पुर्यमसुराणां पुरि भवं॥ भवे छंदसीति यत्। हलि चेति दीर्घस्य न अकुर्कुरां। पा० ८. २. ७९.। इति प्रतिषेधः। यतोऽनाव इत्यायुदात्तत्वं॥ ईदृशं वसु धनमा ददे। आदत्ते स्म॥ आङो दोऽनास्यविहरण इत्यात्मनेपदं॥ तथा गृणानः स्तोतृभिः स्तूयमानः सन्॥ व्यत्ययेन कर्मणि कर्तृप्रत्ययः॥ शत्रून्शातयितॄनसुरान्विरुक्मता विरोचमानेन वज्रेणाशृणात्। अहिंसीत्॥

अयुङ्ङसेनो विभ्वा विभिंदता दाशद्वृचहा तुज्यानि तेजते।
इंद्रस्य वज्रादबिभेदभिश्नथः प्राक्रामच्छुंध्यूरजहादुषा अनः॥५॥

अयुङ्ङऽसेनः। विऽभ्वा। विऽभिंदता। दाशत्। वृचऽहा। तुज्यानि। तेजते। इंद्रस्य। वज्रात्। अबिभेत्। अभिऽअश्नथः। प्र। अक्रामत्। शुंध्यूः। अजहात्। उषाः। अनः॥५॥

विभ्वा विभुना व्याप्तेन विभिंदता विदारयता एवंविधेनापि परकीयबलेनायुङ्ङसेनोऽप्रहृतसैन्यः। यद्वा। विभ्वा विभुर्व्याप्तो विभिंदता शत्रुबलानि विदारयता वज्रेण। वृचहा वृचं हृतवान् एवंविध इंद्रो दाशत्। दाशति। स्तोतृभ्यो धनं प्रयच्छति॥ दाशृ दाने। लिंव्यडागमः॥ तथा तुज्यानि प्रेर्याणि शत्रुबलानि तेजते। तनूकरोति। अल्पीकरोति॥ तिज निशाने॥ यद्वा। शत्रून्प्रति प्रेर्याण्यायुधानि तेजते। निश्यति। तीक्ष्णीकरोति। ईदृशस्येंद्रस्याभिश्नथोऽभितो हिंसकाद्वज्रात्सर्वं शत्रुजातमबिभेत्। भीतिं प्राप्नोत्। एवमसुरेष्विंद्रेण निरस्तेषु शुंध्यूः शोधयितादित्यः प्राक्रामत्। जगत्प्रकाशनाय गंतुं प्रक्रांतवान्। उषा उषोदेवता चानः स्वकीयं शकटं रथमजहात्। गंतुं पर्यत्यजत्॥ ओहाक् त्यागे॥

एता त्या ते श्रुत्यानि केवला यदेक एकमकृणोरयज्ञं।
मासां विधानमदधा अधि द्यवि त्वया विभिन्नं भरति प्रधिं पिता॥६॥

एता। त्या। ते। श्रुत्यानि। केवला। यत्। एकः। एकं। अकृणोः। अयज्ञं।
मासां। विऽधानं। अदधाः। अधि। द्यवि। त्वया। विऽभिन्नं। भरति। प्रऽधिं। पिता॥६॥

हे इंद्र त्या तानि ते तव त्वदीयानि वीर्यकर्माण्येतान्येव केवला केवलानि श्रुत्यानि श्रोतव्यानि स्तुत्यर्हाणि। नान्यदीयानि। कानि पुनस्तानि। एकोऽसहायस्त्वमेकं प्रधानभूतमयज्ञं यज्ञरहितमसुरमकृणोः अहिंसीरिति यदेतदेकं कर्म॥ डुकृञ् हिंसाकरणयोः। अत्र हिंसार्थः। इदित्त्वान्नुम्। धिन्विकृण्व्योरित्युप्रत्ययोऽकारांतादेशश्च। तस्य लोपे सति स्थानिवद्भावाल्लघूपधगुणाभावः॥ तथा मासां मासानां॥ पद्दन्नित्यादिना मासशब्दस्य मास्भावः। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं॥ मासानां विधानं विधातारं कर्तारं सूर्यमधि द्यवि द्युलोके उपर्यदधाः। अधारयः॥ विपूर्वाद्धातेः क्त्यस्युटौ बहुलमिति कर्तरि ल्युट्॥ इदमपरं कर्म। तथा पिता पालको द्युलोको विभिन्नं विदारितं वृत्रादिभक्तं प्रधिं रथचक्रस्य पार्श्वं। पार्श्वफलके प्रधी इत्युच्यते। ईदृशं सूर्यरथसंबंधिनं प्रधिमन्येर्धारयितुमशक्यं त्वयैव भरति। धारयति। इदमपरं कर्म। एतत्प्रभृतीनि त्वया कृतानि कर्माणि परेषामसाधारणानि सर्वदाज्ञातव्यानीत्यर्थः॥ ॥२६॥

सूर्यरश्मिरिति षडृचमेकादशं सूक्तं वैष्टुभं। विश्वावसुर्नाम गंधर्व ऋषिः। स च पूर्वेण तृचेन सवितारं स्तुतवान् उत्तरेण स्वात्मानं। अतः प्रथमतृचस्य सविता देवता द्वितीयस्य गंधर्वः। तथा चानुक्रांतं। सूर्यरश्मिर्देवगंधर्वो विश्वावसुरात्मानमस्तौत्पूर्वार्धे सवितारमिति॥ गतो विनियोगः॥

सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ अजस्रं ।
तस्य पूषा प्रसवे याति विद्वान्त्संपश्यन्विश्वा भुवनानि गोपाः ॥१॥
सूर्यऽरश्मिः । हरिऽकेशः । पुरस्तात् । सविता । ज्योतिः । उत् । अयान् । अजस्रं ।
तस्य । पूषा । प्रऽसवे । याति । विद्वान् । संऽपश्यन् । विश्वा । भुवनानि । गोपाः ॥१॥

सूर्यरश्मिः । उषसः प्रादुर्भावानंतरं सूर्यस्योदयात्पूर्वं यः कालस्तस्य कालस्याभिमानी देवः सवितेत्युच्यते । सूर्यरश्मिः सूर्यस्य सर्वस्य प्रेरकस्यादित्यस्य रश्मिरेव रश्मिर्यस्य स तथोक्तः हरिकेशः हरयो हरणशीला हरितवर्णा वा केशाः केशस्थानीयाः प्रकाशमाना वा दीप्तयो यस्य ईदृशः सविता सर्वस्य प्रेरको देवः पुरस्तात्पूर्वस्यां दिश्यजस्रमनवरतं ज्योतिस्तेज उदयान् । उद्याति । उन्नमयति ॥ यातेरंतर्भावितण्यर्थाच्छांदसो लङ् । व्यत्ययेन बहुवचनं । संहितायां दीर्घादटि समानपाद इति नकारस्य रुत्वं । आतोऽटि नित्यमिति सानुनासिक आकारः ॥ तस्य सवितुः प्रसवे प्रेरणेऽनुज्ञायां सत्यां विद्वाञ्जानन्गोपा गोपायिता रक्षिता पूषा पोषको देव आदित्यो याति । नभसि गच्छति । किं कुर्वन् । विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि संपश्यन् सम्यक् प्रकाशयन् ॥

नृचक्षा एष दिवो मध्य आस्त आपप्रिवान्रोदसी अंतरिक्षं ।
स विश्वाचीरभि चष्टे घृताचीरंतरा पूर्वमपरं च केतुं ॥२॥
नृऽचक्षाः । एषः । दिवः । मध्ये । आस्ते । आपप्रिऽवान् । रोदसी इति । अंतरिक्षं ।
सः । विश्वाचीः । अभि । चष्टे । घृताचीः । अंतरा । पूर्वं । अपरं । च । केतुं ॥२॥

नृचक्षा नृन्मनुष्यान्पश्यन् यद्वा नृभिर्नेतृभी रश्मिभिः प्रकाशमान एष सविता दिवो द्युलोकस्य मध्य आस्ते । निषीदति । किं कुर्वन् । रोदसी द्यावापृथिव्यावंतरिक्षं चापप्रिवान् स्वतेजसापूरयन् ॥ प्रा पूरणे । अस्माच्छांदसो लिट् । क्वसुश्चेति तस्य क्वसुरादेशः । वस्वेकाजाद्घसामितीडागमः ॥ स देवो विश्वाचीर्विश्वमंचंतीः सर्वव्यापिनीः प्राच्यादिमहादिशोऽभि चष्टे । प्रकाशयति । तथा घृताचीर्घृतं दीप्तं रूपमंचंतीरापेत्यादिविदिशश्च प्रकाशयति ॥ अंचतेः क्विनंताद्घृताचीश्चेत्युपसंख्यानमिति ङीप् । ततो भसंज्ञायामच इत्याकारलोपे चाविति दीर्घत्वं । उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वे प्राप्ते चाविति पूर्वस्याच उदात्तत्वं ॥ तथा पूर्वं पूर्वभागं केतुं प्रज्ञापनीयमपरं पृष्ठभागं चांतरांतरालं चाभि चष्टे । प्रकाशयति ॥

रायो बुध्नः संगमनो वसूनां विश्वा रूपाभि चष्टे शचीभिः ।
देव इव सविता सत्यधर्मेंद्रो न तस्थौ समरे धनानां ॥३॥
रायः । बुध्नः । संऽगमनः । वसूनां । विश्वा । रूपा । अभि । चष्टे । शचीभिः ।
देवःऽइव । सविता । सत्यऽधर्मा । इंद्रः । न । तस्थौ । संऽअरे । धनानां ॥३॥

रायो धनस्य बुध्नो बंधको मूलभूतो वा ॥ ऊडिदमित्यादिना रेशब्दादिभक्तेरुदात्तत्वं ॥ तथा वसूनां धनानां संगमनः संगमयिता प्रापयिता ईदृशः सविता शचीभिर्दीप्तिभिर्विश्वा रूपा सर्वाणि रूपाणि निरूपणीयानि पदार्थजातान्यभि चष्टे । अभिपश्यति । प्रकाशयति । अपि च देव इवायं सविता सावको देवः सत्यधर्मा सत्यमवितथं धर्म धारणं धारणहेतुभूतं कर्म वा यस्य तादृशो भवति । तथेंद्रो नेंद्र इव धनानां समरे संग्रामे सम्यक्प्रापणे तस्थौ । अयं सवितोद्युक्तः संतिष्ठति ॥

विश्वावसुं सोम गंधर्वमापो दृदृभुषीस्तदृतेना व्यायन् ।
तदन्ववैदिंद्रो रारहाण आसां परि सूर्यस्य परिधीरपश्यत् ॥४॥
विश्वऽवसुं । सोम । गंधर्वं । आपः । दृदृभुषीः । तत् । ऋतेन । वि । आयन् ।
तत् । अनु । अवैत् । इंद्रः । ररहाणः । आसां । परि । सूर्यस्य । परिऽधीन् । अपश्यत् ॥४॥

हे सोम त्वया सहितं गंधर्वं गीतरूपां गां शब्दं धारयंतं विश्वावसुमेतत्संज्ञं मां ॥ उत्तरत्र तच्छब्दश्रुतेर्यच्छब्दाध्याहारः ॥ यदापो वसतीवर्याख्या दृढभुषीः दृष्टवत्यः ॥ दृढेर्लिटः क्वसुः । उगितश्चेति ङीप् । वसोः संप्रसारणमिति संप्रसारणं । जसि वा छंदसीति पूर्वसवर्णदीर्घः ॥ तत्तदानीमृतेन यज्ञेन हेतुना व्यायन् । विविधमगच्छन्व्याप्नुवन्नाः । तन्नमनमासामपां ररहाणो गमयितेंद्रोऽन्ववैत् । अन्वबुध्यत । बुद्धा च कृत्स्न यज्ञः प्रवृत्त इति सूर्यस्य परिधीन्परितो धीयमानान्प्राच्यादिदिग्विभागान्पर्यपश्यत् । परितो दृष्टवान् ॥

विश्वावसुरभि तन्नो गृणातु दिव्यो गंधर्वो रजसो विमानः ।
यद्वा घा सत्यमुत यन्न विद्म धियो हिन्वानो धिय इन्नो अव्याः ॥५॥
विश्वऽवसुः । अभि । तत् । नः । गृणातु । दिव्यः । गंधर्वः । रजसः । विऽमानः ।
यत् । वा । घ । सत्यं । उत । यत् । न । विद्म । धियः । हिन्वानः । धियः । इत् । नः । अव्याः ॥५॥

विश्वावसुर्गंधर्वो नोऽस्माकं तदभि गृणातु । अभिमुखं ब्रवीतु ॥ गृ शब्दे क्र्यादिकः । प्वादित्वाद्ध्रस्वः ॥ कीदृशः । दिव्यो दिवि भवः तथा रजस उदकस्य विमानो निर्माता । किं पुनस्तत् । यद्वा घ यच्च खलु सत्यमवितथं यथार्थफलं कर्मजातं । उतशब्दश्चार्थे । यच्च न विद्म न जानीमः तदुभयं ब्रवीत्वित्यर्थः ॥ ऋचि तुनुघेत्यादिना घशब्दस्य सांहितिको दीर्घः ॥ शिष्टः पादः प्रत्यक्षकृतः । हे विश्वावसो धियः कर्माणि हिन्वानः सोमेन प्रवर्धयन् ॥ हि गतौ वृद्धौ च ॥ यद्वा । धियः स्तुतीर्हिन्वानः प्राप्नुवन्नोऽस्माकं धिय इत्कर्माण्येव बुद्धीरेव वाव्याः । रक्ष ॥

सन्निमविंदच्चरणे नदीनामपावृणोद्दुरो अश्मव्रजानां ।
प्रासां गंधर्वो अमृतानि वोचदिंद्रो दक्षं परि जानादहीनां ॥६॥
सन्निं । अविंदत् । चरणे । नदीनां । अप । अवृणोत् । दुरः । अश्मऽव्रजानां ।
प्र । आसां । गंधर्वः । अमृतानि । वोचत् । इंद्रः । दक्षं । परि । जानात् । अहीनां ॥६॥

सन्निमन्निः संस्रावं प्रकर्षेण सर्वस्य जगतः स्रापयितारं मेघं ॥ स्रा शौचे । आदृगमहन इति किन्प्रत्ययः । लिङ्वद्भावाद्विर्वचनं ॥ नदीनां शब्दकारिणीनामपां चरणे संचरणस्थानेऽन्तरिक्षेऽविंदत् । इंद्रोऽलभत । लब्ध्वा चाश्मव्रजानां । अश्मा व्याप्तो मेघः । तत्र व्रजंतीनां । यद्वा । मेघो व्रजो गोष्ठं निवासस्थानं यासां तादृशीनां । अपां दुरो द्वाराणि मेघान्निर्गमनप्रदेशानपावृणोत् । अपावृतवान् । यद्वा । अश्मसु शिलासु व्रजंतीनां गच्छंतीनां व्याप्नुवतीनां वा नदीनां गंगायमुनादीनां चरणे संचरणे प्रवहणनिमित्तभूते सति तदर्थमिंद्रः सन्निं मेघमविंदत् । अलभत । लब्ध्वा चांतर्गतानामपां निर्गमसाधनानि मेघस्य दुरो द्वाराण्यपावृणोत् । अपावृतवान् । तथासां नदीनाममृतान्यमरणसाधकान्युदकानि गंधर्वो गोर्वज्रस्य धर्ता विश्वावसुरूपेण वर्तमान इंद्रः प्र वोचत् । प्रब्रवीति । प्रवोढुमनुजानाति । तथा दक्षं । दक्षत्युदकं प्रयच्छतीति दक्षो वर्षणसमर्थो मेघः । तादृशं मेघमहीनां मेघानां मध्ये परि जानात् । परितः सर्वतो जानाति ॥ ज्ञा अवबोधने । लेट्यडागमः । ज्ञाजनोर्जेतीति जादेशः ॥ ॥२७॥

अग्ने तवेति षड्चं द्वादशं सूक्तं । पावकगुणविशिष्टोऽग्निर्ऋषिः । गुडाग्निर्देवता । आद्या विष्टारपंक्तिरष्टकद्विद्वादशाष्टकवती । अथ तिस्रः सतोबृहत्योऽनुष्टुभौ जागती । अनु० ८. ४. । इति लक्षणोपेताः । पंचम्युपरिष्टाज्ज्योतिः । षष्ठी त्रिष्टुप् । तथा चानुक्रांतं । अग्ने तवाग्निः पावक आग्नेयं विष्टारपंक्तिस्त्रिस्रः सतोबृहत्य उपरिष्टाज्ज्योतिरिति ॥ महाव्रत आग्निमारुतशस्त्र इदं सूक्तं स्तोत्रियानुरूपार्थं । तथैव पंचमारण्यके सूचितं । ऐ० आ० ५. ३. २. ॥

अग्ने॒ तव॒ श्रवो॒ वयो॒ महि॒ भ्राज॑ते॒ अर्च॑यो॒ विभावसो ।
बृ॒हद्भा॑नो॒ शव॑सा॒ वाज॑मुक्थ्यं॑ दधासि दा॒शुषे॑ क॒वे ॥१॥
अग्ने॑ । तव॑ । श्रवः॑ । वयः॑ । महि॑ । भ्राज॑ते । अर्च॑यः । विभा॒व॒सो॒ इति॑ विभाऽवसो ।
बृ॒हद्भा॑नो॒ इति॑ बृ॒हत्ऽभानो । शव॑सा । वाज॑ । उ॒क्थ्य॑ । दधा॑सि । दा॒शुषे॑ । क॒वे ॥१॥

हे अग्ने तव वयोऽन्नं श्रवः श्रवणीयं प्रशस्यं । हविरात्मकस्य तस्य मंत्रसंस्कृतत्वेन प्रशस्तत्वात् । अन्नेषु मध्ये तवैवान्नं श्रेष्ठमित्यर्थः । हे विभावसो । विशिष्टा दीप्तिर्विभा । सैव वसुर्धनं यस्य तादृशाग्ने अर्चयो दीप्तयो महि महद्बृहत्त्वं भ्राजंते । दीप्यंते ॥ भ्राजृ दीप्तौ । अनुदात्तेत् । भौवादिकः ॥ हे बृहद्भानो प्रौढदीप्ते कवे क्रांतदर्शिन्नग्ने एवंमहानुभावस्त्वं शवसा बलेनोपेतमुक्थ्यं प्रशस्यं । यद्वा । उक्थो यज्ञः । तद्योग्यं वाजमन्नं दाशुषे हवींषि दत्तवते यजमानाय दधासि । ददासि । प्रयच्छसि ॥

पा॒व॒कव॑र्चाः शु॒क्रव॑र्चा॒ अनू॑नवर्चा उ॒दिय॑र्षि भा॒नुना॑ ।
पु॒त्रो मा॒तरा॑ वि॒चर॒न्नुपा॑वसि पृणा॒सि॒ रोद॑सी उ॒भे ॥२॥
पा॒व॒कऽव॑र्चाः । शु॒क्रऽव॑र्चाः । अनू॑नऽवर्चाः । उत् । इ॒यर्षि॑ । भा॒नुना॑ ।
पु॒त्रः । मा॒तरा॑ । वि॒ऽचर॑न् । उप॑ । अ॒व॒सि॒ । पृ॒णा॒सि॒ । रोद॑सी॒ इति॑ । उ॒भे इति॑ ॥२॥

पावकवर्चाः शोधकदीप्तिः शुक्रवर्चा निर्मलतेजस्कोऽनूनवर्चाः संपूर्णतेजस्कः । हे अग्ने ईदृशस्त्वं भानुना तेजसोदियर्षि । उन्नच्छसि ॥ ऋ गतौ जौहोत्यादिकः । अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं ॥ स त्वं पुत्रः सन् मातरा मातृभूते अरण्यौ विचरन् यागावसाने विशेषेण प्राप्नुवन्नुपावसि । उपगतान्यजमानान्रक्षसि । तथोभे रोदसी द्यावापृथिव्यौ पृणसि । संयोजयसि । हविषा द्युलोकं वृष्ट्येमं लोकं च पूरयसीत्यर्थः ॥ पृची संपर्के रौधादिकः ॥

ऊर्जो॑ नपाज्जातवेदः सु॒शस्ति॑भिर्म॒न्दस्व॑ धी॒तिभि॒र्हित॑ः ।
त्वे इ॒षः सं दधुर्भूरि॑वर्पसश्चि॒चोत॑यो वा॒मजा॑ताः ॥३॥
ऊर्जः॑ । न॒पा॒त् । जा॒त॒ऽवे॒दः॒ । सु॒शस्ति॑ऽभिः । म॒न्दस्व॑ । धी॒तिऽभिः॑ । हि॒तः॑ ।
त्वे इति॑ । इ॒षः॑ । सं । द॒धुः॒ । भूरि॑ऽवर्पसः । चि॒चऽऊ॑तयः । वा॒मऽजा॑ताः ॥३॥

हे ऊर्जो नपादूर्जोऽन्नस्य पार्थिवस्यारण्यादेः पुत्र हे जातवेदो जातानां वेदितरग्ने सुशस्तिभिरस्माभिः क्रियमाणैर्मंदस्व । मोदस्व । तथा धीतिभिः कर्मभिरस्माभिः क्रियमाणैरग्निहोत्रादिभिः कर्मभिर्हितः सुहितसुप्रो भव । अपि च भूरिवर्पसः । वर्प इति रूपनाम । बहुविधरूपाश्चित्रोतयः चित्रा विचित्रोतिर्तृप्तिर्यासां तास्तथोक्ता वामजाताः वामं वननीयं जातं जन्म यासां तादृशीरिषोऽन्नानि हविर्लक्षणानि त्वे त्वय्येव सं दधुः । संदधति । सम्यग्जुह्वति यजमानाः । यद्वा । भूरिवर्पस इत्यादिकं कर्तृविशेषणं । तदानीं चित्रोतय इत्यस्य विचित्ररक्षा इति शेषः ॥

इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य ।
स दर्शतस्य वपुषो वि राजसि पृणक्षि सानसिं क्रतुं ॥४॥
इरज्यन् । अग्ने । प्रथयस्व । जन्तुऽभिः । अस्मे इति । रायः । अमर्त्य ।
सः । दर्शतस्य । वपुषः । वि । राजसि । पृणक्षि । सानसिं । क्रतुं ॥४॥

हे अग्ने जन्तुभिर्जातैः शत्रुभिः सहेरज्यन्नीर्ष्यन् स्पर्धा कुर्वन् ॥ इरज् ईर्ष्यायां । कंड्वादिः ॥ यद्वा । इरज्यतिरैश्वर्यकर्मा । जन्तुभिर्जायमानैरात्मीयैस्तेजोभिरिरज्यन्नीश्वरो भवन् । हे अमर्त्य मरणरहितामे अग्ने अस्मे अस्मान् ॥ सुपां सुलुगिति षष्ठ्याः शेआदेशः ॥ रायो धनानि प्रथयस्व । विस्तारय ॥ रयिशब्दाच्छसः स्थाने व्यत्ययेन जस् । शसो वा व्यत्ययेनोडिदमिति विभक्त्युदात्तत्वं न क्रियते ॥ स त्वं दर्शतस्य दर्शनीयस्य वपुषस्तेजोमयस्य शरीरस्य वि राजसि । तृतीयार्थे षष्ठी वा । ईदृशेन शरीरेण विशेषेण दीप्यसे । यद्वा । राजतिरैश्वर्यकर्मा वपुरिति च रूपनाम । दर्शनीयेन रूपेण वि राजसि । विशेषेणैश्वर्यं करोषि । अत एव सानसिं संभजनीयं क्रतुं कर्म पृणक्षि । अस्माभिः संपर्चयसि । फलेन वा संयोजयसि ॥

इष्कर्तारमध्वरस्य प्रचेतसं क्षयंतं राधसो महः ।
रातिं वामस्य सुभगां महीमिषं दधासि सानसिं रयिं ॥५॥
इष्कर्तारं । अध्वरस्य । प्रऽचेतसं । क्षयंतं । राधसः । महः ।
रातिं । वामस्य । सुऽभगां । महीं । इषं । दधासि । सानसिं । रयिं ॥५॥

इष्कर्तारं निष्कर्तारं ॥ छांदसो वर्णलोपः ॥ अध्वरस्य यज्ञस्य निष्कर्तारं संस्कर्तारं प्रचेतसं प्रकृष्टज्ञानं महो महतो राधसो धनस्य क्षयंतमीश्वरं । क्षयतिरैश्वर्यकर्मा । वामस्य वननीयस्य धनस्य रातिं दातारं ॥ रातेः कर्तरि क्विच् ॥ ईदृशं त्वां सुभग इति शेषः । स त्वं सुभगां सौभाग्योपेतां महीं महतीमिषमन्नं सानसिं संभक्तव्यं रयिं धनं च दधासि । स्तोतृभ्यो ददासि ॥

ऋतावानं महिषं विश्वदर्शतमग्निं सुम्नाय दधिरे पुरो जनाः ।
श्रुत्कर्णं सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा ॥६॥
ऋतऽवानं । महिषं । विश्वऽदर्शतं । अग्निं । सुम्नाय । दधिरे । पुरः । जनाः ।
श्रुत्ऽकर्णं । सप्रथःऽतमं । त्वा । गिरा । दैव्यं । मानुषा । युगा ॥६॥

ऋतावानं सत्यवंतं यज्ञवंतं वा ॥ छंदसीवनिपाविति मत्वर्थीयो वनिप् ॥ महिषं महांतं पूज्यं वा विश्वदर्शतं विश्वैः सर्वैर्दर्शनीयं । यद्वा । विश्वं दर्शनं यस्य ॥ बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं ॥ ईदृशमग्निं सुम्नाय सुखार्थं जना ऋत्विग्यजमानरूपाः पुरो दधिरे । पुरो दधते । सर्वकर्मभ्यः पुरस्ताद्धारयंति । यद्वा । पुरः पुरस्तात्पूर्वस्यां दिश्याहवनीयरूपेण धारयंति । परोऽर्धर्चः प्रत्यक्षकृतः । अपि च हे अग्ने श्रुत्कर्णं श्रुतं स्तुतीः सम्यक् शृण्वन्कर्णः श्रोत्रेंद्रियं यस्य तादृशं सप्रथस्तममतिशयेन प्रख्यातं यद्वा सर्वतो विस्तार्यमाणं दैव्यं देवानां हविर्वोढृत्वेन संबंधिनं ईदृशं त्वा त्वां मानुषा मानुषाणि मनोरपत्यानि युगा युगानि युगवानि पत्नीयजमानरूपाणि गिरा स्तुत्या स्तुवंतीति शेषः ॥ ॥२८॥

अग्न इति षड्वृचं त्रयोदशं सूक्तं । तापसगणविशिष्टस्याग्नेरार्षं वैश्वदेवमानुष्टुभं । तथा चानुक्रांतं । अग्नेऽच्छाग्निस्तापसो वैश्वदेवमानुष्टुभं हीति ॥ गतो विनियोगः ॥

अग्ने अच्छा वदेह नः प्रत्यङ्नः सुमना भव ।
प्र नो यच्छ विशस्पते धनदा असि नस्त्वं ॥१॥
अग्ने । अच्छ । वद । इह । नः । प्रत्यङ् । नः । सुऽमनाः । भव ।
प्र । नः । यच्छ । विशः । पते । धनऽदाः । असि । नः । त्वं ॥१॥

हे अग्ने इहास्मिन्देशे नोऽस्मानच्छ वद । आभिमुख्येन प्रियं ब्रूहि । तथा प्रत्यङ्नोऽस्मान्प्रत्यंचन् सुमनाः शोभनमनस्को भव । हे विशस्पते यजमानलक्षणायाः प्रजायाः पालयितः नोऽस्मभ्यं प्र यच्छ धनानि प्रदेहि यतस्त्वं नोऽस्माकं धनदा असि धनानां दाता भवसि ॥

प्र नो यच्छत्वर्यमा प्र भगः प्र बृहस्पतिः ।
प्र देवाः प्रोत सूनृता रायो देवी ददातु नः ॥२॥
प्र । नः । यच्छतु । अर्यमा । प्र । भगः । प्र । बृहस्पतिः ।
प्र । देवाः । प्र । उत । सूनृता । रायः । देवी । ददातु । नः ॥२॥

अर्यमादीनां नियंतार्यादीनां निर्माता चैतत्संज्ञो देवो नोऽस्मभ्यं प्र यच्छतु धनं । तथा भग एतत्संज्ञको देवश्च प्रयच्छतु । बृहस्पतिश्च प्रयच्छतु । सर्वे देवाश्च प्रयच्छंतु । उतापि च सूनृता प्रियसत्यवाग्रूपा देवी देवनशीला सरस्वती रायो धनानि नोऽस्मभ्यं प्र ददातु ॥ जक्षित्यादिना रायो विभक्तिरुदात्ता ॥

सोमं राजानमवसेऽग्निं गीर्भिर्हवामहे ।
आदित्यान्विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिं ॥३॥
सोमं । राजानं । अवसे । अग्निं । गीःऽभिः । हवामहे ।
आदित्यान् । विष्णुं । सूर्यं । ब्रह्माणं । च । बृहस्पतिं ॥३॥

राजानं राजमानमीश्वरं वा सोममग्निं च गीर्भिः स्तुतिभिरवसे रक्षणार्थं हवामहे । आह्वयामहे । तथादित्यानदितेः पुत्रान् मित्रादीन् विष्णुं सूर्यं ब्रह्माणं प्रजापतिं बृहस्पतिं च रक्षणार्थमाह्वयामहे ॥

इंद्रवायू बृहस्पतिं सुहवेह हवामहे । यथा नः सर्व इज्जनः संगत्यां सुमना असत् ॥४॥
इंद्रवायू इति । बृहस्पतिं । सुऽहवा । इह । हवामहे । यथा । नः । सर्वः । इत् । जनः ।
संऽगत्यां । सुऽमनाः । असत् ॥४॥

इंद्रश्च वायुश्चेंद्रवायू ॥ उभयत्र वायोः प्रतिषेधो वक्तव्यः । पा० ६. ३. २६. १. । इत्यानङ्ः प्रतिषेधः । नोत्तरपदेऽनुदात्तादाविति देवताद्वंद्वे चेति प्राप्तस्योभयपदप्रकृतिस्वरस्य निषेधः । समासस्येत्यंतोदात्तत्वं ॥ बृहस्पतिं बृहतां देवानां पालकं ॥ तद्बृहतोः करपत्योः । पा० ६. १. १५७.*। इति सुट्तलोपौ । वनस्पत्यादित्वादुभयपदप्रकृतिस्वरत्वं ॥ सुहवा सुहवौ सुष्ठानाविंद्रवायू बृहस्पतिं चेहास्मिन्कर्मणि हवामहे । आह्वयामहे । यथा नोऽस्माकं सर्व इत् सर्व एव जनः संगत्यां संगमने धनस्य प्राप्तौ सुमना असत् शोभनमनस्को भवेत् तथाह्वयामह इत्यर्थः ॥ असेर्लेव्यडागमः ॥

अर्यमणं बृहस्पतिमिंद्रं दानाय चोदय ।
वातं विष्णुं सरस्वतीं सवितारं च वाजिनं ॥५॥

अर्यमणं । बृहस्पतिं । इंद्रं । दानाय । चोदय ।
वातं । विष्णुं । सरस्वतीं । सवितारं । च । वाजिनं ॥५॥

हे स्तोतः अर्यमादीन्देवान्दानाय धनप्रदानाय चोदय । स्तुत्या प्रेरय । तथा वातं वायुं विष्णुं सरस्वतीं वाजिनमन्नवंतं बलवंतं वा सवितारं च दानाय प्रेरय ॥

त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्धय । त्वं नो देवतातये रायो दानाय चोदय ॥६॥
त्वं । नः । अग्ने । अग्निऽभिः । ब्रह्म । यज्ञं । च । वर्धय । त्वं । नः । देवऽतातये । रायः । दानाय । चोदय ॥६॥

हे अग्ने त्वमग्निभिस्त्वद्विभूतिभूतैरन्यैरग्निभिः सार्धं नोऽस्माकं ब्रह्म स्तोत्रं यज्ञं च वर्धय । तथा त्वं नोऽस्माकं देवतातये । यज्ञनामैतत् । यागार्थं रायो धनस्य दानाय प्रदानाय चोदय । दातृन्प्रेरय ॥ ॥२९॥

अयमग्न इत्यष्टर्चं चतुर्दशं सूक्तमाग्नेयं । शार्ङ्ग इति पक्षिविशेषस्याख्या । शार्ङ्गजातयो जरितृप्रभृतयश्चत्वारश्चतुर्णां ऋचानां क्रमेण द्रष्टारः । आदितो द्वे जगत्यौ । अथ चतस्रस्त्रिष्टुभः । ततो द्वे अनुष्टुभौ । तथा चानुक्रांतं । अयमष्टौ ऋचाः शार्ङ्गा जरिता द्रोणः सारिसृक्षः स्तंबमित्रश्चाग्नेयमाद्ये जगत्यौ चतस्रश्च त्रिष्टुभ इति ॥ गतो विनियोगः ॥

अयमग्ने जरिता त्वे अभूदपि सहसः सूनो नह्यन्यदस्त्याप्यं ।
भद्रं हि शर्म त्रिवरूथमस्ति त आरे हिंसानामप दिद्युमा कृधि ॥१॥
अयं । अग्ने । जरिता । त्वे इति । अभूत् । अपि । सहसः । सूनो इति । नहि । अन्यत् । अस्ति । आप्यं ।
भद्रं । हि । शर्म । त्रिऽवरूथं । अस्ति । ते । आरे । हिंसानां । अप । दिद्युं । आ । कृधि ॥१॥

हे अग्ने त्वे त्वयि ॥ सुपां सुलुगिति सप्तम्याः शेआदेशः ॥ अयमृषिर्जरिता स्तोताभूदपि । अपिशब्दः संभावनायां । इदानीं स्तोतृत्वेन संभाव्यते । तत्र कारणमाह । हे सहसः सूनो बलस्य पुत्र त्वत्तोऽन्यदाप्यमाप्तव्यं नह्यस्ति । न खलु विद्यते । अतः प्राप्तव्यं त्वामेव स्तुत्या प्राप्नोमि । भद्रं कल्याणं त्रिवरूथं दुःखत्रयस्य निवारकं शर्म सुखं हि यस्मात्ते तवास्ति विद्यते । अथवा शोभनं त्रिवरूथं त्रिभूमिकं गृहं तवास्ति हि । अतो हिंसानां हिंस्यमानानामस्माकमारे दूरे दिद्युं दीप्यमानामाग्नीयां ज्वालामपा कृधि । अपाकुरु । निवारय ॥ करोतेश्छांदसो विकरणस्य लुक् । श्रुशृणुपृकृवृभ्य इति हेर्धिभावः ॥

प्रवत्ते अग्ने जनिमा पितूयतः साचीव विश्पा भुवना न्यृंजसे ।
प्र सप्तयः प्र सनिषंत नो धियः पुरश्चरंति पश्वुपा इव त्मना ॥२॥
प्रऽवत् । ते । अग्ने । जनिम । पितुऽयतः । साचीऽइव । विश्पा । भुवना । नि । ऋंजसे ।
प्र । सप्तयः । प्र । सनिषंत । नः । धियः । पुरः । चरंति । पश्वुपाःऽइव । त्मना ॥२॥

हे अग्ने पितूयतः पितुमन्नं भक्ष्यमिच्छतस्ते तव जनिम जन्म प्रादुर्भावं प्रवत्प्रकृष्टमुत्कृष्टं भवति ॥ उपसर्गाच्छंदसि धात्वर्थ इति वतिः ॥ स त्वं साचीव सचिव इव विश्पा विश्वानि व्याप्तानि भुवनानि भूतजातानि न्यृंजसे । प्रसाधयसि । वशीकरोषीत्यर्थः । सप्तयः सर्पणशीला नोऽस्माकं धियः स्तुतयस्त्वाकृतं त्वां प्र सनिषंत ।

प्रकर्षेण संभजते । एकः प्रशब्दः पूरकः । यद्वा । सप्तयः । लुप्तोपममेतत् । सर्पणशीला अश्वा यथाजिं प्रकर्षेण संभजंते तथाऽऽदीया धिय इत्यर्थः । अनंतरं पुरस्तव पुरस्तात् त्वमात्मना स्वयमेव चरंति । व्याप्य वर्तंते । पशुपा इव यथा पशूनां पालका गोपालाः पालयितव्यानां पुरस्तात्संचरंति तद्वत् ॥

उत वा उ परि वृणक्षि बप्सद्बहोरग्न उलपस्य स्वधावः ।
उत खिल्या उर्वराणां भवंति मा ते हेतिं तविषीं चुक्रुधाम ॥३॥
उत । वै । ऊं इति । परि । वृणक्षि । बप्सत् । बहोः । अग्ने । उलपस्य । स्वधाऽवः ।
उत । खिल्याः । उर्वराणां । भवंति । मा । ते । हेतिं । तविषीं । चुक्रुधाम ॥३॥

हे स्वधावो दीप्तिमन्नग्ने बप्सद्बहन् ॥ भस भर्त्सनदीप्त्योः औणादिकः । शृतरि घसिभसोर्हलि च । पा० ६. ४. १००. । इत्युपधालोपः । नाभ्यस्ताच्छतुरिति नुमः प्रतिषेधः ॥ बहोर्बहुलस्योलपस्य तृणजातस्य ॥ कर्मणि षष्ठी ॥ सर्वं वनमुत वा अपि खलु परि वृणक्षि । परिवर्जयसि । विनाशयसि । उ इति पूरकः । उतापि चोर्वराणां । सस्याढ्या भूमय उर्वराः । तासां संबंधिनः प्रदेशाः खिल्याः खिलाः प्राणिभिर्गंतुं योग्या भवंति । त्वया दग्धा इति शेषः । तविषीं महतीं ते तव हेतिं हननहेतुभूतां ज्वालां मा चुक्रुधाम । मा क्रोधयाम । अपि तु स्तुतिभिः प्रसाधयाम ॥ ऊतियूतीत्यादिना हंतेः क्तिनि हेतिरित्यंतोदात्तो निपात्यते । चुक्रुधामेति क्रुधेर्ण्यंताल्लुङि चङि रूपं ॥

यदुदत्तो निवतो यासि बप्सत्पृथगेषि प्रगर्धिनीव सेना ।
यदा ते वातो अनुवाति शोचिर्वप्नेव श्मश्रु वपसि प्र भूम ॥४॥
यत् । उत्ऽवतः । निऽवतः । यासि । बप्सत् । पृथक् । एषि । प्रगर्धिनीऽइव । सेना ।
यदा । ते । वातः । अनुऽवाति । शोचिः । वप्नाऽइव । श्मश्रु । वपसि । प्र । भूम ॥४॥

यद्यदोदत उन्नतानुच्छ्रितान् निवतो नीचीनांस्तरुगुल्मादीन् हे अग्ने बप्सद्बहन्यासि प्राप्नोषि तदानीं बहुशोभिर्ज्वालाभिः पृथग्विभिन्नः सन्नेषि । गच्छसि । तत्र दृष्टांतः । प्रगर्धिनीव सेना ॥ गृधु अभिकांक्षायां ॥ परराष्ट्रं गच्छतो राज्ञः सेना तत्तत् धनजातमभिकांक्षमाणैतस्ततः संघशो गच्छति तद्वत् । वातो वायुश्च ते तव शोचिः दीप्तिं यदा यस्मिन्काले ऽनुवाति अनुगुणं प्रवर्तते तदा श्मश्रु । श्म शरीरं । तत्र श्रितं स्थितं केशरोमादिकं वप्नेव यथा वप्ता नापितो वपति मुंडयति तथा भूम भूमिं प्र वपसि । प्रकर्षेण मुंडयसि । सर्वं वनं निःशेषेण दहसीत्यर्थः ॥

प्रत्यस्य श्रेणयो दृंहत्र एकं नियानं बहवो रथासः ।
बाहू यदग्ने अनुममृजानो न्यङ्ङुत्तानामन्वेषि भूमिं ॥५॥
प्रति । अस्य । श्रेणयः । दृंहत्रे । एकं । निऽयानं । बहवः । रथासः ।
बाहू इति । यत् । अग्ने । अनुऽममृजानः । न्यङ् । उत्तानां । अनुऽएषि । भूमिं ॥५॥

अस्यापेर्दहतः श्रेणयो ज्वालापंक्तयः प्रति दृंहत्रे । प्रतिदृश्यंते । ---। तद्वत् । अत्र सामर्थ्यादुपमान-प्रतीतिः । हे अग्ने बाहू । तृतीयार्थे प्रथमा । बाहुभ्यां बाहुस्थानीयैर्ज्वालासमूहैरनुममृजानः सर्वं वनं मृजन्शोधयन् । दहन्नित्यर्थः । न्यङ् न्यंचन् प्रह्वीभवन्नुत्तानामूर्ध्वाभिमुखां भूमिं यद्यदान्वेषि अनुगच्छसि तदानीमस्य श्रेणयो दृंहत्र इत्यन्वयः ॥

उत्ते शुष्मा जिहतामुत्ते अर्चिरुत्ते अग्ने शशमानस्य वाजाः ।
उच्छ्वँचस्व नि नम वर्धमान आ त्वाद्य विश्वे वसवः सदंतु ॥ ६॥
उत् । ते । शुष्माः । जिहतां । उत् । ते । अर्चिः । उत् । ते । अग्ने । शशमानस्य । वाजाः ।
उत् । श्वंचस्व । नि । नम । वर्धमानः । आ । त्वा । अद्य । विश्वे । वसवः । सदंतु ॥ ६॥

हे अग्ने ते तव शुष्माः शोषका ज्वाला उज्जिहतां । उन्नच्छंतु । तथा ते तवार्चिर्दीप्तिश्चोन्नच्छतु । शशमानस्य स्तूयमानस्य । यद्वा ॥ शश प्लुतगतौ । अस्मात्ताच्छीलिकस्यानस् । तस्य सार्वधातुकत्वे सति असार्वधातुकत्वाभावाच्चित इत्यंतोदात्तत्वमेव शिष्यते ॥ शशमानस्य सर्वं वनमभिक्रम्य शीघ्रं गच्छतः । तव वाजा वेगा हे अग्ने उज्जिहतां । स त्वं वर्धमानः सन्नुच्छ्वंचस्व । वन उन्नच्छस्व ॥ श्वचि गतौ भौवादिकः । इदित्त्वान्नुम् ॥ तथा नि नम । प्रह्वीभव । उन्नतं वृक्षादिकं प्राप्योच्छ्रितो भव । अवनतं गुल्मादिकं प्राप्यावनतो भवेत्यर्थः । ईदृशं त्वा त्वामद्यास्मिन्काले विश्वे सर्वे वसवो वासयितारो रश्मयो देवा वा सदंतु । आसीदंतु । प्राप्नुवंतु ॥ सदेर्व्यत्ययेन सीदादेशाभावः । शपि प्राप्ते व्यत्ययेनाङ्वा कर्तव्यः ॥

अपामिदं न्ययनं समुद्रस्य निवेशनं । अन्यं कृणुष्वेतः पंथां तेन याहि वशाँ अनु ॥ ७॥
अपां । इदं । निऽअयनं । समुद्रस्य । निऽवेशनं । अन्यं । कृणुष्व । इतः । पंथां ।
तेन । याहि । वशान् । अनु ॥ ७॥

इत्थं खांडववनस्य दाहे प्रवृत्तमग्निं जरितृप्रभृतयः स्वात्मनो रक्षणकामास्तुष्टुवुः । इदानीं च स्वंबमित्रः स्वनिवासभूमेर्दहनाभावायाग्निरन्यत्र गमनं प्रार्थयते । इदमस्मदीयं निवासस्थानमपामुदकानां न्ययनं । नियंति नितरां गच्छंत्यस्मिन्निति न्ययनं ह्रदः । तथा समुद्रस्योदधेश्च निवेशनं गृहं । यथा ह्रदः समुद्रस्य स्थानं च यथा दग्धुं न शक्यते तथा दाहयोग्यं न भवत्वित्यर्थः । इतोऽस्मादस्मदीयात्स्थानादन्यं पंथां पंथानं मार्गं हे अग्ने कृणुष्व । कुरुष्व । तेन पथा वशाननु यथाकामं याहि । गच्छ ॥

आयने ते परायणे दूर्वा रोहंतु पुष्पिणीः । ह्रदाश्च पुंडरीकाणि समुद्रस्य गृहा इमे ॥ ८॥
आऽअयने । ते । पराऽअयने । दूर्वाः । रोहंतु । पुष्पिणीः । ह्रदाः । च । पुंडरीकाणि ।
समुद्रस्य । गृहाः । इमे ॥ ८॥

अनयापि स्वनिवासस्य दाहानर्हता प्रतिपाद्यते । हे अग्ने ते तवायन आगमने परायणे परागमने वा मत्यस्यां निवासभूमौ पुष्पिणीः पुष्पवत्यो दूर्वा रोहंतु । प्ररोहंतु । तथा ह्रदा अग्नोत्थोदका जलाशयाश्च भवंतु पुंडरीकाणि पद्मानि च तेषु ह्रदेषु जायंतां । किं बहुना । समुद्रस्य जलधेरिमेऽस्मिन्निवासप्रदेशे गृहा आश्रयभूता भवंतु । यथा समुद्रावासभूमिः कदाचिदपि न दह्यते एवं कदाचिदप्यस्मत्स्थानं न दह्यतामित्यर्थः । एतदुक्तं भवति । दूर्वाकांडप्ररोहणप्रार्थनेन स्वाश्रयस्य शीतलत्वं ह्रदप्रार्थनेन तृष्णोपशमनकारणस्य जलस्य सत्त्वं पुंडरीकसद्भावप्रार्थनेनोपभोग्यस्य फलादेः सत्ता समुद्रगृहत्वप्रार्थनेन दाहानर्हता चेत्येतत्सर्वं प्रतिपादयत इति ॥ ॥ ३०॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्येऽष्टमाष्टके सप्तमोऽध्यायः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

दशमे मंडल एकादशेऽनुवाके चतुर्दश सूक्तानि व्याख्यातानि। त्यं चिदिति षडृचं पंचदशं सूक्तं संख्यपुच्छाचिरार्षमानुष्टुभमश्विदेवताकं। तथा चानुक्रांतं। त्यं षट् सांख्योऽचिराश्विनमिति ॥ प्रातरनुवाकाश्विनशस्त्रयोरानुष्टुभे छंदसीदं सूक्तं। सूच्यते हि। आ नो विश्वाभिस्त्यं चिदचिमित्यानुष्टुभं। आ० ४. १५.। इति ॥

त्यं चिदचिमृतजुरमर्थमश्वं न यातवे। कक्षीवंतं यदी पुना रथं न कृणुथो नवं ॥१॥
त्यं। चित्। अचिं। ऋतऽजुरं। अर्थं। अश्वं। न। यातवे। कक्षीवंतं। यदि। पुनरिति। रथं। न। कृणुथः। नवं ॥१॥

हे अश्विनौ शतद्वारि पीडायंचगृहेऽसुरैः प्रक्षिप्तो बद्धांगो योऽचिरलि त्यं चित्तमप्यचिमृतजुरं। ऋतं स्तोत्रं यज्ञो वा। तेन जीर्यंतं। सर्वदा युवयोः परिचरणशीलमित्यर्थः ॥ जीर्यतेः क्विपि बहुलं छंदसीत्युत्वं ॥ यद्वा। ऋतेन प्राप्तेनासुरकृतोपद्रवेण ज्वरितं रुग्णं ॥ ज्वर रोगे। ज्वरत्वरेत्यादिना वकारस्योपधायाश्च स्थाने ऊठ्। जूरी हिंसागत्योरित्यस्माद्वा क्विप्। अनयोः पञ्चयोरुछांदसो ह्रस्वः ॥ ईदृशं तमचिमर्थमर्थनीयं प्राप्तव्यं यातवे गंतुं युवां क्षमवंतौ। तत्र दृष्टांतः। अश्वं न। यथाश्वो बंधनाद्विमुक्तः सञ्शीघ्रं गच्छति एवमथमपि युवयोः प्रसादादसुरकृतादुपद्रवजातादिमुच्यमानो यथास्थानमगच्छदित्यर्थः ॥ या प्रापण इत्यस्मात्तुमर्थे सेसेनिति तवेन्प्रत्ययः ॥ यदि। अपि चेत्यर्थः। कक्षीवंतं। कक्ष्या रज्जुरश्वस्य। तद्वंतं ॥ आसंदीवदष्ठीवदित्यादौ निपातनात्संप्रसारणं ॥ दीर्घतमसः पुत्रमुशिक्पसूतमृषिं मंदबुद्धिं संतं युवां पुनर्नवं पुनरभिनवप्रज्ञं कृणुथः। अकृणुतं। अकुरुतं। रथं न। यथा कश्चिच्छिल्पी जीर्णं रथं पुनरभिनवं करोति तद्वत् ॥ क्विप् हिंसाकरणयोश्च। इदित्त्वान्नुम्। लङर्थे व्यत्ययेन लट्। धिन्विकृण्व्योरेत्युप्रत्ययः। तत्संनियोगेनाकारांतादेशश्च। तस्मातो लोपे सति स्थानिवद्भावाल्लघूपधगुणाभावः। सति शिष्टोऽपि विकरणस्वरो लसार्वधातुकस्वरं न बाधते। म० ६. १. १५८. ११.। इति वचनात्तिङ एव स्वरः शिष्यते। निपातैर्यद्यदिहंतेति निघातप्रतिषेधः ॥

त्यं चिदश्वं न वाजिनमरेणवो यमत्नत।
दृळ्हं यंथिं न वि ष्यतमचिं यविष्ठमा रजः ॥२॥
त्यं। चित्। अश्वं। न। वाजिनं। अरेणवः। यं। अत्नत।
दृळ्हं। यंथिं। न। वि। स्यतं। अचिं। यविष्ठं। आ। रजः ॥२॥

अरेणवोऽहिंस्यमानाः प्रबला असुरा वाजिनं वेगवंतमश्वं नाश्वमिव यमचिमत्नत अतन्वत बद्धमकृषत ॥ तनोतेर्मुडि तनिपत्योश्छंदसीत्युपधालोपः ॥ त्यं चित्तं चाचिं यविष्ठं युवतमं स्तुतिर्मिश्रयितृतमं वा रजः ॥ रजंत्यस्मिन्ना इति रजो भूलोकः ॥ रज इमं लोकमाभि हे अश्विनौ वि ष्यतं। व्यसंचतं। दृढं स्थिरतरं यंथिं न ग्रंथिमिव। यथा कश्चित्तादृशं ग्रंथिमयत्नेन विसुंचति तथा युवां तमृषिमसुरकृताद्बंधनान्मोचितवंताविति्यर्थः ॥ स्यतमिति षोऽतकर्मणीत्यस्माच्छिति श्नुग्योतः श्नसीत्योकारलोपे रूपं। छांदसोऽडभावः ॥ यद्वा। अचिं मां बंधाद्वि ष्यतं विसुंचतमित्यृषिरसुरैर्बद्धः सन्नश्विनौ प्रार्थयते ॥

नरा दंसिष्ठावयये शुभा सिषासतं धियः।
अथा हि वां दिवो नरा पुनः स्तोमो न विशसे ॥३॥
नरा। दंसिष्ठौ। अयये। शुभा। सिसासतं। धियः।
अथ। हि। वां। दिवः। नरा। पुनरिति। स्तोमः। न। विऽशसे ॥३॥

हे नरा नरौ नेतारौ हे दंसिष्ठौ दर्शनीयतमौ सुधा शोभमानौ ईदृशौ हे अश्विनौ अयय ऋषये मह्यं धियः कर्माणि बुद्धीर्वा सिषासतं । दातुमिच्छतं ॥ षणु दाने ॥ यद्वा । अयय इति षष्ठ्यर्थे चतुर्थी । अयेमम धियः स्तुतीः कर्माणि वा सिषासतं । संभक्तुमिच्छतं । सेवेथामित्यर्थः ॥ वन षण संभक्तौ । अस्मात्सनतेः सनोतेर्वा सनि सनीवंतर्धेति विकल्पनादिडभावे जनसनखनामित्यात्वं । शुभेत्यस्यामंचितस्यामंचितं पूर्वमविद्यमानवदित्यविद्यमानवत्त्वेन पदादपरत्वेन पादादित्यात्तिङुतिङ इति निघाताभावः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे सनो नित्त्वादाद्युदात्तत्वं ॥ अथा ह्यनंतरमेव दिवः । दीव्यतीति स्तौतीति द्यौः स्तोता । तस्य मम स्तोमो न । नशब्दस्यार्थे । स्तोमं च हे नरा नेतारावश्विनौ वां युवां पुनर्विशसे । पुनरेवाद्यापि विशेषेण शंसितुं प्रभवतीति शेषः ॥

चिते तद्वां सुराधसा रातिः सुमतिरश्विना ।
आ यन्नः सदने पृथौ समने पर्षथो नरा ॥४॥
चिते । तत् । वां । सुऽराधसा । रातिः । सुऽमतिः । अश्विना ।
आ । यत् । नः । सदने । पृथौ । समने । पर्षथः । नरा ॥४॥

हे सुराधसा शोभनदानावश्विना हे अश्विनौ सुमतिः शोभना स्तुतिरस्मदीया रातिर्हविर्दानं च तत्तस्मात्कारणाद्वां युवयोरिति ज्ञानाय भवति ॥ चिती संज्ञाने । अस्मात्संपदादिलक्षणो भावे क्विप् । सावेकाच इति विभक्तेरुदात्तत्वं ॥ यद्यस्मात्कारणात्सदने यज्ञगृहे पृथौ विस्तीर्णे समने यज्ञे नोऽस्मान् हे नरा नेतारावा पर्षथः आपूरयथः अभितो रक्षथो वा तस्मादुवामस्मदीयं परिचरणं ज्ञातवंतावित्यनुमीमहे ॥ पॄ पालनपूरणयोरित्यस्माल्लेटि सिब्बहुलमिति सिप् । ततः शप् ॥

युवं भुज्युं समुद्र आ रजसः पार ईरितं । यातमच्छा पतत्रिभिर्नासत्या सातये कृतं ॥५॥
युवं । भुज्युं । समुद्रे । आ । रजसः । पारे । ईरितं । यातं । अच्छ । पतत्रिऽभिः ।
नासत्या । सातये । कृतं ॥५॥

हे अश्विनौ युवं युवां समुद्र उदधौ निमग्नं रजस उदकस्य परि प्रांते तरंगसमूह ईरितं डोलायितं एवंभूतं भुज्युं तुग्रपुत्रमच्छाभि पतत्रिभिः पक्षोपेतैर्नौविशेषैः सहा यातं । आगतवंतौ स्थः । आगत्य च हे नासत्या सत्यस्य नेतारौ सत्यस्वभावौ वा हे अश्विनौ सातये युवयोः संभजनाय समर्थं कृतं । पुनर्युवानं कृतं ॥ करोतेर्लेङि च्छांदसो विकरणस्य लुक् । अडभावश्च ॥

आ वां सुम्नैः शंयू इव मंहिष्ठा विश्ववेदसा ।
सम्स्मे भूषतं नरोत्सं न पिप्युषीरिषः ॥६॥
आ । वां । सुम्नैः । शंयू इवेति शंयूऽइव । मंहिष्ठा । विश्वऽवेदसा ।
सं । अस्मे इति । भूषतं । नरा । उत्सं । न । पिप्युषीः । इषः ॥६॥

हे विश्ववेदसा सर्वज्ञौ सर्वधनौ वा हे नरा नेतारौ वां युवां शंयू इव सुखयुक्तौ राजानाविव मंहिष्ठा दातृतमावतिशयेन पूज्यौ वा संतौ सुम्नैरस्मभ्यं दातव्यैः सुखैः सार्धमा । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः । आगच्छतं । यद्वा । उपसर्गस्य भूषतमित्यनेन संबंधः । मंहिष्ठेत्यपि संबोधनं । हे मंहिष्ठा दातृतमावुरुगुणावश्विनौ वां युवां सुम्नैः सार्धं शंयू इवास्मे अस्मान् सम्यगा भूषतं । अभिप्राप्नुतं ॥ भू प्राप्तौ । अस्माल्लोटि व्यत्ययेन सिप्यपौ ॥ यद्वा ॥ भूष अलंकारे ॥ आ समंतात्सम्यग्भूषतं । अलंकुरुतं । पिप्युषीः प्रवृद्धाश्चीव इव्यमाणानि पयांस्युत्सं न गोरूध इव । यथा बद्धगोभिः पशोभिरूधोऽलंकृतं सद्भूषति अस्मानप्येवं बद्धगोभिर्धनैरलंकुरु-

तमित्यर्थः ॥ पिप्युषीरिति प्यायतेर्लिटः क्वसुः । लिड्यङोश्चेति यीभावः । असि वा छंदसीति पूर्वसवर्णदीर्घः ॥ यद्वा । उत्सः प्रवाहो यथा पिप्युषीर्वृद्धानीयोऽन्नान्यलंकरोति तद्वत् ॥ ॥ १ ॥

अयं हीति षड्चं षोडशं सूक्तं तार्क्ष्यपुत्रस्य सुपर्णस्यार्षं यमगोत्रस्योर्ध्वकृशनस्य वा । आद्या गायत्री द्वितीया बृहती तृतीयाचतुर्थौ गायत्र्यौ पंचमी सतोबृहती षष्ठी विष्टारपंक्तिरष्टकद्विर्द्वादशाष्टकवती । अनादेशपरिभाषयेंद्रो देवता । तथा चानुक्रांतं । अयं हि तार्क्ष्यपुत्रः सुपर्णो यामायनो वोर्ध्वकृशनो गायत्री बृहती गायत्र्यौ सतोबृहती विष्टारपंक्तिरिति ॥ गतो विनियोगः ॥

अयं हि ते अमर्त्य इंदुरत्यो न पत्यते । दक्षो विश्वायुर्वेधसे ॥ १ ॥
अयं । हि । ते । अमर्त्यः । इंदुः । अत्यः । न । पत्यते । दक्षः । विश्वऽआयुः । वेधसे ॥ १ ॥

हे इंद्र वेधसे विधात्रे ते तुभ्यं स्वदर्थममर्त्यो मरणरहितोऽमृतत्वप्रापकोऽयं ह्ययं खल्विंदुः सोमोऽत्यो न सततगाम्यश्व इव पत्यते । गच्छति । यद्वा । पत्यतिरैश्वर्यकर्मा । तव स्वभूतोऽयं सोमो वेधसे विधानाय मदस्य करणायेष्टे । कीदृश इंदुः । दक्षः प्रवृद्धो बलहेतुर्वा विश्वायुर्विश्वैः सर्वैरेतव्यः प्राप्तव्यः । यद्वा । विश्वेषामायुर्जीवनहेतुः । अथवा । आयुरित्यन्ननाम । सर्वैश्चरुपुरोडाशादिभिरन्नैर्हविर्भिरुपेतः ॥

अयमस्मासु काव्य ऋभुर्वज्रो दास्वते । अयं बिभर्त्यूर्ध्वकृशनं मदमृभुर्न कृत्व्यं मदं ॥ २ ॥
अयं । अस्मासु । काव्यः । ऋभुः । वज्रः । दास्वते । अयं । बिभर्ति । ऊर्ध्वऽकृशनं । मदं । ऋभुः । न । कृत्व्यं । मदं ॥ २ ॥

अस्मासु स्तोतृषु काव्यः सुत्योऽयमिंद्र ऋभुर्दीप्तः सन्दास्वते दानयुक्ताय यजमानाय वज्रः शत्रूणां वर्जयो भवति । यद्वा । दास्वत इति षष्ठ्यर्थे चतुर्थी । अस्मासु दास्वते दानवत इंद्रस्य वज्रः कुलिश ऋभुरुरु भासमानो भवति । अपि चायमूर्ध्वकृशनमुन्नततेजस्कमेतत्संज्ञं वा यामायनमृषिं मदं स्तोतारं बिभर्ति । पोषयति । तथर्भुर्न सौधन्वनः । पुत्राणामाप्त ऋभुः । स इव कृत्व्यं कर्मणां कर्तारं अत एव मदं मोदयितारं यजमानं बिभर्ति ॥

घृषुः श्येनाय कृत्वन आसु स्वासु वंसगः । अव दीधेदहीशुवः ॥ ३ ॥
घृषुः । श्येनाय । कृत्वने । आसु । स्वासु । वंसगः । अव । दीधेत् । अहीशुवः ॥ ३ ॥

घृषुर्घर्षयिता दीप्तो वा स्वासु स्वकीयास्वासु यजमानलक्षणासु प्रजासु वंसगो वननीयगतिः एवंभूत इंद्रः कृत्वने कर्मणां कर्त्रे ॥ करोतेरत्नेभ्योऽपि दृश्यंत इति क्वनिप् ॥ श्येनाय सुपर्णाय तार्क्ष्यपुत्राय मह्यमृषये ऽहीशुवोऽहीनव्यापनाद्दीनवृद्धीन्वाऽस्मदीयान्पुत्रादीनव दीधेत् । दीपयतु ॥ दीधीङ् दीप्तिदेवनयोः । अस्माच्छांदसे लिङि व्यत्ययेन परस्मैपदं ॥ यद्वा । हे इंद्र त्वदीयः सोमो घृष्यादिगुणयुक्तः सन् दीप्यत इति योज्यं ॥

यं सुपर्णः परावतः श्येनस्य पुत्र आभरत् । शतचक्रं योऽह्यो वर्तनिः ॥ ४ ॥
यं । सुऽपर्णः । पराऽवतः । श्येनस्य । पुत्रः । आ । अभरत् । शतऽचक्रं । यः । अह्यः । वर्तनिः ॥ ४ ॥

श्येनस्य तार्क्ष्यस्य पुत्रसंज्ञयः सुपर्णो यं सोमं परावतः परागताद्दूराद्द्युलोकादाभरत् आहरत् । कीदृशं । शतचक्रं । शतमिति बहुनाम । बहुधनस्य कर्तारं ॥ मूलविभुजादित्वात्कप्रत्ययः । पा० ३. २. ५. २. ॥ यद्वा । शतकरणसाधनं । बहुयागनिष्पादनमित्यर्थः ॥ घञर्थे कविधानं । पा० ३. ३. ५८. ४. । इति कप्रत्ययः । छन्दादीनां के । का० ६. १. १२. १. । इति द्विर्वचनं । यः सोमोऽह्योऽहेर्वृत्रस्य वर्तनिर्वर्तयिता प्रेरयिता । यद्वा ॥ अह गतौ ॥ अह्यो गंतव्यो वर्तनिर्मार्गभूतः । एना वय इति वक्ष्यमाणेनैकवाक्यता ॥

यं ते श्येनश्चारुमवृकं पदाभरदरुणं मानमंधसः ।
एना वयो वि तार्यायुर्जीवसे एना जागार बंधुता ॥५॥
यं । ते । श्येनः । चारुं । अवृकं । पदा । आ । अभरत् । अरुणं । मानं । अंधसः ।
एना । वयः । वि । तारि । आयुः । जीवसे । एना । जागार । बंधुता ॥५॥

हे इंद्र ते तुभ्यं त्वदर्थं श्येनः सुपर्णः पक्षिराड्यं सोमं पदा । वचनव्यत्ययः । पद्भ्यामाभरत् द्युलोकादाहरत् । दिवं सुपर्णो गत्वाय सोमं वज्रिण आभरत् । ऋ० ८. १००. ८. । इति निगमांतरं । कीदृशं । चारुं शोभनं अवृकं बाधकरहितं अरुणमारोचमानमरुणवर्णं वा अंधसोऽन्नस्य मानं यागद्वारा निर्मातारं । एनेतेनानेन सोमेन तुभ्यं दीयमानेन वयोऽन्नं जीवसे जीवनायायुर्जीवितं च वि तारि । प्रादायि । तथैनेतेनैव सोमेन बंधुता बंधुसमूहो जागार । जाग्रत्प्रबुद्धः सन्वर्तते ॥ जागर्तेर्लिटि च्छंदसि वेति वक्तव्यं । पा० ६. १. ८. १. । इति द्विर्वचनाभावः ॥

एवा तदिंद्र इंदुना देवेषु चिद्धारयाते महि त्यजः ।
क्रत्वा वयो वि तार्यायुः सुक्रतो क्रत्वायमस्मदा सुतः ॥६॥
एव । तत् । इंद्रः । इंदुना । देवेषु । चित् । धारयाते । महि । त्यजः ।
क्रत्वा । वयः । वि । तारि । आयुः । सुक्रतो इति सुऽक्रतो । क्रत्वा । अयं । अस्मत् ।
आ । सुतः ॥६॥

एवैवमुक्तेन प्रकारेण तत्तेनेंदुना सोमेन तृप्यन्निंद्रो देवेषु चिद्देवेष्वस्मासु च महि महत्त्यजस्त्यजो दुःखस्य वर्जयितृ रक्षणं वा धारयाते । धारयति । श्लिष्टः प्रत्यक्षकृतः । हे सुक्रतो शोभनकर्मन्निंद्र क्रत्वा क्रतुनास्माभिरनुष्ठितेन कर्मणा प्रीतेन त्वया वयोऽन्नमायुर्जीवनं च वि तारि । अस्मभ्यं प्रादायि । योऽयमिंदुः क्रत्वा कर्मणा प्रज्ञानेन वास्मदस्माभिरा सुतोऽभिषुतः । यद्वा । अस्मदस्मत्तस्त्वदाभिमुख्येन सुतः प्रेरितः । तेनेंदुनेत्यन्वयः ॥ ॥२॥

इमामिति षडृचं सप्तदशं सूक्तमिंद्राण्या आर्षं । षष्ठी पंक्तिः शिष्टा अनुष्टुभः । अनेन सूक्तेन सपत्न्या बाधनं प्रतिपाद्यते । अत एव सूक्तजपादिना सपत्न्या विनाशो भवति । अतस्तद्देवताकमिदं । तथा चानुक्रांतं । इमामिंद्राण्युपनिषत्सपत्नीबाधनमानुष्टुभं तु पंक्त्यंतमिति ॥ अस्य सूक्तस्य विनियोगो भगवतापस्तंबेन कस्मिंश्चित्सपत्नीघ्नप्रयोगविशेषे दर्शितः । चिःसप्तभिर्यवैः पाठां परिकिरति यदि वाहरणसि वहरणात्त्वा निष्क्रीणामि यदि सौम्यसि सोमात्त्वा निष्क्रीणामीति । स्त्रीभूत उत्तरयोत्थाप्योत्तराभिस्तिलकैरभिमंत्र्योत्तरया प्रतिच्छन्नां हस्तयोरावध्य शय्याकाले वामाभ्यां भर्तारं परिगृह्णीयादुपधानलिंगया । वश्यो भवति । सपत्नीबाधनं च । आप० गृ० ९. ५–८. । इति । अयमर्थः । आद्यया पाठा नामौषधिः खातव्या । ततस्तिलकैरोषधैरभिमंत्रणं । षष्ठ्यावद्धा सौषधिर्यथा भर्तारं स्पृशति तथा तस्य भर्तुरालिंगनमिति ॥

इमां खनाम्योषधिं वीरुधं बलवत्तमां ।
यया सपत्नीं बाधते यया संविंदते पतिं ॥१॥
इमां । खनामि । ओषधिं । वीरुधं । बलवत्ऽतमां ।
यया । सऽपत्नीं । बाधते । यया । संऽविंदते । पतिं ॥१॥

इमामोषधिं पाठाख्यां वीरुधं लतारूपां बलवत्तमां स्वकार्यकरणेऽतिशयेन बलवतीं खनामि । उन्मूल-

यामि । ययौषध्या सपत्नीं । समान एकः पतिर्यस्याः सा सपत्नी । तामेषा वधूर्बाधते हिनस्ति । यथा च पतिं भर्तारं संविंदते सम्यगसाधारण्येन लभते ॥

उत्तानपर्णे सुभगे देवजूते सहस्वति । सपत्नीं मे परा धम पतिं मे केवलं कुरु ॥२॥
उत्तानऽपर्णे । सुऽभगे । देवऽजूते । सहस्वति । सऽपत्नीं । मे । परा । धम । पतिं । मे । केवलं । कुरु ॥२॥

हे उत्तानपर्णे उत्तानान्यूर्ध्वमुखानि पर्णानि पक्षाणि यस्याः तादृशि हे सुभगे सौभाग्यहेतुभूते हे देवजूते देवेन त्वया प्रेरिते हे सहस्वत्यभिभवनवति ईदृशि हे पाठे मे मम सपत्नीं स्त्रियं परा धम । परागमय । धमतिर्गतिकर्मा । पतिं च मे ममैव केवलमसाधारणं कुरु ॥

उत्तराहमुत्तर उत्तरेदुत्तराभ्यः । अधा सपत्नी या ममाधरा साधराभ्यः ॥३॥
उत्ऽतरा । अहं । उत्ऽतरे । उत्ऽतरा । इत् । उत्ऽतराभ्यः । अध । सऽपत्नी । या । मम । अधरा । सा । अधराभ्यः ॥३॥

हे उत्तर उत्कृष्टतरे पाठे अहमुत्तरोत्कृष्टतरा भूयासं । उत्तराभ्यो लोके या उत्कृष्टतराः संति ताभ्यो ऽप्यहमुत्तरोत्कृष्टतरैव त्वत्प्रसादाल्लभेयं । अथानंतरं मम या सपत्नी साधराभ्यो निकृष्टाभ्योऽप्यधरा निकृष्टतरा भवतु ॥

नह्यस्या नाम गृभ्णामि नो अस्मिन्रमते जने ।
परामेव परावतं सपत्नीं गमयामसि ॥४॥
नहि । अस्याः । नाम । गृभ्णामि । नो इति । अस्मिन् । रमते । जने ।
परां । एव । पराऽवतं । सऽपत्नीं । गमयामसि ॥४॥

अस्याः सपत्न्या नाम संज्ञामपि नहि गृभ्णामि । नैव गृह्णामि । उच्चारयामि । नो खलु काचिदस्मिञ्जने सपत्न्याख्ये रमते । क्रीडति । अपि च तां सपत्नीं परां परावतमेवातिशयेन दूरदेशमेव गमयामसि । प्रापयामः । अतिशयेन भर्त्रा वियोजयाम इत्यर्थः ॥

अहमस्मि सहमानाथ त्वमसि सासहिः ।
उभे सहस्वती भूत्वी सपत्नीं मे सहावहै ॥५॥
अहं । अस्मि । सहमाना । अध । त्वं । असि । ससहिः ।
उभे इति । सहस्वती इति । भूत्वी । सऽपत्नीं । मे । सहावहै ॥५॥

• हे ओषधि अहं त्वत्प्रसादात्सहमानाऽस्मि । सपत्न्या अभिभवित्री भवामि । अथापि च त्वमपि सासहिरसि । तस्मात्त्वमभिभवित्री भवसि । आवामुभे अपि सहस्वती अभिभवित्र्यौ भूत्वा भूत्वा मे मम सपत्नीं सहावहै । अभिभवाम ॥

उप ते ऽधां सहमानामभि त्वाधां सहीयसा ।
मामनु प्र ते मनो वत्सं गौरिव धावतु पथा वारिव धावतु ॥६॥

उप॑ । ते॒ । अधां॑ । सह॑मानां । अ॒भि । त्वा॒ । अधां॑ । सहीय॑सा ।
मां । अनु॑ । प्र । ते॒ । मनः॑ । व॒त्सं । गौःऽइ॑व । धाव॑तु । पथा॑ । वाःऽइ॑व । धाव॑तु ॥६॥

हे पते ते तव सहमानां सपत्न्या अभिभवित्रीमिमामोषधिमुपाधां । शिरस उपाधानं करोमि । सहीयसाभिभवितृतरेण तेनोपधानेन त्वामध्यधां । अभितो धारयामि । ते तव भर्तुर्मनो मामनुलक्ष्य प्र धावतु । प्रकर्षेण शीघ्रं गच्छतु । तत्र निदर्शनद्वयमुच्यते । गौरिव यथा गौर्वत्सं शीघ्रं गच्छति पथा निम्नेन मार्गेण वारिव वारुदकं यथा स्वभावतो गच्छति तद्वत् । अनेन निदर्शनद्वयेनौत्सुक्यातिशयः स्वाभाविकत्वं च प्रतिपाद्यते ॥ ॥३॥

अरण्यानीति षड्चमष्टादशं सूक्तमिरंमदपुत्रस्य देवमुनेरार्षं । महदरण्यमरण्यानी । तद्देवताकं । आनुष्टुभं । तथा चानुक्रांतं । अरण्यान्यैरंमदो देवमुनिररण्यानीं तुष्टावेति ॥ गतो विनियोगः ॥

अर॑ण्यान्यर॑ण्यान्यसौ॒ या प्रेव॑ नश्य॑सि ।
कथा॒ ग्रामं॑ न पृ॑च्छसि॒ न त्वा॒ भीरि॑व विंद॒तीँ ॥१॥
अर॑ण्यानि । अर॑ण्यानि । असौ॑ । या । प्रऽइ॑व । नश्य॑सि ।
कथा॑ । ग्रामं॑ । न । पृ॒च्छ॒सि॒ । न । त्वा॒ । भीःऽइ॑व । विं॒द॒ती॒ँ ॥१॥

हे अरण्यानि । अरण्यस्य पालयित्री काचिद्देवतारण्यानीति नैरुक्ताः । वैयाकरणास्तु हिमारण्ययोर्महत्त्वे । पा० ४. १. ४९. १. इत्यरण्यस्य महत्त्वे ङीषं स्मरंति । अरण्याधिदेवते अरण्यानि कांतारारण्यानि प्रति यासौ त्वं प्रेव नश्यसि । इवः संप्रत्यर्थे । नश्यतिः प्राप्तिकर्मा ॥ अत्र व्यत्ययेन श्यन् ॥ संप्रति रक्षणाय प्राप्नोषि । यद्वा । निर्जने देशे वर्तमानत्वान्नष्टेव प्रतीयसे । सा त्वं कथा कथं ग्रामं न पृच्छसि । निर्जनेऽरण्ये कथं रमसे । नूनं त्वा त्वां भीर्भयं न विंदति । न लभते किं । वितर्के श्रुतः । इवः संप्रत्यर्थे परिभयार्थे वा । अत्र निरुक्तं । अरण्यान्यरण्यस्य पत्न्यरण्यमपार्णं भवति ग्रामादरमणं भवतीति वा । अरण्यानीत्येनामामंत्रयते । यासावरण्यानि वनानि पराचीव नश्यसि कथं ग्रामं न पृच्छसि न त्वा भीर्विंदतीवेतीवः परिभयार्थे वा । नि० ९. ३०. । इति ॥

वृषा॑रवाय॒ वद॑ते॒ यदु॑पाव॑ति चिच्चि॒कः ।
आघा॑टिभिरिव धाव॑यन्नर॒ण्यानिर्म॑हीयते ॥२॥
वृष॑ऽरवाय । वद॑ते । यत् । उप॑ऽअव॑ति । चिच्चि॒कः ।
आघा॑टिभिःऽइव । धाव॑यन् । अ॒र॒ण्यानिः॑ । म॒ही॒य॒ते ॥२॥

वृषारवाय । वृषा सेचनसमर्थो रवः शब्दो यस्य सूक्ष्मजंतुविशेषस्य स्निग्ध्यास्य स तथोक्तः । कटुकशब्दवानित्यर्थः । तस्मै वृषारवाख्याय वदते चीचीशब्दं कुर्वते चिच्चिकस्यचीचीशब्दं कुर्वन्नयो जंतुर्यदोपावति वृषारवाय स्वशब्दस्य प्रत्युत्तररूपेण चीचीशब्दकारिणोपगच्छति । उपेत्य पालयति वा । तत्र दृष्टांतः । आघाटिभिरिव । आघाटयो घाटलिकाः कांडवीणाः । ताभिर्धावयन्निषादादिसप्तस्वराणि शोधयन्गायक इव । तदारण्यानिः सारण्यानी महीयते । पूज्यते ॥ इंद्रवरुणेत्यादिना ङीष् । पा० ४. १. ४९. । तत्संनियोगेनानुगागमः । छांदसो ह्रस्वः । अत एव हल्ङ्यादिसुलोपाभावः ॥

उ॒त गावं॑ इवादंत्यु॒त वेश्मे॑व दृश्यते । उ॒तो अर॑ण्यानिः सा॒यं श॑कटी॒रिव॑ सर्जति ॥३॥
उ॒त । गावः॑ऽइव । अद॑न्ति । उ॒त । वेश्म॑ऽइव । दृ॒श्य॒ते । उ॒तो इति॑ । अर॑ण्यानिः ।
सा॒यं । श॒क॒टीःऽइ॑व । सर्ज॑ति ॥३॥

उतापि च गाव इव गवयाद्या मृगा अस्मामरण्यान्यामदंति । तृणादिकं भक्षयंति । उतापि च लतागुल्मादिकं वेश्मेव गृहमिव दृश्यते । उतो अपि चारण्यानिरियमरण्यानी सायं सायंकाले । इवः संप्रत्यर्थे । संप्रति शकटीः शकटान् दार्वाद्याहरणायागतान्सर्जति । विसर्जयति । यद्वा । शकटीः सर्जतीव दृश्यते । अहनि महदरण्यं शकटीभिः प्राप्य सर्वे जना अरण्ये चतं काष्ठादिकं शकटीष्वधारोप्य सायंकाले तस्मान्निर्गच्छंति । तदभिप्रायेणेदं वचनं ॥

गामंगैष आ ह्वयति दार्वंगैषो अपावधीत् ।
वसन्नरण्यान्यां सायमकुक्षदिति मन्यते ॥४॥
गां । अंग । एषः । आ । ह्वयति । दारु । अंग । एषः । अप । अवधीत् ।
वसन् । अरण्यान्यां । सायं । अकुक्षत् । इति । मन्यते ॥४॥

अंग हे अरण्यानि एष त्वदधिष्ठिते महारण्ये संप्रति वर्तमानो गामा ह्वयति । एष चान्यो दारु काष्ठमपावधीत् । अपहंति । तथा सायं सायंकाले राचावरण्यान्यां महारण्ये निवसन्नयं नानाविधं पक्षिमृगादिकं शब्दं मुखेन अकुक्षत् कश्चित्तस्करादिराक्रोशतीति भीतः सन्मन्यते । बुध्यते ॥

न वा अरण्यानिर्हन्त्यन्यश्चेन्नाभिगच्छति ।
स्वादोः फलस्य जग्ध्वाय यथाकामं नि षद्यते ॥५॥
न । वै । अरण्यानिः । हंति । अन्यः । चेत् । न । अभिऽगच्छति ।
स्वादोः । फलस्य । जग्ध्वाय । यथाऽकामं । नि । षद्यते ॥५॥

न वै न खल्वरण्यानिररण्यानी हंति । तत्र निवसंतं हिनस्ति । यद्यन्यो व्याघ्रचौरादिर्नाभिगच्छति । तर्हि स्वादो रसवत आम्रादेः फलस्य । द्वितीयार्थे षष्ठी । फलं जग्ध्वाय भक्षयित्वा तत्र निवसन्पुरुषो यथाकामं यथेच्छं नि षद्यते । निगच्छति । वर्तते ॥ त्वाप्रत्ययेऽदो जग्धिर्ल्यप्ति किति । पा० २. ४. ३६. । इति जग्ध्यादेशः । त्वो यक् । पा० ७. १. ४७. । इति यक् ॥

आंजनगंधिं सुरभिं बहून्नामकृषीवलां ।
प्राहं मृगाणां मातरमरण्यानिमशंसिषं ॥६॥
आंजनऽगंधिं । सुरभिं । बहुऽअन्नां । अकृषिऽवलां ।
प्र । अहं । मृगाणां । मातरं । अरण्यानिं । अशंसिषं ॥६॥

आंजनगंधिं । अंजनस्येदमांजनं कसूर्यादि । तस्य गंध इव गंधो यस्यास्तादृशीं ॥ उपमानाच्च । पा० ५. ४. १३७. । इति गंधस्येदंतादेशः ॥ अत एव सुरभिं सौरभ्योपेतां बहुन्नां बहुभिरन्नैरदनीयैः फलमूलादिभिरुपेतामकृषीवलां । कृषिरेषामस्तीति कृषीवलाः कर्षकाः ॥ रजःकृषीत्यादिना । पा० ५. २. ११२. । वलच् । वले । पा० ६. ३. ११८. । इति दीर्घः ॥ तादृशीं मृगाणां मातरं जनयित्रीमरण्यानिमरण्यानीमहं प्राशंसिषं । उक्तेन प्रकारेण स्तुतवानस्मि ॥ ॥४॥

अत्त इति पंचर्चमेकोनविंशं सूक्तं शिरीषपुत्रस्य सुवेदस आर्षं पंचमी त्रिष्टुप् शिष्टा जगत्यः । इंद्रो देवता । अनुक्रम्यते हि । अत्ते पंच सुवेदाः शैरीषित्रिष्टुबंतमिति ॥ तृतीये राचिपर्याये प्रशाखुः शस्त्र इदं सूक्तं । सूचितं च । अत्ते दधामीदं त्वत्पात्रमिंद्रपानमिति याज्या । आ० ६. ४. । इति ॥

अत्ते॑ दधामि प्रथमाय॑ मन्यवेऽहन्यद्वृ॑त्रं नर्यं॑ विवे॒रपः॑ ।
उ॒भे यत्ते॑ भवतो॒ रोद॑सी॒ अनु॒ रेज॑ते शु॒ष्मात्पृ॑थि॒वी चि॑दद्रिवः ॥१॥
अत्। ते॒। दधामि। प्रथमाय। मन्यवे। अहन्। यत्। वृत्रं। नर्यं॑। विवेः। अपः॑।
उभे इति। यत्। त्वा॒। भवतः। रोदसी॒ इति॑। अनु॑। रेजते। शुष्मात्। पृथि॒वी। चित्।
अद्रिऽवः ॥१॥

हे इंद्र ते तव मन्यवे कोपाय तेजसे वा प्रथमाय मुख्याय अहधामि । अत्रा नामादरातिशयः । तद्विषयं करोमि । यद्येन मन्युना त्वं वृत्रमावरकमसुरं मेघं वा नर्यं नेतव्यमहन् अवधीः हत्वा च तेनावृता अप उदकानि च विवेः इमं लोकं प्रत्यागमयः । तस्मै मन्यव इत्यन्वयः । यद्यदोभे रोदसी द्यावापृथिव्यौ त्वा त्वामनुकृत्य भवतः वर्तेते । त्वदधीने अभूतामित्यर्थः । तदानीं पृथिवी चित् । पृथिवीत्यंतरिक्षनाम । प्रथितं विस्तीर्णमंतरिक्षमपि हे अद्रिवो वज्रवन्निंद्र शुष्मात्त्वदीयाद्बलाद्रेजते । कंपते ॥

त्वं मा॒याभि॑रनवद्य मा॒यिनं॑ अवस्य॒ता मन॑सा वृ॒चमर्द॑यः ।
त्वामिन्नरो॑ वृणते॒ गवि॑ष्टिषु॒ त्वां विश्वा॑सु हव्या॒स्विष्टि॑षु ॥२॥
त्वं। मा॒याभिः॑। अ॒न॒व॒द्य॒। मा॒यिन॑म्। अ॒व॒स्य॒ता। मन॑सा। वृ॒चं। अर्द॑यः।
त्वां। इत्। नरः॑। वृ॒ण॒ते॒। गोऽइ॑ष्टिषु। त्वां। विश्वा॑सु। ह॒व्या॒सु। इ॒ष्टि॒षु ॥२॥

हे अनवद्यावद्यरहित प्रशस्येंद्र त्वं मायिनं मायाविनं वृचं मायाभिर्वंचनाभिर्बुद्धिविशेषैर्वा अवस्यता अवः अवणीयं यशोऽन्नं वेच्छता मनसार्दयः । अहिंसीः । अपि च नरो नेतारोऽंगिरसस्त्वामित्त्वामेव गविष्टिषु गवां पणिभिरपहृतानामेषणेषु प्रापणेषु विषयभूतेषु वृणते । संभजंते । तथा विश्वासु सर्वासु हव्यास्वाहूतव्यासु प्रार्थनीयास्विष्टिषु यागक्रियासु त्वामेव वृणते ॥

ऐषु॑ चाकंधि पुरुहूत सू॒रिषु॑ वृधासो॒ ये म॑घवन्नान॒शुर्मघं॑ ।
अ॒र्चंति॑ तो॒के तन॑ये॒ परि॑ष्टिषु मे॒धसा॑ता वा॒जिन॒महू॑ये॒ धने॑ ॥३॥
आ। ए॒षु॒। चा॒कं॒धि॒। पु॒रु॒ऽहू॒त॒। सू॒रिषु॑। वृ॒धासः॑। ये। म॒घऽव॒न्। आ॒न॒शुः॑। मघं॑।
अ॒र्चंति॑। तो॒के। तन॑ये। परि॑ष्टिषु। मे॒धऽसा॑ता। वा॒जिन॑म्। अहू॑ये। धने॑ ॥३॥

हे पुरुहूतेंद्र एषु सूरिष्वा चाकंधि । अत्यर्थमभिदीप्यस्व । अभिकामयस्व ॥ कमी दीप्तिकांतिगतिषु । अस्मात्सर्वधातुभ्य इन्नित्यौणादिक इन् ॥ हे मघवन्धनवन्निंद्र ये सूरयो वृधासस्त्वत्प्रसादाद्वर्धमानाः संतो मघं धनमानशुः प्राप्नुवंति । अपि च मेधसाता मेधसातौ यज्ञे वाजिनं बलवंतमन्नवंतं वेजनवंतं वा त्वां येऽर्चंति पूजयंति तोके पुत्रे तनये तत्पुत्रे परिष्टिषु परित इष्यमाणेष्वन्येष्वपि फलेष्वहूयेऽस्माकं धने च । एतेषु निमित्तेषु सत्सु त्वामेव स्तुत्यादिभिः पूजयंतीत्यर्थः ॥

स इन्नु रा॒यः सु॒भृ॑तस्य चाकन॒न्मदं॒ यो अ॑स्य॒ रंह्यं॑ चिकेतति ।
त्वावृ॑धो मघवन्दा॒श्वध्व॑रो म॒क्षू स वाजं॑ भरते॒ धना॑ नृ॒भिः ॥४॥
सः। इत्। नु। रा॒यः। सु॒ऽभृ॑तस्य। चा॒क॒न॒त्। मद॑म्। यः। अ॒स्य॒। रंह्य॑म्। चि॒के॒त॒ति॒।
त्वाऽवृ॑धः। म॒घऽव॒न्। दा॒श्वऽअ॑ध्वरः। म॒क्षु। सः। वाज॑म्। भ॒र॒ते॒। धना॑। नृऽभिः॑ ॥४॥

स इत् स एव स्तोता सुभृतस्य सुष्ठु संपादितस्य रायो धनस्य । द्वितीयार्थे षष्ठी । ईदृशं धनं नु क्षिप्रं चाकनत् । कामयते । लभत इत्यर्थः । रंह्यं । रंहो वेगः । तदर्हमस्मेंद्रस्य मदं सोमपानजन्यं हर्षं यः स्तोता चिकेतति स्तुतिपदैर्जानाति । हे मघवन् त्वावृधस्त्वया वर्धितो दाश्वध्वरो दत्तयज्ञो यजमानो नृभिर्नेतृभिर्ऋत्विग्भिर्भूत्वैवा धना धनानि वाजमन्नं च मघु शीघ्रं भरते । संपादयति ॥

त्वं शर्धाय महिना गृणान उरु कृधि मघवञ्छग्धि रायः ।
त्वं नो मित्रो वरुणो न मायी पित्वो न दस्म दयसे विभक्ता ॥५॥
त्वं । शर्धाय । महिना । गृणानः । उरु । कृधि । मघऽवन् । शग्धि । रायः ।
त्वं । नः । मित्रः । वरुणः । न । मायी । पित्वः । न । दस्म । दयसे । विऽभक्ता ॥५॥

हे इंद्र त्वं महिना महता स्तोत्रेण गृणानः स्तूयमानः सञ्शर्धाय शर्धं बलमुरु कृधि । विस्तीर्णं कुरु । हे मघवन् रायो धनानि च शग्धि । अस्मभ्यं प्रयच्छ । हे दस्म दर्शनीयेंद्र विभक्ता विशेषेण धनानां भाजयिता त्वं मित्रो वरुणो न मित्रवद्वरुणवच्च मायी प्रज्ञायुक्तः सन्नोऽस्मभ्यं । नः संप्रत्यर्थे । संप्रति पित्वोऽन्नानि दयसे । प्रयच्छसि ॥ ॥५॥

सुष्वाणास इति पंचर्चं विंशं सूक्तं वैलपुचस्य पृथोरार्षं वैष्टुभमैंद्रं । अनुक्रांतं च । सुष्वाणासः पृथुर्वैन्य इति ॥ गतो विनियोगः ॥

सुष्वाणास इंद्र स्तुमसि त्वा ससवांसश्च तुविनृम्ण वाजं ।
आ नो भर सुवितं यस्य चाकन्मना तना सनुयाम त्वोताः ॥१॥
सुस्वानासः । इंद्र । स्तुमसि । त्वा । ससऽवांसः । च । तुविऽनृम्ण । वाजं ।
आ । नः । भर । सुवितं । यस्य । चाकन् । मना । तना । सनुयाम । त्वाऽऊताः ॥१॥

हे इंद्र सुष्वाणासः सोममभिषुतवंतो वयं त्वां स्तुमसि । स्तुमः । हे तुविनृम्ण बहुधन वाजं चरुपुरोडाशादिलक्षणमन्नं ससवांसः संभक्षयंतश्च वयं त्वां स्तुमः । यत एवमतो हेतोर्नोऽस्मभ्यं सुवितं सुष्ठु प्राप्तव्यं शोभनं धनमा भर । आहर । प्रयच्छ । यद्वा । यस्य यज्ञमतिप्रियत्वेन चाकन् त्वं कामयसे तज्ञमा भरेत्यर्थः । वयं च स्तोतास्त्वया रक्षिताः संतस्तना । धनमात्मेतत् । विस्तृतानि धनानि त्मनात्मना स्वयमेवान्यैरपेक्षणीय सनुयाम । तव प्रसादाल्लभेमहि ॥

क्रुष्वस्त्वमिंद्र शूर जातो दासीर्विशः सूर्येण सह्याः ।
गुहा हितं गुह्यं गूळ्हमप्सु बिभृमसि प्रस्रवणे न सोमं ॥२॥
क्रुष्वः । त्वं । इंद्र । शूर । जातः । दासीः । विशः । सूर्येण । सह्याः ।
गुहा । हितं । गुह्यं । गूळ्हं । अप्ऽसु । बिभृमसि । प्रऽस्रवणे । न । सोमं ॥२॥

हे शूर शौर्यवन्निंद्र क्रुष्वो महान्दर्शनीयो वा त्वं जातो जातमात्र एव दासीः । उपक्षयकारिणो दासा असुराः । तत्संबंधिनीर्विशः प्रजाः सूर्येण सूर्यात्मना सह्याः । अभ्यभवः । तथा गुहा गुहायां हितं निहितं अत एव गुह्यमदृश्यं बलाख्यमसुरमप्सूदकेषु गूढं निगूढं कृत्वाख्यं च त्वमभिभूतवानसि । वयमपि प्रस्रवणे प्रवर्षणे सति । नः संप्रत्यर्थे । संप्रति सोमं बिभृमसि । त्वदर्थं बिभृमः । धारयामः ॥

अर्यो वा गिरो अभ्यर्च विद्वानृषीणां विप्रः सुमतिं चकानः ।
ते स्याम ये रणयंत सोमैरेनोत तुभ्यं रथोळ्ह भक्षैः ॥३॥
अर्यः । वा । गिरः । अभि । अर्च । विद्वान् । ऋषीणां । विप्रः । सुऽमतिं । चकानः ।
ते । स्याम । ये । रणयंत । सोमैः । एना । उत । तुभ्यं । रथऽओळ्ह । भक्षैः ॥३॥

विप्रो मेधाव्यृषीणां मंत्रदर्शिनां सुमतिं सुष्टुतिं चकानः कामयमानो विद्वाञ्जानन्नर्यो वा स्वामी च भवन् हे इंद्र ईदृशस्त्वं गिरः स्तोतॄन् स्तुतीर्वाभ्यर्च । सम्यक्स्तुतमित्यभिपूजय । अपि च ते वयं स्याम भवेम ये सोमैस्त्वां रणयंत रमयंति । उतापि च हे रथोळ्ह रथैरभ्युह्यमान ॥ आ ऊढ ओढः । रथेन ओढो रथोढः । ओमाङोश्च । पा० ६. १. ९५. । इति पररूपं ॥ ईदृशेंद्र भक्षैर्भक्षणीयैश्चरुपुरोडाशादिभिः सार्धमेनेमानि स्तोत्राणि तुभ्यं त्वदर्थं क्रियंते ॥

इमा ब्रह्मेंद्र तुभ्यं शंसि दा नृभ्यो नृणां शूर शवः ।
तेभिर्भव सक्रतुर्येषु चाकन्नुत चायस्व गृणत उत स्तीन् ॥४॥
इमा । ब्रह्म । इंद्र । तुभ्यं । शंसि । दाः । नृऽभ्यः । नृणां । शूर । शवः ।
तेभिः । भव । सऽक्रतुः । येषु । चाकन् । उत । चायस्व । गृणतः । उत । स्तीन् ॥४॥

हे इंद्र त्वदर्थमिमेमानि पुरोवर्तीनि ब्रह्म ब्रह्माणि परिवृढानि स्तोत्राणि शंसि । अशंसिषत । शस्यंते ॥ शंसेश्छांदसे कर्मणि लुडि व्यत्ययेनैकवचनं ॥ हे शूर शौर्यवन्निंद्र त्वं नृणां मनुष्याणां मध्ये नृभ्यः स्तुत्यादेर्नेतृभ्यः शवो बलं दाः । देहि । अपि च तेभिस्तैः सक्रतुः समानकर्मा समानप्रज्ञो वा भव येषु स्तोतृषु चाकन् हविरादि कामयसे ॥ कन दीप्तिकांतिगतिषु । अस्माद्वर्तमानाच्छांदसे लडि सिपि रूपमेतत् । कर्मेवा पूर्ववत् । सिपि मो नो धातोरिति नत्वं ॥ उतापि च गृणतः स्तोतॄंस्त्वायस्व । पालय । उतापि च स्तीन् ॥ स्त्यायतेरेतद्रूपं ॥ संघीभूय स्थितान्यजमानानपि चायस्व ॥

श्रुधी हवमिंद्र शूर पृथ्या उत स्तवसे वेन्यस्यार्कैः ।
आ यस्ते योनिं घृतवंतमस्वारूर्मिर्न निम्नैर्द्रवयंत वक्वाः ॥५॥
श्रुधि । हवं । इंद्र । शूर । पृथ्याः । उत । स्तवसे । वेन्यस्य । अर्कैः ।
आ । यः । ते । योनिं । घृतऽवंतं । अस्वाः । ऊर्मिः । न । निम्नैः । द्रवयंत । वक्वाः ॥५॥

हे शूरेंद्र पृथ्याः पृथोरृषेरमं हवमाह्वानं श्रुधि । शृणु । उतापि च वेन्यस्य वेनपुत्रस्य ममार्कैर्मंत्रैः स्तवसे । स्तूयसे ॥ यकि प्राप्ते व्यत्ययेन शप् ॥ यः स्तोता घृतवंतमुदकवंतं ते तव योनिं निवासभूमिमास्वाः अभ्यस्वार्षीत् अभ्यष्टौत् ॥ स्वृ शब्दोपतापयोः । अस्माल्लुङि तिपि बहुलं छंदसीतीडभावे हल्ङ्यादिलोपे च रात्सस्येति सलोपः ॥ यद्वा । घृतवंतमाज्यादिना हविषोपेतं योनिं । गृहनामैतत् । यज्ञगृहं प्राप्य ते त्वां योऽभिष्टौति तस्य वेन्यस्यार्कैरित्यन्वयः । अपि च वक्वा वक्वानः ॥ वचेरन्येभ्योऽपि दृश्यंत इति वनिप् । अंत्यविकारश्छांदसः । जसि पृषोदरादित्वाद्वर्णलोपः ॥ अन्येऽपि सर्वे स्तोतारो निम्नैः प्रवणैर्मार्गैरूर्मिर्नोदकसंघ इव द्रवयंत । स्तुतिभिस्त्वामेवाभिद्रवंति । अभिगच्छंति ॥ ॥६॥

सविता यंत्रैरिति पंचर्चमेकविंशं सूक्तं हिरण्यस्तूपपुत्रस्यार्चत आर्षं त्रैष्टुभं सवितृदेवत्यं । अनुक्रांतं च । सवितार्चन्हैरण्यस्तूपः सावित्रमिति ॥ गतो विनियोगः ॥

सविता यंचैः पृथिवीमरम्णादस्कंभने सविता द्यामदृंहत् ।
अश्वमिवाधुक्षद्धुनिमंतरिक्षमतूर्तं बर्हः सविता समुद्रं ॥ १॥
सविता । यंचैः । पृथिवीं । अरम्णात् । अस्कंभने । सविता । द्यां । अदृंहत् ।
अश्वंऽइव । अधुक्षत् । धुनिं । अंतरिक्षं । अतूर्तं । बर्हः । सविता । समुद्रं ॥ १॥

सविता सर्वस्य प्रसविता प्रेरको मध्यमस्थानो देवः सोऽयं यंचैर्यमनसाधनैर्वृष्टिप्रदानादिभिरुपायैर्वायवीयैः पाशैर्वा पृथिवीं प्रथितां भूमिमरम्णात् । अरमयत् । सुखेनावस्थापयति । तथा स एव सवितास्कंभने । पतनप्रतिबंधकमालंबनं स्कंभनं । तद्रहिते स्खले द्यां द्युलोकमप्यदृंहत् । दृढीकृतवान् । यथाधो न पतति तथात्मीयैरेवोपायैरवस्थापितवानित्यर्थः । अश्वमिव धुनिं कंपयितव्यं कंपयितारं वांतरिक्षमंतरा द्यांतं मध्यमस्थानगतमतूर्तं केनाप्यहिंसितेऽस्वरमाणे वा नभसि वायवीयैः पाशैर्बर्हः समुद्रं मेघमयमेव सविताधुक्षत् । उदकानि दोग्धि । यद्वा । अंतरिक्षमिति सप्तम्यर्थे प्रथमा । अतूर्तेऽंतरिक्षे बर्हः समुदितारं धुनिं कंपनीयं मेघमश्वमिवाधुक्षत् । सविता क्लेशयति ॥ धुक्ष संदीपनक्लेशनजीवनेषु ॥ यथा शिक्षकोऽश्वं क्लेशयत्येवं वर्षणाय मेघं क्लेशयतीत्यर्थः । अथ निरुक्तं । सविता यंचैः पृथिवीमरमयदंनारंभणेऽंतरिक्षे सविता द्यामदृंहदश्वमिवाधुक्षद्धुनिमंतरिक्षे मेघं बर्हमतूर्ते बर्हमतूर्ण इति वाऽस्वरमाण इति वा सविता समुदितारं । नि० १०. ३२. । इति ॥

यच्चा समुद्रः स्कभितो व्यौनदपां नपात्सविता तस्य वेद ।
अतो भूरत आ उत्थितं रजोऽतो द्यावापृथिवी अप्रथेतां ॥ २॥
यच्च । समुद्रः । स्कभितः । वि । औनत् । अपां । नपात् । सविता । तस्य । वेद ।
अतः । भूः । अतः । आः । उत्थितं । रजः । अतः । द्यावापृथिवी इति । अप्रथेतां ॥ २॥

यच्च यस्मिन्नंतरिक्षे समुद्रः समुंदनशीलो मेघः स्कभितः संभितो वायुपाशैर्बद्धः सन् व्यौनत् विशेषेण भूमिमुनत्ति उद्कैः क्लेदयति ॥ उन्दी क्लेदने । अस्माच्छांदसे लङि रूपमेतत् ॥ हे अपां नपान्मध्यमस्थान वैद्युतापे तव संबंधी सविता प्रेरको देवस्तत्स्थानं वेद । वेत्ति । जानाति । अतोऽस्मादेव सवितुर्भूर्भूमिरासीत् । अत एवोत्थितमूर्ध्वमेव स्थितं रजोऽंतरिक्षमाः । आसीत् । अजायत ॥ अस्तेर्लुङि बर्हलं छंदसीतीडभावः । हल्ङ्याब्भ्य इति लोपः ॥ अतोऽस्मादेव सवितुर्द्यावापृथिवी द्यावापृथिव्यावप्रथेतां । विस्तीर्णे अप्यभूतां ॥

पश्चेदमन्यदभवद्यजत्रममर्त्यस्य भुवनस्य भूना ।
सुपर्णो अंग सवितुर्गरुत्मान्पूर्वो जातः स उ अस्यानु धर्मं ॥ ३॥
पश्चा । इदं । अन्यत् । अभवत् । यजत्रं । अमर्त्यस्य । भुवनस्य । भूना ।
सुऽपर्णः । अंग । सवितुः । गरुत्मान् । पूर्वः । जातः । सः । उं इति । अस्य । अनु । धर्मं ॥ ३॥

अन्यत्सवितृव्यतिरिक्तमिदं देवतांतरं पश्चा पश्चात् ॥ पश्च पश्चा च छंदसि । पा० ५. ३. ३३. । इति निपात्यते ॥ सवितृप्रेरणानंतरमेव यजत्रं यष्टव्यमभवत् । केन साधनेन । अमर्त्यस्य मरणरहितस्य भुवनस्य लोकस्य स्वर्गाख्यस्य संबंधिना भूना भूतेन स्वर्गं उत्पन्नेन सोमेनेत्यर्थः । यद्वा । अमर्त्यस्य भुवनस्य संबंधीदं देवतांतरं भूना भूत्वा बर्हलेन युक्तं यष्टव्यमभवत् । कुत इत्यत आह । हे अंग स्रोतः सुपर्णः शोभनपतनो गरुत्मान्सोमस्यापहर्ता तार्क्ष्यः सवितुः प्रेरकादस्माद्देवात्पूर्वः प्रथममावी सञ्जातः । अतो हेतोः सुपर्णो गरुत्मानस्य सवितुर्धर्म धारणमनुरुत्य वर्तते । सवितृप्रेरणाधीनत्वात्सर्वगतीनां सोमाहरणमपि तदधीनमिति सवितृप्रेरणानंतरमेव सर्वे सोमयागाः प्रवर्तंत इत्यर्थः । उ इति पूरकः ॥

गाव इव ग्रामं यूयुधिरिवाश्वान्वाश्रेव वत्सं सुमना दुहाना ।
पतिरिव जायामभि नो नयेतु धर्ता दिवः सविता विश्ववारः ॥४॥
गावःऽइव। ग्रामं। युयुधिःऽइव। अश्वान्। वाश्राऽइव। वत्सं। सुऽमनाः। दुहानाः।
पतिःऽइव। जायां। अभि। नः। नि। एतु। धर्ता। दिवः। सविता। विश्वऽवारः॥४॥

गाव इव यथारण्ये संचरंतो गावो ग्रामं शीघ्रमभिगच्छंति । युयुधिरिव यथा च युद्धार्थमश्वानभिगच्छति ॥ युध संप्रहारे । आदृगमहनजनेत्यौत्सर्गिकछंदसि । पा० ३. २. १७१. २. । इति वचनात्किन्प्रत्ययः । छांदसं सांहितिकमभ्यासदीर्घत्वं ॥ सुमनाः शोभनमनस्का दुहाना दोग्ध्री वक्रपथस्का वाश्रेव हंभारवात्मकं शब्दं कुर्वती गौर्यथात्मीयं वत्समभिगच्छति । पतिरिव यथा भर्ता जायां स्वभार्यां शीघ्रमभिगच्छति एवमेव सविता नोऽस्मान्प्रत्येतु । नितरामभिगच्छतु । कीदृशः । दिवो द्युलोकस्य धर्ता धारयितावस्थापयिता वा अत एव विश्ववारः सर्वैर्वरणीयः ॥

हिरण्यस्तूपः सवितर्यथा त्वांगिरसो जुह्वे वाजे अस्मिन् ।
एवा त्वार्चन्नवसे वंदमानः सोमस्येवांशुं प्रति जागराहं ॥५॥
हिरण्यऽस्तूपः। सवितः। यथा। त्वा। आंगिरसः। जुह्वे। वाजे। अस्मिन्।
एव। त्वा। अर्चन्। अवसे। वंदमानः। सोमस्यऽइव। अंशुं। प्रति। जागर। अहं॥५॥

हे सवितः प्रेरक त्वा त्वामांगिरसोऽगिरसः पुत्रो हिरण्यस्तूपो मम पिताग्निर्वाजेऽन्ने निमित्तभूते सति यथा जुह्वे आहूतवान् एवेवमर्चन्नेतत्संज्ञोऽहं त्वा त्वामवसेऽवनाय रक्षणार्थं वंदमानः स्तुवन् आह्वयामीति शेषः । आहूय च सोमस्येवांशुं यथा सोमलतां प्रति यजमाना जायति यागपर्यंतं तद्रक्षणे प्रबुद्धा वर्तते तथाहं त्वत्परिचर्यां प्रति जागर । जागर्मि ॥ जागर्तेर्णस्नुत्तमैकवचने रूपं ॥ अत्र निरुक्तं । हिरण्यस्तूपो हिरण्मयस्तूपो हिरण्मयः स्तूपोऽस्येति वा । स्तूपः स्त्यायतेः संघातः । सवितर्यथा त्वांगिरसो जुह्वे वाजेऽन्नेऽस्मिन्नेवं त्वार्चन्नवनाय वंदमानः सोमस्येवांशुं प्रतिजागर्म्यहं । नि० १०. ३३. । इति ॥ ॥७॥

समिद्ध इति पंचर्चं द्वाविंशं सूक्तं वसिष्ठपुत्रस्य मृळीकस्यार्षमाग्नेयं । चतुर्थीपंचम्यावुपरिष्टाज्ज्योतिषी चिद्वादशाष्टकवत्यौ । अचरव्यूहेन चतुर्थी जगती वा । शिष्टा बृहत्यः । तथा चानुक्रांतं । समिद्धो मृळीको वासिष्ठ आग्नेयं बार्हतमंत्ये उपरिष्टाज्ज्योतिषी जगत्युपांत्या वेति ॥ गतो विनियोगः ॥

समिद्धश्चित्समिध्यसे देवेभ्यो हव्यवाहन ।
आदित्यै रुद्रैर्वसुभिर्न आ गहि मृळीकाय न आ गहि ॥१॥
संऽइद्धः। चित्। सं। इध्यसे। देवेभ्यः। हव्यऽवाहन।
आदित्यैः। रुद्रैः। वसुऽभिः। नः। आ। गहि। मृळीकाय। नः। आ। गहि॥१॥

हे हव्यवाहन हव्यानां हविषां वोढरग्ने समिद्धश्चित् संदीप्तोऽपि देवेभ्यो यागार्थं समिध्यसे । पुनरप्यादित्यादिभिः समिद्भिः संदीप्यसे । स त्वमादित्यैरादित्यादिभिस्त्रिभिर्गणैः सार्धं नोऽस्माना गहि । आगच्छ । तथा नोऽस्माकं मृळीकाय सुखाय तदर्थमस्मा गहि । यद्वा । मृळीकायेतत्संज्ञाय नो मह्यमृषये श्रेयांसि कर्तुमागच्छ ॥

इमं यज्ञमिदं वचो जुजुषाण उपागहि ।
मर्तासस्त्वा समिधान हवामहे मृळीकाय हवामहे ॥२॥

इमं । यज्ञं । इदं । वचः । जुजुषाणः । उप ऽआगहि ।
मतीसः । त्वा । सं ऽइधान । हवामहे । मृळीकाय । हवामहे ॥२॥

हे अग्ने इममस्माभिः क्रियमाणं पुरोवर्तिनं यज्ञमिदं वचः स्तोत्रं च जुजुषाणः सेवमान उपागहि । उपागच्छ । हे समिधान समिध्यमान मतीसो मर्ता मनुष्यास्त्वा त्वां हवामहे । आह्वयामहे । मृळीकाय सुखायैतत्संज्ञाय वर्षये त्वामेवाह्वयामहे ॥

त्वामु जातवेदसं विश्ववारं गृणे धिया ।
अग्ने देवाँ आ वह नः प्रियव्रतान्मृळीकाय प्रियव्रतान् ॥३॥
त्वां । ऊं इति । जातऽवेदसं । विश्वऽवारं । गृणे । धिया ।
अग्ने । देवान् । आ । वह । नः । प्रियऽव्रतान् । मृळीकाय । प्रियऽव्रतान् ॥३॥

हे अग्ने विश्ववारं विश्वैः सर्वैर्वरणीयं जातवेदसं जातानां वेदितारं जातप्रज्ञं जातधनं वा त्वामु त्वामेव धिया स्तुत्या गृणे । स्तौमि ॥ गृ शब्दे क्रैयादिकः । ष्वादित्वाद्धस्वः ॥ प्रियव्रतान् प्रियाणि व्रतानि कर्माणि येषां तादृशान्देवान्नोऽस्मदर्थमा वह । आगय । अस्मद्यज्ञं प्रापय । मृळीकाय सुखार्थमेतत्संज्ञाय वा मह्यं प्रियव्रतांस्तानेवावह ॥

अग्निर्देवो देवानामभवत्पुरोहितोऽग्निं मनुष्याऽ ऋषयः समीधिरे ।
अग्निं महो धनसातावहं हुवे मृळीकं धनसातये ॥४॥
अग्निः । देवः । देवानां । अभवत् । पुरः ऽहितः । अग्निं । मनुष्याः । ऋषयः । सं । ईधिरे ।
अग्निं । महः । धनऽसातौ । अहं । हुवे । मृळीकं । धनऽसातये ॥४॥

देवो दानादिगुणयुक्तोऽग्निर्देवानामन्येषां पुरोहितः पुरस्कृतोऽभवत् । यद्वा । पुरोहितवद्धितकार्यभवत् । यत एवमतः कारणात्तमेवाग्निमृषयोऽतीन्द्रियार्थदर्शिनो मनुष्या मानवा यजमानाः समीधिरे । संदीपयंति । अपि च तमग्निं महो महतो धनसातौ धनस्य संभजने निमित्तभूतेऽहं हुवे । आह्वये ॥ विशेषणसापेक्षस्यापि धनशब्दस्य च्छांदसः समासः ॥ यद्वा । महतो यागस्य कर्तारमग्निमित्यर्थः । धनस्य सातये धनलाभार्थं मृळीकं सुखमेतत्संज्ञं वा मां सोऽग्निः करोत्वित्यर्थः ॥

अग्निरत्रिं भरद्वाजं गविष्ठिरं प्रावन्नः कण्वं त्रसदस्युमाहवे ।
अग्निं वसिष्ठो हवते पुरोहितो मृळीकाय पुरोहितः ॥५॥
अग्निः । अत्रिं । भरत्ऽवाजं । गविष्ठिरं । प्र । आवत् । नः । कण्वं । त्रसदस्युं । आऽहवे ।
अग्निं । वसिष्ठः । हवते । पुरः ऽहितः । मृळीकाय । पुरः ऽहितः ॥५॥

अत्रिं भरद्वाजं गविष्ठिरं कण्वं त्रसदस्युं च नोऽस्मानाहवे संग्रामेऽयमग्निः प्रावत् । प्ररक्षतु । पुरोहितः पुरोहितवद्धितकारी मम पिता वसिष्ठ ऋषिरग्निं हवते । स्तुतिभिराह्वयति । स चाह्वतो मृळीकाय सुखार्थमेतत्संज्ञाय वा मह्यं पुरोहितः पुरोधा देवानां पुरःस्थापयिता भवतु ॥ ॥८॥

अद्येति पंचर्चं चतुर्विंशं सूक्तमानुष्टुभं अद्यादेवत्यं । कामगोत्रजा श्रद्धा नामर्षिका । तथा चानुक्रम्यते । अद्यया श्रद्धा कामायनी आद्यमानुष्टुभं त्विति ॥ लैंगिको विनियोगः ॥

श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः ।
श्रद्धां भगस्य मूर्धनि वचसा वेदयामसि ॥१॥
श्रद्धया । अग्निः । सं । इध्यते । श्रद्धया । हूयते । हविः ।
श्रद्धां । भगस्य । मूर्धनि । वचसा । आ । वेदयामसि ॥१॥

पुरुषगतोऽभिलाषविशेषः श्रद्धा । तया श्रद्धयाग्निर्गार्हपत्यादिः समिध्यते । संदीप्यते । यदा हि पुरुषे श्रद्धाग्निगोचर आदरातिशयो जायते तदैष पुरुषोऽमीन्प्रज्वालयति नान्यदा । श्रद्धयैव हविः पुरोडाशादि-हविश्च ह्रयते । आहवनीये प्रक्षिप्यते । यद्वा । अस्य सूक्तस्य द्रष्ट्रा श्रद्धाख्ययाग्निः समिध्यते । श्रद्धासूक्तलक्ष-णायाः श्रद्धाया अभिमानिदेवतां भगस्य भजनीयस्य धनस्य मूर्धनि प्रधानभूते स्थानेऽवस्थितां वचसा वचनेन स्तोत्रेण वेदयामसि । अभितः प्रख्यापयामः ॥ इदंतो मसिः ॥

प्रियं श्रद्धे ददतः प्रियं श्रद्धे दिदासतः । प्रियं भोजेषु यज्वस्विदं म उदितं कृधि ॥२॥
प्रियं । श्रद्धे । ददतः । प्रियं । श्रद्धे । दिदासतः । प्रियं । भोजेषु । यज्वऽसु । इदं । मे ।
उदितं । कृधि ॥२॥

हे श्रद्धे ददतश्चरुपुरोडाशादीनि प्रयच्छतो यजमानस्य प्रियमभीष्टफलं कुरु । दिदासतो दातुमिच्छतश्च हे श्रद्धे प्रियं कुरु । मे मम संबंधिषु भोजेषु भोक्तृषु भोगार्थिषु यज्वसु कृतयज्ञेषु जनेषु चेदमुदितमुक्तं प्रियं कृधि । कुरु ॥

यथा देवा असुरेषु श्रद्धामुग्रेषु चक्रिरे । एवं भोजेषु यज्वस्वस्माकमुदितं कृधि ॥३॥
यथा । देवाः । असुरेषु । श्रद्धां । उग्रेषु । चक्रिरे । एवं । भोजेषु । यज्वऽसु । अस्माकं ।
उदितं । कृधि ॥३॥

देवा इंद्रादयोऽसुरेषूत्कृष्टबलेषु यथा श्रद्धां चक्रिरे अवश्यमिमे हंतव्या इत्यादरातिशयं कृतवंतः एवं श्रद्धावत्सु भोजेषु भोक्तृषु भोगार्थिषु यज्वसु यष्टृष्वस्माकमस्मत्संबंधिषु तेषूदितं तैरुक्तं प्रार्थितं फलजातं कृधि । कुरु ॥

श्रद्धां देवा यजमाना वायुगोपा उपासते ।
श्रद्धां हृदय्यया कृत्या श्रद्धया विंदते वसु ॥४॥
श्रद्धां । देवाः । यजमानाः । वायुऽगोपाः । उप । आसते ।
श्रद्धां । हृदय्यया । आऽकूत्या । श्रद्धया । विंदते । वसु ॥४॥

देवा यजमाना मनुष्याश्च वायुगोपा वायुर्गोपा रक्षिता येषां ते तादृशाः संतः श्रद्धां देवीमुपासते । प्रार्थयंते । हृदय्यया । हृदये भवा हृदय्या । तथाविधयाकूत्या संकल्परूपया क्रियया श्रद्धामेव परिचरंति सर्वे जनाः । कुत इत्यत आह । यतः कारणाच्छ्रद्धया हेतुभूतया वसु धनं विंदते लभते श्रद्धावाञ्जनः । तत इत्यर्थः ॥

श्रद्धां प्रातर्हवामहे श्रद्धां मध्यंदिनं परि ।
श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद्धापयेह नः ॥५॥

अ॒द्धां । प्रा॒तः । ह॒वा॒म॒हे॒ । अ॒द्धां । म॒ध्यं॒दि॒नं । परि॑ ।
अ॒द्धां । सूर्य॑स्य । नि॒ऽमुचि॑ । अ॒द्धे । अ॒त् । धा॒प॒य॒ । इ॒ह । नः॒ ॥५॥

अद्धां देवीं प्रातः पूर्वाह्णे हवामहे । तथा मध्यंदिनं परि ॥ लक्षणे परेः कर्मप्रवचनीयत्वं ॥ मध्यंदिनं परिलक्ष्य । मध्यंदिन इत्यर्थः । मध्याह्नेऽपि तां श्रद्धामाहूयामहे । सूर्यस्य सर्वस्य प्रेरकस्यादित्यस्य निमुच्यस्तमयवेलायां सायंसमयेऽपि तामेव श्रद्धामाहूयामहे । ईदृग्रूपे हे श्रद्धे नोऽस्मानिह लोके कर्मणि वा श्रद्धापय । श्रद्धावतः कुरु ॥ ॥९॥ ॥११॥

द्वादशेऽनुवाके चत्वारिंशत्सूक्तानि । तत्र शास इत्येति पंचर्चं प्रथमं सूक्तं शासनाम्न आर्षमानुष्टुभमैंद्रं । अनुक्रांतं च । शासः शासो भारद्वाज इति ॥ युद्धाय संनद्धं राजानमनेनेत्येत । तथा च सूचितं । अथैनमन्वीत्येताप्रतिरथशाससौपर्णैः । आ० गृ० ३. १२. १३. । इति ॥

शा॒स इ॒त्था म॒हाँ अ॑सय॒मिच॑खा॒दो अ॒द्भु॑तः ।
न यस्य॑ ह॒न्यते॒ सखा॒ न जी॑यते॒ कदा॑ च॒न ॥१॥
शा॒सः । इ॒त्था । म॒हान् । अ॒सि॒ । अ॒मि॒च॒ऽखा॒दः । अ॒द्भु॑तः ।
न । यस्य॑ । ह॒न्यते॑ । सखा॑ । न । जी॒य॒ते॒ । कदा॑ । च॒न ॥१॥

शासस्तत्संज्ञोऽहमित्येत्यमनेन वक्ष्यमाणप्रकारेणेंद्रं स्तौमीति शेषः । हे इंद्र त्वं महाँ असि । सर्वेभ्योऽधिको भवसि । अमिचखादोऽमित्राणां शत्रूणां खादिता विनाशयिता अत एवाद्भुत आश्चर्यभूतश्च भवसीति । यस्येंद्रस्य सखा मित्रभूतः पुरुषः कदा चन कदाचिदपि न हन्यते न हिंस्यते न जीयते न च शत्रुभिः पराजितो भवति स त्वं महाँ असीत्यन्वयः ॥

स्व॒स्ति॒दा वि॒शस्पति॑र्वृ॒त्र॒हा वि॑मृ॒धो व॒शी ।
वृषेंद्रः॑ पु॒र ए॑तु नः सोम॒पा अ॑भयं॒क॒रः ॥२॥
स्व॒स्ति॒ऽदाः । वि॒शः । पतिः॑ । वृ॒त्र॒ऽहा । वि॒ऽमृधः॑ । व॒शी ।
वृषा॑ । इंद्रः॑ । पु॒रः । ए॒तु॒ । नः॒ । सो॒म॒ऽपाः । अ॒भ॒यं॒ऽक॒रः ॥२॥

स्वस्तिदाः स्वस्तेरविनाशस्य दाता विशस्पतिः सर्वस्याः प्रजायाः पालयिता वृत्रहा वृत्राणां शत्रूणां हंता विमृधः संग्रामकारी वशी वशीकर्ता वृषा वर्षिता कामानां सोमपाः सोमस्य पाता एवंविध इंद्रोऽभयंकरोऽभयस्य भयराहित्यस्य कर्ता सन्नोऽस्माकं पुर एतु । पुरतो गच्छतु ॥

वि रक्षो॒ वि मृधो॑ जहि॒ वि वृ॒चस्य॒ हनू॑ रुज ।
वि म॒न्युमि॑ंद्र वृत्रहन्नमित्र॑स्याभि॒दास॑तः ॥३॥
वि । रक्षः॑ । वि । मृधः॑ । ज॒हि॒ । वि । वृ॒चस्य॑ । हनू॒ इति॑ । रु॒ज॒ ।
वि । म॒न्यु॑म् । इंद्र॑ । वृ॒त्र॒ऽह॒न् । अ॒मित्र॑स्य । अ॒भि॒ऽदास॑तः ॥३॥

हे इंद्र रक्षो राक्षसजातं वि जहि । विनाशय । मृधः संग्रामकारिणः शत्रूँश्च वि जहि । वृचस्यावरकस्यासुरस्य हनू कपोलप्रांतौ वि रुज । विशेषेण भग्नौ कुरु । हे वृत्रहन्निंद्र अभिदासतोऽस्मानुपक्षयतो मित्रस्य शत्रोर्मन्युं क्रोधमपि विनाशय ॥

वि न इंद्रेति वैमृधस्य हविषोऽनुवाक्या । सूचितं च । वि न इंद्र मृधो जहि मृगो न भीमः कुचरो गिरिष्ठाः । आ० २. १०. । इति ॥

वि नं इंद्र मृधो जहि नीचा यच्छ पृतन्यतः ।
यो अस्माँ अभिदासत्यधरं गमया तमः ॥४॥
वि । नः । इंद्र । मृधः । जहि । नीचा । यच्छ । पृतन्यतः ।
यः । अस्मान् । अभिऽदासति । अधरं । गमय । तमः ॥४॥

हे इंद्र नोऽस्माकं मृधः संग्रामकारिणः शत्रून्वि जहि । विनाशय । तथा पृतन्यतः पृतनाः सेना आत्मन इच्छतो युयुत्समानानपि नीचा यच्छ । नीचीनमवाङ्मुखं यच्छ । गमय । यः शत्रुरस्मानभिदासति अभित उपक्षपयति तमधरं निकृष्टं तमोऽधकारं मरणलक्षणं गमय । प्रापय ॥

अपेंद्र द्विषतो मनोऽप जिज्यासतो वधं ।
वि मन्योः शर्म यच्छ वरीयो यवया वधं ॥५॥
अप । इंद्र । द्विषतः । मनः । अप । जिज्यासतः । वधं ।
वि । मन्योः । शर्म । यच्छ । वरीयः । यवय । वधं ॥५॥

हे इंद्र द्विषतो द्वेष्टुः शत्रोर्मनोऽप जहि । जिज्यासतोऽस्माकं वयोहानिमिच्छतस्य वधं हननसाधनमायुधं चाप जहि । मन्योः शत्रुसंबंधिनः क्रोधास्त्रास्त्राच्च । वरीय उरुतरं शर्म सुखं विशेषेण यच्छ । देहि । वधं शत्रुकृतं हननं च यवय । अस्मत्तः पृथक्कुरु ॥ ॥१०॥

ईंखयंतीरिति पंचर्चं गायत्रमिंद्रं द्वितीयं सूक्तं । देवानां स्वरूपभूता इंद्रमातरो नामर्षिकाः । तथा चानुक्रांतं । ईंखयंतीर्देवजामय इंद्रमातरो गायत्रमिति ॥ द्वितीये पर्याये प्रशास्तुः शस्त्र इदं सूक्तं । सूचितं च । ईंखयंतीरहं दां पाता सुतं । आ० ६. ४. । इति ॥ महाव्रतेऽपि प्रातःसवनिके ब्रह्मशस्त्र एतत्सूक्तं ॥

ईंखयंतीरपस्युव इंद्रं जातमुपासते । भेजानासः सुवीर्यं ॥१॥
ईंखयंतीः । अपस्युवः । इंद्रं । जातं । उप । आसते । भेजानासः । सुऽवीर्यं ॥१॥

ईंखयंतीर्गच्छंत्यः स्तुत्यादिभिरिंद्रं प्राप्नुवत्योऽपस्युवोऽपः कर्मात्मन इच्छंत्य इंद्रमातरोऽस्य सूक्तस्य द्रष्ट्र्यो जातं प्रादुर्भूतमिंद्रमुपासते । परिचरंति । सुवीर्यं शोभनवीर्योपेतं धनं च भेजानासः । तस्मादिंद्रात्संभक्तवत्यो भवंति ॥

त्वमिंद्र बलादधि सहसो जात ओजसः । त्वं वृषन्वृषेदसि ॥२॥
त्वं । इंद्र । बलात् । अधि । सहसः । जातः । ओजसः । त्वं । वृषन् । वृषा । इत् ।
असि ॥२॥

हे इंद्र त्वं सहसः परेषामभिभावुकाद्बलादधि जातोऽसि । अधिः पंचम्यर्थानुवादकः । वृषादिवधहेतुभूताद्बलाज्जितोस्त्वं प्रख्यातो भवसीत्यर्थः । अपि चौजसः । ओजो नाम बलहेतु हृदयगतं धैर्यं । तस्मादपि त्वं जातोऽसि । हे वृषन्वर्षितः त्वं वृषेदसि । कामानां वर्षितैव भवसि ॥

त्वमिंद्रासि वृत्रहा व्यंतरिक्षमतिरः । उद्द्यामस्तभ्ना ओजसा ॥३॥
त्वं । इंद्र । असि । वृत्रऽहा । वि । अंतरिक्षं । अतिरः । उत् । द्यां । अस्तभ्नाः ।
ओजसा ॥३॥

हे इंद्र त्वं वृत्रहासि । शत्रूणां हंता भवसि । अंतरिक्षं मध्यमस्थानं च व्यतिरः । आवारकापनोदनेन प्रावर्धयः । द्यां द्युलोकं चौजसा बलेनोदस्तभ्नाः । ऊर्ध्वमस्तंभीः । यथाधो न पतति तथोपर्यवस्थापितवानित्यर्थः ॥

त्वमिंद्र सजोषसमर्कं बिभर्षि बाह्वोः । वज्रं शिशान ओजसा ॥४॥
त्वं । इंद्र । सऽजोषसं । अर्कं । बिभर्षि । बाह्वोः । वज्रं । शिशानः । ओजसा ॥४॥

हे इंद्र त्वं सजोषसं सह प्रीयमाणमर्कं स्तुत्यं वज्रमात्मीयमायुधमोजसा बलेन शिशानो निश्चंस्तीक्ष्णीकुर्वन्बाह्वोर्हस्तयोर्बिभर्षि । धारयसि शत्रूणां वधार्थं ॥

त्वमिंद्राभिभूरसि विश्वा जातान्योजसा । स विश्वा भुव आभवः ॥५॥
त्वं । इंद्र । अभिऽभूः । असि । विश्वा । जातानि । ओजसा । सः । विश्वाः । भुवः । आ । अभवः ॥५॥

हे इंद्र त्वं विश्वा सर्वाणि जातानि जनिमंति भूतान्योजसा बलेनाभिभूरभिभविता भवसि । तथा स तादृशस्त्वं विश्वा भुवः सर्वा भूमीः प्राप्नव्यानि सर्वाण्यपि स्थानान्याभवः । अभितः प्राप्नोः ॥ भू प्राप्तौ ॥ ॥११॥

सोम इति पंचर्चं तृतीयं सूक्तमानुष्टुभं । विवस्वतो दुहिता यम्यृषिः । म्रियमाणानां यजमानादीनां वर्तनमत्र प्रतिपाद्यते । अतस्तद्देवताकमिदं । तथा चानुक्रांतं । सोमो यमी भाववृत्तमानुष्टुभं स्विति ॥ प्रेतोपस्थान एतत्सूक्तं । सूचितं च । सोम एकेभ्य उरूणसावसुतृपा उदुंबली । आ० ६. १०. । इति ॥

सोम एकेभ्यः पवते घृतमेक उपासते ।
येभ्यो मधु प्रधावति तांश्चिदेवापि गच्छतात् ॥१॥
सोमः । एकेभ्यः । पवते । घृतं । एकें । उप । आसते ।
येभ्यः । मधु । प्रऽधावति । तान् । चित् । एव । अपि । गच्छतात् ॥१॥

एकेभ्यः केभ्यश्चित्पितृभ्यः सोमः पवते । उपभोगाय कुल्यारूपेण प्रवहति । एषां गोत्रजाः सामानि ब्रह्मयज्ञसमयेऽधीयते । श्रूयते हि । यत्सामानि सोम एभ्यः पवत इति । एकेऽन्ये पितरो घृतमाज्यमुपासते । उपगच्छंति । उपभुंजत इत्यर्थः । एषां पुत्रादयो यजूंषि ब्रह्मयज्ञकालेऽधीयते । श्रुतिश्च भवति । यद्यजूंषि घृतस्य कुल्या इति । येभ्यः पितृभ्यः । तादर्थ्ये चतुर्थी । उपभोगार्थं मधु सौद्रं प्रधावति प्रवाहरूपेण शीघ्रं गच्छति । य आथर्वणाश्चांगिरसश्च ब्रह्मयज्ञार्थमधीयते तेषां पितृभ्यधुकुल्या प्रवहति । तथा चाम्नायते । यदाथर्वणांगिरसो मधोः कुल्या इति । तांश्चिदेव तान्पूर्वोक्तान्सर्वानेव हे प्रेत त्वं प्रत्यपि गच्छतात् । अपिगच्छ । प्राप्नुहि ॥

तपसा ये अनाधृष्यास्तपसा ये स्वर्ययुः ।
तपो ये चक्रिरे महस्तांश्चिदेवापि गच्छतात् ॥२॥
तपसा । ये । अनाधृष्याः । तपसा । ये । स्वः । ययुः ।
तपः । ये । चक्रिरे । महः । तान् । चित् । एव । अपि । गच्छतात् ॥२॥

ये जनास्तपसा कृच्छ्रचांद्रायणादिना युक्ताः संतोऽनाधृष्याः पापैरप्रधृष्या भवंति । ये च तपसा यागादिरूपेण साधनेन स्वर्ययुः स्वर्गं यांति प्राप्नुवंति । ये च महो महत्तपोऽन्यैर्दुष्करं राजसूयाश्वमेधादिकं हिरण्यगर्भोपासनं वा चक्रिरे कुर्वंति एतेषु प्रवर्तंते तेषु लोकेषु । तांश्चित्तानेव तपस्विनो हे प्रेत अपिगच्छ ॥

ये युध्यंते प्रधनेषु शूरासो ये तनूत्यजः ।
ये वा सहस्रदक्षिणास्तांश्चिदेवापि गच्छतात् ॥३॥
ये । युध्यंते । प्रऽधनेषु । शूरासः । ये । तनूऽत्यजः ।
ये । वा । सहस्रऽदक्षिणाः । तान् । चित् । एव । अपि । गच्छतात् ॥३॥

प्रधनेषु । प्रकीर्णान्यस्मिन्धनानि भवंतीति प्रधनाः संग्रामाः । तेषु शूरासः शौर्यवंतो ये युध्यंते शत्रून्संप्रहरंति । ये च तनूत्यजः शरीराणां तत्र त्यक्तारो भवंति । ये वा ये च सहस्रदक्षिणाः सहस्रदक्षिणाञ्क्रतूननुष्ठितवंतः । तान्सर्वानेव त्वमपिगच्छ । येषूत्तमेषु लोकेषु ते निवसंति तं लोकं प्राप्नुहीत्यर्थः ॥

ये चित्पूर्वं ऋतसाप ऋतावान ऋतावृधः ।
पितॄन्तपस्वतो यम तांश्चिदेवापि गच्छतात् ॥४॥
ये । चित् । पूर्वे । ऋतऽसापः । ऋतऽवानः । ऋतऽवृधः ।
पितॄन् । तपस्वतः । यम । तान् । चित् । एव । अपि । गच्छतात् ॥४॥

ये चिद्ये च पूर्वे पूर्वपुरुषा ऋतसाप ऋतं सत्यं यज्ञं वा सृगंतः अत एवर्तवान ऋतेन युक्ता ऋतवृध ऋतस्य वर्धकाश्च भवंति तपस्वतस्तपसा युक्तांस्तानेव पितॄन् हे यम नियत त्वमपिगच्छ ॥

सहस्रणीथाः कवयो ये गोपायंति सूर्यं ।
ऋषीन्तपस्वतो यम तपोजाँ अपि गच्छतात् ॥५॥
सहस्रऽनीथाः । कवयः । ये । गोपायंति । सूर्यं ।
ऋषीन् । तपस्वतः । यम । तपःऽजान् । अपि । गच्छतात् ॥५॥

सहस्रनीथाः सहस्रनयनाः कवयः क्रांतदर्शिनो ये सूर्यममुमादित्यं गोपायंति रक्षंति तपस्वतस्तपसा युक्तांस्तपोजांस्तपसः सकाशादेवोत्पन्नांस्तानृषीन् हे यम नियत त्वमपिगच्छ ॥ ॥१२॥

अरायीति पंचर्चं चतुर्थं सूक्तं भरद्वाजपुत्रस्य शिरिंबिठस्यार्षमानुष्टुभं । अपहोमादिभिरिदं सूक्तमश्रीनाशकरं । तचाद्योपांत्ययोस्तादृग्रोऽर्थ एव देवता । द्वितीयातृतीये ब्राह्मणस्त्ये । पंचमी वैश्वदेवी । अनुक्रम्यते हि । अरायि शिरिंबिठो भारद्वाजोऽलक्ष्मीघ्नं द्वितीयातृतीये ब्राह्मणस्त्ये अंत्या वैश्वदेवीति ॥ गतो विनियोगः ॥

अरायि काणे विकटे गिरिं गच्छ सदान्वे ।
शिरिंबिठस्य सत्वभिस्तेभिष्ट्वा चातयामसि ॥१॥
अरायि । काणे । विऽकटे । गिरिं । गच्छ । सदान्वे ।
शिरिंबिठस्य । सत्वऽभिः । तेभिः । त्वा । चातयामसि ॥१॥

हे अरायदायिनि दानविरोधिनि हे काणे कुत्सितशब्दकारिणि कुत्सितदर्शने वा हे विकटे विकृतगमने विकृतांगे वा हे सदान्वे सदानोनुवे सर्वदाक्रोशकारिणि दुर्भिक्षादिदेवते गिरिं पर्वतं निर्जनदेशं गच्छ । अस्मान्मा बाधिष्ठाः । शिरिंबिठस्य । बिठमंतरिक्षं । शीर्यते बिठेऽंतरिक्ष इति शिरिंबिठो मेघः । तस्य सत्वभिरंतर्वर्तमानैरुदकैस्तेभिस्त्वा त्वां चातयामसि । चातयामः । विनाशयामः । यद्वा । शिरिंबिठस्येत-

त्संज्ञकस्य भरद्वाजपुत्रस्य तेभिस्तैरनुष्ठितैः सत्यैः कर्मभिर्हे अलक्ष्मि त्वां विनाशयामः । इतस्त्वमेव शीघ्रं गिरिं गच्छ ॥

चत्तो इतश्चत्तामुतः सर्वा भूणान्यारुषी ।
अराय्यं ब्रह्मणस्पते तीक्ष्णशृंगोदृषन्निहि ॥२॥
चत्तो इति । इतः । चत्ता । अमुतः । सर्वा । भूणानि । आरुषी ।
अराय्यं । ब्रह्मणः । पते । तीक्ष्णऽशृंग । उत्ऽऋषन् । इहि ॥२॥

सालक्ष्मीरितोऽस्मात्लोकाच्चत्तो चत्तैवास्माभिर्नाशितैवामुतोऽमुष्मादपि लोकाच्चत्ता हिंसिता भवतु । यालक्ष्मीः सर्वा सर्वाणि भूणानि गर्भजातानि सर्वासामोषधीनामंकुराणि या दुर्भिक्षाधिदेवतारूपाहंत्री भवति अराय्यं दानविरोधिनीं तां हे ब्रह्मणस्पते मंत्रपालयितर्देव हे तीक्ष्णशृंग तीक्ष्णतेजस्क उद्गृषन्नस्मात्स्थानादुन्नमयन्निहि । गच्छ ॥

अदो यद्दारु प्लवते सिंधोः पारे अपूरुषं । तदा रभस्व दुर्हणो तेन गच्छ परस्तरं ॥३॥
अदः । यत् । दारु । प्लवते । सिंधोः । पारे । अपुरुषं । तत् । आ । रभस्व । दुर्हनो इति
दुःऽहनो । तेन । गच्छ । परःऽतरं ॥३॥

अदो विप्रकृष्टदेशे वर्तमानमपूरुषं निर्माता पुरुषेण रहितं यद्दारु दारुमयं पुरुषोत्तमाख्यं देवताशरीरं सिंधोः पारे समुद्रतीरे प्लवते जलस्योपरि वर्तते तद्दारु हे दुर्हणो दुःखेन हननीय केनापि हंतुमशक्य हे स्रोतः आ रभस्व । आलंबस्व । उपास्स्वेत्यर्थः । तेन दारुमयेन देवेनोपास्यमानेन परस्तरमतिशयेन तरणीयमुत्कृष्टं वैष्णवं लोकं गच्छ ॥ अपर आह । हे दुर्हणो दुःखेन हननीये दुष्टहनुयुक्ते वा हे अलक्ष्मि सिंधोः परि समुद्रतीरप्रांतेऽपूरुषं पुरुषैर्जनैर्वियुक्तमदोऽस्मात्तो दूरे देशे वर्तमानं यद्दारु दारुमयी नौः प्लवते तद्दार्वा रभस्व । परिगृहाण । गृहीत्वा च तेन दारुणा परस्तरमतिशयेन तरणीयं ब्रह्मणस्पतिना प्रेरिता सती द्वीपांतरं गच्छ ॥

षष्ठेऽहनि तृतीयसवने ब्राह्मणाच्छंसिशस्त्रे यद्व प्राचीरित्येषा । सूचितं च । कपुत्रको यद्व प्राचीरजगंतेति चैते । आ० ८. ३. । इति ॥

यद्व प्राचीरजगंतोरो मंडूरधाणिकीः । हता इंद्रस्य शत्रवः सर्वे बुबुदयाशवः ॥४॥
यत् । ह । प्राचीः । अजगंत । उरः । मंडूरऽधाणिकीः । हताः । इंद्रस्य । शत्रवः । सर्वे ।
बुबुदऽयाशवः ॥४॥

हे मंडूरधाणिकीर्मंडूरवत्कुत्सितशब्दकारिण्यो मंदनस्य धनस्य धारयित्र्यो वालक्ष्म्यः उरः ॥ उर्वी हिंसार्थः । अस्मात्क्विपि राल्लोप इति वलोपः । ततो जसि रूपमेतत् ॥ हिंसित्र्यो यूयं प्राचीः प्रकर्षेणांचंत्यः प्रकृष्टगमनाः सत्यो यद्व यदा खल्वजगंत अगच्छत ॥ गमेर्लेङि मध्यमबहुवचने छांदसः शपः लुः । तप्तनप्तनथनाश्चेति तस्य तनबादेशः । अत एव ङित्त्वाभावादनुनासिकलोपो न भवति ॥ तदानीमेव सर्वे इंद्रस्य शत्रवो बुबुदयाशवः । यांति गच्छंतीति याः । अशुवत इत्याशवः । याश्च ता आशवश्च याशवः । बुबुदवद्यातारो व्यापनशीलाश्च संतो हता नष्टा आसन् ॥

परीमे गामनेषत पर्यग्निमहृषत । देवेष्वक्रत श्रवः क इमाँ आ दधर्षति ॥५॥
परि । इमे । गां । अनेषत । परि । अग्निं । अहृषत । देवेषु । अक्रत । श्रवः । कः ।
इमान् । आ । दधर्षति ॥५॥

इमे विश्वे देवा गां। आत्मभिप्रायमेवचनं। पणिभिरपहृताः सर्वा देवगवीः पर्यनेषत। पर्यनयन्। यष्टृनंगिरसः परिप्रापयन्। ततोऽग्निं च पर्यग्रहयत। परितो व्यहरन्। यागार्थं तत्र तत्र गार्हपत्यादिरूपेण स्थापितवंत इत्यर्थः। एवं कृत्वा देवेषु यष्टव्येष्विंद्रादिषु अवोऽन्नमक्रत। अकृषत। कः शत्रुरसुरादिरिमान्विश्वान्देवान्दधर्षति। अभिभवितुं शक्नोति। न कश्चिदित्यर्थः॥ ॥१३॥

अग्निं हिन्वंतु न इति पंचर्चं पंचमं सूक्तमग्निपुत्रस्य केतुनाम्न आर्षं गायत्रमाग्नेयं। तथा चानुक्रांतं। अग्निं केतुरामेय आग्नेयं गायत्रमिति॥ प्रातरनुवाकाश्विनशस्त्रयोर्गायत्रे छंदसीदं शस्त्रं। सूचितं च। अग्निं हिन्वंतु नः प्राग्नेये वाचमिति सूत्रे। आ० ४. १३.। इति॥

अग्निं हिन्वंतु नो धियः सप्तिमाशुमिवाजिषु। तेन जेष्म धनंधनं॥१॥

अग्निं। हिन्वंतु। नः। धियः। सप्तिं। आशुंऽइव। आजिषु। तेन। जेष्म। धनंऽधनं॥१॥

नोऽस्माकं धियः कर्माणि स्तुतयो वाग्निं हिन्वंतु। प्रेरयंतु। यागार्थमुद्योजयंतु वर्धयंतु वा॥ हि गतौ वृद्धौ च॥ तत्र दृष्टांतः। आजिषु संग्रामेष्वाशुमिव यथाशुं शीघ्रगामिनं सप्तिं सर्पणशीलमश्वं योद्धारः प्रेरयंति तद्वत्। तेनाग्निना धनंधनं सर्वं धनं जेष्म। वयं जयेम॥

यया गा आकरामहे सेनयाग्ने तवोत्या। तां नो हिन्व मघत्तये॥२॥

यया। गाः। आऽकरामहे। सेनया। अग्ने। तव। ऊत्या। तां। नः। हिन्व। मघत्तये॥२॥

हे अग्ने सेनयेनेव सह वर्तमानया सेनारूपया वा यया तवोत्या रक्षया गा आकरामहे आभिमुख्येन कुर्महे। लभामह इत्यर्थः। तामूतिं नोऽस्मान्हिन्व। गमय। किमर्थं। मघत्तये धनस्य दानार्थं। अस्माकं धनलाभायेत्यर्थः॥

आभिशस्तिवीक्ष्वेषु प्रशास्तुः शस्त्र आग्ने स्थूरमिति तृचो वैकल्पिकोऽनुरूपः। सूचितं च। आ ते वत्सो मनो यमदाग्ने स्थूरं रयिं भर। आ० ७. ८.। इति॥

आग्ने स्थूरं रयिं भर पृथुं गोमंतमश्विनं। अङ्धि खं वर्तया पणिं॥३॥

आ। अग्ने। स्थूरं। रयिं। भर। पृथुं। गोऽमंतं। अश्विनं। अङ्धि। खं। वर्तय। पणिं॥३॥

हे अग्ने स्थूरं स्थूलं वृद्धं पृथुं विस्तीर्णं गोमंतं गोभिर्युक्तमश्विनमश्वोपेतं रयिं धनमा भर। अस्मभ्यमाहर। प्रयच्छ। खमंतरिक्षमङ्धि। वृष्युदकैः सिंच। यद्वा। आत्मीयैस्तेजोभिर्व्याप्नुहि। प्रकाशय। पणिं वणिजमदातारमसुरं वा वर्तय। इतो निर्गमय। यद्वा। दाने प्रवर्तय॥

अग्ने नक्षत्रमजरमा सूर्यं रोहयो दिवि। दधज्ज्योतिर्जनेभ्यः॥४॥

अग्ने। नक्षत्रं। अजरं। आ। सूर्यं। रोहयः। दिवि। दधत्। ज्योतिः। जनेभ्यः॥४॥

हे अग्ने नक्षत्रं। नक्षति सततं गच्छतीति नक्षत्रः॥ क्षि गतौ। अभिनक्षीत्यादिनात्रन्प्रत्ययः॥ सततं गंतारमजरं जरारहितं सूर्यं सर्वस्य प्रेरकमादित्यं दिव्यंतरिक्ष आ रोहयः। उपर्यवस्थितवानसि। यद्वा। नक्षत्रं कृत्तिकादिकं सूर्यं च दिव्यारोहयः। किं कुर्वन्। जनेभ्यः सर्वेभ्यः प्राणिभ्यो व्यवहारार्थं ज्योतिः प्रकाशं दधद्दधत् कुर्वन्। यथा सर्वेषां प्रकाशो भवति तथोन्नते देशे सूर्यमगमय इत्यर्थः॥

अग्ने केतुर्विशामसि प्रेष्ठः श्रेष्ठ उपस्थसत्। बोधा स्तोचे वयो दधत्॥५॥

अग्ने। केतुः। विशां। असि। प्रेष्ठः। श्रेष्ठः। उपस्थऽसत्। बोध। स्तोचे। वयः। दधत्॥५॥

हे अग्ने विशां प्रजानां यजमानानां केतुः केतयितासि । ज्ञापयिता भवसि । अत एव प्रेष्ठः प्रियतमः श्रेष्ठः प्रशस्ततमश्च भवसि । स त्वमुपस्थसदुपस्थाने यज्ञगृहे निषीदन्बोध । अस्मदीयं स्तोत्रमवगच्छ । किं कुर्वन् । स्तोत्रे सुवते जनाय वयोऽन्नं दधद्विदधत् कुर्वन् प्रयच्छन् ॥ ॥१४॥

इमा नु कमिति पंचर्चं षष्ठं सूक्तमग्न्यपूचस्य भुवनस्यार्षं भुवनपूचस्य साधनसंज्ञस्य वा वैश्वदेवं । सर्वा द्विपदास्त्रिष्टुभः । तथा चानुक्रांतं । इमा नु भुवन आग्न्यः साधनो वा भौवनो वैश्वदेवं द्विपदं वैष्टुभमिति ॥ दशरात्रस्य द्वितीये छंदोमे वैश्वदेवशस्त्रे वैश्वदेवाग्निविज्ञानात्पूर्वमिदं शंसनीयं । सूचितं च । आ याहि वनसेमा नु कं वभ्रुरेक इति द्विपदासूक्तानि । आ० ८. ७. । इति ॥ षष्ठेऽहनि तृतीये सवने ब्राह्मणाच्छंसिन उक्थ्यशस्त्र आग्नसूचः स्तोत्रियः । ततो द्वे अनुरूपार्धे । सूचितं च । ब्राह्मणाच्छंसिन इमा नु कं भुवना सीषधामेति पंच । आ० ८. ३. । इति ॥

इमा नु कं भुवना सीषधामेंद्रश्च विश्वे च देवाः ॥१॥
इमा । नु । कं । भुवना । सीसधाम । इंद्रः । च । विश्वे । च । देवाः ॥१॥

इमेमानि प्रवृच्यमानानि भुवना भुवनानि नु क्षिप्रं सीषधाम । साधयामः । वशीकुर्मः । कमिति पूरकः । यद्वा । इमानि सर्वाणि भूतजातान्यस्मभ्यं कं सुखं सीषधाम । साधयंतु ॥ पुरुषव्यत्ययः ॥ इंद्रश्च विश्वे सर्वेऽन्ये देवाश्च सुत्या प्रीता इममर्थं साधयंतु ॥

यज्ञं च नस्तन्वं च प्रजां चादित्यैरिंद्रः सह चीकॢपाति ॥२॥
यज्ञं । च । नः । तन्वं । च । प्रऽजां । च । आदित्यैः । इंद्रः । सह । चीकॢपाति ॥२॥

नोऽस्माकं यज्ञं ज्योतिष्टोमादिकं यागं तन्वं शरीरं च प्रजां पुत्रादिकां चादित्यैरदितिपुत्रैरन्यैर्देवैः सह वर्तमान इंद्रश्चीकॢपाति । कल्पयतु । यज्ञादिकं स्वव्यापारसमर्थं करोतु ॥

आदित्यैरिंद्रः सगणो मरुद्भिरस्माकं भूत्वविता तनूनां ॥३॥
आदित्यैः । इंद्रः । सऽगणः । मरुत्ऽभिः । अस्माकं । भूतु । अविता । तनूनां ॥३॥

आदित्यैरदितिपुत्रैर्मित्रादिभिर्मरुद्भिश्च सगणः सहित इंद्रोऽस्माकं तनूनां शरीराणां तनयानां वाविता भूतु । रक्षिता भवतु ॥

हत्वाय देवा असुरान्यदायन्देवा देवत्वमभिरक्षमाणाः ॥४॥
हत्वाय । देवाः । असुरान् । यत् । आयन् । देवाः । देवऽत्वं । अभिऽरक्षमाणाः ॥४॥

देवा इंद्रादयोऽसुरान्वेषणवृत्रादीन्हत्वाय हत्वा विनाश्य यद्यदायन् आगच्छन् स्वकीयं स्थानं प्रापुवन् तदानीं ते देवा देवत्वमात्मीयममृतत्वमभिरक्षमाणा अभितः सर्वतो रक्षंतोऽभूवन् । बाधकाभावात्सर्वत्र प्रख्यापितवंत इत्यर्थः ॥

प्रत्यंचमर्कमनयञ्छचीभिरादित्स्वधामिषिरां पर्यपश्यन् ॥५॥
प्रत्यंचं । अर्कं । अनयन् । शचीभिः । आत् । इत् । स्वधां । इषिरां । परि । अपश्यन् ॥५॥

शचीभिः कर्मभिः परिचरणात्मकैः साधनमर्कमर्चनसाधनं स्तोत्रं प्रत्यंचमिंद्रादीन्प्रत्यंचदनयन् । स्तोतारः प्रापयन् । यदैवं आदिदनंतरमेवेषिरां गमनशीलां स्वधां वृष्ट्युदकं पर्यपश्यन् । सर्वे जनाः परितः पश्यंति । यद्वा । इषिरामेषणीयां स्वधां । अन्ननामैतत् । हविर्लक्षणमन्नं सर्वे देवाः परिपश्यंति ॥ ॥१५॥

सूर्य इति पंचर्चं सप्तमं सूक्तं सूर्यपुत्रस्य चक्षुःसंज्ञस्यार्षं सूर्यदेवत्यं गायत्रं । तथा चानुक्रांतं । सूर्यो नश्चक्षुः सौर्यः सौर्यं गायत्रमिति ॥ आश्विनशस्त्रे सूर्योदयादुत्तरकाले सौर्यकांड इदं सूक्तं । सूचितं च । सूर्यो नो दिव उदु त्यं जातवेदसमिति नव । आ० ६. ५.। इति ॥ दर्शपूर्णमासयोः सुगादापनात्पूर्वभाविनि जपे सूर्यो न इत्यृषिः । सूचितं च । सूर्यो नो दिवस्पातु नमो महद्भ्यो नमो अर्भकेभ्यः । आ० १. ४.। इति ॥

सूर्यो नो दिवस्पातु वातो अंतरिक्षात् । अग्निर्नः पार्थिवेभ्यः ॥१॥
सूर्यः । नः । दिवः । पातु । वातः । अंतरिक्षात् । अग्निः । नः । पार्थिवेभ्यः ॥१॥

सूर्यः सर्वस्य प्रेरकः शोभनीयो वा देवो दिवो द्युलोकाद्द्युलोकवर्तिनो जनान्नोऽस्मान्पातु । रक्षतु । वातो वायुश्चांतरिक्षान्मध्यमस्थानगताद्वाधकादस्मान्रक्षतु । तथा पृथिवीस्थानोऽग्निश्च पार्थिवेभ्यः पृथिव्यां वर्तमानेभ्यः शत्रुभ्यो नोऽस्मान्रक्षतु ॥

जोषा सवितर्यस्य ते हरः शतं सवाँ अर्हति । पाहि नो दिद्युतः पतंत्याः ॥२॥
जोष । सवितः । यस्य । ते । हरः । शतं । सवान् । अर्हति । पाहि । नः । दिद्युतः । पतंत्याः ॥२॥

हे सवितः सर्वस्य प्रेरक सूर्य जोष । अस्मत्सुत्यादिकं सेवस्व । यस्य ते तव हरो रसहरणशीलं तेजः शतं सवाम्बहून्यन्नान्यत्यर्हति योग्यं भवति । यद्वा । प्रकाशनादिद्वारा पूजयति । स त्वं नोऽस्मान्पतंत्या निपतंत्याः शत्रुभिरस्मासु क्षिप्यमाणाया दिद्युतः । वज्रनामैतत् । द्योतमानायाः शक्तिरायुधात्पाहि । रक्ष ॥

चक्षुर्नो देवः सविता चक्षुर्न उत पर्वतः । चक्षुर्धाता दधातु नः ॥३॥
चक्षुः । नः । देवः । सविता । चक्षुः । नः । उत । पर्वतः । चक्षुः । धाता । दधातु । नः ॥३॥

सविता प्रेरको देवो नोऽस्माकं चक्षुः प्रकाशकमिंद्रियमिंद्रियानुग्राहकं तेजो वा दधातु । उतापि च पर्वत इंद्रसहचरः पर्वताख्योऽपि देवो नोऽस्माकं चक्षुर्दधातु । धाता सर्वस्य विधातादित्यानामन्यतमश्च नोऽस्माकं चक्षुर्विदधातु ॥

चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनूभ्यः । सं चेदं वि च पश्येम ॥४॥
चक्षुः । नः । धेहि । चक्षुषे । चक्षुः । विऽख्यै । तनूभ्यः । सं । च । इदं । वि । च । पश्येम ॥४॥

नोऽस्माकं चक्षुषे रूपोपलब्धिकारणायेंद्रियाय चक्षुः प्रकाशकं तदानुग्राहकं तेजो हे सूर्य धेहि । विधेहि । कुरु । यद्वा ॥ न इति व्यत्ययेन बहुवचनं ॥ चक्षुषे चक्षुःसंज्ञाय नो मह्यं चक्षुरिंद्रियं वा तेजो वा हे सूर्य धेहि । प्रयच्छ । तनूभ्योऽस्माकं शरीरेभ्यस्तनयेभ्यो वा विख्यै विख्यानाय प्रकाशनाय चक्षुस्त्वदीयं प्रकाशं विधेहि । यत एवं तस्मात्कारणात्त्वदीयेन तेजसा वयं चेदं सर्वं जगत्सं पश्येम । सम्यग्द्रष्टारो भवेम । वि पश्येम च । विविधं च सविशेषं द्रष्टारो भवेम ॥

सुसंदृशं त्वा वयं प्रति पश्येम सूर्य । वि पश्येम नृचक्षसः ॥५॥
सुऽसंदृशं । त्वा । वयं । प्रति । पश्येम । सूर्य । वि । पश्येम । नृऽचक्षसः ॥५॥

हे सूर्य सुसंदृशं सुष्ठु संद्रष्टारं त्वा त्वां वयं प्रति पश्येम । प्रत्येकं द्रष्टारो भूयास्म । तथा नृचक्षसो

नृभिर्मनुष्यैरस्माभिर्द्रष्टव्यान्पदार्थान्वि पश्येम। विद्रष्टारो भवेम। यद्वा। नृचक्षसो नृणां शत्रुमनुष्याणां हिंसकाः संतो वयं विशिष्टज्ञाना भवेम ॥ ॥१६॥

उदसाविति षड्ऋचमष्टमं सूक्तमानुष्टुभं। पुलोमतनया शची स्वात्मानमनेनास्तौत्। अतः सैवर्षिः सैव देवता। तथा चानुक्रांतं। उदसौ षट् पौलोमी शच्यात्मानं तुष्टावानुष्टुभमिति ॥ विनियोगो लिंगादवगंतव्यः ॥ आपस्तंबस्तु सपत्नीनाशने सूर्योपस्थान इदं सूक्तं विनियुक्तवान्। सूच्यते हि। एतेनैव कामेनोत्तरेणानुवाकेन सदादित्यमुपतिष्ठते। आप० गृ० ९. ९.। इति। अथैतेनेति प्रकृतं सपत्नीबाधनं परामृश्यते ॥

उदसौ सूर्यो अगादुदयं मामको भगः।
अहं तद्विद्वला पतिमभ्यसाक्षि विषासहिः ॥१॥
उत्। असौ। सूर्यः। अगात्। उत्। अयं। मामकः। भगः।
अहं। तत्। विद्वला। पतिं। अभि। असाक्षि। विऽससहिः ॥१॥

असौ द्युलोकस्थः सूर्य उदगात्। उदयं प्राप्तवान्। मामको मदीयो भगो भजनीयोऽयमिंद्रश्च सूर्यात्मनोदगात्। यद्वा। मामको भगो मदीयमिदं सौभाग्यमुदगात्। तदुद्यतं सूर्यस्य तेजो विद्वला ज्ञातवती यद्वा पतिं भर्तारं विद्वला लब्धवत्यहं विषासहिर्विशेषेणाभिभवित्री सत्यभ्यसाक्षि। अभ्यभूवं। सपत्नीरिति शेषः ॥ सहतेरभिभवार्थस्य लुङ्यीतद्रूपं ॥ यद्वा। विषासहिः सपत्नीनामभिभवित्री सती पतिमभ्यसाक्षि। भर्तारमभ्यभूवं। यथा मय्येव वशीकृतस्थिरं वर्तते तथाकार्षमित्यर्थः ॥

अहं केतुरहं मूर्धाहमुग्रा विवाचनी। ममेदनु क्रतुं पतिः सेहानाया उपाचरेत् ॥२॥
अहं। केतुः। अहं। मूर्धा। अहं। उग्रा। विऽवाचनी। मम। इत्। अनु। क्रतुं।
पतिः। सेहानायाः। उपऽआचरेत् ॥२॥

अहं केतुः केतयित्री सर्वस्य ज्ञात्री भवामि। अहं मूर्धा सर्वेष्ववयवेषु शिर इव प्रधानभूता च भवामि। अहमुग्रोद्गूर्णा सती विवाचनी विशेषेण पतिं वाचयित्री भवामि। क्रोधाविष्टमपि पतिं मयि सर्वदा प्रियवचनयुक्तं करोमीत्यर्थः। सेहानायाः सपत्नीनामभिभवित्र्या ममेन्ममैव क्रतुं कर्म बुद्धिं वानुलक्ष्य पतिः पालयिता भर्तोपाचरेत्। उपागच्छेत्। नान्यासां पत्नीनां ॥

मम पुत्राः शत्रुहणोऽथो मे दुहिता विराट्।
उताहमस्मि संजया पत्यौ मे श्लोक उत्तमः ॥३॥
मम। पुत्राः। शत्रुऽहनः। अथो इति। मे। दुहिता। विऽराट्।
उत। अहं। अस्मि। संऽजया। पत्यौ। मे। श्लोकः। उत्ऽतमः ॥३॥

ममैव पुत्रास्तनयाः शत्रुहणः शत्रूणां सपत्नानां हंतारो भवंति। अथो अपि च मे मदीया दुहिता पुत्री विराड्विशेषेण राजमाना भवति। उतापि चाहं संजया सम्यग्जेत्री सपत्नीनामस्मि। ता अभिभवामि। अतो हेतोः पत्यौ भर्तरींद्रे मे मम श्लोक उपश्लोकनीयं यश उत्तम उन्नततममतिशयेनोत्कृष्टं विद्यते ॥

येनेंद्रो हविषा कृत्व्यभवद्द्युम्न्युत्तमः। इदं तदक्रि देवा असपत्ना किलाभुवं ॥४॥
येन। इंद्रः। हविषा। कृत्वी। अभवत्। द्युम्नी। उत्ऽतमः। इदं। तत्। अक्रि। देवाः।
असपत्ना। किल। अभुवं ॥४॥

येन हविषेंद्रो मम भर्ता ह्वल्वी कर्मणां कर्ताभवत् भवति। तथा युक्ष्वी। युक्तं योतमानं यशोऽन्नं वा। तद्वाशुक्तम उत्कृष्टतमञ्च येन हविषा भवति। हे देवाः स्तोतार ऋत्विजः तदिदं हविरक्रि। अकारि। अर्थाभिर्भवद्भिः क्रियतां। यद्वा। हे यष्टव्या देवाः तदिदं हविरक्र्यहमपि॥ करोतेर्लुङीटि मंचे घसेति च्लेर्लुक्॥ अत एव कारणादहमसपत्ना किल शत्रुरहिता खल्वभुवं। अभूवं॥ छांदसो ह्रस्वः॥

असपत्ना सपत्नघ्नी जयंत्यभिभूवरी।
आवृक्षमन्यासां वर्चो राधो अस्थेयसामिव ॥५॥
असपत्ना। सपत्नऽघ्नी। जयंती। अभिऽभूवरी।
आ। अवृक्षं। अन्यासां। वर्चः। राधः। अस्थेयसांऽइव ॥५॥

असपत्नाशत्रुका भवामि। कुत इत्यत आह। सपत्नघ्नी शत्रूणां हंत्री अत एव जयंती जयं प्राप्नुवत्यभिभूवर्यभिभवित्री॥ भवतेरन्येभ्योऽपि दृश्यंत इति क्वनिप्। वनो र चेति ङीत्रेफौ॥ ईदृशमहमन्यासां सपत्नीनां वर्चस्तेजो राधो धनं चावृक्षं। आ समंतादवृक्षं। अवृश्चिषं। अच्छिदं॥ व्रश्चेर्लुङ्यृदित्त्वादिडभावे संयोगादिलोपे छांदसं संप्रसारणं॥ तत्र दृष्टांतः। अस्थेयसामिवास्थिरतराणां शत्रूणां यथा धनमप्रयत्नेन वृश्च्यते तथेत्यर्थः॥ स्थिरशब्दादीयसुनि प्रियस्थिरेत्यादिना स्थादेशः॥

समजैषमिमा अहं सपत्नीरभिभूवरी।
यथाहमस्य वीरस्य विराजानि जनस्य च ॥६॥
सं। अजैषं। इमाः। अहं। सऽपत्नीः। अभिऽभूवरी।
यथा। अहं। अस्य। वीरस्य। विऽराजानि। जनस्य। च ॥६॥

अभिभूवर्यभिभवित्र्यहमिमाः सपत्नीः समजैषं। सम्यगभ्यभूवं। यथा येन प्रकारेणाहमस्य वीरस्येंद्रस्य तदीयपरिजनस्य च विराजानि विशेषेण राजमाना भवानि। तथा समजैषमित्यर्थः॥ ॥१७॥

तीव्रस्येति पंचर्चं नवमं सूक्तं वैश्वामित्रस्य पूरणस्यार्षं त्रैष्टुभमैंद्रं। तथा चानुक्रांतं। तीव्रस्य पंच पूरणो वैश्वामित्र इति॥ तीव्रसोमाख्य एकाह इदं निष्केवल्यनिविद्धागं। सूचितं च। क्रत्व वीरस्तीव्रस्याभिवयस इति मध्यंदिनः। आ० ९. ७.। इति॥ महाव्रतेऽपि माध्यंदिने सवने ब्रह्मणस्त्रेऽप्येतत्सूक्तं। तथैव पंचमारण्यके सूचितं। तीव्रस्याभिवयसो अस्य पाहीति माध्यंदिने। ऐ० आ० ५. १. १.। इति॥

तीव्रस्याभिवयसो अस्य पाहि सर्वरथा वि हरी इह मुंच।
इंद्र मा त्वा यजमानासो अन्ये नि रीरमन्तुभ्यमिमे सुतासः ॥१॥
तीव्रस्य। अभिऽवयसः। अस्य। पाहि। सर्वऽरथा। वि। हरी इति। इह। मुंच।
इंद्र। मा। त्वा। यजमानासः। अन्ये। नि। रीरमन्। तुभ्यं। इमे। सुतासः ॥१॥

तीव्रस्य तीक्ष्णस्य क्षिप्रमदकरस्याभिवयसः। वय इत्यन्ननाम। अभिगतं चतुष्पुरोडाशाद्यन्नं यस्य तादृशस्यास्य सोमस्य॥ क्रियायाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी॥ ईदृशं सोमं हे इंद्र पाहि। पिब॥ पिबतेश्छांदसः शपो लुक्॥ तदर्थं सर्वरथा सरणशीलरथौ हरी अश्वाविहास्मिन्यज्ञगृहे वि मुंच। रथादियुक्तं। हे इंद्र अस्मत्तोऽन्ये यजमानासो यजमानास्त्वा त्वां मा नि रीरमन्। नितरां मा रमयंतु। वयमेव रमयाम इत्यर्थः। ततस्तुभ्यं त्वदर्थमेव सुतासः सुता अभिषुता इमे प्रत्यक्षेणोपलभ्यमानाः सोमा वर्तंते॥

तुभ्यं सुतास्तुभ्यमु सोत्वासस्त्वां गिरः श्वाघ्या आ ह्वयंति ।
इंद्रेदमद्य सवनं जुषाणो विश्वस्य विद्वाँ इह पाहि सोमं ॥२॥
तुभ्यं । सुताः । तुभ्यं । ऊं इति । सोत्वासः । त्वां । गिरः । श्वाघ्याः । आ । ह्वयंति ।
इंद्र । इदं । अद्य । सवनं । जुषाणः । विश्वस्य । विद्वान् । इह । पाहि । सोमं ॥२॥

हे इंद्र तुभ्यं त्वदर्थमेव सुता अभिषुताः सर्वे सोमाः सोत्वास इतःपरमभिषोतव्याश्च तुभ्यमु त्वदर्थमेव ॥ सुनोतेः क्तत्वार्थे तवैकेनिति त्वन्प्रत्ययः ॥ श्वाघ्याः शु आशु शीघ्रमतंत्यः प्रवर्तमाना गिरः स्तुतिरूपा वाचश्च त्वामेवा ह्वयंति । आक्रोशयंति । हे इंद्र अद्यास्मिन्काल इदं सवनं प्रातःसवनादिकं जुषाणः सेवमानो विश्वस्य सर्वस्य विद्वान्ज्ञाता त्वमिहास्मिन्यज्ञे सोमं पाहि । पिब ॥

य उशता मनसा सोममस्मै सर्वहृदा देवकामः सुनोति ।
न गा इंद्रस्तस्य परा ददाति प्रशस्तमिच्चारुमस्मै कृणोति ॥३॥
यः । उशता । मनसा । सोमं । अस्मै । सर्वऽहृदा । देवऽकामः । सुनोति ।
न । गाः । इंद्रः । तस्य । परा । ददाति । प्रऽशस्तं । इत् । चारुं । अस्मै । कृणोति ॥३॥

य उशता कामयमानेन सर्वहृदा । सर्वमविकलं हृदयं यस्य । यद्वा । सर्वेषामृत्विजां हृदयेन । सामर्थ्यान्म-त्वर्थो लक्ष्यते । हृदयवता मनसास्मा इंद्राय देवकामो देवमिंद्रं कामयमानो यजमानः सोमं सुनोति अभिषु-णोति । इंद्रस्तस्य यजमानस्य गा न परा ददाति । परादानं विनाशः । न विनाशयति । अस्मै यजमानाय चारुं शोभनं अत एव प्रशस्तं । इदित्यवधारणे । प्रशंसनीयमेव धनं कृणोति । करोति ॥

अनुस्पष्टो भवत्येषो अस्य यो अस्मै रेवान्न सुनोति सोमं ।
निररत्नौ मघवा तं दधाति ब्रह्मद्विषो हंत्यनानुदिष्टः ॥४॥
अनुऽस्पष्टः । भवति । एषः । अस्य । यः । अस्मै । रेवान् । न । सुनोति । सोमं ।
निः । अरत्नौ । मघऽवा । तं । दधाति । ब्रह्मऽद्विषः । हंति । अननुऽदिष्टः ॥४॥

अस्य यजमानस्यैष इंद्रोऽनुस्पष्टो दृष्टिगोचरो भवति यो रेवान्धनवानस्मा इंद्राय सोमं सुनोति अभिषु-णोति । मघवा धनोपेत इंद्रस्तं यजमानमरत्नौ हस्ते निर्दधाति भयान्निक्षेप्य धारयति रक्षिता सन् धृत्वा चानुदिष्टस्यानानुक्तोऽप्रार्थित एव सन्ब्रह्मद्विषो ब्राह्मणद्वेष्टॄन्शत्रून्हंति । हिनस्ति ॥

शुनासीरीये पर्वणींद्राय शुनासीराय पुरोडाशं द्वादशकपालमित्यस्याश्वायंत इत्येषा याज्या । इंद्रो वा शुन इति वैकल्पिकस्यापि हविष इयमेव याज्या । सूचितं च । अश्वायंतो गव्यंतो वाजयंतः शुनं कृवेम मघवा-नमिंद्रं । आ० २. २०. । इति ॥

अश्वायंतो गव्यंतो वाजयंतो हवामहे त्वोपगंतवा उ ।
आभूषंतस्ते सुमतौ नवायां वयमिंद्र त्वा शुनं हुवेम ॥५॥
अश्वऽयंतः । गव्यंतः । वाजयंतः । हवामहे । त्वा । उपऽगंतवै । ऊं इति ।
आऽभूषंतः । ते । सुऽमतौ । नवायां । वयं । इंद्र । त्वा । शुनं । हुवेम ॥५॥

अश्वायंतोऽश्वानिच्छंतः ॥ क्याच्छ्वाधस्यात् । पा० ७. ४. ३७. । इत्यात्वं ॥ गव्यंतो गा आत्मन इच्छंतः ॥ वांतो

यि प्रत्यय इत्ववादेशः ॥ वाजयंतोऽन्नीच्छाजनेन सूपादिना प्रज्वलयंतः ॥ वा गतिगंधनयोः । णिचि वो विधूनने । पा० ७. ३. ३८. । इति जुगागमः । अस्माच्छतर्यदुपदेशाच्छसार्वधातुकस्वरेणानुदात्तत्वे शपश्च पित्त्वादनुदात्तत्वे ततो णिच एव स्वरः शिष्यते ॥ अपर आह । वाजमन्नमात्मन इच्छंत इति । तदानीमवयहाभावस्वरौ छांदसौ द्रष्टव्यौ । एवंभूता वयं हे इंद्र त्वामुपगंतवा उपगंतुं प्राप्तुं हवामहे । आह्वयामहे ॥ गमेसुमर्थे सेसेनिति तवैप्रत्ययः । गतिसमासे तवै चांतश्च युगपदिति गतेः प्रकृतिस्वरत्वमुत्तरपदस्यांतोदात्तत्वं ॥ उ इति पूरकः । हे इंद्र ते तव नवायामभिनवायां प्रशस्तायां सुमतौ शोभनबुद्धावाभूषंत आ समंताद्भवंतो वर्तमानाः । यद्वा । आ समंताद्भूषयंतोऽलंकुर्वंतस्त्वावानुग्रहबुद्धौ वर्तमाना वयं सुखं सुखकरं त्वां कृवेम । आह्वयेम ॥ ॥ १८ ॥

मुंचामीति पंचर्चं दशमं सूक्तं प्रजापतिपुत्रस्य यक्ष्मनाशनाख्यस्यार्षं । अंत्यानुष्टुप् शिष्टास्त्रिष्टुभः । अनादेशो लिंद्रो देवता । तथा चानुक्रांतं । मुंचामि प्राजापत्यो यक्ष्मनाशनो राजयक्ष्मघ्नमंत्यानुष्टुबिति ॥ हृदयरोगप्रमुखस्य व्याधिजातस्योपशमनार्थमनेन सूक्तेन होतव्यं । सूच्यते हि । व्याधितस्यातुरस्य यक्ष्मगृहीतस्य वा षष्ठाकृतिस्थस्मुंचामि त्वा हविषा जीवनाय कमित्येतेन । आ० गृ० ३. ६. ४. । इति ॥

मुंचामि॑ त्वा ह॒विषा॒ जीव॑नाय॒ कम॑ज्ञातयक्ष्मादु॒त रा॑जयक्ष्मात् ।
याहि॑र्ज॒ग्राह॒ यदि॑ वै॒तदे॑नं॒ तस्या॑ इंद्राग्नी॒ प्र मु॑मुक्तमेनं ॥ १॥
मुंचामि॑ । त्वा॒ । ह॒विषा॑ । जीव॑नाय । क॑म् । अज्ञा॑तऽयक्ष्मात् । उ॒त । रा॒ज॒ऽय॒क्ष्मात् ।
याहिः॑ । ज॒ग्राह॑ । यदि॑ । वा॒ । ए॒त॒त् । ए॒न॑म् । तस्याः॑ । इं॒द्रा॒ग्नी॒ इति॑ । प्र । मु॒मु॒क्त॒म् । ए॒न॑म् ॥ १॥

हे यक्ष्माभिभूत हविषानेन चरुणा साधनेन होमेन त्वा त्वामज्ञातयक्ष्मात् । अयमेतत्संज्ञ इत्यप्रज्ञातः शरीरगतो रोगोऽज्ञातयक्ष्मः । तादृशाद्रोगान्मुंचामि । विश्लेषयामि । किमर्थं । जीवनाय कं जीवनार्थं । इह लोके चिरकालावस्थानार्थमित्यर्थः । कमिति पूरकः । उतापि च राजयक्ष्मात् । यक्ष्माणां राजा यक्ष्मरोगो राजयक्ष्मः ॥ राजदंतादिस्वादुपसर्जनस्य परनिपातः । पा० २. २. ३१. ॥ तस्मादपि त्वां मुंचामि । यदि वा यदि चैतदेतस्मिन्समय एनं व्याधितं पुरुषं याहिर्यहणशीला ग्रहरूपा देवता जग्राह गृहीतवती तस्या देवतायाः सकाशाद्धे इंद्राग्नी एनं प्र मुमुक्तं । प्रमोचयतं ॥

यदि॑ क्षि॒तायु॒र्यदि॑ वा॒ पर॑ेतो॒ यदि॑ मृ॒त्योर॑ंति॒कं नी॑त॒ एव॑ ।
तमा ह॑रामि॒ निर्ऋ॑तेरु॒पस्था॒दस्पार्षमेनं॒ श॒तशा॑रदाय ॥ २॥
यदि॑ । क्षि॒तऽआ॑युः । यदि॑ । वा॒ । परा॑ऽइतः । यदि॑ । मृ॒त्योः । अं॒ति॒कं । नि॒ऽई॒तः । ए॒व ।
तं । आ । ह॒रा॒मि॒ । निः॒ऽऋ॒तेः॒ । उ॒पऽस्था॑त् । अस्पा॑र्षं । ए॒न॑म् । श॒तऽशा॑रदाय ॥ २॥

यदि स रोगग्रस्तः क्षितायुः क्षीणायुर्भवति यदि वा परेतोऽस्माल्लोकात्परागतो भवति यदि च मृत्योर्वैवस्वतस्यांतिकं निकटं नीतो नितरां प्राप्त एव भवति एवंभूतमपि तं पुरुषं निर्ऋतेः पापदेवताया आयुषः क्षयकारिण्या उपस्थादुपस्थानादहं हरामि । आनाययामि । आवर्तयामि । आहृत्य चैनं शतशारदाय शतसंवत्सरजीवनार्थमस्पार्षं । प्रबलं करोमि ॥ सृ प्रीतिबलनयोः ॥

सह॑स्रा॒क्षेण॑ श॒तशा॑रदेन श॒तायु॑षा ह॒विषाहार्ष॒मेनं॑ ।
श॒तं यथे॒मं श॒रदो॒ नया॑तीं॒द्रो विश्व॑स्य दुरि॒तस्य॑ पा॒रं ॥ ३॥
सह॑स्रऽअक्षेण । श॒तऽशा॑रदेन । श॒तऽआ॑युषा । ह॒विषा॑ । आ । अ॒हा॒र्ष॒ । ए॒न॑म् ।
श॒तं । यथा॑ । इ॒मं । श॒रदः॑ । नया॑ति । इं॒द्रः॑ । विश्व॑स्य । दुः॒ऽइ॒तस्य॑ । पा॒रं ॥ ३॥

सहस्रमिति बहुनाम । सहस्रमक्षीणि चक्षूंषि यस्य हविषः फलत्वेन विद्यंते तत्सहस्राक्षं ॥ बहुव्रीहौ सक्थ्यक्ष्णोरिति षच् समासांतः ॥ शरदः संबंधी शारदः संवत्सरः । शतं शारदा यस्य तत्तथोक्तं ॥ बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥ अत एव शतायुषा शतसंवत्सरपरिमितमायुर्जीवनं फलभूतं यस्य तादृशेन हविषा । यद्वा । सहस्राक्ष इंद्रः । तेन शतशारदेन शरदां संवत्सराणां शतस्य दातृत्वेन संबंधिना कर्त्रा शतायुषा हविषा करणभूतेन । एनं यज्ञगृहीतमाहार्षं । रोगादनेनं । यथा चैन प्रकारेणेमं पुरुषं शतं शरदः संवत्सरान् ॥ अत्यंतसंयोगे द्वितीया ॥ एतावंतं कालमिंद्रो विश्वस्य सर्वस्य दुरितस्य दुःखस्य पारमवसानं दुःखराहित्यं नयाति नयेत् तथाहार्षमित्यर्थः ॥

शतं जीव शरदो वर्धमानः शतं हेमंताञ्छतमु वसंतान् ।
शतमिंद्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः ॥४॥
शतं । जीव । शरदः । वर्धमानः । शतं । हेमंतान् । शतं । ऊं इति । वसंतान् ।
शतं । इंद्राग्नी इति । सविता । बृहस्पतिः । शतऽआयुषा । हविषा । इमं । पुनः । दुः ॥४॥

हे यज्ञादिसुकृत वर्धमानोऽहरहरभिवृद्धिं प्राप्नुवंस्त्वं शतं शरदः शतसंख्याकाञ्शरदृतूञ्जीव । प्राणान्धारय ॥ पूर्ववदत्यंतसंयोगे द्वितीया ॥ शतं हेमंतान् हेमंतर्तूंश्च जीव शतं वसंतांश्च । उशब्दः समुच्चये । अपि चेंद्राग्नी इंद्रश्चाग्निश्च सविता प्रेरको देवश्च बृहस्पतिर्बृहतां देवानां पालयिता देवश्च शतायुषा शतसंवत्सरपरिमितस्यायुषो हेतुभूतेन हविषा तर्पयमाणाः संत इमं जनं पुनर्दुः । पुनरस्मभ्यं प्रादुः ॥

आहार्षं त्वाविदं त्वा पुनरागाः पुनर्नव ।
सर्वांग् सर्वं ते चक्षुः सर्वमायुश्च तेऽविदं ॥५॥
आ । अहार्षं । त्वा । अविदं । त्वा । पुनः । आ । अगाः । पुनःऽनव ।
सर्वंऽअंग । सर्वं । ते । चक्षुः । सर्वं । आयुः । च । ते । अविदं ॥५॥

हे व्याधिगृहीत त्वा त्वामाहार्षं । मृत्योः सकाशादाहृतवानस्मि । अत एव त्वा त्वामविदं । अलभि । हे पुनर्नव पुनरभिनव पुनरागाः । पुनरस्मत्समीपमागच्छ । हे सर्वांग सर्वैरविकलैरंगैरुपेत ते तव सर्वं चक्षुः । उपलक्षणमेतत् । इंद्रियवर्गं सकलमविदं । लब्धवानस्मि । ते तवायुर्जीवनं च सर्वं संपूर्णमविदं ॥ ॥१९॥

ब्रह्मणाग्निरिति षडृचमेकादशं सूक्तमानुष्टुभं । ब्रह्मपुत्रो रक्षोहा नामर्षिः । अपप्रसवसमाधानरूपस्य गर्भरक्षणस्य प्रतिपाद्यत्वात्तद्देवताकमिदं । अनुक्रांतं च । ब्रह्मणा षड् ब्राह्मो रक्षोहा गर्भसंस्रावे प्रायश्चित्तमानुष्टुभं होति ॥ विनियोगो लिंगादवगंतव्यः ॥

ब्रह्मणाग्निः संविदानो रक्षोहा बाधतामितः ।
अमीवा यस्ते गर्भं दुर्णामा योनिमाशये ॥१॥
ब्रह्मणा । अग्निः । संऽविदानः । रक्षःऽहा । बाधतां । इतः ।
अमीवा । यः । ते । गर्भं । दुःऽनामा । योनिं । आऽशये ॥१॥

ब्रह्मणा मंत्रेण सह संविदानः ऐकमत्यं प्राप्तो रक्षोहा रक्षसां हंताग्निरितोऽस्मात्स्थानाद्राक्षसादिकं बाधतां । हिनस्तु । यो राक्षसोऽमीवा रोगरूपः संस्ते तव गर्भमाशये आश्रिते ॥ ओपश आत्मनेपदेष्विति तलोपः ॥ हंतुं प्राप्नोति । दुर्नामार्त्याख्यो रोगः । तद्रूपः सन् यश्च ते तव योनिं रेतस आधानं गर्भस्थानमाश्रिते तं बाधतामित्यन्वयः ॥

यस्ते गर्भममीवा दुर्णामा योनिमाशये ।
अग्निष्टं ब्रह्मणा सह निष्क्रव्यादमनीनशत् ॥२॥
यः । ते । गर्भं । अमीवा । दुःऽनामा । योनिं । आऽशये ।
अग्निः । तं । ब्रह्मणा । सह । निः । क्रव्यऽअदं । अनीनशत् ॥२॥

गतः पूर्वोऽर्धर्चः । तं क्रव्यादं मांसाशिनं राक्षसादिकं ब्रह्मणा सहितोऽग्निर्निःशेषणानीनशत् । नाशयतु ॥

यस्ते हंति पतयंतं निषत्स्नुं यः सरीसृपं ।
जातं यस्ते जिघांसति तमितो नाशयामसि ॥३॥
यः । ते । हंति । पतयंतं । निऽसत्स्नुं । यः । सरीसृपं ।
जातं । यः । ते । जिघांसति । तं । इतः । नाशयामसि ॥३॥

हे योषित् ते तव गर्भाशये पतयंतं पततं रेतोरूपेण गच्छंतं तदनंतरं तत्र निषत्स्नुं निषीदंतं च गर्भं यो राक्षसादिर्हंति हिनस्ति ततो मासत्रयादूर्ध्वं प्राप्तसर्वावयवं सरीसृपं सर्पणशीलं च गर्भं यो हंति जातं दशसु मासेषूत्पन्नं ते तव शिशुं यो राक्षसादिर्जिघांसति हंतुमिच्छति तमितः स्थानान्नाशयामसि । नाशयामः ॥

यस्ते ऊरू विहरत्यंतरा दंपती शये ।
योनिं यो अंतरारेळ्हि तमितो नाशयामसि ॥४॥
यः । ते । ऊरू इति । विऽहरति । अंतरा । दंपती इति दंऽपती । शये ।
योनिं । यः । अंतः । आऽरेळ्हि । तं । इतः । नाशयामसि ॥४॥

हे योषित् ते तवोरू पादमूलौ यो राक्षसादिर्विहरति गर्भघाताय विश्लिष्टौ करोति दंपती अंतरा जायापत्योर्मध्ये गर्भहननार्थं यश्च शये शेते यश्च योनिमंतः प्रविश्यारेळ्हि निषिक्तं रेतो जिह्वयास्वादयति । भक्षयतीत्यर्थः ॥ लिह आस्वादने आदादिकः । कपिलकादित्वाल्लत्वविकल्पः ॥ तं सर्वमितो नाशयामः ॥

यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा निपद्यते ।
प्रजां यस्ते जिघांसति तमितो नाशयामसि ॥५॥
यः । त्वा । भ्राता । पतिः । भूत्वा । जारः । भूत्वा । निऽपद्यते ।
प्रऽजां । यः । ते । जिघांसति । तं । इतः । नाशयामसि ॥५॥

हे योषित् यो राक्षसो भ्राता भ्रातृरूपो भूत्वा पतिर्भर्तृरूपो वा भूत्वा त्वां निपद्यते अभिगच्छति । अथवा जार उपपतिरूपो वा भूत्वाभिगच्छति । एवंभूतो यो राक्षसादिस्ते तव प्रजां जिघांसति हंतुमिच्छति । स्पष्टमन्यत् ॥

यस्त्वा स्वप्नेन तमसा मोहयित्वा निपद्यते ।
प्रजां यस्ते जिघांसति तमितो नाशयामसि ॥६॥

यः । त्वा । स्वप्नेन । तमसा । मोहयित्वा । निऽपद्यते ।
प्रजां । यः । ते । जिघांसति । तं । इतः । नाशयामसि ॥ ६॥

हे योषित् यो राक्षसादिः स्वप्नेन स्वप्नावस्थया तमसा निद्रया त्वा त्वां मोहयित्वा मूढतां प्रापय्य निपद्यते गर्भघाताय गच्छति । अन्यन्नतं ॥ ॥२०॥

अक्षीभ्यामिति षडृचं द्वादशं सूक्तमानुष्टुभं । काश्यपगोत्रोत्पन्नो विवृहा नामर्षिः । यक्ष्मनाशनप्रतिपाद्यत्वात्तद्देवताकं ह्रस्वं सूक्तं । अनुक्रांतं च । अक्षीभ्यां विवृहा काश्यपो यक्ष्मघ्नमिति ॥ लैंगिको विनियोगः ॥

अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि ।
यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया वि वृहामि ते ॥१॥
अक्षीभ्यां । ते । नासिकाभ्यां । कर्णाभ्यां । छुबुकात् । अधि ।
यक्ष्मं । शीर्षण्यं । मस्तिष्कात् । जिह्वायाः । वि । वृहामि । ते ॥१॥

हे यक्ष्मगृहीत ते तवाक्षीभ्यां चक्षुर्भ्यां यक्ष्मरोगं वि वृहामि । उद्धारयामि । विशेषयामीत्यर्थः ॥ ईं च द्विवचन इत्यचिशब्दस्येकारांतादेशः । स चोदात्तः ॥ तथा नासिकाभ्यां घ्राणेंद्रियाभ्यां कर्णाभ्यां श्रोत्राभ्यां च क्षुबुकाच्चुबुकादोष्ठस्याधःप्रदेशाच्च । अधिरनर्थकः । अपि च शीर्षण्यं । शिरसि भवो रोगः शीर्षण्यः ॥ भवे छंदसीति यत् । ये च तद्धिते । पा० ६. १. ६१. । इति शिरसः शीर्षन्नादेशः । ये चाभावकर्मणोरिति प्रकृतिभावः ॥ ईदृशं यक्ष्मं रोगं ते तव मस्तिष्कात् । शिरसोऽतरवस्थितो मांसविशेषो मस्तिष्कः । तस्माज्जिह्वाया रसनायाश्च सकाशादपि वृहामि । उद्धारयामि । पृथक्करोमीत्यर्थः ॥ वृह उद्यमन इति धातुः ॥

ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात् ।
यक्ष्मं दोषण्यं१मंसाभ्यां बाहुभ्यां वि वृहामि ते ॥२॥
ग्रीवाभ्यः । ते । उष्णिहाभ्यः । कीकसाभ्यः । अनूक्यात् ।
यक्ष्मं । दोषण्यं । अंसाभ्यां । बाहुऽभ्यां । वि । वृहामि । ते ॥२॥

हे व्याधिगृहीत उष्णिहाभ्य ऊर्ध्वाभिमुखं स्निग्धाभ्य उत्लाताभ्यो वा स्नायुभ्यो ग्रीवाभ्यो गलगताभ्यो धमनीभ्यस्ते तव यक्ष्मं वि वृहामि । तथा कीकसाभ्योऽस्थिभ्योऽनूक्यादस्थिसंधेश्च यक्ष्मं वि वृहामि ॥ उच समवाये । अनूच्यते समवेयत इत्यस्थ्नः संधिरनूक्यः । ऋहलोर्ण्यत् । चजोः कु घिण्ण्यतोरिति कुत्वं । तित्स्वरितः ॥ अपि च दोष्णोर्भवं दोषण्यं ॥ पूर्ववद्यति पहन्नित्यादिना दोःशब्दस्य दोषन्नादेशः । पूर्ववत्प्रकृतिभावः ॥ तमपि यक्ष्मं रोगं ते तवांसाभ्यां बाहुभ्यां च वि वृहामि । हस्तयोरूर्ध्वभागावंसावधोभागौ बाहू ॥

आंत्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्हृदयादधि ।
यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो वि वृहामि ते ॥३॥
आंत्रेभ्यः । ते । गुदाभ्यः । वनिष्ठोः । हृदयात् । अधि ।
यक्ष्मं । मतस्नाभ्यां । यक्नः । प्लाशिऽभ्यः । वि । वृहामि । ते ॥३॥

हे यक्ष्माभिभूत ते तवांत्रेभ्यः । आंत्रं पुरीतदन्नपानयोराधानभूतं । तत्संबंधिभ्यः स्नायुभ्यो गुदाभ्यः याभिर्नाडीभिरन्नरसः समानवायुना धातुषु नीयते ताभ्यो नाडीभ्यश्च सकाशाद्यक्ष्मं वि वृहामि । तथा वनिष्ठोः स्त्रविरांत्राद्धृदयादधि हृत्पुंडरीकाच्च यक्ष्मं वि वृहामि । अपि च ते तव मतस्नाभ्यां । मतस्नौ पार्श्वयोर्वर्तमा-

नावाम्रफलाक्रान्ती वृक्षौ । ताभ्यां यक्ष्मः । हृदयसमीपे वर्तमानः कालमांसविशेषो यक्ष्मत् । तस्माच्च ॥ पहन्त्यादिना यक्ष्मच्छब्दस्य यक्ष्मादेशः ॥ ज्ञाशिभ्योऽन्येभ्योऽपि श्लोमश्लीहादिसंज्ञेभ्यश्च मांसेभ्यश्च यक्ष्मं रोगं वि वृहामि । उत्क्षिपामि ॥

ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्यां ।
यक्ष्मं श्रोणिभ्यां भासदाङ्गंससो वि वृहामि ते ॥४॥
ऊरुऽभ्यां । ते । अष्ठीवत्ऽभ्यां । पार्ष्णिऽभ्यां । प्रऽपदाभ्यां ।
यक्ष्मं । श्रोणिऽभ्यां । भासदात् । भंससः । वि । वृहामि । ते ॥४॥

हे कृष्ण ते तवोरुभ्यामष्ठीवद्भ्यां जानुभ्यां च यक्ष्मं वि वृहामि । तथा पार्ष्णिभ्यां पादस्यापरभागाभ्यां प्रपदाभ्यां पादाग्राभ्यां च यक्ष्मं वि वृहामि । अपि च श्रोणिभ्यां जंघनाभ्यां च यक्ष्मं वि वृहामि । तथा भासदात् । भसत्कटिप्रदेशः । तत्संबंधाद्भंससो भासमानात्पायोस्ते तव यक्ष्मं वि वृहामि ॥

मेहनाद्वनंकरणाल्लोमभ्यस्ते नखेभ्यः ।
यक्ष्मं सर्वस्मादात्मनस्तमिदं वि वृहामि ते ॥५॥
मेहनात् । वनंऽकरणात् । लोमऽभ्यः । ते । नखेभ्यः ।
यक्ष्मं । सर्वस्मात् । आत्मनः । तं । इदं । वि । वृहामि । ते ॥५॥

वनंकरणात् । वनमुदकं शरीरं । तत्क्रियते विलुप्यते येन तद्वनंकरणं । तस्माच्छेहनाच्छेद्वाक्ते तव लोमभ्यो नखेभ्यश्च यक्ष्मं वि वृहामि । किं बहुना । इदमिदानीं तं यक्ष्मं सर्वस्मादात्मनः कृत्स्नादेव ते तव शरीरादि वृहामि ॥

अंगादंगाल्लोम्नोलोम्नो जातं पर्वणिपर्वणि ।
यक्ष्मं सर्वस्मादात्मनस्तमिदं वि वृहामि ते ॥६॥
अंगात्ऽअंगात् । लोम्नःऽलोम्नः । जातं । पर्वणिऽपर्वणि ।
यक्ष्मं । सर्वस्मात् । आत्मनः । तं । इदं । वि । वृहामि । ते ॥६॥

अंगादंगात् सर्वेभ्योऽंगेभ्यो लोम्नो लोम्नः सर्वेभ्यो लोमभ्यश्च पर्वणि पर्वस्ववयवानां संधौ जातमुत्पन्नं यक्ष्मं वि वृहामि । अन्यन्नतं ॥ ॥२१॥

अपेहीति पंचर्चं चयोदशं सूक्तं । आंगिरसस्य प्रचेतस आर्षं । तृतीया त्रिष्टुप् पंचमी पंक्तिः । दुःस्वप्ननाशनं देवता । तथा चानुक्रांतं । अपेहि पंच प्रचेता दुःस्वप्नघ्नं पंक्त्यंतं त्रिष्टुम्मध्यमिति ॥ लैंगिको विनियोगः ॥

अपेहि मनसस्पतेऽप क्राम परश्चर ।
परो निर्ऋत्या आ चक्ष्व बहुधा जीवतो मनः ॥१॥
अप । इहि । मनसः । पते । अप । क्राम । परः । चर ।
परः । निःऽऋत्यै । आ । चक्ष्व । बहुधा । जीवतः । मनः ॥१॥

हे मनसस्पते स्वप्नावस्थस्य मनसः स्वामिन् दुःस्वप्नाधिदेव अपेहि । अपगच्छ । स्वप्नावस्थावतो मनो

निर्गच्छ। निर्गत्य चाप क्राम। देशांतरं गंतुं पादौ विक्षिप। दूरदेशं गच्छेत्यर्थः। अपक्रम्य च परः परस्ताद्दिग्प्रकृष्टे देशे चर। यथेच्छं वर्तस्व। अपि च निर्ऋतेर्या पापदेवतायाः परः परस्तादूर्ध्वमानायाः आ चक्ष्व। वयं न बाधनीया इति प्रब्रूहि। जीवतो मम मनो बहुधा बहुप्रकारं भवति। भोग्येषु बहुषु विषयेषूत्सुकं सदूर्ध्वते। अतस्तद्विनाशकं दुःस्वप्नदर्शनं नश्यत्वित्यर्थः॥

भद्रं वै वरं वृणते भद्रं युंजंति दक्षिणं। भद्रं वैवस्वते चक्षुर्बहुधा जीवतो मनः॥२॥
भद्रं। वै। वरं। वृणते। भद्रं। युंजंति। दक्षिणं। भद्रं। वैवस्वते। चक्षुः। बहुऽधा। जीवतः। मनः॥२॥

भद्रं वै शोभनमेव वरं वरणीयं दुःस्वप्नविनाशरूपं फलं वृणते। सर्वे जनाः प्रार्थयंते। दक्षिणं प्रवृत्तं भद्रं शोभनं तत्फलं युंजंति। प्राप्नुवंति च। वैवस्वते विवस्वतः पुत्रे यमे विषये भद्रं शोभनमेव चक्षुर्दर्शनमहं प्रार्थये। दुःस्वप्नाधिदेवो वैवस्वतोऽस्मान्मा बाधतां। भद्रमेव दर्शनमिह लोकेऽवस्थानलक्षणं करोत्वित्यर्थः। बहुधा बहुषु हि विषयेषु जीवतो मम मनो वर्तते॥

यदाशसा निःशसाभिशसोपारिम जाग्रतो यत्स्वपंतः।
अग्निर्विश्वान्यप दुष्कृतान्यजुष्टान्यारे अस्मद्दधातु॥३॥
यत्। आऽशसा। निःऽशसा। अभिऽशसा। उपऽआरिम। जाग्रतः। यत्। स्वपंतः।
अग्निः। विश्वानि। अप। दुःऽकृतानि। अजुष्टानि। आरे। अस्मत्। दधातु॥३॥

यद्दुष्कृतमाशसाशंसनेनाभिलाषेण जाग्रतो जागरणावस्थायां वर्तमाना वयमुपारिम उपगतवंतः स्म यच्च स्वपंतः स्वप्नावस्थां प्राप्ता उपगतवंतः स्म। तथा निःशसा निःशंसनेन निर्गताभिलाषेणाभिशसाभिगताभिलाषेण च कारणेनावस्थाद्वये यद्दुष्कृतमुपागच्छेम। तानि विश्वानि सर्वाण्यजुष्टान्यसेव्यान्यप्रियाणि वा दुष्कृतानि दुष्कर्माण्यग्निरस्मदारेऽस्मत्तो दूरदेशेऽप दधातु। अपक्षय्य स्थापयतु॥

यदिंद्र ब्रह्मणस्पतेऽभिद्रोहं चरामसि। प्रचेता न आंगिरसो द्विषतां पात्वंहसः॥४॥
यत्। इंद्र। ब्रह्मणः। पते। अभिऽद्रोहं। चरामसि। प्रऽचेताः। नः। आंगिरसः।
द्विषतां। पातु। अंहसः॥४॥

हे इंद्र हे ब्रह्मणस्पते युवयोर्विषये यदभिद्रोहमभितो द्रोहं पापं दुःस्वप्नकारणं चरामसि आचरामः कुर्मः तस्मादभिद्रोहादस्मान्न्यतमिति शेषः। अपि चांगिरसोऽंगिरोभिः स्तोतृभिः सबांधवः प्रचेताः प्रकृष्टज्ञानो वरुणश्च द्विषतां द्वेष्टॄणामंहससस्तत्कर्तृकादस्मद्विषयात्पापान्नोऽस्मान्पातु। रक्षतु। यद्वा॥ विभक्तिव्यत्ययः॥ आंगिरसमंगिरोगोत्रं प्रचेतसमृषिं नः॥ वचनव्यत्ययः॥ मां द्विषतामंहसः पातु। प्रकृतत्वादिंद्र इति गम्यते॥

अजैष्माद्यासनाम चाभूमानागसो वयं।
जाग्रत्स्वप्नः संकल्पः पापो यं द्विष्मस्तं स ऋच्छतु यो नो द्वेष्टि तमृच्छतु॥५॥
अजैष्म। अद्य। असनाम। च। अभूम। अनागसः। वयं।
जाग्रत्ऽस्वप्नः। संऽकल्पः। पापः। यं। द्विष्मः। तं। सः। ऋच्छतु। यः। नः। द्वेष्टि।
तं। ऋच्छतु॥५॥

अद्याक्षिण्वकाले ऽजैष्म । जेतव्यानि सर्वाणि जितवंतोऽभूम दुःस्वप्नस्य नष्टत्वात् । तदनंतरमसनाम च । संभक्तव्यानि च समभजाम । तथा वयमनागसोऽनपराधाश्चाभूम । जायत्स्वप्नावस्थयोः संबंधी पापः पापफलरूपः स संकल्पो दुःस्वप्नाध्यवसायो यं शत्रुं वयं द्विष्मः तमृच्छतु । प्राप्नोतु । यश्च नोऽस्मान्द्वेष्टि तमृच्छतु । प्राप्नोतु ॥ ॥२२॥

देवा इति पंचर्चं चतुर्दशं सूक्तं निर्ऋतिपुत्रस्य कपोताख्यस्यार्षं वैष्टुभं वैश्वदेवं । तथा चानुक्रांतं । देवा निर्ऋतः कपोतः कपोतोपहती प्रायश्चित्तं वैश्वदेवमिति ॥ कपोतो यदि गृहं प्रविशेत् तदानेन सूक्तेन होतव्यं । सूच्यते हि । कपोतश्चेदगारमुपहन्यादनुपतेद्वा देवाः कपोत इति प्रत्यृचं जुहुयाज्जपेद्वा । आ० गृ० ३. ७. ७. । इति ॥

देवाः कपोत इषितो यदिच्छन्दूतो निर्ऋत्या इदमाजगाम ।
तस्मा अर्चाम कृणवाम निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे ॥१॥
देवाः । कपोतः । इषितः । यत् । इच्छन् । दूतः । निःऽऋत्याः । इदं । आऽजगाम ।
तस्मै । अर्चाम । कृणवाम । निःऽकृतिं । शं । नः । अस्तु । द्विऽपदे । शं । चतुःऽपदे ॥१॥

हे देवाः इषितः प्राप्तो निर्ऋत्याः पापदेवताया दूतोऽनुचरः कपोतो यद्वाधनमिच्छन्नभिलषन्निदमस्मदीयं गृहमाजगाम प्राप्नोत् तस्मै बाधनाय तद्बाधननिवृत्त्यर्थमर्चाम । युष्मान्हविषा पूजयाम । ततो निष्कृतिं कपोतप्रवेशजन्यस्य दोषस्य परिहृतिं कृणवाम । अनेन हविर्दानेन करवाम । अतो नोऽस्माकं द्विपदे पुत्राय शं सुखमस्तु चतुष्पदे गवाश्वप्रभृतये च शं सुखमस्तु ॥

शिवः कपोत इषितो नो अस्त्वनागा देवाः शकुनो गृहेषु ।
अग्निर्हि विप्रो जुषतां हविर्नः परि हेतिः पक्षिणी नो वृणक्तु ॥२॥
शिवः । कपोतः । इषितः । नः । अस्तु । अनागाः । देवाः । शकुनः । गृहेषु ।
अग्निः । हि । विप्रः । जुषतां । हविः । नः । परि । हेतिः । पक्षिणी । नः । वृणक्तु ॥२॥

हे देवाः नोऽस्माकं गृहेष्विषितः कपोताख्यः शकुनः पक्षी शिवः सुखकरोऽनागा अपापहेतुश्चास्तु । हि यस्माद्विप्रो मेधाव्यग्निर्नोऽस्माकं हविर्युष्मभ्यं परिकल्पितं जुषतां जुषते अतो युष्मत्प्रसादात्पक्षिणी पक्षोपेता हेतिर्हननहेतुः कपोतो नोऽस्मान्परि वृणक्तु । अस्मान्परित्यजतु । मा बाधतामित्यर्थः ॥

हेतिः पक्षिणी न दभात्यस्मानाघ्न्यां पदं कृणुते अग्निधाने ।
शं नो गोभ्यश्च पुरुषेभ्यश्चास्तु मा नो हिंसीदिह देवाः कपोतः ॥३॥
हेतिः । पक्षिणी । न । दभाति । अस्मान् । आघ्न्यां । पदं । कृणुते । अग्निऽधाने ।
शं । नः । गोभ्यः । च । पुरुषेभ्यः । च । अस्तु । मा । नः । हिंसीत् । इह । देवाः । कपोतः ॥३॥

पक्षिणी पक्षोपेता हेतिर्हननहेतुः कपोतोऽस्मान्न दभाति । न हिनस्तु । आघ्न्यां व्याघ्नायामरण्यान्यामग्निधाने अग्निर्निधीयतेऽस्मिन्नित्यग्निसहिते प्रदेशे पदं स्थानं कृणुते । करोति । तत्रैव प्रदेशे निवसत्वित्यर्थः । यद्वा । अग्नित्यस्मिन्नित्याघ्नी पचनशाला । तस्यां । अग्निधाने यत्र पचनाग्निर्निधीयते तस्मिन्प्रदेशे पदं पादनिधानं कृणुते । करोति । तद्धेतुको बाधो नोऽस्माकं न भवत्वित्यर्थः । अपि च नोऽस्माकं गोभ्यश्च पुरुषेभ्यश्च शं सुखं शंसनीयानां दोषाणां शांतिर्वास्तु । भवतु । हे देवाः इहास्मिन्गृहे कपोतो नोऽस्माञ्जा हिंसीत् । युष्मदनुग्रहान्मा बाधतां ॥

यदुलूको वदति मोघमेतद्यत्कपोतः पदमग्नौ कृणोति ।
यस्य दूतः प्रहित एष एतत्तस्मै यमाय नमो अस्तु मृत्यवे ॥४॥
यत् । उलूकः । वदति । मोघं । एतत् । यत् । कपोतः । पदं । अग्नौ । कृणोति ।
यस्य । दूतः । प्रऽहितः । एषः । एतत् । तस्मै । यमाय । नमः । अस्तु । मृत्यवे ॥४॥

उलूको घूकसंज्ञः पक्षी यदशोभनं वदति ब्रवीति आत्मीयेन शब्देन सूचयति एतन्मोघं निष्फलमस्तु । कपोतश्चाग्नावग्निमति गृहमध्ये यत्पदं क्षणोति करोति एतदपि मोघं निर्वीर्यमस्तु । प्रहितः प्रेषित एष कपोतो यस्य स्वामिनो दूतोऽनुचरो भवति तस्मै नाम मृत्यवे मारयित्वे यमायैतन्नमः प्रणामोऽस्तु । भवतु ॥

ऋचा कपोतं नुदत प्रणोदमिषं मदंतः परि गां नयध्वं ।
संयोपयंतो दुरितानि विश्वा हित्वा न ऊर्जं प्र पतात्पतिष्ठः ॥५॥
ऋचा । कपोतं । नुदत । प्रऽनोदं । इषं । मदंतः । परि । गां । नयध्वं ।
संऽयोपयंतः । दुःऽइतानि । विश्वा । हित्वा । नः । ऊर्जं । प्र । पतात् । पतिष्ठः ॥५॥

हे देवाः ऋचा मंत्रेण स्तूयमानाः संतो यूयं प्रणोदं प्रकर्षेण नोदनीयं वहिष्कर्तव्यं कपोतं पक्षिणं नुदत । अस्मात्तृहात्प्रेरयत । निर्गमयत । तथा मदंतोऽस्माभिर्दत्तैर्हविर्भिर्मोदंत इषमन्नं गां च परि णयध्वं । परितोऽस्मभ्यं प्रापयत । किं कुर्वंतः । विश्वा सर्वाणि दुरितानि कपोतोपहतिजन्यानि दोषजातानि संयोपयंतोऽदृश्यानि कुर्वंतः । अपि च पतिष्ठोऽतिशयेन पतिता श्येनोत्पातकः कपोतो नोऽस्माकमूर्जमन्नं हित्वा परित्यज्य प्र पतात् । प्रकर्षेण पततु । पक्षाभ्यामुत्पततु ॥ ॥२३॥

ऋषभमिति पंचर्चं पंचदशं सूक्तं वैराजस्य शाक्वरस्य वर्षभाख्यस्यार्षं पंचमी षडष्टका महापंक्तिः । सपत्ननाशनरूपोऽर्थो देवता । तथा चानुक्रांतं । ऋषभमृषभो वैराजः शाक्वरो वा सपत्नघ्नमानुष्टुभं महापंक्त्यंतमिति ॥ प्रयाणसमये --- जपेत् । सूचितं च । ऋषभं मा समानानामित्यभिक्रामन् । आ० गृ० २. ६. १३. । इति ॥

ऋषभं मा समानानां सपत्नानां विषासहिं ।
हंतारं शत्रूणां कृधि विराजं गोपतिं गवां ॥१॥
ऋषभं । मा । समानानां । सऽपत्नानां । विऽससहिं ।
हंतारं । शत्रूणां । कृधि । विऽराजं । गोऽपतिं । गवां ॥१॥

हे सपत्ननाशनाभिमानिन्निंद्र मा मां समानानां सदृशानामस्मत्कुलीनानां मध्य ऋषभमृषभवत्प्रशस्तं कृधि । कुरु । तथा सपत्नानां शत्रूणां विषासहिं विशेषेणाभिभवितारं कुरु । येऽस्मत्कुल एव जाता अस्माकमेवानिष्टमाचरंति ते सपत्नाः । अपि च शत्रूणामन्येषामपि शातयितॄणां वैरिणां हंतारं हिंसितारं कृधि । कुरु । तथा विराजं विशेषेण राजमानं गोपतिं गोस्वामिनं च मां कुरु । न केवलमेकस्या एव गोः पतिं अपि तु सर्वासामित्याह गवामिति ॥

अहमस्मि सपत्नहेंद्र इवारिष्टो अक्षतः ।
अधः सपत्ना मे पदोरिमे सर्वे अभिष्ठिताः ॥२॥
अहं । अस्मि । सपत्नऽहा । इंद्रःऽइव । अरिष्टः । अक्षतः ।
अधः । सऽपत्नाः । मे । पदोः । इमे । सर्वे । अभिऽस्थिताः ॥२॥

अहं सपत्नहा सपत्नानां शत्रूणां हंताऽस्मि । भवामि । इंद्र इवेंद्रो यथा केनाप्यहिंसितो भवति तथाहमप्यरिष्टोऽहिंसितोऽक्षतोऽव्रणश्च भवामि । इमे वृत्रमाणाः सर्वे सपत्ना मे मम पद्योः पादयोरधोऽधस्तादभिष्ठिता आक्रांता भवंतु ॥

अचैव वोऽपि नह्याम्युभे आर्ष्नी इव ज्यया ।
वाचस्पते नि षेधेमान्यथा मदधरं वदान् ॥३॥
अत्र । एव । वः । अपि । नह्यामि । उभे इति । आर्ष्नी इवेत्यार्ष्नीऽइव । ज्यया ।
वाचः । पते । नि । सेध । इमान् । यथा । मत् । अधरं । वदान् ॥३॥

हे सपत्नाः यत्र देशे यूयं निवसथ अत्रैवास्मिन्नेव देशे वो युष्मानपि नह्यामि । अपिनद्मान्पाशैर्बध्नान्करोमि ज्यया मौर्व्यार्ष्नी इव । यथा द्वे धनुषः कोटी दृढं बध्येते तथेत्यर्थः । हे वाचस्पते वाचः शब्दस्य पालयितर्देव इमान्सपत्नान्नि षेध । प्रतिषेध । यथा येन प्रकारेण मन्मत्तोऽधरं निकृष्टतरं वदान् वदंति तथा निकृष्टवाचः कुर्वित्यर्थः ॥

अभिभूरहमागमं विश्वकर्मेण धाम्ना ।
आ वश्चित्तमा वो व्रतमा वोऽहं समितिं ददे ॥४॥
अभिऽभूः । अहं । आ । अगमं । विश्वऽकर्मेण । धाम्ना ।
आ । वः । चित्तं । आ । वः । व्रतं । आ । वः । अहं । संऽइतिं । ददे ॥४॥

हे सपत्नाः अभिभूरभिभवित्राहं विश्वकर्मेण सर्वकर्मकर्त्रमेण धाम्ना धारकेण तेजसा बलेन वा सार्धमागमं । आगतवानस्मि । अतो वो युष्माकं चित्तं मन आ ददे । गृह्णामि । मनोगतं धैर्यं हरामीत्यर्थः । वो युष्माकं व्रतं कर्म चाहमा ददे । वो युष्मदीयो यः समितिः संग्रामः तं चाहमा ददे । अपहरामि ॥

योगक्षेमं व आदायाहं भूयासमुत्तम आ वो मूर्धानमक्रमीं ।
अधस्पदान्म उद्वदत मंडूका इवोदकान्मंडूका उदकादिव ॥५॥
योगऽक्षेमं । वः । आऽदाय । अहं । भूयासं । उत्ऽतमः । आ । वः । मूर्धानं । अक्रमीं ।
अधःऽपदात् । मे । उत् । वदत । मंडूकाःऽइव । उदकात् । मंडूकाः । उदकात्ऽइव ॥५॥

हे सपत्नाः वो युष्माकं योगक्षेमं । अप्राप्तस्य धनस्य प्राप्तिर्योगः । प्राप्तस्य रक्षणं क्षेमः । तदुभयमादाय युष्मत्तो गृहीत्वाहमुत्तमः श्रेष्ठो भूयासं । ततो वो युष्माकं मूर्धानं शिर आक्रमीं । आक्रमिषं । पादेनाधितिष्ठामि ॥ क्रमेर्लुङ्यमो मस् । पा० ७. १. ४०. । इट ईटीति सिचो लोपः ॥ अनंतरं मे ममाधस्पदात्पादस्याधस्तादुवर्तमाना यूयमुदत । उच्चैराक्रोशत । उदकादृष्टिजलादधः प्रदेशे वर्तमाना मंडूका इव । यथा ते भृशमाक्रोशंति तथोदतेत्यर्थः । मंडूका उदकादिवेति पुनरुक्तिरादरार्था ॥ ॥२४॥

तुभ्येदमिति चतुर्ऋचं षोडशं सूक्तं विश्वामित्रजमदग्न्योरार्षं जागतमैंद्रं । सोमस्य राज्ञ इत्येषा तृतीया वरुणविधानुमतिधातुसोमबृहस्पतीतिलिंगोक्तदेवताका । तथा चानुक्रांतं । तुभ्येदं चतुष्कं विश्वामित्रजमदग्नी जागतं तृतीया लिंगोक्तदेवता वेति । पक्ष इंद्र एव देवतास्त्वि तु निपातमात्र इति यास्कशब्दस्यार्थः ॥ गतो विनियोगः ॥

तुभ्येदमिंद्र परि षिच्यते मधु त्वं सुतस्य कलशस्य राजसि ।
त्वं रयिं पुरुवीरामु नस्कृधि त्वं तपः परितप्याजयः स्वः ॥१॥

तुभ्यं । इदं । इंद्र । परि । सिच्यते । मधु । त्वं । सुतस्य । कलशस्य । राजसि ।
त्वं । रयिं । पुरुऽवीरां । उं इति । नः । कृधि । त्वं । तपः । परिऽतप्य । अजयः ।
स्वरिति स्वः ॥१॥

हे इंद्र इदं मधु सोमलक्षणं तुभ्यं त्वदर्थं परि सिच्यते । आहवनीये प्रक्षिप्यते । त्वमेव सुतस्याभिषुतस्य कलशस्य द्रोणकलशावस्थितस्य सोमस्य राजसि । ईशिषे । राजतिरैश्वर्यकर्मा । स त्वं नोऽस्माकं पुरुवीरां बहुपुत्रं रयिं धनं धेहि । कृधि । उशब्दः पूरकः । यद्वा । अवधारणे । बहुपुत्रोपेतमेव धनं कृधि नः केवलमित्यर्थः । तथा त्वं तपः शतसंख्याश्वमेधलक्षणं परितप्यानुष्ठाय स्वः स्वर्गमजयः । जितवानसि ॥

स्वर्जितं महिं मंदानमंधसो हवामहे परि शक्रं सुताँ उप ।
इमं नो यज्ञमिह बोधि गंहि स्पृधो जयंतं मघवानमीमहे ॥२॥
स्वःऽजितं । महिं । मंदानं । अंधसः । हवामहे । परि । शक्रं । सुतान् । उप ।
इमं । नः । यज्ञं । इह । बोधि । आ । गहि । स्पृधः । जयंतं । मघऽवानं । ईमहे ॥२॥

उक्तप्रकारेण स्वर्गस्य जेतारं महि महांतमंधसोऽन्नस्य सोमस्य पानेन मंदानं मोदमानं हृष्यंतं शक्रं सर्वकार्येषु शक्तमिंद्रं सुतानुपाभिषुतान्सोमान्प्रति परि हवामहे । परित आह्वयामहे । हे इंद्र इत्यमाह्वयमानस्त्वं नोऽस्माकमिमं यज्ञमिहास्मिन्यज्ञे बोधि । बुध्यस्व । बुद्ध्वा चा गहि । आगच्छ । स्पृधः स्पर्धमानाः शत्रुसेना जयंतमभिभवंतं मघवानं धनवंतं त्वामीमहे । अर्पेचितानि धनानि याचामहे ॥

सोमस्य राज्ञो वरुणस्य धर्मणि बृहस्पतेरनुमत्या उ शर्मणि ।
तवाहमद्य मघवन्नुपस्तुतौ धातर्विधातः कलशाँ अभक्षयं ॥३॥
सोमस्य । राज्ञः । वरुणस्य । धर्मणि । बृहस्पतेः । अनुऽमत्याः । उं इति । शर्मणि ।
तव । अहं । अद्य । मघऽवन् । उपऽस्तुतौ । धातः । विधातरिति विऽधातः ।
कलशान् । अभक्षयं ॥३॥

राज्ञो राजमानस्य सोमस्य वरुणस्य च संबंधिनि धर्मणि धारके यज्ञे वर्तमानस्तथा बृहस्पतेरनुमत्याः संबंधिनि शर्मणि शरणे यज्ञगृहे वर्तमानोऽहं हे मघवन्निंद्र तवोपस्तुतौ स्तोत्रेऽद्येदानीं प्रवृत्तोऽस्मि । हे धातर्हे एतत्संज्ञक देव हे विधातरेतत्संज्ञक देव युवाभ्यामनुज्ञातः कलशान्कलशस्थान्गृहीतान्सोमानभक्षयं । भक्षितवानस्मि ॥

प्रसूतो भक्षमकरं चरावपि स्तोमं चेमं प्रथमः सूरिरुन्मृजे ।
सुते क्षातेन यद्यागमं वां प्रति विश्वामित्रजमदग्नी दमे ॥४॥
प्रऽसूतः । भक्षं । अकरं । चरौ । अपि । स्तोमं । च । इमं । प्रथमः । सूरिः । उत् । मृजे ।
सुते । क्षातेन । यदि । आ । अगमं । वां । प्रति । विश्वामित्रजमदग्नी इति । दमे ॥४॥

हे इंद्र प्रसूतस्त्वया प्रेरितोऽहं चरौ चरणीये चरणा वा युक्ते यज्ञे भक्षमपि भक्षणीयं चर्वादि हविरकरं । त्वदर्थमकार्षं । प्रथमो मुख्यः सूरिः स्तोताहमिमं स्तोमं स्तोत्रं च त्वदर्थमुन्मृजे । उन्मार्ज्मि । संस्करोमि । उच्चारयामीत्यर्थः । इदानीमिंद्रोऽंतरात्मरूपः सन् सूक्तस्य द्रष्टारावृषी संबोध्य ब्रूते । हे विश्वामित्रजमदग्नी

वां युवां प्रति दमे यज्ञगृहे सुतेऽभिषुते सोमे सति सातेन संभक्तव्येन धनेन सार्धं यदि यदा यस्मिन्काले ऽहमागमं आगच्छामि तदा युवां स्तोत्रं कुरुतमित्यर्थः ॥ ॥२५॥

वातस्येति चतुर्ऋचं सप्तदशं सूक्तं वातगोचरस्यानिलाख्यस्यार्षं त्रैष्टुभं वायुदेवताकं । तथा चानुक्रांतं । वातस्यानिलो वातायनो वायव्यमिति ॥ गतो विनियोगः ॥

वातस्य नु महिमानं रथस्य रुजन्नेति स्तनयन्नस्य घोषः ।
दिविस्पृग्यात्यरुणानि कृण्वन्नुतो एति पृथिव्या रेणुमस्यन् ॥१॥
वातस्य । नु । महिमानं । रथस्य । रुजन् । एति । स्तनयन् । अस्य । घोषः ।
दिविऽस्पृक् । याति । अरुणानि । कृण्वन् । उतो इति । एति । पृथिव्या । रेणुं । अस्यन् ॥१॥

वातस्य वायो रथस्य रंहणशीलस्य महिमानं माहात्म्यं नु क्षिप्रं प्रब्रवीमि । अस्य वायोर्घोषः शब्दः स्तनयन् गिरिगह्वरादिषु विविधं शब्दमुत्पादयन्नुजन् सर्वं स्थावरजंगमजातं भंजन्नेति । गच्छति । स च वायुर्दिविस्पृग्दिवमाकाशं स्पृशन् व्याप्नुवन्नरुणान्यरुणवर्णानि विद्युतरूपाणि दिगंतराणि कृण्वन्कुर्वन्याति । प्राप्नोति । उतो अपि च पृथिव्या भूमे रेणुं पांसुमस्यन् गृहीत्वा सर्वत्र विक्षिपन्नेति । गच्छति । अत एवारुणानि कृण्वन्नित्युक्तं ॥

सं प्रेरते अनु वातस्य विष्ठा एनं गच्छंति समनं न योषाः ।
ताभिः सयुक्सरथं देव ईयतेऽस्य विश्वस्य भुवनस्य राजा ॥२॥
सं । प्र । ईरते । अनु । वातस्य । विऽस्थाः । आ । एनं । गच्छंति । समनं । न । योषाः ।
ताभिः । सऽयुक् । सऽरथं । देवः । ईयते । अस्य । विश्वस्य । भुवनस्य । राजा ॥२॥

विष्ठा विशेषेणावस्थिताः पर्वताद्या वातस्य वायोरनुगुणं सं प्रेरते । संप्रगच्छंति । यद्यभिमुखो वायुर्वर्तते तदभिमुखाः प्रकंपंत इत्यर्थः । समनं न संग्राममिवैनं वायुं योषा अश्वयोषितो वडवा आ गच्छंति । ताभिर्वडवाभिः स्वयुक् स्वयमेव युज्यमानं सरथं समानमेकं रथमारुह्य देवो दीप्यमानो वायुरीयते । गच्छति ॥ ईङ् गतौ ॥ अस्य विश्वस्य सर्वस्य भुवनस्य द्वितीयविकारभाजो भूतजातस्य राजा स्वामी भवति । यद्वा । समनं धृष्टं पुरुषं योषाः कामिन्य इव एवं वायुं तरुगुल्मादिरूपाः स्त्रियोऽभिगच्छंति । ताभिः सरथं सहरथं देव ईयत इति ॥

अंतरिक्षे पथिभिरीयमानो न नि विशते कतमच्चनाहः ।
अपां सखा प्रथमजा ऋतावा क्व स्विज्जातः कुत आ बभूव ॥३॥
अंतरिक्षे । पथिऽभिः । ईयमानः । न । नि । विशते । कतमत् । चन । अहरिति ।
अपां । सखा । प्रथमऽजाः । ऋतऽवा । क्व । स्वित् । जातः । कुतः । आ । बभूव ॥३॥

अंतरिक्षे नभसि विद्यमानैः पथिभिर्मार्गैरीयमानो गच्छन्वायुः कतमच्चनाहरेकमपि दिनं न नि विशते । नोपविशति । किंतु सर्वदैव गच्छति ॥ नेर्विशः । पा० १. ३. १७. । इत्यात्मनेपदं ॥ अपि चापामुदकानां सखा । वायुर्वै वृष्ट्या ईशे इति श्रुतेः । प्रथमजाः सर्वेभ्यः प्राणिभ्यः पूर्वोत्पन्न एवतावा सत्यवान् एवंभूतो वायुः क्व स्वित् कुत्र खलु देशे जात उत्पन्नः कुतः कस्माच्च देशान्निष्क्रम्या बभूव । इदं सर्वं जगद्व्याप्नोत् । सर्वदा सर्वत्र वर्तमानत्वादस्योत्पत्तिर्व्याप्तिप्रकारश्च न केनापि ज्ञातुं शक्यत इत्यर्थः ॥

आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः ।
घोषा इदस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम ॥४॥
आत्मा । देवानाँ । भुवनस्य । गर्भः । यथाऽवशं । चरति । देवः । एषः ।
घोषाः । इत् । अस्य । शृण्विरे । न । रूपं । तस्मै । वाताय । हविषा । विधेम ॥४॥

अयं वायुर्देवानामिंद्रादीनामप्यात्मा जीवरूपेण तेष्ववस्थानात्सुवनस्यापि भूतजातस्य गर्भो गर्भवत्प्राणरूपेणांतर्वर्तमान एष ईदृशो देवो यथावशं यथाकामं यथेच्छं चरति । वर्तते । अनिवारितगतिः सन् क्वचिच्छीघ्रं गच्छति क्वचिच्चनैर्गतिः कुतश्चिच्छरीरान्निष्क्रामत्यन्यच्च शरीरं प्रविशतीत्येवं यथेच्छं वर्तत इत्यर्थः । अस्य वायोरागच्छतो घोषा इच्छब्दा एव शृण्विरे । श्रूयंते । रूपं स्वरूपं तु न दृश्यते नीरूपत्वात् । अदृग्विषयत्वेन शब्देनैवानुमीयत इत्यर्थः । तस्मै वाताय वायवे हविषा चरुपुरोडाशादिलक्षणेन विधेम । परिचरेम ॥ ॥२६॥

मयोभूरिति चतुर्ऋचमष्टादशं सूक्तं काक्षीवन्नोवस्य शबरस्यार्षं त्रैष्टुभं गोदेवत्यं । अनुक्रांतं च । मयोभूः शबरः काक्षीवतो गव्यमिति ॥ घासाय वनं प्रतिष्ठमाना गा आदितो द्वाभ्यामभिमंत्रणीयाः । सूचितं च । गाः प्रतिष्ठमाना अनुमंत्रयेत मयोभूर्वातो अभि वातूस्रा इति द्वाभ्यां । आ० गृ० २. १०. ५. । इति ॥

मयोभूर्वातो अभि वातूस्रा ऊर्जस्वतीरोषधीरा रिशंतां ।
पीवस्वतीर्जीवधन्याः पिबंत्ववसायं पद्वते रुद्र मृळ ॥१॥
मयःऽभूः । वातः । अभि । वातु । उस्राः । ऊर्जस्वतीः । ओषधीः । आ । रिशंतां ।
पीवस्वतीः । जीवऽधन्याः । पिबंतु । अवसायं । पत्ऽवते । रुद्र । मृळ ॥१॥

वातो वायुर्मयोभूः सुखस्य भावयिता सन्नुस्रा गा अभि वातु । अभिगच्छतु । ताश्च गाव ऊर्जस्वती रसवतीरोषधीर्बलवंति तृणान्या रिशंतां । अभितः खादंतु । तथा पीवस्वतीः प्रवृद्धा जीवधन्या जीवानां प्राणयित्रीरपश्च पिबंतु । हे रुद्र ज्वरादिरोगस्य प्रेषणेन संहर्तर्देव पद्वते पादयुक्तायावसायान्नाय गोरूपाय मृळ । उपदयां कुरु । मा बाधस्वेत्यर्थः ॥

याः सरूपा विरूपा एकरूपा यासामग्निरिष्ट्या नामानि वेद ।
या अंगिरस्तपसेह चक्रुस्ताभ्यः पर्जन्य महि शर्म यच्छ ॥२॥
याः । सऽरूपाः । विऽरूपाः । एकऽरूपाः । यासां । अग्निः । इष्ट्या । नामानि । वेद ।
याः । अंगिरसः । तपसा । इह । चक्रुः । ताभ्यः । पर्जन्य । महि । शर्म । यच्छ ॥२॥

या गावः सरूपाः समानरूपा याश्च विरूपा विभिन्नरूपा याश्चैकरूपा एकेनैव वर्णेनोपेता यासां च गवां नामानीडे रंतेऽदित इत्यादीनीष्ट्या यागेन हेतुनाग्निर्वेद जानाति याश्च गा अंगिरस ऋषयस्तपसा पशुप्राप्तिसाधनेन चित्रायागादिलक्षणेनेहास्मिँल्लोके चक्रुः कृतवंतः ताभ्यः सर्वाभ्यो गोभ्यो हे पर्जन्य महि महच्छर्म सुखं यच्छ । प्रदेहि ॥

द्वाभ्यां सायं गृहमागच्छंतीर्गा अनुमंत्रयेत । सूच्यते हि । या देवेषु तन्वमैरयंतेति च सूक्तशेषं । आगावीयमेके । आ० गृ० २. १०. ६–७. । इति ॥

या देवेषु तन्वमैरयंत यासां सोमो विश्वा रूपाणि वेद ।
ता अस्मभ्यं पयसा पिन्वमानाः प्रजावतीरिंद्र गोष्ठे रिरीहि ॥३॥

याः । देवेषु । तन्वं । ऐरयंत । यासां । सोमः । विश्वा । रूपाणि । वेद ।
ताः । अस्मभ्यं । पयसा । पिन्वमानाः । प्रजाऽवतीः । इंद्र । गोऽस्थे । रिरीहि ॥३॥

या गावो देवेषु यष्टृयेषु तन्वमात्मीयं शरीरमैरयंत हवीरूपेण प्रेरयंति यासां च गवां विश्वा सर्वाणि रूपाणि रूप्यमाणानि क्षीरादीनि अयणद्रव्याणि सोमो वेद जानाति अस्मभ्यमस्मदर्थं पयसा क्षीरेण पिन्वमाना वर्धमानाः अत एव प्रजावतीः प्रजाभिर्वत्सैरुपेतास्ता गा हे इंद्र गोष्ठेऽस्मदीये रिरीहि । गमय ॥ री गतिरेषणयोः । छांदसो विकरणस्य लुः ॥

प्रजापतिर्मह्यमेता रराणो विश्वैर्देवैः पितृभिः संविदानः ।
शिवाः सतीरुप नो गोष्ठमाकस्तासां वयं प्रजया सं सदेम ॥४॥
प्रजाऽपतिः । मह्यं । एताः । रराणः । विश्वैः । देवैः । पितृऽभिः । संऽविदानः ।
शिवाः । सतीः । उप । नः । गोऽस्थं । आ । अकरित्यकः । तासां । वयं । प्रऽजया ।
सं । सदेम ॥४॥

प्रजापतिर्विधाता मह्यं स्तोत्र एता गा रराणः प्रयच्छन् ॥ रातेर्व्यत्ययेन शानच् । छांदसः शपः लुः । अभ्यस्तानामादिरित्याद्युदात्तत्वं ॥ विश्वैः सर्वैर्देवैः पितृभिश्च संविदान ऐकमत्यं गतः सञ्शिवाः सतीः कल्याणीर्भवंतीर्गा नोऽस्माकं गोष्ठं व्रजमुप गोष्ठसमीपेऽकः । करोतु । तासां गवां प्रजया संतानेन वयं सं सदेम । संगच्छेमहि ॥ सदेराशिषि लिङि लिङ्याशिष्यङ् ॥ ॥२७॥

विभ्राडिति चतुर्ऋचमेकोनविंशं सूक्तं सूर्यपुत्रस्य विभ्राट्संज्ञकस्यार्षं सूर्यदेवत्यं । आदौ तिस्रो जगत्यः । द्वयष्टकद्विद्वादशकवत्यास्तारपंक्तिश्चतुर्थी । तथा चानुक्रांतं । विभ्राड्विभ्राट् सौर्यः सौर्यं जागतमास्तारपंक्त्यंतमिति ॥ विषुवति निष्केवल्य आद्यसूचः स्तोत्रियः । सूचितं च । विभ्राड्बृहत्पिबतु सोम्यं मधु नमो मित्रस्य वरुणस्य चक्षस इति स्तोत्रियानुरूपौ । आ० ८. ६. । इति ॥ वाजपेयेऽतिरिक्तोक्थस्य विभ्राडित्येषा शस्त्रे याज्या । सूच्यते हि । विभ्राड्बृहत्पिबतु सोम्यं मध्विति याज्या तस्य गवां शतानां । आ० ९. ९. । इति ॥

विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविंहुतं ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा वि राजति ॥१॥
विऽभ्राट् । बृहत् । पिबतु । सोम्यं । मधु । आयुः । दधत् । यज्ञऽपतौ । अविंऽहुतं ।
वातंऽजूतः । यः । अभिऽरक्षति । त्मना । प्रऽजाः । पुपोष । पुरुधा । वि । राजति ॥१॥

विभ्राड्विभ्राजमानो विशेषेण दीप्यमानः सूर्यो बृहन्महत्परिवृढं सोम्यं सोममयं मधु पिबतु । किं कुर्वन् । यज्ञपतौ यजमानेऽविंहुतमकुटिलमायुर्दधत् कुर्वन् । यः सूर्यो वातजूतो वातेन महावायुना प्रेर्यमाणः संस्त्मनात्मना स्वयमेवाभिरक्षति सर्वं जगदभिपश्यन्पालयति । राशिचक्रस्य वायुप्रेर्यत्वात्सूर्यस्यापि तत्प्रेर्यत्वं । स सूर्यः प्रजाः पुपोष । वृष्ट्यादिप्रदानेन पोषयति । पुरुधा बहुधा वि राजति । विशेषेण दीप्यते च ॥

विभ्राड्बृहत्सुभृतं वाजसातमं धर्मन्दिवो धरुणे सत्यमर्पितं ।
अमित्रहा वृत्रहा दस्युहंतमं ज्योतिर्जज्ञे असुरहा सपत्नहा ॥२॥
विऽभ्राट् । बृहत् । सुऽभृतं । वाजऽसातमं । धर्मन् । दिवः । धरुणे । सत्यं । अर्पितं ।
अमित्रऽहा । वृत्रऽहा । दस्युहन्ऽतमं । ज्योतिः । जज्ञे । असुरऽहा । सपत्नऽहा ॥२॥

विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावनुक्षितं सुजातं मातरिश्वना ॥

इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत् ।
विश्वभ्राड्भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो अच्युतं ॥३॥
इदं । श्रेष्ठं । ज्योतिषां । ज्योतिः । उत्ऽतमं । विश्वऽजित् । धनऽजित् । उच्यते । बृहत् ।
विश्वऽभ्राट् । भ्राजः । महि । सूर्यः । दृशे । उरु । पप्रथे । सहः । ओजः । अच्युतं ॥३॥

इदं सौरं तेजः श्रेष्ठं प्रशस्ततमं ज्योतिषामन्येषां ग्रहनक्षत्रादीनामपि ज्योतिः प्रकाशकं अत एवोत्तममुत्कृष्टं विश्वजिद्विश्वस्य सर्वस्य जेतृ धनजिद्धनस्य च जेतृ बृहत्प्रभूतमुच्यते । एवंगुणविशिष्टमिति सर्वैरभिधीयते । अपि च विश्वभ्राड्विश्वस्य प्रकाशयिता भ्राजो भ्राजमानो महि महान्सूर्यो दृशे दर्शनायोरु विस्तीर्णं सहस्तमसोऽभिभवित्र्यच्युतं च्युतिरहितमविनाशमोजस्तेजोरूपं बलं पप्रथे । विस्तारयति ॥

विभ्राजञ्ज्योतिषा स्व१रगच्छो रोचनं दिवः ।
येनेमा विश्वा भुवनान्याभृता विश्वकर्मणा विश्वदेव्यावता ॥४॥
विऽभ्राजन् । ज्योतिषा । स्वः । अगच्छः । रोचनं । दिवः ।
येन । इमा । विश्वा । भुवनानि । आऽभृता । विश्वऽकर्मणा । विश्वदेव्यऽवता ॥४॥

हे सूर्य ज्योतिषा तेजसा स्वः सर्वं जगद्विभ्राजन्विभ्राजयन्दिवः संबंधि रोचनं स्थानमगच्छः । प्राप्नोः । विश्वकर्मणा सर्वव्यापारहेतुना विश्वदेव्यावता । विश्वेषां देवानां हितो यागादिर्विश्वदेव्यः । तद्वता येन सौरेण तेजसेमानि परिदृश्यमानानि विश्वा सर्वाणि भुवनान्युदकानि भौमान्याभृता धर्मकाल आभृतानि भवंति । यद्वा । सर्वाणि भूतजातान्याभृता समंताद्भृतानि पोषितानि भवंति । तेन ज्योतिषेत्यन्वयः ॥ ॥२८॥

त्वं त्यमिति चतुर्ऋचं विंशं सूक्तं भृगुपुत्रस्येटस्यार्षं गायत्रमैंद्रं । अनुक्रांतं च । त्वं त्यमिटो भार्गवो गायत्रमिति ॥ गतो विनियोगः ॥

त्वं त्यमिटतो रथमिंद्र प्रावः सुतावतः । अप्रृणोः सोमिनो हवं ॥१॥
त्वं । त्यं । इटतः । रथं । इंद्र । प्र । आवः । सुतऽवतः । अप्रृणोः । सोमिनः । हवं ॥१॥

हे इंद्र सुतावतः सुतेनाभिषुतेन सोमेन युक्तस्येटत इटस्य ॥ सुपां सुलुगिति ङसस्स् ॥ एतत्संज्ञस्यर्षेस्त्वं तं प्रसिद्धं रथं प्रावः । प्रारक्षः । सोमिनः सोमयुक्तस्य मम हवमाह्वानमशृणोः । शृणु ॥

त्वं मखस्य दोधतः शिरोऽव त्वचो भरः । अगच्छः सोमिनो गृहं ॥२॥
त्वं । मखस्य । दोधतः । शिरः । अव । त्वचः । भरः । अगच्छः । सोमिनः । गृहं ॥२॥

हे इंद्र त्वं मखस्य यज्ञस्य दोधतः कंपमानस्य देवेभ्यः पलायमानस्य शिरः प्रवर्ग्यरूपं त्वचस्त्वगुपलक्षिताच्छरीरादव भरः । अवयुत्य पृथक्कृत्य हृतवानसि । देवेभ्यो निष्क्रांतस्य पुरुषाकारस्य धन्विनो यज्ञस्य शिर इंद्रो वज्ररूपेण ज्याघातनद्वारा पुरा चिच्छेद । तदभिप्रायेणेदमुक्तं । श्रूयते हि । तस्येंद्रो वज्ररूपेण धनुर्ज्यामच्छिनद्बृहद्रथस्य खेव धनुरार्तिः शिर उत्पिपेष स प्रवर्ग्योऽभवदिति । स त्वं सोमिनः सोमवतो मम गृहमगच्छः । आगच्छ ॥

त्वं त्यमिंद्र मर्त्यमास्तबुध्नाय वेन्यं । मुहुः श्वा मनस्यवे ॥३॥
त्वं । त्यं । इंद्र । मर्त्यं । आस्तऽबुध्नाय । वेन्यं । मुहुः । श्वाः । मनस्यवे ॥३॥

हे इंद्र त्वं त्यं तं मर्त्यं मनुष्यं वेन्यं वेनस्य पुत्रं पृथुमास्तबुध्नाय । अस्तबुध्नो नाम कश्चित् । तस्य पुत्राय मनस्यवे मननीयं स्तोत्रमिच्छते मुहुः शश्वच्छ्वाः । अहिंसीः । वशमनय इत्यर्थः ॥

त्वं त्यमिंद्र सूर्ये पश्वा संतं पुरस्कृधि । देवानां चित्तिरो वशं ॥४॥
त्वं । त्यं । इंद्र । सूर्ये । पश्वा । संतं । पुरः । कृधि । देवानां । चित् । तिरः । वशं ॥४॥

हे इंद्र त्वं त्यं सूर्यमस्तसमये पश्वा पश्चात्संतं भवंतं पुरः पूरयुरुदयकाले पुरस्तात्कृधि । करोषि ॥ लकारव्यत्ययः ॥ कीदृशं । देवानां चिद्देवानामपि तिरस्तिरोहितं तैरपि क्व गत इति दुर्विज्ञातं वशं कांतं ॥ ॥२९॥

आ याहीति चतुर्ऋचमेकविंशं सूक्तमांगिरसस्य संवर्तस्यार्षमुषोदेवताकं । चतस्रोऽपि विंशतिका द्विपदा विराजः । तथा चानुक्रांतं । आ याहि संवर्त उषसं द्वेपदमिति ॥ प्रथमे छंदोमे वैश्वदेवसूक्तात्पूर्वमिदं सूक्तं । सूचितं च । आ याहि वनसेमा नु कं बभ्रुरेक इति द्विपदासूक्तानि । आ० ८. ७. । इति ॥ महाव्रतेऽपि निष्केवल्य एतत् । तथैव पंचमारण्यके सूचितं । ऐ० आ० ५. २. २. ॥

आ याहि वनसा सह गावः सचंत वर्तनिं यदूधभिः ॥१॥
आ । याहि । वनसा । सह । गावः । सचंत । वर्तनिं । यत् । ऊधऽभिः ॥१॥

हे उषः वनसा वननीयेन तेजसा धनेन सार्धमा याहि । आगच्छ । गाव उषसो वाहनभूता वर्तनिं रथं सचंत । सेवंते । अतस्तेन रथेनायाहीत्यर्थः । यद्वा गाव ऊधभिरुपलक्षिताः प्रभूताः । पीना इत्यर्थः । ता गाव इति संबंधः ॥

आ याहि वस्व्या धिया मंहिष्ठो जारयन्मखः सुदानुभिः ॥२॥
आ । याहि । वस्व्या । धिया । मंहिष्ठः । जारयत्ऽमखः । सुदानुऽभिः ॥२॥

हे उषः वस्व्या प्रशस्तया धियानुग्रहबुद्ध्या कर्मणा स्तुत्या वा सार्धमा याहि । आगच्छ । स चोषःकालः सुदानुभिः शोभनदानैर्दातृभिः पुरुषैर्मंहिष्ठो धनानां दातृतमः अत एव जारयन्मखः समापयद्यज्ञश्च भवति ॥

पितुभृतो न तंतुमित्सुदानवः प्रति दध्मो यजामसि ॥३॥
पितुऽभृतः । न । तंतुं । इत् । सुऽदानवः । प्रति । दध्मः । यजामसि ॥३॥

पितुभृतो नाम्नस्य भर्तार इव सुदानवः शोभनदाना वयं तंतुमित्तंतुं विस्तीर्णमेव प्रति दध्मः । उषसं प्रत्युपायनरूपेण धारयामः । तेन च यज्ञेन तामुषसं यजामसि ॥

दशमेऽहनि प्रातरनुवाक उषस्ये क्रतावुषो भद्रेभिरित्यस्याः स्थान उषा अप स्वसुरित्येषा । सूचितं च । उषा अप स्वसुस्तम इति पञ्चो द्विपदां चिरुषस्ये । आ० ८. १२. । इति ॥

उषा अप स्वसुस्तमः सं वर्तयति वर्तनिं सुजातता ॥४॥
उषाः । अप । स्वसुः । तमः । सं । वर्तयति । वर्तनिं । सुऽजातता ॥४॥

इयमुषाः स्वसुर्भगिन्या रात्रेः संबंधि तमोऽंधकारमप सं वर्तयति । आत्मीयेन तेजसापगमयति । सुजाततता सुजातत्वमात्मनः सुप्रजातत्वं च वर्तनिं रथं प्रापयति ॥ ॥३०॥

आ त्वेति षडृचं द्वाविंशं सूक्तमांगिरसस्य ध्रुवस्यार्षमानुष्टुभं । अभिषिक्तस्य राज्ञः स्तुतिरूपोऽर्थो देवता । तथा चानुक्रांतं । आ त्वा षड् ध्रुवो राज्ञः स्तुतिस्त्वानुष्टुभं त्विति ॥ राज्ञो युद्धाय संनहनेऽनेन सूक्तेनाभिमंत्रणं पुरोधसा कर्तव्यं । सूचितं च । आ त्वाहार्षमंतरेधीति पश्चाद्रथस्थावस्थाय । आ० गृ० ३. १२. २. । इति ॥

आ त्वाहार्षमंतरेधि ध्रुवस्तिष्ठाविचाचलिः ।
विशस्त्वा सर्वा वांछंतु मा त्वद्राष्ट्रमधि भ्रशत् ॥१॥
आ । त्वा । अहार्षं । अंतः । एधि । ध्रुवः । तिष्ठ । अविऽचाचलिः ।
विशः । त्वा । सर्वाः । वांछंतु । मा । त्वत् । राष्ट्रं । अधि । भ्रशत् ॥१॥

हे राजन् त्वा त्वामाहार्षं । अस्माद्राष्ट्रस्य स्वामित्वेनानिषं । स त्वमंतरस्मासु मध्य एधि । स्वामी भव । ध्रुवो नित्यः सन्नविचाचलिरतिशयेन चलनरहित एव संस्तिष्ठ । राष्ट्रमधितिष्ठ । सर्वाश्च विशः प्रजास्त्वां वांछंतु । अयमेवास्माकं राजास्त्विति कामयंतु ॥ वाछि इच्छायां ॥ त्वत् त्वत्तः सकाशाद्राष्ट्रं राज्यं माधि भ्रशत् । मा भ्रश्यतु । मा वियुक्तं भवतु ॥ भ्रन्शु अधःपतने ॥

इहैवैधि माप च्योष्ठाः पर्वत इवाविचाचलिः ।
इंद्र इवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय ॥२॥
इह । एव । एधि । मा । अप । च्योष्ठाः । पर्वतःऽइव । अविऽचाचलिः ।
इंद्रःऽइव । इह । ध्रुवः । तिष्ठ । इह । राष्ट्रं । ऊं इति । धारय ॥२॥

हे राजन् इहास्मिन्नेव राज्य एधि । स्वामित्वेन सर्वदा वर्तमानो भव । माप च्योष्ठाः । अपच्युतो मा भूः । मापगमः । पर्वत इव यथा पर्वतो नैश्चल्येनावतिष्ठते एवमविचाचलिश्चलनरहितो भव । इंद्र इव यथा स्वर्गे इंद्रः एवमिह लोके त्वं ध्रुवस्तिष्ठ । स्थिरो भव । राष्ट्रमु राष्ट्रं चेह लोके धारय । स्वे स्वे कर्मण्यवस्थापय ॥

इममिंद्रो अदीधरद्ध्रुवं ध्रुवेण हविषा ।
तस्मै सोमो अधि ब्रवत्तस्मा उ ब्रह्मणस्पतिः ॥३॥
इमं । इंद्रः । अदीधरत् । ध्रुवं । ध्रुवेण । हविषा ।
तस्मै । सोमः । अधि । ब्रवत् । तस्मै । ऊं इति । ब्रह्मणः । पतिः ॥३॥

इममभिषिक्तं ध्रुवेण स्थिरेण हविषा तर्प्यमाण इंद्रो ध्रुवं स्थिरमदीधरत् । धारयतु । सोमश्च तस्मै राज्ञेऽधि ब्रवत् । अधिब्रवीतु । मदीयोऽयमिति पक्षपातवचनं करोतु । तस्मा उ तस्मा एव ब्रह्मणस्पतिर्मंत्रस्य पालको देवश्चाधिब्रवीतु ॥

ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे ।
ध्रुवं विश्वमिदं जगद्ध्रुवो राजा विशामयं ॥४॥
ध्रुवा । द्यौः । ध्रुवा । पृथिवी । ध्रुवासः । पर्वताः । इमे ।
ध्रुवं । विश्वं । इदं । जगत् । ध्रुवः । राजा । विशां । अयं ॥४॥

द्यौर्ध्रुवा स्थिरा भवति । पृथिवी च ध्रुवा स्थिरा भवति । इमे दृश्यमानाः पर्वता महीधराश्च ध्रुवासः

स्थिराः । इदं विश्वं सर्वं जगद्ध्रुवं स्थिरं भवति । एवमेवायं विशां प्रजानां राजा स्वामी सन् ध्रुवः स्थिरो भवतु ॥

ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः ।
ध्रुवं त इंद्राग्निश्च राष्ट्रं धारयतां ध्रुवं ॥५॥
ध्रुवं । ते । राजा । वरुणः । ध्रुवं । देवः । बृहस्पतिः ।
ध्रुवं । ते । इंद्रः । च । अग्निः । च । राष्ट्रं । धारयतां । ध्रुवं ॥५॥

हे राजन् ते तव राष्ट्रं राजा राजमानो वरुणो ध्रुवं स्थिरं धारयतु । देवो दानादिगुणयुक्तो बृहस्पतिर्ध्रुवं धारयतु । इंद्राग्नी स्वोभावपि ते तव राष्ट्रं ध्रुवं स्थिरं धारयतां । इंद्राग्न्योरुभयोरपेक्षया ध्रुवशब्दस्य द्विः प्रयोगः ॥

ध्रुवं ध्रुवेण हविषाभि सोमं मृशामसि ।
अथो त इंद्रः केवलीर्विशो बलिहृतस्करत् ॥६॥
ध्रुवं । ध्रुवेण । हविषा । अभि । सोमं । मृशामसि ।
अथो इति । ते । इंद्रः । केवलीः । विशः । बलिऽहृतः । करत् ॥६॥

ध्रुवेण स्थिरेण हविषा पुरोडाशादिना युक्तं ध्रुवं स्थिरं सोममभि मृशामसि । अभिमृशामः । देवतामभिलक्ष्य यागार्थं वयमृत्विजः संस्पृशामः । अथो अथानंतरमेवेंद्रो विशः प्रजास्ते तवैव केवलीरसाधारणाः सतीर्बलिहृतः करस्य प्रदात्रीः करत् । करोतु ॥ ॥३१॥

अभीवर्तेनेति पंचर्चं चतुर्विंशं सूक्तमांगिरसस्याभीवर्ताख्यस्यार्षमानुष्टुभं । पूर्ववद्राजस्तुतिर्देवता । तथा चानुक्रांतं । अभीवर्तेन पंचाभीवर्त इति ॥ पुरोहित इदं सूक्तं राजानं युद्धाय कृतसंनाहं वाचयीत । सूच्यते हि । अधीनं सारयमाणमुपास्याभीवर्तं वाचयति । आ० गृ० ३. १२. १२. । इति ॥

अभीवर्तेन हविषा येनेंद्रो अभिवावृते । तेनास्मान्ब्रह्मणस्पतेऽभि राष्ट्राय वर्तय ॥१॥
अभिऽवर्तेन । हविषा । येन । इंद्रः । अभिऽववृते । तेन । अस्मान् । ब्रह्मणः । पते ।
अभि । राष्ट्राय । वर्तय ॥१॥

अभीवर्तेन । अभिगच्छत्यनेनेत्यभीवर्तः ॥ करणे घञ् । याथादिस्वरेणोत्तरपदांतोदात्तत्वं । उपसर्गस्य घञ्यमनुष्ये बहुलं । पा० ६. ३. १२२. । इति दीर्घः ॥ ईदृशेन येन हविषा साधनेनेंद्रोऽभिवर्तते सर्वमभिजगाम तेन हविष्टवतोऽस्मान् हे ब्रह्मणस्पते राष्ट्राय राज्यं प्राप्तुमभि वर्तय । अभिगमय ॥

अभिवृत्य सपत्नानभि या नो अरातयः । अभि पृतन्यंतं तिष्ठाभि यो नं इरस्यति ॥२॥
अभिऽवृत्य । सऽपत्नान् । अभि । याः । नः । अरातयः । अभि । पृतन्यंतं । तिष्ठ ।
अभि । यः । नः । इरस्यति ॥२॥

अभि त्वा देवः सविताभि सोमो अवीवृतत् ।
अभि त्वा विश्वा भूतान्यभीवर्तो यथाससि ॥३॥

अभि । त्वा । देवः । सविता । अभि । सोमः । अवीवृतत् ।
अभि । त्वा । विश्वा । भूतानि । अभिऽवर्तः । यथा । असंसि ॥३॥

हे राजन् देवो दानादिगुणयुक्तः सविता त्वा त्वामभ्यवीवृतत् । अभिवर्तयतु । अभिगमयतु राष्ट्रं । सोमस्त्वाभिवर्तयतु । विश्वा विश्वानि सर्वाण्यपि भूतानि पृथिव्यादीनि त्वामभि वर्तयंतु । यथा येन प्रकारेण त्वमभीवर्तोऽसि अभितः सर्वत्र वर्तमानो भवसि ॥ असेश्छांदसः शपो लुगभावः ॥

येनेंद्रो हविषा कृत्व्यभवद्द्युम्न्युत्तमः । इदं तदक्रि देवा असपत्नः किलाभुवं ॥४॥
येन । इंद्रः । हविषा । कृत्वी । अभवत् । द्युम्नी । उत्ऽतमः । इदं । तत् । अक्रि । देवाः ।
असपत्नः । किल । अभुवं ॥४॥

येन हविषास्माभिर्दत्तेन मात्रवृत्रेंद्रः हत्वी वृत्रवधादेः कर्मणः कर्ताभवत् द्युम्नी । द्युम्नं द्योततेर्यशो वान्नं वा । तद्वान् अत एवोत्तम उत्कृष्टतमश्चाभवत् तदिदं हविर्हे देवाः अक्रि । अकारि । यद्वा । अहमकार्षं । अत एवाहमसपत्नः किलाभुवं । शत्रुरहितोऽप्यभवं खलु ॥

असपत्नः सपत्नहाभिराष्ट्रो विषासहिः ।
यथाहमेषां भूतानां विराजानि जनस्य च ॥५॥
असपत्नः । सपत्नऽहा । अभिऽराष्ट्रः । विऽससहिः ।
यथा । अहं । एषां । भूतानां । विऽराजानि । जनस्य । च ॥५॥

सपत्नहा सपत्नानां शत्रूणां हंता अत एवासपत्नः शत्रुरहितोऽहमभूवं । अभिराष्ट्रोऽभिगतराष्ट्रः प्राप्तराज्यः सन् विषासहिः शत्रूणां विशेषेणाभिभविता चाभूवं । यथा येन प्रकारेणाहमेषां दृश्यमानानां सर्वेषां भूतानां प्राणिनां जनस्य च सेवकस्यामात्यादेश्च विराजानि यथेश्वरो भवानि तथा सपत्नहा विषासहिश्चाभूवमित्यर्थः ॥ ॥३२॥

प्र व इति चतुर्ऋचं चतुर्विंशं सूक्तं गायत्रं । अर्बुदस्य सर्पर्षेः पुत्र ऊर्ध्वग्रावा नामर्षिः । सोमाभिषवार्था ग्रावाणो देवता । तथा चानुक्रांतं । प्र वश्चतुष्कमूर्ध्वग्रावार्बुदिर्यौष्णोऽसौन्नायत्रमिति ॥ ग्रावस्तोत्र एतत्सूक्तं । सूचितं च । आ व ऋंजसे प्र वो ग्रावाण इति सूक्तयोः । आ० ५. १२. । इति । यद्वा । इदमेकमेव सूक्तं ग्रावस्तोत्रं । सज्यते हि । प्र वो ग्रावाण इत्येक उक्तं सर्पणं । आ० ५. १२. । इति ॥

प्र वो ग्रावाणः सविता देवः सुवतु धर्मणा । धूर्षु युज्यध्वं सुनुत ॥१॥
प्र । वः । ग्रावाणः । सविता । देवः । सुवतु । धर्मणा । धूःऽसु । युज्यध्वं । सुनुत ॥१॥

हे ग्रावाणः सोमाभिषवार्थाः पाषाणाः वो युष्मान्सविता प्रेरको देवो धर्मणात्मीयेन धारणेन कर्मणा प्र सुवतु । अभिषवार्थं प्रेरयतु ॥ षू प्रेरणे तौदादिकः ॥ यूयं च धूर्ष्वभिषवस्थानेषु प्राच्यादिमहादिषु युज्यध्वं । युक्ता भवत । अनंतरं सुनुत । अभिषुणुत सोमं ॥

ग्रावाणो अप दुच्छुनामप सेधत दुर्मतिं । उस्राः कर्तन भेषजं ॥२॥
ग्रावाणः । अप । दुच्छुनां । अप । सेधत । दुःऽमतिं । उस्राः । कर्तन । भेषजं ॥२॥

हे ग्रावाणः दुच्छुनां दुःखकारिणीं शत्रुभूतां प्रजामप सेधत । अस्मत्तोऽपगमयत ॥ षिधु गत्यां ॥ तथा

दुर्मतिं दुष्टाभिसंधिं चाप सेधत । भेषजं सुखमस्माकं यथा भवति तथोस्रा गाः कर्तन । कृषत ॥ करोतेश्छांदसो विकरणस्य लुक् । तप्तनप्तनथनाश्चेति तनबादेशः ॥

ग्रावाण॒ उप॑रेष्वा महीयंते स॒जोष॑सः । वृष्णे॒ दध॑तो॒ वृष्ण्यं॑ ॥३॥
ग्रावा॑णः । उप॑रेषु । आ । म॒हीयं॑ते । स॒ऽजोष॑सः । वृष्णे॑ । दध॑तः । वृष्ण्य॑म् ॥३॥

ग्रावाणो दित्त्ववस्थिताः पाषाणाः सजोषसः सह प्रीयमाणाः संगताः संतो वोपरेषु । उपरो नामाभिषवाय चतुर्णां ग्राव्णां मध्ये स्थापितो विकृतः पाषाणः । प्रदेशापेक्षं बहुवचनं । उपरस्य प्रांतेषु महीयंते । प्रकाशंते । आकारः पूरणः । किं कुर्वंतः । वृष्णे वर्षित्रे सोमाय वृष्ण्यं वीर्यं दधतः प्रयच्छंतः ॥

ग्रावा॑णः सवि॒ता नु वो॑ देवः सु॑वतु॒ धर्म॑णा । यज॑मानाय सुन्व॒ते ॥४॥
ग्रावा॑णः । स॒वि॒ता । नु । वः॒ । देवः॑ । सु॒व॒तु॒ । धर्म॑णा । यज॑मानाय । सु॒न्व॒ते ॥४॥

देवो दानादिगुणयुक्तः सविता हे ग्रावाणः वो युष्मान्धर्मणात्मीयेन धारणेन नु क्षिप्रं सुवतु । अभिषवे प्रेरयतु । किमर्थं । सुन्वते सोमाभिषवं कुर्वते यजमानाय यजमानार्थं । तस्य यागनिष्पत्तय इत्यर्थः ॥ ॥३३॥

प्र सूनव इति चतुर्ऋचं पंचविंशं सूक्तं । ऋभुपुत्रः सूनुर्नामर्षिः । द्वितीया गायत्री शिष्टास्तिस्रोऽनुष्टुभः । आद्यर्भुदेवत्या शिष्टा आग्नेय्यः । तथा चानुक्रांतं । प्र सूनवः सूनुरार्भव आग्नेयमानुष्टुभं द्वितीया गायत्र्याद्यार्भवीति ॥ गतो विनियोगः ॥

प्र सू॒नव॑ ऋभू॒णां बृह॒द्वय॑ंत वृ॒जना॑ । क्षामा॒ ये वि॒श्वधा॑यसोऽभ्न॒न्धे॒नुं न मा॒तर॑म् ॥१॥
प्र । सू॒नव॑ः । ऋ॒भू॒णां । बृह॑त् । न॒व॑ंत । वृ॒जना॑ । क्षाम॑ । ये । वि॒श्वऽधा॑यसः । अभ्न॑न् । धे॒नुं । न । मा॒तर॑म् ॥१॥

सूनव एतत्संज्ञा ऋभूणां । ऋभुर्विभ्वा वाज इति त्रयाणामपि प्रथमेन व्यपदेशः । तेषां पुत्रा बृहत्प्रभूतं वृजना । संग्रामनामैतत् । वृजनं संग्रामं प्र नवंत । नवतिर्गतिकर्मा । प्रगच्छंति । प्रकर्षेण गच्छंति । प्रहृष्टगमनेन जयो लक्ष्यते । तत्र शत्रूञ्जयंतीत्यर्थः । सूनुर्नामर्षिरात्मानमेव परोक्षेण निरदिशत् । एकस्मिन्नपि पूजार्थं बहुवचनं । य ऋभवो विश्वधायसो विश्वस्य धारकाः क्षाम भूमिमभ्नन् व्याप्नुवन् ॥ अभ्नु व्याप्तौ । व्यत्ययेन श्ना ॥ धेनुं न । धेनुः प्रीणयित्री गौः । तामिव तेषामृभूणामित्यन्वयः । यद्वा । सूर्यरश्मयोऽप्यृभव उच्यंते । य उरु भासमानाः सूर्यरश्मयो विश्वधायसो विश्वं सर्वं रसं धयंतः पिबंतः । यद्वा । वृष्ट्यादिप्रदानेन सर्वस्य धारकाः । एवंभूताः संतः क्षाम भूमिमभ्नन् अभुंजत तदीयं सर्वं रसमपिबन् । तत्र दृष्टांतः । मातरं जननीं धेनुं पयस्विनीं गां यथा वत्सः पिबति तथा । य ऋभवोऽभ्नंति तेषामृभूणामित्यन्वयः ॥

अग्निप्रणयने प्र देवमिति तृचोऽनुवक्तव्यः । सूचितं च । प्रेषितोऽग्निप्रणयनीयाः प्रतिपद्यते प्र देवं देव्या धियेति तिस्रः । आ० २. १७. । इति ॥

प्र दे॒वं दे॒व्या धि॒या भर॑ता जा॒तवे॑दसं । ह॒व्या नो॑ वक्षदानु॒षक् ॥२॥
प्र । दे॒वं । दे॒व्या । धि॒या । भर॑त । जा॒तऽवे॑दसं । ह॒व्या । नः॒ । व॒क्ष॒त् । आ॒नु॒षक् ॥२॥

हे ऋत्विग्यजमानाः देवं दानादिगुणयुक्तं जातवेदसं जातानां वेदितारं जातप्रज्ञं जातधनं वेममग्निं प्र भरत । प्रकर्षेण हरत । यद्वा । प्रांचं नयत । केन साधनेनेति तदाह । देव्या दीप्तया धिया प्रज्ञया कर्मणा वा । यद्वा । एषा सहयोगे तृतीया । देव्या धिया युक्तं । किं प्रयोजनमिति चेत् । नोऽस्माकं हव्या हव्यानि हवींष्यानुषगानुपूर्व्यादनुक्रमेण वक्षत् । अयमग्निर्वहेत् । देवान्प्रापयेत् ॥ वहेर्लेटि सिब्बहुलमिति सिप् ॥

अयमु ष्य प्र देवयुर्होता यज्ञाय नीयते ।
रथो न योरभीवृतो घृणीवाञ्चेतति त्मना ॥३॥
अयं । ऊं इति । स्यः । प्र । देवऽयुः । होता । यज्ञाय । नीयते ।
रथः । न । योः । अभिऽवृतः । घृणिऽवान् । चेतति । त्मना ॥३॥

अयमु अयमेव स्य सोऽग्निर्देवयुर्देवान्यष्टुमिच्छन्भवति ॥ देवशब्दात्क्यचि न छंदस्युपधेतीत्वदीर्घयोः प्रतिषेधः ॥ अयमेव होता देवानामाह्वाता । अयमेव यज्ञाय यागार्थं प्र णीयते । आहवनीयदेशं प्रति प्रकर्षेण नीयते । अपि च रथो रंहणशीलः सूर्यो रथवान्वा ॥ छांदसो मत्वर्थीयस्य लोपः ॥ स यथा घृणीवान्दीप्तिमान् तद्वद्दीप्तो योर्मिश्रिता हविषां देवैः संगमयिता ॥ यौतेरन्येभ्योऽपि दृश्यंत इति विच् ॥ अभीवृत ऋत्विग्यजमानैराविष्टितः ॥ वृणोतेः कर्मण्यन्येषामपीति पूर्वपदस्य दीर्घः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं ॥ एवंभूतोऽग्निस्त्मनात्मना स्वयमेव चेतति । सम्यग्देवान्यष्टुं जानाति ॥ मंचेष्वाङ्भ्यादेरात्मन इत्याकारलोपः ॥

अयमग्निरुरुष्यत्यमृतादिव जन्मनः । सहसश्चित्सहीयान्देवो जीवातवे कृतः ॥४॥
अयं । अग्निः । उरुष्यति । अमृतात्ऽइव । जन्मनः । सहसः । चित् । सहीयान् ।
देवः । जीवातवे । कृतः ॥४॥

अयमग्निरमृतादमरणाद्देवनिमित्ताद्भयादिव जन्मनो जायमानाज्जगदुत्पत्तिनिमित्ताद्भयादुरुष्यति । तस्माद्रक्षति । उरुष्यती रक्षाकर्मेति यास्कः । नि० ५. २३. ॥ भाववाचिनोऽमृतशब्दस्य नञा बहुव्रीहौ नञो जरमरमित्यमृता इत्युत्तरपदाद्युदात्तत्वं । भीचार्थानां । पा० १. ४. २५. । इत्यपादानसंज्ञा ॥ अपि चायं देवः सहसश्चित् ॥ सह इति बलनाम । तस्मादुत्तरस्य मत्वर्थीयस्य बहुलं छंदसीति लुक् ॥ चिच्छब्दोऽप्यर्थः । सहस्वतो बलवतोऽपि सहीयान् बलवत्तरः ॥ सहस्शब्दादीयसुनि विन्मतोरिति विनो लुक् । टेरिति टिलोपः ॥ एवंभूतो देवो जीवातवे जीवनहेतवे यागाय कृतः । ब्रह्मणा सृष्टः ॥ ॥३४॥

पतंगमिति तृचं षड्विंशं सूक्तं प्रजापतिपुत्रस्य पतंगस्यार्षं । आद्या जगती ततस्त्रिष्टुभौ । मायाभेदस्य प्रतिपाद्यत्वात्तद्देवत्यमिदं सूक्तं । अनुक्रांतं च । पतंगं तृचं पतंगः प्राजापत्यो मायाभेदं जगत्यादीति ॥ प्रवर्ग्येऽभिष्टव आद्ये ऋचौ । सूचितं च । पतंगमक्तमसुरस्य मायया यो नः सनुत्यः । आ० ४. ६. । इति ॥

पतंगमक्तमसुरस्य मायया हृदा पश्यंति मनसा विपश्चितः ।
समुद्रे अंतः कवयो वि चक्षते मरीचीनां पदमिच्छंति वेधसः ॥१॥
पतंगं । अक्तं । असुरस्य । मायया । हृदा । पश्यंति । मनसा । विपःऽचितः ।
समुद्रे । अंतरिति । कवयः । वि । चक्षते । मरीचीनां । पदं । इच्छंति । वेधसः ॥१॥

असुरस्यासनकुशलस्य सर्वोपाधिविहीनस्य परब्रह्मणः संबंधिन्या मायया त्रिगुणात्मिकयाक्तं व्याप्तमभिव्यक्तं । यद्वा । मायेति प्रज्ञानाम । प्रज्ञया संबद्धं सर्वज्ञं पतंगं । पतति गच्छतीति पतंगः सूर्यः । तं विपश्चितो विद्वांसो हृदा हृत्पद्मेन ॥ तात्स्थ्यात्ताच्छब्द्यं ॥ हृदि निरूढेन मनसा पश्यंति । जानंति । कवयः क्रांतदर्शिनस्ते समुद्रे । समुद्रवंत्यस्माद्रश्मय इति समुद्रं सूर्यमंडलं । तस्मिन्नंतर्मध्ये वि चक्षते । विपश्यंति । मंडलांतर्वर्तिनं हिरण्मयं पुरुषमपि जानंतीत्यर्थः । य एवं वेधसो विधातार उक्तप्रकारेण सूर्योपासनस्य कर्तारः ते मरीचीनां रश्मीनां पदं स्थानं सूर्यमंडलमिच्छंति । अभिलषंति । तदुपासनया प्राप्नुवंतीत्यर्थः । यद्वा । मायया व्याप्तं जीवरूपेणाभिव्यक्तमात्मानं विपश्चितो वेदांताभिज्ञा हृत्पद्मेनांतर्मुखेन मनसा पतंगं । पतति व्याप्नोतीति पतंगः परमात्मा । तं पश्यंति । उपाधिपरित्यागेन जीवात्मनः परमात्मना तादात्म्यं साक्षात्कु-

वंतीत्यर्थः । अपि च ते कवयः क्रांतदर्शिनो वेदांताभिज्ञाः समुद्रे । समुद्रवंत्यस्माद्भूतानीति समुद्रः परमात्मा । तस्मिन्नधिष्ठानभूतेऽंतर्मध्ये सर्वं दृश्यजातमध्यस्तत्वेन वि चष्टे । विपश्यंतीति । अतो दृग्व्यतिरिक्तस्य सर्वस्य मिथ्यात्वाद्विधसो विधातारस्ते मरीचीनां वृत्तिज्ञानानां पदमधिष्ठानभूतं सच्चित्सुखात्मकं यत्परं ब्रह्म तदेवेच्छंति । तद्भावप्राप्तिमेव कामयंते ॥

वाग्देवत्ये पशौ पतंगो वाचमिति पुरोडाशस्यानुवाक्या । सूचितं च । यद्वाग्वदंत्यविचेतनानि पतंगो वाचं मनसा बिभर्ति । आ० ३. ८. । इति ॥

पतंगो वाचं मनसा बिभर्ति तां गंधर्वोऽवदद्गर्भे अंतः ।
तां द्योतमानां स्वर्यं मनीषामृतस्य पदे कवयो नि पांति ॥२॥
पतंगः । वाचं । मनसा । बिभर्ति । तां । गंधर्वः । अवदत् । गर्भे । अंतरिति ।
तां । द्योतमानां । स्वर्यं । मनीषां । ऋतस्य । पदे । कवयः । नि । पांति ॥२॥

पतंगः सूर्यो वाचं चयीरूपां मनसा प्रज्ञया बिभर्ति । धारयति । श्रूयते हि । ऋग्भिः पूर्वाह्णे दिवि देव ईयते यजुर्वेदे तिष्ठति मध्ये अह्नः सामवेदेनास्तमये महीयते वेदैरशून्यस्त्रिभिरेति सूर्यः । तै० ब्रा० ३. १२. ९. १. । इति । तामेव वाचं गर्भे शरीरस्य मध्ये वर्तमानो गंधर्वः । गाः शब्दान्धारयतीति गंधर्वः प्राणवायुः । अंतर्मध्येऽवदत् । वदति । प्रेरयति । मारुतसूरसि चरन्मंद्रं जनयति स्वरं । शि० ७. । इति स्मरणात् । द्योतमानां स्वर्यं स्वर्गमयिचीं स्वर्गाय हितां वा मनीषां मनस ईशित्रीं तां चयीरूपां वाचमृतस्य यज्ञस्य सत्यभूतस्य सूर्यस्य वा पदे स्थाने कवयो मेधाविन ऋषयो नि पांति । अध्यापनेन नितरां रक्षंति । यद्वा । पतंगः सर्वोपाधिशून्यो व्याप्तः परमात्मा । स सृष्ट्यादौ वाचं मनसा बिभर्ति । कानि कानि सृष्टव्यानीति पर्यालोचनेन मनसा सकलार्थप्रतिपादकं वेदं परामृष्टवानित्यर्थः । स्मर्यते हि । वेदशब्देभ्य एवादौ निर्ममे स महेश्वर इति । गर्भे हिरण्मये ब्रह्मांडेऽंतर्वर्तमानो गंधर्वो हिरण्यगर्भस्तां वाचमवदत् । प्रथममुच्चारितवान् । द्योतमानत्वादिगुणविशिष्टां तां वाचं कवयः क्रांतदर्शिनो देवा ऋतस्य सत्यस्य ब्रह्मणः पदे स्थाने नि पांति । निभृतं रक्षंति ॥

प्रवर्ग्येऽभिष्टवेऽपश्यं गोपामित्येषा । सूचितं च । अपश्यं गोपामनिपद्यमानं सूक्ते द्रष्टस्य । आ० ४. ६. । इति ॥

अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरंतं ।
स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वंतः ॥३॥
अपश्यं । गोपां । अनिऽपद्यमानं । आ । च । परा । च । पथिऽभिः । चरंतं ।
सः । सध्रीचीः । सः । विषूचीः । वसानः । आ । वरीवर्ति । भुवनेषु । अंतरिति ॥३॥

व्याख्यातेयमस्यवामीयसूक्ते । ऋ० १. १६४. ३१. । गोपां गोपायितारमादित्यमपश्यं । अज्ञासिषं । एष हि सर्वाणि भूतजातान्युदयास्तमयादिकर्मणा गोपायति । कीदृशं । अनिपद्यमानमुच्चैर्गच्छंतं । न ह्यसौ कदाचिन्नीचैः पद्यते । पथिभिराकाशमार्गैः पूर्वाह्णे आ चरंतमस्ताभिमुखस्य गच्छंतं सायंसमये परा चरंतं पराङ्मुखं गच्छंतं । प्रकारद्वयसमुच्चयार्थौ चशब्दौ । स सूर्यः सध्रीचीः सहांचंतीः विषूचीर्विविधं पृथक्पृथगंचंतीः स्वस्वव्यापाराय गच्छंतीः । प्राच्याद्या महादिशः सध्रीच्यो विषूच्यः कोणदिशः । वसानः स्वभासाच्छादयन् प्रकाशयन्भुवनेषु लोकेष्वंतर्मध्य आ वरीवर्ति । पुनःपुनरुदयास्तं गच्छन्नावर्तते । यद्वा । गोपां शरीरस्य गोपायितारमनिपद्यमानमविनाशिनमविपन्नमा च परा चाभिमुखेन च पराङ्मुखेन च पथिभिर्नाडीलक्षणैर्मार्गैश्चरंतं शरीरे वर्तमानं प्राणमपश्यं । अहमदर्शं ॥ ॥३५॥

त्यमू ष्विति तृचं सप्तविंशं सूक्तं तार्क्ष्यपुत्रस्यारिष्टनेमेरार्षं त्रैष्टुभं तार्क्ष्यदेवताकं । तथा चानुक्रांतं । त्यमू ष्वरिष्टनेमिस्तार्क्ष्यस्तार्क्ष्यमिति ॥ अहर्गणेषु द्वितीयादिष्वहःसु निष्केवल्यसूक्तानां पुरस्तादिदं सूक्तं शंसनीयं ।

सूचितं च । त्यमू षु वाजिनं देवजूतमिति तार्क्ष्यमये निष्केवल्यसूक्तानां । आ० ७. १. । इति ॥ विपुवति तु निष्केवल्यसूक्तानामंत एव तत्सूक्तं । सूच्यते हि । त्यमू ष्वितीह तार्क्ष्यमंततः । आ० ८. ६. । इति ॥ महाव्रतेऽपि निष्केवल्य एतत् । तथैव पंचमारण्यके सूच्यते । ऐ० आ० ५. ३. १. ॥

त्यमू षु वाजिनं देवजूतं सहावानं तरुतारं रथानां ।
अरिष्टनेमिं पृतनाजमाशुं स्वस्तये तार्क्ष्यमिहा हुवेम ॥१॥
त्यं । ऊं इति । सु । वाजिनं । देवऽजूतं । सहऽवानं । तरुतारं । रथानां ।
अरिष्टऽनेमिं । पृतनाजं । आशुं । स्वस्तये । तार्क्ष्यं । इह । हुवेम ॥१॥

त्यमु तं प्रसिद्धमेव तार्क्ष्यं तृक्षपुत्रं सुपर्णं ॥ तृक्षाद्यत् । गर्गादिः ॥ स्वस्तये क्षेमायेहास्मिन्कर्मणि हुवेम । भृशमाहूयेमहि ॥ बहुलं छंदसीति हुयतेः संप्रसारणं । लिड्याशिष्यङ् । यद्वा । प्रार्थनायां लिङि व्यत्ययेन शः ॥ कीदृशं । वाजिनं बलवंतमन्नवंतं वा देवजूतं देवैः सोमाहरणार्थं प्रेरितं ॥ जु इति गत्यर्थः सौत्रो धातुः । अस्मात्कर्मणि निष्ठा । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं ॥ यद्वा । देवैः प्रीयमाणं तर्प्यमाणं । यदाह यास्कः । जूतिर्गतिः प्रीतिर्वा देवजूतं देवप्रीतं वा । नि० १०. २८. । इति । सहावानं सहस्वंतं बलवंतमभिभवनवंतं वा अत एव रथानामन्यदीयानां तरुतारं संग्रामे जेतारं । यद्वा । रंहणशीला इमे लोका रथाः । तान्सोमाहरणसमये शीघ्रं तरीतारं । श्रूयते हि । एष ह्येमाँल्लोकान्त्सद्यस्तरतीति । ऐ० आ० ४. २०. ॥ तरतेस्तृचि ग्रसितस्कभितेत्यादावुडागमो निपात्यते । पा० ७. २. ३४. ॥ अरिष्टनेमिमहिंसितरथं । यद्वा । नेमिर्नमनशीलमायुधं । अहिंसितायुधं । अथवा । उपचाराज्जनके जन्यशब्दः । अरिष्टनेमेर्मम जनकं । पृतनाजं पृतनानां शत्रुसेनानां प्राजितारं प्रगमयितारं जेतारं वा ॥ अज गतिक्षेपणयोः । अस्मात्क्विप् । वलादावार्धधातुके विकल्प इष्यते । का० २. ४. ५६. २. । इति वचनाद्वीभावाभावः । जयतेर्वा डप्रत्ययः ॥ आशुं शीघ्रगामिनं ॥

इंद्रस्येव रातिमाजोहुवानाः स्वस्तये नावमिवा रुहेम ।
उर्वी न पृथ्वी बहुले गभीरे मा वामेतौ मा परेतौ रिषाम ॥२॥
इंद्रस्यऽइव । रातिं । आऽजोहुवानाः । स्वस्तये । नावंऽइव । आ । रुहेम ।
उर्वी इति । न । पृथ्वी इति । बहुले इति । गभीरे इति । मा । वां । आऽइतौ ।
मा । पराऽइतौ । रिषाम ॥२॥

इंद्रस्येव तार्क्ष्यस्य रातिं दानमाजोहुवानाः पुनःपुनराहूयंतो वयं स्वस्तयेऽविनाशाय नावमिव नौर्यथा दुरवगाहं समुद्रं तारयति तथा दुःखस्य तारयित्रीं तामा रुहेम । आरूढा भूयास्म ॥ रुहेराशीर्लिङि लिड्याशिष्यङ् ॥ हे उर्वी उर्व्यौ विस्तीर्णे हे पृथ्वी पृथिवी प्रथिते विख्याते हे बहुले अनंते गभीरे गांभीर्योपेते ईदृश्यौ हे द्यावापृथिव्यौ । नशब्दः संप्रत्यर्थे । संप्रति वां युवयोः संबंधिन्येतौ तार्क्ष्यस्यागमे परेतौ परागमने च वयं मा रिषाम । हिंसिता मा भूम ॥ आङ्पराभ्यामुत्तरस्येणो भावे क्तिन् । तादौ च निटीति गतेः प्रकृतिस्वरत्वं ॥

सद्यश्चिद्यः शवसा पंच कृष्टीः सूर्य इव ज्योतिषापस्ततानं ।
सहस्रसाः शतसा अस्य रंहिर्न स्मा वरंते युवतिं न शर्यां ॥३॥
सद्यः । चित् । यः । शवसा । पंच । कृष्टीः । सूर्यःऽइव । ज्योतिषा । अपः । ततानं ।
सहस्रऽसाः । शतऽसाः । अस्य । रंहिः । न । स्म । वरंते । युवतिं । न । शर्यां ॥३॥

यश्चिद्योऽपि तार्क्ष्यः सद्यः शीघ्रं श्रवसात्मीयेन बलेनाप उदकान्यमृतलक्षणानि ततान विस्तारितवान् सूर्य इव यथा सूर्यः सर्वस्य प्रेरक आदित्यो ज्योतिषात्मीयेन तेजसा वर्षर्तावपो विस्तारयति तद्वत्। क्षट्टयो मनुष्याः। पंच क्षट्टीः पंचविधाम्क्षष्टीम्मनुष्यान्प्रति। निषादपंचमांश्चतुरो वर्णानित्यर्थः। अस्य तार्क्ष्यस्य रंहिर्गतिः सहस्रसाः सहस्रसंख्यस्य धनस्य दात्री संभक्त्री वा भवति। तथा शतसाः शतस्य च दात्री संभक्त्री वा भवति॥ सनतेः सनोतेर्वा जनसनखनेति विट्। विड्वनोरनुनासिकस्यादित्यात्वं॥ न स्म न खल्वीदृशीं तार्क्ष्यस्य ते गतिं वरंते। के चन वारयंति। तत्र दृष्टांतः। श्रयी श्ररकांडमयीमिषुं धनुषो मुक्तां युवतिं न लक्ष्मेण मिश्रीभवंतीमिव। सा यथा दुर्निवारा तथैषा कैश्चिदपि वारयितुमशक्येत्यर्थः। अत्र निरुक्तं। सद्यो ऽपि यः श्रवसा बलेन तनोत्यपः सूर्य इव ज्योतिषा पंच मनुष्यजातानि सहस्रसानिनी शतसानिन्यस्य सा गतिर्न स्त्रीनां वारयंति प्रयुवतीमिव श्रमयीमिषुं। नि० १०. २९.। इति॥ ॥३६॥

उत्तिष्ठतेति तृचमष्टाविंशं सूक्तमैंद्रं। आद्यानुष्टुप् शिष्टे त्रिष्टुभौ। उशीनरपुत्रः शिविर्गाम राजा प्रथमाया ऋषिः। काशीनामधिपतिः प्रतर्दनो नाम द्वितीयायाः। रोहिदश्वपुत्रो वसुमना नाम तृतीयायाः। तथा चानुक्रांतं। उत्तिष्ठतेकर्चाः शिविरौशीनरः काशिराजः प्रतर्दनो रौहिदश्वो वसुमना आद्यानुष्टुविति॥ दधिघर्म आद्या वक्तव्या। सूचितं च। होतर्वदस्वेत्युक्त उत्तिष्ठताव पश्यतेत्याह। आ० ५. १३.। इति॥

उत्तिष्ठतावं पश्यतेंद्रस्य भागमृत्वियं। यदि श्रातो जुहोतन यद्यश्रातो ममत्तन॥१॥

उत्। तिष्ठत। अवं। पश्यत। इंद्रस्य। भागं। ऋत्वियं। यदि। श्रातः। जुहोतन। यदि। अश्रातः। ममत्तन॥१॥

हे ऋत्विजः उत्तिष्ठत। आसनादूर्ध्वमुत्तिष्ठत। नोपविशत॥ ऊर्ध्वकर्मत्वादात्मनेपदाभावः। पा० १. ३. २४.॥ उत्थायर्त्वियमृतौ वसंतादिकाले भवमिंद्रस्य भागं भजनीयं दधिघर्मं पच्यमानमव पश्यत। निरीक्षध्वं॥ ऋतुशब्दाच्छवार्थे छंदसि घस्। सिति चेति पदसंज्ञया भसंज्ञाया बाधादोर्गुणाभावः। भजेः कर्मणि घञंतो भागशब्दः। कर्षात्वत इत्यंतोदात्तत्वं॥ यदि स भागः श्रातः पक्वः तर्हि जुहोतन। इंद्रार्थमग्नौ जुहुत॥ तप्ननप्ननथनाश्चेति तस्य तनबादेशः। भीह्रीत्यादिना। पा० ६. १. १९२.। पिति प्रत्ययात्पूर्वस्योदात्तत्वं॥ यद्यश्रातोऽपक्वः तर्हि ममत्तन। मादयत। यद्वा। स्तुतिभिर्मादयत॥ अत्र तेनैव सूत्रेण तनबादेशः॥

तस्यैव दधिघर्मस्य श्रातं हविरित्येषानुवाक्या। सूचितं च। श्रातं हविरित्युक्तः श्रातं हविरित्यन्वाह। आ० ५. १३.। इति॥

श्रातं हविरो ष्विंद्र प्र याहि जगाम सूरो अध्वनो विमध्यं।
परि त्वासते निधिभिः सखायः कुलपा न व्राजपतिं चरंतं॥२॥

श्रातं। हविः। ओ इति। सु। इंद्र। प्र। याहि। जगाम। सूरः। अध्वनः। विऽमध्यं। परि। त्वा। आसते। निधिऽभिः। सखायः। कुलऽपाः। न। व्राजऽपतिं। चरंतं॥२॥

हे इंद्र हविर्दधिघर्माख्यं त्वदीयं श्रातं। पक्वं॥ श्रीञ् पाक इत्यस्मान्निष्ठायामपस्युधेयामित्यादौ श्राभावो निपात्यते॥ ओ आ उ सु सुष्ठु प्र याहि। प्रकर्षेण शीघ्रमागच्छ। सूरः सूर्योऽध्वनो गंतव्यस्य मार्गस्य विमध्यं विकलमध्यमीषदूनं मध्यभागं जगाम। गतवान्। तव यागार्थं मध्याह्नो जात इत्यर्थः। सखायः समानख्याना ऋत्विजश्च निधिभिर्निहितैरभिन्यासादिभिः सोमैः सार्धं त्वा त्वां पर्यासते। पर्युपासते। तत्र दृष्टांतः। कुलपा न कुलस्य वंशस्य रक्षकाः पुत्रा यथा व्राजपतिं। व्राजा गंतव्या गृहाः। तेषां पतिं चरंतं गच्छंतमुपासते तथेत्यर्थः॥ व्रज गतौ। अकर्त्रात्कर्मणि घञ्। अजिव्रज्योश्च। पा० ७. ३. ६०.। इति कुत्वनिषेधः। कर्षात्वत इत्यंतोदात्तत्वे पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरत्वं॥

तस्यैव दधिघर्मस्य श्रातं मन्य इत्येषा याज्या। सूच्यते हि। श्रातं मन्य ऊधनि श्रातमग्नाविति यजति। आ० ५. १३.। इति॥

आतं मन्य ऊधनि आतमग्नौ सुआतं मन्ये तदृतं नवीयः ।
माध्यंदिनस्य सवनस्य दध्नः पिबेंद्र वज्रिन्पुरुकृज्जुषाणः ॥३॥
आतं । मन्ये । ऊधनि । आतं । अग्नौ । सुऽआतं । मन्ये । तत् । ऋतं । नवीयः ।
माध्यंदिनस्य । सवनस्य । दध्नः । पिब । इंद्र । वज्रिन् । पुरुऽकृत् । जुषाणः ॥३॥

ऊधनि गोरूधस्येतद्दधिघर्माख्यं हविः पयोरूपेण आतं पक्वमिति मन्ये । जाने । पुनश्च दुग्धं पयोऽग्नावपि आतं पक्वं । इदानीं दध्यवस्थमप्यग्नौ पच्यते । अतः सुआतं सुपक्वमिति मन्ये । जाने । अत एतद्ध-विर्यत्तं सत्यभूतं नवीयो नवतरं प्रत्यग्रतरं भवति । हे वज्रिन् वज्रवन् हे पुरुकृद्बहुकर्मकृदिंद्र जुषाणः प्रीयमाणस्त्वं माध्यंदिनस्य मध्यंदिने भवस्य सवनस्य सोमस्य संबंधिनो दध्नः ॥ कर्मणि षष्ठी ॥ दधिघर्माख्यं हविः पिब ॥ ॥३७॥

प्र ससाहिषे इति तृचमेकोनत्रिंशं सूक्तमिंद्रपुत्रस्य जयस्यार्षं त्रैष्टुभमैंद्रं । तथा चानुक्रांतं । प्र ससाहिषे जय ऐंद्र इति ॥ गतः सूक्तविनियोगः ॥ दर्शे इंद्रस्य हविषः प्र ससाहिष इत्येषा याज्या । सूचितं च । प्र ससाहिषे पुरुहूत शत्रून् महाँ इंद्रो य ओजसा । आ० १. ६. । इति ॥ एकादशिन ऐंद्रपशौ पुरोडाशस्येयमेव याज्या । सूचितं च । प्र ससाहिषे पुरुहूत शत्रून्स्वसये वाजिभिश्च प्रणेतः । आ० ३. ७. । इति ॥ देवसुवां हविषींद्रस्येयमेवानुवाक्या । सूचितं च । प्र ससाहिषे पुरुहूत शत्रून्भुवस्त्वमिंद्र ब्रह्मणा महान् । आ० ४. ११. । इति ॥

प्र ससाहिषे पुरुहूत शत्रूञ्ज्येष्ठस्ते शुष्म इह रातिरस्तु ।
इंद्रा भर दक्षिणेना वसूनि पतिः सिंधूनामसि रेवतीनां ॥१॥
प्र । ससहिषे । पुरुऽहूत । शत्रून् । ज्येष्ठः । ते । शुष्मः । इह । रातिः । अस्तु ।
इंद्र । आ । भर । दक्षिणेन । वसूनि । पतिः । सिंधूनां । असि । रेवतीनां ॥१॥

हे पुरुहूत बहुभिराहूतेंद्र शत्रून्वैरिणः प्र ससाहिषे । प्रकर्षेणाभिभवसि । ते तव शुष्मः शोषकं बलं ज्येष्ठः प्रशस्यतमं वृद्धतमं वा भवति । इहास्मिन्कर्मणि रातिस्तव दानमस्तु । अस्मभ्यं भवतु । तदर्थं हे इंद्र दक्षिणेन हस्तेन वसूनि धनान्या भर । आहर । आनय । त्वं रेवतीनां रयिमतीनां बहुधनानां सिंधूनां स्यंदनशीलानां नदीनां पतिरसि । स्वामी भवसि ॥ रयिशब्दान्मतुपि रयेर्मतौ बहुलमिति संप्रसारणं । छंदसीर इति मतुपो वत्वं । रेशब्दाच्चेति तस्योदात्तत्वं ॥

वैमृधस्य हविषो मृगो नेत्येषा याज्या । सूचितं च । वि न इंद्र मृधो जहि मृगो न भीमः कुचरो गिरिष्ठाः । आ० २. १०. । इति ॥

मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगंथा परस्याः ।
सृकं संशाय पविमिंद्र तिग्मं वि शत्रूंताड्हि वि मृधो नुदस्व ॥२॥
मृगः । न । भीमः । कुचरः । गिरिऽस्थाः । पराऽवतः । आ । जगंथ । परस्याः ।
सृकं । संऽशाय । पविं । इंद्र । तिग्मं । वि । शत्रून् । ताड्हि । वि । मृधः । नुदस्व ॥२॥

कुचरः कुत्सितचरणो गिरिष्ठाः पर्वतनिवासी मृगो न सिंह इव हे इंद्र त्वं भीमो भयंकरोऽसि । स त्वं परस्याः परावतोऽतिशयेन दूराद्द्युलोकादा जगंथ । आगच्छ ॥ गमेश्छांदसे लिटि क्रादिनियमप्राप्तस्येट उपदेशेऽत्वतः । पा० ७. २. ६२. । इति प्रतिषेधः ॥ आगत्य च सृकं सरणशीलं तिग्मं तीक्ष्णं पविं वज्रं संशाय सम्यक् तीक्ष्णीकृत्य शत्रूनस्मदीयान्वैरिणो हे इंद्र तेन वज्रेण वि ताड्हि । विशेषेण ताडय । विनाशयेत्यर्थः ॥

तत्र आघाते । अक्षाक्षोटि खंताडूपमेतत् ॥ तथा मृधः संग्रामोद्युक्तान्युद्युत्सूनन्यानपि वि गृह्य । विशेषेण तिरस्कुरु ॥

इंद्र क्षत्रमभि वाममोजोऽजायथा वृषभ चर्षणीनां ।
अपानुदो जनममित्रयंतमुरुं देवेभ्यो अकृणोरु लोकं ॥३॥
इंद्र । क्षत्रं । अभि । वामं । ओजः । अजायथाः । वृषभ । चर्षणीनां ।
अप । अनुदः । जनं । अमित्रऽयंतं । उरुं । देवेभ्यः । अकृणोः । उं इति । लोकं ॥३॥

हे इंद्र क्षत्रं क्षतात्त्रायकं वामं वनणीयमोजो बलमभिलक्ष्याजायथाः । उत्पन्नोऽसि । हे वृषभ कामानां वर्षितः चर्षणीनां मनुष्याणामस्माकं ॥ नामन्यतरस्यामिति नाम उदात्तत्वं ॥ अमित्रयंतं । अमित्रः शत्रुः । स इवाचरंतं जनमपानुदः । अपागमयः । देवेभ्यश्चोरुं विस्तीर्णं लोकं स्वर्गाख्यमकृणोः । अकार्षीः । उशब्दः समुच्चये ॥ ॥३८॥

प्रथ इति तृचं त्रिंशं सूक्तं वैश्वदेवं त्रैष्टुभं । वासिष्ठः प्रथसंज्ञ ऋषिः प्रथमायाः । भारद्वाजः सप्रथाख्य ऋषिर्द्वितीयायाः । सूर्यपुत्रो धर्म ऋषिस्तृतीयायाः । तथा चानुक्रांतं । प्रथश्चैकर्चाः प्रथो वासिष्ठः सप्रथो भारद्वाजो धर्मः सौर्यो वैश्वदेवमिति ॥ प्रवर्ग्येऽभिष्टव एतत्सूक्तं । सूचितं च । गणानां त्वा प्रथमस्य यस्य । आ० ४. ६. । इति ॥

प्रथश्च यस्य सप्रथश्च नामानुष्टुभस्य हविषो हविर्यत् ।
धातुर्द्युतानात्सवितुश्च विष्णो रथंतरमा जभारा वसिष्ठः ॥१॥
प्रथः । च । यस्य । सऽप्रथः । च । नाम । आनुऽस्तुभस्य । हविषः । हविः । यत् ।
धातुः । द्युतानात् । सवितुः । च । विष्णोः । रथंऽतरं । आ । जभार । वसिष्ठः ॥१॥

यस्य वसिष्ठस्य प्रथो नाम पुत्रो यस्य भरद्वाजस्य सप्रथो नाम पुत्रः तयोर्मध्ये वसिष्ठ आनुष्टुभस्यानुष्टुप्छंदसा युक्तस्य हविषो धर्माख्यस्य यज्ञविर्हविष्पापादकं रथंतरं । रथंरंहःसाधनं साम तद्रथंतरं । धातुर्धातृसंज्ञाद्विवाद्युतानाद्द्योतमानात्सवितुश्च विष्णोश्चा जभार । आजहार । हृतवान् ॥ हृग्रहोर्भ इति भत्वं । रथशब्दोपपदात्तरतेः संज्ञायां भृतृवृजीति खच् । ऋतुर्विषदजंतस्येति मुमागमः ॥

अविंदन्ते अतिहितं यदासीद्यज्ञस्य धाम परमं गुहा यत् ।
धातुर्द्युतानात्सवितुश्च विष्णोर्भरद्वाजो बृहदा चक्रे अग्नेः ॥२॥
अविंदन् । ते । अतिऽहितं । यत् । आसीत् । यज्ञस्य । धाम । परमं । गुहा । यत् ।
धातुः । द्युतानात् । सवितुः । च । विष्णोः । भरत्ऽवाजः । बृहत् । आ । चक्रे । अग्नेः ॥२॥

ते धाचादयस्तदविंदन् अलभंत यद्बृहत्साम्राख्यं धर्मस्य हविषः संस्कारकमतिहितं तिरोहितमासीत् । यच्च बृहत्साम यज्ञस्य ज्योतिष्टोमादेः परमसुत्कृष्टं धाम धारकं शरीरभूतं वा गुहा गुहायामस्मदादिविषये निहितमासीत् तत्ते धाचादयोऽलभंत । तेभ्योऽग्नेश्च सकाशात्तद्बृहत्साम भरद्वाज ऋषिरा चक्रे । आभिमुख्येन कृतवान् । आहृतवानित्यर्थः ॥

तेऽविंदन्मनसा दीध्याना यजुःष्कृत्नं प्रथमं देवयानं ।
धातुर्द्युतानात्सवितुश्च विष्णोरा सूर्यादभरन्धर्ममेते ॥३॥

ते । अविंदन् । मनसा । दीध्यानाः । यजुः । स्रुचं । प्रथमं । देवऽयानं ।
धातुः । द्युतानात् । सवितुः । च । विष्णोः । आ । सूर्यात् । अभरन् । घर्मं । एते ॥३॥

ते धात्रादयो दीध्यानाः दीप्यमानाः संतो मनसा बुद्ध्याविंदन् । अलभंत । किं तत् । यजुर्यागसाधनं स्रुक्नं स्रुंदनीयमासेचनीयं प्रवृंजनसाधनं प्रथमं मुख्यं देवयानं देवानां प्राप्तिसाधनं घर्मं । एवं धात्रादिभिः प्रथममुपलब्धं तं घर्मं धातुर्द्योतमानात्सवितुर्विष्णोः सूर्यात्तेन ऋत्विज आभरन् । आहरन् । आनीतवंत इत्यर्थः ॥ ॥३९॥

बृहस्पतिरिति तृचमेकविंशं सूक्तं बृहस्पतिदेवतं त्रैष्टुभं । बृहस्पतिपुत्रस्यपुर्मूर्धा नामर्षिः । तथा चानुक्रांतं । बृहस्पतिस्यपुर्मूर्धा बार्हस्पत्यो बार्हस्पत्यमिति ॥ गतो विनियोगः ॥

बृहस्पतिर्नयतु दुर्गहा तिरः पुनर्नेषद्यशंसाय मन्म ।
क्षिपदश्स्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः ॥१॥
बृहस्पतिः । नयतु । दुःऽगहा । तिरः । पुनः । नेषत् । अघऽशंसाय । मन्म ।
क्षिपत् । अशस्तिं । अप । दुःऽमतिं । हन् । अथ । करत् । यजमानाय । शं । योः ॥१॥

बृहस्पतिर्बृहतां देवानां पतिः पालयिता ॥ तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च । म० ६. १. १५७. । इति सुडागमस्तलोपश्च । उभे वनस्पत्यादिष्विति पूर्वोत्तरपदयोर्युगपत्प्राप्तिस्वरत्वं ॥ दुर्गहा दुर्गमनानां हंता स देवस्तिरो नयतु । तिरस्कर्तव्यानि पापान्यपसारयतु । अघशंसायास्माकमनर्थमाशंसमानाय पुरुषाय मन्म । मन्यतेर्दीप्तिकर्मणो मन्म । दीप्तमायुधं पुनर्नेषत् । नयतु ॥ नयतेर्लेव्यडागमः । सिच्लुङ्लमिति सिप् ॥ अपि चाशस्तिमयशस्तिनं शत्रुं क्षिपत् । अस्मत्तः प्रेरयतु । दुर्मतिं दुर्बुद्धिं चाप हन् । अपहंतु । अथानंतरं शं रोगाणां शमनं योर्भयानां यावनं च करत् ॥

नराशंसो नोऽवतु प्रयाजे शं नो अस्त्वनुयाजो हवेषु ।
क्षिपदश्स्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः ॥२॥
नराशंसः । नः । अवतु । प्रऽयाजे । शं । नः । अस्तु । अनुऽयाजः । हवेषु ।
क्षिपत् । अशस्तिं । अप । दुःऽमतिं । हन् । अथ । करत् । यजमानाय । शं । योः ॥२॥

पंचम्यां प्रयाजेषु द्वितीयः प्रयाजो नराशंसदेवताकः । तस्मिन्प्रयाजे देवताभूतो नराशंसो नरैः शंसनीयोऽग्निर्नोऽस्मानवतु । रक्षतु । हवेष्वाहूतेषु सत्स्वनुयाजः । चयोऽनुयाजाः । द्वितीयोऽनुयाजो नराशंसः । तस्यानुयाजस्य देवताभूतो नराशंसोऽग्निश्च नोऽस्माकं शं सुखकरोऽस्तु । बृहस्पतिस्याशस्तिं क्षिपदित्यादि पूर्ववत् ॥

तपुर्मूर्धा तपतु रक्षसो ये ब्रह्मद्विषः शरवे हंतवा उ ।
क्षिपदश्स्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः ॥३॥
तपुःऽमूर्धा । तपतु । रक्षसः । ये । ब्रह्मऽद्विषः । शरवे । हंतवै । ऊं इति ।
क्षिपत् । अशस्तिं । अप । दुःऽमतिं । हन् । अथ । करत् । यजमानाय । शं । योः ॥३॥

तपुर्मूर्धा तापकाग्निरस्को बृहस्पती रक्षसो ये ब्रह्मद्विषो ब्राह्मणद्वेष्टारो राक्षसाः तान्राक्षसांस्तपतु । तापयतु । दहत्वित्यर्थः । किमर्थं । शरवे शत्रवे हिंसकं रक्षसामधिपतिं हंतवे हंतुं । अनुचरान्पूर्वं नाशयतु

पश्चादेनमपि नाशयत्वित्यर्थः ॥ भृ हिंसायामित्यस्माच्छ्वसृभृहीत्यादिनोप्रत्ययः । णिदित्यनुवृत्तेराद्युदात्तत्वं । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी । हंतेसुमर्थे सेसेनिति तवैप्रत्ययः । अंतश्च तवै युगपदित्यादंतयोर्युगपदुदात्तत्वं । उग्रब्दः पूरकः ॥ ॥४०॥

अपश्यमिति तृचं द्व्यार्चिशं सूक्तं वैष्टुभं । प्रजापतिपुत्रः प्रजावान्नामर्षिः । ऋचः क्रमेण यजमानपत्नीहोतॄणामाशिषः प्रतिपादिकाः । अतस्तद्देवताकाः । तथा चानुक्रांतं । अपश्यं प्रजावान्प्राजापत्योऽन्वृचं यजमानपत्नीहोचाशिष इति ॥ प्रवर्ग्येऽभिष्टव एतत्सूक्तं । सूत्र्यते हि । अपश्यं त्वेत्येतस्यान्वया यजमानमीक्षते द्वितीयया पत्नीं तृतीययात्मानं । आ० ४. ६. । इति ॥

अपश्यं त्वा मनसा चेकितानं तपसो जातं तपसो विभूतं ।
इह प्रजामिह रयिं रराणः प्र जायस्व प्रजया पुत्रकाम ॥१॥
अपश्यं । त्वा । मनसा । चेकितानं । तपसः । जातं । तपसः । विऽभूतं ।
इह । प्रऽजां । इह । रयिं । रराणः । प्र । जायस्व । प्रऽजया । पुत्रऽकाम ॥१॥

हे यजमान त्वा त्वां मनसा बुद्ध्यापश्यं । अदर्शं । कीदृशं । चेकितानं कर्माणि भृशं जानंतं तपसो दीक्षारूपाद्व्रताज्जातं पुनरुत्पन्नं यद्वा जन्मांतरानुष्ठितात्सुष्ठतादुत्पन्नं तपसोऽनुष्ठीयमानाच्चाद्येतोर्विभूतं व्याप्तं सर्वत्र प्रख्यातं । हे पुत्रकाम पुत्रान्कामयमान स त्वमिहास्मिँल्लोके प्रजां पुत्रपौत्रादिरूपां रराणो रमयन् रयिं धनमिहास्मिँल्लोके रमयन् प्रजया प्रजनेन प्र जायस्व । पुत्रादिरूपेणोत्पद्यस्व । प्रजा उत्पादयेत्यर्थः ॥

अपश्यं त्वा मनसा दीध्यानां स्वायां तनू ऋत्व्ये नाधमानां ।
उप मामुच्चा युवतिर्बभूयाः प्र जायस्व प्रजया पुत्रकामे ॥२॥
अपश्यं । त्वा । मनसा । दीध्यानां । स्वायां । तनू इति । ऋत्व्ये । नाधमानां ।
उप । मां । उच्चा । युवतिः । बभूयाः । प्र । जायस्व । प्रजया । पुत्रऽकामे ॥२॥

हे पत्नि दीध्यानां दीप्यमानां स्वायामात्मीयायां तनू तन्वां शरीर ऋत्व्ये । ऋतुकाले भवं गर्भधारणरूपं कर्मर्त्विय । तस्मिन्निमित्तभूते नाधमानां भर्तुरूपगमनं याचमानां त्वा त्वां मनसापश्यं । अद्राक्षं । हे पुत्रकामे पुत्रान्कामयमाने मामुप मत्समीपं प्राप्य सा त्वमुच्चैर्भृशं युवतिस्तरुणी बभूयाः । भूयाः ॥ छंदस्युभयथेत्याशीर्लिङः सार्वधातुकत्वाच्च्प् । तस्य च्छांदसः सुः । अलिट्यपि व्यत्ययेन भवतेरः । पा० ७. ४. ७३. । इत्यभ्यासस्यात्वं ॥ युवतिर्भूत्वा च प्रजया प्रजनेन प्र जायस्व । पुत्रान्प्रसूष्व ॥ जनी प्रादुर्भावे । श्यनि श्नाजनोर्झेति जादेशः ॥

अहं गर्भमदधामोषधीष्वहं विश्वेषु भुवनेष्वंतः ।
अहं प्रजा अजनयं पृथिव्यामहं जनिभ्यो अपरीषु पुत्रान् ॥३॥
अहं । गर्भं । अदधां । ओषधीषु । अहं । विश्वेषु । भुवनेषु । अंतरिति ।
अहं । प्रऽजाः । अजनयं । पृथिव्यां । अहं । जनिऽभ्यः । अपरीषु । पुत्रान् ॥३॥

अहं होतौषधीषु श्याम्यादिषु फलार्थं गर्भमदधां । धारयामि । विश्वेषु सर्वेष्वन्येष्वपि भुवनेषु भूतजातिष्वंतर्मध्येऽहमेव गर्भं धारयामि । तथा पृथिव्यां भूम्यां प्रजाः सर्वाश्चानुत्थानहमजनयं । जनयामि । जनिभ्यो जायाभ्योऽपरीष्वन्यास्वपि स्त्रीषु पुत्रानहमजनयं । जनयामि । मत्साध्येन यागेन सर्वस्योत्पत्तेरहं सर्वजनहेतुर्भवामीत्यर्थः ॥ ॥४१॥

विष्णुरिति तृचं चतुस्त्रिंशं सूक्तमानुष्टुभं । गर्भाणां त्वष्टा नामर्षिः प्रजापतिपुत्रो विष्णुर्वा । लिंगोक्ता विष्णुत्वष्टृप्रजापतिसिनीवालीसरस्वत्यश्विन इति देवताः । तथा चानुक्रांतं । विष्णुस्त्वष्टा गर्भकर्ता विष्णुर्वा प्राजापत्यो गर्भार्थाशीर्लिंगोक्तदैवतमानुष्टुभमिति ॥ लैंगिको विनियोगः ॥

विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ।
आ सिंचतु प्रजापतिर्धाता गर्भं दधातु ते ॥१॥
विष्णुः । योनिं । कल्पयतु । त्वष्टा । रूपाणि । पिंशतु ।
आ । सिंचतु । प्रजाऽपतिः । धाता । गर्भं । दधातु । ते ॥१॥

विष्णुर्व्यापको देवो योनिं गर्भाधानस्थानं कल्पयतु । करोतु । त्वष्टा तनुकर्तैतत्संज्ञको देवश्च रूपाणि निरूपकाणि स्त्रीत्वपुंस्त्वाभिव्यंजकानि चिह्नानि पिंशतु । अवयवीकरोतु ॥ पिश अवयवे । सुचादित्वात्तुम् ॥ एवं प्रकृप्तायां योन्यां प्रजापतीरेत आ सिंचतु । निषिंचतु । सृजत्वित्यर्थः । धाता धारको देवो हे जाये ते तव गर्भं गर्भरूपेण परिणतं तद्रेतो दधातु । तत्रैव धारयतु । स्रावपातापप्रसवा मा भूवन्नित्यर्थः ॥

गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।
गर्भं ते अश्विनौ देवावा धत्तां पुष्करस्रजा ॥२॥
गर्भं । धेहि । सिनीवालि । गर्भं । धेहि । सरस्वति ।
गर्भं । ते । अश्विनौ । देवौ । आ । धत्तां । पुष्करऽस्रजा ॥२॥

हे सिनीवालीतत्संज्ञे देवि गर्भं धेहि । निषिक्तं गर्भं धारय । हे सरस्वति त्वं च निषिक्तं गर्भं धारय । हे जाये पुष्करस्रजा पुष्करमालिनौ स्वर्णकमलाभरणावश्विनौ देवौ ते तव गर्भमा धत्तां । प्रक्षिपतां । कुरुतामित्यर्थः ॥

हिरण्ययी अरणी यं निर्मंथतो अश्विना ।
तं ते गर्भं हवामहे दशमे मासि सूतवे ॥३॥
हिरण्ययी इति । अरणी इति । यं । निःऽमंथतः । अश्विना ।
तं । ते । गर्भं । हवामहे । दशमे । मासि । सूतवे ॥३॥

हिरण्मयी हिरण्मयावरणी यं गर्भमुद्दिश्याश्विनाश्विनौ देवौ निर्मथतः निर्मथितवंतौ हे जाये ते तुभ्यं त्वदर्थं तं गर्भं हवामहे । आह्वयामहे । दशमे मासि सूतवे प्रसोतुं ॥ पड्महित्यादिना मासशब्दस्य मास्भावः । सूतेस्तुमर्थे सेसेनिति तवेन्प्रत्ययः ॥ ॥४२॥

महीति तृचं चतुस्त्रिंशं सूक्तं वरुणपुत्रस्य सत्यधृतेरार्षं गायत्रमादित्यदेवताकं । तथा चानुक्रांतं । महि सत्यधृतिर्वारुणिरादित्यं स्वस्त्ययनं गायत्रं वा इति ॥ धनलिप्सया प्रवसंतं शिष्यमाचार्योऽनेन सूक्तेनाभिमंत्रयते । सूत्र्यते हि । महि चीणामित्यनुमंत्र्यैवमतिरुष्टस्य न कुतश्चिद्भयं भवतीति विज्ञायते । आ० गृ० ३. १०. ७–८. । इति ॥

महि चीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः । दुराधर्षं वरुणस्य ॥१॥
महि । चीणां । अवः । अस्तु । द्युक्षं । मित्रस्य । अर्यम्णः । दुःऽआधर्षं । वरुणस्य ॥१॥

चीषां चयाणां मित्रस्यार्यम्णो वरुणस्य च सुखं दीप्तं अत एव दुराधर्षमन्यैर्धर्षितुं बाधितुमशक्यं महि महद्वो रक्षणमस्माकमस्तु। चीषामित्यपि छंदसि दृश्यत इति वचनात्। का० ७. १. ५३. १। चयादेशाभावः। नामन्यतरस्यामिति नाम उदात्तत्वं ॥

नहि तेषाममा चन नाध्वसु वारणेषु। ईशे रिपुरघशंसः ॥२॥

नहि। तेषाँ। अमा। चन। न। अध्वऽसु। वारणेषु। ईशे। रिपुः। अघऽशंसः ॥२॥

अमेति गृहनाम। अमा चन गृहेष्वपि तेषां वरुणमित्रार्यम्णां तदनुगृहीतानां स्तोतॄणां बाधशंसो ऽघमनर्थमाशंसमानो रिपुः शत्रुर्न हीशे। न खलु हिंसितुमीष्टे ॥ स्तोपस्य आत्मनेपदेष्विति तलोपः। अनुदात्तेत्त्वाच्चसार्वधातुकानुदात्तत्वे धातुस्वरः शिष्यते ॥ तथाध्वसु मार्गेषु वारणेषु यत्र पुरुषा निवार्यंते तेषु च स्थानेषु शत्रुर्निवारयितुं नेष्टे ॥

यस्मै पुत्रासो अदितेः प्र जीवसे मर्त्याय। ज्योतिर्यच्छन्त्यजस्रं ॥३॥

यस्मै। पुत्रासः। अदितेः। प्र। जीवसे। मर्त्याय। ज्योतिः। यच्छन्ति। अजस्रं ॥३॥

अदितेरदीनाया देवमातुः पुत्रासः पुत्रा मित्रादयो यस्मै मर्त्याय मनुष्याय स्तोत्रेऽजस्रमविच्छिन्नं ज्योतिस्तेजो जीवसे जीवितुं प्रयच्छंति तस्य शत्रुर्नेश्वर इत्यर्थः ॥ ॥४३॥

वात इति तृचं पंचत्रिंशं सूक्तं वातगोचस्तोत्रस्यार्षं गायत्रं वायुदेवताकं। तथा चानुक्रांतं। वातो वातायन उलो वायव्यमिति ॥ गतो विनियोगः ॥

वात आ वातु भेषजं शंभु मयोभु नो हृदे। प्र ण आयूंषि तारिषत् ॥१॥

वातः। आ। वातु। भेषजं। शंऽभु। मयःऽभु। नः। हृदे। प्र। नः। आयूंषि। तारिषत् ॥१॥

वातो वायुर्नोऽस्माकं हृदे हृदयाय भेषजमौषधमुदकं वा वातु। आगमयतु। कीदृग्भूतं। शंभु रोगशमनस्य भावयितृ मयोभु सुखस्य च भावयितृ। अपि च नोऽस्माकमायूंषि प्र तारिषत्। प्रवर्धयतु ॥

उत वात पितासि न उत भ्रातोत नः सखा। स नो जीवातवे कृधि ॥२॥

उत। वात। पिता। असि। नः। उत। भ्राता। उत। नः। सखा। सः। नः। जीवातवे। कृधि ॥२॥

उतापि च हे वात त्वं नोऽस्माकं पितासि। उत्पादको भवसि। उतापि च भ्राता भवसि। उतापि च नोऽस्माकं सखा समानस्थानो मित्रभूतश्च भवसि। स त्वं नोऽस्माञ्जीवातवे जीवनहेतवे यागाय कृधि। कृधु ॥ करोतेश्छांदसो विकरणस्य लुक्। शृणुपृकृवृभ्य इति हेर्धिः ॥

यददो वात ते गृहेऽमृतस्य निधिर्हितः। ततो नो देहि जीवसे ॥३॥

यत्। अदः। वात। ते। गृहे। अमृतस्य। निऽधिः। हितः। ततः। नः। देहि। जीवसे ॥३॥

हे वात वायो ते तव गृहे स्थाने यददो योऽसावमृतस्यामरणस्य निधिर्निक्षेपो हितः स्थापितो वर्तते ततस्तस्मान्निधेराहृत्यामृतत्वं जीवसे नोऽस्माकं जीवनाय देहि। प्रयच्छ ॥ ॥४४॥

प्राग्नय इति पंचर्चं षट्त्रिंशं सूक्तं । अग्निः पुत्रस्य वत्सस्यार्षं गायत्रमाग्नेयं । तथा चानुक्रांतं । प्राग्नये पंचाग्नेयो वत्स आग्नेयं त्रिति ॥ प्रातरनुवाकाश्विनशस्त्रयोर्गायत्रे छंदसीदमादिके द्वे सूक्ते । सूच्यते हि । प्राग्नये वाचमिति सूक्ते इमां मे अग्ने समिधं । आ० ४. १३. । इति ॥ दशरात्रस्य नवमेऽहन्याग्निमारुतं इदं जातवेदसं निविद्धानं । सूचितं च । मरुतो यस्य हि प्राग्नये वाचमित्याग्निमारुतं । आ० ८. ११. । इति ॥

प्राग्नये वाचमीरय वृषभाय क्षितीनां । स नः पर्षदति द्विषः ॥१॥
प्र । अग्नये । वाचं । ईरय । वृषभाय । क्षितीनां । सः । नः । पर्षत् । अति । द्विषः ॥१॥

हे स्तोतः अग्नये स्तुतिरूपां वाचं प्रेरय । उच्चारय । कथंभूताय । क्षितीनां मनुष्याणां यजमानानां वृषभाय कामानां वर्षित्रे । किं प्रयोजनमिति चेत् । सोऽग्निर्नोऽस्मान्द्विषो द्वेष्टृनति पर्षत् । अतिपारयेत् ॥

यः परस्याः परावतस्तिरो धन्वातिरोचते । स नः पर्षदति द्विषः ॥२॥
यः । परस्याः । पराऽवतः । तिरः । धन्व । अतिऽरोचते । सः । नः । पर्षत् । अति । द्विषः ॥२॥

योऽग्निः परस्याः परावतोऽतिशयिताद्दूरदेशात्तिरः । प्राप्तनामैतत् । प्राप्तसंबंधं धन्व मरुभूमिं जलवर्जितं देशमतिरोचते अतिक्रम्य प्रज्वलति । यद्वा । धन्वांतरिक्षं । धन्वांतरिक्षं तिरश्चिर्यगतिरोचते भृशं प्रकाशयते । गतमन्यत् ॥

यो रक्षांसि निजूर्वति वृषा शुक्रेण शोचिषा । स नः पर्षदति द्विषः ॥३॥
यः । रक्षांसि । निऽजूर्वति । वृषा । शुक्रेण । शोचिषा । सः । नः । पर्षत् । अति । द्विषः ॥३॥

वृषा वर्धिता योऽग्निः शुक्रेण निर्मलेन शुभ्रवर्णेन वा शोचिषा तेजसा रक्षांसि यज्ञस्य हंतॄणि निजूर्वति निहिनस्ति । जूर्वी हिंसार्थः । गतमन्यत् ॥

यो विश्वाभि विपश्यति भुवना सं च पश्यति । स नः पर्षदति द्विषः ॥४॥
यः । विश्वा । अभि । विऽपश्यति । भुवना । सं । च । पश्यति । सः । नः । पर्षत् । अति । द्विषः ॥४॥

योऽग्निः सूर्यरूपेण विश्वा विश्वानि सर्वाणि भूतजातान्यभिमुखं विपश्यति विशेषेण तेजसा प्रेक्षते । प्रकाशयतीत्यर्थः । भुवना भुवनानि भूतजातानि सं पश्यति च सम्यग्जानाति च । अन्यत्समं ॥

यो अस्य पारे रजसः शुक्रो अग्निरजायत । स नः पर्षदति द्विषः ॥५॥
यः । अस्य । पारे । रजसः । शुक्रः । अग्निः । अजायत । सः । नः । पर्षत् । अति । द्विषः ॥५॥

अस्य रजसो लोकस्यांतरिक्षस्य पार उपरिदेशे शुक्रः शुभ्रवर्णो योऽग्निर्विद्युदात्मना सूर्यात्मना वाजायत प्रादुर्भवति स नोऽस्मान्द्विषो द्वेष्टृनति पर्षत् । अतिपारयतु ॥ ॥४५॥

प्र नूनमिति तृचं सप्तचित्रं सूक्तं । अग्निपुत्रस्य श्येनस्यार्षं गायत्रं जातवेदोगुणकोऽग्निर्देवता । तथा चानुक्रांतं । प्र नूनं तृचमाग्नेयः श्येनो जातवेदस्यमिति ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

प्र नूनं जातवेदसमश्वं हिनोत वाजिनं । इदं नो बर्हिरासदे ॥ १॥
प्र । नूनं । जातऽवेदसं । अश्वं । हिनोत । वाजिनं । इदं । नः । बर्हिः । आऽसदे ॥ १॥

जातवेदसं जातानां वेदितारं जातधनादिकं वाश्वं कर्मभिर्व्याप्नुवंतं वाजिनमन्नवंतं हे ऋत्विग्यजमानाः नूनमवश्यं प्र हिनोत । प्रवर्धयत । यद्वा । अश्वमिव स्तुतिभिः प्रेरयत ॥ हि गतौ वृद्धौ च । अस्माल्लोटि तप्तनप्तनथनाश्चेति तबादेशः ॥ किमर्थं । नोऽस्माकमिदं बर्हिरास्तीर्णमासद आसत्तुं प्राप्तुं । बर्हिरासीदत्वित्यर्थः ॥ सदेः क्त्यार्थे तवैकेनिति केन्प्रत्ययः ॥

अस्य प्र जातवेदसो विप्रवीरस्य मीळ्हुषः । महीमियर्मि सुष्टुतिं ॥ २॥
अस्य । प्र । जातऽवेदसः । विप्रऽवीरस्य । मीळ्हुषः । महीं । इयर्मि । सुऽस्तुतिं ॥ २॥

जातवेदसो जातानां वेदितुर्विप्रवीरस्य । विप्रा मेधाविनो यजमाना वीराः पुत्रा यस्य । तादृशस्य मीळ्हुषः सेक्तुरस्यापेर्महीं महतीं सुष्टुतिं शोभनां स्तुतिं प्रेयर्मि । प्रेरयामि ॥ ऋ गतौ जौहोत्यादिकः । अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं ॥

या रुचो जातवेदसो देवत्रा हव्यवाहनीः । ताभिर्नो यज्ञमिन्वतु ॥ ३॥
याः । रुचः । जातऽवेदसः । देवऽत्रा । हव्यऽवाहनीः । ताभिः । नः । यज्ञं । इन्वतु ॥ ३॥

जातवेदसोऽग्नेर्या रुचो रोचमानाः कालीकरालीप्रभृतयः सप्त जिह्वा देवत्रा देवान्प्रति ॥ देवमनुष्यपुरुषपुरुमर्त्येभ्य इत्यादिना द्वितीयार्थे चाप्रत्ययः ॥ हव्यवाहनीर्हव्यानां हविषां वोढ्र्यः प्रापयित्र्यो भवंति ॥ वा छंदसीति जसि पूर्वसवर्णदीर्घः ॥ ताभिर्जिह्वाभिर्नोऽस्माकं यज्ञं यागसाधनं हविरिन्वतु । देवान्प्रापयतु ॥ इवि व्याप्तौ । इदित्त्वान्नुम् ॥ ॥ ४६॥

आयं गौरिति तृचमष्टाचिंशं सूक्तं गायत्रं । सार्पराज्ञी नामर्षिका । सैव देवता सूर्यो वेति । तथा चानुक्रांतं । आयं गौः सार्पराज्ञ्यात्मदेवतं सौर्यं वेति ॥ अविवाक्येऽहनि मानसयह एतत्सूक्तं शंसनीयं । सूचितं च । आयं गौः पृश्निरक्रमीदित्युपांशु तिस्रः पराचीः शस्त्वा । आ० ८. १३. । इति ॥

आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः ॥ १॥
आ । अयं । गौः । पृश्निः । अक्रमीत् । असदत् । मातरं । पुरः । पितरं । च । प्रऽयन् । स्वऽरिति स्वः ॥ १॥

गौर्गमनशीलः पृश्निः प्राप्तवर्णः प्राप्ततेजा अयं सूर्य आक्रमीत् । आक्रांतवान् । उदयाचलं प्राप्तवानित्यर्थः । आक्रम्य च पुरः पुरस्तात्पूर्वस्यां दिशि मातरं सर्वभूतजातस्य निर्मात्रीं पृथिवीमसदत् । आसीदति । प्राप्नोति ॥ सदेश्छांदसो लुङ् । लृदित्त्वाच्लेरङादेशः ॥ ततः पितरं पालकं द्युलोकं चशब्दादंतरिक्षं च प्रयन् प्रकर्षेण शीघ्रं गच्छन् स्वः स्वरणः शोभनगमनो भवति । यद्वा । पितरं स्वर्गलोकं प्रयन्वर्तते ॥

अंतश्चरति रोचनास्य प्राणादपानती । व्यख्यन्महिषो दिवं ॥ २॥
अंतरिति । चरति । रोचना । अस्य । प्राणात् । अपऽअनती । वि । अख्यत् । महिषः । दिवं ॥ २॥

अस्य सूर्यस्य रोचना रोचमाना दीप्तिरंतः शरीरमध्ये मुख्यप्राणात्मना चरति । वर्तते । किं कुर्वती । प्राणादपानती । मुख्यप्राणस्य प्राणाद्वाः पंच वृत्तयः । तत्र प्राणनं नाडीभिरूर्ध्वं वायोर्निर्गमनं । तथाविधा-

त्प्राणात्प्राणनादनंतरमपानती । अपानं नाडीभिरवाञ्चुखं वायोर्मयनं । तत्कुर्वती ॥ अपपूर्वादनितिर्लटः शतु । अदादित्वाच्छपो लुक् । उगितश्चेति ङीप् । शतुरनुम इति नद्या उदात्तत्वं ॥ यद्वा । अंतर्द्यावापृथिव्योर्मध्येऽस्य सूर्यस्य रोचना रोचमाना दीप्तिश्चरति । गच्छति ॥ दीप्तौ । अनुदात्तेतश्च हलादेरिति युच् ॥ किं कुर्वती । प्राणात्प्राणनादुदयानंतरमपानती सायंसमयेऽस्तं गच्छंती । ईदृश्या दीप्त्या युक्तः । अत एव महिषो महान्सूर्यो दिवमंतरिक्षमुदयास्तमययोर्मध्ये व्यख्यत् । विचष्टे । प्रकाशयति ॥ महेरविमह्योष्टिषच् । उ० १. ४६ । इत्यौणादिकष्टिषच्प्रत्ययः । चक्षिङः ख्याञ् । छांदसे लुङ्यस्यतिवक्तीत्यादिना च्लेरङादेशः ॥

चिंशद्धाम॒ वि रा॑जति॒ वाक्प॑तं॒गाय॑ धीयते । प्रति॒ वस्तो॒रह॒ द्युभिः ॥ ३॥

चिंशत्। धाम॑। वि। रा॒ज॒ति॒। वाक्। प॒तं॒गाय॑। धी॒य॒ते॒। प्रति॑। वस्तोः॑। अह॑। द्युऽभिः॑ ॥३॥

चिंशद्धाम धामानि स्थानानि ॥ वचनव्यत्ययः ॥ वस्तोर्वासरस्याहोरात्रस्यावयवभूतानि । अहशब्दोऽवधारणे । द्युभिः सूर्यस्य दीप्तिभिरेव वि राजति । विराजते । विशेषेण दीप्यते ॥ व्यत्ययेनैकवचनं ॥ मुहूर्तान्यत्र धामान्युच्यंते । पंचदश रात्रेः पंचदशाहः । पतंगाय । पतति गच्छतीति पतंगः सूर्यः । तस्मै श्रुतिरूपा वाक् प्रति धीयते । प्रतिमुखं स्तोतृभ्यः क्रियते । यद्वा । वस्तोरहनि चिंशद्धामानि । घटिकाभिप्रायमेतत् । चिंशद्घटिकाः ॥ अत्यंतसंयोगे द्वितीया ॥ एतावंतं कालं द्युभिर्दीप्तिभिरसौ सूर्यो वि राजति । विशेषेण दीप्यते । तस्मिंश्च समये वाक् ऋचीरूपा तस्मै सूर्यरूपाय पतंगाय प्रति धीयते । प्रतिमुखं धार्यते । स्तूयते सूर्यः सर्वत इत्यर्थः । श्रूयते हि । ऋग्भिः पूर्वाह्णे दिवि देव ईयते यजुर्वेदे तिष्ठति मध्ये अह्न इत्यादि । तै० ब्रा० ३. १२. ९. १. ॥ यदा खिदं सूक्तं सार्परराज्ञ्या आत्मस्तुतिः तदा सूर्यात्मना स्तूयत इत्यवगंतव्यं ॥ ॥ ४७ ॥

ऋतमिति तृचमेकोनचत्वारिंशं सूक्तं मधुच्छंदसः पुत्रस्याघमर्षणस्यार्षमानुष्टुभं । राज्यादीनां भावानां स्रष्ट्यादिप्रतिपादकत्वात्तादृग्रूप एवार्थो देवता । तथा चानुक्रांतं । ऋतं माधुच्छंदसोऽघमर्षणो भाववृत्तमानुष्टुभं स्त्रिति ॥ लिंगाद्विनियोगोऽवगंतव्यः ॥

ऋ॒तं च॑ स॒त्यं चा॒भीद्धा॒त्तप॒सोऽध्य॑जायत । ततो॒ रात्र्य॑जायत॒ ततः॑ समु॒द्रो अ॑र्ण॒वः ॥ १॥

ऋ॒तं च॑ स॒त्यं चा॒भीद्धा॒त्तप॒सोऽध्य॑जायत । ततो॒ रात्र्य॑जायत॒ ततः॑ समु॒द्रो अ॑र्ण॒वः ॥ १॥

ऋतमिति सत्यनाम । ऋतं मानसं यथार्थसंकल्पनं सत्यं वाचिकं यथार्थभाषणं । चकाराभ्यामन्यदपि शास्त्रीयं धर्मजातं समुच्चीयते । तत्सर्वमभीद्धादभितप्तादूर्ध्वमणा पुरा स्रष्ट्यर्थं कृतात्तपसोऽधि । अध्युपर्यर्थे । उपर्यजायत । उदपद्यत । तपस्तप्त्वेदं सर्वमसृजत । तै० आ० ८. ६. । इति श्रुतेः । तपस्वात्र स्रष्टव्यपर्यालोचनलक्षणं । यस्य ज्ञानमयं तपः । सुं० उ० १. १. ९. । इति श्रुत्यंतरात् ॥ अभिपूर्वादिंधेः कर्मणि निष्ठा । स्वीदितो निष्ठायामितीट्प्रतिषेधः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । स्वरितो वानुदात्ते पदादावित्येकादेशः स्वर्यते ॥ यद्वा । अभीद्धादभितः प्रकाश्यमानात्परमात्मनो मायाधिष्ठानरूपापादानभूतादृतं सत्यं चाजायत ॥ जनिकर्तुः प्रकृतिः । पा० १. ४. ३०. । इति प्रकृतेरपादानसंज्ञा ॥ ततस्तस्मादेवेश्वराद्रात्र्यै । उपलक्षणमेतद्भूयोऽपि । अहश्च रात्र्यै चाजायत ॥ रात्रेश्चाजसाविति ङीप् ॥ ततस्तस्मादेवेश्वरादर्णवोऽर्णसोदकेन युक्तः समुद्रश्चाजायत । समुद्रशब्दोऽंतरिक्षोदध्योः साधारण इत्यभिमतार्थस्य प्रकाश्यनायार्णवशब्देन विशेष्यते ॥ अर्णसः सलोपश्च । का० ५. २. १०९. ३. । इति मत्वर्थीयो वप्रत्ययः सलोपश्च ॥

स॒मु॒द्रादर्ण॒वादधि॑ संवत्स॒रो अ॑जायत ।
अ॒हो॒रा॒त्राणि॑ वि॒दध॒द्विश्व॑स्य मिष॒तो व॒शी ॥ २॥

स॒मु॒द्रादर्ण॒वादधि॑ संवत्स॒रो अ॑जायत ।
अ॒हो॒रा॒त्राणि॑ वि॒दध॒द्विश्व॑स्य मिष॒तो व॒शी ॥ २॥

अर्णवात्समुद्रात्स्वष्टादध्यूर्ध्वं संवत्सरः संवत्सरोपलक्षितः सर्वः कालोऽजायत। श्रूयते हि। सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि कला मुहूर्ताः काष्ठाश्च। तै० आ० १०. १. २.। इति। स चेश्वरोऽहोरात्राद्यैतदुपलक्षितानि सर्वाणि भूतानि विदधत् कुर्वन् सृजन्॥ अभ्यस्तानामादिरित्याद्युदात्तत्वं। ततः समासे छदुत्तरपदप्रकृतिस्वरत्वं॥ निमेषादियुक्तस्य विश्वस्य सर्वस्य प्राणिजातस्य वशी स्वामी भूत्वा वर्तते॥

सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चांतरिक्षमथो स्वः ॥३॥
सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चांतरिक्षमथो स्वः ॥३॥

सूर्याचंद्रमसौ कालस्य ध्वजभूतौ दिवं च पृथिवीं चांतरिक्षं च इत्थं विभुवनं स्वः। स्वःशब्दः सुखवाची। दिवो विशेषणं। सुखरूपां दिवं। तदेतत्सर्वं धाता विधाता यथा पूर्वं पूर्वस्मिन्काले ऽकल्पयत् सृष्टवान् तथैवागामिन्यपि कल्पे कल्पयिष्यतीत्यर्थः॥ ॥४८॥

संसमिति चतुर्ऋचं चत्वारिंशं सूक्तं संवननस्यार्षं। समानो मंत्र इति तृतीया त्रिष्टुप् शिष्टास्तिस्रोऽनुष्टुभः। प्रथमाया अग्निर्देवता। शिष्टानां संज्ञानं। अनुक्रम्यते च। संसं चतुष्कं संवननः संज्ञानमाद्यायेयी तृतीया त्रिष्टुप् तृतीया त्रिष्टुबिति। आनुष्टुभं त्विति पूर्वमुक्तत्वादवशिष्टानामनुष्टुप्त्वं॥ सूक्तविनियोगो लैंगिकः॥

संसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ। इळस्पदे समिध्यसे स नो वसून्या भर॥१॥
संऽसं। इत्। युवसे। वृषन्। अग्ने। विश्वानि। अर्यः। आ। इळः। पदे। सं। इध्यसे। सः। नः। वसूनि। आ। भर॥१॥

हे वृषन्कामानां वर्षितरग्ने अर्य ईश्वरस्त्वं॥ अर्यः स्वामिवैश्ययोः। पा० ३. १. १०३.। इति यत्प्रत्ययांतो निपातितः। अर्यः स्वाम्याख्यायां। फि० १. १८.। इत्यंतोदात्तत्वं॥ स त्वं विश्वानि सर्वाणि भूतजातानि संसं॥ प्रसमुपोदः पादपूरणे। पा० ८. १. ६.। इति समो द्विर्वचनं॥ इळश्छंदोऽवधारणे। आ समंतात्सं युवसे। मिश्रयसि। देवेषु मध्ये त्वमेव सर्वाणि भूतजातानि वैश्वानरात्मना व्याप्नोषि। नान्य इत्यर्थः। किंचेळ इडायाः पृथिव्याः पदे स्थाने उत्तरवेदिलक्षणे। एतद्वा इळायास्पदं यदुत्तरवेदीनाभिः। ऐ० ब्रा० १. २८.। इति ब्राह्मणं। तत्र त्वं समिध्यसे। ऋत्विग्भिः संदीप्यसे। स तादृशस्त्वं नोऽस्माकं वसूनि धनान्या भर। आहर॥

सं गच्छध्वं सं वदध्वं सं वो मनांसि जानतां।
देवा भागं यथा पूर्वे संजानाना उपासते ॥२॥
सं। गच्छध्वं। सं। वदध्वं। सं। वः। मनांसि। जानतां।
देवाः। भागं। यथा। पूर्वे। संऽजानानाः। उपऽआसते ॥२॥

हे स्तोतारः यूयं सं गच्छध्वं। संगताः संभूता भवत॥ समो गम्यृच्छीत्यादिना गमेरात्मनेपदं॥ तथा सं वदध्वं। सह वदत। परस्परं विरोधं परित्यज्यैकविधमेव वाक्यं ब्रूतेति यावत्॥ व्यक्तवाचां समुच्चारणे। पा० १. ३. ४८.। इति वदेरात्मनेपदं॥ वो युष्माकं मनांसि सं जानतां। समानमेकरूपमेवार्थमवगच्छंतु॥ संप्रतिभ्यामनाध्याने। पा० १. ३. ४६.। इति जानातिरात्मनेपदं॥ यथा पूर्वे पुरातना देवाः संजानाना ऐकमत्यं प्राप्ता हविर्भागमुपासते यथास्वं स्वीकुर्वंति तथा यूयमपि वैमत्यं परित्यज्य धनं स्वीकुरुतेति शेषः॥

समानो मंत्रः समितिः समानी समानं मनः सह चित्तमेषां।
समानं मंत्रमभि मंत्रये वः समानेन वो हविषा जुहोमि ॥३॥

समानः । मंत्रः । संऽइतिः । समानी । समानं । मनः । सह । चित्तं । एषां ।
समानं । मंत्रं । अभि । मंत्रये । वः । समानेन । वः । हविषा । जुहोमि ॥३॥

पूर्वोऽर्धर्चः परोक्षकृतः उत्तरः प्रत्यक्षकृतः । एषामेकस्मिन्कर्मणि सह प्रवृत्तानामृत्विजां स्तोतॄणां वा मंत्रः स्तुतिः शस्त्राद्यात्मका गुह्यभाषणं वा समान एकविधोऽस्तु । तथा समितिः प्राग्निरपि समान्येकरूपास्तु ॥ केवलमामकेत्यादिना समानशब्दाद्ङीप् । उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वं ॥ तथा मनो मननसाधनमंतःकरणं चैषां समानमेकविधमस्तु । चित्तं विचारज्ञं ज्ञानं तथा सह सहितं परस्परस्वीकार्येणैकीभूतमस्तु । अहं च वो युष्माकं समानमेकविधं मंत्रमभि मंत्रये । ऐकविध्याय संस्करोमि । तथा वो युष्माकं स्वभूतेन समानेन साधारणेन हविषा चरुपुरोडाशादिनाहं जुहोमि ॥ तृतीया च होश्छंदसि । पा० २. ३. ३. । इति कर्मणि कारके तृतीया ॥ वषट्करिष्ण हविः प्रक्षेपयामीत्यर्थः ॥

समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥४॥
समानी । वः । आऽकूतिः । समाना । हृदयानि । वः ।
समानं । अस्तु । वः । मनः । यथा । वः । सुऽसह । असति ॥४॥

हे ऋत्विग्यजमानाः वो युष्माकमाकूतिः संकल्पोऽध्यवसायः समान्येकविधोऽस्तु । तथा वो युष्माकं हृदयानि समानान्येकविधानि संतु । तथा वो युष्माकं मनोऽंतःकरणं । प्रत्येकापेक्षयैकवचनं । तदपि समानमस्तु । यथा वो युष्माकं सुसह शोभनं साहित्यमसति भवति तथा समानमस्त्वित्यन्वयः ॥ असेर्लेटि बहुलं छंदसीति श्नपो लुगभावः ॥ ॥४९॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थाश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्येऽष्टमाष्टकेऽष्टमोऽध्यायः संपूर्णः ॥

ग्रामण्यदेशजातेन श्रीगोतीर्थनिवासिना ।
मोक्षमूलरभट्टेन भाष्यमिदं विशोधितं ॥

॥ श्रीरस्तु ॥

॥ कल्याणं भूयात् ॥

APPENDIX.

THE

KHILAS OF THE RIG-VEDA.

REMARKS.

SOME of the MSS. of the Sa*m*hitâ-text contain a number of hymns, or sometimes single verses, which are not explained by Sâya*n*a, and did not form part of what the Brâhmans consider the canonical text of the Rig-veda. They are called 'Khila' and in some MSS. 'Parisish*ta*,' or 'Pada*s*ish*ta*.' I have never met with them in the Pada-text of the Rig-veda, and some of the Sa*m*hitâ MSS. also omit them. Still, some of them may claim a considerable antiquity; and though they are not included in the index of the hymns ascribed to Kâtyâyana, there can be no doubt that they were known to Kâtyâyana's predecessor, Saunaka, who was the author of several Anukrama*n*îs to the Rig-veda. He mentions the Khilas in general in the introduction to his Anuvâka-anukrama*n*î:

एकैकमनुवाकं तु खिलानि ब्राह्मणानि च । संवत्सरे संवत्सरे पठेदहरहः शुचिः ॥

Again, in the third verse of the same Anukrama*n*î, between the 13th and 14th Anuvâka of the first Ma*n*dala, Saunaka states distinctly that he does not enumerate the Khailika Anuvâkas:

खैलिकानामनादेशोऽस्मिन् ग्रंथेऽनुवाकानां । यस्तु चर्चायते वेदे तस्य संख्येति न श्रुतिः ॥[1]

Where the number of the Anuvâkas, of the Sûktas, the Vargas, the verses, the metres, and of the single words in the Rig-veda is given by Saunaka (the words amount to 153,826), the Khilas are never taken into account. But the very fact that they were not counted by Saunaka, and that he himself says so, shows that they existed in his time. The number of hymns in the Sâkala-sâkhâ is 1017, but, as Saunaka says, exclusive of the Khilas: सहस्रमेतत्सूक्तानां निश्चितं खैलिकैर्विना दश सप्त च पठ्यंते. The Bâshkala-sâkhâ, according to Saunaka, contained eight hymns more, but again, as he says, exclusive of Khilas: एतत्सहस्रं दश सप्त चैव अष्टावतो बाष्कलकेऽधिकानि । तान्पारणे शाकले शैशिरीये[2] वदंति शिष्टा न खिलेषु विप्राः ॥ Another proof of the antiquity of these Khila-hymns consists in their being quoted in the Nirukta[3]. In Pâ*n*ini the Khilas are not mentioned except in the Ga*n*apâ*th*a.

[1] This is the original reading, which has afterwards been changed into खैलिकानामनादेशोऽनुवाकानामिह स्मृतः. The commentary adds, अतोऽन्योत्तरत्रापि खिलवर्जमृगुच्यत इति भावः ।. In Saunaka's Ârshânukrama*n*î the Khilas seem to have been mentioned.

[2] शैशिरीया इति पठंत्यन्ये ।

[3] Cf. Roth, Abhandlungen, p. 31.

Some of the verses which are Khilas in the Rig-veda occur in the text of the Âtharvaṇa. In the Vâgasaneyi-saṃhitâ several entire Adhyâyas are called Khila (XXVI–XXXV), and even in the latest works of the Vaidik period, in the Âraṇyakas and Upanishads, some portions are still marked as apocryphal. The 7th and 8th Adhyâyas of the Bṛihadâraṇyaka are called Khila and Parisishṭa in the commentary (p. 948, ed. Roer), and the whole Yâgñikî Upanishad is called by the same name. In the epic poem of the Mahâbhârata the Harivaṃśa is reckoned as a Khila.

The Khilas generally occur at the end of Maṇḍalas and Anuvâkas, not of Ashṭakas and Adhyâyas—another proof of the early date of their insertion.

For the text of the Khilas I have used, besides the Saṃhitâ MSS. (S 1. S 2. S 3. S 4), my own MS. of Parisishṭas, which I call P. This MS. begins: श्रीगणेशाय नमः ॥ प्रथमाष्टके शून्य ॥ द्वितीयाष्टके०पंचमाध्याये मंडलांते ॥ मा विभेर्न etc. It ends: शंनो अस्तु द्विपदे शं चतुष्पदे ॥ १॥ इति परिशिष्टानि संपूर्णानि ॥ ॥ संवत् १९१५ माघे मासे द्वादश्यां इंदुवासरे तद्दिने संपूर्ण ॥ I have also quoted the more important readings of Prof. Aufrecht's edition (A), and of Râgârâma Śâstri and Śivarâma Śâstri's edition (R), where the Parisishṭas are printed as an appendix to the eighth Ashṭaka.

The accents are given in some of the MSS., while in others they are omitted. But even where they are given, as in P, they are mostly placed at random, and have therefore as a rule been omitted in this reprint. The text, too, is often corrupt, and has been restored as best it could be, from our MSS., without attempting any conjectural emendations.

॥ अथ खैलिकानि सूक्तानि ॥

१.

शनैश्चित्सूर्येण आदित्येन सहीयसा ।
अहं यशस्विनां यशो विद्यारूपाण्या ददे ॥ १॥
उद्यन्नद्य वि[1] नो भज पिता पुत्रेभ्यो यथा ।
दीर्घायुत्वस्य हेशिषे तस्य नो देहि[2] सूर्य ॥ २॥
उद्यंतं त्वा मित्रमह आरोहंतं विचक्षण ।
पश्येम शरदः शतं जीवेम शरदः शतं ॥ ३॥

1. This Khila is given at the end of the ninth Anuvâka of the first Maṇḍala (Rv. I. 50), in S 3. It is counted as the 9th Varga, but in order to adjust the numbers the 20th Varga is counted twice. It does not occur in S 1. S 2. S 4, nor in MSS. Bodl. Wilson 429, 435, 443, nor in P and R.

[1] वि A. मि S 3.

[2] देहि TBr. III. 7, 6, 22. A. धेहि S 3.

२.

मा बिभेर्न मरिष्यसि परि त्वा पामि सर्वतः ।
घनेन हन्मि वृश्चिकमहं[1] दंडेनागतं ॥१॥
आदित्यरथवेगेन विष्णुबाहुबलेन[2] च ।
गरुडपक्षनिपातेन भूमिं गच्छ महायशाः ॥२॥
गरुडस्य जातमात्रेण त्रयो लोकाः प्रकंपिताः ।
प्रकंपिता मही सर्वा सशैलवनकानना ॥३॥[3]
गगनं[4] नष्टचंद्रार्कं ज्योतिषं न प्रकाशते ।
देवता भयभीताश्च[5] मारुतो न प्रवायति मारुतो न प्रवायत्यों नमः[6] ॥४॥
भोः[7] सर्प भद्रं भद्रं ते दूरं गच्छ महायशाः[8] ।
जनमेजयस्य[9] यज्ञांते आस्तीकवचनं स्मर ॥५॥
आस्तीकवचनं श्रुत्वा यः सर्पो न निवर्तते ।
शतधा भिद्यते मूर्ध्नि शिंशवृक्षफलं यथा ॥६॥[10]
यो जरत्कारुणा जातो[11] जरत्कन्यां महायशाः ।[12]
तस्य सर्पाप[13] भद्रं ते भूमिं[14] गच्छ महायशाः ॥७॥[15]
असितं चार्थसिद्धिं च सुनीतिं चापि यः स्मरेत् ।
दिवा वा यदि वा रात्रौ नास्ति सर्पभयं हरेत्[16] ॥८॥[17]
अगस्तिर्माधवश्चैव मुचुकुंदो महामुनिः ।
कपिलो मुनिरास्तीकः पंचैते सुखशायिनः ॥९॥

2. Khila found at the end of the first Mandala, in S 1. S 3. S 4. It is not given in S 2, nor in MSS. Bodl. Wilson 429, 435.

[1] For °महं R reads °महिं. Cf. Av. X. 4, 9.

[2] For विष्णुबाहु° S 4 and P read विष्णोर्बाहु°.

[3] इति पदशिष्टं S 4, which gives only these three verses.

[4] गगणं A. [5] भयविचला S 3. A.

[6] मारुतो न प्रवायत्यों नमः deest in S 3.

[7] भो without Visarga, MSS.

[8] महायशाः P. R. महाविषाः S 1. S 3. महाविष A. [9] जनमेजयस्य S 3. A.

[10] Verses 5 and 6 occur Mahâbhârata I. 2190:

सर्पापसर्प भद्रं ते गच्छ सर्प महाविष ।
जनमेजयस्य यज्ञांते आस्तीकवचनं स्मर ॥
आस्तीकस्य वचः श्रुत्वा यः सर्पो न निवर्तते ।
शतधा भिद्यते मूर्ध्नि शिंशवृक्षफलं यथा ॥

[11] P has जरत्कारुणाज्जातो, another MS. has जगत्कारणाज्जातो.

[12] Cf. Mahâbhârata I. 2188:

यो जरत्कारुणा जातो जरत्कारौ महायशाः ।

[13] सर्पाप P. सर्पापि R. One MS. has सर्पाऽभि.

[14] भूमिं P. दूरं R, and one MS.

[15] This and the following verses (7 to 10) occur only in P. R gives our verse 7 as verse 8, and our verse 10 as verse 7. The other two verses are not given in R.

[16] One MS. has भवेत्.

[17] Cf. Mahâbhârata I. 2189:

असितं चार्त्तिमनंतं च सुनीथं चापि यः स्मरेत् ।
दिवा वा यदि रात्रौ वा नास्ति सर्पभयं भवेत् ॥

नर्मदायै नमः प्रातर्नर्मदायै नमो निशि ।
नमोऽस्तु नर्मदे तुभ्यं त्राहि मां विषसर्पतः ॥१०॥

३.

भद्रं वद दक्षिणतो भद्रमुत्तरतो वद ।
भद्रं पुरस्तान्नो वद भद्रं पश्चात्कपिंजल[1] ॥१॥
भद्रं वद पुरैभद्रं वद गृहेषु च ।
भद्रमस्माकं वद भद्रं नो अभयं वद ॥२॥
भद्रमधस्तान्नो वद भद्रमुपरिष्टान्नो वद ।
भद्रंभद्रं न आ वद भद्रं नः सर्वतो वद ॥३॥
असपत्नं पुरस्तान्नः शिवं दक्षिणतस्कृधि ।
अभयं सततं पश्चाद्भद्रमुत्तरतो गृहे ॥४॥
यौवनानि महयसि जिग्युषामिव दुंदुभिः ।
शकुंतक प्रदक्षिणं शतपत्राभि नो वद ॥५॥
आवदंस्त्वं शकुने भद्रमा वद तूष्णीमासीनः सुमतिं चिकिद्धि नः ।
यदुत्पतन्वदसि कर्करिर्यथा[2] बृहद्वदेम विदथे सुवीराः ॥६॥

४.

जागर्षि त्वं भुवने जातवेदो जागर्षि यत्र यजते हविष्मान् ।
इदं हविः श्रद्दधानो जुहोमि तेन पासि गुह्यं नाम गोनाँ[1] ॥१॥

५.

सूक्तांते तृणान्यग्नावरण्ये वोदकेऽपि वा ।

3. This Khila occurs at the end of the second Mandala. It is given in S1. S3. S4. Wilson 435. P, the sixth verse (= Rv. II. 43, 3) only in S1. S2 and Wilson 429 have not got it, but S2 adds after Varga 12, **पदशिष्टं**, a word occurring so frequently in the MSS. instead of **परिशिष्टं** that I am almost inclined to take it as a synonym of Parisishta. It might mean what is left out in the Pada. The verses 1, 2, 5, 6 occur Kausika-sûtra 46, 54.

[1] **कपिंगल** S3. This verse occurs Nir. IX. 5. Cf. Roth, Abhandlungen, p. 32, and Notes on Nir. l.c.

[2] On Karkari, see Stenzler, Indische Studien, II. 159.

4. This verse is given at the end of hymn V. 44 in S1. S2. S3. S4, also in P. Wilson 439 has **परिशिष्टं । जागर्षि गोनां ॥** It is not in Wilson 436.

[1] Cf. Rv. V. 3, 3.

5. P has **तृतीयाध्याये । प्र ये वसुभ°**. R says **चतुर्थाष्टकस्य तृतीयाध्याये तृतीयवर्गांते एकर्चं परिशिष्टं ।**. The Samhitâ MSS. have no Khila after V. 49. But see Khila 12.

यत्स्तृणैरध्ययनं[1] तदधीतं स्तृणानि भव ते भव ॥१॥
वापीकूपतडागानां समुद्रं गच्छ स्वाहाग्निं गच्छ स्वाहा[2] ॥२॥

६.

स्वस्त्ययनं तार्क्ष्यमरिष्टनेमिं महद्भूतं[1] वायसं देवतानां।
असुरघ्नमिंद्रसखं समत्सु बृहद्यशो नावमिवा रुहेम ॥१॥
अंहोमुचमांगिरसं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यं।
प्रयतपाणिः शरणं प्र पद्ये स्वस्ति सबाधेष्वभयं[2] नो अस्तु ॥२॥

७.

वर्षतु ते विभावरि दिवो अभ्रस्य विद्युतः।
रोहंतु सर्वबीजान्यव ब्रह्मद्विषो जहि ॥१॥

८.

॥ श्रीसूक्तं ॥

हिरण्यवर्णा हरिणीं सुवर्णरजतस्रजां[1]।
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह[2] ॥१॥

अस्यार्थः। हे जातवेदः। जानाति वेदं। जातप्रज्ञो वा। जाते जाते विद्यत इति वा। हे अग्ने त्वं हिरण्यवर्णा हिरण्यस्य सुवर्णस्य वर्णः कांतिसदृग्वर्णो यस्यास्तां। हरिणीं हरितवर्णां। हरिणीरूपधरां वा। श्रीर्भूत्वा हरिणीरूपमरण्ये संचचार हेति देवीपुराणाच्च। सुवर्णरजतस्रजां सुवर्णस्य रजतस्य च पुष्पाणि सुवर्णानि रजतानि तेषां स्रक् माला यस्यास्तां। स्रक्त्वाहचर्यात् पुष्पाण्यित्यवगम्यते। पुष्पसादृश्यात् पुष्पे फले लुक्। आपं चैव हलंतानामित्याप्। यद्वा सुवर्णरजतविरचितशृंखलां। सुष्ठु वर्णो यस्य तत्सुवर्णं यद्रजतं तत्पुष्पस्रजां[3]। तद्विरचितशृंखलां वा। चंद्रां चंद्रवत्प्रकाशमानां। तद्रूपेणावस्थितां वा। हिरण्मयीं हिरण्यस्वरूपां। हिरण्यविग्रहां वा। लक्ष्मीं लक्षणवतीं। लक्ष्मीलाभाद्वा लक्षणाद्वेत्यादिनिरुक्तात्। नि० ४. १०.। एवंरूपां श्रियं मे मह्यं मदर्थमा वह। आहृय। अग्नेर्देवहोतृत्वादाह्वानं तदधीनमिति भावः। अग्निर्वै देवानां होतेति श्रुतेः ॥१॥

[1] One MS. has यत्तृणैर°.

[2] अग्निं गच्छ स्वाहा deest in R.

6. This Khila is given at the end of V. 51 in the Saṁhitâ MSS. It is also in P. R. A.

[1] महाद्युतं A. [2] A adds च.

7. This verse is given in the Saṁhitâ MSS. at the end of hymn V. 84, also in P. R. A.

8. The Śrîsûkta is given at the end of the fifth Maṇḍala in the Saṁhitâ MSS. (In S 3 the leaf containing it is bound after the sixth Adhyâya.) It is also in P. R. A. As Dr. Hall has been so fortunate as to discover a commentary on this Khila, I reprint the same, as published by him in the Journal of the Asiatic Society of Bengal, vol. xxviii. p. 121. The commentary is ascribed to Vidyâdhara, to Vidyâtîrtha Maheśvara, and to Vidyâraṇya Svâmin. Dr. Hall adds, loc. cit., some valuable extracts and remarks bearing on the character of this peculiar hymn.

[1] °स्रजम् A.

[2] म आ वह P. R. ममा वह Saṁhitâ MSS. and A.

[3] Something wanting in this sentence.

तां म आ वह जातवेदो लक्ष्मीमनपगामिनीं[1] ।
यस्यां हिरण्यं विंदेयं गामश्वं पुरुषानहं ॥ २॥

अस्यार्थः । हे जातवेदः अग्ने त्वमनपगामिनीमपगमनरहितामनपायिनीमित्यर्थः । तां वक्ष्यमाणलक्षणां लक्ष्मीं मे मह्यमा वह । आहृय । यस्यां श्रीदेव्यामावाहितायां सत्यां हिरण्यं सुवर्णं गां धेनुमश्वं वाजिनं पुरुषान् पुत्रपौत्रमित्रदासभृतानहं विंदेयं प्राप्नुयां ॥ २॥

अश्वपूर्वां[2] रथमध्यां हस्तिनादप्रबोधिनीं[3] ।
श्रियं देवीमुप ह्वये श्रीर्मा देवी जुषतां[4] ॥ ३॥

अस्यार्थः । अश्वपूर्वामश्वाः पूर्वं पुरोगा यस्यास्तां । अथवाश्वपूर्णामश्वैः पूर्णां परिपूर्णामिति केचित् । रथमध्यां रथा मध्ये यस्यास्तां । हस्तिनादप्रबोधिनीं हस्तिनां गजानां नादेन बृंहितेन प्रबोधिनीं प्रकर्षेण जागरयित्रीं । देवीं देवनशीलां । द्योतनशीलां वा । श्रियं श्रयणीयां । सेवारूपां वा । उप ह्वये समीपं प्रत्याह्वये । एतादृशी देवी श्रीर्मा मां जुषतां सेवतां ॥ ३॥

कांसोस्मितां[5] हिरण्यप्राकारामार्द्रां ज्वलंतीं तृप्तां तर्पयंतीं ।
पद्मेस्थितां पद्मवर्णां तामिहोप ह्वये श्रियं ॥ ४॥

अस्यार्थः । कां वाङ्मनसयोरगोचरां दुर्निरूपस्वरूपामित्यर्थः । ब्रह्मरूपां वा । को ह वै नाम प्रजापतिरिति श्रुत्यंतरात् । क इति ब्रह्मणो नामेति पुराणाच्च । सोस्मितां । आ ईषदा समंतादुन्नतं यत् स्मितं हास्यं तद्युक्तां । उपांत्यलोपश्छांदसः । हिरण्यप्राकारां हिरण्यस्य सुवर्णस्य प्राकार आकरणं यस्यास्तां । हिरण्यप्रकृष्ट आकार आकृतिर्यस्यास्तामिति वा । आर्द्रां स्निग्धां क्षीरोदधेरुत्पन्नत्वात् । रुद्ररूपां वा । रुद्रशब्दोऽत्रामूर्ध्न्यस्वरादिः । आर्द्रया रुद्र इत्यादौ तथा दर्शनात् । अन्यद्व्याख्यातं । ज्वलंतीं प्रकाशमानां । तृप्तां प्रीतामपि च तर्पयंतीं भक्तान् मनोरथैरिति शेषः । पद्मेस्थितां कमले निषण्णामासीनां । पद्मवर्णां कमलवर्णां । तामिति प्रसिद्धां श्रियमिहोप ह्वये समीपं प्रत्याह्वये ॥ ४॥

चंद्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदारां ।
तां पद्मिनीमीं[6] शरणं प्र[7] पद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणोमि[8] ॥ ५॥ १॥

अस्यार्थः । अत्र प्र पद्य इत्यस्यानंतरमहंशब्दप्रक्षेपः प्रामादिकः । चंद्रां चंद्रवत् प्रकाशमानां । प्रभासां प्रकृष्टा भाः कांतिर्यस्यास्तां । आपं वैवेत्याप् । यशसा कीर्त्या ज्वलंतीं प्रकाशमानां । लोके स्वर्लोके देवजुष्टां देवैरिंद्रादिभिर्जुष्टां सेवितां । प्रीतां वा । उदारां वदान्यां प्रगल्भां वा । पद्मिनीं पद्मलतारूपां । पद्माकारां वा । ईमिति निपातोऽनर्थकः । मिताक्षरेष्वनर्थकाः कमीमिद्धिति यास्कवचनात् । नि० १. ९. । ईकारवाच्यां वा । तां श्रियं लोक इह लोके शरणं रक्षित्रीं प्र पद्ये प्रपन्नोऽस्मि । अहमिति शेषः । अतो हे श्रीः मे ममालक्ष्मीरश्रीर्नश्यतां नाशं प्राप्नोतु । एतादृशीं त्वां वृणोमि । अंतर्भावितण्यर्थात् । वृणे शरणत्वेन स्वीकुर्वे ॥ ५॥ वर्गः १॥

आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदंतु या अंतरा[9] याश्च बाह्या अलक्ष्मीः ॥ ६॥

[1] लक्ष्मीमनपगामिनीं Samhitâ MSS. and P.

[2] अश्वपूर्वां P. R. अश्वपूर्णां Samhitâ MSS. and A.

[3] °प्रबोधिनीम् P. R. °प्रमोदिनीम् Samhitâ MSS. and A.

[4] देवीर्जु° P. S4.

[5] S4 accentuates कांसोस्मितां.

[6] पद्मनेमिं S1. 2. 3. 4. A. पद्मनेमीं P.

[7] शरणमहं प्र S2. S3. P.

[8] वृणे P. R.

[9] या अंतरा A. माया अंतरा S1. Hall (but the commentary mentions no मा). मायांतरा S2. 3. 4. P. ममांतरा R.

वृषोऽधित्वतः परमपि पूर्वरूपं वाऋलकात्। आदित्यवर्णो आदित्यस्य सूर्यस्य वर्ण इव वर्णो यस्यास्तस्याः संबोधनं हे श्रीः तव तपसः नियमाद्वेतोर्वनस्पतिः। अपुष्पाः फलवंतो ये ते वनस्पतयः स्मृता इति मानवस्मरणात्। मनु० १. ४७.। बिल्वः बिल्वनामको वृषो द्रुमोऽधिजातः प्रादुर्भूतः। त्वत्करादिति शेषः। कात्यायनः। बिल्वो लक्ष्म्याः करेऽभवदिति वामनपुराणात्। अथेत्यनंतरं तस्य बिल्वस्य फलानि पक्वानि शुलाटुकानि तपसा त्वत्तपसा त्वदनुग्रहेणेत्यर्थः। अंतरा अंतरिंद्रियसंबंधिन्यो याश्च बाह्या बहिरिंद्रियसंबंधिन्यस्ता अलक्ष्मीरश्रियो नुदंतु अपनुदंतु निवारयंत्वित्यर्थः ॥ ६॥

उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि[1] राष्ट्रेऽस्मिन्कीर्तिमृद्धिं[2] ददातु मे ॥ ७॥

अस्यार्थः। हे श्रीः देवसखः देवो महादेवस्तस्य सखा कुबेरः। कीर्तिश्च कीर्त्यभिमानिनी दक्षकन्या देवता। कुबेरकोशशाला वा। सा च मणिना चिंतामणिना मणिभद्रेण कोशाध्यक्षेण सह सार्धमुपैतु उपगच्छतु। अहमस्मिन् राष्ट्रे जनपदे प्रादुर्भूतोऽस्मि। उत्पन्नोऽस्मि। संगत्य कीर्तिं यशः कोशं वा ऋद्धिं सर्ववस्तुसमृद्धिं मे मह्यं ददातु यच्छतु ॥ ७॥

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं[3] नाशयाम्यहम्।
अभूतिमसमृद्धिं च सर्वां[4] निर्णुद मे गृहात् ॥ ८॥

अस्यार्थः। क्षुत्पिपासामलामशनतृष्णामलिनात्मिकां। ज्येष्ठां वृद्धां श्रीप्रागुत्पन्नामित्यर्थः। अलक्ष्मीमश्रियमहं नाशयामि नाशं प्रापयामि। हे श्रीः त्वमभूतिमसंपत्तिं तथा सर्वामसमृद्धिमनभिवृद्धिं मे मम गृहात् गेहात् निर्णुद निवारय ॥ ८॥

गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं।
ईश्वरीं सर्वभूतानां तामिहोप ह्वये श्रियं ॥ ९॥

अस्यार्थः। गंधो घ्राणग्राह्यो गुणो द्वारं लक्षणं यस्यास्तां। दुराधर्षां केनापि धर्षयितुमशक्यां। नित्यपुष्टां नित्यं निरंतरं सस्यादिभिः पुष्टां समृद्धां। करीषिणीं करीषः शुष्कगोमयादिस्तद्वतीं गवाद्यादिबहुपशुसमृद्धामिति यावत्। सर्वभूतानां सर्वप्राणिनामीश्वरीमधिष्ठात्रीं। आधारभूतां वा। तां भूरूपां श्रियमिह लोक उप ह्वये उपाह्वये समीपं प्रत्याह्वये ॥ ९॥

मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य[5] मयि श्रीः श्रयतां यशः ॥ १०॥ २॥[6]

अस्यार्थः। हे श्रीः मनसः कामं मनोऽभिलाषं। आकूतिं संकल्पं च। वाचः वागिंद्रियस्य सत्यं याथार्थ्यं। पशूनां गोमहिष्यादीनां रूपं क्षीरादि। अन्नस्य। अद्यतेत्यन्नं। तस्यादनीयस्य यवव्रीह्यादेः रूपं भक्ष्यादिचतुर्विधं चाशीमहि लभेमहि। श्रीः संपत्तिः यशः कीर्तिश्च मयि श्रयतां। आश्रयतां ॥ १०॥ वर्गः २॥

[1] °भूतोस्मि P. A. °भूतोसु S2. R. °भूतोसु°S3. °भूतोसि S1. S4.
[2] ऋद्धिं P. वृद्धिं S1. 2. 3. 4. A.
[3] क्षुत्पिपासामला ज्येष्ठा अलक्ष्मीर्गा° S1. 2. 3. A. °मलां ज्येष्ठा अलक्ष्मीर्गा° S4. °मला ज्येष्ठामलक्ष्मीर्गा° R. °मला ज्येष्ठा अलक्ष्मीर्गा° P.
[4] सर्वा S1. 2. 3. 4. P. Cf. TÂ. X. 66.
[5] रूपमन्नस्य S1. S2. S4.
[6] VS. XXXIX. 4; TBr. II. 4, 6, 6.

कर्दमेनप्रजा भूता मयि संभव[1] कर्दम ।
श्रियं वासय मे कुले[2] मातरं पद्ममालिनीं ॥ ११॥

अस्यार्थः । कर्दमेन कर्दमाख्येन पुत्रेण प्रसृष्टा आ अपत्यं यस्याः सा सुपुत्रेत्यर्थः । जामपत्यमिति यास्कवचनात् । नि० ३. ६. । भूता । अभवत् । अतः हे कर्दम श्रीपुत्र त्वं मयि मदीयगृहे संभव संवस । पद्ममालिनीं कमलमालाधारिणीं मातरं तव जननीं श्रियं मे मम कुले वंशे वासय निवासय ॥ ११॥

आपः सृजंतु[3] स्निग्धानि चिक्लीत वस मे गृहे ।
नि च[4] देवीं मातरं श्रियं वासय मे कुले ॥ १२॥

अस्यार्थः । आपः अब्लाभिमानिन्यो देवताः । स्निग्धानि स्नेहयुक्तानि कार्याणि सृजंतु । उत्पादयंतु । अपां स्नेहगुणवत्त्वादिति भावः । हे चिक्लीत चिक्लीताख्य श्रीपुत्र मे मम गृहे गेहे वस निवस । च अपि च देवीं मातरं श्रियं मे मम कुले वंशे नि वासय संवासय ॥ १२॥

आर्द्रां पुष्करिणीं[5] पुष्टिं[6] पिंगलां पद्ममालिनीं ।
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह[7] ॥ १३॥

अस्यार्थः । आर्द्रामार्द्रागां । पुष्करिणीमभिषेकोद्युक्तां दिग्गजशुंडयेति भावः । पुष्करशब्दो गजशुंडायवाचकः । पद्ममालिनीं पद्मवतीं । पद्मलतारूपां वा । पुष्टिं पुष्ट्यभिमानिनीं । पुष्टिरूपां वा । पुष्टिरूपेण संस्थितेति मार्कंडेयवचनात् । पिंगलां पिंगलवर्णां । पद्ममालिनीमित्यादि सिद्धमन्यत् ॥ १३॥

आर्द्रां यःकरिणीं यष्टिं[8] सुवर्णां हेममालिनीं ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह ॥ १४॥[9]

अस्यार्थः । आर्द्रामार्द्रागां । यःकरिणीं यष्टिकरां वेत्रहस्तामित्यर्थः । टिलोपश्छांदसः । तद्वतीं दंडकारिणीं वा । दंडकरां वा । यष्टिं दंडरूपां । सुवर्णां शोभनवर्णां । हेममालिनीं हेमविकृतमणिशृंखलादिमालावतीं । सूर्यां सूर्यवत् प्रकाशमानां । तद्रूपां वा । सिद्धमन्यत् ॥ १४॥

तां म आ वह जातवेदो लक्ष्मीमनपगामिनीं[10] ।
यस्यां हिरण्यं प्रभूतं[11] गावो दास्योऽश्वान्विंदेयं पुरुषानहं ॥ १५॥ ३॥

अस्यार्थः । प्रभूतं भूयिष्ठं । गावः गाः । दास्यः परिचारिकाः । उभयत्र शस् । इयमृक् द्वितीयया ऋचा व्याख्याता । अर्थ इयान् विशेषः ॥ १५॥ वर्गः ३॥ ॥ इति श्रीसूक्तभाष्यं समाप्तं ॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहं ।
श्रियः[12] पंचदशर्चं च श्रीकामः सततं जपेत् ॥ १६॥

[1] संभव P. R. संभ्रम S 1. 2. 3. 4. A.
[2] गृहे S 1.
[3] सृजंतु S 2. 3. 4. P. सृजंति S 1.
[4] नी च S 2. S 4. P.
[5] यःकरिणीं S 2. S 3. यःकरि° S 4 sec. m. यष्करि° S 4 pr. m.
[6] पुष्टीं P. A. यष्टीं S 1. 2. 4.
[7] ममा वह S 1. 2. 3. 4. The same in the next verse.
[8] यःकरिणीं यष्टीं P. पुष्करिणीं यष्टीं A. यःकरिणीयष्टिं R. पुष्करिणीं पुष्टीं S 1. 2. 4. पुष्करिणीं पुष्टिं S 3.
[9] Verse 14 precedes 13 in S 1. 2. 3. 4. A.
[10] °मनप° S 1. 2. 4. P.
[11] प्रभूतिं S 1. S 3.
[12] सूक्तं S 4. R. Dr. Hall.

पद्मानने पद्मऊरू[1] पद्माक्षि[2] पद्मसंभवे ।
तन्मे भजसि पद्माक्षि[3] येन सौख्यं लभाम्यहं ॥१७॥
अश्वदायी गोदायी धनदायी[4] महाधने ।
धनं मे जुषतां[5] देवि[6] सर्वकामांश्च देहि मे ॥१८॥
पुत्रपौत्रधनं धान्यं हस्त्यश्वादिगवे रथं[7] ।
प्रजानां भवसी[8] माता आयुष्मंतं करोतु मे[9] ॥१९॥
धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ।
धनमिंद्रो बृहस्पतिर्वरुणं धनमश्नुते[10] ॥२०॥४॥
वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं[11] ददातु सोमिनः ॥२१॥
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवंति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥२२॥
सरसिजनिलये सरोजहस्ते धवलतरां[12] शुभगंधमाल्यशोभे[13] ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि[14] प्र सीद मह्यं ॥२३॥
विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियां ।
विष्णोः प्रियसखीं देवीं[15] नमाम्यच्युतवल्लभां ॥२४॥
महालक्ष्मी[16] च विद्महे विष्णुपत्नी[17] च धीमहि ।
तन्नो लक्ष्मीः[18] प्र चोदयात् ॥२५॥
पद्मानने[19] पद्मिनि पद्मपत्रे पद्मप्रिये[20] पद्मदलायताक्षि[21] ।
विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं हृदि[22] सं नि धत्स्व ॥२६॥
आनंदः कर्दमश्रीतश्चिक्लीत[23] इव विश्रुतः[24] ।

[1] पद्मउरू S2. S4. पद्मजरू S3. P. R. A.
[2] पद्माक्षी S2. S4. P. R. [3] पद्माक्षी S4. P.
[4] अश्वदायै गोदायै धनदायै S2. S4. अश्वदायी च गोदायै धनदायै P. अश्वदायी गोदायी धनदायि R. A. [5] लभतां P. Dr. Hall.
[6] देवी A. देवीं S1. S2. S4. P.
[7] हस्त्यश्वाश्वतरे रथैः A. [8] भवसि S3.
[9] करोम्यहं S1. करोतु मां A.
[10] वरुणं धनमुत्सृजे S1. वरुणं धनमश्विना S3. S4. P. वरुणं धनमश्नु मे R. वरुणो धनमश्विना A.
[11] मह्यं S2. मिह्यं S1. [12] धवलतरा Dr. Hall.
[13] शुभगंधमाल्येशोभे P. शुकगंधमाल्यशुभे R.
[14] °करी R.
[15] लक्ष्मीं प्रियसखीं देवीं S3. लक्ष्मीप्रियसखीं देवीं S4. लक्ष्मीप्रियसखीदेवीं R.
[16] महादेवि R. [17] °पत्नि R.
[18] लक्ष्मिः S4. लक्ष्मि S3.
[19] पद्मासने S3. [20] पद्मानने S4.
[21] °क्षी P. [22] मयि S3. R.
[23] आनंदः कर्दमः श्रीतश्चि° S4. आनंदकर्दमश्रीदश्चि° S3.
[24] विश्रितः S4. विश्रिताः P.

ऋषयः श्रियपुचाश्च श्रीर्देवीर्देवताः श्रिया[1] ॥२७॥
श्रीवर्चस्त्वमायुष्यमारोग्यमाविधात्पवमानं[2] महीयते ।
धान्यं धनं[3] पशुं बहुपुचलाभं शतसंवत्सरं दीर्घमायुः ॥२८॥
ऋणरोगादि दारिद्र्यं[4] पापक्षुदपमृत्यवः ।
भयः[5] शोकमनस्तापा नश्यंतु मम सर्वदा ॥२९॥५॥[6]

९.

विश्वेश्वर विरूपाक्ष विश्वरूप सदाशिव ।
शरणं भव भूतेश करुणा कर शंकर ॥१॥
हर शंभो महादेव विश्वेशामरवल्लभ ।
शिव शंकर सर्वात्मन्नीलकंठ नमोऽस्तु ते ॥२॥
मृत्युंजयाय रुद्राय नीलकंठाय शंभवे ।
अमृतेशाय शर्वाय श्रीमहादेवाय ते नमः ॥३॥
एतानि शिवनामानि यः पठेन्नियतः सकृत् ।
नास्ति मृत्युभयं तस्य पापरोगादि किंचन ॥४॥

१०.

यज्ञेशच्युत गोविंद माधवानंत केशव ।
कृष्ण विष्णो हृषीकेश वासुदेव नमोऽस्तु ते ॥१॥
कृष्णाय गोपिनाथाय चक्रिणे मुरवैरिणे ।
अमृतेशाय गोपाय गोविंदाय नमो नमः ॥२॥
एतान्यनंतनामानि मंडलांते (सदा) पठेत् ॥३॥

[1] Instead of देवताः श्रिया, S 4 has only देवताः, Dr. Hall's reprint देवता only. In S 3 the second line is left out.

[2] °मारुहात्पवमानं S 2. °माविधाकुभमानं S 4. °माविधाच् शुभमानं Dr. Hall. °माविधाच्छोभमानं R. [3] धनं धान्यं S 1. S 2. S 4. R.

[4] दारिद्र्य° S 3. [5] रोगशोक° S 3.

[6] Verses 16 to 29 are given in this order according to P. S 4 and Dr. Hall's reprint. The last verse is omitted in S 4. In S 1 and S 2 after 23 only verse 28 follows, all the others are omitted. In S 3 after verse 23 there follows 26, 24, 25, 27, 29, 28.

9 and 10. These verses, addressed to *Siva* and *Vishnu* respectively, are given in S 3 on the margin of the leaf containing the *Srîsûkta*. One MS. at Saugor has the following lines after the *Srîsûkta*:

वासनाद् वासुदेवोऽसि वासितं ते जगत्त्रयं ।
सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते ॥
दश सप्त च नामानि मंडलांतेषु यः पठेत् ।
स शिवस्य पदं गत्वा शिवलोके महीयते ॥

Kullûka, in his commentary on Manu III. 232, explains खिलानि by श्रीसूक्तशिवसंकल्पादीनि; and it is not unlikely, therefore, that he knew the *Srîsûkta* as followed by some verses addressed to *Siva*. Compare also Medhâtithi on Manu l.c., खिलानि श्रीसूक्तमहानाम्निकादीनि.

११.

चक्षुश्च श्रोत्रं च मनश्च वाक्च प्राणापानौ देह इदं शरीरं ।
द्यौ प्रत्यंचावनुलोमौ विसर्गावेतं तं मन्ये दशयंत्रमुत्सं ॥१॥
उरश्च पृष्ठश्च[1] करौ च बाहू जंघे चोरू उदरं शिरश्च ।
रोमाणि[2] मांसं रुधिरास्थिमज्जमेतच्छरीरं जलबुबुदोपमं ॥२॥[3]
भ्रुवौ ललाटे च तथा च कर्णौ हनू[4] कपोलौ छुबुकस्तथा च ।
ओष्ठौ च दंताश्च तथैव जिह्वा मे तच्छरीरं[5] मुखरत्नकोशं ॥३॥

१२.

यत्स्तृणैरध्ययनं तदधीतं स्तृणानि भवते भव ।[1]
वापीकूपतडागानां समुद्रं गच्छ स्वाहा ॥१॥
सूक्तांते स्तृणान्यग्नौ[2] ॥२॥

१३.

शंवतीः पारयंत्येते तं[1] पृच्छंति वचो युजा ।
अभ्यारं तं[2] यमाकेतुं य एवेदमिति ब्रवत्[3] ॥१॥
भासाकेतुं पुरुस्पृहं[4] भारतीर्ब्रह्मवर्धनीः ।
संजानाना मही माता य एवेदमिति ब्रवत् ॥२॥
इंद्रस्तं किं विभुं प्रभुं भानुनेयं सरस्वती[5] ।
येन सूर्यमरोचयद्येनेमे रोदसी उभे ॥३॥
जुषस्वाग्ने अंगिरः काण्वं मेध्यातिथिं ।
मा त्वा सोमस्य बर्बृहत्सुतस्य मधुमत्तमः ॥४॥

11. This Khila occurs at the end of Rv. VI. 44 (Ashṭaka IV. 7, 20) in S 1. S 2. S 3, but not in S 4. P has only the first two verses.

[1] उरश्च पृष्ठीश्च S 2. नखश्च पृष्ठश्च P. उरश्च पृष्टिश्च R.

[2] लोमानि S 3. A.

[3] The order of these two verses is inverted in S 3 and P.

[4] हनुः S 1. [5] जिह्वा एतत्सुशुभं A.

12. This verse is found at the end of Rv. VI. 48 in S 1 and S 4 only. See also Khila 5.

[1] यत्स्तृणैरध्ययनं तदधीतं स्तृणानि भवते भव S 1. यत्स्तृणैरध्ययनंतदधीतं स्तृणानि भवतेव S 4.

[2] तृणान्य° S 4.

13. This Khila occurs in the fifth Ashṭaka, in S 2 at the end of the third Adhyâya (after Rv. VII. 35), in S 4 at the beginning of the fourth Adhyâya (before Rv. VII. 36), in S 1 it is put at the beginning of the hymn VII. 35 (end of 27th Varga). It is not in S 3. P has अथ पंचमाष्टके तृतीयाध्यायांते. R the same. A has important various readings in this Khila.

[1] °यंत्येतं तं S 1. S 2. °यंत्येतेदं P.

[2] अभ्यारं सं S 1. [3] ब्रवत् S 4. R.

[4] परिस्तुतं S 2. S 4. R.

[5] सरस्वतीं S 4. P. R.

ऋषयस्तु तपस्तेपुः सर्वे स्वर्गजिगीषवः ।
तपसस्तपसोऽग्र्यं तु पावमानीर्ऋचोऽब्रवीत् ॥ ६ ॥ १ ॥
यन्मे गर्भे वसतः पापमुग्रं यज्जायमानस्य च किंचिदन्यत् ।
जातस्य च यच्चापि च वर्धतो मे तत्पावमानीभिरहं पुनामि ॥ ७ ॥
मातापित्रोर्यन्न कृतं वचो मे यत्स्थावरं जंगममाबभूव ।
विश्वस्य तत्प्रहृषितं वचो मे तत्पावमानीभिरहं पुनामि ॥ ८ ॥
गोघ्नात्तस्करत्वात्स्त्रीवधाद्यच्च किल्बिषं[1] ।
पापकं च चरणेभ्यस्तत्पावमानीभिरहं पुनामि ॥ ९ ॥
ब्रह्मवधात्सुरापानात्स्वर्णस्तेयाद्वृषलीगमनमैथुनसंगमात्[2] ।
गुरोर्दाराभिगमनाच्च[3] तत्पावमानीभिरहं पुनामि ॥ १० ॥
बालघ्नान्मातृपितृवधाद्भ्रूमितस्करात्सर्ववर्णगमनमैथुनसंगमात् ।
पापेभ्यश्च प्रतिग्रहात्सद्यः प्रहरति सर्वदुष्कृतं तत्पावमानीभिरहं पुनामि ॥ ११ ॥
अमंत्रमन्नं यत्किंचिद्भूयते च हुताशने ।
संवत्सरकृतं पापं तत्पावमानीभिरहं पुनामि ॥ १२ ॥
क्रयविक्रयाद्योनिदोषाद्भक्षाद्भोज्यात्प्रतिग्रहात् ।
असंभोजनाच्चापि नृशंसं तत्पावमानीभिरहं पुनामि ॥ १३ ॥
दुर्यष्टं दुरधीतं पापं यच्चाज्ञानतोऽकृतं ।
अयाजिताश्वासंयाज्यात्तत्पावमानीभिरहं पुनामि ॥ १४ ॥
ऋतस्य योनयोऽमृतस्य धाम विश्वा देवेभ्यः पुण्यगंधाः ।
ता न आपः प्र वहंतु पापं शुद्धा गच्छामि सुकृतामु लोकं तत्पावमानीभिरहं
पुनामि ॥ १५ ॥ २ ॥
पावमानीः स्वस्त्ययनीर्याभिर्गच्छति नांदनं ।
पुण्यांश्च भक्षान्भक्षयत्यमृतत्वं च गच्छति ॥ १६ ॥
पावमानं[4] पितृन्देवान्ध्यायेद्यश्च[5] सरस्वतीं ।
ऋषींस्तस्योप वर्ते[6] तत्क्षीरं सर्पिर्मधूदकं ॥ १७ ॥
पावमानं परं ब्रह्म शुक्रं ज्योतिः सनातनं ।

[1] The metre is frequently wrong, but might easily be mended here by reading गोघ्नत्वात्तस्करत्वाच्च. In the next verses, too, the metre is corrupt.

[2] वृषळिगमन° S 4. P. R.

[3] दाराङ्गिग° S 4. P. दाराधिग° R.

[4] पावमानीः P. पावमानीं R.

[5] ध्यायेध्यश्च P. ध्यायेध्यश्च S 4.

[6] पितृंस्तस्योप तिष्ठे S 4. पितृंस्तस्योप वर्ते R.

पितॄंस्तस्योप तिष्ठे[1] तन्क्षीरं सर्पिर्मधूदकं ॥१८॥
पावमानं परं ब्रह्म ये पठंति मनीषिणः ।
सप्तजन्मा[2] भवेद्विप्रो धनाढ्यो वेदपारगाः ॥१९॥
दशोत्तराण्यृचश्चैव[3] पावमानीः शतानि षट् ।
एतज्जुहूञ्चपेन्मंत्रं घोरं मृत्युभयं[4] हरेत् ॥२०॥३॥

१८.

इलैव[1] वामनु[2] वस्तां घृतेन यस्याः पदे[3] पुनते देवयंतः ।
घृतपदी शक्करी सोमपृष्ठोप[4] यज्ञमस्थित वैश्वदेवी ॥१॥
वैश्वदेवी पुनती देव्या गाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः ।
तया मदंतः सधमादेषु वयं स्याम पतयो रयीणां ॥२॥

१९.

यत्र तत्परमं पदं विष्णोर्लोके महीयते ।
देवैः सुकृतकर्मभिस्तत्र माममृतं कृधींद्रायेंदो परि स्रव ॥१॥
यत्र तत्परमाध्यं[1] भूतानामधिपतिः[2] ।
भावभावी[3] च यो गीश्च[4] तत्र माममृतं कृधींद्रायेंदो परि स्रव ॥२॥
यत्र लोकास्तनूत्यजाः श्रद्धया तपसा जिताः ।
तेजश्च यत्र ब्रह्म[5] च तत्र माममृतं कृधींद्रायेंदो परि स्रव ॥३॥
यत्र देवा महात्मानः सेंद्राश्च मरुद्गणाः[6] ।
ब्रह्मा[7] च यत्र विष्णुश्च तत्र माममृतं कृधींद्रायेंदो परि स्रव ॥४॥[8]
यत्र गंगा च यमुना यत्र प्राची सरस्वती ।
यत्र सोमेश्वरो देवस्तत्र माममृतं कृधींद्रायेंदो परि स्रव ॥५॥[9]

[1] ऋषींस्तस्योप वर्ते S4. ऋषींस्तस्योप तिष्ठे R.
[2] सप्त जन्म S4. P. R. A. [3] °ष्णुचांश्चैव S4. P.R.A.
[4] घोरमृ° S4. P. R.

18. This Khila is given after Rv. IX. 86 in S3 and Wilson 438. It is not in S1. S2. S4. P and Wilson 432, nor in R and A.

[1] इलैव Wilson 438. [2] वामञ्जु S3.
[3] पदेषु न Wilson 438. [4] °पृष्ठो Wilson 438.

19. This Khila is given at the end of the ninth Mandala. It is not in S4. पंचमाध्याये मंडलांते P.

[1] परमाध्यं S1. Wilson 438. °माध्यं S2. P.
[2] भूतानामधिपतिं S1. R. देवानामधिपतिं S2. भूतानामधिपति A. [3] भावभावि S2. A.
[4] च योगी च P. वयो गीश्च A.
[5] ब्रह्मा S1. P. [6] समरुद्गणाः S2. [7] ब्रह्म S2.
[8] The order of verses 3 and 4 is inverted in P.
[9] In S2 and S3 hymn IX. 114 is repeated after this verse. Wilson 438 has only verses 1, 2, 5. S1 places verse 2 after verse 4. Deest in Wilson 432. S2 gives only verses 5, 1, 2 (in this order).

२०.

सुषीस्तदपसो दिवा नक्तं च सुषीः ।
वरेण्यक्रतूरहमा देवीरवसे हुवे ॥१॥

२१.

सितासिते सरिते[1] यत्र संगमे[2] तत्राप्लुतासो दिवमुत्पतंति ।
ये वै तन्वं१ वि सृजंति धीरास्ते जनासो अमृतत्वं भजंते ॥१॥

२२.

अविधवा भव वर्षाणि शतं सायं तु सुव्रता ।
तेजस्वी च यशस्वी च धर्मपत्नी पतिव्रता ॥१॥
जनयब्रहुपुत्राणि मा च दुःखं लभेत्क्वचित् ।
भर्ता ते सोमपा नित्यं भवेद्धर्मपरायणः ॥२॥
अष्टपुत्रा भव त्वं च सुभगा च पतिव्रता ।
भर्तुश्चैव पितुर्भ्रातुर्हृदयानंदिनी[1] सदा ॥३॥
इंद्रस्य तु यथेंद्राणी श्रीधरस्य यथा श्रिया ।
शंकरस्य यथा गौरी तद्भर्तुरपि भर्तरि ॥४॥
अत्रेर्यथानुसूया स्याद्वसिष्ठस्याप्यरुंधती ।
कौशिकस्य यथा सती तथा त्वमपि भर्तरि ॥५॥
ध्रुवैधि पोष्या मयि मह्यं त्वादाद्बृहस्पतिः ।
मया पत्या प्रजावती सं जीव शरदः शतं ॥६॥

२३.

असौ या सेना मरुतः परेषामभ्यैति न ओजसा स्पर्धमाना ।
तां गूहत तमसापव्रतेन यथामीषामन्यो[1] अन्यं न जानात् ॥१॥
अंधा अमित्रा भवताशीर्षाणा अहय इव ।
तेषां वो अग्निदग्धानामग्निमूळ्हानामिंद्रो हंतु वरंवरं ॥२॥

20. This verse is given after Rv. X. 9 in S 1. 2. 3. 4. It is not in P and R. Cf. Av. VI. 23, 1.

21. This verse is inserted after Rv. X. 75, 5 in S 1. S 2. S 4. तृतीयाध्याये इमं मे गंगे° P. The same verse occurs in the Mantrasamhitâ (p. 107[b] of my MS.).

[1] सरितो S 1. [2] संगते S 4. P.

22. This Khila occurs at the end of Rv. X. 85, after the third Adhyâya of the eighth Ashṭaka. Cf. Weber, Indische Studien, V. 194.

[1] °नंदनी S 4.

23. This Khila occurs at the end of Rv. X. 103. Cf. Av. III. 2, 6. [1] यथामीषाऽन्यो S 4. R.

२४.

हविर्भिरेके स्वरितः सचंते सुन्वंत एके सवनेषु सोमान् ।
शचीर्मदंत उत दक्षिणाभिर्नेज्जिघ्रायंत्यो नरकं पताम ॥१॥

२५.

॥ राचीसूक्तं ॥

आ रात्रि पार्थिवं रजः पितुरप्रायि[1] धामभिः ।
दिवः सदांसि बृहती वि तिष्ठस आ त्वेषं वर्तते तमः ॥१॥
ये ते रात्रि[2] नृचक्षसो युक्तासो नवतिर्नव ।
अशीतिः संत्वष्टा[3] उतो ते सप्त सप्तितिः[4] ॥२॥
रात्रीं प्र पद्ये जननीं सर्वभूतनिवेशनीं ।
भद्रां भगवतीं कृष्णां विश्वस्य जगतो निशां[5] ॥३॥
संवेशनीं संयमनीं[6] ग्रहनक्षत्रमालिनीं[7] ।
प्रपन्नोऽहं शिवां रात्रीं भद्रे पारमशीमहि भद्रे पारमशीमह्यों नमः ॥४॥
स्तोष्यामि प्रयतो देवीं शरण्यां बह्वृचप्रियां ।
सहस्रसंमितां दुर्गां जातवेदसे सुनवाम सोमं ॥५॥[8]
शांत्यर्थं तद्विजातीनामृषिभिः सोमपाश्रिताः[9] ।
ऋग्वेदे त्वं समुत्पन्नारातीयतो नि दहाति वेदः ॥६॥
ये त्वां देवि[10] प्रपद्यंति[11] ब्राह्मणा हव्यवाहनीं ।
अविद्या बहुविद्या वा सा[12] नः पर्षदति दुर्गाणि विश्वा ॥७॥
अग्निवर्णां[13] शुभां सौम्यां कीर्तयिष्यंति ये द्विजाः ।
तां तारयति[14] दुर्गाणि नावेव सिंधुं दुरितात्यग्निः ॥८॥[15]

24. This verse is given in R, and said to occur after Rv. X. 106: अष्टमाष्टकस्य षष्ठाध्याये द्वितीयवर्गांते इयमेका ऋक् पठ्यते. It is not in our MSS.

25. This Khila occurs at the end of Rv. X. 127. It has been printed and discussed in Muir's Sanskrit Texts, vol. iv. p. 498.

[1] पितुरः प्रायि S1. पितरप्रायु S2. पितुरः प्रायु S4. पितरः प्रायु P. R. See VS. XXXIV. 32; Av. XIX. 47, 1; Nir. IX. 29.

[2] रात्री S1. S2. S4. P. R

[3] संत्वष्टा Av. XIX. 47, 3.

[4] सप्ततीः S2. S4. P. R. सप्तति S1.

[5] दिशां S1. S4. P. [6] संयमिनीं P. R.

[7] गृह° S1. S2. S4. P.

[8] Verses 5 to 8 are wanting in S1.

[9] समुपाश्रिताः S4. [10] देव P.

[11] °द्यंते? [12] स S4. P. R. A.

[13] ये अग्निवर्णां S2. S4. P. R. [14] तांस्ता°?

[15] In Wilson 445 portions of a Durgâstava are here inserted.

दुर्गेषु विषमे घोरे संग्रामे रिपुसंकटे ।
अग्निचोरनिपातेषु सर्वग्रहनिवारिणि सर्वग्रहनिवारिण्यों नमः[1] ॥९॥
दुर्गेषु विषमेषु त्वं[2] संग्रामेषु वनेषु च ।
मोहयित्वा प्र पद्यंते तेषां मे अभयं कृणु[3] तेषां मे अभयं कृण्वों नमः[3] ॥१०॥
केशिनीं सर्वभूतानां पंचमीति च नाम च ।
सा मां समा निशा देवी सर्वतः परि रक्षतु सर्वतः परि रक्षत्वों नमः ॥११॥
तामग्निवर्णां तपसा ज्वलंतीं वैरोचनीं कर्मफलेषु जुष्टां ।
दुर्गां देवीं शरणमहं प्र पद्ये सुतरसि तरसे नमः सुतरसि तरसे नमः ॥१२॥
दुर्गा दुर्गेषु स्थानेषु शं नो देवीरभिष्टये ।
य इमं दुर्गास्तवं पुण्यं[4] राचौराचौ सदा पठेत्[5] ॥१३॥
राचिः कुशिकः सौभरो राचिस्तवो गायची ।[6]
राचीसूक्तं जपेन्नित्यं तत्काल उप पद्यते ॥१४॥

२६.

अर्वांचमिंद्रममुतो हवामहे यो गोजिद्धनजिदश्वजिद्यः ।
इमं नो यज्ञं विहवे जुषस्वास्य कुर्मो[1] हरिवो मेदिनं त्वा ॥१॥

२७.

आयुष्यं वर्चस्यं रायस्पोषमौद्भिदं ।[1]
इदं हिरण्यं वर्चस्वज्जैचाया विशतादु मां[2] ॥१॥
उच्चैर्वाजि पृतनाषाट् सभासाहं धनंजयं ।
सर्वाः समया ऋड्डयो हिरण्येऽस्मिन्त्समाहिताः ॥२॥

[1] अग्निचोरनिपातेषु दुष्टग्रहनिवारणे S4. P. °रेण S2. °षु सर्वग्रहनिवारणे A. अग्निचोरनिपाते च सर्वग्रहनिवारणे दुष्टग्रहनिवारण्यों नमः R. [2] त्वां?

[3] कृष्व and कुर्वों नमः S4. P. R. A. Verses 10 and 11 wanting in S1.

[4] युग्यं P. [5] राचीसूक्तं जपेत्सदा S1.

[6] राचिः कुशिकः सोभरो राचिस्तवो गायची P. राचि कुशिकं सौभरो राचिर्वा भारद्वाजी राचिस्तवं गायचं S1. राचिः कुशिकसोभरो राचिस्तवो गायची S2. S4. See Anukr. Rv. X. 127.

26. This verse is given in S4 at the end of Rv. X. 128. Other MSS. give it as the first verse of the next Khila. In S4, however, it is distinctly separated: मेदिनं त्वा ॥ सूक्तं ॥ १६ ॥ आयुष्यं etc. See TS. IV. 7, 14, 4; TBr. II. 4, 3, 2; Av. V. 3, 11.

[1] कृष्मो S4. P. R. A.

27. This Khila follows immediately after the preceding verse, at the end of the tenth Anuvâka.

[1] Cf. Âsvalâyanasâkhokta-mantrasamhitâ (Bodl. MS. Walker 144), p. 133.

[2] विशतादिमां S4. P. R. See VS. XXXIV. 50.

श्रुनमहं हिरण्यस्य पितुर्नामेव[1] जग्रभ ।
तेन मां सूर्यत्वचमकरं पूरुषु प्रियं[2] ॥३॥
सम्राजं च विराजं चाभिष्टिर्या च मे ध्रुवा ।
लक्ष्मी राष्ट्रस्य या मुखे तया मामिंद्र सं सृज ॥४॥
अग्नेः प्रजातं परि यद्धिरण्यममृतं यज्ञे अधि मर्त्येषु ।
य एनद्वेद स इदेनमर्हति[3] जरामृत्युर्भवति यो बिभर्ति ॥५॥१॥
यद्वेद राजा वरुणो यदु देवी सरस्वती ।
इंद्रो यद्बृचहा वेद तन्मे वर्चस आयुषे ॥६॥[4]
न तद्रक्षांसि न पिशाचाश्चरंति देवानामोजः प्रथमजं ह्येतत् ।
यो बिभर्ति दाक्षायणाहिरण्यं[5] स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥७॥
यदाबध्नन्दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः[6] ।
तन्न आ[7] बध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासत्[8] ॥८॥
घृतादुल्लुप्तं[9] मधुमत्सुवर्णं धनंजयं धरुणं धारयिष्णु ।
ऋणक्सपत्नादधरांश्च[10] कृण्वदा रोह मां महते सौभगाय ॥९॥
प्रियं मा कुरु देवेषु प्रियं राजसु मा कुरु ।
प्रियं विश्वेषु गोचेषु[11] मयि धेहि रुचा रुचं ॥१०॥
अग्निर्येन विराजति सूर्यो येन विराजति ।
विराज्ञेन विराजति तेनास्मान्ब्रह्मणस्पते विराज समिधं कुरु ॥११[12]॥२॥

२८.

हिमस्य त्वा जरायुणा शाले[1] परि व्ययामसि ।

[1] हिरण्यस्यपितुर्मानेव S 2. S 4. P. R.
[2] पुरुषप्रियं P.
[3] इदेधमर्हति P. इदेनमर्हति S 1. इवेदमर्हति S 4. इदेनदर्हति A. See Av. XIX. 26, 1.
[4] Cf. Av. V. 25, 6; XIX. 26, 4.
[5] दाक्षायणं हिरण्यं Av. I. 35, 2. VS. XXXIV. 51.
[6] °माना S 4. P. R.
[7] तन्न आ S 1. VS. XXXIV. 52. तन्ने Av. I. 35, 1. तद्दा A.
[8] यथासन् S 1. °सन् or °सत् S 4 (not clear). यथासं VS. l. c.
[9] घृतादुर्बुप्तं S 2. S 4. P. R. घृतदुल्लुप्तं S 1.
[10] सपत्नाधः A. Av. V. 28, 14; XIX. 33, 2.
[11] गोष्ठेषु S 1. S 2. P. R.
[12] इत्यर्धः S 4. Instead of this verse S 1 repeats the verse अर्वाचमिंद्रं etc.

28. This Khila is given in S 2 and S 4 after Rv. X. 142, at the end of the seventh Adhyâya. In P it follows after the 25th Khila: उप पवते ॥१॥ उलूकयातुं °पिशुंगभृष्टि ° ऋक् ॥ हिमस्य त्वा etc. In R it is joined with Khila 25, and given as verses 15 to 25.
[1] जरायुणापि S 2.

उत ह्रदो हि नो भुवोऽग्निर्ददातु[1] भेषजं ।
शीतह्रदो[2] हि नो भुवोऽग्निर्ददातु[3] भेषजं ॥१॥
अंतिकामग्निमजनयद्दुर्वादः[4] शिश्नुरागमत्[5] ।
अजातपुचपक्षाया हृदयं मम दूयते[6] ॥२॥
विपुलं वनं बह्वाकाशं चर जातवेदः कामाय ।
मां च[7] रक्ष पुचांश्च शरणमभूत्तव ॥३॥
पिंगाक्ष लोहितग्रीव कृष्णवर्ण नमोऽस्तु ते ।
अस्माद्वि वर्ह स्योनां[8] सागरस्योर्मयो यथा ॥४॥
इंद्रः[9] क्षत्रं ददातु वरुणमभि षिंचतु ।
शत्रवो निधनं यांतु जयस्त्वं[10] ब्रह्मतेजसा ॥५॥
कपिलजटीं सर्वभक्षं चाग्निं प्रत्यक्षदैवतं ।
वरुणं च वशाम्यग्ये मम पुचांश्च रक्षतु मम पुचांश्च रक्षत्वों नमः ॥६॥
सायं वर्षशतं जीव पिब खाद च मोद च ।
दुःखितांश्च[11] द्विजांश्चैव प्रजां च पशु पालय ॥७॥
यावदादित्यस्तपति यावद्भ्राजति चंद्रमाः ।
यावद्वायुः प्रवायति[12] तावज्जीव जया जय[13] ॥८॥
येन केन प्रकारेण को वीनामनु[14] जीवति ।
परेषामुपकारार्थं यज्जीवति स जीवति ।
एतां वैश्वानरीं सर्वदेव[15] नमोऽस्तु ते ॥९॥
न चोरभयं न च सर्पभयं न च व्याघ्रभयं न च मृत्युभयं ।
यस्यापमृत्युर्न[16] च मृत्युः स सर्वं लभते स सर्वं जयते[17] ॥१०॥

[1] भवोग्नि° S4. तुवोग्नि° P. भियोग्नि° R.

[2] शिशीतह्रदो S4. P. शीतह्रदा A.

[3] भवोग्नि° S4. भियोग्नि° R. See Av. VI. 106, 3; VS. XVII. 5; TS. IV. 6, 1, 1.

[4] °अरदूर्वादः S2. °अनयद्दूर्वासः S4. °अनपूर्वादः P. °अनयद्दुर्वादः R. °अनयद्दुर्वारः A.

[5] शिश्नुरागमत् S2. R. Lacuna in P from शिश्नु° to कामाय.

[6] धूयते S2. द्रूयते S4. [7] मांश्च S2. S4.

[8] अस्मान्निवर्हरस्योनां S2. अस्मान्निवर्हणस्योनां P. अस्मान्निवर्हरस्योनं R. अस्मान्वि वर्तय स्वानं A.

[9] इंद्रं S2. इंद्र S4. P. R.

[10] जयस्त्वं S2. S4. P. R. जय त्वं A. जयस्व?

[11] दुःखितांच S4. दुःखितांत P. °तांन R.

[12] प्रवाजति S4.

[13] तावज्जीव जया जय twice in S4.

[14] विनामनु S4. हि नाम न R. हीनमनु A.

[15] वैश्वानरं सर्वदेव S2. वैश्वानरं देवं सर्वदेवं P. In R this Pâda is put after the last verse.

[16] यस्यापि मृ° S4.

[17] स सर्वं लभते स सर्वं जयते R. सर्वं लभते सर्वं जयते S4. P. The other MSS. do not give this verse.

२९.

॥ मेधासूक्तं ॥

मेधां[1] मह्यमंगिरसो मेधां सप्त ऋषयो ददुः ।
मेधामिंद्रश्चाग्निश्च मेधां धाता ददातु ते[2] ॥१॥
मेधां ते[3] वरुणो राजा मेधां देवी सरस्वती ।
मेधां ते[4] अश्विनौ देवावा धत्तां पुष्करस्रजा ॥२॥
या मेधा अप्सरासु[5] गंधर्वेषु च यन्मनः ।
दैवी या मानुषी मेधा[6] सा माया[7] विशतादिमां ॥३॥
यन्मे नोक्तं तद्रमतां[8] शकेयं यदनुब्रुवे[9] ।
निशामतं नि शामहै मयि व्रतं सह ब्रह्मणा सं गमेमहि[10] ॥४॥
शरीरं मे विचक्षण वाङ्मे मधुमहुहां[11] ।
अवृङमहमसौ[12] सूर्यो ब्रह्मणानी स्थ श्रुतं मे मा प्र हासीः[13] ॥५॥
मेधां देवीं मनसा[14] रेजमानां गंधर्वजुष्टां प्रति नो जुषस्व ।
मह्यं मेधां वद मह्यं श्रियं वद मेधावी[15] भूयासमजराजरिष्णुः[16] ॥६॥
सदसस्पतिमद्भुतं प्रियमिंद्रस्य काम्यं । सनिं मेधामयासिषं ॥७॥[17]
यां मेधां देवगणाः पितरश्चोपासते ।
तया मामद्य मेधयाग्ने मेधाविनं कुरु[18] ॥८॥

29. This Khila occurs after Rv. X. 151, at the end of the eleventh Anuvâka.

[1] मेधा S4. P. R.

[2] दधातु ते S4. ददातु मे P. A, and Âsv. Mantrasamhitâ (Bodl. MS. Walker 144), p. 154.

[3] मे S4. A.

[4] मे A. Cf. TÂ. X. 40; VS. XXXII. 15; Mantrasamhitâ (MS. meum), p. 35[a]; Âsv.-Grihy. I. 15, 2; Pâr.-Grihy. II. 4, 8; Mantrabrâhmaṇa I. 5, 9 (=Gobhila II. 7, 21); Âpastamba-Mantrapâtha II. 4, 5; Hiraṇyakesi-Grihy. I. 6, 4; 8, 4.

[5] अप्सरासो S2. अप्सरेषु S4.

[6] युगा S4.

[7] मामा etc. R. मेधा विशतादु मां A. मामा विशतादिह Âpastamba-Mantrapâtha II. 4, 6. See TÂ. X. 41; Hiraṇyakesi-Grihy. I. 8, 4.

[8] तद्रवतां S4. R. प्रद्र° S2.

[9] °द्रवे S4.

[10] निशामतं निशामहै मयि व्रतं सह व्रतेषु भूयासं ब्रह्मणा सं गमेमहि S2. निशामतं निशामयि मयि व्रतं सह प्रियेण भूयासं ब्र° etc. S4. R. The text is given from P.

[11] मधुमहुहा S2. °मद्रुहा S4. °मद्रुहां P. मधुमत्तमा TÂ. VII. 4, 1. Cf. Pâr.-Grihy. III. 16.

[12] अवृतम° S4. [13] हासीत् S4. P.

[14] देवीमनसो P. देवीं समनसां R.

[15] मेधावि S4. [16] °जरिष्णु S4. R.

[17] VS. XXXII. 13; Rv. I. 18, 6.

[18] तया मामद्य मेधया मे मेधाविनं कुरु S2, तया मामद्यमेधाग्ने मेधाविनयं कुरु S4. तया मा मेधया मेधाविनं कुरु P. See Av. VI. 108, 4; VS. XXXII. 14.

मेधाव्यहं सुमनाः[1] सुप्रतीकः श्रद्धामनाः सत्यमतिः सुशेवः[2] ।
महायशा धारयिष्णुः प्रवक्ता भूयासमर्ये[3] स्वधया प्रयोगे ॥९॥[4]

३०.

नेजमेष परा पत सुपुत्रः पुनरा पत ।
अस्यै मे पुत्रकामायै गर्भमा धेहि यः पुमान् ॥१॥
यथेयं पृथिवी मह्युत्तानाग गर्भमादधे ।
एवं तं गर्भमा धेहि दशमे मासि सूतवे ॥२॥
विष्णोः श्रेष्ठेन रूपेणास्यां नार्यां गवीन्यां ।
पुमाँसं[1] पुत्राना धेहि दशमे मासि सूतवे ॥३॥

३१.

अनीकवंतमूतयेऽग्निं गीर्भिर्हवामहे ।
स नः पर्षदति द्विषः ॥१॥

३२.

संज्ञानमुशनावदत्संज्ञानं वरुणोऽवदत् ।
संज्ञानमिंद्रश्चाग्निश्च संज्ञानं सवितावदत् ॥१॥
संज्ञानं वः स्वेभ्यः[1] संज्ञानमरणेभ्यः ।
संज्ञानमश्विना युवमिहास्मासु नि यच्छतं ॥२॥
यत्कक्षीवान्संवननो[2] पुचो अंगिरसामवे[3] ।
तेन नोऽद्य विश्वे देवाः सं प्रियां समजीजनन् ॥३॥

[1] °हं समनाः S4. मेधाव्यंसगणः P. °व्यं सुमनः R.
[2] °मनाः सत्यसुपः सु° S4. °मनाश्चप्रमतिं सुवीरः P.
[3] प्रवित्ता भूयासमग्नौ S2. प्रवित्ता भूयासमग्नौ P.
[4] R adds the following verse, possibly a Khila belonging to Rv. X. 163:

गायत्रियै पलाशस्त्वाऽवसौपथिकाममु ।
अथोत तस्य यज्ञाणां पापारोगनाशिनी ॥

30. This Khila occurs after Rv. X. 184. Cf. Âsv.-Grihy. I. 14, 3; *Rigvidhâna* IV, 23; Av. V. 25, 2; 10; Mantrasamhitâ (MS. Walker 144), p. 131; Âpastamba-Mantrapâtha I. 13, 5 to 7.

[1] दशास्यां P.

31. This Khila is given at the end of Rv. X. 187. But P says: प्र नूनमिति सूक्तांते, i. e. after hymn 188. R: षट्चत्वारिंशद्वर्गानंतरमियमेका ऋक् पठ्यते. In S4, the 46th Varga ends after hymn 187, Khila 30 being counted as Varga 43.

32. This Khila occurs at the end of the Samhitâ. It is not given in S4.

[1] °स्वेभ्यः P. °ग्नेभ्यः R. °णः स्वेभ्यः A. Cf. TBr. II. 4, 4, 6; Av. VII. 52, 1.
[2] °वांसंवननो P. °वांसंवनगं R. °वान्संवनगं A.
[3] °सा भवेत् R. Âsv. Mantrasamhitâ (MS. Walker 144), p. 178. °सामवेत् A.

सं वो मनांसि जानतां समाकूतिर्मनामसि[1] ।
असौ यो विमना जनस्तं समावर्तयामसि ॥४॥[2]
तच्छंयोरा वृणीमहे गातुं यज्ञाय गातुं यज्ञपतये ।
दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः ।
ऊर्ध्वं जिगातु भेषजं शं नो अस्तु द्विपदे शं चतुष्पदे ॥५॥[3]

॥ इति खैलिकानि संपूर्णानि ॥

[1] **नमामसि** Av. III. 8, 5.
[2] R inserts here nine more verses.
[3] TBr. III. 5, 11; TS. II. 6, 10, 2; TÂ. I. 9, 7.

ABBREVIATIONS USED IN THE REFERENCES.

अथ० Atharva-veda Samhitâ.
अनु० Sarvânukramanî Paribhâshâ.
अनु० ऋ० Sarvânukramanî on Rig-veda, Mandala . , Sûkta . .
अम० Amarakosha.
आ० Âsvalâyana's Srauta-sûtra.
आ० गृ० Âsvalâyana's Grihya-sûtra.
आ० प० Âpastamba's Paribhâshâsûtrâni, M. M. in Zeitschrift der Deutschen Morgenl. Gesellschaft, vol. ix. pp. xliii seqq.
आप० Âpastambîya Srauta-sûtra.
आप० गृ० Âpastambîya Grihya-sûtra.
आर्य० The Âryabhatîya, edited by Dr. H. Kern. Leiden, 1874.
उ० Unâdi-sûtras, ed. Aufrecht. Bonn, 1859.
ऋ० and ऋग्वे० Rig-veda.
ऋग्वि० Rigvidhâna, ed. R. Meyer. Berlin, 1878.
ऐ० आ० Aitareya Âranyaka.
ऐ० ब्रा० Aitareya Brâhmana.
क० उ० Katha Upanishad.
का० Kâsikâ[1].
कौ० उ० Kaushîtaki-Brâhmana Upanishad.
छां० उ० Khândogya Upanishad.
जै० न्या० Gaiminîya Nyâya-mâlâ-vistara, ed. Goldstücker. London, 1878.
तां० Tândya Mahâ-Brâhmana.
तै० आ० Taittirîya Âranyaka.
तै० प्रा० Taittirîya Prâtisâkhya.
तै० ब्रा० Taittirîya Brâhmana.
तै० सं० Taittirîya Samhitâ.
धा० Dhâtupâtha, ed. Westergaard.
नि० Yâska's Nirukta, ed. Roth.
नृ० ता० Nrisimha Tâpanîya Upanishad.
नै० Naighantuka, ed. Roth.
परा० Parâsara Dharmasâstra.
परि० Nâgogîbhatta's Paribhâshenduskekhara, ed. Kielhorn. Bombay, 1868[1].
पा० Pânini[1].
पिं० Pingala's Khandah-sûtra, ed. Weber, Indische Studien, vol. viii.
पू० मी० Gaimini's Mîmâmsâ-darsana.
फि० Sântanava's Phit-sûtra, ed. Kielhorn. Leipzig, 1866.
बृ० Brihad-devatâ (Adhyâya and Sloka), MS.
बृ० उ० Brihad Âranyaka Upanishad.
म० Mahâbhâshya, ed. Kielhorn[1].
मनु० Manu Smriti.
मुं० उ० Mundaka Upanishad.
मै० उ० Maitri Upanishad.
वा० सं० Vâgasaneyi Samhitâ.
वेदां० Bâdarâyana's Vedânta-sûtras.
श० (ब्रा०) Satapatha Brâhmana.
शि० Pâninîya Sikshâ for Rig-veda (Sloka), Indische Studien, vol. iv. pp. 360 seqq.
श्वे० उ० Svetâsvatara Upanishad.

[1] Vârttikas have been referred to by पा० with four figures, giving the Sûtra in Pânini and the number of the Vârttika in Kielhorn's edition of the Mahâbhâshya. म० has been used instead of पा० when Sâyana does not quote the Vârttika itself, but Patañgali's note on it. When a Vârttika does not occur in the Mahâbhâshya, but in the Kâsikâ only, it has been referred to by का० with four figures. This does not mean that Sâyana had just this or that book in his mind, but is only meant to facilitate the finding of a quotation. When references are given to the Paribhâshendusekhara, this does not mean that Sâyana knew this book, but that the passage referred to will help to explain Sâyana's meaning. A few grammatical quotations have not been found either in the Mahâbhâshya or in the Kâsikâ. In these cases the Sûtra of Pânini has been given with an * after it. They will be found in the Siddhânta Kaumudî or in the Ganapâtha, etc.

CORRIGENDA.

VOLUME I.

Varietas Lectionis, p. 39. l. 15. Read सकाशाद्धि for °द्धि

P. 202. last line. Read मादयाध्यै

P. 204. l. 4. Read प्राप्यानि with the MSS., and see Pân. VIII. 4, 30. (But Rv. Bh. X. 89, 6, all MSS. give प्राप्यमाणः.)

P. 388. l. 7. Read वयं।

P. 777. l. 26. Read सिंधुर्गाम

VOLUME II.

Varietas Lectionis, p. 8, to p. 142. l. 23 (III. 4, 11). Not only P 2 and P 3, but also the other Saṁhitâ and Pada MSS. read आस्तां with the udâtta on the first syllable. See RV. VII. 2, 11.

Varietas Lectionis, p. 61. l. 20. Read 'Sâyaṇa mistook क्रतं for क्रतः.'

P. 230. l. 18. Read निष्ठा° for निःष्ठा°

P. 481. l. 12. Read देवीनां for देवानां. The MS. Ca has देवानां, but see Rv. Bh. I. 113, 15, and VI. 28, 3; Âśv. VI. 14, 17.

P. 487. l. 28, and p. 879. last line. Read द्यावापृथिव्यं for °पृथिवीयं. This is the reading of the Sâyaṇa MSS., though the Anukr. has °पृथिवीयं.

P. 578. l. 31. Read उपं। वः। आ। ईषे। See Rv. I. 186, 4.

P. 589. l. 13. Read ते° आ° for ते° ऐ°

P. 626. l. 20. Read अंजिऽभिः।

VOLUME III.

Varietas Lectionis, p. 14. l. 11. Read 'P. 213. l. 16. (103, 7.)

P. 116. l. 15. Read एतानि।

P. 767. l. 2. Read सांग्रामिकाणि for संग्रा°. See Pân. IV. 4, 1[illegible].

SRI RAMAKRISHNA MISSION INSTITUTE OF CULTURE
LIBRARY
CALCUTTA

VOLUME IV.

Varietas Lectionis, p. 20. l. 9 (to X. 60, 7). See also the extract from the Bṛihaddevatâ in M. M. Hymns of the Gaupâyanas, Journal of the Royal Asiatic Society, N. S. vol. ii (1866), p. 445.

P. 33. l. 6. Read सदा नूतन° for यदा। नूतन°

BGR 595
Received on 12 MAR 1962
12 MAR 1962

THE RAMAKRISHNA MISSION INSTITUTE OF CULTURE
LIBRARY
CALCUTTA